Bible. O.T. Sanskrit. 1843.

THE

HOLY BIBLE

IN THE

SANSCRIT LANGUAGE.

VOL. IV.

CONTAINING THE PROPHETICAL BOOKS.

TRANSLATED OUT OF THE ORIGINAL TONGUES

BY THE

CALCUTTA BAPTIST MISSIONARIES,

WITH NATIVE ASSISTANTS.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS, CIRCULAR ROAD.

1872.

इङ्गरेजीयभाषातो व्याकृतः

धर्मग्रन्थः।

तस्य चतुर्थं खण्डं

यद्वा

यिशायियादीनां भविष्यद्वादिनां

ग्रन्थसङ्ग्रहः।

कलिकातानगरे

ग्रन्थोऽयं मुद्राङ्कितोऽभूत्।

शकाब्दाः १७९४ ई १८७२।

REC. AUG 1882
THEOLOGICAL
SEMINARY.

सूचीपत्रं।

	पृष्ठं।
यिशायियस्य भविष्यद्वचनानि,	१
यिरिमियस्य भविष्यद्वचनानि,	१३९
यिरिमियस्य विलापसंहिता,	२७७
यिहिष्केलस्य भविष्यद्वचनानि,	२८८
दानीयेलस्य भविष्यद्वचनानि,	४०१
होशेयस्य भविष्यद्वचनानि,	४३०
योयलस्य भविष्यद्वचनानि,	४५०
आमोसस्य भविष्यद्वचनानि,	४५८
ओबदियस्य भविष्यद्वचनानि,	४७५
योनाहोपाख्यानं,	४७७
मीखायस्य भविष्यद्वचनानि,	४८१
नहूमस्य भविष्यद्वचनानि,	४९४
हबक्कूकस्य भविष्यद्वचनानि,	४९९
सफनियस्य भविष्यद्वचनानि,	५०५
हगयस्य भविष्यद्वचनानि,	५११
सखरियस्य भविष्यद्वचनानि,	५१५
मालाखे भविष्यद्वचनानि,	५३३

अशुद्धशोधनं ।

पृष्ठे ।	पङ्क्तौ ।	अङ्के ।	अशुद्धं ।	शुद्धं ।
७६	१३	१८	उपमास्यधर्मीश्वरं	उपमास्यध्व ईश्वरं
१०६	७	१	कूपदर्शिता	कूपदर्शितो
—	२२	५	धर्म्मा	धर्म्मौ
११०	१७	१	विश्वस्तवान्	नरोऽकरोत्
१७७	१७	२२	सम्मच्छति	सम्मयच्छति
२१३	३०	३०	भमे	भूमे
३७२	१	३५	इमे	इमाः
३७६	१३	२१	म त्कृतं	मत्कृतं
४४९	१७	२	च्चेममादत्त	च्चेममादत्त्व

कतिपयस्थानेष्वक्षराणां क्षुद्रभागा भग्नाः स्थानभ्रष्टा वा जाताः, विद्वान् पाठकस्तादृशान् दोषान् संशोधयितुमर्हति ।

PROPERTY OF PRINCETON REC. AUG 1882 THEOLOGICAL SEMINARY.

यिशायियस्य भविष्यद्वचनानि।

---

१ प्रथमोऽध्यायः।

१ यिहूदीयानां पापेषु यिशायियस्य विलपनं ५ पापिनां दण्डः १० मिथ्याधर्म्मस्य भञ्जनं १६ पापात् परावर्त्तितुं विनयनं २१ लोकानां पापकथनं २४ साधोर्हित-भोगस्यासाधोरहितभोगस्य च कथनञ्च।

१ उषियो योथम आहसो हिष्कियश्चैतेषां यिहूदीयनृपाणां राजत्व-
काले यिहूदादेशं यिरूशालमाख्यनगरञ्चाधि यान्यामोससुतेन यिशा-
यियेन लेभिरे तानि दर्शनानीमानि।

२ अत्रावधीयतां हे द्यौ र्हे भूः संश्रूयतां त्वया।
स्वयं परेश्वरो यस्माद् वाक्यमेतत् प्रभाषते॥
अपुष्यन्त मया पुत्रा अवर्ध्धन्त च यत्नतः।
ते तु मद्वैपरीत्येन जाताः स्वामिविरोधिनः॥
३ गौरपि स्वामिनं वेत्ति तृणपात्रं प्रभोः खरः।
इस्रायेलीयवंशस्य तादृग् ज्ञानं न विद्यते।
मामकीनप्रजानाञ्च नास्ति तादृग् विवेचना॥
४ हा हा पापमते जाते जनते दोषभारिणि।
दुष्कृतकर्म्मणां वंश सूनवः कुलकज्जलाः।
सन्त्यक्तः परमेशो यैरवज्ञातश्च यै र्मदात्।
इस्रायेलः पवित्रो राट् पुनस्तस्मात् पराङ्मुखैः॥
५ क्वाहन्तव्याः पुन र्यूयं कृतद्रोहा मुहुर्मुहुः।
व्यथितं मस्तकं कृत्स्नं निखिलं हृदयं क्लमि॥
६ किञ्चिन्न विद्यते स्वस्थम् आपादतलमस्तकात्।
सर्व्वं क्षतैः प्रहाराङ्कै र्नवाघातैश्च जर्ज्जरं।
अपीडितैरबद्धैश्च तैलेनाप्यमृदूकृतैः॥
७ युष्माकं देश उच्छिन्नः पुर्य्यो दग्धाश्च वह्निना।
प्रत्यक्षैः परदेशीयै र्युष्मद्भूमिश्च भुज्यते।
सा च जाता समुच्छिन्ना ध्वंसितेव विदेशिभिः॥
८ सीयोन् कन्यावशिष्टास्ति द्राक्षाक्षेत्रे यथोटजं।

तुम्ब्युद्याने कुटीरो वा रुद्धं वा नगरं यथा ॥
अस्माकं वै निमित्तं चेद् उद्वृत्तं लघु किञ्चन । ९
न पर्य्यशेषयिष्यत् स सैन्याध्यक्षः परेश्वरः ।
सदृशा अभविष्याम सिदोमेन तदा वयं ।
अमोरायाः समानत्वम् अवाप्स्याम न संशयः ॥
हे सिदोमीयशास्तारः शृणुतोक्तिं परेशितुः । १०
गृह्णीतेशस्य नः शास्त्रं हे अमोरीयमानवाः ॥
अलं यज्ञबहुत्वेन ब्रूते ऽदः परमेश्वरः । ११
मेषाहुत्या त्वहं पूर्णः बलेः पीनस्य मेदसा ।
गोमेषाणामजानां वा नाहं तुष्यामि शोणितैः ।
मम साक्षादुपस्थातुं कृते युष्माभिरागमे । १२
पादै र्मत्प्राङ्गणानां को मर्द्दनं वोऽभियाचते ॥
नैवानर्थकनैवेद्यं दातुं भूयो व्यवस्यत । १३
मन्ये घृणास्पदं धूपं दर्शं विश्रामवासरं ।
घोषणञ्च समाजस्य न सहे पापपर्व्वणी ॥
मनो मे द्वेष्टि युष्माकम् अमावस्यामहोत्सवान् । १४
मम ते भारवज्जाता वोढुं श्रान्तो भवाम्यहं ॥
कृताञ्जलिषु युष्मासु मीलयिष्यामि लोचने । १५
बहु प्रार्थयमानेषु नैव संश्रोस्यते मया ।
युष्मदीयकरा यस्मात् पूरिताः सन्ति शोणितैः ॥
स्नान् प्रक्षाल्य शुचीभूय मद्दृष्टेः स्वीयकर्म्मणां । १६
दूरीकुरुत दुष्टत्वं निवर्त्तध्वं कुकर्म्मतः ॥
सत्कर्म्माण्येव शिक्षध्वं चेष्टध्वं न्यायसेवने । १७
संशोधयत चान्यायं पितृहीनश्च बालकः ।
युष्माभीरक्ष्यतां द्रोहाद् विधवा चानुगृह्यतां ॥
परेशो ब्रूत आयात मिथोऽस्माभि र्विचार्य्यतां । १८
सिन्दूरवर्णतुल्यानि यानि पापानि सन्ति वः ॥
तान्यपि शुक्लवर्णानि भविष्यन्ति तुषारवत् ।
शोणा लाक्षेव ये दोषास्ते भविष्यन्ति लोमवत् ॥
यूयं चेदत्र सन्तुष्टा भवथादेशपालिनः । १९
द्रव्यै र्देशोद्भवैस्तर्हि परमैः परितर्प्स्यथ ॥

२० यदि यूयन्त्वसन्तुष्टा भवथ प्रतिरोधिनः।
निश्चितं सकलास्तर्हि खड्गभुक्ता भविष्यथ।
यतः परेश्वरस्यास्याद् वाक्यमेतद्विनिर्गतं॥
२१ हा सती नगरी यासीत् सा जाता गणिका कथं।
तस्यां न्यायेन पूर्णायां स्वयं धर्म्मा ऽवसत् पुरा।
अधुना किन्तु तन्मध्ये वसन्ति नरघातकाः॥
२२ तव रूप्यं मलं जातं मदिरा जलदूषिता॥
२३ शास्तारस्तव दुर्द्दान्तास्तस्कराणाञ्च सङ्गिनः।
उपहारप्रियाः सर्व्वे तथोत्कोचानुधाविनः॥
पितृहीनस्य बालस्य विचारं ते न कुर्व्वते।
विधवाया विवादश्च नैव तानुपतिष्ठति॥
२४ ततो हेतोरिदं वाक्यं प्रभु र्ब्रूते परेश्वरः।
वाहिनीनामधीशः स इस्रायेले बलप्रदः॥
आः स्वारीणां विनाशेन लप्स्ये ऽहं दुःखमोचनं।
उचितं स्वीयवैरिभ्यः फलं दायिष्यते मया॥
२५ त्वयि हस्तार्पणं कृत्वा सम्यक् मार्क्ष्यामि ते मलं।
सर्व्वं परिहरिष्यामि युष्मदीयं कुसीसकं॥
२६ पूर्व्वं विचारकैस्तुल्यान् ते दास्यामि विचारकान्।
प्रथमै र्मन्त्रिभिस्तुल्यान् ते दास्यामि च मन्त्रिणः॥
पश्चाद् धर्म्मपुरीत्येव तव नाम भविष्यति।
त्वं सती नगरीत्येव नामधेयञ्च लप्स्यसे॥
२७ विचारादेव सीयोनः परित्राणं प्रसेत्स्यति।
तस्याः शोधितचित्तानां नृणां त्राणञ्च धर्म्मतः॥
२८ द्रोहिणां युगपद् ध्वंसः पापिनाञ्च भविष्यति।
लोपं यास्यन्ति सर्व्वे च परेशत्यागिनो नराः॥
२९ एलद्रुमेभ्य इष्टेभ्यो यूयं लज्जामवाप्स्यथ।
आरामेभ्यः प्रियेभ्यश्च विवर्णत्वं गमिष्यथ॥
३० यस्माद् गलितपत्रस्य कस्यचिदेलशाखिनः।
आरामस्याम्बुहीनस्य वा समाना भविष्यथ॥
३१ शणवद् भविता श्रीमान् तस्याचारः स्फुलिङ्गवत्।
युगपज्ज्वलितारौ तौ कोऽपि न शमयिष्यति॥

२ द्वितीयोऽध्यायः।

१ ख्रीष्टीयराज्यस्य कथनं ६ परमेश्वरत्यागस्य दोषनिर्णयः १० तदीयमहिम-
कारणात् तस्माद् भेतुं विनयश्च।

आमोससुतेन यिशायियेन यिहूदादेशं यिरूशालमनगरञ्चाधि १
दर्शनमिदं लेभे।

पाश्चात्येषु दिनेष्वेषा घटना सम्भविष्यति। २
मन्दिरं परमेशस्य यस्मिन् तिष्ठति पर्व्वते।
सर्व्वेषां भूधराणां स मस्तके स्थापयिष्यते।
सकलेभ्यो गिरिभ्यश्च प्रोन्नतः स भविष्यति।
सर्व्वजातीयलोकाश्च प्रसरिष्यन्ति तं प्रति॥
बहुदेशीयलोकैश्च प्रस्थायेत्थं गदिष्यते। ३
एत सर्व्वे वयं यामः परमेशस्य पर्व्वतं।
याकूबीयेश्वरस्यैव प्रगच्छामो निकेतनं।
स्वमार्गान् शिक्षितास्तेन चरिष्यामस्तदध्वसु॥
सीयोनाद् यत उत्पद्य शास्त्रं विस्तारयिष्यते।
यिरूशालमतश्चैव पारमेश्वरभारती॥
नानाजातीयलोकानां माध्यस्थं स करिष्यति। ४
बहुदेशीयलोकानां शासनञ्च विधास्यति॥
ताडयित्वा ततः सर्व्वे निजासीन् कूटकानि हि।
खश्नन्तीश्च लवित्राणि घटयिष्यन्ति मानवाः॥
न पुन र्जातिरेकान्यां प्रत्यसिं चालयिष्यति।
अभ्यासो रणविद्यायास्तै र्न कारिष्यते पुनः॥
कुरुध्वमागमं यूयं हे याकूबीयवंशजाः। ५
वयं दीप्त्यां परेशस्य करवाम गमागमौ॥
त्वया स्वीयप्रजास्त्यक्तास्ते याकूबीयवंशजाः। ६
यतो मोहेन सम्पूर्णाः पूर्व्वदेशोद्भवेन ते।
अभवन् गणकास्तुल्याः पिलेष्टीयनरैश्च ते।
जनैरितरवंशीयैः सार्द्धं मैत्रञ्च कुर्व्वते॥
परिपूर्णो ऽभवत् तेषां देशो दुर्वर्णहेमभिः। ७
तदीयद्रव्यराशीनां सीमा का ऽपि न विद्यते।

वाजिपूर्णाभवन्नीदृत् सन्ति चासंख्यका रथाः ॥
८ सम्पूर्णश्चाभवत् तेषां देशो देवैरनीश्वरैः ।
स्वीयहस्तकृतं कर्म्म चैकैकेन प्रणम्यते ।
स्वकीयाङ्गुलिभि र्यच्च कल्पितं तत् प्रणम्यते ॥
९ प्राप्नोति भुग्नतां मर्त्त्यो नीचताञ्च नरोत्तमः ।
अपराधं ततस्तेषां नैव त्वं क्षन्तुमर्हसि ॥
१० शैलं प्रविश हे पापिन् धूल्यां वान्तर्हितो भव ।
परमेशस्य भीमत्वात् तच्छ्रियश्च प्रतापतः ॥
११ नराणाम् उच्चदृष्टिश्च समवाप्स्यति नीचतां ।
मनुष्याणाञ्च गर्व्वो ऽपि खर्व्वत्वं प्रगमिष्यति ।
उन्नंस्यति दिने तस्मिन् केवलः परमेश्वरः ॥
१२ उदेष्यति परेशस्य दिनं तद् वाहिनीपतेः ।
उपर्य्युपरि सर्व्वस्य सुतुङ्गस्योच्चवस्तुनः ।
उपर्य्युपरि सर्व्वस्य प्रोन्नतायस्य वस्तुनः ।
तानि वस्तूनि सर्व्वाणि समवाप्स्यन्ति निम्नतां ॥
१३ उपर्य्युपरि सर्व्वेषाम् उदग्राणां स्वदैर्घ्यतः ।
प्रांशूनाञ्चैरसाख्यानां लिवानोनस्थशाखिनां ।
सर्व्वेषां वाशनीयानां चाल्लोनाख्यपलाशिनां ॥
१४ उपर्य्युपरि सर्व्वेषाम् उन्नतानां महीभृतां ।
उपर्य्युपरि सर्व्वेषाम् उदग्राणां महाश्मनां ॥
१५ उपर्य्युपरि सर्व्वस्य प्रांशोरुच्चगृहस्य च ।
उपर्य्युपरि सर्व्वस्य प्राचीरस्य दृढस्य च ॥
१६ उपर्य्युपरि पोतानां तार्शीशार्णवगामिनां ।
उपर्य्युपरि सर्व्वेषां चारूणां शिल्पकर्म्मणां ॥
१७ चित्तानामुन्नति र्नृणां समवाप्स्यति नीचतां ॥
मनुष्याणाञ्च गर्व्वोऽपि खर्व्वत्वं प्रगमिष्यति ।
उन्नंस्यति दिने तस्मिन् केवलः परमेश्वरः ॥
१८ असाराणाञ्च देवानां साकल्यं विप्रनङ्क्ष्यति ॥
१९ शैलगुहाः प्रवेक्ष्यन्ते नरै र्भौमबिलानि च ।
पर्य्युद्वेजयितुं क्षौणीं समुत्थानं प्रकुर्व्वतः ।
परमेशस्य भीमत्वात् तच्छ्रियश्च प्रतापतः ॥

मनुष्यैः स्वनिमित्तञ्च पूजायै ये विनिर्म्मिताः। २०
असाराः सकला देवा रौप्याः स्वर्णमयाश्च ते।
समाक्षेप्स्यन्त आखूनां जतुकानाञ्च सम्मुखं॥
शैलगर्त्तान् प्रवेक्ष्यद्भिः गिरीणां विवराणि च। २१
पर्य्युद्वेजयितुं चौर्णीं समुत्थानं प्रकुर्व्वतः।
परमेशस्य भीमत्वात् तच्छ्रियश्च प्रतापतः॥
निवर्त्तध्वं नराद् यूयं नासया प्राणधारिणः। २२
यस्मादेतादृशो मर्त्त्यः किम्मूल्यो गणयिष्यते॥

---

३ तृतीयोऽध्यायः।

१ पापे लोकानां दुःखं १२ प्रधानजनैरुपद्रवः १६ स्त्रीणामहङ्कारस्य दण्डश्च।

पश्य प्रभुः परेशो यो वाहिनीनामधीश्वरः। १
स यिरूशालमो मध्याद् यिहूदाविषयस्य च।
आलम्बञ्चावलम्बञ्च स्वयं दूरीकरिष्यति।
अन्नावलम्बनं सर्व्वं सर्व्वञ्चाम्भोऽवलम्बनं॥
वीरं सैन्यं नियन्तारम् आचार्य्यं गणकं गुरुं। २
गुल्मपतिं महल्लोकं मन्त्रिणं दक्षशिल्पिनं। ३
मन्त्रपाठे विदग्धञ्च नरं स दवयिष्यति॥
करिष्यामि शिशूनेव शास्तृंस्तेषां नृणामहं। ४
आधिपत्यं ततस्तेषाम् अनुष्ठास्यन्ति बालकाः॥
जना द्रोहं करिष्यन्ति मित्रे मित्रं नरे नरः। ५
वृद्धं बाधिष्यते बालो नरसिंहं नराधमः॥
कश्चित् स्वभ्रातरं धृत्वा स्वीयपैतृकुलोद्भवं। ६
गदिष्यत्यस्ति वस्त्रं ते त्वमस्माच्छासको भव।
विषयो नष्टकल्पोऽयं तव हस्तगतो भवेत्॥
तदा वक्ष्यति शप्त्वा स न भविष्याम्यहं भिषक्। ७
नास्त्यन्नं नास्ति वस्त्रं वा मामकीननिकेतने।
नैव देशाधिपत्ये ऽहं नियोक्तव्यः कथञ्चन॥
सकम्पास्ति यिरूशालम् यिहूदाः पतनोन्मुखः। ८
परेशस्य विरुद्धानां तेषां जिह्वाः कृतानि च।

यस्मान्महौजसो तस्य प्रतिकुर्व्वन्ति लोचने ॥
९ साक्ष्यं यच्छति तेषाञ्च प्रतिकूलं मुखाकृतिः।
सिदोमिव स्वपापञ्च नाच्छाद्य ज्ञापयन्ति ते।
आः प्राणान् धिक् नृणां तेषां स्वीयानिष्टविधायिनां ॥
१० क्षेमं भविष्यतीत्येव यूयं वदत धार्म्मिकान्।
यस्मात् ते परिभोक्ष्यन्ते स्वकीयकर्म्मणां फलं ॥
११ दुर्जनं धिक् अधन्यः स हस्ताभ्यां तस्य यत् कृतं।
प्रतिक्रिया यथायोग्या तस्य यस्मात् प्रसेत्स्यति ॥
१२ पीड्यन्ते मत्प्रजा बालैः पाल्यन्ते स्त्रीभिरेव च।
हे प्रजा नायका वो ये ते सन्त्युत्पथदर्शकाः।
नाशयन्तश्च कुर्व्वन्ति युष्मदीयगतेः क्रमं ॥
१३ परमेशो विवादार्थं समुत्थानं करिष्यति।
जनानाञ्च विचारार्थं स भविष्यत्युपस्थितः ॥
१४ प्रजानाञ्च तदीयानाम् अध्यक्षा अग्रगाश्च ये।
विवादे तै र्नरैः सार्द्धं प्रवृत्तः स गदिष्यति।
मामकं गोस्तनीक्षेत्रं युष्माभिरेव नाशितं।
दीनेभ्योऽपहृतं वित्तं युष्मद्गेहेषु विद्यते ॥
१५ किमर्थं मत्प्रजाः पिंष्ठ दीनस्यास्यञ्च घर्षथ।
इत्याह वाहिनीस्वामी प्रभुरेव परेश्वरः ॥
१६ परमेशः पुन र्ब्रूते सियोनोद्भवयोषितः।
गर्व्वन्ति दीर्घकण्ठाश्च चरन्त्यटन्नलोचनाः।
क्राम्यन्ति लघुगत्या च पादयोः शिञ्जितेन च ॥
१७ मुण्डयिष्यत्यतः शीर्षं सियोनीयस्त्रियां प्रभुः।
नग्नयिष्यति तासाञ्च गुह्यदेशं परेश्वरः ॥
१८ प्रभुस्तस्मिन् दिने सर्व्वम् अलङ्कारं हरिष्यति।
नूपुरान् वालपाशांश्च चन्द्राकारललाटिकाः ॥
१९ कर्णिका वलयांश्चापि शिरःप्रच्छादनीस्तथा।
२० किरीटान् पदसूत्राणि कटिदेशस्थमेखलाः ॥
सौरभाधारपात्राणि मन्त्रसम्बलिता लिपीः।
२१ अङ्गुलीवेष्टनान्येव नासिकाभूषणानि च ॥
२२ पार्व्ववस्त्राणि प्रावारान् अन्तरीयाणि सम्पुटान्।

दर्पणानि तथा चोलान् उष्णीषान् प्रावृतानि च॥ २३
परन्तु सैारभस्थाने दुर्गन्धः सम्भविष्यति। २४
मेखलायाः स्थले रज्जु धम्मिल्लस्य च मुण्डता।
वृहत्परिच्छदस्थाने शाणजं कटिबन्धनं।
सैान्दर्य्यस्य स्थले चापि कलङ्कः सम्भविष्यति॥
पतिष्यन्त्यसिना वीरास्तव तेजो रणेन च॥ २५
पुर्य्या द्वाराणि शोकेन श्रावयिष्यन्ति रोदनं। २६
वर्जिता च प्रभावेन सा भूमावुपवेच्यति॥

---

४ चतुर्थोऽध्यायः।

विपत्काले खीष्टस्य राज्याश्रयस्थानकथनं।

तदैकं पुरुषं धृत्वा सप्त वक्ष्यन्ति योषितः। १
वयं भोक्ष्यामहे स्वान्नं धरिष्यामो निजाम्बरं।
त्वं स्वनाम्नैव विख्याप्य निन्दातो ऽस्मान् समुद्धर॥
तदानीं प्राप्तरक्षाणाम् इस्रायेलो न्टणां कृते। २
पल्लवः परमेशस्य श्रीः शोभा च भविष्यति।
फलोदयश्च देशस्य तेजो रूपञ्च दास्यति॥
रक्षितो यश्च सीयोने शेषो वा यिरूशालमे। ३
जीवनार्थं हि यः कश्चिल्लिखितो यिरूशालमे।
पवित्र इति नाम्नैव स विख्यातो भविष्यति॥
विचारकात्मना किन्तु दाहकेनात्मना च प्राक्। ४
सियोनोद्भवयोषाणां मलं धाविष्यति प्रभुः।
यिरूशालममध्याच्च तदीयारक्त् प्रमार्च्यति॥
सियोनाद्रेश्च यत् स्थानं स्थलं यच्च सभार्थकं। ५
दिवा मेघश्च धूमश्च रात्रै। दीप्तानलप्रभा।
तत् सर्व्वस्योपरिष्टाद्धि परेशेन तनिष्यते।
युज्यते छादनं यस्मात् सर्व्वस्मिन्नेव तेजसि॥
उटजं तद् दिवा छायां दास्यति ग्रीष्मवारिणीं। ६
दुर्द्दिने वृष्टिकाले च शरणस्थानमाश्रयं॥

५ पञ्चमोऽध्यायः।

१ परमेश्वरस्य द्राक्षाक्षेत्रे कथनं ८ लोभस्य दण्डः ११ सुखभोगिनां दण्डः १८ दुष्टलोकानां दण्डः २० उपद्रावलोकानां दण्डः २५ एतेषां दण्डयतां वर्णनं।

१ स्वमित्रमधि गानं मे संश्रोतुं यूयमर्हथ।
द्राक्षाक्षेत्रीयगीतं हि बन्धो र्गायिष्यते मया।
मद्बन्धो र्गोस्तनीक्षेत्रम् आसीत् पीने महीधरे॥
२ प्राचीरं तत्र दत्त्वा स वहिष्कृत्य च प्रस्तरान्।
श्रेष्ठानरुहद् वृक्षान् मध्ये वेश्म च निर्म्ममे।
कुण्डमप्यखनीत् तत्र रससङ्ग्रहणार्थकं।
प्रत्यैच्छिष्ट च स द्राक्षास्तत् लम्रातानजीजनत्॥
३ हे पौरा यिरूशालमीया हे यिहूदीयमानवाः।
यूयं कुरुत मत्क्षेत्रं माञ्चाधि धर्म्मनिर्णयं॥
४ यदकार्षं तदन्यत् किं मत्क्षेत्रार्थं करिष्यते।
द्राक्षाः प्रतीक्षमाणाय तत् लम्रातानदात् कुतः॥
५ मत्क्षेत्रे यत् करिष्यामि युष्मांस्तत् प्रवदाम्यहं।
वारणीं दवयिष्यामि पशुभिस्तच्चरिष्यते।
प्राचीरं तस्य भङ्क्ष्यामि पादै र्मर्द्दिष्यते च तत्॥
६ करिष्यामि च शून्यं तद् अच्छस्थमपरिष्कृतं।
कण्टकान् गोक्षुरांश्चैव तत् समुत्पादयिष्यति।
मेघांश्चाज्ञाप्य तत्राहं नानुज्ञास्यामि वर्षणं॥
७ यस्मात् परेश्वरस्यैव वाहिनीनामधीशितुः।
इस्रायेलीयवंशो ऽयं गोस्तनीक्षेत्रमस्ति हि।
यिहूदीयमनुष्याश्च तस्यैव प्रमदावनं॥
स प्रत्यैच्छिष्ट साधुत्वम् उदपादि तु मारणं।
प्रत्यैच्छिष्ट च धर्म्मं स उदपादि तु रोदनं॥
८ स्थानस्याभावतो यावन्नैका वत्स्यथ मीर्दति।
तावद् गृहे गृहं युंक्थ स्थलं सञ्जयथ स्थले।
ये यूयं हन्त युष्माकं सन्तापः सम्भविष्यति॥
९ मदीयकर्णयो र्ब्रूते परेशो वाहिनीपतिः।
अवश्यं बहुवेश्मानि विशालान्युत्तमानि च।

उत्सन्नानि भविष्यन्ति वर्जितानि निवासिभिः॥
दशगोचर्म्ममाने च द्राक्षाक्षेत्रे ऽपि केवलं। १०
सेरकैकप्रमाणो हि द्राक्षारसो जनिष्यते।
दशसेरकमानाच्च वीजात् शस्यस्य सेरकः॥
नरान् धिक् प्रगे उन्निद्रान् सुराया अनुधाविनः। ११
सायं विलम्बमानांश्च मदेनोद्दीप्तचेतसः॥
वीणानेवलयो र्वाद्यं ध्वनिर्वंशीमृदङ्गयोः। १२
मदिरा च नृणां तेषां महाभोज्येषु युज्यते॥
क्रिया किन्तु परेशस्य तैः पर्य्यालोच्यते नहि।
नैव हस्तकृतं तस्य कर्म्म तैः समवेक्ष्यते॥
तस्मान्निर्वासयिष्यन्ते ज्ञानाभावेन मत्प्रजाः। १३
क्षेष्यन्ते क्षुधयाध्यक्षाः शोक्ष्यन्ति च तृषा जनाः॥
तस्माच्च प्रेतलोको ऽपि जातो ऽतीवोदरम्भरिः। १४
परिमाणमतिक्रम्य व्याददाति निजाननं॥
तत्रैवावतरिष्यन्ति श्री र्जनौघश्च नीवृतः।
तस्याः कोलाहलश्चापि तथा तच्छ्लाघिनो नराः॥
प्राप्स्यति भुग्नतां मर्त्त्यो नीचताञ्च नरोत्तमः। १५
उच्चानामुच्चदृष्टिश्च समवाप्स्यति नीचतां॥
उन्नंस्यति विचारेण परेशो वाहिनीपतिः। १६
पवित्रो मंस्यते धर्म्मात् स पवित्रो महाबलः॥
मेषवत्साश्चरिष्यन्ति देशं चारणभूमिवत्। १७
खिलक्षेत्राणि पीनानां भोक्ष्यन्ते च प्रवासिनः॥
धिक् मायारज्जुहस्तांस्तान् य आकर्षन्ति पातकं। १८
पापमाहर्त्तुमुद्युक्ताः शकटीयगुणैरिव॥
ते वदन्ति त्वरित्वा स करोतु स्वक्रियां द्रुतं। १९
तदानीं दर्शनं तस्या अस्माभिः परिलप्स्यते॥
इस्रायेलीयराजस्य पवित्रस्य च मन्त्रणा।
उपस्थाय व्रजेत् सिद्धिं ज्ञास्यामस्तां तदा वयं॥
तान् नरान् धिक् असद् ये सत् पुनः सत् प्रवदन्त्यसत्। २०
तमो जानन्ति चालोकम् आलोकञ्च पुनस्तमः।
तिक्तं जानन्ति मिष्टञ्च मिष्टं तिक्तरसं पुनः॥

२१ नरान् धिक् स्वमतौ प्रज्ञान् स्वदृष्टौ च मनस्विनः ॥
२२ वीरान् धिक् मदिरापाने विक्रमान् मद्यमिश्रणे ॥
२३ उत्कोचं प्राप्य यै र्दोषी निर्द्दोषीक्रियते नरः ।
मनुष्याद् धार्म्मिकात् किन्तु स्वीयधर्म्मो वियुज्यते ॥
२४ अतो हेतो र्यथा नालं चर्व्यते वह्निजिह्वया ।
शिखायाः स्पर्शनादेव संक्षीयन्ते तृणानि वा ।
तथैवैतस्य वंशस्य मूलं क्लेदं गमिष्यति ।
रजोवच्चोड्डयिष्यन्ते तत्पुष्पाणि विहायसि ॥
यस्मात् तै र्गर्हितं शास्त्रं वाहिनीस्वामिनः प्रभोः ।
इस्रायेलः पवित्रस्य राज्ञो वाक् च निराकृता ॥
२५ स्वप्रजाभ्यस्ततः क्रुद्धः प्रजज्वाल परेश्वरः ।
करं विस्तार्य्य तांश्चाहन् तेनाकम्पन्त पर्व्वताः ।
न्यपतंश्च शवास्तासां मार्गेष्ववकरा इव ॥
न तु शाम्यत्यनेनापि क्रोधस्तस्य कथञ्चन ।
करस्तस्यास्ति विस्तीर्ण इदानीमपि पूर्व्ववत् ॥
२६ दूरदेशिन आनेतुं तेन संस्थापितो ध्वजः ।
तांश्चानेतुं मह्योप्रान्तात् तारशब्द उदीर्य्यते ।
पश्य ते लघुपादाश्च समायान्त्यतिसत्वरं ॥
२७ नैको ऽपि दृश्यते क्लान्तो नैको ऽपि स्खलनोन्मुखः ।
न याति स रिपुस्तन्द्रां न निद्रां वा निषेवते ।
न वा विमोच्यते तेन कटिदेशस्य बन्धनं ।
तदीयोपानहोः सूत्रं न च प्राप्नोति शीर्णतां ॥
२८ सुतीक्ष्णाः सन्ति तद्बाणा आयतानि धनूंषि च
अश्वानाञ्च खुरा वज्रा चक्राणि चक्रवातवत् ॥
२९ सिंह्या इव रवस्तस्य युवकेशरिणो यथा ।
तथा हलोच्चनादं स गर्ज्जन् लोकं धरिष्यति ।
अपनेष्यति दूरञ्च रक्षकेण विवर्ज्जितं ॥
३० सामुद्रगर्ज्जनेनेव गर्ज्जिष्यति च तं प्रति ।
स तु वीक्षिष्यते भूमिं तिमिरेणावृता हि सा ।
ऊर्द्ध्वं त्रासतडिन्मध्ये द्यौश्चान्धकारयिष्यते ॥

६ षष्ठोऽध्यायः ।

१ यिशायियस्य दर्शनं ६ कठिनलोकान् प्रति तस्य प्रेषणं ११ अवशिष्टलोकानां रक्षणं ।

यस्मिन् वर्षे महीपाल उषियो मृत्युमाप्तवान् । १
तस्मिन् वर्षे मयालम्भि प्रभोरीशस्य दर्शनं ॥
आसीदासीन उत्तुङ्गे प्रोच्चसिंहासने हि सः ।
तदीयराजवस्त्रान्तैः परिपूर्णञ्च मन्दिरं ॥
तस्योर्द्धे च सिराफाख्या अवातिष्ठन्त सेवकाः । २
षट्पक्षास्तु त एकैको द्वाभ्यामावृणुयान्मुखं ।
द्वाभ्यामाच्छादयेत् पादौ द्वाभ्यां कुर्य्यात् खसर्पणं ॥
तदानीमुच्चशब्देन प्रावोचंस्ते परस्परं । ३
पुण्यः पुण्यः पुनः पुण्यः परेशो वाहिनीपतिः ।
परिपूर्णास्ति तस्यैव महिम्ना कृत्स्नमेदिनी ॥
शिलामूलान्यकम्पन्त घोषणस्योच्चशब्दतः । ४
मन्दिरस्यान्तरञ्चापि तदा धूमैरपूर्य्यत ॥
मयोक्तं हा हतो ऽस्म्यद्य यदशुच्यधरेण च । ५
अशुच्यधरलोकानां मध्ये च वसता मया ।
प्रत्यक्षो वीक्षितो राजा परेशो वाहिनीपतिः ॥
सन्दंशेन तदाङ्गारम् उष्णमादाय वेदितः । ६
एकः सिराफ उड्डीय मत्समीपं समागमत् ॥
ममास्यं स्पर्शयित्वा च मामिमां वाचमब्रवीत् । ७
पश्य संस्पृष्टमेतेन तावकीनाधरद्वयं ।
तस्माल्लुप्तो ऽपराधस्ते तव पापञ्च शोत्स्यति ॥
अपरं कं प्रहेष्यामि कश्च यास्यति नः कृते । ८
प्रभोरेतादृशी वाणी समश्रावि मया तदा ।
प्रत्युक्तञ्चाहमत्रास्मि भवान् मां प्रहिणोत्विति ॥
ततो मां सो ऽब्रवीदेतद् गत्वा ब्रूहि जनानिमान् । ९
सम्यक् संश्रुत्य युष्माभि र्बोधो नैवाभिगम्यतां ।
सम्यग् दृष्ट्वा च युष्माभि र्ज्ञानं नैवाभिलभ्यतां ॥
त्वमेतेषां मनुष्याणां मनः स्थूलं विधत्स्व हि । १०
वधिरीकुरु कर्णौ च लिप्ता रुन्धि च लोचने ॥

न चेदालोक्य नेत्राभ्यां कर्णाभ्यां विनिशम्य च।
बुद्धा च मनसा पापे त्यक्ते तैः स्वास्थ्यमाप्स्यते॥
११ हे प्रभो कति कालं तदिति पृष्टस्तदा मया।
सो ऽब्रवीच्छून्यतां यावद् अभावेन निवासिनां।
नगराणि न यास्यन्ति नराभावाद् गृहाणि च।
यावद् भूमिरपि ध्वंसाद् उच्छिन्ना न भविष्यति॥
१२ दवितेषु परेशेन नरेषु घोरशून्यता।
यावन्न दृश्यते देशे तावदित्थं भविष्यति॥
१३ शेच्यते दशमांशो ऽत्र सो ऽपि ध्वंसिष्यते पुनः।
एलाल्लोनाख्यसालानां छिन्नानान्तु यथा ध्रुवः।
पूतो वंशो नृणां तेषां स्थास्यति ध्रुववत् तथा॥

---

७ सप्तमोऽध्यायः।

१ आहसं प्रति यिशायियस्य सान्त्वनकथनं १० आहसं प्रति आश्चर्य्यचिह्नप्रकाशनं १७ अशूरीयलोकै र्भाविदण्डप्रकाशनञ्च।

१ यदोषियस्य पौत्त्रेण योथमस्य तु सूनुना।
आहसेन यिहूदीये देशे राज्यं व्यधीयत॥
तदानीमेव रित्सीन आरामीयमहीपतिः।
पेकहश्च रिमाल्यीय इस्रायेलीयपार्थिवः।
इमौ युद्धं करिष्यन्तौ यिरूशालममागतौ।
पुरं तत्तु पराजेतुं नैव ताभ्यामशक्यत॥
२ तत इफ्रयिमारूढ आरामो ऽस्तीति वाग् यदा।
दायूदीयकुलोत्पन्नं नृपमज्ञापयन् जनाः।
तदा तस्य प्रजानाञ्च चित्तान्याशानि वेपथुं।
समीरणेन संक्षुब्धा आरण्यपादपा इव॥
३ यिशायियं तदानीन्तु प्रावोचत् परमेश्वरः।
त्वं स्वसन्तानमादाय शारयाशूबनामकं।
ऊर्द्धतडागगामिन्याः प्रणाल्या अन्तमाव्रज।
रजकक्षेत्रपार्श्वस्थे मार्गे चाहसमालय॥
४ इमां वाचञ्च तं ब्रूहि सयत्नः शान्तिमाचर।

मा बिभीहि त्वदीयञ्च चित्तं मा विक्लवं भवेत्॥
करिष्येते किमेतौ द्वौ सधूमेन्धनपुच्छकौ।
रित्सीनारामयोः कोपो रोषो रिमाल्यजस्य वा॥
आरामेणेफ्रयीमेण रिमाल्यस्य सुतेन च। ५
कृता त्वत्प्रातिकूल्येन यस्मादेषा कुमन्त्रणा॥
यिहूदादेशमाक्रम्य प्रबाधिष्यामहे वयं। ६
अस्माकञ्च कृते तस्य करिष्यामो विदारणं।
नियोक्ष्यामस्च तद्राज्ये टावेलस्यात्मसम्भवं॥
प्रभुः परेश्वरस्तस्माद् इमां वाचं प्रभाषते। ७
नैव प्राप्स्यति दार्ढ्यं सा न वा सेत्स्यति मन्त्रणा॥
आरामस्यैव मूर्द्धास्ति नाम्ना दम्मेशका पुरी। ८
मूर्द्धा दम्मेशकायास्च रित्सीनोऽस्ति च पूर्व्ववत्॥
वर्षाणां पञ्चषष्टीनां मध्ये भङ्गमवाप्य च।
जातित्वादिफ्रयीमीया जाति भ्रंशिष्यते किल॥
इफ्रयीमस्य मूर्द्धास्ति शोमिरोणाभिधा पुरी। ९
शोमिरोणस्य मूर्द्धा च रिमाल्यस्यात्मसम्भवः॥
न विश्वसिथ चेद् यूयं स्थैर्य्यं तर्हि न प्राप्स्यथ॥
आहसन्तु पुनर्व्वारम् अब्रवीत् परमेश्वरः। १०
चिह्नं किञ्चन याचस्व स्वप्रभुं परमेश्वरं। ११
नीचे किं वोन्नते स्थाने दृश्यं याचस्व लक्षणं॥
आहसेन तदा प्रोक्तं तन्न याचिष्यते मया। १२
परीक्षा परमेशस्य नैव कारिष्यते मया॥
ततोऽवादि परेशेन बुध्यध्वं दायुदान्वयाः। १३
युष्माभिः किं मनुष्याणां खेदनं मन्यते लघु।
क्रियते च ततो हेतोरीश्वरस्यापि खेदनं॥
तस्माद् दास्यति युष्मभ्यं चिह्नमेकं प्रभुः स्वयं। १४
कुमारीं गर्भिणीं पश्य सा पुत्रं प्रसविष्यते।
इम्मानुयेल इत्येव तस्य नाम करिष्यति॥
यावद् वरयितुं साधु निराकर्त्तुमसाधु च। १५
स न ज्ञास्यति तावत् स दधि क्षौद्रञ्च भोक्ष्यते॥
किञ्च वरयितुं साधु निराकर्त्तुमसाधु च। १६

यस्मिन् काले हि बालेन ज्ञानप्राप्तेन शक्ष्यते।
तस्मात् प्रागेव याभ्यां त्वं भीत उद्विजसे ऽधुना।
तयो भूपालयो र्देशः परित्यक्तो भविष्यति॥
१७ यस्मिन् दिने यिहूदातं इफ्रयीमो ऽभवत् पृथक्।
तदारभ्याद्यपर्य्यन्तं यादृक् कालस्तु नाभवत्।
त्वां प्रजांस्तव गोत्रञ्च पैतृकं प्रापयिष्यति।
परेशस्तादृशं कालम् अशूराधिपमानयन्॥
१८ दिने तस्मिन् परेशश्च तारशब्दमुदीरयन्
समाक्रंस्यति मिस्रीयनदीप्रान्तस्थमक्षिकाः।
तथैवाशूरदेशस्थान् भ्रमरान् सकलानपि॥
१९ ते च सर्व्वे समागत्य करिष्यन्ति निजाश्रयं।
उपत्यकासु शुष्कासु पर्व्वतानां दरीषु च।
सर्व्वस्मिन् कण्टकस्तम्बे स्थले गोचारणे तथा॥
२० तस्मिन् दिने फरान्नद्याः पारादेव प्रभुः क्षुरं।
परकीयं गृहीत्वाथैरशूरीयमहीपतिं।
उत्तमाङ्गस्य तेनैव प्रकरिष्यति मुण्डनं।
प्रच्छेत्ता पादलोमानि श्मश्रु चापि हरिष्यति॥
२१ तस्मिन् काले च यः कश्चिद् एकां तरुणधेनुकां।
सहितां मेषयुग्मेन रक्षित्वा पालयिष्यति॥
२२ दुग्धबाहुल्यलाभात् स दधिभोगेन पोक्ष्यति।
देशे शेषै र्जनै र्यस्माद् दधि क्षौद्रञ्च भोक्ष्यते॥
२३ मुद्रासाहस्रमूल्यञ्च लतासाहस्रसंयुतं।
अधुना गोस्तनीक्षेत्रं यत्र कुत्रापि विद्यते।
तत् स्थानं कण्टकै र्व्याप्तं गोक्षुरैश्च भविष्यति॥
२४ शरानादाय चापञ्च तज्जनैरभियास्यते।
निखिलो व्याप्स्यते यस्माद् देशः कण्टकगोक्षुरैः॥
२५ खन्यन्ते च खनित्रै र्ये सकला उपपर्व्वताः।
नाभियास्यति तान् को ऽपि घोरान् कण्टकगोक्षुरैः।
गावस्तत्र चरिष्यन्ति मर्द्दिष्यन्त्यवयश्च तान्॥

८ अष्टमोऽध्यायः ।

१ अशूरीयलोकैरिस्रायेलो भविष्यद्दण्डः ५ यिहूदाया भविष्यद्दण्डः ९ दण्डस्यानिवार्य्यत्वं ११ साधुव्रणां सान्त्वनायाः कथा १९ देवार्च्चिनां दुःखं ।

अपरं परमेशो मामिमां वाचमभाषत । १
त्वया फलकमादाय महान्तं लेखनार्थकं ।
महेर्शालल्हाश्वासम् अर्थात् सत्वरलुण्ठनं ।
इदं लौकिकलेखन्या वाक्यं तत्र विलिख्यतां ॥
अत्र याजक ऊरीयः सिखरीयश्च कीर्त्तितः । २
पुत्रो यिबिरिखीयस्य विश्वास्यौ दाविमौ जनौ ।
सत्यस्यैव प्रमाणार्थं साक्षिणौ मे निरूपितौ ॥
मया चोपगता भार्य्या सगर्भा सुषुवे सुतं । ३
तदानीं परमेशो मामिमां वाचमभाषत ।
महेर्शालल्हाश्वास इति नाम धरत्वयं ॥
यस्मादयं पित मातरिति स्पष्टं प्रभाषितुं । ४
यस्मिन् शिक्षिष्यते काले तस्मात् प्रागेव निश्चितं ।
दम्मेशकस्य वित्तानि शोमिरोणस्य च श्रियं ।
अशूरीयनृपस्याग्रे दूरं वक्ष्यन्ति मानवाः ॥
परेशः पुनरालप्य मामिमां वाचमुक्तवान् ॥ ५
मन्दगामिशिलोहस्य जलं त्यक्ता जना इमे । ६
यद् रिमाल्यीयरित्सीने महानन्दं प्रकुर्व्वते ॥
पश्य प्रभुरहं तस्मात् समानेष्यामि तान् प्रति । ७
फरान्नद्याः पयोराशिं सुविस्तीर्णं महाबलं ।
अशूरीयमहीपालं तस्य कृत्स्नञ्च गौरवं ॥
स सर्व्वाणि खखातानि तोयैः सम्पूरयिष्यति ।
उच्चत्वाच्च खकूलानि सर्व्वाण्यतिक्रमिष्यति ॥
यिहूदादेशमभ्येत्य खवन् स ह्लावयिष्यति । ८
गलदेशं मनुष्याणां परिस्पृक्ष्यति चोर्म्मिभिः ।
तदीयपक्षविस्तारो विस्तारं पूरयिष्यति ।
नोव्हतः का तु सा मीव्हत् इम्मानूयेल सा तव ॥
यूयं हे जातयो हिंस्त्र भग्नत्वञ्च प्रगच्छत । ९

सर्व्वे शृणुत हे यूयं दूरदेशनिवासिनः ।
स्वकटीः परिबध्नीत भग्नत्वञ्च प्रगच्छत ।
स्वकटीः परिबध्नीत भग्नत्वञ्च प्रगच्छत ॥
१० कुरुध्वं मन्त्रणाञ्चापि सा भविष्यति निष्फला ।
वाक्यं किञ्चन भाषध्वं तत् स्थिरं न भविष्यति ।
यस्मादिम्मानूयेलोऽस्ति सङ्गी नः स्वयमीश्वरः ॥
११ बाहो र्बलं प्रकाश्येदं मामवोचत् परेश्वरः ।
एतद्देशीयलोकानां पथि मे वारयन् गमं ॥
१२ यद् राजद्रोह इत्येतै र्मनुष्यैरभिधीयते ।
तद् राजद्रोह इत्युक्त्वा युष्माभि र्नाभिधीयतां ।
एतषां भीषणाद् भीतिस्त्रासो वा प्राप्यतां नहि ॥
१३ सेनाध्यक्षः परेशस्तु युष्माभिः परिपूज्यतां ।
स भवेद् वो भयस्थानं स युष्मत्त्रासभाजनं ॥
१४ पुण्यभूमिः स एवास्ति स त्विस्रायेलवंशयोः ।
क्षते व्याघातकः शैलो ग्रावा च स्खलनार्थकः ।
उन्माथश्चापि पाशश्च यिरूशालमवासिनां ॥
१५ स्खलित्वा बहवस्तत्र भविष्यन्ति निपातिताः ।
प्रगमिष्यन्ति भङ्गं वा बन्धनं वापि पाशिताः ॥
१६ मम शिष्येषु साक्ष्यं त्वं बधानाज्ञाञ्च मुद्रय ॥
१७ याकूवीयान्वयाद् यस्तु छादयत्याननं निजं ।
तं परेश्वरमाकाङ्क्षन् प्रतीक्षामाचराम्यहं ॥
१८ पश्य मां बालकांश्चैतान् परेशेनार्पितान् मयि ।
इस्रायेलि च चिह्नार्थं चित्रार्थञ्च निरूपितान् ।
सेनाध्यक्षपरेशेन सियोनाद्रिनिवासिना ॥
१९ भौता मायाविनश्चैव कूजका जपकारिणः ।
युष्माभिरनुपृच्छ्यन्तामिति किं कोऽपि वो वदेत् ॥
प्रष्टव्यस्तु प्रजाभिः कः किं स्वकीयेश्वरो नहि ।
प्रमीता जीवतां भाग्यं किं प्रष्टव्याः कथञ्चन ॥
२० शास्त्रं साक्ष्यञ्च प्रष्टव्ये इति वाग् यै र्न गद्यते ।
किम्भूताः सन्ति ते लोकास्तेऽरुणोदयवर्ज्जिताः ॥
२१ पर्य्यटिष्यन्ति देशं ते क्लेशापन्नाः क्षुधातुराः ।

क्षुधार्त्तश्च कुपित्वा ते शपमानाः स्वभूपतिं।
स्वकीयमीश्वरञ्चापि भविष्यन्त्यूर्द्ध्वदृष्टयः॥
वीक्षिष्यन्ते भुवञ्चापि क्लेशो ध्वान्तश्च भास्यति। २२
तमः सङ्कटयुक्तञ्च तत्तमस्तु विनेष्यते॥

---

९ नवमोऽध्यायः।

१ विपत्काले ख्रीष्टस्य जन्मना कर्म्मभिश्च मानवानां सुखस्य वर्णनं ८ इस्रायेलो भविष्यद्दण्डः १३ तेषां व्याजत्वदौरात्म्ययोः कृते दण्डश्च।

यत्रासीत् सङ्कटस्तत्र तिमिरं न भविष्यति। १
प्रागवज्ञायुता तेन सिवूलूनस्य या नीवृत्।
नप्तालेरपि या नीवृत् पश्चात् सा मानयिष्यते।
भूमिः समुद्रतीरस्था यर्द्दनस्तरणस्थलं।
मनुष्यैरन्यजातीयैः क्लिष्टं गालीलमण्डलं॥
अभ्राम्यन् ये जना ध्वान्ते ते पश्यन्ति महाद्युतिं। २
मृत्युच्छायावृते देशे ये निवासमकुर्व्वत।
उपरिष्टान्मनुष्याणां तेषां ज्योतिरुदेति च॥
त्वया सा वर्ध्यते जाति र्महानन्दैश्च योज्यते। ३
त्वत्साक्षात् ते च हृष्यन्ति शस्यकर्त्तनहर्षवत्।
लोप्त्राणां भागकाले वा प्रोल्लसन्तो नरा इव॥
यस्माद् धुरयुगं तस्य लगुडं स्कन्धघातिनं। ४
दण्डं तत्ताडकस्यापि स्वयं त्वं भग्नवानसि।
मिदियानीयलोकानां पराजयदिने यथा॥
तुमुलार्थं सुसज्जस्य कृत्स्ना सज्जास्त्रधारिणः। ५
शोणिते लोठितश्चापि तस्य सर्व्वपरिच्छदः।
उभौ निरूपितौ दाहे हुताशनस्य भक्ष्यवत्॥
अजन्यस्मत्कृते बालः पुत्रो ऽस्मभ्यमदायि च। ६
अधिराज्यञ्च तस्यैव स्कन्धे सम्प्रतितिष्ठते॥
तस्य नामानि चाश्चर्य्यो मन्त्री विक्रान्त ईश्वरः।
तातः शाश्वतकालस्य शान्तिराजश्च सन्ति हि॥
अनन्ते आधिराज्यस्य वृद्धिशान्ती भविष्यतः। ७

दायूदीयासनासीन तस्मिन् राज्यं प्रकुर्व्वति॥
अद्यारभ्य ध्रुवं कालं यावद् राज्यस्य सुस्थितिः।
स्थिरता च विचारेण धर्म्मेण चैधयिष्यते।
सेनाध्यक्षपरेशस्यानुरागात् तत् प्रसेत्स्यति॥
८ प्रहिता प्रभुना चैका याकूवं प्रति भारती।
इस्रायेलीयलोकानां मध्यस्थानमवातरत्॥
९ विदुस्तां ते जनाः सर्व्वे दर्पिणः स्फीतचेतसः।
इफ्रयीमीयलोकाश्च शोमिरोणनिवासिनः॥
१० ते वदन्तीष्टकाः पेतु र्निचेष्यामो महाश्मनः।
अच्छेद्युडुम्बरं काष्ठं निमास्यामह एरसं॥
११ रित्सीनस्य विपक्षांस्तु जनेभ्यस्तेभ्य उन्नतान्।
तेषां द्वेष्टॄन् सयत्नांश्च कुरुते परमेश्वरः॥
पूर्व्वदिक्स्था अरामीयाः पश्चिमस्थाः पिलेष्टिनः।
इस्रायेलं ग्रसन्ते च सिंहा व्यात्तमुखा इव॥
१२ न तु शाम्यत्यनेनापि क्रोधस्तस्य कथञ्चन।
करस्तस्यास्ति विस्तीर्ण इदानीमपि पूर्व्ववत्॥
१३ न परावर्त्त्यते चित्तं जनैः स्वताडकं प्रति।
सेनाध्यक्षपरेशस्यान्वेषणं ते न कुर्व्वते॥
१४ उत्तमाङ्गानि पुच्छांश्च तृणराजान् तृणानि च।
इस्रायेलत एकस्मिन् दिन उच्छेत्स्यति प्रभुः॥
१५ वृद्धा मान्याश्च ये लोका उत्तमाङ्गानि सन्ति ते।
अन्टतादेशकारी यो भाविवादी स पुच्छवत्॥
१६ एतद्देशीयलोकानां भ्रामकाः पथदर्शकाः।
ते यान् नयन्ति पन्थानं ते नश्यन्ति निपातिताः॥
१७ तरुणेषु ततस्तेषां प्रभु र्नैव प्रहृष्यति।
नैव बालाननाथान् स विधवा वानुकम्पते॥
यस्मात् कपटिनः सर्व्वे दुराचाराश्च सन्ति ते।
सकलानाञ्च वक्त्राणि कुर्व्वन्ति धर्म्मनिन्दनं॥
न तु शाम्यत्यनेनापि क्रोधस्तस्य कथञ्चन।
करस्तस्यास्ति विस्तीर्ण इदानीमपि पूर्व्ववत्॥
१८ अग्निवद् ग्रासकं पापम् अत्ति कण्टकगोक्षुरान्।

ज्वलितञ्च वनं घोरं धूमस्तम्भे विलीयते॥
सेनाध्यक्षपरेशस्य कोपाग्नीलायते धरा। १९
मनुष्या इन्धनानीव वह्नेर्भक्ष्यं भवन्ति च।
न करोति दयां कोऽपि स्वीयभ्रातरि काञ्चन॥
दक्षिणे दंदशूकानां तेषां संवर्द्धते क्षुधा। २०
सव्ये च कुर्व्वतां ग्रासं तेषां तृप्तिर्न जायते।
एकैकः स्वीयबाहोश्च मांसं भक्षयति स्वयं॥
इफ्रयीमो मिनःशिश्च पर्य्यश्नीतः परस्परं। २१
पुनराक्राम्यतस्तौ च यिहूदामेकयोगतः॥
न तु शाम्यत्यनेनापि क्रोधस्तस्य कथञ्चन।
करस्तस्यास्ति विस्तीर्ण इदानीमपि पूर्व्ववत्॥

---

१० दशमोऽध्यायः।

१ अन्यायकारिणां दण्डनं ५ अभिमान्यशूरीयनरपतेरागमनकथनं १२ तस्य विनाशः २० इस्रायेलोऽवशिष्टानां लोकानां रक्षणं २४ अशूरराजस्य सैन्यानामागमनवर्णनं ६२ तस्य विनाशकथनञ्च।

आ व्यवस्थापकान् धिक् तान् अधर्म्मं स्थापयन्ति ये। १
राजाज्ञालेखकान् धिक् तान् क्लेशदाज्ञा लिखन्ति ये॥
दीनान् निवारयिष्यन्तः सुविचारस्य मार्गतः। २
मत्प्रजानां दरिद्राणां हरिष्यन्तोऽधिकारितां॥
विधवानां स्त्रियां वित्तं लुठिष्यन्तश्च लोप्त्रवत्।
अनाथानां हरिष्यन्तः सर्व्वस्वं तस्करा इव॥
आ दिने फलदानस्य यूयं किं प्रकरिष्यथ। ३
परिध्वंसस्य काले वा सुदूरादागमिष्यतः॥
साहाय्यार्थं तदानीञ्च प्रधाविष्यथ कं प्रति।
कुत्र स्थाने च रक्षार्थं स्वप्रतापं निधास्यथ॥
नितान्तं बद्धलोकानामधस्तात् सोऽवनंस्यति। ४
हतानाञ्च मनुष्याणामधस्तान्निपतिष्यति॥
न तु शाम्यत्यनेनापि क्रोधस्तस्य कथञ्चन।
करस्तस्यास्ति विस्तीर्ण इदानीमपि पूर्व्ववत्॥

५ आ अशूरीयराजो ऽसौ दण्डो मत्कोपसाधकः ।
लगुडस्तत्करस्थश्च मत्संरम्भविधायकः ॥
६ मया कपटिनीं जातिं प्रति स प्रेषयिष्यते ।
मदीयामर्षपात्राणां विरुद्धश्च नियोक्ष्यते ॥
कर्त्तव्यं लुण्ठनं तेन हर्त्तव्यानि धनानि च ।
मर्द्दितव्या मनुष्याश्च मार्गस्थः कर्द्दमो यथा ॥
७ न तु तस्यानुमानो ऽयं न तस्येदं मनोगतं ।
मतिं नाशयितुं तस्य बह्वी र्जातीश्च कर्त्तितुं ॥
८ यस्मात् स वक्ष्यमात्या मे किं न सर्व्वे नरेश्वराः
९ यद्वत् कर्कमिशं तद्वत् कल्णी किं न जिता मया ।
यथार्पदं हमातं किं न तथैव वशीकृतं ।
दशा दम्मेशकस्येव शोमिरोणस्य नास्ति किं ॥
१० शोमिरोणस्य मूर्त्तिभ्यो मूर्त्तिभ्यो यिरूशालमः ।
अतिमात्रं व्यशिष्यन्त येषां तच्चितमूर्त्तयः ।
राष्ट्राण्यसारदेवानां तान्यहार्षीत् करो मम ॥
११ शोमिरोणं मया यद्वत् जितं देवैः समाकुलं ।
तथा किं न यिरूशालम् जेष्यते विग्रहैः सह ॥
१२ कर्त्तव्यं प्रभुना यत्तु कर्म्म सीयोनपर्व्वते ।
यिरूशालमि पुर्य्याञ्च सकलं तत् प्रसेत्स्यति ॥
अशूरीयमहीशस्य चित्तगर्व्वस्य यत् फलं ।
ऊर्द्धदृष्टेश्च यत् तेजो मया तन्निग्रहीष्यते ॥
१३ यस्मात् स भाषते कर्म्म मम बाहो र्बलेन च ।
मज्ज्ञानेन च संसिद्धं तीक्ष्णबुद्धिरहं यतः ॥
देशानां सारयाम्यन्तान् कोषांस्तेषां हरामि च ।
तन्निवासिमनुष्यांश्च वीरवत् पातयामि च ॥
१४ अधरं स्वीयहस्तेन जातीनां वसु नीडवत् ।
त्यक्ताण्डानीव कृत्स्नाञ्च समग्रह्णं वसुन्धरां ।
को ऽपि नालोडयत् पक्षं कूजन् वा व्याददान्मुखं ॥
१५ काष्ठच्छेत्तु र्विरुद्धं किं कुठारो गर्व्वितो भवेत् ।
किं वेत्ति करपत्रं वा स्वं श्रेष्ठं करपत्रिणः ॥
यैः समुत्थाप्यते दण्डस्तान् स किं चालयिष्यति ।

काष्ठाच्छ्रेष्ठं नरं वा किं यष्टिरुत्थापयिष्यति ॥
सेनाधीशः प्रभु र्यस्तु तेनैव प्रभुना ततः। १६
मध्ये तदीयपीनानां कृशता प्रेषयिष्यते।
अग्निज्वालेव च ज्वाला तच्छ्रियोऽधो ज्वलिष्यति ॥
इस्रायेलस्य यो दीपः स भविष्यति वह्निवत्। १७
पवित्रस्तस्य राजा यः शिखावत् स भविष्यति ॥
तेन प्रज्वलनं गत्वा चैकस्मिन् दिवसे तदा।
सर्व्व एव ग्रसिष्यन्ते तस्य कण्टकगोक्षुराः ॥
तद्वृहच्छिष्टस्य सैन्योद्यानस्य च प्रभा। १८
आप्राणमांसपर्य्यन्तं वह्निना ध्वंसयिष्यते।
तेन स क्षयरोगीव क्षयग्रस्तो भविष्यति ॥
तदरण्येऽवशिष्टाश्च स्थास्यन्ति स्वल्पशाखिनः। १९
तेषाञ्च लेखितुं सङ्ख्या बालकेनापि शक्ष्यते ॥
इस्रायेल्यवशिष्टा ये त्राता याकूबवंशजाः। २०
नावलम्बिष्यते तै र्हि पुनः स्वताडकस्तदा।
इस्रायेलः पवित्रस्तु राजा यः परमेश्वरः।
सत्यत्वाश्रितचेतोभिरवलम्बिष्यते स तैः ॥
प्रत्यावर्त्तिष्यते शेषः शेषो याकूब एव सः। २१
ईश्वरं प्रति विक्रान्तं प्रत्यावर्त्तिष्यते पुनः ॥
हे इस्रायेल् जनास्ते ये सामुद्रसिकतोपमाः। २२
अवश्यं शेषभागो हि तेषां प्रत्यागमिष्यति।
प्रलयो निश्चितः सर्व्वं धर्म्मेण स्रावयिष्यति ॥
प्रलयं निश्चितं यस्मात् स सेनाधीश्वरः प्रभुः। २३
कृत्स्नाया अवने मध्ये तदा सम्पादयिष्यति ॥
तस्माद् ब्रूत इदं वाक्यं स सेनाधीश्वरः प्रभुः। २४
हे मदीयजनाः सर्व्वे सीयोनाद्रिनिवासिनः।
मा भीता भवताश्शूरात् स यष्ट्या वो हनिष्यति।
मिस्रीया इव दण्डञ्च वः प्रत्युत्थापयिष्यति ॥
स्वल्पकाले गते किन्तु मम कोपः शमिष्यति। २५
मम क्रोधस्च तस्यैव नाशमुत्पादयिष्यति ॥
सेनाध्यक्षः परेशस्च प्रापयिष्यति तं कशां। २६

ओरेबाद्रौ मिदीयानं यथा घोरप्रमापणं ॥
स्वीयदण्डञ्च विस्तार्य्य समुद्रस्योपरि प्रभुः।
मिसर्देशे यथा पूर्व्वं तथैवोत्थापयिष्यति ॥
२७ तस्मिन् दिने तव स्कन्धात् तस्य भारः पतिष्यति।
त्वद्ग्रीवातो युगं तस्य तदानीञ्च सरिष्यति।
अभिषेकप्रभावेन भङ्गं यास्यति तद् युगं ॥
२८ शत्रवो ऽयपुरं प्राप्य मिग्रोणं प्रति जग्मिरे।
मिग्मसे तैः स्वसामग्री रक्षणार्थं समर्पिता ॥
२९ दुर्गमार्गं त्वरित्वा ते गेवायां याप्यते निशा।
रामा विकम्पते तस्माद् गिव्यच्छौला पलायते ॥
३० हे गल्लीमाभिधे कन्ये विक्रोशोच्चस्वरेण हि।
शृणोतु लायिशा रावम् अनाथोता च दुःखिनी ॥
३१ परिभ्राम्यति मद्मेना गेवीमीया द्रवन्ति च ॥
३२ अद्यैव स रिपु र्नोब उपस्थास्यति निश्चितं।
सियोनाख्यकुमार्य्याश्च निवासो यो धराधरः।
तं यिरूशालमः शैलं प्रत्युद्बाहु र्भविष्यति ॥
३३ पश्य किन्तु परेशः स प्रभु र्वाहिन्यधीश्वरः।
लोकारण्यस्यशाखानां भीमं करोति कर्त्तनं ॥
द्रुमाणाञ्च सुदीर्घाणाम् उच्छेदो जायते ततः।
निपात्यन्ते च तेनैव प्रांशवो ऽपि पलाशिनः ॥
३४ उच्छिद्यन्ते च लोहेन काननस्य लता अपि।
पात्यते च बलिष्ठेन लिबानोनोपमं वनं।

---

११ एकादशोऽध्यायः।

१ ख्रीष्टीयराजत्वस्य निर्णयः ६ तदीयं फलं १० अन्यलोकानां जयनं यिहूदीयानां रक्षणञ्च।

१ ध्रुवाद् यिशयवंशस्य शाखिकैका जनिष्यते।
तन्मूलेभ्यः सतेजस्कः पल्लवः प्रभविष्यति ॥
२ तस्मिन् परेश्वरस्यात्मा चाधिष्ठानं करिष्यति।
स आत्मा प्राज्ञताबुद्धो र्मन्त्रणावीर्य्ययोस्तथा।

ज्ञानस्येश्वरभक्तेश्च भवत्येकक आकरः ॥
पारमेश्वरभक्त्यां स तीक्ष्णघ्राणो भविष्यति । ३
नैव लोचनयो दृष्ट्या विचारं स करिष्यति ।
नैव वा कर्णयोः श्रुत्या स विधास्यति शासनं ॥
स करिष्यति धर्म्मेण दीनानां धर्म्मनिश्चयं । ४
देशसंवासिनम्राणां याथार्थ्येन च पालनं ॥
स्वीयवक्त्रस्थदण्डेन स भूमिं ताडयिष्यति ।
मारयिष्यति दुष्टञ्च स्वोष्ठनिर्गतवायुना ॥
धर्म्मस्तत्कटिदेशस्य बन्धनं हि भविष्यति । ५
तथा श्रोणिस्थलं तस्य सत्यता वेष्टयिष्यति ॥
मेषवत्सेन सार्द्धञ्च वृको वासं करिष्यति । ६
शिशुच्छागेन सार्द्धञ्च चित्रव्याघ्रः शयिष्यते ॥
स्थास्यन्त्येकत्र वत्सश्च सिंहो मेषश्च मांसलः ।
सुक्षुद्रो बालकस्तेषां नायकश्च भविष्यति ॥
धेनुका भल्लुकी चापि प्रणयेन चरिष्यतः । ७
एकत्रैव शयिष्यन्ते शावका उभयोस्तयोः ।
मृगराजस्तदा गोवत् पलालाशी भविष्यति ॥
चक्रिणो विवरे क्रीडां करिष्यते स्तनन्धयः । ८
स्वकरं फणिनो गर्त्ते त्यक्तस्तन्यो निधास्यते ॥
कश्चन कस्यचिद्धिंसां कस्यचिद् वा विनाशनं । ९
कृत्स्ने मम पवित्राद्रौ कथञ्चिन्न करिष्यति ॥
यस्मादापो यथा कृत्स्नं छादयन्ति महार्णवं ।
तथा पारेश्वरं ज्ञानं पूरयिष्यति मेदिनीं ॥
यिशयस्य च यो व्रध्नो जातीनां तिष्ठति ध्वजः । १०
तमेवानुसरिष्यन्ति तत्काले सर्व्वदेशिनः ।
तद्विश्रामस्थलं तस्माद् भविष्यत्यतिशोभनं ॥
अशूरान्मिसराच्चापि पथ्रोषात् कूशदेशतः । ११
एलमाच्छिनियाराच्च सामुद्रद्वीपमण्डलात् ।
हमाताच्चावशिष्टा या भविष्यन्ति निजप्रजाः ।
प्रभुस्तासां हि शेषांशं निष्क्रेतुं तद्दिने पुनः ।
द्वितीयं वारमेव स्वं करं विस्तारयिष्यति ॥

१२ निमित्तं सर्व्वजातीनां ध्वजञ्चोत्थापयिष्यति ।
इस्रायेलो विकीर्णानां मनुष्याणां स सञ्चयं ।
चतसृभ्यो धरायाश्च दिग्भ्य एव करिष्यति ।
यिहूदायाश्च विच्छिन्नान् मानवान् संग्रहीष्यति ॥
१३ तदेफ्रायिम ईर्ष्यापि तिरोधानं गमिष्यति ।
यिहूदातो दुरात्मा च समुच्छिन्नो भविष्यति ॥
यिहूदां प्रति चेफ्रायिम् ईर्ष्यां नैवाचरिष्यति ।
इफ्रायिमि च दौरात्म्यं यिहूदा न करिष्यति ॥
१४ श्येनवत् तौ पिलेष्टीयान् पाश्चात्यानाक्रमिष्यतः ।
पूर्व्वदिक्स्थजनानां वित्तं मिलित्वा च हरिष्यतः ॥
करिष्यत इदोमे च मोयावे च करार्पणं ।
ग्रहीष्यन्ति तयोराज्ञामम्मोनीयकुलोद्भवाः ॥
१५ अब्धिखातञ्च मिस्रीयं परमेशो ऽभिशप्स्यते ।
चालयिष्यति हस्तञ्च फराते चण्डवायुना ।
तं नदञ्च प्रहारेण सप्तखातं विधास्यति ।
सपादुकमनुष्याणां सुतार्य्यञ्च करिष्यति ॥
१६ ततस्तदीयलोकानामस्सूराद् यो ऽवशेक्ष्यते ।
शेषभागस्य तस्यैव कृते पन्था भविष्यति ।
इस्रायेलो मिसर्देशाद् यात्राकाले यथाभवत् ॥

---

१२ द्वादशोऽध्यायः ।

रक्षार्थं परमेश्वरस्य प्रशंसनं ।

१ दिने तस्मिन्निदं वाक्यमुदाहारिष्यते त्वया ।
परेश त्वामहं स्तौमि त्वमासीः कुपितो मयि ।
निवृत्तः किन्तु कोपस्ते त्वयैवाहञ्च सान्त्वितः ॥
२ ईशः पश्य मम त्राता निर्भयो विश्वसिम्यहं ।
परमेशो बलं गानं त्राणञ्चाप्यभवन्मम ॥
३ त्राणोत्सादपि युष्माभि र्हृष्टैरुद्धृतां जलं ॥
४ तस्मिन् दिने च युष्माभिरिदं वाक्यं गदिष्यते ।
यूयं परेश्वरं स्तुध्वं तन्नाम्ना कुरुतार्थनं ।

सर्व्वजातीयलोकांश्च तस्य ज्ञापयत क्रियाः।
उन्नतं तस्य नामेति तान् स्मारयितुमुद्यताः॥
परेशं स्तुत गानेन प्रांशुकर्म्मा यतो ऽस्ति सः। ५
कृत्स्नायामवनावेतत् ज्ञाप्यन्तां सकला जनाः॥
हर्षनादेन गाय त्वं हे सियोननिवासिनि। ६
इस्रायेलः पवित्रो राट् तव मध्ये यतो महान्॥

---

१३ त्रयोदशोऽध्यायः।

१ अधिवाविलं भविष्यद्दण्डस्य निर्णयः ६ लोकानां दुःखं १७ वाविलस्य सर्व्वविनाशश्च।

लब्धदर्शनेनामोससुतेन यिशायियेन प्रकाशितं वाविलस्य भाग्यं। १

वृक्षैरभूषिते शैले यूयं स्थापयत ध्वजं। २
गोपुराणि पुरोगानां प्रविशेयुरमी यथा।
तथोच्चैस्तान् समाहूय स्वकरैः कुरुतेङ्गितं॥
मन्त्रिरूपितयोद्धृभ्य आदेशं दत्तवानहं। ३
क्रोधं मे सफलं कर्त्तुं प्रफुल्लानभिमानतः।
मामकानेव तान् वीरान् स्वयमाहूतवानहं॥
पर्व्वतेषु मनुष्याणां बहूनां श्रूयते रवः। ४
महत्या जनतायास्तु तत्र दृश्यत आकृतिः॥
जातिसङ्घस्य राष्ट्राणां सो ऽस्ति कोलाहलध्वनिः।
सेनाध्यक्षः परेशो हि योद्धुं सेनां परीक्षते॥
ध्वंसितुं वसुधां कृत्स्नां दूरदेशान्नभो ऽन्ततः। ५
स्वकोपास्त्राणि सङ्गृह्य समायाति परेश्वरः॥
यूयं विलपतासन्नं परेशस्य दिनं यतः। ६
सर्व्वशक्तिमता तच्च प्रेष्यते सर्व्वनाशकं॥
सकलानां करौ तस्मात् शैथिल्यं प्रगमिष्यतः। ७
सर्व्वमर्त्त्यस्य चित्तञ्च साध्वसेन गलिष्यति॥
भविष्यन्ति भयार्त्तास्ते व्यथाग्रस्ताः सयातनाः। ८
चालयिष्यन्ति चाङ्गानि यथा प्रसवकारिणी॥
परिद्रक्ष्यन्ति चान्योऽन्यं विस्मयोत्फुल्ललोचनाः।

भविष्यन्त्यग्निजिह्वेव ते सर्वे लोहिताननाः॥
९ वीक्षध्वं परमेशस्य दिनमायातुमुद्यतं।
निर्द्दयं कोपसंयुक्तं दीपितं क्रोधवह्निना॥
कृत्स्ना वसुन्धरा तेन नितान्तं ध्वंसयिष्यते।
उच्छेत्स्यन्ते च तन्मध्यात् पापिनस्तन्निवासिनः॥
१० मृगशीर्षादिनामानि नक्षत्राणि विहायसि।
नैव प्रकाशयिष्यन्ति स्वकीयोज्ज्वलतां तदा॥
सूर्य्यस्योदयकाले ऽपि सान्धकारो भविष्यति।
चन्द्रमाश्च निजज्योत्स्नां तदा नैव प्रदास्यति॥
११ तदा प्रवर्त्तयिष्येहं मर्त्ये पापस्य दण्डनं।
प्रापयिष्यामि दुर्वृत्तान् दोषाणामुचितं फलं॥
दर्पयुक्तमनुष्याणां शमयिष्यामि धृष्टतां।
द्रोहिणामभिमानञ्च नमयिष्याम्यहं तदा॥
१२ मनुष्यञ्च करिष्यामि बहुमूल्यं सुवर्णतः।
नरमेव च दुष्प्राप्यम् ओफीरीयहिरण्यतः॥
१३ सेनाध्यक्षपरेशस्य महाकोपे प्रकाशिते।
तदीयक्रोधवह्नेश्च दिवसे समुपस्थिते।
कम्पयिष्याम्यहं व्योम भूः स्वस्थानाच्चलिष्यति॥
१४ मनुष्यांश्च स्वजातीयान् एकैको ऽनुगमिष्यति।
स्वकीयदेशमेकैकः सम्पलायिष्यते नरः।
द्राविता हरिणी यद्वत् मेषो वा रक्षिवर्ज्जितः॥
१५ यः कश्चिल्लप्स्यते शेषः सो ऽसिविद्धो भविष्यति।
यो विलम्बिष्यते तत्र स खड्गेन पतिष्यति॥
१६ प्रत्यक्षं शत्रुभिस्तेषां क्षेप्स्यन्ते शिशवो भुवि।
गेहाल्लुण्ठिष्यते वित्तं हरिष्यन्ते स्त्रियो बलात्॥
१७ पश्य तेषां विरुद्धञ्च मादीयान् चोदयाम्यहं।
ते रौप्यं नहि मन्यन्ते नैव तुष्यन्ति काञ्चने॥
१८ तरुणाः पातयिष्यन्ति तृणां तेषां शरासनैः।
नैव कारिष्यते तैश्च कृपा गर्भफलं प्रति।
नेत्रे भविष्यतस्तेषां बालकेष्वपि निर्द्दये॥
१९ राष्ट्राणां मुकुटं वाबिल् कस्दीयानां शिरोमणिः।

ध्वंसिष्यते परेशेन सिदोमामरयोः समा॥
न पुनस्तत्र वत्स्यन्ति नराः के ऽपि कदाचन। १०
नाश्रयिष्यति तत् कश्चिद् आपौरुषपरम्परं॥
नैव तत्रारवीयो ऽपि स्वदूष्यं स्थापयिष्यति।
मेषान् न शाययिष्यन्ति तत्र वा मेषरक्षिणः॥
तत्र किन्तु शयिष्यन्ते जन्तवो मरुवासिनः। २१
वेश्मानि पूरयिष्यन्ते प्राणिभिः परिदेवकैः॥
आश्रयिष्यन्ति तत् स्थानं शावका उष्ट्रपक्षिणां।
दीर्घलोमै र्वनच्छागैस्तत्र नृत्यं करिष्यते॥
अट्टालिकास्वनाथासु मिथो गास्यन्ति जम्बुकाः। २२
सुखभोगिमनुष्याणां प्रासादेषु च पन्नगाः।
कालस्तस्याः समीपस्थो न विलम्बिष्यते दिनं॥

---

१४ चतुर्द्दशोऽध्यायः।

१ इस्रायेलं प्रति परमेश्वरस्य दया ३ वाविलं प्रति इस्रायेलः स्लाघाकथनं २४ अशूरीयान् प्रति भविष्यद्दण्डः २९ पिलेष्टीयानां भविष्यद्दण्डश्च।

अनुकम्पिष्यते नूनं याकूबं परमेश्वरः। १
इस्रायेलीयवंशं स पुनश्चानुग्रहीष्यति॥
तान् जनान् स्वीयदेशञ्च नीत्वा विश्रामयिष्यति।
तांश्चालम्ब्य विदेशीयाः सङ्घन्ते याकुबान्वये॥
लोका हस्तैश्च सन्धृत्य तान् नेष्यन्ति निजस्थलं। २
इस्रायेलीयवंशश्च परमेशस्य नीवृति।
तान् स्वदासान् स्वदासीश्च कृत्वा प्रयोक्ष्यते स्ववत्।
येषां वन्द्य आसंस्तान् रोधयिष्यन्ति वन्दिवत्।
प्रभुत्वञ्च करिष्यन्ति स्वकीयताडकेषु ते॥
यस्मिन् दिने परेशस्त्वां क्लेशादुद्वेगतो ऽपि च। ३
कष्टदायकदास्याच्च तीव्राद् विश्रामयिष्यति॥
तदा वक्ष्यसि दृष्टान्तं वाविलीयनृपं प्रति। ४
कीदृक् शाम्यति स क्लेष्टा सा च स्वर्णमयी पुरी॥
अभाङ्क्षीत् पापिनां यष्टिं राज्ञां दण्डं परेश्वरः॥ ५

६ जनानाहन्नसौ क्रुद्ध आघातेनाविसर्ज्जिना।
जातीरशाच्च कोपान्धो द्रोहेणानियतेन सः॥
७ विश्रामन्त्वधुना शान्ता सेवते कृत्स्नमेदिनी।
ततः सर्व्वत्र सर्व्वं हि हर्षाद् गातुं प्रवर्त्तते॥
८ त्वामुद्दिश्य प्रहृष्यन्ति देवदारूणि सर्व्वशः।
एरसाभिधसालाश्च लिवानोनगिरौ स्थिताः॥
यावत् त्वं पतितः शेषे तावदस्मान् निकर्त्तितुं।
छेत्ता नैव समायाति वागियं तैश्च गद्यते॥
९ अधःस्थः परलोको ऽपि त्वत्प्रवेशप्रतीक्षया।
सकम्पस्त्वां प्रति प्रेतान् उन्निद्रान् विदधाति हि॥
सकलानग्रगानेव नरलोकनिवासिनां।
सर्व्वजातीयभूपालान् उत्थापयति चासनात्॥
१० आलपन्तश्च सर्व्वे त्वां प्रभाषन्त इदं वचः।
क्षीणो वयमिव त्वं किम् अस्माभिश्चाभवः समः॥
११ तव श्री र्यन्त्रवाद्यञ्च परलोके ऽवतारितं।
कीटाः शय्या तवाधःस्था कृमयश्छादनं तव॥
१२ कीदृक् त्वं नभसो भ्रष्टो हे ज्योतिररुणात्मज।
पतितो ऽसि भुवि छिन्नो हे जातीनां निपातक॥
१३ त्वयावादि पुरा त्वेतत् समारोक्ष्याम्यहं दिवं।
करिष्ये स्वासनं प्रोच्चम् ऐशताराङ्गणादपि।
उत्तराया दिशः प्रान्ते निवत्स्यामि सभागिरौ॥
१४ भविष्याम्येशितुस्तुल्यो मेघोच्छ्रयसमाश्रितः॥
१५ पातालमेव कुण्डस्य तलं त्वन्त्ववरोक्ष्यसि॥
१६ त्वां दृष्ट्वा यत्नतो वीक्ष्य सर्व्वे विचारयिष्यते।
किमसौ स नरो येन पुरा क्षौणिरकम्प्यत।
येन च सर्व्वराष्ट्राणां विक्षोभः संव्यधीयत॥
१७ येनारण्यीकृता पृथ्वी तत्पुर्य्यश्च निपातिताः।
येन वन्दिमनुष्याश्च न विसृष्टा गृहं प्रति॥
१८ अन्यदेशीयलोकानां यावन्तो भूभृतो मृताः।
सत्कृतः शयते तेषाम् एकैकः स्वीयवेश्मनि॥
१९ शवागाराद् वहिस्त्वन्तु क्षिप्तो गर्हितवृक्षवत्।

हतानामभवो वर्त्म विद्धानामसिना नृणां।
खाताश्मस्ववतीर्णानां पादमर्द्दितदेहकः॥
शवागारस्य तैः सार्द्धम् अंशी त्वं न भविष्यसि। २०
नाशयित्वा स्वदेशं यत् त्वया स्वीयप्रजा हताः।
न स्मर्त्तव्यः पुन र्वंशो दुर्वृत्तानां कदाचन॥
तत्सन्तानबधो भूयात् पितॄणां दोषकारणात्। २१
न चेदवाप्य वृद्धिं ते वशीकृत्य च मेदिनीं।
कृत्स्नं सम्पूरयिष्यन्ति नगरै र्भूमिमण्डलं॥
भाषते भारतीमेतां सेनाध्यक्षः परेश्वरः। २२
तद्विपक्षो ऽहमुत्थाय नाम शेषञ्च बाबिलः।
कुलं वंशञ्च लोप्स्यामीत्युक्तिः सेनापतेः प्रभोः॥
अहं तां शल्लकीराष्ट्रं विधास्यामि सरोमयं। २३
तस्या विध्वंसमार्ज्जन्या करिष्यामि च मार्ज्जनं।
भाषते भारतीमेतां सेनाध्यक्षः परेश्वरः॥
स प्रभुः पृतनाध्यक्षः शप्त्वैतदपि भाषते। २४
कल्पितं यन्मया तद्धि भवितव्यं न संशयः।
मया यन्मन्त्रितं तच्च समवाप्स्यति सिद्धतां॥
भंक्त्वाशूरं स्वदेशे ऽहं मर्द्दिष्यामि निजाद्रिषु। २५
मत्प्रजाभ्यो युगं तस्य तदैवावसरिष्यति।
तासाञ्च स्कन्धतस्तस्य धुस्तदा निपतिष्यति॥
धरां कृत्स्नामधीयं हि मन्त्रणा मन्त्रिता मया। २६
एष एव च हस्तो मे विस्तीर्णः सर्व्वजातिषु॥
सेनाध्यक्षपरेशस्य मन्त्रणां को निवारयेत्। २७
विस्तीर्णं तेन हस्तञ्च कः पुनः परिवर्त्तयेत्॥

यस्मिन् वर्षे आहसो राजा ममार तस्मिन्निदं भाग्यसूचकं वचनं प्रचकाशे। २८

त्वदाघातकदण्डस्य भङ्गो यदभवत् ततः। २९
त्वं हे देश फिलेष्टीय मा कुरुष्व महोत्सवं॥
मूलतः सर्पवंशस्य फणी यस्माज्जनिष्यते।
स्वविसर्पिविषास्यश्च फलं तस्य भविष्यति॥

३० दीनपुत्राश्चरिष्यन्ति शयिष्यन्ते ऽधनाः सुखं।
क्षुधया मारयिष्यामि मूलकं तावकन्त्वहं।
अवशिष्टस्तवांशो यः स तयैव हनिष्यते॥
३१ क्रन्द त्वं हे पुरद्वार परिदेवस्व हे पुरि।
हे पिलेष्टीय देश त्वं सर्व्वथा यास्यसि क्षयं॥
उत्तराया दिशो यस्माद् धूम आयात्यनीकवत्।
तदीयश्रेणिभुक्तानां को ऽपि नास्ति पृथग्जनः॥
३२ भिन्नदेशीयदूतेभ्यः किं नु दातव्यमुत्तरं।
परमेशः सियोनस्य भित्तिमूलमतिष्ठिपत्।
तस्मादेव प्रजास्तस्य दुर्गता आश्रयन्ति तत्॥

---

१५ पञ्चदशो ऽध्यायः।

अशूरीयस्य भूपतेरागमनात् मोयाबो भविष्यद्दुर्दशा।

मोयाबदेशस्य भाग्यं।

१ निशायामारमोयाबं विनष्टं ध्वंसयिष्यते।
निशायां कीरमोयाबं विनष्टं ध्वंसयिष्यते॥
२ आरोहन्तश्च यास्यन्ति तज्जना देवमन्दिरं।
दीबोनञ्च गमिष्यन्ति तुङ्गस्थानेषु रोदितुं॥
निबौ च मेदिबायाञ्च मोयाबो विलपिष्यति।
सर्व्वेषां मुण्डितो मुण्डः सर्व्वेषां श्मश्रु कर्त्तितं॥
३ शाणवस्त्राः करिष्यन्ति ते मार्गेषु गमागमौ।
गृहपृष्ठे च हट्टे च सर्व्वेषां श्रोष्यते रुतं।
क्रन्दनञ्च मनुष्याणां मन्दिरादवरोहतां॥
४ हिश्बोनमिलियाली च चीत्कारं प्रकरिष्यतः।
दूरस्थं यहसं यावत् तयोः संश्रोष्यते रवः॥
आर्त्तनादं करिष्यन्ति मोयाबस्यास्त्रधारिणः।
निजप्राणेषु तस्यापि भारबोधो भविष्यति॥
५ मोयाबमधि मच्चित्तं कुरुते परिदेवनं।
त्रिहायणीव यास्यन्ति सोयारं तत्पलायिताः॥
आरोहन्तो विलापेन लूहीतस्यायनं गिरिं।

नाशात् पथि रुदन्तश्च होरोणायिमगामिनि॥
निम्रीमस्य जलप्राया भूमिरूषा भविष्यति। ६
शुष्कघासस्तृणैस्यक्तो वर्ज्जितो हरिताङ्कुरैः॥
निजोपार्ज्जितवित्तानां शेषं सर्व्वस्वमेव च। ७
खवन्त्या आरवाख्यायाः पारं वच्यन्ति ते ततः॥
मोयाबस्य च सीमानं चीत्कारः परियास्यति। ८
इग्लायिमपुरं यावत् श्रोष्यते तस्य रोदनं।
बेरेलीमपुरं यावत् श्रोष्यते तस्य रोदनं॥
शोणितैः पूरयिष्यन्ते दीमोनस्थजलाशयाः। ९
पुनः पुन मया दुःखं दीमोने वर्त्तयिष्यते॥
रक्षितेषु मोयाबस्य मनुष्येषु च केशरी।
पश्चास्यस्तस्य देशस्यावशिष्टेषु नरेषु च॥

---

१६ षोडशोऽध्यायः।

१ साहाय्यार्थिनो मोयाबस्य प्रार्थना ६ तदीयाहङ्कारहेतोस्तस्य दण्डनं।

मरो मध्येन सेलातः सीयोनस्य गिरिं प्रति। १
युष्माभिः क्षितिपालाय करो मेषः प्रहीयतां॥
अर्णोनोत्तरणस्थाने मोयाबीयाः स्त्रियस्तदा। २
स्थास्यन्ति शून्यनीडत्वात् भ्राम्यन्ती पक्षिणी यथा॥
विधद्धं मन्त्रणां यूयं प्रयुंग्ध्वञ्च सुशीलतां। ३
मध्याह्ने च निजच्छायां कुरुध्वं क्षणदोपमां।
नरान् प्रच्छादयोद्वासान् मा सूचय पलायितान्॥
मोयाबो ऽहं ममोद्वासाः प्रवसन्तु त्वया सह। ४
भव त्वं संश्रयस्तेषां हिंसकस्य समक्षतः॥
पीडकः पश्य लुप्तो ऽस्ति हिंसा शेषञ्च गच्छति।
पादाघातिनराः सर्व्व उच्छिद्यन्ते च देशतः॥
भविष्यति हितैषित्वात् तव सिंहासनं स्थिरं। ५
दायूदः शिविरे यश्च तत्रासीनो भविष्यति।
शास्ता न्यायानुसारी स सत्वरो दण्डनायकः॥
मोयाबस्य वयं दर्पमश्रौष्मातीव दर्पिणः। ६

गर्व्वं तस्याभिमानञ्च कोपञ्चालीकदम्भिनः॥
७ मोयावमधि मोयावः परिदेविष्यते ततः।
साकल्यमेव यत् तस्य परिदेविष्यते हि तत्॥
कीरहरेशतस्यापि द्राक्षाजान् पिष्टकानधि।
मनुष्या विलपिष्यन्ति सर्व्वथा विपदाहताः॥
८ हिश्बोनस्य भविष्यन्ति केदारा हततेजसः।
सिब्माया गोस्तनीवल्ली नरेन्द्रै र्हृतपल्लवा॥
व्याप्य यासेरपर्य्यन्तं मरोः सीमां प्रविश्य च।
विस्तीर्णा विटपास्तस्या व्यत्यक्राम्यन् पुरार्णवं॥
९ यासेरीयविलापेन सिब्माया गोस्तनीलतां।
विलपिष्याम्यहं तस्मात् हे हिश्बोन् इलियालि च।
मदीयनेत्रतोयेन निषेक्ष्ये च युवामहं॥
फलानां सञ्चये यस्मात् शस्यानामपि कर्त्तने।
शिलावृष्टिवदुत्क्रोशो युष्मन्मध्ये पतिष्यति॥
१० उद्यानेभ्यस्तदानन्द आमोदश्चापयास्यतः।
न गानं गोस्तनीक्षेत्रे न नादो वा भविष्यति॥
न मर्द्दिष्यन्ति कुण्डेषु रसार्थं कृषकाः फलं।
हर्षनादो मया तेषां यतः संवारयिष्यते॥
११ तस्मान्मोयावमुद्दिश्य नाडी मे वल्लकी यथा।
कीरहेरसमुद्दिश्य मम हृच्च ध्वनिष्यति॥
१२ उच्चस्थानन्तु मोयावो यदा गन्तुं क्लमिष्यति।
तदा स प्रार्थनां कर्त्तुं देवागारं प्रवेक्ष्यति।
किन्तु सा तस्य चेष्टापि सफला न भविष्यति॥

---

१३ पूर्व्वमूचे परेशेन मोयावमधि वाग्सौ॥
१४ अधुना परमेशस्तु वाणीमेतां प्रभाषते।
भृत्यस्य वत्सरैस्तुल्ये व्यतीते वत्सरत्रये।
मोयावस्य यदैश्वर्य्यं तन्निन्दार्हं भविष्यति॥
इदानीं सुमहत् तस्य लोकारण्यञ्च भाति यत्।
तस्य शेषो लघुः स्वल्पो निस्तेजाश्च भविष्यति॥

---

१७ सप्तदशोऽध्यायः।

१ अरामं शोमिरोणञ्च प्रति भविष्यद्वाक्यं ६ अवशिष्टलोकानां देवार्च्चापरित्यजनं
१२ इस्रायेलः शत्रूणां दुःखञ्च।

दम्मेशकस्य भाग्यं।

दम्मेशकं पुरं पश्य पुरत्वाद् भ्रंशयिष्यते। १
पतितानां गृहाणाञ्च शिलाराशि र्भविष्यति॥
अरोयेरीयपुर्य्यश्च मनुष्यैः परिवर्ज्जिताः। २
मेषशाला भविष्यन्ति मेषाः शय्यन्त्यविघ्नकाः॥
इफ्रायिमीयनीवृच्च दुर्गहीनो भविष्यति। ३
दम्मेशकाद्यरामस्य शेषश्च राज्यवर्ज्जितः॥
इस्रायेलान्वयस्येव तयोः श्रीश्च भविष्यति।
सेनाध्यक्षः परेशो यः स इदं भाषते वचः॥
याकूबस्यापि यत् तेजस्तत् तदा यास्यति क्षयं। ४
तदीयमांसलत्वं यत् तच्च कार्श्यं भविष्यति॥
शस्यक्षेत्रे यथा छेत्रा नालानां छेदनं भवेत्। ५
यथा च बाहुना तस्य मञ्जरीणां निकर्त्तनं।
रिफायीमाख्यकेदार्य्यें कणिशानाञ्च सञ्चयः॥
स्वल्पः शेषस्तु तत्रापि समवाप्स्यति रक्षणं। ६
जितवृक्षे फलानीव फलानां पातनात् परं॥
दृश्यन्ते शिखरस्याग्रे द्वे वा त्रीणि फलानि वा।
फलिनस्तस्य शाखासु सन्ति चत्वारि पञ्च वा।
इस्रायेलः प्रभु र्वाक्यमेतद् वक्ति परेश्वरः॥
अनुद्रक्ष्यन्ति यत्नेन स्वस्रष्टारं तदा नराः। ७
इस्रायेलः पवित्रो यो राट् तं प्रत्यूर्द्धदृष्टयः॥
स्वकरै र्निर्म्मिता वेदी र्नानुद्रक्ष्यन्ति ते तदा। ८
नैव वालोकयिष्यन्ति वस्तु स्वाङ्गुलिभिः कृतं।
नैवाशेराख्यदेव्या वा न वा सूर्य्यस्य विग्रहान्॥
दृढस्याग्रे ऽवशिष्टं यत् छिन्ने वा घोरकानने। ९
भविष्यन्ति समास्तेन दृढाः पुर्य्यस्तदा तव॥
इस्रायेलीयवंशानाम् अग्रे त्यक्तासु शत्रुभिः।

तासु तवाखिलो देशः समुच्छिन्नो भविष्यति॥
१० ईश्वरं नानुसंस्मृत्य त्वया स्वत्राणकारकं।
नानुचिन्त्य च तं शैलं तुभ्यं शक्तिप्रदायकं।
रोप्यन्ते पल्लवा रम्याः परदेशोद्भवा लताः॥
११ रोपणीयदिनस्यान्ते वारणी च प्रदास्यते।
प्रातःकाले लतायाश्च पुष्पमुत्पादयिष्यते॥
तदुत्पन्नफलं किन्तु सुदूरं प्रोड्डयिष्यते।
दिवसे कष्टसंयुक्ते निरुपायव्यथाकरे॥
१२ आ बहूनां मनुष्याणां सङ्घस्य श्रूयते ध्वनिः।
गर्ज्जनं क्रियते तैश्च तोयानां गर्ज्जनं यथा।
जनानां श्रूयते नादो नदतामब्धिनादवत्॥
१३ जनता कुरुते नादं महासागरनादवत्।
ईशेन भर्त्सिता दूरं सम्पलायिष्यते तु सा॥
यथा च गन्धवाहेन बुषं शैलोपरि स्थितं।
चक्रवातेन वा चक्रं तथा विद्रावयिष्यते॥
१४ सन्ध्यायां पश्य लोकानाम् उपस्थास्यति साध्वसं।
शत्रुः किन्तु प्रभातात् प्राक् नास्तित्वं समवाप्स्यति॥
अयमेवाधिकारः स्याद् अस्मद्वित्तापहारिणां।
लभ्यांशश्चायमेव स्याद् अस्मत्सम्पत्तिलोठिनां॥

---

१८ अष्टादशोऽध्यायः।

परमेश्वरीयशत्रूणां विनाशो राज्यवृद्धिश्च।

१ भोः कूशस्रोतसां पारे स्थिते भूः पक्षमर्म्मरे।
दूतप्रेषिणि येनेन नडनौभि र्जलोपरि॥
२ हे दूतास्त्वरिता यात लम्बाङ्गान् मुण्डितान् नरान्।
जातिञ्चोत्पत्तिकालाद्धि सदा त्रासकरीं प्रति॥
महाशक्तिविशिष्टा सा पादाभ्यां शत्रुमर्द्दिका।
तस्या देशश्च बह्वीभि र्निम्नगाभि र्विभज्यते॥
३ हे जगद्वासिनः सर्व्वे हे भूलोकनिवासिनः।
पर्व्वतेषु पताकायां स्थापितायां प्रपश्यत।

तूरीध्वनौ च सञ्जात आकर्णयत यत्नतः॥
यस्मान्मां भारतीमेतामुक्तवान् परमेश्वरः। ४
विश्रामं सेवमानोऽहं निरीक्षिष्ये निजालये॥
तृणानामुपरिष्टाद्धि यथा निर्म्मल आतपः।
फलपाचकरौद्रे वा मेघः सशिशिरो यथा॥
परिणामात् पुरा किन्तु कुसुमे पूर्णतां गते। ५
फले पुष्पत उत्पन्ने पक्कताञ्च प्रगच्छति॥
स लवित्रेण शाखानां प्रकरिष्यति कर्त्तनं।
पल्लवांश्च समुच्छिद्य दवयिष्यति निश्चितं॥
निमित्तं हिंस्रकाणाञ्च पक्षिणां गिरिवासिनां। ६
निमित्तं वन्यजन्तूनां त्यक्ष्यन्ते ते च सर्व्वशः॥
ग्रीष्मं तेष्ववतिष्ठन्तो यापयिष्यन्ति पक्षिणः।
यापयिष्यन्ति हेमन्तं सर्व्वे चारण्यजन्तवः॥
तस्मिन् काले मनुष्यास्ते लम्बाङ्गा मुण्डितत्वचः। ७
जातिरुत्पत्तिकालाद्धि सदा त्रासकरी स्मृता॥
महाशक्तिविशिष्टा च पादाभ्यां शत्रुमर्द्दिका।
यस्या देशश्च बह्वीभि र्निम्नगाभि र्विभज्यते॥
सेनाध्यक्षपरेशस्य नाम यत्रावतिष्ठति।
गिरौ तस्मिन् सियोनाख्य उपस्थाप्यातियत्नतः।
सैनाध्यक्षपरेशाय वितरिष्यन्त्युपायनं॥

१९ ऊनविंशोऽध्यायः।

१ मिसरीयदुःखस्य कथनं ११ राज्ञां मूर्खत्वकथनं १८-समाजस्य भविष्यद्वाक्यकथनञ्च।

मिसरदेशस्य भाग्यं।

परेशो द्रुतमेघेन मिसरं पश्य यास्यति। १
तस्य साक्षाच्च मिस्रीया देवा यास्यन्ति वेपथुं।
मिसरस्यान्तरे स्वीयं हृदयञ्च गलिष्यति॥
व्यूहयिष्यामि मिस्रीयान् मिस्रीयाणां विरुद्धतः। २
ततो भ्रात्रा सह भ्राता बन्धुना सह बान्धवः।
पुर्य्या सार्द्धं पुरी राज्यं राज्येन सह योत्स्यते॥

३ प्राणाश्च परिशोच्यन्ति मिसरस्यान्तरे तदा ।
तदीयमन्त्रणा चापि मया विलोपयिष्यते ॥
ततस्ते ऽनुगमिष्यन्ति व्यलीकान् देवविग्रहान् ।
अस्पष्टवादिलोकांश्च भौतान् मायाविनो ऽपि च ॥
४ मिसरन्त्वर्पयिष्यामि कठोरस्वामिनः करे ।
शासनं तस्य राजा च पराक्रान्तो विधास्यति ।
वाक्यमेतत् प्रभु र्ब्रूते सेनाध्यक्षः परेश्वरः ॥
५ समुद्रे क्षेष्यते तोयं नदी शोक्ष्यति निर्ज्जला ॥
६ भविष्यन्ति च तत्रत्याः सरितः पूतिगन्धिकाः ।
ह्रासं यास्यन्ति शोषञ्च मिसर्द्देशस्य निम्नगाः ।
तस्मान्नाड्या च तृण्या च परिम्लाने भविष्यतः ॥
७ गोप्रचारो जलासन्नः संस्थितो यो नदीतटे ।
तथा वीजाकृता भूमि र्या नदीमातृका स्मृता ।
तत्साकल्यं हि शुष्कत्वात् धूलीभूय विलेष्यते ॥
८ तस्मात् सुदीर्घनिश्वासं प्रकरिष्यन्ति धीवराः ।
शोचिष्यन्ते नराः सर्व्वे नद्यां वडिशपातिनः ।
ग्लास्यन्ति च नराः सर्व्वे तोये जालवितानकाः ॥
९ सुमार्ज्जितातसीसूत्रै र्वस्त्रं निर्म्मिमते च ये ।
ऊयते च दुकूलं यैस्ते भविष्यन्ति लज्जिताः ॥
१० ये नरास्तम्भतुल्यास्ते भविष्यन्ति विमर्द्दिताः ।
अवसन्नमनस्काश्च सर्व्वे वेतनजीविनः ॥
११ मूढा एव भविष्यन्ति नायकाः सोयने स्थिताः ।
फिरौणो मन्त्रिणो विज्ञाः सर्व्वे निर्ब्बोधमन्त्रणाः ॥
अस्म्यहं विदुषां वंशो वृद्धराजकुलोद्भवः ।
इति वाचं कथं यूयं फिरौणं निगदिष्यथ ॥
१२ कुत्र ते तव विद्वांसो ऽधुना त्वां ज्ञापयन्तु ते ।
सेनाध्यक्षपरेशेन मिसरं प्रति या कृता ।
मन्त्रणा सावगन्तुं तैः शक्यते तत् प्रकाश्यतां ॥
१३ बालिशा एव सञ्जाता नायकाः सोयने स्थिताः ।
मोफस्य नायकाः सर्व्वे चाभवन् भ्रममोहिताः ।
मिसरञ्च कुलाध्यक्षाः कुर्व्वन्त्युन्मार्गगामिनं ॥

तत्र पर्य्यासभावश्च परमेशेन मिश्रितः। १४
मिसरः कृत्स्नकार्य्ये च क्रियते तैः परिभ्रमी।
नरो यद्वन्मदोन्मत्तः क्षीयवान्ते परिभ्रमी॥
न शीर्षेण न पुच्छेन न तालेन नलेन वा। १५
साध्यं किञ्चन कार्य्यं हि मिसरस्य भविष्यति॥
तस्मिन् काले च मिस्रीया भविष्यन्त्यबलोपमाः। १६
तांस्ताडयितुमुद्बाहोः सेनाध्यक्षपरेशितुः।
हस्तचालनतो भीतान् कम्पस्तानाक्रमिष्यति॥
मिस्रीये यिहूदादेशो मंस्यते च भयङ्करः। १७
केनाप्युच्चारिते तस्य नाम्नि श्रोता त्रसिष्यति॥
सेनाध्यक्षपरेशेन प्रति तान् या निरूपिता।
आशङ्काकारणं तेषां मन्त्रणा सा भविष्यति॥
किनानीयोक्तिवादीनि सेनाध्यक्षपरेशितुः। १८
नाम्ना शपथकारीणि पञ्चसंख्यपुराणि तु।
तस्मिन् काले भविष्यन्ति तत्र मीसरनीवृति।
ध्वंसनगरमेकस्य नामधेयं भविष्यति॥
तस्मिन् काले परेशस्य कृते मीसरनीवृति। १९
मध्यभागे हि यज्ञार्थं वेदिरेका भविष्यति॥
तथा तस्यैव देशस्य सीमायाः पार्श्वतः स्थितः।
एको भविष्यति स्तम्भः परेशस्मरणार्थकः॥
सेनाध्यक्षपरेशस्य चिह्नवत् साक्षिवच्च तत्। २०
तत्र मिसरदेशेऽपि मर्त्त्यानाश्वासयिष्यति॥
परमेश्वरमुद्दिश्य पीडकानां नृणां भयात्।
कृतायां प्रार्थनायां तैः स त्रातारं प्रहेष्यति।
तं सम्प्रेष्य च विक्रान्तं रक्षां तेषां विधास्यति॥
मिस्रीयेभ्यः परेशेन दत्ते परिचये तदा। २१
परिज्ञास्यन्ति मिस्रीया मनुष्याः परमेश्वरं॥
नैवेद्यै र्बलिदानैश्च ते करिष्यन्त्युपासनं।
परेशाय प्रतिज्ञाय भविष्यन्ति यतव्रताः॥
मिस्रीयान् परमेशश्चाहत्य स्वस्थान् करिष्यति। २२
परमेश्वरमुद्दिश्य परावर्त्तितमानसैः।

कृतां तैः प्रार्थनां शृण्वन् स तान् स्वस्थान् करिष्यति ॥
२३ मिसराद् अशुरं गन्तुं तदा वर्त्मनि निर्म्मिते।
अशुरो मिसरं गत्वा मिसरश्चाशुरं तथा।
एकत्र परमेशस्य सेवामुभौ करिष्यतः ॥
२४ मिसरोऽशुर इस्रायेल् जातित्रयमिदं तदा।
नराश्रितावने मध्य आशीःपात्रं भविष्यति ॥
२५ सैनाध्यक्षपरेशेन तस्मै प्रदत्ताशिषं।
वक्ष्यते भव धन्यस्त्वं हे प्रजे मम मीसर।
त्वमप्यशुर मत्सृष्ट त्वमिस्रायेल् च मद्धन ॥

---

२० विंशतितमोऽध्यायः।

मिसरस्य भाविदण्डः।

१ अश्दोदे तर्त्तनस्यागमनवत्सरे ऽर्थतः सर्गोणाख्येनाशूरीयराजेन
प्रेषितः स तर्त्तनो यदाश्दोदस्य विरुद्धं युद्धं विधाय तद् वशीचकार,
२ तदा परमेश्वर आमोससुतेन यिशायियेन वाक्यमेतदुच्चारयामास, एहि
स्वकटिदेशाच्छाणवस्त्रं मुञ्च स्वपादाभ्यां पादुके वियुङ्क्ष्व च। ततः स तदेव
३ कृत्वा परिच्छदहीनः शून्यपादश्च गमागमौ कृतवान्। अपरं परमे-
श्वर उवाच।

मम दासो यिशायीयो नग्नपादो ऽपरिच्छदः।
इदं वर्षत्रयं यावत् कूशमीसरदेशयोः।
अद्भुतलक्षणं भूत्वा यथाकार्षीद् गमागमौ ॥
४ तथैव वन्दिमिस्रीयान् कूशीयांश्च रणे धृतान्।
अशूरीयो महीपालश्चालयिष्यति यूथवत् ॥
आबालस्थविरान् सर्व्वान् नग्नपादान् दिगम्बरान्।
अनाच्छन्नकटिप्रोथान् मिसरस्य कलङ्किनः ॥
५ निजाशाभाजनं कूशं श्लाघापात्रञ्च मीसरं।
दृष्ट्वा यास्यन्ति नैराश्यं विवर्णत्वञ्च मानवाः ॥
६ तस्मिन् काले वदिष्यन्ति चैतद्देशनिवासिनः।
अशूरीयस्य भूपस्य हस्ताद् रक्षार्थिभिः पुरा।

अस्माभिरुपकारार्थं याश्राभूमिः समाश्रिता।
इयं पश्य दशा तस्या रक्षा नस्तु कथं भवेत्॥

---

२१ एकविंशोऽध्यायः।

१ वाविलो भाविदण्डः ११ दूमादेशस्य भाग्यं १३ आरवदेशस्य भाग्यञ्च।

समुद्रासन्नमरो भाग्यं।

दक्षिणोत्पन्नझञ्झावत् महावेगसमन्वितं। १
मरुस्थानात् किमायाति पश्य देशाद् भयङ्करात्॥
दर्शनं सुकठोरं तदिति वार्त्ता मया श्रुता। २
आचरन्ति शठाः शाठ्यं विनाशञ्च विनाशकाः॥
पुरीमाक्राम हे एलम् हे मादीयावरुन्धि तां।
कृत्स्नं निवारयिष्यामि वन्दीनां परिदेवनं॥
एतेन कटिदेशो मे ताप्यते वेदनातुरः। ३
प्रसवव्यथया तुल्या माञ्चोपाक्रामति व्यथा।
तोदाच्छ्रवणहीनो ऽहम् उद्वेगाद् दृष्टिवर्ज्जितः॥
मम विक्लवचित्तस्य रोमाञ्चात् त्रासितस्य च। ४
उत्सवीयैव या सन्ध्या सा तेनाकारि भीषणा॥
आसने रचितं भोज्यं रक्षां कुर्व्वन्ति रक्षकाः। ५
भोजनं पश्य पानञ्च सर्व्वैरेव विधीयते।
समुत्तिष्ठत सेनान्यः फलकान्यभिषिञ्चत॥
यस्मान्मां भारतीमेनां प्रतिभाषितवान् प्रभुः। ६
त्वया संस्थाप्यतां रक्षी यत् पश्येत् तद् ब्रवीतु सः॥
सादिनो यदि पश्येत् स हयारूढनरद्वयं। ७
खरारूढान् मयारूढान् यत्नात् तर्हि शृणोतु सः॥
अपरं सोऽवदद्रक्षी प्रोच्चशब्देन सिंहवत्। ८
हे प्रभो नित्यमेवाहमत्रास्मि संस्थितो दिवा।
रक्षास्थाने ममैतस्मिन्नवतिष्ठे च रात्रिषु॥
पश्य सादिन आयान्ति हयारूढनरद्वयं। ९
पतिता पतिता वाविलिति तेनोदितं पुनः।
भग्नाश्च भूतुणा तस्याः सकला देवमूर्त्तयः॥

१० हे ममोदूखलाक्षब्धपूतधान्यसमाः प्रजाः ।
इस्रायेलः प्रभोरेव सेनाध्यक्षपरेशितुः ।
वक्त्रेणोक्तं यदश्रौषं तद् युष्मान् निगदाम्यहं ॥

---

११ दूमादेशस्य भाग्यं ।
सेयीरादुच्चशब्देन कश्चित् पृच्छति मामिदं ।
रक्षिन् कः प्रहरो रात्रे रक्षिन् कः प्रहरो निशः ॥
१२ रक्षी ब्रूते दिनारम्भ आयात्यायाति च क्षपा ।
यदि जिज्ञासवो यूयं जिज्ञासध्वं पुनः पुनः ।
स्वस्थानं गच्छतेदानीं पश्चादायात मां प्रति ॥

---

१३ आरवदेशस्य भाग्यं ।
सार्थवाहा दिदानीया यूयमारत्रनीवृति ।
आश्रयिष्यथ कान्तारं रजनीयापनार्थिनः ॥
१४ तेमानिवासिनो लोकाः साक्षात् कर्त्तुं तृषातुरान् ।
तोयं वक्ष्यन्ति पूपैश्च ग्रहीष्यन्ति पलायितान् ॥
१५ ज्ञात्वा पलायमानांस्तान् निस्त्रिंशपङ्क्तिसम्मुखात् ।
निष्कोषस्य कृपाणस्य कोदण्डस्यायतस्य च ।
समरक्लेशभारस्य सम्मुखाच्च प्रधावतः ॥
१६ प्रभु र्मामुक्तवानेतद् भृतकस्येव वत्सरे ।
व्यतीते पश्य केदारो लुप्ततेजा भविष्यति ॥
१७ केदारोद्भववीराणां यानि सन्ति धनूंषि च ।
तेषामपि तदा शेषः स्वल्पसंख्यो भविष्यति ।
इस्रायेलः प्रभु र्यस्मादेतद् वक्ति परेश्वरः ॥

---

२२ द्वाविंशोऽध्यायः ।

१ यिरूशालमो भाविदुःखं १५ शिब्नस्य पदभ्रंशः २० इलियाकीमस्योन्नतिश्च ।

दर्शनोपत्यकाया भाग्यं ।

१ किं जातं तव यत् कृत्स्ना गृहपृष्ठानि गच्छसि ॥
२ कोलाहलेन पूर्णा त्वं नगरी च महास्वना ।

हर्षाविष्टा पुरी चासी र्हन्यन्ते तव ये नराः।
नैव विद्धा कृपाणैस्ते न वा सन्ति रणे मृताः॥
पलायन्ते पुरोगास्ते बध्यन्ते चापवर्ज्जिताः। ३
यावन्तस्तव मध्ये च ध्रियन्ते सर्व्वे एव ते।
नरा एकत्र बध्यन्ते दूरं पलायिता अपि॥
अतो वच्मि निवर्त्तध्वं तीव्रं क्रन्दिष्यते मया। ४
स्वजाते राजकन्याया विनाशः समजायत।
तस्मान्मे सान्त्वनां कर्त्तुं मा विधद्धं परिश्रमं॥
नादस्य पदपातस्य विप्लवस्य च वासरः। ५
दर्शनोपत्यकामध्ये यस्मात् समुपतिष्ठति॥
सेनाध्यक्षपरेशेन प्रभुना स निरूपितः।
प्राचीरस्य निपातस्य चाह्विशब्दो धरेषु च॥
एलमो धृततूणो ऽस्ति रथिपादातसादिभिः। ६
अनाच्छादितचर्म्मा च कीरः पश्चोपतिष्ठति॥
रथपूर्णाश्च दृश्यन्ते तव श्रेष्ठा उपत्यकाः। ७
पुरद्वारसमीपे च हयारूढा व्यवस्थिताः॥
नेत्रवस्त्रे यिहूदास्व ततो दूरीकृते सति। ८
त्वं यत्नाद् वनगेहाख्यामस्त्रशालां निरीक्षसे॥
यूयं दायूदपुर्य्याश्च बह्वच्छिद्राण्यपश्यत। ९
निम्नस्थिततडागस्य समगृह्णीत वारि च॥
यिरूशालमि चाकार्ष्ट गणनां सर्व्ववेश्मनां। १०
प्राचीरं सुदृढीकर्त्तुं वासस्थानान्यभाङ्क्त च॥
पुरातनतडागस्य तोयानां सञ्चयाय च। ११
मध्ये भित्तिद्वयो र्यूयमखनिष्ट जलाशयं॥
यस्त्वेतत् सृष्टवानीशः स युष्माभि र्न लक्षितः।
यस्तत् कल्पितवान् दूरात् स युष्माभि र्न वीक्षितः॥
प्रभुना परमेशेन सेनाध्यक्षेण मानवाः। १२
आह्वयन्त दिने तस्मिन् शोकाय रोदनाय च।
मुण्डनाय च मुण्डस्य शाणसंवेष्टनाय च॥
पश्य तथाप्युपातिष्ठत् महानन्दो महोत्सवः। १३
गोहत्या मेषहत्या च मद्यपानामिषादने।

कर्त्तव्यं भोजनं पानं श्वो ऽस्माभिस्त्यक्ष्यते तनुः ॥
१४ ततो ऽश्रिश्रवदेतन्मां सेनाध्यक्षः परेश्वरः।
युष्माकं मरणं यावद् दोषो ऽयं नापमार्क्ष्यते।
इति वाक्यं प्रभु र्ब्रूते सेनाध्यक्षः परेश्वरः ॥
१५ सेनाध्यक्षपरेशेन प्रभुनैतदवादि च।
शिव्नाख्यो ऽसौ गृहाध्यक्षो मन्त्री गत्वा त्वयोच्यतां ॥
१६ अत्र तावकमास्ते किं तव को वात्र विद्यते।
यत् त्वं स्वार्थं शवागारम् अत्र तक्षितवानसि ॥
हे अतीवोन्नते स्थाने स्वशवागारतक्षक।
स्वार्थं सुदृढशैले च वासस्थाननिरूपक ॥
१७ हे बलिन् परमेशस्त्वां भूमौ सम्पातयिष्यति।
स्वयमेव च सम्यक् त्वां सङ्कोचिष्यति वस्त्रवत् ॥
१८ गोलीकरिष्यति त्वाञ्च घूर्णयन् सूत्रकोषवत्।
सुविस्तारितभूमौ च क्षेप्स्यति वर्त्तुलं यथा ॥
त्वं मरिष्यसि तत्रैव नीतः श्रीसूचकै रथैः।
स्वकीयस्वामिगेहस्य कलङ्कश्च भविष्यसि ॥
१९ मया पदच्युतश्च त्वं स्थानभ्रष्टो भविष्यसि ॥
२० समाह्वास्यामि तस्मिंश्च दिवसे मम सेवकं।
इलियाकीमनामानं हिल्कियस्य शरीरजं॥
२१ त्वदस्त्रेण समाच्छाद्य दत्त्वा त्वच्छृङ्खलं कटौ।
तस्य हस्ते ऽर्पयिष्यामि तावकीनपराक्रमं ॥
ततः स एव लोकानां यिरूशालमवासिनां।
यिहूदावंशजानाञ्च तातरूपो भविष्यति ॥
२२ स्कन्धे तस्यार्पयिष्यामि दायूदंशीयकुञ्जिकां।
उद्घाटने कृते तेन को ऽपि रोद्धुं न शक्ष्यति।
रोधने च कृते तेन को ऽपि नोद्घाटयिष्यति ॥
२३ नागदन्तमिवाहं तं निधास्ये च दृढे स्थले।
ततः स पितृगोत्रस्य भविता गौरवाश्रयः ॥
२४ नरैस्तत्पितृगोत्रस्य निखिलञ्चैव गौरवं।
पुत्रपौत्रादिवंशश्च सर्व्वञ्च क्षुद्रभाजनं।
आकुतूघटपर्य्यन्तं तत्रैवोल्लम्बयिष्यते ॥

पुनरेतद् वचो ब्रूते सेनाध्यक्षः परेश्वरः। २५
तदा दृढे स्थले बद्धो नागदन्तः सरिष्यति॥
पतितस्य ततस्तस्य छेदनं सम्भविष्यति।
यश्च तत्रार्पितो भारः सोऽप्युच्छेदं गमिष्यति।
स्वयं यस्मादिदं वाक्यं भाषते परमेश्वरः॥

---

२३ त्रयोविंशोऽध्यायः।

१ कम्दीयमानुषैः सोरस्य भविष्यद्विनाशः १५ पुनरुन्नतिश्च।

सोरस्य भाग्यं।

कुरुतार्त्तरवं यूयं पोतास्तर्शीशगामिनः। १
यस्मात् सोरपुरी लुप्ता निर्गृहा द्वारवर्ज्जिता।
एतत् कित्तीमदेशीयै र्नाविकान् प्रति कथ्यते॥
मौनीभवत भो यूयम् उपद्वीपनिवासिनः। २
सीदोनीयवणिग्भिस्त्वं पूर्णासीरब्धिगामिभिः॥
प्रारोहत् त्वत्कृते वीजं शिहोरीयं महोदधौ। ३
नीलनदीतटे छिन्नं शस्यञ्चासीद् धनं तव।
त्वञ्चासीः सर्व्वजातीनां पण्यस्थानं निषेवितं॥
लज्जिता भव हे सीदोन् सागरेणेरितादवात्। ४
सागरस्य कलत्रेण यस्माद् वागियमुच्यते॥
न गर्भवेदना प्राप्ता न कृतः प्रसवो मया।
न कृतं वा कुमाराणां कुमारीणाञ्च पालनं॥
पुरा मीसरदेशस्य वार्त्तायाः श्रवणे यथा। ५
तथा सोरस्य वार्त्तायाम् अवाप्स्यन्ति व्यथां नराः॥
महासागरपारस्थं तर्शीशाभिधनीवृतं। ६
रुदन्तो यात हे यूयम् उपद्वीपनिवासिनः॥
प्राक्कालात् स्थापितेयं किं युष्माकं ह्लादिनी पुरी। ७
प्रवासार्थं सुदूरं सा स्वपद्भ्यामपनीयते॥
यस्याः सांयात्रिका भूपा वणिजो लोकविश्रुताः। ८
राजकिरीटदात्री च यासौ सोराभिधा पुरी।

कस्तस्याः प्रातिकूल्येन कृतवान् मन्त्रणामिमां॥
९ कृत्स्नं सौन्दर्य्यजं गर्व्वम् अशुचीकर्त्तुमिच्छता।
भूलोकविश्रुतान् सर्व्वान् तुच्छीकर्त्तुञ्च वाञ्छता।
सेनाध्यक्षपरेशेन मन्त्रणा सा निरूपिता॥
१० हे तर्शीशाभिधे कन्ये त्वं मिस्रीयनदी यथा।
तथा देशमतिक्राम राजशृङ्खलवर्ज्जितं॥
११ समुद्रस्योपरि स्वीयं हस्तं विस्तृतवान् प्रभुः।
सकलानि च राज्यानि सकम्पानि करोति सः॥
बणिक्पुरीमधीमाश्च प्रादादाज्ञां परेश्वरः।
नरैस्तदीयदुर्गाणां सर्व्वनाशो विधीयतां॥
१२ सोऽवादीत् न पुन र्यूयम् उल्लासं प्रकरिष्यथ।
भ्रष्टे कन्ये सिदोनाख्ये त्वमुत्थाय जलाध्वना।
कित्तीमं याहि तत्रापि विश्रामं लप्स्यसे नहि॥
१३ कस्दीयनीवृतं पश्य नासीज्जातिरसौ पुरा।
स देशः किन्त्वशूरीयैरर्पितो ऽरण्यवासिषु॥
उच्चयन्त्राणि निर्म्माय तै र्नरैस्तत्र संस्थितैः।
सा पुरी क्षुब्धप्रासादा शिलाराशिः करिष्यते॥
१४ कुरुतार्त्तस्वरं यूयं पोतास्तर्शीशगामिनः।
यस्मादवाप्स्यति ध्वंसं युष्माकं दृढ आश्रयः॥
१५ तदानीं राज्ञ एकस्य राजत्ववत्सरानिव।
वत्सरान् सप्ततिं यावत् सोरी भंशिष्यति स्मृतेः॥
शप्तते वत्सराणान्तु शेषे वाराङ्गना यथा।
तथा सोरपुरी गीतं गातुमुपक्रमिष्यति॥
१६ वीणां धृत्वा पुरे भ्राम्य हे वेश्ये स्मरणाच्युते।
यत् स्मर्य्येथास्तदर्थञ्च सुवाद्यै र्गाय निर्भरं॥
१७ वर्षाणां सप्ततेरन्ते परेशेनाभिवीक्षिता।
सोरपुरी स्वलाभाय परावर्त्तिष्यते पुनः॥
सार्द्धञ्च सकलै राज्यैः पृथिवीमण्डले स्थितैः।
वेश्यावद् व्यवहारं सा तदानीमाचरिष्यति॥
१८ परेशस्य कृते पूतो लाभ उपार्ज्जितस्तया।
तदा सञ्चेष्यते नैव न वा राशीकरिष्यते॥

स लाभः परमेशस्य सम्मुखे वसतां नृणां।
प्राप्यस्तेभ्यो भृशं भक्ष्यं दृढं वस्त्रञ्च दास्यति॥

---

२४ चतुर्विंशोऽध्यायः।

१ इस्रायेलो भविष्यद्दण्डः १२ अवशिष्टलोकानां सुखं शत्रूणां विनाशश्च।

पश्य परेश्वरो देशं शून्यीकुर्व्वन् प्रबाधते। १
अधोमुखञ्च कृत्वा तं विधूनोति निवासिनः॥
यथा प्रजा तथा यष्टा यथा दासस्तथा प्रभुः। २
यथा दासी तथाध्यक्षा यथा क्रेता तथा बणिक्।
ऋणग्राही यथा तद्वद् ऋणदाता भविष्यति।
अधमर्णो यथा तद्वद् उत्तमर्णो भविष्यति॥
सम्यक् शून्यीकृतो देशो हृतद्रव्यो भविष्यति। ३
वाणीमेतां स्वयं यस्माद् भाषते परमेश्वरः॥
शोचन्ती शुष्यति क्षौणी जीर्य्यन्ती शुष्यति क्षितिः। ४
धरावासिप्रजानाञ्च प्रोच्चांशो याति जीर्णतां॥
निवासिनां पदाघाताद् देशो गच्छत्यमेध्यतां। ५
व्यवस्था लङ्घिता यस्माद् विपर्य्यस्तो विधिश्च तैः।
कृतं सदातनस्यापि भञ्जनं नियमस्य तैः॥
शापग्रस्तस्ततो देशो दोषाक्रान्ता निवासिनः। ६
देशवासिनरा दग्धाः शिष्यन्ते स्वल्पमानवाः॥
रसः शोचति गोस्तन्या द्राक्षाया जीर्य्यते लता। ७
चित्तहर्षप्रिया लोकाः सुदीर्घं स्तनयन्ति च॥
शान्तस्तालो मृदङ्गानां निवृत्तो हर्षिणां रवः। ८
वीणाया वाद्यघोषो ऽपि कुत्रापि श्रूयते नहि॥
गीतवाद्येन लोकाश्च मद्यपानं न कुर्व्वते। ९
मदिरा तत्पिबद्भिश्च तिक्तस्वादैव मन्यते॥
नगरं भग्नतां प्राप्य शून्यस्थानमजायत। १०
सर्व्वगृहाणि रुद्धानि प्रवेष्टुं को ऽपि न क्षमः॥
पथि द्राक्षारसाभावात् श्रूयते परिदेवनं। ११

सर्व्वानन्दस्तमोभूतो हर्षो देशाद् वहिष्कृतः ॥
१२ नगरे शिष्यते ध्वंसो द्वारं छिन्नं निपात्यते ॥
१३ फलेषु जितवृक्षस्य पातितेषु यथा भवेत् ।
कृते द्राक्षाफलानां वा सञ्चये शेषसङ्ग्रहः ।
जातीनां मध्यतस्तद्वद् देशे शेषो भविष्यति ॥
१४ ते च शेषा नरा उच्चैः करिष्यन्त्युत्सवध्वनिं ।
परमेशस्य माहात्म्यात् ते गास्यन्ति समुद्रतः ॥
१५ तस्मादरुणादिक्स्थैश्च स्तूयतां परमेश्वरः ।
इस्रायेलीयवंशस्य यः प्रभुः परमेश्वरः ।
तस्य संस्तूयतां नाम सामुद्रद्वीपवासिभिः ॥
१६ धार्म्मिका मनुजा धन्या इतिवाक्यसमन्वितं ।
गीतस्य शृणुमो गानं पृथिव्याः प्रान्ततो वयं ॥
किन्त्वहं वच्मि हा क्षीणः क्षीणो ऽहं हा हतो ऽस्म्यहं ।
आचरन्ति शठाः शाठ्यं शाठ्यमेवाचरन्ति ते ॥
१७ विद्यन्ते युष्मदर्थञ्च हे नरा देशवासिनः ।
त्रासो गर्त्तश्च पाशश्च त्रय एते निरूपिताः ॥
१८ यः पलायिष्यते त्रासात् स गर्त्ते निपतिष्यति ।
य उत्थास्यति गर्त्ताच्च स पाशेन धरिष्यते ॥
ऊर्द्ध्वे द्वाराणि मेघानां यास्यन्त्युद्घाटनं यतः ।
धरामूलानि यास्यन्ति तदानीं परिकम्पनं ॥
१९ भिद्यते भिद्यते क्षौणी दीर्य्यते दीर्य्यते धरा ।
उत्कटेनैव कम्पेन कम्पते पश्य मेदिनी ॥
२० मत्तवच्चलति क्षौणी दोलायते च दोलवत् ।
स्वीयपातकभारात् सा पतत्युत्थातुमक्षमा ॥
२१ प्रोच्चस्थानीयसेनायै प्रोच्चस्थाने यथा फलं ।
नरलोकस्थराजभ्यो नरलोके तथा फलं ।
उचितं परमेशेन तदानीं वितरिष्यते ॥
२२ कूपे वन्दिवदेकत्र रुद्धाः स्थास्यन्ति ते ऽर्गलैः ।
दीर्घकालात् परं तेषां विचारश्च भविष्यति ॥
२३ तदा लज्जिष्यते चन्द्रो भास्करश्च त्रपिष्यते ।
यस्मादद्रौ सियोनाख्ये यिरूशालमपत्तने ।

प्रकरिष्यति राजत्वं सेनाध्यक्षः परेश्वरः।
तत्प्राचीनन्दृणां साक्षात् प्रतापश्च विभास्यति॥

---

२५ पञ्चविंशोऽध्यायः।

१ जयात् परमेश्वरस्य प्रशंसनं ६ खीष्टस्य राज्यस्थापनं ९ तदीयमानवानां सुखञ्च।

हे परेश त्वमीशो मे करिष्यामि तव स्तवं। १
नाम ते कीर्त्तयिष्यामि खाश्चर्य्यकर्म्मकारिणः।
प्राचीना मन्त्रणा यास्ते सत्याः सन्ति दृढाश्च ताः॥
त्वमकार्षीः पुरीं राशिं दुर्गञ्च खण्डसञ्चयं। २
परदेशीयराजानां पुरीं पुरीत्वविच्युतां।
न भविष्यति निर्म्माणं पुनस्तस्याः कदाचन॥
तस्माद् बलवती जातिस्त्वत्सम्मानं करिष्यति। ३
नगरं भेष्यति त्वत्तो विदेशीयदुरात्मनां॥
दुर्ब्बलस्य नरस्य त्वमभवः शरणं यतः। ४
दरिद्रस्य मनुष्यस्य शरणं त्वं हि सङ्कटे॥
आश्रयस्थानमासावे छायायाः स्थानमातपे।
प्राचीराक्रामकाप्लावैस्तुल्ये वायौ दुरात्मनां॥
पराणां दम्यते शब्दस्त्वया ग्रीष्मो मरौ यथा। ५
क्रूराणां क्षीयते गानं ग्रीष्मोऽभ्रच्छायया यथा॥
निमित्तं सर्व्वजातीनाम् एतस्मिन् धरणीधरे। ६
सेनाध्यक्षपरेशेन भोज्यमासादयिष्यते॥
तद् भोज्यं पिशितैः स्वादु सत्यद्राक्षारसेन च।
पिशितैः सारसंयुक्तैः द्राक्षारसैश्च निर्म्मलैः॥
येन प्रच्छदवस्त्रेण छाद्यन्ते सर्व्वजातयः। ७
यया तिरस्करिण्या च छाद्यन्ते सर्व्वदेशिनः।
स महीधर एतस्मिन् तावुभौ संहरिष्यति॥
स च मृत्युं जयग्रस्तं सर्व्वथा संहरिष्यति। ८
प्रभुः परेश्वरश्चाश्रु सर्व्ववक्त्रात् प्रमार्क्ष्यति॥
स्वप्रजानामवज्ञाञ्च कृत्स्नोर्व्वीतोऽपनेष्यति।
यतो हेतोरिमां वाणीं स्वयं वक्ति परेश्वरः॥

९ तदा लोका वदिष्यन्ति पश्यासावस्मदीश्वरः।
असौ प्रतीक्षितोऽस्माभिरसौ नस्तारयिष्यति॥
परमेश्वर एवासावस्माभि र्यः प्रतीक्षितः।
सानन्दा उल्लसिष्यामस्त्राणे तेन कृते वयं॥
१० परमेशस्य हस्तो ऽस्मिन् पर्व्वते विश्रमिष्यति।
मोयावः किन्तु तेनैव मर्द्दिष्यते निजस्थले।
पलालो मर्द्यते यद्वत् सारपङ्के पदाहतः॥
११ तरणार्थं यथा स्नायी स्वबाहू वितनोति च।
तद्वदेव स्वबाहू स तन्मध्ये वितनिष्यति।
हस्तच्छलेन साकन्तु गर्व्वस्तस्य दमिष्यते॥
१२ उच्चप्राचीररूपं ते दुर्गं निपातयिष्यते।
नीचं भूस्पृग्रजःस्पृक् च परेशेन करिष्यते॥

---

२६ षड्विंशोऽध्यायः।

१ मनुष्यहेतोः परमेश्वरस्य प्रशंसनं १६ परमेश्वरे स्वप्रजानाम् आश्रयप्राप्तिश्च।

१ तदेतद् गास्यते गीतं यिहूदादेशवासिभिः।
एकं नगरमस्माकं विद्यते सुमहाबलं।
प्राचीरपरिखावच्च त्राणं स्थापयतीश्वरः॥
२ पुरद्वाराणि मोच्यन्तां युष्माभि र्द्वाररक्षिणः।
सत्यतापालिका तर्हि धर्म्मजातिः प्रवेक्ष्यति॥
३ त्वदालम्बिमनस्कं त्वं रक्षन् सुस्थं विधास्यसि।
यतो हेतो र्मनुष्यः स त्वामेव श्रद्दधाति हि॥
४ यूयमनन्तकालार्थं श्रद्धद्धं परमेश्वरं।
प्रभौ परेश्वरे यस्मात् प्राप्यते शाश्वताश्रयः॥
५ यतः सो ऽनमयत् प्रोच्चां नगरीमूर्द्ध्ववासिनां।
भूमौ तां पातयित्वा च रजोर्लीनां करिष्यति॥
६ चरणै र्धनहीनानां पादपातैश्च दुःखिनां।
नृणां पादाहता सम्यक् नगरी सा भविष्यति॥
७ सरलो युज्यते पन्था मनुष्ये धर्म्मसेवके।
हे न्यायिन् धर्म्मिनो मार्गं त्वं समानं करिष्यसि॥

त्वद्विचारपथे ऽस्माभिस्त्वं परेश प्रतीक्षितः । ८
मनोवाञ्छितमस्माकं नाम ते स्मरणञ्च ते ॥
क्षणदायां मनोवाञ्छा त्वां प्रत्युत्पद्यते मम । ९
प्रात र्ममान्तरात्मा च कुरुते ऽन्वेषणं तव ॥
त्वदीयशासने यस्मात् सति मह्यां प्रकाशिते ।
धर्म्मशिक्षामवाप्स्यन्ति नरा भुवनवासिनः ॥
शिक्षामनुगृह्णीतो ऽपि नैव गृह्णाति दुर्जनः । १०
प्रकृताचारदेशे ऽपि दुराचारं करोति सः ।
परमेशस्य माहात्म्यं वीक्षितुञ्च न वाञ्छति ॥
परेश त्वत्करः प्रोच्चस्तै र्नरै र्वीक्ष्यते नहि । ११
वीक्षणं किन्तु तैस्तस्य कर्त्तव्यं नात्र संशयः ॥
स्वप्रजासु तवोद्योगात् ते भविष्यन्ति लज्जिताः ।
त्वद्वैरिग्रासको वह्निः संहरिष्यति तानपि ॥
अस्मदर्थं परेश त्वं शान्तिं निरूपयिष्यसि । १२
अस्माकं सर्व्वकार्य्याणि साध्यन्ते ऽस्मत्कृते त्वया ॥
अन्ये ऽस्मानशिषन् नाथा अस्मत्प्रभो परेश्वर । १३
केवलं त्वत्प्रसादाच्चास्माभिस्त्वन्नाम कीर्त्यते ॥
न जीविष्यन्ति ते प्रेता नैवोत्थास्यन्ति ते मृताः । १४
त्वया विचार्य्य ते लुप्ताः स्मृतिस्तेषाञ्च नाशिता ॥
वर्द्धितं स्वप्रजावृन्दं स्वप्रतापः प्रकाशितः । १५
सर्व्वदिक्षु च देशस्य सीमा विस्तारिता त्वया ॥
त्वज्जना अभ्यगच्छंस्त्वां सङ्कटे हे परेश्वर । १६
अकुर्व्वन् प्रार्थनां नीचैस्तव दण्डेन शासिताः ॥
यथा गर्भवती नारी सूतिकाले समागते । १७
व्यथिता व्याकुलीभूय काकूतिं कुरुते भृशं ।
दशास्माकं तथैवासीत् त्वत्प्रत्यक्षं परेश्वर ॥
सगर्भै र्व्याकुलीभूयास्माभि र्वायुरसावि हि । १८
न सिद्धं नीवृतस्त्राणं जन्म वा भूमिवासिनां ॥
जीविष्यन्ति तव प्रेता उत्थास्यन्ति शवा मम । १९
हे रजःशायिनो यूयं जागृत्वा कुरुतोत्सवं ।
यस्मात् तावकनीहारः प्रातर्नीहारसन्निभः ।

नीरवता च प्रमीतेभ्यो जन्म दायिष्यते पुनः॥
१० मत्प्रजे स्वगृहस्यान्त र्याहि द्वारं बधान च।
कोपस्य यावदत्येति क्षणं तावत् तिरोभव॥
२१ यतः पश्य विनिर्गत्य स्वस्थानात् परमेश्वरः।
फलं पृथ्वीनिवासिभ्यो ऽपराधस्य प्रदास्यति॥
प्रकाशयिष्यति क्षौणी शोणितं भुवि पातितं।
न च तत्र हतान् लोकान् पुनराच्छादयिष्यति॥

---

२७ सप्तविंशोऽध्यायः।

१ परमेश्वरस्य द्राक्षाक्षेत्ररक्षणगीतं ७ तस्य शास्तेरभिप्रायः १२ तदीयराज्यस्य वृद्धिः।

१ लिव्याथनाभिधानाय सर्पाय द्रुतगामिने।
लिव्याथनाभिधानाय सर्पाय वक्रगामिने।
स्वकीयदृढखड्गेन वृहता प्रबलेन च।
परमेशो दिने तस्मिन् प्रदास्यत्युचितं फलं।
समुद्रवासिनागञ्च त्यक्तप्राणं विधास्यति॥
२ तस्मिन् काले पुरीमेतां गोस्तनीक्षेत्रसन्निभां।
मत्वा यूयमिमां वाचं तामुद्दिश्य प्रगायत॥
३ तद्रक्षी परमेशो ऽहं तां सिञ्चामि प्रतिक्षणं।
यच्च को ऽपि न तां हिंसेत् तद् रक्षामि दिवानिशं॥
४ न क्रुध्यामि पुनस्तस्यै कश्चिच्चेत् समराय च।
कण्टकान् गोक्षुरांश्चापि मद्विरुद्धं समाक्षिपेत्।
तर्ह्यहं तान् समाक्रम्य ज्वलयिष्यामि सङ्घशः॥
५ मामेव शरणं गत्वा स शत्रुस्त्ववलम्बतां।
सन्धिं कुर्य्यान्मया सार्द्धं सन्धिं कुर्य्यान्मया सह॥
६ याकूबो भाविकालेषु बद्धमूलो भविष्यति।
विशोभिष्यत इस्रायेल् तदानीं पुष्पपल्लवैः।
कृत्स्नं भूमण्डलञ्चैव फलैरापूरयिष्यति॥
७ स्वकीयताडको यद्वत् तद्वत् किं सो ऽपि ताडितः।
नराः स्वेन हता यद्वत् तद्वद् वा सो ऽपि किं हतः॥
८ मितशास्त्या विरुन्ध्यैव स तया विवदिष्यते।

दिने पूर्व्वीयवायोस्तां चण्डवातेन नेष्यति ॥
एतेनैवापराधश्च याकूबस्य प्रमार्क्ष्यते। ९
तदीयदोषलोपेन फलञ्चैतस्य सेत्स्यति ॥
वेदीनां सर्व्वपाषाणे चूर्णकर्करखण्डवत्।
तेन निपातिते देव्या आशेरायाश्च मूर्त्तयः।
सूर्य्यदेवस्य च स्तम्भा उत्थास्यन्ति पुन र्नहि ॥
सुदृढं नगरं किन्तु ध्वंसस्थानं भविष्यति। १०
वासस्थानं परित्यक्तं वनवन्नरवर्ज्जितं ॥
वत्सास्तत्र चरिष्यन्ति विश्रमिष्यन्ति तत्र च।
भक्षणेन च तत्रत्यान् संहरिष्यन्ति पल्लवान् ॥
तच्छाखाः शुष्कतां प्राप्य प्रभंक्ष्यन्ते च मानवैः। ११
व्रजित्वा तत्र योषिद्भिः कारिष्यन्ते च भस्मसात् ॥
बुद्धिहीना यतः सन्ति मनुष्यास्तन्निवासिनः।
तस्मात् स्रष्टापि यस्तेषां स तान् नैवानुकम्पते।
निर्म्मातापि कृपां तेषु न करोति कथञ्चन ॥
तदानीं परमेशेन आफरातप्रवाहतः। १२
मिस्रीयनिम्नगां यावद् यत्नात् सञ्चेष्यते फलं।
इस्रायेल् संग्रहीष्यध्वे यूयमेकैकशस्तदा ॥
वृहत्तूरीध्वनिस्तस्मिन् काले च श्रावयिष्यते। १३
तं श्रुत्वाशूरदेशे ये नष्टकल्पा नराः स्थिताः।
मिसर्नीवृति यावन्तो विकीर्णाः प्रवसन्ति च ॥
सकलास्ते समागत्य यिरूशालमपत्तनं।
पवित्रे पर्व्वते तस्य प्रणंस्यन्ति परेश्वरं ॥

---

२८ अष्टाविंशोऽध्यायः।

१ इस्रायेलो भविष्यद्दण्डः ५ लोकानां भ्रान्तिः १४ सत्यभित्तेः स्थापनं मृषाभित्ते र्विनाशनं २३ विवेक्तुं विनयश्च।

धिक् त्वां हे इफ्रयीमस्य मत्तानां दर्पभूषण। १
मदोन्मत्तमनुष्याणाम् उर्व्वरोपत्यकोपरि।
तस्य रम्यकिरीटे च स्थापित म्लानपुष्पक ॥

२ प्रभुनानेष्यते पश्य वीर एको महाबलः।
वृष्टि र्यथा शिलायुक्ता झञ्झा वा सर्व्वनाशिनी।
विपुलाब्भजतोयानि भूप्लावकानि वा यथा।
स वीरः स्वीयहस्तेन भूमौ तत् पातयिष्यति॥
३ अदो यदिफ्रयीमस्य मत्तानां दर्पभूषणं।
पादद्वयेन तत् तस्य तदानीं मर्द्दयिष्यते॥
४ मदोन्मत्तमनुष्याणाम् उर्व्वरोपत्यकोपरि।
तस्य रम्यकिरीटे यत् स्थापितं म्लानपुष्पकं॥
तदुडुम्बरवृक्षस्य फलेन मंस्यते समं।
फलसङ्ग्रहकालात् प्राक् पक्कं वीक्ष्य नरेण यत्।
यावत् करतले भाति तावत् तूर्णं निगीर्य्यते॥
५ भविष्यति तदानीञ्च सेनाध्यक्षः परेश्वरः।
स्वप्रजासमुदायस्य मध्ये शेषन्नणां कृते।
शोभादायी किरीटश्च मुकुटश्चातिसुन्दरं॥
६ विचारायोपविष्टस्य चात्मा विचारशिक्षकः।
बलञ्च द्वारपर्य्यन्तं सङ्ग्रामप्रतिघातिनां॥
७ भ्राम्यन्तीमे ऽपि मद्येन सुरया सञ्चलन्ति च।
याजकभाविवक्तारो भ्राम्यन्ति सुरया जिताः॥
सर्व्वे मद्ये निमज्जन्ति सुरया सञ्चलन्ति च।
भ्राम्यन्ति दर्शनाख्याने विचारे प्रस्खलन्ति च॥
८ भोज्यासनानि सर्व्वाणि वान्तेनैव मलेन च।
परिपूर्णानि दृश्यन्ते किञ्चित् स्थानं न शिष्यते॥
९ स कं शिक्षयति ज्ञानं कं वा बोधयति श्रुतं।
किं दुग्धाद्विरतान् बालान् किं वा त्यक्तस्तनान् शिशून्॥
१० यतो विधि र्विधेः पश्चाद् विधिः पश्चात् पुन र्विधिः।
सूत्रात् परं पुनः सूत्रं सूत्रं सूत्रात् परं पुनः।
एकस्मिंश्च स्थले स्वल्पं स्वल्पमन्यस्थले पुनः॥
११ स्खलद्वागधराभ्यां स वैदेश्योक्तया च जिह्वया।
एतैरेव नरैः सार्द्धं संलापं प्रकरिष्यति॥
१२ विश्रामस्थानमत्रास्ति विश्रामयत सश्रमान्।
एतत् क्लान्तिहरं स्थानमिति तेनोदितं पुरा।

किन्तु तद् वचनं श्रोतुं तेषामिच्छाभवन्नहि ॥
परमेशस्य यद् वाक्यं तच्च तेषां नृणां कृते। १३
जातं विधि र्विधेः पश्चात् विधेः पश्चात् पुन र्विधिः ॥
सूत्रात् परं पुनः सूत्रं सूत्रं सूत्रात् परं पुनः।
एकस्मिंश्च स्थले स्वल्पं स्वल्पमन्यस्थले पुनः ॥
तस्माद् गमनकाले ते स्खलिष्यन्ति पराङ्मुखाः।
भग्नाङ्गाः पाशबद्धाश्च धरिष्यन्ते न संशयः ॥
अत एव परेशस्य वाक्यं शृणुत निन्दकाः। १४
नृणां शास्तार एतेषां यिरूशालमवासिनां ॥
यूयं ब्रूथ कृतोऽस्माभि र्नियमो मृत्युना सह। १५
परलोकेन सार्द्धञ्च समयोऽस्ति निरूपितः ॥
न स्प्रक्ष्यति प्रपत्यास्मान् उत्पातः प्रलयोपमः।
मृषोक्तावाश्रयप्राप्ताः प्रच्छन्नास्तान्तते वयं ॥
प्रभुः परेश्वरस्तस्माद् भाषते भारतीमिमां। १६
स्थापयिष्यामि पाषाणं सीयोने भित्तिमूलवत् ॥
परीक्षितः स पाषाणः कोणार्थञ्च समञ्जसः।
महार्घो भित्तिमूलार्थं यथायोग्यं दृढीकृतः।
तत्र यः श्रद्दधानः स न भविष्यति चञ्चलः ॥
प्रयोक्ष्ये सूत्रवन्न्यायं तत्र धर्म्मञ्च लम्बवत्। १७
स मृषोक्त्याश्रयः किन्तु शिलावृष्ट्यापनेष्यते।
तच्च प्रच्छादनस्थानं तोयैराप्लावयिष्यते ॥
मृत्युना सह युष्माकं नियमो लोपमाप्स्यति। १८
परलोकेन सार्द्धं वः समयः स्थास्यते नहि ॥
प्रलयोपम उत्पातो यदा च प्रपतिष्यति।
मर्द्दिष्यध्वे तदा यूयं तेन भूमौ प्रलोठिताः ॥
वारं वारं प्रपत्यैव स युष्मानपनेष्यति। १९
प्रातः प्रात र्दिवा रात्रौ यतः स प्रपतिष्यति।
त्रासेनैव च वागेषा बोधगम्या भविष्यति ॥
शयनं विस्तृताङ्गेन कृत्वा खट्वापरोत्स्यति। २०
गात्रसंवेष्टनं क्षुद्रः कम्बलो वारयिष्यति ॥
उत्थास्यति परेशश्च पिरासीमगिरौ यथा। २१

कोपिष्यति पुन र्यद्वद् गिवियोनाख्यकन्दरे ॥
स्वकार्य्यं तेन कर्त्तव्यं तत्तु कार्य्यं विलक्षणं।
स्वव्यापारश्च कर्त्तव्यः स व्यापारस्त्वसम्भवः॥
२२ इदानीमत्र युष्माभि र्नैव निन्दा विधीयतां।
न चेद् दृढीकरिष्यन्ते युष्माकं यन्त्रणानि हि॥
सेनाध्यक्षपरेशेन कृत्स्नामेवावनिं प्रति।
निरूपितस्य नाशस्य वाक्यं यस्मान्मया श्रुतं॥
२३ सम्यगाकर्ण्य युष्माभिः श्रूयतां मम भारती।
मनो निधाय युष्माभि र्मम वाक्यं निशम्यतां॥
२४ हालिको वपनार्थी किं वहति प्रत्यहं हलं।
मृत्तिकां दारयन् नित्यं कोटीशेन भिनत्ति वा॥
२५ तेन भूमिं समीकृत्य कीर्य्यन्ते किं तिला नहि।
रोप्यन्ते जीरकास्तेन गोधूमः पङ्क्तिषूप्यते।
स्वस्थले शितशूकश्च छिन्नशूकश्च सीमनि॥
२६ स यथोचितमादिष्टः शिक्षां प्राप्तो निजेश्वरात्॥
२७ तिलेषु स्थूलकाष्ठेन मर्द्दनं युज्यते नहि।
नैव वा शाकटं चक्रं घूर्णते जीरकोपरि।
तिला यष्ट्यैव ताड्यन्ते तथा दण्डेन जीरकाः॥
२८ पूपार्थं चूर्ण्यते शस्यं सर्व्वदा तु न मृद्यते।
चक्रं तस्योपरिष्टाच्च शाकटं चालयन्नपि।
न चूर्णयति तच्छस्यं स्वकीयाश्वैः कृषीबलः॥
२९ विधिरप्ययमुत्पन्नः सेनाध्यक्षपरेश्वरात्।
अद्भुता मन्त्रणा तस्य कौशलञ्च महत्तमं॥

---

२९ ऊनत्रिंशोऽध्यायः।

१ यिरूशालमो भविष्यद्दण्डः ९ लोकानामज्ञानत्वं १५ लोकानां दुष्टत्वं, २८ साधुलोकानां सुखं।

१ अरीयेल अरीयेल सन्तापस्ते भविष्यति।
दायूदा शिविरं यत्र स्थापितं त्वं हि तत् पुरं।
वर्षा वर्षेषु युज्यन्तां पर्व्वचक्रञ्च घूर्णतां॥

अहं क्लेश्याम्यरीयेलं खेदं खेदोऽनुयास्यति। २
स्थास्यसि त्वन्त्वरीयेलस्त्वग्निरीशस्य पूर्व्ववत्॥
वेष्टिष्ये शिविरेण त्वां प्रबाधिष्ये च योद्धृभिः। ३
अवरोधकयन्त्राणि स्थापयिष्यामि च त्वयि॥
नम्रीभूय तदा त्वञ्च कथयिष्यसि भूमितः। ४
रजसो मध्यतो नीचं वचश्चोत्पत्स्यते तव॥
समुत्थास्यति भूमध्यात् प्रेतस्येव तव स्वरः।
रजसो मध्यतो वाणी तव पक्षिशिशोरिव॥
भविष्यति तवारीणां समूहः सूक्ष्मरेणुवत्। ५
दुरात्मनां समूहश्च व्यतिगच्छत्तुषोपमः।
अकस्मादेव सद्यश्च घटनेयं प्रसेत्स्यति॥
सेनाध्यक्षपरेशेनोचितं दायिष्यते फलं। ६
वज्रनिर्घोषभूकम्पैश्चक्रवातप्रभञ्जनैः।
सर्व्वग्रासिकया चापि जिह्वया जातवेदसः॥
अरीयेलेन सार्द्धञ्च युध्यन्ते ये विदेशिनः। ७
तत् पुरं तस्य दुर्गञ्च प्रबाधन्ते च सेनया।
ते भविष्यन्ति रात्रीयस्वप्नदर्शनसन्निभाः॥
यः क्षुधातुर आत्मानं स्वप्नेऽश्नन्तं समीक्षते। ८
प्रबुद्धस्यान्तरं तस्य व्यथते नीरसं यथा॥
यो वा तृषार्त्त आत्मानं स्वप्ने पिबन्तमीक्षते।
प्रबुद्धस्यान्तरं तस्य यथा खेदेन शुष्यति॥
सीयोनगिरिणा सार्द्धं युध्यन्ते ये विदेशिनः।
तेषां कृत्स्नसमूहस्य दशा तादृग् भविष्यति॥
विलम्ब्य विस्मयं यात विलस्य गच्छतान्धतां। ९
मत्ता यूयं न मद्येन चञ्चलाश्च न हालया॥
निद्राजनकमात्मानम् अवतार्य्य परेश्वरः। १०
युष्माकं सर्व्वनेत्राणि तदानीं मीलयिष्यति।
भाविवक्तॄंश्च मूर्द्ध्नो वो दर्शकांश्च स घोक्ष्यति॥
युष्मद्दृष्ट्या तदा सर्व्वं शास्त्रं तद्वद् भविष्यति। ११
मुद्राङ्कितस्य पत्रस्य कस्यचिद्वचनं यथा॥
तस्मिन्नभ्यस्तपाठाय पठेत्युक्त्वा समर्पिते।

स ब्रूते नैव शक्नोमि मुद्राङ्कितमिदं यतः॥
१२ किन्त्वनभ्यस्तपाठाय पठेत्युक्त्वा समर्प्यते।
पत्रे सो ऽपि प्रतिब्रूते पठितुं नहि वेद्म्यहं॥
१३ प्रभु र्वक्ति जना एत आयान्त्यास्यै मदन्तिकं।
अधरैरेव सम्मानम् आचरन्ति च मां प्रति॥
किन्त्वन्तःकरणं तेषां दूरं मत्तो ऽवतिष्ठते।
मद्भक्तिश्च मनुष्याणाम् उपदेशो ऽनुशिक्षितः॥
१४ तस्मात् पश्य जनानेतान् प्रत्याचारमहं पुनः।
अत्याश्चर्य्यं करिष्यामि सर्व्वेषां विस्मयास्पदं।
ज्ञानिनां नंक्ष्यति ज्ञानं धीमतां लोप्स्यते च धीः॥
१५ परेशाद् गाढबुद्धीन् धिक् मन्त्रणाच्छादनार्थिनः।
अन्धकारे स्वकर्म्माणि कृत्वा यैरिदमुच्यते।
को ऽस्मान् शक्नोति सन्द्रष्टुं को ऽस्मान् शक्नोति वेदितुं॥
१६ आः कीदृग् वो विलोमत्वं कुलालः किं मृदा समः।
कर्म्म कर्त्तरि किं ब्रूयात् नासौ मां कृतवानिति।
स्रष्टरि वस्तु वा सृष्टं नास्यसौ बुद्धिमानिति॥
१७ अतीवाल्पक्षणे ऽतीते लिवानोन् परिवर्त्तितः।
किं न संस्यत उद्यानम् उद्यानञ्चाटवीसमं॥
१८ धर्म्मशास्त्रस्य वाक्यानि श्रोष्यन्ते बधिरैस्तदा।
वीक्षिष्यन्ते ऽन्धनेत्राणि विना ध्वान्तं विना तमः॥
१९ वर्धयिष्यन्ति चानन्दं नम्रशीलाः परेश्वरे।
इस्रायेलः पवित्रे च राज्ञि तोक्ष्यन्ति दुर्गताः॥
२० यस्मान्नंक्ष्यति दुर्वृत्तो लोपं यास्यति निन्दकः।
उच्छेत्स्यन्ते च सर्व्वे ते ये पापार्थं सचेतनाः॥
२१ एकस्य वचसो दोषान्नरं कुर्व्वन्ति दोषिणं।
पुरद्वारे ऽनुयुञ्जानम् उन्माथे पातयन्ति च।
धार्म्मिकञ्च वहिष्कृत्य प्रकुर्व्वन्ति दिगम्बरं॥
२२ इब्राहीमस्य निष्कृता ख्यातो यः परमेश्वरः।
स इदं वचनं ब्रूते याकूबीयान्वयं प्रति॥
नैव लज्जिष्यते याकूब् पुनर्व्वारमितः परं।
न पुनश्चाननं तस्य विवर्णत्वमवाप्स्यति॥

मत्कराभ्यां कृतं कर्म्म सन्ति तद्वंशजा यतः। २३
मन्नाम मन्यमानांस्तान् स द्रक्ष्यति निजान्तरे॥
याकूबस्य पवित्रो राट् पवित्रो मंस्यते हि तैः।
इस्रायेलो य ईशः स मंस्यते तै र्भयङ्करः॥
भ्रान्तात्मभि र्मनुष्यैश्च तदा बुद्धिरवाप्स्यते। २४
ये विलपन्त्यसन्तोषात् तैश्च शिक्षा ग्रहीष्यते॥

---

३० त्रिंशत्तमोऽध्यायः।

१ उपकारार्थं मिसरगमनात् लोकानां भविष्यद्दण्डः ८ ईश्वरीयकथाया अवज्ञानस्य फलं १८ ईश्वरीयानुग्रहस्य वर्णनं २७ अशूरीयराजस्य विनाशश्च।

पुत्रान् धिक् सत्पथभ्रष्टान् इति ब्रूते परेश्वरः। १
ममादेशं परित्यज्य ते प्रकुर्व्वन्ति मन्त्रणां।
अन्विष्यन्ति सहायांश्च ममात्मानं विहाय ते।
पातकस्योपरीत्थञ्च ते सञ्चिन्वन्ति पातकं॥
फिरौणस्य बलादेव बलप्राप्तेः प्रतीक्षया। २
छायायां मिसरीयायां शरणस्य च वाञ्छया।
मामपृष्ट्वा मिसर्देशं प्रति यात्राञ्च कुर्व्वते॥
फिरौणस्य बलात् किन्तु लज्जा तैः समवाप्स्यते। ३
छायायां मिसरीयायां शरणाच्च विवर्णता॥
तेषां नायकवर्गे च सोयने समुपस्थिते। ४
तेषां प्रेषितदूतेषु हानेषमागतेषु च॥
जातेरनुपकारित्वात् सर्व्वेषां क्ली र्जनिष्यते। ५
यतः सा नैव साहाय्यं नोपकारं करोति वा।
किन्तु सा केवलं लज्जाम् अवज्ञाञ्च प्रयच्छति॥

दक्षिणगामिपशूनां भाग्यं।

सिंहो यत्रास्ति सिंही च फणी खसर्प्पहिस्तथा। ६
मध्यतो नीव्रतस्तस्य क्लेशकष्टप्रदायिनः।
निबद्धं खरपृष्ठेषु धनमुष्ट्रककुत्सु च।
अनुपकारिणीं जातिं प्रत्येतै र्नीयते नरैः॥
व्यलीकाः सन्ति मिस्रीया निष्फला उपकारिणः। ७

वच्मि तान् नाम कृत्वाहम् उपवेशाभिमानिनः ॥
८ त्वन्तु गत्वा कथामेतां लोकानामेव सम्मुखे।
फलके लिख सम्यग् वा मुद्रितां कुरु पुस्तके।
तिष्ठेद् भाविदिनं यावत् नित्यसाक्षी भवेच्च सा ॥
९ यतो ऽबाध्यो ऽस्त्ययं वंशः पुत्रास्ते ऽनृतवादिनः।
सन्तानाः परमेशस्य शास्त्रं श्रोतुमनिच्छवः ॥
१० माशृत दर्शनानीति ते वदन्ति प्रदर्शकान्।
ऐशवक्तृंश्च भाषन्ते मा ब्रूध्वं सरलं वचः।
ब्रूध्वं स्निग्धवचांस्यस्मान् वीक्षध्वं मोहिदर्शनं ॥
११ युष्माभिस्त्यज्यतां पन्था ऋजुवर्त्म विहीयतां।
इस्रायेलः पवित्रो राट् अस्मत्तस्त्वापसार्य्यतां ॥
१२ इस्रायेलः पवित्रो राट् तस्मादेतत् प्रभाषते।
मम वाक्यं निराकृत्य दौरात्म्ये ऽनार्जवे च यत्।
यूयं कुरुथ विश्वासं तत्र प्राप्तावलम्बनाः ॥
१३ तस्माद् युष्मत्कृते दोष एष तद्वद् भविष्यति।
उच्चभित्ते र्यथा छिद्रं प्रलम्बं पतनोद्यतं।
सद्यो निमेषमात्रेण तस्या भङ्गो भविष्यति ॥
१४ भविष्यति च भग्ना सा कुलालस्य घटो यथा।
यं विलोक्य नरा भग्नं चूर्णयन्ति कृपां विना ॥
चुल्लीतो वह्निमुद्धर्त्तुं खातादादातुमम्बु वा।
मध्ये तदीयखण्डानां शकलं शिष्यते नहि ॥
१५ इस्रायेलः पवित्रो राट् प्रभुः परेश्वरो ऽब्रवीत्।
परिवर्त्तेन शान्त्या च यूयं रक्षामवाप्स्यथ।
धैर्य्याद् विश्वासदार्ढ्याच्च शक्तिमन्तो भविष्यथ।
एतस्यां मन्त्रणायान्तु यूयं न पर्य्यतुष्यत ॥
१६ अब्रूध्वञ्च हयारूढाः पलायिष्यामहे वयं।
तस्मात् पलायनं यूयम् अवश्यं प्रकरिष्यथ ॥
वयं यात्रां करिष्यामो जविभि र्वाहनैरिति।
ततो हेतो र्भविष्यन्ति जविनो वो ऽनुधावकाः ॥
१७ एकस्यैव तिरस्कारात् सहस्रेण पलायनं।
पञ्चानाञ्च तिरस्कारात् सकलै र्वः करिष्यते ॥

यूयं ततो ऽवशेक्ष्यध्वे गिरिशृङ्गे ध्वजो यथा।
पताका वा यथा काचित् पर्व्वतस्योपरि स्थिता॥
युष्माननुग्रहीतुन्तु परमेशः प्रतीक्षते। १८
स चोत्तिष्ठति युष्मासु करुणां कर्त्तुमुद्यतः॥
न्यायकारीश्वरो यस्मात् ख्यायते परमेश्वरः।
यावन्तस्तमपेक्षन्ते धन्यास्ते सन्ति मानवाः॥
सीयोनीयप्रजे त्वञ्च यिरूशालमि वत्स्यसि। १९
त्वदीयरोदनं नैव चिरस्थायि भविष्यति॥
कृते त्वयार्त्तरावे स त्वयि स्नेहं करिष्यति।
तं निशम्यैव तुभ्यं स उत्तरं वितरिष्यति॥
अन्नं क्लेशे जलं द्रोहे युष्मभ्यं दास्यति प्रभुः। २०
न स्थास्यन्ति पुनर्व्वारं प्रच्छन्नास्तव शिक्षकाः।
त्वदीयलोचने किन्तु शिक्षकान् द्रक्ष्यतस्तव॥
गन्तव्ये दक्षिणे पार्श्वे त्वया वा दक्षिणेतरे। २१
स्वपश्चात् तव कर्णाभ्यामिदं संश्रोष्यते वचः।
अयं प्रकृतमार्गो ऽत्र युष्माभि र्गम्यतामिति॥
यूयं स्वप्रतिमानाञ्च छादनं रौप्यनिर्म्मितं। २२
स्वर्णकोषञ्च मूर्त्तीनाम् अपवित्रीकरिष्यथ।
दूरीभवेति वाचा च मलवद् विकरीष्यथ॥
स वृष्टिं तव वीजाय भूम्युप्ताय प्रदास्यति। २३
तुभ्यं क्षेत्रजमन्नञ्च सुस्थूलं रससंयुतं।
चरिष्यन्ति च विस्तीर्णे स्थाने त्वत्पशवस्तदा॥
मृत्तिकां तव कर्षन्ति ये बलीबर्द्दगर्द्दभाः। २४
ते मिष्टं भक्ष्यमत्स्यन्ति चालनीशूर्पशोधितं॥
पतिष्यन्ति च दुर्गाणि महावधदिने यदा। २५
तदाद्रीणामुदग्राणाम् उन्नतानाञ्च भूभृतां।
उपरिष्टात् जलाकीर्णा नद्यः स्रोष्यन्ति वेगतः॥
उष्णांशोः प्रभया तुल्या शीतांशो र्भविता प्रभा। २६
भविता च प्रभोष्णांशोस्तदा सप्तगुणाधिका।
प्रभया सप्तघस्राणाम् एकत्रीकृतया समा॥
भन्त्स्यते परमेशेन स्वप्रजानां क्षतं तदा।

स्वीयप्रहारजञ्चापि व्रणं स्वस्थं करिष्यति॥
२७ दूरात् पश्य समायाति महानामा परेश्वरः।
दीप्यते तस्य कोपाग्निं धूममालां समुत्क्षिपन्।
रोषपूर्णौ च तस्योष्ठौ जिह्वा ग्रासकवह्निवत्॥
२८ स्रवते तस्य वायुश्च कण्ठस्पर्शिप्रवाहवत्।
यस्मात् संहारचालन्या स जातीश्चालयिष्यति।
आस्ये भ्रान्तिखलीनञ्च लोकानां स प्रदास्यति॥
२९ युष्माकं भविता गानं पर्व्वारम्भनिशीव च।
परेशस्य गिरिं गन्तुम् इस्रायेलोऽचलं प्रति।
वंशीवादिनरैः सार्द्धं यो मनुष्यः प्रगच्छति।
तस्येवान्तरिको हर्षो युष्माकं सम्भविष्यति॥
३० अतिप्रचण्डरोषेण ग्रासकानलजिह्वया।
उदवर्षेण वृष्ट्या च शिलायाः पतनेन च॥
परमेशः स्वनादस्य भीमत्वं श्रावयिष्यति।
स्वबाहोरवतारञ्च मनुष्यान् दर्शयिष्यति॥
३१ अश्शूरः प्राप्स्यति ध्वंसं परमेशस्य नादतः।
स च स्वकीयदण्डेन तं शत्रुं ताडयिष्यति॥
३२ परमेशेन तस्मिंश्च यो दण्डो वर्त्तयिष्यते।
तस्य दैवस्वरूपस्य दण्डस्य सर्व्वचालने।
वीणाम्रदङ्गवाद्यस्य सम्प्रयोगो भविष्यति।
वैरिणा तेन सार्द्धं स योत्स्यते रणसङ्कुले॥
३३ तोफताख्यश्मशानं यत् तत्प्राक्कालान्निरूपितं।
राज्ञः कृते सुसज्जं तत् सुविस्तीर्णमधोगतं॥
बहुकाष्ठा च तत्रत्या चिता दीपिष्यतेतरां।
निश्वासेन परेशस्य गन्धकस्रोतसा यथा॥

---

३१ एकत्रिंशोऽध्यायः।

१ मिसरि प्रत्याशाकरणात् लोकान् प्रति भर्त्सनं ६ ईश्वरं प्रति परावर्त्तितुं विनय-कथनम् अश्शूरीयाणां विनाशकथनञ्च।

१ धिक् तान् ये मिसरं देशं यान्ति साहाय्यवाञ्छया।
स्वीयरक्षार्थमश्वांश्च ये कुर्व्वन्त्यवलम्बनं॥

तेषां रथेषु विश्वासो यतस्ते बहुसंख्यकाः।
तेषां सादिषु विश्वासो यतस्ते बलवत्तमाः॥
इस्रायेलः पवित्रो राट् तैस्तु नैवावलोक्यते।
नैव वा परमेशस्य क्रियते तै र्गवेषणं॥
ज्ञानवान् किन्तु सोऽप्यस्ति स चानेष्यत्यमङ्गलं। २
नैव स स्वीयवाक्यानि निष्फलानि विहास्यति॥
दुर्वृत्तानाञ्च सन्तानान् सहायांश्च कुकर्म्मणां।
स विपक्षवदुत्थाय निश्चितं प्रतिरोत्स्यति॥
मनुष्याः सन्ति मिस्रीया ईश्वरा नहि सन्ति ते। ३
मांसमेव हयास्तेषाम् आत्मानो नहि सन्ति ते॥
हते तस्मात् परेशेन स्वहस्तस्य प्रसारणे।
स्खलिष्यत्युपकारी चोपकृतश्च पतिष्यति।
समवाप्स्यन्ति संहारम् एकदा सकलाश्च ते॥
मामुद्दिश्य कथामेताम् अब्रवीत् परमेश्वरः। ४
मृगेन्द्रो युवसिंहो वा गर्ज्जन् मेषे हृते यथा॥
स्वविरुद्धं समाहूतां दृष्ट्वा रक्षकसंहतिं।
न शब्दाच्छङ्कते तेषां कलहाच्च न सीदति॥
सेनाध्यक्षपरेशेन तथा सीयोनपर्व्वतं।
भूधरश्चाधि तत्रत्यम् अवतीर्य्य प्रयोत्स्यते॥
स्वनीडं पक्षिणी यद्वत् डयमाना समन्ततः। ५
यिरूशालम्पुरीं तद्वत् सेनाध्यक्षः परेश्वरः।
परिवेष्टिष्यते सम्यग् वेष्टित्वा चोद्धरिष्यति।
उपस्थाय च कारुण्यात् तस्या रक्षां करिष्यति॥
इस्रायेलीयसन्ताना यमत्याक्षुः पराङ्मुखाः। ६
सुदूरं प्रगता यूयं पुनरायात तं प्रति॥
तदा युष्माकमेकैकः पापार्थं स्वकरैः कृताः। ७
स्वर्णरौप्यमयी मूर्त्ती र्गर्हित्वा दवयिष्यति॥
नरादन्यस्य खड्गेन तदाशूरः पतिष्यति। ८
मनुष्यादितरस्यासिस्तञ्च व्यापादयिष्यति॥
निस्त्रिंशाच्च जनास्तस्य करिष्यन्ति पलायनं।
भविष्यन्त्युत्तमास्तस्य योद्धारः करदायिनः॥

९ त्रासात् स परमेशस्य गिरेरग्रं गमिष्यति।
तस्याध्यक्षा ध्वजं दृष्ट्वा भविष्यन्ति भयाकुलाः॥
अग्निर्यस्यास्ति सीयोने चुल्ली च यिरूशालमे।
परमेशेन तेनैव भारतीयं निगद्यते॥

---

३२ द्वात्रिंशोऽध्यायः।

१ ख्रीष्टीयराजत्वस्य मङ्गलकथनं ९ देशस्याधःपतनं पुनरुन्नतिश्च।

१ धर्म्मार्थं पश्य राजत्वं महीपालः करिष्यति।
न्यायार्थञ्च करिष्यन्ति शास्तारो देशशासनं॥
२ नर एकश्च वात्यायाः काले सङ्गोपनस्थलं।
धारासारस्य काले चाश्रयस्थानं भविष्यति॥
प्रस्रवन्ति मरुस्थाने जलस्रोतांसि वा यथा।
वृहच्छैलस्य वा छाया प्राप्ता निःस्नेहनीवृति॥
३ दर्शकानाञ्च नेत्राणि प्राप्स्यन्ति क्षीणतां नहि।
परिश्रोष्यति सूक्ष्मञ्च श्रोतॄणां श्रवणेन्द्रियं॥
४ ज्ञानाय प्रतिभोत्स्यन्ते चञ्चलानां मनांस्यपि।
स्खलद्वाक्यस्य जिह्वा च स्पष्टं वक्तुं त्वरिष्यते॥
५ न च मूढो महात्मेति नाम्ना विख्यास्यते पुनः।
न स्तोष्यन्ति वदान्यो ऽयमित्युक्त्वा कृपणं नराः॥
६ मूढतां भाषते मूढश्चित्तं तस्यास्ति पापकृत्।
अधर्म्मं कर्त्तुमिच्छुः स द्रोहं वक्तुं परेश्वरे।
क्षुधार्त्तं क्षुधया हन्तुं पेयं हर्त्तुं तृषातुरात्॥
७ कृपणस्याशया हिंस्राः स च मन्त्रयते छलं।
दीनो यावद् वदेन्न्यायं तावद् दुःखितमानवान्।
कृपणः स्वमृषावाक्यै र्विनाशयितुमिच्छति॥
८ महात्मा किन्तु माहात्म्याज्जातां मन्त्रयते क्रियां।
माहात्म्योत्पन्न आचारे स च पर्य्यवतिष्ठते॥
९ हे निश्चिन्तास्त्रियो यूयं शृणुतोत्थाय मद्वचः।
हे कन्या निर्भया यूयं मम गृह्णीत भारतीं॥
१० गते वर्षाधिके काले यूयं भेष्यथ निर्भयाः।

फलानां सञ्चयो यस्मात् तदा लोपमवाप्स्यति।
शस्यसंग्रहकालश्च पुन र्नैव भविष्यति॥
यूयं त्रस्यत निश्चिन्ता यूयं विभीत निर्भयाः। ११
वस्त्रं त्यजत नग्नाश्च कटौ बध्नीत कर्पटं॥
स्तनान् रम्यञ्च केदारं फलिद्राक्षाञ्च शोचत॥ १२
मद्देशीयनृणां भूमौ परोक्ष्यन्ति हि कण्टकाः। १३
गोक्षुरा हर्षयुक्तायाः पुर्य्याः क्रीडागृहेषु च॥
प्रासादो भविता शून्य आकीर्णा त्यक्ष्यते पुरी। १४
सदुर्गमोफलं नित्यं गुहाद्वारं भविष्यति।
खराणां प्रमदस्थानं व्रजानां चरणस्थलं॥
शेषे किन्तूर्द्धतोऽस्मासु स्वयमात्मा निषेक्ष्यते। १५
तदानीञ्च मरुस्थानम् उद्यानं सम्भविष्यति।
उद्यानञ्चाटवीतुल्यं मनुष्यै र्गणयिष्यते॥
मरौ निवत्स्यति न्याय उद्याने चेशभक्तता॥ १६
ईश्वरभक्ततायाश्च कार्य्यं शान्ति र्भविष्यति। १७
फलं भक्तेश्च विश्रामो निर्भयत्वञ्च शाश्वतं॥
शान्तियुक्ते निवासे हि निर्भयेषु च वेश्मसु। १८
निःशङ्केष्वाश्रमेष्वेव निवत्स्यन्ति मम प्रजाः॥
अटव्यास्तु निपाताय शिलावृष्टि र्भविष्यति। १९
नतावस्थामवाप्नुञ्च नतीकारिष्यते पुरी॥
सर्व्वस्यां साम्बुभूमौ ये युष्माभि र्बीजमुप्यते। २०
प्रेष्य गोखरयोः पादान् यूयं धन्या भविष्यथ॥

---

३३ त्रयस्त्रिंशोऽध्यायः।

१ शत्रूणां भविष्यद्दण्डः १२ साधुलोकानां कल्याणञ्च।

धिक् त्वाम् अहृतवित्तो यो कुरुषे वित्तहारणं। १
परै र्न वञ्चितो यश्च कुरुषे परवञ्चनं॥
सिद्धवित्तापहारस्य वित्तं हारिष्यते तव।
समाप्तवञ्चनं त्वाञ्च वञ्चयिष्यन्ति मानवाः॥
परेशानुगृहाणास्मान् त्वमस्माभिः प्रतीक्षितः। २

प्रतिप्रभातमस्माकं बाहुवत् त्वं भव स्वयं ।
विपत्काले त्वमस्माकं परित्राता भव स्वयं ॥
३ समारोहस्य शब्दाद्धि पलायन्ते विदेशिनः ।
तवोत्थितिं समालोक्य विकीर्य्यन्ते ऽन्यजातयः ॥
४ द्रव्याणि संहरिष्यन्ते युष्माकं शलभैरिव ।
नरैस्तान्याक्रमिष्यन्ते घस्मरैः शूककीटवत् ॥
५ ऊर्द्ध्वस्थाननिवासी तु परमेश्वर उन्नतः ।
स एव न्यायधर्म्माभ्यां सीयोनं पूरयिष्यति ॥
६ स च तावककालस्य स्थैर्य्यहेतु र्भविष्यति ।
परित्राणनिधिश्चापि बुद्धे र्ज्ञानस्य चाकरः ।
परमेशस्य या भक्ति र्धनशाला हि सा तव ॥
७ तेषां वीरै र्बहिः पश्य हाहाकार उदीर्य्यते ।
तीव्रं सन्ध्यर्थिभि र्दूतैः क्रन्दनञ्च विधीयते ॥
८ शून्यानि सन्ति वर्त्मानि पथिका विरमन्ति च ।
सन्धिलङ्घी पुरी र्निन्दन् ढणाय मन्यते नरं ॥
९ जीर्य्यन् शुष्यति देशश्च लिवानोन् लज्जते क्षयात् ।
शारोणं मरुणा तुल्यं स्थाने बाशनकर्म्मिले ॥
१० उत्थास्याम्यधुनैवाहमिति ब्रूते परेश्वरः ।
अधुना शिर उत्थाप्य भविष्यामि समुन्नतः ॥
११ धृतगर्भास्तृणं यूयं नालानेव प्रसोष्यथ ।
युष्मान् स्वकीयनिश्वासो वह्निवच्च प्रधक्ष्यति ॥
१२ जातयश्च भविष्यन्ति कर्करापाकसन्निभाः ।
छिन्नकण्टकसङ्काशा ज्वलिष्यन्त्यनलेन वा ॥
१३ यन्मयाकारि तच्छ्रोतुं दूरस्था यूयमर्हथ ।
यूयञ्च हे समीपस्था बुध्यध्वं मत्पराक्रमं ॥
१४ पापास्त्रस्यन्ति सीयोने कम्पो गृह्णाति पामरान् ।
संहारकानले वस्तुं को ऽस्मत्तुल्यः क्षमो भवेत् ।
वस्तुं वानन्तदाहेषु को ऽस्मत्तुल्यः क्षमो भवेत् ॥
१५ यो नरः कुरुते धर्म्मं सारल्येन च भाषते ।
जनपीडनजं लाभं ग्रहीतुञ्च विगर्हते ॥
अपसारयति क्षिप्रम् उत्कोचस्पर्शनात् करं ।

हत्याया मन्त्रणां शृखन् स्वीयकर्णौ रुणद्धि च ।
अनिच्छुः कुक्रियां द्रष्टुं स्वनेत्रे च निमीलति ॥
वत्स्यत्यूर्द्धे मनुष्यः स शैलदुर्गे कृताश्रयः । १६
अन्नदानं कृतं तस्मै तोयदानञ्च नैत्यिकं ॥
द्रक्ष्यतस्तव नेत्रे च स्वसौन्दर्य्यान्वितं नृपं । १७
ताभ्याञ्चालोकयिष्यन्ते नीवृतो दूरवर्त्तिनः ॥
पूर्वत्रासस्य चिन्ताञ्च तव चित्तं करिष्यति । १८
लिपिकर्त्ताधुना कुत्र कुत्र वा करमापकः ।
दुर्गाणां गणनाकारी लेखकः कुत्र वा गतः ॥
अस्पष्टोच्चारणाद् येषां वचः श्रोतुं न शक्यते । १९
येषां स्खलितजिह्वानां कथा बोद्धुं न शक्यते ।
त्वं तान् निर्विनयान् लोकान् नैव वीक्षिष्यसे तदा ॥
समालोकय सीयोनम् अस्माकं पर्व्वणां पुरीं । २०
द्रक्ष्यसि स्वीयनेत्राभ्यां त्वं यिरूशालमं तदा ।
शङ्काहीनमिवावासं निश्चलं पटवेश्म वा ॥
न समुत्पाटयिष्यन्ते कीलास्तस्य कदाचन ।
नैवापसारयिष्यन्ते सकलास्तस्य रज्जवः ॥
अस्मदर्थं प्रतापी तु स्वयं तत्र परेश्वरः । २१
नदीनां भविता स्थानं विस्तीर्णस्रोतसां स्थलं ॥
चालिता बहुदण्डैस्तु नौका तत्र न यास्यति ।
प्रतापार्णवयानं वा तत् स्थानं न तरीष्यति ॥
परेशः प्राड्विवाको नः परेशो विधिदायकः । २२
परेशश्चास्ति राजा नः स चास्मान् तारयिष्यति ॥
हे शत्रो शिथिलीभूताः पश्य त्वदीयरज्जवः । २३
न धरन्ति स्थिरं कूपं नौवस्त्रं वा सुविस्तृतं ॥
ततो विभक्ष्यते लोकै र्लुण्ठितं त्वन्महाधनं ।
अपहारिष्यते वित्तं तव पङ्गुनरैरपि ॥
अहं रोगीति वाक्यञ्च तन्निवासी न वक्ष्यति । २४
पापमुक्ता यतः सन्ति मानवास्तन्निवासिनः ॥

---

३४ चतुस्त्रिंशोऽध्यायः।

वैरिणां भाविदण्डः।

१ हे विदेशिनरा यूयं संश्रोतुमुपतिष्ठत।
हे नराः सर्व्वजातीया युष्माभिरवधीयतां॥
मही सपूरकैः सार्द्धं वाक्यमेतत् शृणोतु हि।
जगता जगदुत्पन्नैः सकलैश्च निशम्यतां॥
२ यतः क्रोधः परेशस्य वर्त्तते सर्व्वदेशिषु।
तेषां निखिलवाहिन्यां तस्य रोषश्च वर्त्तते।
वर्ज्जनीयांश्च तान् कृत्वा स वधायार्पयिष्यति॥
३ स्खलित्वा निपतिष्यन्ति तेषामस्त्राहता जनाः।
मृतानां कुणपेभ्यश्च दुर्गन्धो निर्गमिष्यति।
द्रवीभूता भविष्यन्ति तेषां रक्तेन भूधराः॥
४ विलयं यास्यति व्योम्नः कृत्स्ना नक्षत्रवाहिनी।
कुञ्चितो भविताकाशो वर्त्तुलीकृतलेख्यवत्॥
द्राक्षातः शीर्णपत्राणि शुष्कं वोडुम्बरात् फलं।
यथा तद्वत् खतः कृत्स्ना पतिष्यत्युडुवाहिनी॥
५ मम यश्चन्द्रहासः स स्वर्गे तीक्ष्णीकृतो ऽभवत्।
वर्ज्जनीयानकार्षं यान् मनुष्येष्वेव तेषु सः।
इदोमाभिधदेशे च विचाराय पतिष्यति॥
६ परमेशस्य निस्त्रिंशः परिपूर्णो ऽस्ति शोणितैः।
पूर्णः स मेषवत्सानां छागानाञ्चापि शोणितैः।
मेदसा च सुपीनः स मेषाणामन्त्रमेदसा॥
परेशस्य कृते यज्ञो वस्रायां सम्भविष्यति।
बलीनां बहुसङ्ख्यानां हत्या चेदोमनीवृति॥
७ तैः सार्द्धं निपतिष्यन्ति खड्गा गावो वृषैः सह।
तेषाञ्च शोणितै भूमिः परिषिक्ता भविष्यति।
रेणुश्च मेदसा तेषां समवाप्स्यति पीनतां॥
८ प्रतीकारदिनं तद्धि परेशस्य भविष्यति।
सीयोनीयविवादे स फलदानस्य वत्सरः॥
९ तत्रत्यस्रोतसामापो भविष्यन्ति शिलाजतु।
तस्य देशस्य धूलिश्च गन्धकाश्मा भविष्यति।

भविष्यति च तत्रत्या भूमि र्ज्वलच्छिलाजतु ॥
न दिवा न क्षपायां वा सा निर्व्वाणमवाप्स्यति । १०
यावदनन्तकालञ्च धूमस्तस्या उदेष्यति ॥
शुष्कः स्थास्यति देशः स आपौरुषपरम्परं ।
न कदाचन कश्चित् तं पान्थो वातिक्रमिष्यति ॥
टिट्टिभशल्यसस्तस्य भविष्यन्त्यधिकारिणः । ११
पेचकै र्द्रोणकाकैश्च तत्र वासः करिष्यते ॥
वितनिष्यति तत्रैव शून्यतां मानरज्जुवत् ।
प्रयोक्ष्यते च संक्षोभं लम्बवत् परमेश्वरः ॥
कुलीनाः कुत्र नैको ऽपि राज्यादानाय विद्यते । १२
अध्यक्षास्तस्य यावन्तः सकला नास्तितां गताः ॥
कण्टकानां वनं तस्य प्रासादेषूद्भविष्यति । १३
गोक्षुराः पीतपर्ण्यश्च प्ररोक्ष्यन्त्युच्चभित्तिषु ॥
स देशः पन्नगानाञ्च वासस्थानं भविष्यति ।
विहारञ्च करिष्यन्ति सुखं तत्रोष्ट्रपक्षिणः ॥
मरुस्थजन्तुभिः सार्द्धं मिलिष्यन्ति च जम्बुकाः । १४
प्राणिनो दीर्घलोमान आक्रंस्यन्ति परस्परं ॥
आश्रयं केवलं तत्र लप्स्यते च निशाचरः ।
विश्रामसेवनार्थञ्च तत्रैव प्राप्स्यति स्थलं ॥
फणिनी च विलं प्राप्य तत्राण्डानि प्रसोष्यते । १५
शिशूंश्च तत उत्पाद्य स्वच्छायायां भरिष्यति ।
सभां तत्र करिष्यन्ति गृध्रा एव ससङ्गिनः ॥
ग्रन्थं दृष्ट्वा परेशस्य युष्माभिः पठ्यतामिदं । १६
अभावो मध्य एतेषां नैकस्यापि भविष्यति ।
एतेषां मध्य एकैकः स्वसखायमवाप्स्यति ॥
आदेशो ऽयं परेशस्य मुखतो निर्गतो यतः ।
तस्यैवात्मा स्वयं तेषां सङ्ग्रहञ्च करिष्यति ॥
तेनैव गुटिकापातः कृते तेषामकारि हि । १७
तेनैव रज्जुहस्तेन दायभागो व्यधायि च ॥
नित्यं ते तस्य देशस्य भविष्यन्त्यधिकारिणः ।
निवत्स्यन्ति च तन्मध्य आपौरुषपरम्परं ॥

३५ पञ्चत्रिंशोऽध्यायः।

ख्रीष्टीयराजत्वस्योत्तमत्वं सुखञ्च।

१ प्रान्तरं शुष्कभूमिश्च महानन्दमवाप्स्यतः।
उल्लसिष्यति धन्वा च प्रफुल्लः पद्मिनी यथा॥
२ लप्स्यते स प्रफल्लत्वम् उल्लासाच्च प्रगास्यति।
लिवानोनगिरेस्तेजस्तस्मै दायिष्यते यतः।
कर्म्मिलशारणयोः शोभा तस्मिन् समर्पयिष्यते॥
परमेशस्य तेजश्च तत्रत्यै र्दक्ष्यते नरैः।
अस्मदीयेश्वरस्यैव शोभा वीक्षिष्यते च तैः॥
३ शिथिलौ यौ करौ यूयं तौ दृढीकर्त्तुमर्हथ।
स्खलिते जानुनी चापि सबलीकर्त्तुमर्हथ॥
४ ब्रूत चोन्मनसो लोकान् वीरयध्वं स्त निर्भयाः।
प्रतिभाति समीपस्थः स्वयं युष्माकमीश्वरः॥
समायाति प्रतीकार उचितं फलमीश्वरात्।
स स्वयं समुपस्थाय युष्मान् निस्तारयिष्यति॥
५ नेत्राण्यन्धमनुष्याणां यास्यन्त्युन्मीलनं तदा।
वधिराणां नृणां कर्णा भविष्यन्ति निरर्गलाः॥
६ मृगवत् प्लोष्यते खञ्जो जिह्वा मूकस्य गास्यति।
स्रोष्यन्ति प्रान्तरे चापः सरितश्च मरुस्थले॥
७ मृगतृट् भविता वापी धन्वा चोत्समयस्तदा।
नागानां वसतिस्थाने शयनार्थं निषेविते।
धमनादितृणाकीर्णो गोप्रचारो भविष्यति॥
८ भविता तत्र वर्त्मैकं ख्यास्यते पूतवर्त्म तत्।
न यास्यत्यशुचिस्तेन शुचीनां तद् भविष्यति।
यः पान्थो मन्दधीः सोऽपि नैव भ्रान्तो भविष्यति॥
९ तत्र न स्थास्यते सिंहो हिंस्रजन्तु र्न यास्यति।
नैको ऽपि प्राप्स्यते तत्र परिक्रीता हि यात्रिकाः॥
१० नराः प्रत्यागमिष्यन्ति परमेशेन मोचिताः।
गीत्या यास्यन्ति सीयोनं तेऽक्षयानन्दमौलयः।
प्राप्स्यतः सुखहर्षौ तान् क्लेशार्त्ती चापयास्यतः॥

---

३६ षट्त्रिंशोऽध्यायः।

१ यिरूशालमं प्रति सन्हेरीबस्याक्रमणं ११ रब्शाके र्निन्दाकथनं हिष्कियं प्रति तत्प्रकाशनञ्च।

हिष्कियराजस्य चतुर्दशे वत्सरे ऽस्रूरीयः सन्हेरीबो राजा यिहू- १
दायाः प्राचीरवेष्टितानां सर्व्वनगराणां विरुद्धम् आगत्य तानि वशी-
चकार। अनन्तरम् अस्रूरीयो राजा बहुभिः सैन्यसामन्तैः सार्द्धं २
रब्शाकिं लाखीशनगराद् यिरूशालमे हिष्कियस्य नृपस्य समीपं
प्रेषयामास; स चोर्द्धस्थितायाः पुष्करिण्याः प्रणाल्यां रजकक्षेत्रस्य
मार्गे ऽवस्थितवान्। ततो हिल्कियस्य पुत्र इलियाकीमनामा राज- ३
गृहाध्यक्षः शिब्नो लेखक आसाफस्य पुत्रो योयाहनामा पुरावृत्त-
रचकश्च तं साक्षात् कर्त्तुं वहि र्जग्मुः। ततो रब्शाकिस्तान् जगाद, ४
यूयं हिष्कियम् इमां कथां भाषध्वम्, अस्रूरीयो भूपति र्महाराजः
कथयति, त्वं यं विश्वासं करोषि स कीदृशो विश्वासः? अहं ब्रवीमि ५
संग्रामाय या मन्त्रणा यच्च बलं तत् शब्दमात्रं। अधुना त्वं कस्मिन्
विश्वस्य मदीयाधीनतां त्यक्तवान् असि? पश्य त्वं तस्यां भग्ननलरूपायां ६
यष्ट्याम् अर्थात् मिसरि विश्वसिषि; किन्तु यः कश्चित् ताम् आलम्बते
तस्य हस्तस्तया विद्धः क्षतयुक्तश्च भवति, स्वीयशरणागतान् सर्व्वान्
प्रति मिस्रीयः फिरौन् राजा तादृशः। त्वं यदि मां वदसि वयं स्वप्रभौ ७
परमेश्वरे विश्वसिमस्तर्हि स किमसौ नहि यस्य प्रांशुस्थानानि वेदीश्च
दूरयित्वा हिष्कियो यिहूदीयान् यिरूशालमनिवासिनश्च मनुष्यान्
भाषितवान् यूयं केवलम् एतस्या वेद्याः सम्मुखे भजध्वं? इदानीं त्वं ८
मम प्रभुनास्रूरीयराजेन सह पणं कुरु; त्वं यद्यारोहिलोकान् प्राप्तुं
शक्नुयास्तर्हि द्वे सहस्रे हयानहं तुभ्यं दास्यामि। तस्मिन् असाध्ये सति ९
मम प्रभोरतिक्षुद्राणां भृत्यानां मध्य एकं सेनापतिमपि कथं जेष्यसि?
किन्तु त्वं रथानां हयानाञ्च कृते मिसरि विश्वसिषि। परमेश्वरीयाज्ञां १०
विना देशमिमम् उच्छेत्तुं किमहम् इदानीमागमं? त्वं तं देशं गत्वा
विनाशयेति परमेश्वरेणैवाहम् आज्ञापितः।

तत इलियाकीमः शिब्नो योयाहश्च रब्शाकये कथयामासुः, प्रार्थ- ११
यामहे वयम्, अरामीयभाषया निजदासान् सम्भाषतां यतो वयं तां
बुध्यामहे, प्राचीरोपरि स्थितानां लोकानां कर्णगोचरे ऽस्मान् यिहूदि-
भाषया न सम्भाषतां। रब्शाकिस्तान् प्रत्युवाच, मम प्रभुः किम् एत- १२

द्वाक्यकथनार्थं केवलं तव स्वामिनं त्वाञ्च प्रति मां प्रेषितवान्? अमी ये
लोका युष्माभिः सार्द्धं स्वां स्वां विष्ठां भोक्तुं स्वं स्वं मूत्रं पातुञ्च प्राचीरो-
१३ पविष्टाः सन्ति तेषां सर्व्वेषामपि सन्निधिं किमहं न प्रेरितः? तदन-
न्तरं रब्शाकिरुत्तिष्ठन् उच्चकै र्यिहूदिभाषया वदितुम् आरब्धवान्,
स जगाद, यूयं महाराजस्यार्थाद् अशूरीयस्य नृपतेः कथां शृणुत।
१४ राजा कथितवान्, हिष्कियो युष्मान् न प्रवञ्चयतु, यतो मम कराद्
१५ युष्मान् रक्षितुं स न शक्नोति। तथा परमेश्वरो ऽस्मान् अवश्यम्
उद्धरिष्यति, नगरमिदं कदापि नाश्शूरीयस्य राज्ञो हस्ते समर्पयिष्यत
१६ इति कथयित्वा हिष्कियो युष्मान् परमेश्वरे न विश्वासयतु। हिष्कियस्य
कथां मा शृणुत, यतो ऽश्शूरीयो राजा कथितवान्, यूयं मया सन्धाय
मदन्तिकमायात, युष्माकम् एकैको जनश्च स्वानि स्वानि द्राक्षाफलान्यु-
१७ डुम्बरफलानि च भक्षतु स्वस्वपुष्करिण्या जलञ्च पिबतु। पश्चादहम्
आगत्य युष्मद्देशवत् शस्यं द्राक्षारसो भक्ष्यं द्राक्षाक्षेत्रञ्चैतै र्युक्तं कमपि
१८ देशं युष्मान् नेष्यामि। परमेश्वरो ऽस्मान् उद्धरिष्यतीति वाक्येन हिष्कियो
युष्मान् न वञ्चयतु। अन्यदेशीयानां देवा अश्शूरीयस्य नृपते र्हस्तात्
१९ किं स्वं स्वं देशम् अरक्षन्? हमातार्पदीया देवाः कुत्र? सिफर्व्वयिम-
देशीया देवाः कुत्र? देवाः किं मदीयहस्तात् शोमिरोणम् अरक्षन्?
२० यद्येतेषां देशानां देवानां मध्ये को ऽपि मम हस्तात् स्वदेशं रक्षितुं
नाशक्नोत् तर्हि यिहोवा मम हस्तात् किं यिरूशालमं मोचयिष्यति?
किन्तु लोका निरुत्तराः सन्तो ऽतिष्ठन् एकस्या अपि वाचः प्रत्युत्तरं
२१ नोक्तवन्तः, यतस्तमुत्तरं मा ब्रूतेति ते राज्ञा प्रागाज्ञापिताः। अनन्तरं
२२ हिल्कियस्य पुत्र इलियाकीमो राजगृहाधिपतिः शिब्नो लेखक आसा-
फस्य पुत्रो योयाह इतिहासरचयिता च स्ववस्त्राणि छित्त्वा हिष्कियस्य
समीपम् आगत्य रब्शाके र्वाक्यानि तं ज्ञापयामासुः।

---

३७ सप्तत्रिंशोऽध्यायः।

१ यिशायियं प्रति हिष्कियस्य लोकप्रेरणं ८ हिष्कियं प्रति यिशायियस्य प्रत्युत्तरं
१४ मन्दिरे हिष्कियस्य प्रार्थनं २१ सन्हेरीबम् अधि यिशायियस्य भविष्यद्वाक्यं
३५ सन्हेरीबस्य तदीयसैन्यानाञ्च विनाशनञ्च।

१ राजा हिष्कियस्तानि वाक्यानि श्रुत्वा निजवस्त्राणि छित्त्वा शाण-
२ वसनं परिधाय च परमेश्वरस्य मन्दिरं जगाम। अपरं परिहितशाण-

वसनान् राजगृहाधिपम् इलियाकीमं शिब्नं लेखकं प्राचीनयाजकांश्चा-
मोषसुतस्य भविष्यद्वक्तु र्यिशायियस्य समीपं प्रेषयामास। ततस्ते तं ३
जगदुः, हिष्कियो ऽकथयत्, अद्यतनं दिनं क्लेशभर्त्सनापमानानां दिनं,
यतो बालकप्रसवस्य समय उपस्थितः किन्तु प्रसवाय शक्ति र्नास्ति। रब्- ४
शाकेः प्रभुरश्शूरीयो नृपतिरमरस्येश्वरस्य निन्दार्थं यं रब्शाकिं प्रेषित-
वान् तस्य वाक्यानि तव प्रभुना परमेश्वरेण श्रूयन्तां, तव प्रभुः परमेश-
स्तानि श्रुत्वा समुचितं फलं तस्मै ददातु; अतएव त्वम् अवशिष्टलोकानां
मङ्गलं प्रार्थयस्व। इत्थं हिष्कियस्य नृपस्य दासगणे यिशायियस्य ५
समीपमुपस्थिते सति यिशायियस्तान् अवदत्, युष्माकं स्वामिनं वदत, ६
परमेश्वरो ऽकथयत्, त्वं यानि वचांस्यश्रौषी र्यैश्चाश्शूरीयस्य राज्ञो दासा
माम् अनिन्दन् तेभ्यो मा भैषीः। पश्य मया तन्मध्यम् एक आत्मा ७
प्रवेशयिष्यते, स काञ्चित् वार्त्तां श्रुत्वा स्वं देशं परावृत्य यास्यति ततो
ऽहं तं स्वदेशे खड्गेन नाशयिष्यामि।

ततः परम् अश्शूरीयो राजा लाखीशनगराद् प्रस्थितवान् इति वार्त्तां ८
निशम्य रब्शाकिः परावृत्य लिब्नानगरम् अवरुन्धता तेन राज्ञा सार्द्धं
मिलितवान्। तदानीं कूश्देशीयो राजा तिर्हकस्त्वया सह संग्रामयि- ९
तुम् आगच्छति वार्त्तामेतां स श्रुतवान्, ततः स हिष्कियस्य समीपं
दूतान् प्रहित्य कथितवान्, यूयं यिहूदीयं हिष्कियं नृपं वदत, यिरूशा- १०
लमम् अशूरीयराजस्य करे न समर्पयिष्यत इति वाचा तव विश्वासभूमि-
रीश्वरस्त्वां न वञ्चयतु। पश्य सर्व्वदेशानां विनाशायाशूरीयराजै र्यद्यद् ११
अकारि तत् त्वं श्रुतवान् अतस्त्वं कथम् उद्धरिष्यसे? मम पूर्व्वपुरुषै र्वि- १२
नाशितानां गोषणहारणरेत्सफदेशीयानां तिलसरनिवास्येदनवंशीया-
नाञ्च देवाः किं तानुदधरन्? हमातस्य राजा कुत्र? अर्पदस्य राजा १३
च कुत्र? सिफर्व्वयिमनगरस्य हेनाया अव्वायाश्च राजानो वा क्व?

ततो हिष्कियो दूतानां हस्तात् तत् पत्रं गृहीत्वा पपाठ; पश्चात् १४
परमेश्वरस्य मन्दिरं गत्वा परमेश्वरस्य सम्मुखे तद् विस्तारयामास।
तदा हिष्कियः परमेश्वराय प्रार्थनामेतां न्यवेदयत्, हे किरूबयो र्मध्य- १५
वासिन् इस्रायेल ईश्वर सेनाध्यक्ष यिहोवाः केवलस्त्वमेव पृथिव्याः १६
सर्व्वराज्यानामीश्वरः, स्वर्गः पृथिवी च त्वया ससृजाते। हे परमेश्वर १७
कर्णौ निधाय शृणु, हे परमेश्वर स्वचक्षुषी उन्मील्यावलोकय। अमरे- १८
श्वरस्य निन्दार्थं सन्हेरीबेन या याः कथाः प्रहितास्ताः शृणु। हे १९

परमेश्वर, सत्यम् अशूरीया राजानः सर्व्वजातीयान् तेषां देशांश्च व्यना-
शयन् तेषां देवांश्चाग्नौ न्यक्षिपन् यतस्ते नेश्वराः किन्तु मानुषाणां हस्त-
कृतानि काष्ठमयानि प्रस्तरमयाणि च वस्तूनि, तस्मात् ते तान् नाशित-
२० वन्तः। हे अस्माकं प्रभो परमेश्वर साम्प्रतं त्वं तस्य हस्ताद् अस्मान्
उद्धर, तेन हे यिहोवास्त्वमेवाद्वितीय ईश्वरो ऽसीति पृथिव्याः सर्व्व-
राष्ट्रीया जना ज्ञास्यन्ति।
२१ ततः परम् आमोषस्य पुत्रो यिशायियो हिष्कियं प्रति कथामेतां
प्रेषयामास; इस्रायेलः प्रभुः परमेश्वर इमां कथां कथयति, त्वम्
अशूरीयं सन्हेरीबं नृपतिमधि मह्यं यन् न्यवेदयस्तन्मयाश्रावि।
२२ तमधि परमेश्वरः कथामेतां कथयति।

सीयोनाख्या कुमारी त्वां विहसन्त्यवमन्यते।
तव पश्चाद् यिरूशालम् कन्या धूनोति मस्तकं॥
२३ कस्य त्वं निन्दनं कस्य तर्ज्जनं वा विधत्तवान्।
कमुद्दिश्योच्चशब्दस्त्वम् उच्चदृष्टिश्च संस्थितः।
इस्रायेलः पवित्रो राट् अवज्ञातो ऽभवत् त्वया॥
२४ प्रभुमेव स्वदासैस्त्वं निन्दन्नेतदभाषथाः।
स्वरथानां समूहेन गिरीणामुच्छ्रितां शिखां।
लिबानोनस्य दुर्गम्यं स्थलञ्चारूढवानहं॥
प्रांशूंस्तस्यैरसान् छेत्तुं देवदारुवराणि च।
अग्रमुच्चतमं तस्य रम्योद्यानञ्च याम्यहं॥
२५ खनन् पिवामि तोयानि किञ्च पादतलैर्मम।
गच्छन्ति सकला नद्यो मिस्रीयाः शुष्कतामिति॥
२६ किं नाश्रावि त्वया त्वेतत् मयेदं प्राक् निरूपितं।
प्राचीनेष्वेव कालेषु कल्पनेयं मया कृता॥
अधुना साध्यते सा च त्वं जीर्णोपलराशिवत्।
पुरीणां दृढदुर्गाणां ध्वंसनार्थं नियोजितः॥
२७ स्वल्पहस्तास्ततस्तासां जनास्त्रासत्रपान्विताः।
याताः क्षेत्रस्थघासेन हरिच्छष्पेण वा समाः।
तृणै र्वा गृहपृष्ठस्थै र्बालशस्यवनेन वा॥
२८ जाने ऽहन्तूपवेशं ते जाने निष्क्रमणं तव।
तव प्रवेशनं जाने कोपोद्रेकञ्च मां प्रति॥

यतस्त्वं क्रुद्धवान् मह्यं त्वद्गर्व्वश्च श्रुतो मया। २९
लोहग्रन्थिं मया तस्मात् त्वन्नासायां प्रदास्यते॥
त्वदीयाधरयोश्चापि खलीनश्चार्पयिष्यते।
येन पथा त्वमायातः पुनस्तेनापनेष्यसे॥
हे हिष्किय त्वदर्थन्तु चिह्नमेतद् भविष्यति। ३०
यच्छस्यं स्वयमुत्पन्नम् अस्मिन् वर्षे तदत्स्यते।
मनुष्यैस्तत उत्पन्नं शस्यञ्चागामिवत्सरे॥
तृतीये वत्सरे तूप्त्वा युष्माभिः शस्यकर्त्तनं।
द्राक्षाक्षेत्राणि कृत्वा च फलभोगः करिष्यते॥
यिहूदा अवशिष्टो यो वंशो वृद्धिमवाप्य सः। ३१
भविता बद्धमूलोऽध उपरिष्टात् फलप्रदः॥
यिरूशालमतः शेष एक उत्पत्स्यते यतः। ३२
रक्षाप्राप्तजनानाञ्च श्रेणी सीयोनपर्व्वतात्।
सेनाध्यक्षपरेशस्यानुरागात् तत् प्रसेत्स्यति॥
अशूरीयनृपञ्चाधि ब्रूते तस्मात् परेश्वरः। ३३
नैव प्रवेक्ष्यते तेन नगरीयं कथञ्चन॥
वाणो न क्षेप्स्यते तत्र चर्म्म न दर्शयिष्यते।
नैव तस्या विरुद्धं वा तेन स्तूपः करिष्यते॥
येन पथा स आयातस्तेनैवापगमिष्यति। ३४
पुरीं नावेक्ष्यतीमां स इति ब्रूते परेश्वरः॥
अस्याः पुर्य्याश्च रक्षायै वेष्टयिष्यामि तामहं। ३५
मदर्थं स्वीयदासस्य दायूदश्चानुरोधतः॥

अनन्तरं परमेश्वरस्य दूतोऽशूरीयाणां शिविरं गत्वा तेषां पञ्चा- ३६
शीतिसहस्राधिकलक्षं लोकान् व्यनाशयत्; ततोऽवशिष्टा लोकाः
प्रत्यूष उत्थाय तान् सकलान् मृतानपश्यन्। अत एवाशूरीयो राजा ३७
सन्हेरीबः प्रस्थाय निनिवीनगरं प्रत्यागत्य न्यवसत्। पश्चात् स निष्रोक- ३८
नाम्न इष्टदेवस्य मन्दिरे पूजयति तदानीम् अद्रम्मेलकशरेत्सरनामकौ
तदीयपुत्रौ खड्गाभ्यां तं नाशयित्वारारटदेशं प्रति पलायेतां; तत एष-
र्हद्दोननामा तस्यान्यः पुत्रस्तस्य पदे राजा बभूव।

३८ अष्टत्रिंशोऽध्यायः।

१ हत्यो र्वार्त्तायां श्रुतायां सत्यां प्रार्थनया हिष्किय्यस्यायुषो वर्द्धनं तस्मै चिह्नदानञ्च ९ तन्निमित्तं गीतेन हिष्कियस्य धन्यवदनञ्च।

१ तदानीं हिष्कियस्य मारके व्याधौ जात आमोषस्य पुत्रो यिशायियो
भविष्यद्वक्ता तमुपागत्य कथयामास, परमेश्वरः कथयति, त्वं स्वपरि-
२ वारायादेशं विधत्स्व, यतस्त्वं मरिष्यसि न जीविष्यसि। ततो हिष्कियो
३ भित्तेः सम्मुखीभूय परमेश्वरं प्रति संप्रार्थ्य कथयामास, हे परमेश्वर,
विनये ऽहं सत्यतया सरलान्तःकरणेन च त्वत्समक्षं यादृशमहमाचरं,
तव दृष्टौ च यादृशं सत्कर्म्माकरवं, तत् स्मर। ततो हिष्कियो ऽतीव
क्रन्दितुमारेभे।
४ तदा परमेश्वरस्य वाक्यमिदं यिशायियमुपतस्थौ, त्वं गत्वा हिष्कियं
५ वद, तव पूर्व्वपुरुषस्य दायूदः प्रभुः परमेश्वर इति कथयति, मया
तव प्रार्थनमश्रावि तव नेत्राम्बु चादर्शि, पश्चाहं तवायुः पञ्चदश-
६ वत्सरान् वर्द्धयिष्यामि। किञ्चाशूरीयराजस्य हस्तात् त्वाम् एतन्नगरञ्च
७ रक्षिष्यामि नगरस्यैतस्य फलकस्वरूपश्च भविष्यामि। परमेश्वरेण
स्वोक्तमेतद्वचनं सफलं कारिष्यते तस्यैतच्चिह्नं परमेश्वरात् त्वं प्राप्स्यसि।
८ पश्य सूर्य्यातपे स्थित आहसस्य कालबोधकयन्त्रे छाया यानंशान्
अवातरत्, तेषां मध्ये दशांशान् यावत् तां पुनः परावर्त्तयिष्यामि।
अनन्तरं सूर्य्यकिरणः कालबोधकयन्त्रे यान् अंशान् अवतीर्ण आसीत्,
तेषां मध्ये दशांशान् पुनः परावृत्ते।
९ व्याधितस्य यिहूदीयराजस्य हिष्कियस्य व्याधेः स्वास्थ्यप्राप्तौ लिपिरियं।

१० मयोक्तमुच्चतां प्राप्ते मामकीनायुषो ऽयने।
प्रेतलोकस्य यद् द्वारं प्रवेष्टव्यं मया हि तत्।
उद्वृत्तं वत्सराणां मे मत्तश्चापहरिष्यते॥
११ मयोक्तं जीवतां भूमौ न द्रक्ष्यामि परेश्वरं।
जगन्निवासिभिः सार्द्धं न वीक्षिष्ये पुन र्नरान्॥
१२ समुत्पाटितकीलञ्च मामकीननिवेशनं।
मत्तो ऽपसार्य्यते दूरं मेषरक्षकदूष्यवत्॥
सदृशस्तन्तुवायेन निजायुः सञ्छिनद्म्यहं।
यथा दशासु वस्त्रञ्च स कर्त्तिष्यति मां तथा।
अहोरात्रस्य मध्ये च स ममान्तं विधास्यति॥

मत्वाहं सिंहतुल्यं तम् उषां यावदचिन्तयं। १३
मदीयास्थीनि सर्व्वाणि स प्रभंक्ष्यति सिंहवत्।
अहोरात्रस्य मध्ये च स ममान्तं विधास्यति॥
सारसो लोहपृष्ठो वा यथा कूजाम्यहं तथा। १४
कपोतस्य यथा तद्वद् ईरयामि कलध्वनिं॥
नेत्रे निस्तेजसी जाते ऊर्द्धदृष्टेः सदा मम।
हे परेश्वर पीड्ये ऽहं मम त्वं प्रतिभू र्भव॥
किं वदेयं प्रतिश्रुत्य तेन कार्य्यमकारि मे। १५
मनस्तापात्तु नम्रो ऽहं चरिष्याम्यखिलाः समाः॥
एतादृशप्रसादेन नरा जीवन्ति हे प्रभो। १६
सर्व्वथा केवलं तेन मदीयात्मा च जीवति।
बलं दास्यसि मह्यं त्वं त्वञ्च दास्यसि जीवनं॥
शान्तये पश्य तीव्रः स मनस्तापो ऽभवन्मम। १७
त्वया प्रीत्वा मम प्राणा उद्धृता नाशगर्त्ततः।
सकला अपराधा मे पृष्ठतश्च कृतास्त्वया॥
न स्तुयात् परलोकस्त्वां मृत्युस्त्वाञ्च न कीर्त्तयेत्। १८
त्वत्सत्यं न प्रतीक्षेरन् जना गर्त्तावरोहिणः॥
जीवता जीवतैव त्वं स्तूयसे ऽद्य मया यथा। १९
जनकाः स्वीयसन्तानान् त्वत्सत्यं ज्ञापयन्ति च॥
परमेशो मम त्राता यावज्जीवं ततो ऽन्वहं। २०
वीणया मम गीतानि गास्यामस्तस्य मन्दिरे॥

यिशायियो जगाद, जनाश्चूर्णितोडुम्बरफलपिण्डमादाय तस्य स्फोट- २१
कोपरि म्रद्गन्तु, तेन स जीविष्यति।

हिष्कियश्च पप्रच्छ, परमेश्वरस्य मन्दिरमहं यद् गमिष्यामि तस्य २२
किं चिह्नम्?

---

३९ ऊनचत्वारिंशोऽध्यायः।

१ हिष्कियस्याभिमानः २ तस्य देशस्य भाविदण्डश्च।

तस्मिन् काले वलदनस्य पुत्त्रो मिरोदकवलदननामा बाबिलीयो १
राजा हिष्कियस्य पीडायाः स्वास्थ्यप्राप्तेश्च वार्त्तां श्रुत्वा दूतैस्तस्य समीपं
पत्राण्युपायनञ्च प्रेषयामास। ततो हिष्कियस्तेषु हर्षित्वा निजभाण्डागा- २

राणि रजतसुवर्णानि सुगन्धिद्रव्याणि बहुमूल्यतैलानि निजास्त्रागाराणि स्वकोषेषु स्थितानि सकलवस्तूनि च दर्शयामास। हिष्कियेन तेभ्यो यन्न दर्शितं तादृशं किमपि वस्तु तस्य निवेशने कृत्स्ने राष्ट्रे च नासीत्।
३ अनन्तरं भविष्यद्वादी यिशायियो नरपतिं हिष्कियम् उपागत्य पप्रच्छ, ते मनुजाः किमगदन्? ते च कस्मात् स्थानात् तव समीपम् आगच्छन्? ततो हिष्कियो गदितवान्, एते दूरदेशाद् बाबिलान्मम समीपम् आगच्छन्। स पप्रच्छ, एते तव निवेशने किं किम् अपश्यन्?
४ हिष्कियो जगाद, मम निवेशने यद्यद् आस्ते तत् सर्व्वं ते दृष्टवन्तः। अहं तेभ्यो यन्न दर्शितवान् तादृशं किमपि द्रव्यं मम कोषमध्ये न
५ विद्यते। अनन्तरं यिशायियो हिष्कियम् अब्रवीत्, त्वं सेनाध्यक्षस्य
६ परमेश्वरस्य वचो निशामय। पश्य तव पूर्व्वपुरुषादिभिरद्य यावत् सञ्चितं यद्यत् तव निवेशने विद्यते तत् सर्व्वं यस्मिन् काले बाबिलनगरं नेष्यते तादृशः समय उपस्थास्यति तस्य किञ्चिदप्यवशिष्टं न स्थास्यति
७ परमेश्वर इति वचनं ब्रवीति। अपरं तवौरससन्तानानां मध्यात् कतिपया नीता बाबिलीयराजस्य निवेशने छिन्नपुंस्त्वाः सन्तः स्थास्यन्ति।
८ ततो हिष्कियो यिशायियं जगाद, त्वं परमेश्वरस्य यद् वचो भाषितवान् तद् उत्तमं। अपरं गदितवान्, मम राजत्वसमये मङ्गलं सत्यता च भविष्यति।

---

४० चत्वारिंशोऽध्यायः।

१ शुभवार्त्तायाः कथा ९ तस्याः प्रकाशनं १२ परमेश्वरस्य अतुल्यत्वं १८ देवानाम् असारत्वं २७ परमेश्वरीयलोकानाम् उपकारश्च।

१ सान्त्वयन्तां परिसान्त्वयन्तां युष्माभि र्मामकप्रजाः।
भाषते भारतीमेतां युष्माकमीश्वरः स्वयं॥
२ यिरूशालममालप्य ब्रूत प्रीतिवचांसि च।
उच्चै र्वदत ताश्चेदं समाप्तः समरस्तव॥
अभवो दोषमुक्ता त्वं त्वञ्च स्वपापकर्म्मणां।
द्विगुणं लप्स्यसे क्षेमं परमेशस्य हस्ततः॥
३ मरौ घोषयतः प्रोच्चैरस्त्ययं कस्यचिद् रवः।
युष्माभिः परमेशस्य सुगमीक्रियतां धृतिः।

राजमार्गो ऽस्मदीशस्य सरलीक्रियतां मरौ॥
उन्नतानि विधीयन्तां सर्व्वनिम्नस्थलानि च। ४
गिरयो भूधराश्चापि सर्व्वे निम्नीभवन्तु हि॥
उच्चावचञ्च यत् स्थानं तत् प्राप्नोतु समानतां।
यच्च स्थानं दुरारोहं जायतां तत् समस्थलं॥
प्रतापः परमेशस्य तदा प्रादुर्भविष्यति। ५
सकलैरेककाले च नरैरालोकयिष्यते।
यतो वक्त्रात् परेशस्य वाक्यमेतद् विनिर्गतं॥
घोषयेति रवेणोक्ते सः पृष्टो घोषयाणि किं। ६
सर्व्वः प्राणी तृणं सर्व्वा तस्य श्रीः चेत्रपुष्पवत्॥
तृणं गच्छति शुष्कत्वं पुष्पञ्चाप्नोति जीर्णतां। ७
संस्पृष्टं परमेशस्य मुखनिर्गतवायुना।
अतः सत्यं जनसङ्घातस्तृणतुल्यो न संशयः॥
तृणं गच्छति शुष्कत्वं पुष्पञ्चाप्नोति जीर्णतां। ८
अस्मदीशस्य वाक्यन्त्वनन्तकालेषु निश्चलं॥
प्रांशुमद्रिं समारोह हे शुभाख्यायिके सियोन्। ९
घोषयोच्चै यिरूशालम् शुभवार्त्ताप्रचारिके॥
उच्चैःस्वरं कुरुष्व त्वं मा बिभीहि कथञ्चन।
यिहूदायाः पुरो ब्रूहि पश्य युष्माकमीश्वरः॥
ईश्वरः पश्य युष्माकं समायाति बलान्वितः। १०
प्रभुत्वञ्चापि तस्यैव बाहुः सम्पादयिष्यति॥
पश्य तस्य भृतिश्चापि सहिता तेन वर्त्तते।
तथा श्रमफलं तस्य विद्यते तस्य सम्मुखे॥
मेषपालकवत् तेन स्वव्रजश्चारयिष्यते। ११
शावकांश्च स संगृह्य वक्ष्यति स्वीयवक्षसि।
स्तन्यदात्रीश्च मेषीः स सदयं गमयिष्यति॥
स्वकीयकरकोषेण सर्व्वतोयानि को ममे। १२
वितस्त्या वान्तरीक्षस्य परिमाणं चकार कः॥
धूलिं वसुन्धराया वा तुलायां सञ्चिकाय कः।
तौलदण्डेन वाद्रीणां गुरुतां निर्णिणाय कः।
पर्व्वतानां तुलायष्ट्या भारं वा निश्चिकाय कः॥

१३ आत्मानं परमेशस्य व्यवस्थापितवांश्च कः ।
मन्त्री वा तस्य भूत्वा कः शिक्षां तस्मै प्रदत्तवान् ॥
१४ मन्त्रणां तेन पृष्टो वा कस्तं बोधितवान् हितं ।
सुविचाराय वा तस्य को ऽभवत् पथदर्शकः ।
कस्तमशिक्षयज्ज्ञानं बुद्धेर्वा मार्गमादिशत् ॥
१५ मनुष्याः सर्व्वदेशीयाः कलसालम्बिबिन्दुवत् ।
तुलायां यद् रजो लग्नं तुल्यास्तेनैव भान्ति च ।
द्वीपानामपि साकल्यम् अणुवत् स समुत्क्षिपेत् ॥
१६ इन्धनार्थं लिबानोनः पर्य्याप्तो जायते नहि ।
तत्रत्यं पशुसाकल्यं होमाय प्रचुरं नहि ॥
१७ तत्साक्षात् सर्व्वदेशीया मनुष्या भान्त्यवस्तुवत् ।
असारत्वादसत्त्वाच्च न्यूनांस्तान् मन्यते च सः ॥
१८ केन सार्द्धमतो यूयम् उपमास्यध्वमीश्वरं ।
प्रतिरूपञ्च किं तस्य तुल्यं निरूपयिष्यथ ॥
१९ शिल्पिना निर्म्मितां मूर्त्तिं हेम्नावृणोति हेमलः ।
करोति स्वर्णकारश्च तत्कृते रौप्यशृङ्खलान् ॥
२० उपहारन्तु दातुं यो नहि शक्नोति दुर्गतः ।
अजरस्यैव काष्ठस्य रोचयित्वा स खण्डकं ।
निर्म्मातुं निश्चलां मूर्त्तिं वृणीते दक्षशिल्पिनं ॥
२१ ज्ञानं किं नास्ति युष्माकं श्रोत्रं वा किं न विद्यते ।
आदिकालाच्च युष्मभ्यं वार्त्ता किं न निवेदिता ।
पृथिवीमूलनिर्म्माणान्न युष्माभिरबोधि किं ॥
२२ मेदिनीमण्डलस्योर्द्ध्व आसीनो ऽस्त्येक ईश्वरः ।
तन्निवासिनरास्तेन गण्यन्ते च पतङ्गवत् ॥
उल्लोचञ्च यथा तद्वद् गगनं विततान सः ।
तच्च विस्तारयामास निवासार्थकदूष्यवत् ॥
२३ देशाधिपतयस्तेन क्रियन्ते सत्त्ववर्ज्जिताः ।
पृथिव्याः शासकास्तेन विधीयन्ते व्यलीकवत् ॥
२४ अरोपिता इवानुप्ता भूमावबद्धमूलकाः ।
वायुना तस्य संस्पृष्टा शुष्कतामाप्नुवन्ति ते ।
हृताश्च चक्रवातेन विकीर्य्यन्ते तुषा इव ॥

उपमा मम युष्माभिः केन सार्द्धं विधास्यते। २५
कस्याहं सदृशो वा स्यामिति ब्रूते स धर्म्मवान्॥
ऊर्द्धं दृष्ट्वा परीक्षध्वम् अमूस्ताराः ससर्ज कः। २६
तासां सम्पूर्णसङ्ख्यानां व्यूहनं विदधाति सः॥
नामान्युच्चार्य्य सर्व्वासाम् आह्वानं स करोति च।
स बलाढ्यो महाशौर्य्यो नैकाप्यस्यनुपस्थिता॥
दृष्टितः परमेशस्य प्रच्छन्नास्ति गति मम। २७
मम धर्म्मो मदीशस्य ज्ञानातीतश्च विद्यते॥
कुत एतादृशं वाक्यं हे याकूब् गद्यते त्वया।
हे इस्रायेल् किमर्थं त्वं वदस्येतादृशं वचः॥
किं नालम्भि त्वया ज्ञानं किं नाश्रावि त्वया पुरा। २८
अनादिरीश्वरः क्षौण्याः सीम्नां स्रष्टा परेश्वरः।
न क्लान्तिं याति न श्रान्तिं सो ऽगाधज्ञानसागरः॥
क्लान्ताय बलदाता स निःशक्तेः शक्तिवर्द्धकः॥ २९
क्लान्तिं यान्ति युवानो ऽपि परिश्रान्ता भवन्ति च। ३०
चरणौ तरुणानाञ्च स्खलनं जातु गच्छतः॥
लप्स्यन्ते नवशक्तिन्तु परमेशप्रतीक्षिणः। ३१
ऊर्द्धं समुत्पतिष्यन्ति पक्षैस्ते गरुडा इव।
ते द्रोष्यन्ति विना क्लान्तिं व्रजिष्यन्ति विना श्रमं॥

---

४१ एकचत्वारिंशोऽध्यायः।

१ स्वलोकान् प्रति ईश्वरस्य निवेदनं ५ प्रतिमाया असारत्वं ८ ईश्वरस्य लोकानां भयनिषेधः १७ तेषां सुखं २१ स्वसमधि भविष्यद्वाक्यञ्च।

हे द्वीपवासिनो यूयं मौनीभवत मां प्रति। १
सर्व्वजातीयलोकै र्हि नवशक्तिसमन्वितैः।
उपस्थाय स्ववक्तव्यम् एककाले निगद्यतां।
क्रियताञ्च मिथो ऽस्माभि र्विचाराय समागमः॥
केन सूर्य्योदयस्थानाद् असावुत्पादितो नरः। २
स्वयं धर्म्मस्तमाहूय करिष्यत्यनुगामिनं।
नानाजातीश्च तत्साक्षात् पराचीना विधास्यति॥

राज्ञामुपरि राजत्वं तस्मिन्नेव समर्पयन्।
तत्खड्गस्य समन्तान् धूलितुल्यान् करिष्यति।
तदीयधनुषस्याग्रे प्रविकीर्णतृणोपमान्॥
३ स्वपदाभ्यां पथा येन स कदापि गतो नहि।
स शत्रूननुधावंस्तं कुशलेनोत्तरिष्यति॥
४ इदन्त्वास्थाय को ऽकार्षीत् भाविकालान् पुराह्वयन्।
य आदिरन्तिमानाञ्च सङ्गी सो ऽहं परेश्वरः॥
५ भयं प्राप्स्यन्ति तद् दृष्ट्वा नरा द्वीपनिवासिनः।
भविष्यन्ति च वित्रस्ता धरणीप्रान्तसंस्थिताः।
उपस्थाय करिष्यन्ति सकलाश्च समागमं॥
६ उपकुर्व्वन्त एको ऽन्यं ते वक्ष्यन्ति स्थिरो भव॥
७ तक्षकः स्वर्णकारञ्च सम्यगाश्वासयिष्यति।
अयोघनेन सुश्लक्ष्णां प्रतिमाञ्च करोति यः।
सूर्म्मिताडयितारं स तथैवाश्वासयिष्यति॥
इदमुत्तममित्येव सन्धानञ्चाधि वक्ष्यति।
मूर्त्तिञ्च निश्चलां कर्त्तुं कीलैर्दृढीकरिष्यति॥
८ हे मत्सेवक इस्रायेल् याकूब् मयाभिरोचित।
हे मत्प्रियबन्धो बन्धोरिब्राहीमस्य सन्तते॥
९ पृथ्व्याः सीम्नि गृहीत्वाहम् आह्वयं त्वां धरान्ततः।
भारतीमवदञ्चेमां त्वं ममैवासि सेवकः।
मयैव रोचितो यस्त्वं त्वं मया त्यक्ष्यसे नहि॥
१० त्वया न क्रियतां शङ्का तव सङ्गी यतो ऽस्म्यहं।
दिशो मालोकयोद्वेगात् यतो ऽहं तावकेश्वरः॥
अहं स्वधर्म्महस्तेन त्वां विधाय महाबलं।
यत्नेनोपकरिष्यामि धारयिष्यामि च स्थिरं॥
११ तुभ्यं क्रुध्यन्ति यावन्तस्ते भविष्यन्ति लज्जिताः।
त्वया ये विवदन्ते च ते नंक्ष्यन्ति नास्तितां॥
१२ त्वयान्विष्यापि नोद्देशो लप्स्यते त्वद्विरोधिनां।
सत्त्वहीना भविष्यन्त्यलीकाश्च त्वद्युयुत्सवः॥
१३ त्वत्प्रभुः परमेशो ऽहं धारयामि करं तव।
मा भैषीस्त्वत्सहायो ऽहमस्मीति त्वां ब्रवीमि च॥

हे याकूबाख्य कीट त्वं मा बिभीहि कथञ्चन। १४
त्वया मा क्रियतां चास इस्रायेल् स्वल्पसंख्यक॥
त्वत्सहायो ऽहमस्मीति भाषते परमेश्वरः।
इस्रायेलः पवित्रो राट् परित्राता स्वयं तव॥
सुतीक्ष्णं बहुधाराभि र्नवीनं शस्यमर्द्दकं। १५
काष्ठयन्त्रमिव त्वञ्च पश्य संस्थापितो मया॥
शस्यवन्मर्द्दयित्वा त्वं भूधरांश्चूर्णयिष्यसि।
उपपर्व्वतसङ्घञ्च त्वं विधास्यसि नालवत्॥
कुर्व्वति त्वयि निष्पावं वायुस्तानपनेष्यति। १६
चक्रवातश्च सङ्गृह्य सम्यक् तान् विकरिष्यति॥
परमेशे तदा त्वन्तु हर्षाक्रान्तो भविष्यसि।
इस्रायेलः पवित्रे च राज्ञि श्लाघां करिष्यसि॥
तोयं मृगयमाणा ये नाप्नुवन्ति कथञ्चन। १७
जनास्ते दुर्गता दीनास्तृष्णया शुष्कजिह्वकाः॥
यो ऽहं परेश्वरः सो ऽहं दास्यामि तेभ्य उत्तरं।
इस्रायेलो ऽहमीशो ऽस्मि नैव त्यक्ष्यामि तानहं॥
नदीः प्रस्रावयिष्यामि शुष्कशैलाग्रभागतः। १८
मध्यादुपत्यकानाञ्च जनयिष्यामि निर्झरान्।
वनं वार्षी करिष्यामि मरुस्थानं जलाकरं॥
मेन्धिकामेरसं शिट्टां जितवृक्षञ्च प्रान्तरे। १९
दारुतीधरताश्शूरान् रोपयिष्याम्यहं मरौ॥
तदालोक्य नरै र्ज्ञात्वा चिन्तयित्वैव भोत्स्यते। २०
एतत् कर्म्म स्वहस्तेन कृतवान् परमेश्वरः।
इस्रायेलः पवित्रो राट् स्वयं तत् सृष्टवानिति॥
समायात विवादार्थमिति ब्रूते परेश्वरः। २१
हेतून् दर्शयताखण्डान् याकूब्राजस्य वाणियं॥
दर्शयत स्ववक्तव्यं वदतास्मांश्च भावि किं। २२
पुरा युष्माभिरुचे यत् तदस्मभ्यं निवेद्यतां॥
वयं तत्र मनो धत्त्वा तस्य भोत्स्यामहे फलं।
भावि वा यदितः पश्चात् तदस्मान् वदताधुना॥
भाविकालेषु यद् भावि यूयं तद् वक्तुमर्हथ। २३

ततो यदीश्वरा यूयं तत् सम्भोत्स्यामहे वयं ॥
यूयमिष्टमनिष्टं वा किञ्चिद् विधातुमर्हथ ।
वयं तदद्भुतं दृष्ट्वा प्राप्स्यामस्तत्क्षणाद् भयं ॥
२४ यूयमसारतमा यूयं युष्मत्कार्य्यमवस्तु च ।
यः कश्चिद् रोचयेद् युष्मान् स घृणार्हो भवेज्जनः ॥
२५ नरस्त्वेकः समायाति मयोत्थापित उत्तरात् ।
पूर्व्वस्यां दिशि मन्नाम्नि प्रार्थनां स करिष्यति ॥
कुम्भकारश्च मृद्नाति स्वपदाभ्यां यथा मृदं ।
स तथैव नरश्रेष्ठान् आक्रमिष्यति पङ्कवत् ॥
२६ एतत् केन पुरा प्रोक्तं तद् वयं ज्ञातुमिच्छवः ।
केन निश्चितमग्रे वा वच्यामः साधु साध्विति ॥
नैव कश्चिदवोचत् तत् नैव कश्चिदशिश्रवत् ।
युष्माकं कश्चनोक्तीश्च न शृणोत्यपि कश्चन ॥
२७ प्रथमो ऽहं हि सीयोनं ब्रवीमि पश्य पश्य तान् ।
यिरूशालमि सद्वार्त्तां दूतेनाख्यापयामि च ॥
२८ परिपश्याम्यहं किन्तु परः को ऽपि न विद्यते ।
एतेषां मध्य एको ऽपि मन्त्री नास्ति हि तादृशः ।
यो मया मन्त्रणां पृष्टः प्रभुयाद्दातुमुत्तरं ॥
२९ अलीकाः पश्य ते सर्व्वे कार्य्यं तेषामवस्तु च ।
असारा वायुवत् तेषां धातुनिर्म्मितविग्रहाः ॥

---

४२ द्विचत्वारिंशो ऽध्यायः ।

१ अधिपतेः तस्य कर्म्म च भविष्यद्वाक्यं ५ तत्प्रति परमेश्वरस्य नियमः १० ईश्वरं धन्यं वक्तुं विनयकथनं १३ सुसंवादस्य सफलता १७ प्रतिमानाम् असारता १८ लोकस्य कथा २२ यिहूदिलोकानाम् अविश्वास्यता दण्डश्च ।

१ सेवको मम पश्यासौ धार्य्यमाणो मया स्वयं ।
रोचितं मम पात्रं स मन्मनस्तुष्टिकारकं ॥
मया तस्योपरिष्टाच्च स्वात्माधिष्ठापितो ऽभवत् ।
राजनीतिं स जातीनां मध्ये प्रचारयिष्यति ॥
२ नैव कोलाहलस्तेन नोच्चशब्दः करिष्यते ।

न च राजपथे तेन स्वरवः श्रावयिष्यते॥
प्रक्षुण्णो ऽपि नलस्तेन नैव खण्डीकरिष्यते। २
निस्तेजा वर्त्तिका तेन न च निर्वापयिष्यते।
राजनीतिं स सत्येन युक्तां प्रचारयिष्यति॥
धरण्यां राजनीतिं स यावन्न स्थापयिष्यति। ४
तावत् स नहि निस्तेजा न क्षुण्णो वा भविष्यति।
सम्प्रतीक्षिष्यते तस्य शास्त्रं द्वीपनिवासिभिः॥
यो नभोमण्डलं सृष्ट्वा विततीकृतवान् पुरा। ५
तथैवास्तीर्णवानेताम् उद्भिद्भिर्भूषितां धरां॥
तन्निवासिजनेभ्यश्च प्राणवायुं प्रदत्तवान्।
तत्र विहारकारिभ्यो यश्चात्मानं वितीर्णवान्।
प्रभुना परमेशेन तेनेदं गद्यते वचः॥
समाह्वयामि धर्म्मेण त्वामहं परमेश्वरः। ६
त्वत्करं धारयित्वा च करिष्ये तव रक्षणं॥
स्वप्रजानां कृते त्वाञ्च नियोक्ष्ये नियमाश्रयं।
अन्यजातीयलोकानां कृते चालोकदायकं॥
नेत्राण्यन्धनराणाञ्च त्वं मुक्तानि करिष्यसि। ७
रुद्धस्थानाच्च बद्धानां निर्गमं त्वं विधास्यसि।
कारागेहाच्च लोकानाम् अन्धकारनिवासिनां॥
अहमेव परेशो ऽस्मि नामधेयमिदं मम। ८
नैवाहं वितरिष्यामि परस्मै स्वीयगौरवं।
नैवाहं प्रतिमाभ्यो वा प्रदास्यामि निजस्तवं॥
पश्य पूर्व्वोक्तवाक्यानि सफलत्वमवाप्नुवन्। ९
इदानीं घटनाः किन्तु नवीना ज्ञापयाम्यहं।
तासां प्ररोहणात् पूर्व्वं युष्मांस्ताः श्रावयामि च॥
परमेश्वरमुद्दिश्य गीतं गायत नूतनं। १०
पृथिव्याः प्रान्ततो यूयं तस्य श्रावयत स्तवं॥
हे वार्धिगामिनः सर्व्वे सार्द्धं सागरपूरकैः।
हे द्वीपाः प्राणिभिः सार्द्धं युष्मन्मध्ये निवासिभिः॥
हर्षनादं करोतूच्चैररण्यं स्वपुरैः सह। ११
ग्रामाश्च शिविराकाराः केदरीयैर्निषेविताः॥

जयध्वनिञ्च कुर्व्वन्तु जनाः शैलनिवासिनः ।
सर्व्वे ते घोषयन्तूच्चैः पर्व्वताग्रेषु संस्थिताः ॥
१२ प्रकाशयन्तु सम्यक् च परमेशस्य गौरवं ।
द्वीपानामेव सर्व्वत्र तत्स्तवं ज्ञापयन्तु च ॥
१३ परमेशो यथा वीरस्तथा यात्रां करिष्यति ।
जिगीषाञ्च यथा योद्धा तथैवोत्तेजयिष्यति ॥
करिष्यति महानादम् अत्युच्चै र्घोषयिष्यति ।
दमनेन स्वशत्रूणां यशोवांश्च भविष्यति ॥
१४ दीर्घकालादहं मौनी स्वं संयच्छामि नीरवः ।
इदानीं प्रसवन्तीव करिष्यामि महारवं ।
उच्छ्वसिष्यामि फूत्कारं विधास्यामि च यत्नतः ॥
१५ पर्व्वतान् ध्वंसयिष्यामि सहितानुपपर्व्वतैः ।
शोभां तेषां हरिद्वर्णां शोषयिष्यामि सर्व्वशः ॥
पुलिनानि करिष्यामि परिवर्त्त्य तरङ्गिणीः ।
तथा सर्व्वान् जलाधारान् प्रापयिष्यामि शुष्कतां ॥
१६ अन्धा यं नहि जानन्ति पथा नेष्यामि तेन तान् ।
यांश्च ते न विदु र्मार्गान् गमयिष्यामि तेषु तान् ॥
करिष्याम्यग्रतस्तेषाम् अन्धकारञ्च दीपकं ।
स्थानानि वक्रगामीनि विधास्ये सरलानि च ।
वाक्यान्येतानि सेत्स्यन्ति त्यक्ष्यन्ते च मया नहि ॥
१७ तक्षिताः प्रतिमाः किन्तु ये नराः शरणं गताः ।
सिक्तमूर्त्तींश्च भाषन्ते यूयमेवास्मदीश्वराः ।
ते हि पराङ्मुखा जाता भविष्यन्ति त्रपान्विताः ॥
१८ हे नरा बधिरा यूयम् आकर्णयितुमर्हथ ।
हे अन्धा दृष्टये यूयं भवतोन्मीलितेक्षणाः ॥
१९ सेवको मम नान्धश्चेत् अन्धः कस्तर्हि विद्यते ।
यथा मत्प्रेष्यदूतश्च कस्तथा बधिरो भवेत् ॥
को हि तथा भवेदन्धः श्रद्दधानो जनो यथा ।
सेवकः परमेशस्य यथा को ऽन्धो भवेत् तथा ॥
२० पश्यन् बहूनि वस्तूनि तत्र धत्ते मनो न सः ।
स निरर्गलकर्णो ऽपि श्रवणं न करोति च ॥

परमेशस्तु सन्तुष्टस्तदीयधर्म्मकारणात्। २१
सम्मंस्यते व्यवस्थां स सम्मन्याञ्च करिष्यति॥
हृतद्रव्यस्त्वयं वंशो मूषितश्च भविष्यति। २२
युवानः सकला बद्धाः कारागेहेषु चावृताः॥
हृतवित्ता भविष्यन्ति रक्षकेण च वर्जिताः।
हृतं तेषां धनं दत्त को ऽपीत्थं नहि वक्ष्यति॥
युष्माकं मध्यतो वाक्यमेतत् कः श्रोतुमुद्यतः। २३
स तद् गृह्णातु कर्णाभ्यां भाविकाले हि भोत्स्यते॥
कस्य निरूपणाद् याकूब् अभवद्धृतवैभवः। २४
केन समर्पितश्चाभूत् इस्रायेल् वित्तहारिषु।
किं न परेश्वरेणैव यस्यापराधिनो वयं॥
गन्तुं तदीयमार्गेषु तेषामिच्छाभवन्नहि।
नैव तदीयशास्त्रे च ते न्यधीयत मानसं॥
ततस्तेषु स्वकोपाग्निं युद्धतापञ्च सो ऽक्षिपत्। २५
समन्ताद् दह्यमानास्ते नैव ज्ञानमवाप्नुवन्।
ज्वलन्तश्च मनोयोगं नैवाकुर्व्वन् कथञ्चन॥

---

४३ त्रिचत्वारिंशोऽध्यायः।

१ स्वीयलोकेष्वनुग्रहणं ईश्वरस्य १० तस्मिन् लोकानां साक्षित्वं १४ बाबिलो ऽधःपतनं १६ ईश्वरीयलोकानां रक्षाकथनं २२ तान् प्रतीश्वरस्य भर्त्सनञ्च।

स्रष्टा यस्तव हे याकुब् इस्रायेलश्च देहकृत्। १
तेनैव परमेशेन वागियं गद्यते ऽधुना॥
मा बिभीहि यतो ऽहं त्वां परिमोचितवान् स्वयं।
मन्नाम्नाह्वतवांश्च त्वाम् अभवस्त्वं ममैव च॥
अपां मध्येन गच्छंस्त्वं मामवाप्स्यसि सङ्गिनं। २
तरङ्गिणीस्तरंश्च त्वं ताभि र्नाप्लावयिष्यसे॥
ब्रजंश्चानलमध्ये ऽपि तेन त्वं धक्ष्यसे नहि।
नैव संस्प्रक्ष्यसे वह्नेः शिखया वा कथञ्चन॥
यतः परेश्वरो यो ऽहं सो ऽहमस्मीश्वरस्तव। ३
इस्रायेलः पवित्रो राट् अहं तावकमोचकः॥

त्वन्मोचनस्य मूल्याय मिसरो दीयते मया।
कूशः सिवा इति ख्यातं देशद्वयं कृते तव॥
४ मद्दृष्टौ बहुमूल्यस्त्वं मान्यो मत्प्रेमभाजनं।
तस्मात् त्वत्परिवर्त्तेन प्रदास्यामि नरानहं।
त्वत्प्राणविनमयार्थञ्च परदेशीयमानवान्॥
५ त्वया मा प्राप्यतां त्रासस्तव सङ्गी यतो ऽस्म्यहं।
प्रत्यानेष्यामि पूर्व्वस्या दिशो ऽहं तव सन्ततिं।
तथा त्वां सङ्ग्रहीष्यामि पश्चिमाया दिशो ऽप्यहं॥
६ तान् देहीति वचश्चाहं गदिष्याम्युत्तरां दिशं।
त्वञ्च तान् मोपरुन्धीति दिशं वक्ष्यामि दक्षिणां।
दूराद् वहत मत्पुत्त्रान् मत्पुत्त्रीश्च धरान्ततः॥
७ मम नाम्नैव यः कश्चिद् विख्यातो नयताच्च तं।
स्वप्रतापप्रकाशार्थं सृष्टवानहमेव तं।
निर्म्माता तस्य कर्त्ता चाहमेवास्मि न चापरः॥
८ सा सनेत्रापि या जातिरन्धा साप्स्यति मोचनं।
सकर्णा बधिरा लोका भविष्यन्त्युद्धृतास्तथा॥
९ सर्व्वजातय आयान्तु मिलन्त्वेकत्र च प्रजाः।
तासां मध्य इमां वार्त्तां कः प्रकाशयितुं क्षमः।
पूर्व्वमुक्ताः स्ववाणी वा के ऽस्मान् श्रावयितुं क्षमाः॥
आयान्तु साक्षिणस्तेषां जयं प्राप्स्यन्ति ते तदा।
यथार्थमिति लोकैश्च साक्ष्यं श्रुत्वा वदिष्यते॥
१० साक्षिणो मम यूयन्त्विति ब्रूते परमेश्वरः।
अपरो मम साक्षी च रोचितः सेवको मम॥
अतो ऽभिज्ञाय युष्माभि र्विश्वासः क्रियतां मयि।
एतच्च बुध्यतां सम्यग् यदहं सत्य ईश्वरः।
नेश्वरो ऽसर्जि मत्पूर्व्वं न चोदेष्यति मत्परं॥
११ अहमेवाहमेवास्म्यद्वितीयः परमेश्वरः।
त्राणकर्त्ता च मद्भिन्नो नापरः को ऽपि विद्यते॥
१२ पूर्व्वं दत्त्वा मया वार्त्तां परित्राणं विधीयते।
श्राव्यते सा मयैकेन नान्यो युष्मासु विद्यते॥
अहं यदीश्वरो ऽस्म्यत्र यूयं मामकसाक्षिणः।

भाषते भारतीमेतां स्वयमेव परेश्वरः ॥
अहमादिदिनात् सो ऽस्मि मत्करात् को ऽपि नोद्धरेत् । १३
मया यत् क्रियते कार्य्यं कस्तद् वारयितुं क्षमः ॥
इस्रायेलः पवित्रो राट् युष्मन्निस्तारकश्च यः । १४
परमेशेन तेनैव वाक्यमेतन्निगद्यते ॥
युष्मदर्थमहं लोकान् प्रेषयिष्यामि बाबिलं ।
पातयिष्यामि सर्व्वाणि तत्रत्यान्यर्गलानि च ।
मनुष्यांश्चापि कस्दीयान् पोतेषूल्लासकारिणः ॥
यो ऽहं परेश्वरः सो ऽहं युष्माकं पुण्यभाजनं । १५
इस्रायेलस्य निर्म्माता युष्माकञ्च महीपतिः ॥
इत्थं ब्रूते परेशः स मार्गो येनार्णवे कृतः । १६
सुघोरे तोयराशौ च येन पन्था विनिर्म्मितः ॥
येनानीता रथा अश्वाः सेना महाबलानि च । १७
शेरते निम्नशय्यायां नैवोत्थास्यन्ति कर्हिचित् ।
स्थास्यन्ति च सदा शान्ता निर्व्वाणा वर्त्तिका यथा ॥
इदानीं नैव युष्माभिः स्मर्त्तव्याः प्राक्तनाः क्रियाः । १८
नानुचिन्तयितव्यो वा पुनः कालः पुरातनः ॥
पश्य नवीनमेवाहं किञ्चिद् विधातुमुद्यतः । १९
उत्पत्स्यते ऽधुना तच्च युष्माभिश्चावभोत्स्यते ॥
मरुस्थानस्य मध्ये हि मार्गः कारिष्यते मया ।
शुष्कभूमेश्च मध्येन स्रावयिष्याम्यहं नदीः ॥
स्तोष्ये ऽहं प्राणिभि र्वन्यै र्व्यालैः सहोष्ट्रपक्षिभिः । २०
रोचितानां प्रजानां मे पानीयार्थमहं यतः ।
मरौ तोयं स्थले शुष्के सरितश्च प्रदत्तवान् ॥
मयैव ते जनाः सृष्टास्ते शंसिष्यन्ति मत्स्तवं ॥ २१
प्रार्थना तु त्वया याकूब् मामुद्दिश्य कृता नहि । २२
हे इस्रायेल् त्वया चाहम् अमन्ये क्लान्तिदायकः ॥
नैवादायि त्वया मह्यं होमार्थं मेषशावकः । २३
त्वदीयबलिदानैश्च त्वं नाकार्षी र्ममादरं ॥
नाहं नैवेद्यलोभाद्वा दासवत् त्वामपीडयं ।
धूपप्राप्तिनिमित्तं त्वां नाहञ्चाकारयं श्रमं ॥

२४ अर्थदानेन चोचं त्वं मदर्थं क्रीतवान् नहि।
मेदसा स्वबलीनाञ्च त्वं मां तर्पितवान् नहि॥
स्वपापैः किन्तु मामेव दासवत् समपीडयः।
स्वकीयैरपराधैश्च मामेवाकारयः श्रमं॥
२५ स्वनामार्थं तवाधर्म्मं लोपयामि त्वहं स्वयं।
नैवानुचिन्तयिष्यामि तव पापक्रियाः पुनः॥
२६ स्वगुणं स्मारय त्वं मां विवदिष्यावहे मिथः।
निवेदय स्ववक्तव्यं निर्दोषस्त्वं भवे यथा॥
२७ तावकीनादितातो यः स हि पापं समाचरत्।
तावकीनोपदेष्टारश्चासन् मद्विधिलङ्घिनः॥
२८ पवित्रास्ते ततोऽध्यक्षा अपवित्रीकृता मया।
वर्ज्जनायार्पितो याकूब् इस्रायेल् निन्दनाय च॥

---

४४ चतुश्चत्वारिंशोऽध्यायः।

१ समाजं प्रतीश्वरस्य प्रतिज्ञा ६ प्रतिमानाम असारता ९ प्रतिमानिर्म्मातृणामज्ञानता २१ ईश्वरस्य धन्यवादं कर्त्तुं विनयकथनञ्च।

१ हे मत्सेवक याकूब् त्वम् इदानीं श्रवणं कुरु।
शृणु त्वं मम वक्तव्यम् इस्रायेल् मम रोचित॥
२ त्वदीयसृष्टिकर्त्ता यो निर्म्माता च परेश्वरः।
गर्भात् तवोपकारी च स इदं भाषते वचः॥
हे मत्सेवक याकूब् त्वं मा बिभीहि कथञ्चन।
त्वञ्च मैवाप्नुहि त्रासं यिशुरून् मम रोचित॥
३ मरुभूम्यां यतो तोयं मयावतारयिष्यते।
सरितः स्रावयिष्यन्ते मया शुष्कस्थलेषु च॥
तव वंशे निजात्मानम् अवसेक्ष्याम्यहं यतः।
मामकीनाशिषश्चापि तव कौमारसन्ततौ॥
४ तृणानां मध्यतस्तेषाम् उत्पत्तिः सम्भविष्यति।
यथाऽवाक्ष्वृक्षाणां सलिलस्रोतसस्तटात्॥
५ परेशस्याहमस्मीति तेषामेको वदिष्यति।
याकूबो नामधेयञ्च तेषामेको ग्रहीष्यति॥
परेशस्येति लेखित्वा हस्तमन्यो ऽङ्कयिष्यति।

परमेशस्य नाम्ना च मुखपत्रं करिष्यति॥
इत्थं परेश्वरो ब्रूत इस्रायेलो मह्हीपतिः। ६
इत्थं ब्रूते तदुद्धर्त्ता सेनाध्यक्षः परेश्वरः।
अहमादिरहञ्चान्तो नास्ति मद्भिन्न ईश्वरः॥
यथा प्राचीनलोकानां सृष्टिकालान्मया कृतं। ७
अनागतं तथाहूय केनोक्तं बोधयेत् स मां।
चिराद् भाव्यचिराद् वा यत् स्वार्थं तत् स जनो वदेत्॥
युष्माभि र्नैव भेतव्यम् आशङ्का प्राप्यतां नहि। ८
मया किं पूर्व्वकालान्न श्रावयित्वा निजं वचः।
वार्त्ता प्रादायि युष्मभ्यं यूयं मदीयसाक्षिणः॥
ईश्वरः को ऽपि मद्भिन्नः किं वा कुत्रापि विद्यते।
अन्यः को ऽप्यचलो नास्ति नैको ऽपि ज्ञायते मया॥
सकला देवमूर्त्तीनां निर्म्मातारो निरर्थकाः। ९
तेषां हर्षदवस्तूनि नितान्तं निष्फलानि हि॥
तेषां ये साक्षिणस्ते ऽपि नहि पश्यन्ति किञ्चन।
न वा किञ्चन जानन्ति तेभ्यो लज्जाप्रदायिनः॥
देवतां निर्म्मिमीते कः मूर्त्तिं वा सिक्तधातुना। १०
तेन यत् क्रियते कार्य्यं निष्फलं तद् भविष्यति॥
सहायास्तस्य ये सर्व्वे ते भविष्यन्ति लज्जिताः। ११
स्वयं ते शिल्पिनश्चापि प्रतिभास्यन्ति मर्त्त्यवत्॥
एकस्थाने समागत्य ते च स्थास्यन्ति दारुवत्।
उद्विग्ना एकसङ्घे च ते भविष्यन्ति लज्जिताः॥
लोहकारः कुठारार्थी तप्ताङ्गारे कृतश्रमः। १२
मुद्गरै र्निर्म्मिमीते तद् यतते बलिबाहुना।
क्षुधातो याति दौर्ब्बल्यम् तोयाभोगाच्च मूर्च्छति॥
तनित्वा तक्षकः सूत्रं लिखित्वाङ्कान् शलाकया। १३
मूर्त्तिं तक्षति तीक्ष्णास्त्रै र्मिमीते कर्कटेन च॥
नराकारानुसारेण पुरुषच्छायारूपिणीं।
गृहमध्ये निवासार्थं स यत्नेन करोति तां॥
एरसाख्यानि दारूणि कर्त्तितव्यानि तेन हि। १४
न चेद् गृह्णाति तिर्षाख्यं वालोनाख्यं महीरुहं।

कश्चिद्वा रोचयत्यन्यं सुगाढं वन्यपादपं॥
स्वयं वा रोपयत्येकम् ओरणाख्यं पलाशिनं।
मेघतोयेन तस्यैव वर्द्धनञ्च प्रतीक्षते॥
१५ तत्काष्ठस्य मनुष्येण ज्वलनार्थं प्रयुज्यते।
तस्य किञ्चिद् गृहीत्वा स तापमासेवते स्वयं।
ज्वलयित्वापरं किञ्चित् पूपपाकं करोति च॥
निर्म्मिमीते तथा देवं प्रणामेन च सेवते।
तच्छित्वा विग्रहं तच्च प्रणिपत्य समर्चति॥
१६ खण्डमेकं स तापार्थी वह्नौ भस्मीकरोति हि।
मांसाशने प्रयुङ्क्ते ऽन्यं मांसं भृष्ट्वा च तृप्यति॥
सेवमानः पुनस्तापं वाक्यमेतद् ब्रवीति च।
धन्यो ऽहं सम्यगुष्णो ऽस्मि प्राप्तः पावकदर्शनं॥
१७ उच्छिष्टांशेन देवं स कृत्वा स्वपूज्यविग्रहं।
भजते प्रणिपातेन सेवते प्रार्थनेन च।
इत्थं वक्ति च मां त्राहि यतस्त्वं मम देवता॥
१८ ज्ञानं नास्ति नृणां तेषां बुद्धिस्तेषां न विद्यते।
नेत्राणामुपलिप्तत्वान्न द्रष्टुं शक्नुवन्ति ते।
चित्तानाञ्चोपलिप्तत्वान्न बोद्धुं शक्नुवन्ति वा॥
१९ नास्ति तेषां मनोयोगो न ज्ञानं न विवेचना।
तस्मान्नैव वदन्तीत्थं दग्धमर्द्धं मयानले॥
तदङ्गारेषु तप्तेषु पूपपाकः कृतस्तथा।
आमिषं तत्र भृष्ट्वा च कृतं मांसस्य भोजनं॥
अधुनोच्छिष्टमंशं किं करिष्ये पूज्यविग्रहं।
एतमिन्धनखण्डं किं पूजयिष्यामि वा नतः॥
२० स भस्माशी स्वचित्तस्य भ्रान्त्या सन्मार्गतश्च्युतः।
नैव स्वात्मानमुद्धर्त्तुं नरः शक्नोति तादृशः।
मत्करो ऽनृतधारी किं नास्त्येतत् स न वक्ष्यति॥
२१ त्वमेतत् स्मर हे याकूब् इस्रायेल् त्वञ्च तत् स्मर।
यतस्त्वं मम दासो ऽसि त्वं मयैव विनिर्म्मितः।
इस्रायेल् मम दासस्त्वं मया न विस्मरिष्यसे॥
२२ तावकाधर्म्मराशिं हि लोपितो मेघवन्मया।

तव पापसमूहश्च निर्धूतो वारिदो यथा।
मां प्रत्येहि परावर्त्त्य यतस्त्वां मुक्तवानहं॥
हर्षात् त्वं गाय हे स्वर्ग परेशेन क्रिया कृता। २३
उच्चै र्नदत यूयञ्च हे मह्या निम्नभूमयः।
उच्चै र्गायत हे शैला अटव्यश्च द्रुमाकुलाः॥
याकूबो मोचनं यस्मात् कृतवान् परमेश्वरः।
इस्रायेलस्य सम्बन्धे महाशोभान्वितो ऽभवत्॥
तावको मुक्तिदाता यस्त्वन्निर्म्माता च गर्भतः। २४
परमेशेन तेनैव वाक्यमेतन्निगद्यते॥
परमेश्वर एवाहं सकलं सृष्टवानहं।
ततवान् दिवमेकाकी निःसङ्गी स्तृतवान् भुवं॥
भनज्ञ्यन्ततचिह्नानि मन्त्रान् व्यर्थीकरोमि च। २५
बुधान् व्याहन्म्यहं तेषां ज्ञानं मौर्ख्यं करोमि च॥
स्वसेवकस्य वाक्यन्तु सुस्थिरं विदधाम्यहं। २६
मन्त्रणां स्वीयदूतानां फलयुक्तां करोमि च॥
यिरूशालममध्येतद् वच्मि सावत्स्यते जनैः।
यिहूदीयपुरीश्चाधि निर्म्मास्यन्त इमाः पुनः।
एतान्युत्सन्नवेश्मानि स्थापयिष्याम्यहं पुनः॥
शुष्को भव विधास्यामि निर्जलांस्त्वज्जलाकरान्। २७
वाक्यमेतदगाधञ्च वारिराशिं ब्रवीम्यहं॥
खसश्चाधि ब्रवीमीदम् असौ मज्जनपालकः। २८
सकलञ्च ममाभीष्टं फलयुक्तं करिष्यति॥
यिरूशालममेवाधि वच्यते तेन वागियं।
पुरी निर्म्मीयतामेषा मन्दिरं स्थाप्यतां पुनः॥

---

४५ पञ्चचत्वारिंशोऽध्यायः।

१ निजलोकानां रक्षार्थं बाबिलस्य विनाशार्थं खसस्योत्थापनं ८ खसस्य रक्षणं तस्य कर्म्मणः सफलीकरणं २० देवतानां निष्फलत्वञ्च।

परमेश इदं ब्रूते मया खसो ऽभिषेचितः। १
धृत्वा तस्य करं लोकान् पातयिष्यामि तत्पुरः।
नृपाणाञ्च विधास्यामि शिथिलं कटिबन्धनं॥

तस्याग्रे विवरिष्यामि द्वारशाखाद्वयान्यहं।
न च केनापि शक्ष्यन्ते संरोद्धुं गोपुराण्यपि॥
२ तवाग्रे ऽहं गमिष्यामि करिष्याम्यसमं समं।
ताम्रद्वाराणि भंक्ष्यामि सञ्छेत्स्याम्यायसार्गलं॥
३ वितरिष्यामि तुभ्यञ्चाहं कोषांस्तमसावृतान्।
धनराशींश्च दास्यामि प्रच्छन्नान् निभृते स्थले॥
तदानीं ज्ञास्यसीदं त्वं यदहं परमेश्वरः।
अस्मि त्वन्नामनिर्णेता तथेस्रायेल ईश्वरः॥
४ सेवको मम यो याकूब् य इस्रायेल् मम प्रियः।
तस्य निमित्तमेवाहं समाख्याम्यद्य नाम ते।
त्वं मां नैवाभिजानासि मया किन्त्वभिवाद्यसे॥
५ अद्वितीयः परेशो ऽहं नास्ति मद्भिन्न ईश्वरः।
मां न जानन् मयैव त्वं श्रिया संवेष्टयिष्यसे॥
६ सूर्य्योदयास्तयो र्मध्ये ज्ञास्यते सकलैरिदं।
अहं यदद्वितीयो ऽस्मि परेशो ऽहं न चापरः॥
७ अहं दीप्तेश्च निर्म्माता स्रष्टाहं तिमिरस्य च।
मङ्गलस्य विधाताहं सृष्टिकर्त्ता च दुर्गतेः।
एतानि सकलान्येव विदधे ऽहं परेश्वरः॥
८ ऊर्द्धात् त्वं वर्ष हे व्योम धर्म्मं निषिञ्च हे वियत्।
प्रविश्य विन्दवो भूमिं कुर्व्वन्तु त्राणशस्यदां।
प्ररोहत्वपि याथार्थ्यं तत्स्रष्टाहं परेश्वरः॥
९ तं नरं धिक् स्वनिर्म्मात्रा सार्द्धं द्वन्द्वं करोति यः।
मृज्जकपालिकानां हि मध्ये सो ऽपि कपालिका॥
किं करोषीति वाक्यं किं कुलालं मृत्तिका वदेत्।
हस्त एतस्य नास्तीति त्वां वा त्वत्कर्म्म किं वदेत्॥
१० त्वं किं जनयसीत्येवं जनकं वक्ति यो जनः।
किं प्रसूयस एतद्वा नारीं यो वक्ति तञ्च धिक्॥
११ इस्रायेलः पवित्रो राट् निर्म्माता च परेश्वरः।
ब्रूते पृच्छत मां यूयं मत्पुत्रानधि भावि किं।
मद्धस्तकृतकर्म्माधि मह्यमाज्ञां प्रदत्त च॥
१२ अहं निर्म्मितवान् पृथ्वीं नरं तत्र च सृष्टवान्।

स्वीयहस्तद्वयेनाहं ततवांश्च विहायसं।
कृत्स्नायास्तस्य वाहिन्याः सेनाध्यक्षो ऽहमस्मि च॥
अमुं वीरञ्च धर्म्मेण समुत्पादितवानहं। १३
तस्य सर्व्वाणि वर्त्मानि करिष्यामि समानि च॥
निर्म्मास्यति पुनर्व्वारं मामकीनपुरीमसौ।
मोचयिष्यति दास्याच्च मम दूरीकृताः प्रजाः॥
तदर्थन्तु न मूल्यं स नोत्कोचं वा ग्रहीष्यति।
भाषते भारतीमेतां सेनाध्यक्षः परेश्वरः॥
इत्थं परेश्वरो ब्रूते मिस्रीयाणामुपार्ज्जितं। १४
कूशीयानाञ्च वाणिज्यं सिवायीयाश्च मानवाः।
सुदीर्घास्त्वामुपैष्यन्ति भविष्यन्ति तवैव च॥
ते त्वत्पश्चाद् व्रजिष्यन्ति प्रसरन्तः सशृङ्खलाः।
त्वां प्रणम्य च तैरेतद् वाक्यं निवेदयिष्यते।
त्वयीशो ऽस्ति न चान्यत्र नास्ति को ऽप्यन्य ईश्वरः॥
आः सत्यमीश्वरो ऽसि त्वं सम्यगात्मनिगूहकः। १५
त्वमिस्रायेल ईशश्च परित्राणस्य साधकः॥
शिल्पिनो देवमूर्त्तीनां सर्व्वे यास्यन्ति खिन्नतां। १६
लज्जां प्राप्यैकसङ्गे च प्रस्थास्यन्ति त्रपान्विताः॥
इस्रायेल् परमेशात्तु नित्यं त्राणमवाप्स्यति। १७
यूयमनन्तकालेषु लज्जिता न भविष्यथ।
न कदाचन वा यूयं विवर्णत्वमवाप्स्यथ॥
नभसः सृष्टिकर्त्ता य ईश्वरो निर्म्ममे धरां। १८
तामुत्पाद्य स्थिरीकृत्य निर्जनां विदधे नहि।
निर्म्ममे किन्तु वासार्थं वक्तीदं स परेश्वरः।
अहमेव परेशो ऽस्मि मदन्यो विद्यते नहि॥
नाहं भाषितवान् गुप्तं न स्थाने ध्वान्तसेविते। १९
नावोचं याकुबो वंशं मृषान्विष्यत मामिति।
धर्म्मवादी परेशो ऽहं यथार्थं ज्ञापयामि च॥
हे विनाशत उत्तीर्णा अन्यजातीयमानवाः। २०
मिलित्वा यूयमायात सकलास्चोपतिष्ठत॥
नैव किञ्चन जानन्ति प्रतिमाकाष्ठवाहकाः।

अनुपकारिदेवञ्च प्रति प्रार्थनकारिणः ॥
२१ आज्ञाप्यानीत तान् यूयं मन्त्रयन्ताञ्च ते मिथः ।
इदं को ऽश्रावयत् पूर्व्वं को वादौ तदजिज्ञपत् ॥
किं न स्वयं परेशो ऽहं नास्ति मद्भिन्न ईश्वरः ।
धर्म्मीशस्त्राणकश्चाहं मदन्यो विद्यते नहि ॥
२२ हे भुवः प्रान्तभागेषु संस्थिताः सकला नराः ।
मामुद्दिश्य निरीक्षध्वं परित्राणञ्च प्राप्नुत ।
अहमेव यतो ऽस्मीशो द्वितीयो नहि विद्यते ॥
२३ गृहीत्वा स्वीयनामाहं शपथं कृतवानिमं ।
मद्वक्त्रान्निरगात् सत्यं तद् वाक्यं लोप्स्यते नहि ॥
ममैवाग्रे भुवि न्यस्तं सर्व्वजानु भविष्यति ।
शपथं सर्व्वजिह्वा च मन्नाम्नोच्चारयिष्यति ॥
२४ केवलं परमेशे स्तो मम पुण्यबले इति ।
तस्मै क्रुद्धा नराः सर्व्वे तमभ्येष्यन्ति लज्जिताः ॥
२५ इस्रायेलीयवंशीयैः सकलैः परमेश्वरात् ।
पुण्यं सम्प्राप्य तस्यैव श्लाघा कारिष्यते मुदा ॥

४६ षट्चत्वारिंशोऽध्यायः ।

१ बाबिलस्थप्रतिमानाञ्च विनाशः ३ ईश्वरीयलोकानां रक्षा ५ प्रतिमानाम् असारता ८ विवेकं विनयकथनं १२ परित्राणकथनञ्च ।

१ पश्य नतो ऽस्ति बेल् देवो पश्य भग्नो निबुस्तथा ।
जन्तुष्वेव धुरीणेषु प्रतिमा अर्पितास्तयोः ।
दुर्भाराः सन्ति तद्भारा अर्पिताः श्रान्तवाहने ॥
२ तावुभौ तु नतौ भग्नौ धुरं रक्षितुमक्षमौ ।
वन्दिवत् परदेशञ्च तावुभौ व्रजतः स्वयं ॥
३ यूयं शृणुत मद्वाक्यं हे याकूबः कुलोद्भवाः ।
इस्रायेलीयवंशस्यावशिष्टाः सकला नराः ।
यूयमाजननीगर्भान्मयि भारवदर्पिता ।
आमातृजठरत्यागाद् अहं युष्मान् वहामि च ॥
४ यो ऽस्मि वार्द्धक्यपर्य्यन्तं सो ऽहं स्थास्यामि सर्व्वदा ।
पलितं यावदेवाहं युष्मान् वक्ष्यामि भारवत् ॥

अहं तत् कृतवान् पूर्व्वं युष्मान् वक्ष्याम्यहं पुनः।
धुरवच्च ग्रहीष्यामि रक्षिष्यामि च निश्चितं॥
केन तुल्याकृतिं मत्वा यूयं मामुपमास्यथ। ५
केन मत्प्रतिरूपेण समानं माञ्च वक्ष्यथ॥
अपव्ययिनरैः स्वर्णं पुटकेभ्यो वहिष्कृतं। ६
रजतञ्च तुलायष्ट्या यत्नतः परिमीयते॥
शिल्पिने च भृतिं दत्त्वा तेन निर्म्माप्य देवतां।
तां प्रणमन्ति तस्याञ्च सर्व्वे कुर्व्वन्त्युपासनां॥
स्वस्कन्धेष्वर्पयित्वैव भारवच्च वहन्ति तां। ७
स्वस्थले स्थापिता तैश्च निश्चला सावतिष्ठते॥
यस्तु क्रन्दति तत्साद्यात् तस्मै न दत्त उत्तरं।
व्यसनात् तस्य रक्षां वा न करोति कथञ्चन॥
स्मरन्तो यूयमेतद्धि जायध्वं पुरुषोत्तमाः। ८
निधद्ध्वं स्वमनांस्यत्र हे आज्ञालङ्घिनो नराः॥
स्मरत पूर्व्वकार्य्याणि प्राक्कालेषु कृतानि मे। ९
अहमेव विधातास्मि द्वितीयो नहि विद्यते।
ईश्वरश्चाहमेवास्मि नास्ति कश्चन मादृशः॥
अन्तकाले भविष्यद् यत् आदौ तज्ज्ञापयाम्यहं। १०
अकृतञ्च यदद्यापि तदग्रे प्रवदामि च॥
मयेदं गद्यते वाक्यं स्थायिनी मम मन्त्रणा।
यत् किञ्चिच्च ममाभीष्टं मया तत् साधयिष्यते॥
पूर्व्वस्या दिश उत्क्रोशमहमाह्वातुमुद्यतः। ११
दूरदेशत एवाहमानेष्यामि स्वमन्त्रिणं॥
मयेदं गद्यते वाक्यं सफलञ्च करिष्यते।
यं सङ्कल्पमहं कुर्व्वे स मया साधयिष्यते॥
हे गाढचेतसः सर्व्वे हे धर्म्माद् दूरवर्त्तिनः। १२
मया यद् गद्यते वाक्यं यूयं तच्छ्रोतुमर्हथ॥
स्वीयधर्म्मो मयानायि स दूरे नहि तिष्ठति। १३
मत्कर्त्तव्यं परित्राणं विलम्बं न करिष्यति।
त्राणं दास्यामि सीयोन इस्रायेले मम प्रभां॥

৪৭ সপ্তচত্বারিংশোऽধ্যায়ঃ।

১ বাবিলো মাবিদ্ধঃ ৪ তস্য নানাবিধপাপঞ্চ।

১ হে বাবিলাখ্যকন্যে ত্বং নতা ধূলৌ নিষীদ হি।
হে কস্‌দীয়কুমারি ত্বং ভূমৌ সীদ নিরাসনা।
তন্বী সুখপ্রিয়া চেতি ত্বং নৈবাখ্যাস্যসে পুনঃ॥
২ ঘরট্টদ্বয়মাদায় গোধূমং তেন চূর্ণয়।
হর প্রাবরণং স্বাস্যাত্ পাদবস্ত্রঞ্চ মোচয়।
জঙ্ঘে চানাবৃতে কৃত্বা পদাভ্যাং সরিতস্তর॥
৩ উচ্ছাদ্যতাঞ্চ লজ্জা তে গুহ্যদেশশ্চ দৃশ্যতাং।
অহং শোধং গ্রহীষ্যামি কো ऽপি মাং নহি রোৎস্যতি॥
৪ অস্মাকং যঃ পরিত্রাতা সেনাধ্যক্ষঃ পরেশ্বরঃ।
ইতি নাম্না স বিখ্যাত ইস্রায়েলঃ পবিত্ররাট্॥
৫ হে কস্‌দীয়কুমারি ত্বং মূকা সীদ তমো বিশ।
ত্বং রাষ্ট্রাণামধিষ্ঠাত্রীতি নৈবাখ্যাস্যসে পুনঃ॥
৬ স্বজনেভ্যো ময়া ক্রুদ্ধা স্বীয়ভূমিং প্রদুষ্য চ।
অর্পিতাস্তব হস্তে তে ত্বন্তু তান্ প্রতি নির্দ্দয়া।
বৃদ্ধানপি গরিষ্ঠেন স্বযুগেনাভ্যপীডয়ঃ॥
৭ অহং শাশ্বতকালার্থং রাজ্ঞীতি ত্বমভাষথাঃ।
নাত্রাকার্ষী মনোযোগম্ উদর্কং নান্বচিন্তয়ঃ॥
৮ ইদানীং হে সুখাসক্তে ত্বমেতদ্ বচনং শৃণু।
ত্বং নিশ্চিন্তং সুখাসীনা মনসেত্থং প্রভাষসে॥
অদ্বিতীয়াহমেবাস্মি ন নিষৎস্যাম্যভর্ত্তৃকা।
আনপত্যজশোকঞ্চ ন জ্ঞাস্যামি কদাচন॥
৯ বৈধব্যমানপত্যঞ্চ দ্বিবিধং ব্যসনন্ত্বিদং।
একস্মিন্নেব ঘস্রে ত্বাম্ অকস্মাদাক্রমিষ্যতি॥
ত্বামেব ভূরিমন্ত্রঞ্চাং মোহনে চাতিতত্পরাং।
আক্রমিষ্যতি পূর্ণেন তেজসা তদ্ বিপদ্‌দ্বয়ং॥
১০ নিশ্চিন্তা ত্বং স্বদৌরাত্ম্যে বক্ষি মাং কো ऽপি নেক্ষতে।
স্বজ্ঞানেন স্ববুদ্ধ্যা চ ত্বং জাতোত্পথগামিনী।
অদ্বিতীয়াহমস্মীতি মনোমধ্যে চ ভাষসে॥

त्वान्तूपेष्यति दौर्गत्यं तत्प्रभातमसम्भवं। ११
आक्रमिष्यति चापत् त्वां त्वं तां व्याहन्तुमक्षमा।
सहसाज्ञातसारेण विनाशस्त्वामुपेष्यति॥
आबाल्यकालतो यत्र त्वं श्रमं कृतवत्यसि। १२
स्वीयमोहनविद्यां तां भूरिमन्त्रांश्च धारय॥
किं जाने त्वं तथा कृत्वा स्वोपकारं करिष्यसि।
विपदः प्रतिरोधो वा तव शक्यो भविष्यति॥
स्वभूरिमन्त्रणाभिस्त्वं परिश्रान्ताभवो यतः। १३
ततस्त्वामुपकुर्व्वन्तूपतिष्ठन्तो यथाविधि।
व्योमदेशविभक्तारस्ते नक्षत्रनिरीक्षकाः।
अमावस्यासु ये तुभ्यं दर्शयन्ति गतेः क्रमं॥
पश्य ते नालवद् भूता अग्निना भस्मसात् कृताः। १४
स्वप्राणानपि ते सर्व्वे दाहादुद्धर्त्तुमक्षमाः॥
तेष्वङ्गारेषु तापस्य सेवनं न करिष्यति।
न वा तस्या द्युतेरग्र उपवेक्ष्यति कश्चन॥
इदं तेषां नृणां भाग्यं यांस्त्वं श्राम्यसि सेवितुं। १५
यैः सार्द्धञ्च वणिग्भावं करोष्याबाल्यकालतः॥
विभ्रमिष्यन्ति ते सर्व्व एकैकः स्वीयसम्मुखं।
तेषां को ऽपि तवोद्धारे प्रवृत्तो न भविष्यति॥

---

४८ अष्टचत्वारिंशोऽध्यायः।

१ निजलोकान् प्रति परमेश्वरस्य भर्त्सनं १२ विनयकथनं १७ खेदकथनं २० भाविरक्षाकथनञ्च।

युष्माभिः श्रूयतामेतत् हे याकूबीयवंशजाः। १
इस्रायेलीयनामानो यिहूदाप्रस्रवोद्भवाः॥
परमेशस्य नाम्नैव यूयं शपथकारिणः।
इस्रायेलश्च युष्माभिरनुकीर्त्त्यत ईश्वरः।
न तु सत्येन भावेन न वा धर्म्मानुरागतः॥
यूयं धर्म्मपुरस्यैव पौरा इत्यनुकीर्त्तिताः। २

नामधेयञ्च यस्यास्ति सेनाध्यक्षः परेश्वरः।
इस्रायेलस्तमीशञ्च प्रतिभाय समाश्रिताः॥
३ प्राक्काले फलिता वाचो व्यक्ताप्यन्तादितो मया।
निर्य्ययुस्ता ममैवास्यान्नरेभ्यः प्रतिशब्दवतः।
तूर्णञ्च कुर्व्वता कार्य्यं मया ताः सफलीकृताः॥
४ त्वं कठोरमनस्को ऽसि मन्या लौहमयी तव।
ताम्रमयो ललाटस्त इत्यजानमहं यतः॥
५ तस्मात् त्वां ज्ञापयन्नादौ प्रत्यश्रौषमनागतं।
न शक्नोषि ततो वक्तुं कृतं मद्विग्रहेण तत्।
तद्धिता मम सिक्ता वा प्रतिमा तत् समादिशत्॥
६ यदश्रावि त्वया सर्व्वं सफलं तन्निरीक्ष्यतां।
किं न यूयञ्च हे देवाः प्रतिश्रोष्यथ किञ्चन॥
त्वान्तु याः श्रावयिष्यामि भाविवाच इतः परं।
नवीनास्ताः सुगुप्ताश्च तव ज्ञानाद् वहिःस्थिताः॥
७ नासंस्ताः कल्पिता आदौ न्यरूप्यन्ताधुनैव ताः।
दिनादद्यतनात् पूर्व्वं तास्त्वया संश्रुता नहि।
न शक्नोषि ततो वक्तुं ताः पश्यावगता मया॥
८ नाश्रौषीस्त्वं न वाज्ञासीरमुक्तश्रोत्र आदितः।
यतो ऽहं ज्ञातवानेतत् त्वमतीव प्रवञ्चकः।
अपकारीति नाम्ना च ख्यायसे जठरावधि॥
९ मया किन्तु स्वनामार्थं सहिष्णुताचरिष्यते।
स्तवार्थं क्षमां कृत्वा त्वं नैवोच्छेत्स्यसे मया॥
१० द्रावितस्त्वं मया पश्य न तु रूप्यस्य सङ्गिवत्।
मूषायां दुःखरूपायां मया त्वञ्चानुरोचितः॥
११ स्वनामार्थं स्वनामार्थं कार्य्यं कारिष्यते मया।
यतस्तस्य महानिन्दा कथं सह्या भवेन्मम
नैवाहं वितरिष्यामि परस्मै स्वीयगौरवं॥
१२ मद्वाक्यं शृणु हे याकूब् इस्रायेल् मम कीर्त्तित।
अहं तद् अहमेवादिरहमन्तो भवामि च॥
१३ मामकीनकरः पृथ्व्या भित्तिमूलमतिष्ठिपत्।
दक्षिणो मम हस्तश्च प्रथतानीद्दिहायसं।

तौ श्रुत्वैव ममाह्वानम् उभौ मामुपतिष्ठतः॥
सर्व्वैर्युष्माभिरेकत्र समागत्य निशम्यतां। १४
देवानां मध्यतो वार्त्तां वीरस्यैतस्य को ऽवदत्॥
परेशः प्रीयते तस्मिन् मानसं तस्य बाबिलि।
कस्‌दीयेषु स्वशौर्य्यञ्च सफलं स करिष्यति॥
अहमेवाहमेवैतज्ज्ञापयित्वाह्वयामि तं। १५
स मयैव समानीतः कृतकार्य्यो भविष्यति॥
मामुपस्थाय युष्माभिरत्रावधीयतां मनः। १६
आदितो गोपने क्वापि नहि भाषितवानहं॥
आफलोत्पत्तिकालाद्धि तामधिष्ठितवानहं।
अद्य मां स्वात्मना सार्द्धं प्रैषीत् प्रभुः परेश्वरः॥
इस्रायेलः पवित्रो राट् मुक्तिदाता च यस्तव। १७
परमेशेन तेनैव वाक्यमेतन्निगद्यते॥
त्वत्प्रभुः परमेशो ऽहं हितशिक्षां ददामि ते।
यो मार्गस्तव गन्तव्यस्तस्मिंस्त्वां गमयामि च॥
ममाज्ञासु मनोयोगो यद्यकारिष्यत त्वया। १८
अभविष्यत् तरङ्गिण्या तुल्या शान्तिस्तदा तव।
अभविष्यच्च धर्म्मस्ते सागरस्योर्म्मिभिः समः॥
त्वद्वंशः सिकतातुल्यस्त्वत्प्रजा शर्करोपमा। १९
अनुच्छिन्नमलुप्तञ्चास्थास्यत् त्वदीयनाम च॥
निर्यात बाबिलो यूयं कस्‌दीयेभ्यः प्रधावत। २०
हर्षनादेन भाषध्वं वार्त्तामुच्चैः प्रदत्त च॥
तां महीप्रान्तपर्य्यन्तं व्याप्तां कर्त्तुञ्च जल्पत।
परमेशो निजं दासं याकूबं मुक्तवानिति॥
न भविष्यति तेषाञ्च तृष्णा शुष्कस्थलेष्वपि। २१
शैलात् तेषां कृते तोयं नायकः स्रावयिष्यति।
दलिते तेन पाषाणे वेगात् स्यन्दिष्यते जलं॥
नास्ति दुरात्मनां शान्तिरिति ब्रूते परेश्वरः॥ २२

४९ ऊनपञ्चाशत्तमोऽध्यायः ।

१ यिहूदीयैः ख्रीष्टावज्ञानं ७ अन्यदेशीयानां ग्राह्यत्वं १३ समाजे परमेश्वरस्य स्नेहः
२२ तस्य सुखं २४ शत्रूणां विनाशश्च ।

१ हे द्वीपेषु स्थिताः सर्व्वे यूयं संश्रोतुमर्हथ ।
हे जना दूरदेशस्था युष्माभिरवधीयतां ॥
आगर्भकोषवासान्मां परमेशः समाह्वयत् ।
स चामातुरुदरादेव मम नामान्वकीर्त्तयत् ॥
२ मम वक्त्रमकार्षीच्च तीक्ष्णनिस्त्रिंशसन्निभं ।
माञ्च स्वकीयहस्तस्य छायायां पर्य्यजूगुपत् ।
स्पष्टाग्रवाणवत् कृत्वा स्वतूणीरे च मां न्यधात् ॥
३ माञ्चाह मम दासस्त्वम् इस्रायेल् मद्यशस्करः ॥
४ मया किन्तु न्यगादीदं वृथाहं कृतवान् श्रमं ।
मुधालीकफलार्थञ्च स्वीयं क्षयितवान् बलं ॥
परमेशस्य हस्ते तु मम धर्म्मः समर्पितः ।
विद्यते च मदीशस्य करे मत्कर्म्मणः फलं ॥
५ यः स्वीयसेवकं कर्त्तुं जरायौ निरमात्त मां ।
इदानीं परमेशः स स्वयं मामभ्यभाषत ॥
तस्येच्छा यन्मया याकूब् प्रत्यानीयेत तं प्रति ।
इस्रायेलस्तु तादृक्षः सङ्गृहो नहि सिध्यति ॥
तथापि परमेशस्य समक्षं सत्कृतो ऽस्म्यहं ।
अस्ति मद्बलदाता च मामकीनेश्वरः स्वयं ॥
६ स चाह क्षुद्रमेतद् यत् त्वं भूत्वा मम सेवकः ।
केवलमस्य याकूबो वंशानुन्नमयेः पुनः ॥
इस्रायेलो न्वयां मध्ये त्राणपात्राणि सन्ति ये ।
मां प्रति केवलं तान् वा यत् प्रत्यावर्त्तयेः पुनः ॥
पृथिवीप्रान्तपर्य्यन्तं त्वं त्राता मन्निरूपितः ।
यद् भवेस्तत्कृते ऽकार्षं त्वां जातीनां प्रभाकरं ॥
७ यो मनुष्यैरवज्ञातो देशीयैश्चावगर्हितः ।
पार्थिवानाञ्च दासो ऽस्ति तं समुद्दिश्य भाषते ।
इस्रायेलः पवित्रो राट् मोचकस्य परेश्वरः ॥

दृष्ट्वोत्थास्यन्ति राजानस्त्वां प्रणंस्यन्ति चाधिपाः।
सम्मन्य परमेशं तं यस्य विश्वास्यता स्थिरा।
इस्रायेलः पवित्रं तं प्रभुं यस्त्वामरूरुचत्॥
भाषते भारतीमेनां स्वयमेव परेश्वरः। ८
अनुग्रहस्य काले ऽहं श्रुतवान् प्रार्थनां तव।
परित्राणस्य घस्रे च साहाय्यं कृतवांस्तव॥
त्वां रक्षंश्च करिष्यामि लोकानां नियमाकरं।
इत्थं त्वयोन्नतिप्राप्तां विधास्यामि वसुन्धरां।
स्वामिभ्यो भाजयिष्यामि भागांस्तस्या निरालयान्॥
कारावद्धान् गदिष्यामि यूयं निर्गन्तुमर्हथ। ९
प्रादुर्भवत यूयञ्चेति नरांस्तिमिरावृतान्।
ते मार्गेषु चरिष्यन्ति विहरिष्यन्ति चाद्रिषु॥
न क्षुधा न च तृष्णा तान् मनुष्यान् पीडयिष्यति। १०
नैव मरीचिका वा तान् न सूर्य्यो वाहनिष्यति॥
यतो ऽनुकम्पकस्तेषां स्वयं तान् गमयिष्यति।
तोयप्रवाहकोत्सानां समीपं तांश्च नेष्यति॥
अहं स्वीयगिरीन् सर्व्वान् करिष्यामि महापथं। ११
मत्कृता राजमार्गाश्च भविष्यन्ति समुच्छ्रृताः॥
पश्य समागमिष्यन्ति दूरदेशान्नरा इमे। १२
उत्तरात् पश्चिमाच्चामी अमी सीनीमदेशतः॥
त्वं गानं कुरु हे स्वर्ग त्वञ्चाह्लादस्व हे धरे। १३
उच्चेनानन्दनादेन पर्व्वता आस्वनन्तु च॥
स्वयं परेश्वरो यस्मात् स्वप्रजाः सान्त्वयिष्यति।
निजदुर्गतलोकेषु करुणाञ्चाचरिष्यति॥
वक्ति किन्तु सियोनेतत् त्यक्तवान् मां परेश्वरः। १४
मन्ये विस्मृतवानस्ति मामकीनप्रभुश्च मां॥
स्तन्यपायिशिशुं नारी किं विस्मृत्य कथञ्चन। १५
स्वकीयगर्भजाद्बालात् करुणामुपसंहरेत्॥
तादृग् विस्मरणं नार्य्या जातु यद्यपि कुर्व्वते।
तथापि त्वं मया नैव कथञ्चिद्विस्मरिष्यसे॥
मद्धस्ततलयोः पश्य तवाकारो मयाङ्कितः। १६

सर्व्वदा तव प्राचीरं मत्प्रत्यक्षञ्च विद्यते ॥
१७ त्वत्समीपमुपस्थातुं त्वरन्ते नन्दनास्तव ।
त्वन्मध्यान्निर्गमिष्यन्ति भञ्जका ध्वंसकाश्च ते ॥
१८ त्वं चतुर्द्दिश उद्दिश्य दृक्पातं कुरु पश्य च ।
मिलित्वा सकला एते समायान्ति तवान्तिकं ॥
परमेश इदं ब्रूते नित्यजीवी भवामि चेत् ।
तर्हि त्वं भूषणानीव सर्व्वांस्तान् परिधास्यसे ।
संवेष्टयिष्यसे तैश्च कन्या मेखलया यथा ॥
१९ नष्टाः शून्याश्च पुर्य्यस्ते देशश्च ध्वंसितस्तव ।
सङ्कुला किन्त्वितः पश्चाद् भविष्यन्त्यालयार्थिभिः ।
प्रस्थास्यन्ति सुदूरञ्च तावकग्रासकारिणः ॥
२० तव सन्तानहीनायाः पुत्रास्त्वत्कर्णगोचरे ।
भूयो भूयो गदिष्यन्ति स्थानं सङ्कुचितं मम ।
यथाहं शक्नुयां वस्तुं देहि मह्यं तथा स्थलं ॥
२१ स्वचित्ते वक्ष्यसि त्वञ्च को ममैतानजीजनत् ।
अपुत्रासमहं बन्ध्या दूरं नीता प्रवासिता ॥
तदा कः सकलानेतान् सन्तानान् समवर्धयत् ।
एकाकिन्यवशिष्टासं कुत्र त्वासन्निमे तदा ॥
२२ प्रभुना परमेशेन वाक्यमेतन्निगद्यते ।
पश्य जातीः समाक्रान्तुं करमुत्थापयाम्यहं ।
विदेशिनाञ्च प्रत्यक्षं स्थापयामि निजध्वजं ॥
स्ववक्षःसु वहन्तस्त आनेष्यन्ति सुतांस्तव ।
स्वस्कन्धांश्च समारोप्यानेष्यन्ति दुहितॄंस्तव ॥
२३ राजानश्च भविष्यन्ति त्वद्दासाः शिशुपालकाः ।
तेषां श्रेष्ठा महिष्यश्च त्वद्दास्यः स्तन्यदायिकाः ॥
भूमाववनतास्याश्च त्वां प्रणंस्यन्ति ते तदा ।
त्वदीयपादयो र्लग्ना धूली तैश्चावलेह्यते ॥
तेन प्रतीक्षिणो यस्य न भविष्यन्ति लज्जिताः ।
स परेशोऽहमस्मीति त्वया ज्ञायिष्यते तदा ॥
२४ यद् द्रव्यं समरे लब्धं वीरात् तत् किं हरिष्यते ।
न्याय्यजेतुश्च बन्दी वा किं पुन र्मोचयिष्यते ॥

तथापि परमेशेन वाक्यमेतन्निगद्यते। २५
सत्यं वीरस्य या वन्दी सा पुन र्मोचयिष्यते।
युद्धे लब्धञ्च यद् द्रव्यं तद् दुर्वृत्ताद्धरिष्यते॥
त्वया ये विवदन्ते च विवदिष्ये ऽहमेव तैः।
करिष्याम्युपकारञ्च त्वत्पुत्राणामहं स्वयं॥
खादिष्यन्ति ममादेशात् स्वमांसं पीडकास्तव। २६
ते च द्राक्षारसेनेव मदिष्यन्ति स्वशोणितैः॥
तेन स्वयं परेशो ऽहं परित्राता तवास्मि यत्।
याकूबो बलदाताहं तव यश्चास्मि मोचकः।
एतत् सम्यगभिज्ञातुं शक्यते सर्व्वप्राणिभिः॥

---

५० पञ्चाशत्तमोऽध्यायः।

१ अविश्वासकारणात् खीष्टेन यिहूदीयानां त्यजनं ४ खीष्टस्य कथनं १० ईश्वरे विश्वसितुं विनयकथनञ्च।

इदानीं भारतीमेतां भाषते परमेश्वरः। १
मातु र्वस्त्यागपत्रं क्व येन तां त्यक्तवानहं।
युष्मान् मदुत्तमर्णानां कस्मै विक्रीतवानहं॥
युष्माकं स्वापराधानां हेतुतो विक्रयः कृतः।
त्यक्ता माता च युष्माकं युष्मत्पातककारणात्॥
मय्यायाते कुतो हेतो नैको जनो ऽप्यविद्यत। २
कुतः कृते मयाह्वान उत्तरं को ऽपि नाददात्॥
ह्रस्वः किं मम हस्तो ऽभूदसमर्थश्च मोचने।
किं जातो बलहीनो ऽहमसमर्थश्च रक्षणे॥
पश्य सन्तर्ज्जनेनैव सागरं शोषयाम्यहं।
तथा स्रोतस्विनीश्चापि विदधामि मरुस्थलं॥
जलाभावाच्च दुर्गन्धास्तासां मीना भवन्ति हि।
पिपासाकारणात् तेषां प्राणनाशश्च जायते॥
शोकसूचककालिम्ना गगनं वेष्टयाम्यहं। ३
मलिनं शाणवस्त्रञ्च कुर्व्वे तस्य परिच्छदं॥
प्रभुः परेश्वरो मह्यं जिह्वां विद्यार्थिनो ऽददात्। ४

उपकर्त्तुं जनान् श्रान्तान् वाक्यैः शक्नोम्यहं ततः॥
यच्च संशृणुयां शिक्षाम् अहं विद्यार्थिनो यथा।
तदर्थं तेन कर्णो मे प्रतिप्रातः प्रबोध्यते॥
५ ममोद्घाटितवान् कर्णं स प्रभुः परमेश्वरः।
न विरोध्यभवञ्चाहं न च पश्चादपासरं॥
६ प्रहारिभ्यार्पयं पृष्ठं गण्डौ च श्मश्रुहारिषु।
निष्ठीवाद्यवमानाच्च नैव प्राच्छादयं मुखं॥
७ प्रभुना परमेशेन साहाय्यं क्रियते मम।
तस्माच्च कारणान्नैव लज्जायुक्तो भवाम्यहं॥
तस्माच्च कारणात् स्वास्यं कुर्व्वे ऽग्निप्रस्तरोपमं।
लज्जितो न भविष्यामीति चाभिज्ञायते मया॥
८ मदीयपुण्यनिर्णेता नेदिष्ठः पश्य विद्यते।
मया सार्द्धं विवादी कः स्थास्यावः सम्मुखे मिथः।
विचारे मद्विपक्षः कः स हि मामुपतिष्ठतु॥
९ प्रभुः परेश्वरः पश्य सहायो ऽस्ति मम स्वयं।
अतो मां दोषिणं कर्त्तुं समर्थः को जनो भवेत्॥
सर्व्वे ते वस्त्रवत् पश्य समवाप्स्यन्ति जीर्णतां।
सकलाश्च भविष्यन्ति वासोवत् कीटभक्षिताः॥
१० परमेश्वरतो भीतस्तद्दासस्य रवाश्रवः।
अन्धकारस्य मध्येन यो व्रजेद् दीप्तिवर्ज्जितः।
तादृशः को ऽपि युष्माकं मध्ये किं विद्यते जनः॥
परमेशस्य नामैव शरणं स प्रगच्छतु।
स स्वकीयेश्वरस्यैव विश्वासेनावलम्बतां॥
११ इदं वच्मि तु सर्व्वांस्तान् अनलं ज्वलयन्ति ये।
स्वान् कटिबन्धनेनेवाङ्गारेण वेष्टयन्ति च।
यूयं प्रविशत स्वाग्निमाङ्गारञ्च स्वदीपितं॥
मामकीनकराद् यूयमिदं भाग्यमवाप्स्यथ।
यन्त्रणायाः स्थले यूयं शयनं प्रकरिष्यथ॥

५१ एकपञ्चाशत्तमोऽध्यायः।

१ इब्राहीमो दृष्टान्तः ४ मनो निधातुं लोकानामाह्वानं ७ परित्राणकथनं ९ आश्वास-
कथनं १२ सान्त्वनाकथनं १७ विलापकथनं २१ रक्षणकथनञ्च।

आकर्णयत मद्वाक्यं यूयं धर्म्मानुधाविनः। १
सयत्नं परमेशस्य पर्य्यन्वेषणकारिणः॥
यन्मध्याद् यूयमुत्कृत्तास्तं शैलं परिपश्यत।
यत्कूपदरिता यूयम् उत्खातास्ताञ्च पश्यत॥
युष्माकं तात इब्राहीम् युष्माभिः समवेक्ष्यतां। २
जननी या च युष्माकं सारा साप्यवलोक्यतां॥
अहमेकाकिनं दृष्ट्वा तं समाहूतवान् पुरा।
दत्तवांश्चाशिषं तस्मै स्वयं तं वर्द्धयामि च॥
सीयोनं सान्त्वयन्नेतद् भाषते परमेश्वरः। ३
तदीयोच्छिन्नधामानि सकलानि च सान्त्वयन्॥
तदीयारण्यमेतेन स करोत्येदनोपमं।
तत्रत्यञ्च मरुस्थानम् ऐश्वरोद्यानसन्निभं॥
यस्मादवस्थितिं तत्र हर्षानन्दौ करिष्यतः।
स्तवो गानध्वनिश्चापि श्रोष्येते तत्र भूरिशः॥
मम वाक्ये मनोयोगं कुरुध्वं हे मम प्रजाः। ४
आकर्णयत मद्वाणीं हे मत्सम्बन्धिनो नराः॥
यस्मान्मत्तः समुत्पद्य शास्त्रं व्याप्स्यति मेदिनीं।
स्वीयनीतिञ्च जातीनां स्थापयिष्यामि दीपवत्॥
आसन्नो मम धर्म्मा ऽस्ति त्राणञ्चाभ्युदितं मम। ५
जातीनां शासनञ्चापि मद्बाहुभ्यां प्रसेत्स्यति।
आकाङ्क्षिष्यन्ति मां द्वीपा उद्क्ष्यन्ति च मद्भुजौ॥
ऊर्द्ध्वं व्योम निरीक्षध्वं नीचे भूमिञ्च पश्यत। ६
क्षेष्यते धूमवद् व्योम भू र्जरिष्यति वस्त्रवत्।
तथावच्च मरिष्यन्ति सकलास्तन्निवासिनः॥
यावदनन्तकालन्तु स्थिरं त्राणं मया कृतं।
मन्निरूपितधर्म्मश्च निर्व्विकारो भविष्यति॥
आकर्णयत मद्वाक्यं हे धर्म्मज्ञानिनो नराः। ७

हे लोकाः स्वीयचित्तेषु मदीयशास्त्रधारिणः॥
मर्त्त्यानां निन्दनाद् यूयं नैव साध्वसमाप्नुत।
नैव क्षुभ्यत वा तेषां तिरस्कारात् कथञ्चन॥
८ यतस्तान् वसनानीव कीटः सम्भक्षयिष्यति।
यतश्च मेषलोमेव कृमिस्तान् पर्य्यशिष्यति॥
यावदनन्तकालन्तु धर्म्मो मे स्थास्यति स्थिरः।
मत्कृतञ्च परित्राणम् आपौरुषपरम्परं॥
९ हे परेशस्य बाहो त्वं प्रजागृहि प्रजागृहि।
स्वकीयभूषणेनेव बलेनालङ्कृतो भव।
प्रजागृहि यथापूर्व्वं काले चाद्यन्तनां यथा॥
किं न त्वमेव बाहुः स येन राहव् प्रहारितः।
येन स स्थूलनागस्य क्षतजर्जरितो ऽभवत्॥
१० किं न त्वमेव बाहुः स सागरो येन शोषितः।
महार्णवस्य तोयानि येन विद्रावितानि च॥
मोचितानां मनुष्याणाम् अर्णवोत्तरणाय च।
येनागाधसमुद्रस्य तले राजपथः कृतः॥
११ नराः प्रत्यागमिष्यन्ति परमेशेन मोचिताः।
गीत्यायास्यन्ति सीयोनं ते ऽक्षयानन्दमौलयः।
प्राप्स्यतः सुखहर्षौ तान् क्लेशार्त्ती चापयास्यतः॥
१२ अहमेवाहमेवास्मि युष्मदीयप्रबोधकः।
कुतस्त्वं शङ्कसे मर्त्त्यात् स त्ववश्यं मरिष्यति।
कुतो वा नरसन्तानात् स तृणेन निमास्यते॥
१३ व्योम्नो विस्तारकर्त्ता यः पृथिव्याः स्थापकश्च यः।
त्वत्स्रष्टारं परेशं तं कुतो विस्मृतवानसि॥
ध्वंसनायोद्यतस्येव पीडकस्य च कोपतः।
कुतस्ते जायते त्रासः प्रतिघस्रं निरन्तरं।
पीडकस्य स कोपस्त्विदानीं कुत्र प्रकाशते॥
१४ काराबद्धो नरः कुब्जस्त्वरते मुक्तिप्राप्तये।
न मरिष्यति कूपे स नान्नाभावाद् विषत्स्यति॥
१५ अहञ्च स्वयमेवास्मि त्वत्प्रभुः परमेश्वरः।
मया प्रचोदिते सिन्धौ तस्य गर्ज्जन्ति वीचयः।

परेशो वाहिनीनाथ इति नाम ममास्ति च॥
मया स्वकीयवाचश्च तव वक्त्रे समर्पिताः। १६
त्वञ्च मदीयहस्तस्य छायायां छाद्यसे मया॥
वितनिष्यस्यतो व्योम स्थापयिष्यसि च क्षितिं।
त्वं मदीयप्रजासीति सीयोनञ्च गदिष्यसि॥
हे यिरूशालमुत्तिष्ठ प्रजागृहि प्रजागृहि। १७
परेशस्य करांल्लब्धे कंसे त्वं क्रोधमापिबः।
कम्पोत्पादककंसस्थं समलं मद्यमापिबः॥
पुत्राणां त्वत्प्रसूतानां नैकस्त्वच्चालने क्षमः। १८
त्वत्संवर्द्धितसूनूनां नैकस्त्वत्करधारणे॥
दुःखद्वयमुपैति त्वां त्वत्कृते कस्तु शोचति। १९
नाशभङ्गक्षुधाखड्गैः क्लिष्टा त्वं केन सान्त्व्यसे॥
त्वत्पुत्रा मूर्च्छिताः सन्ति सर्व्वशृङ्गाटकेषु च। २०
पतित्वा शेरते भूमौ जालबद्धा मृगा इव॥
पूर्णानि परमेशस्य क्रोधपात्राणि सन्ति ते।
पूर्णानि तावकेशस्य भर्त्सनाभाजनानि च॥
हे दुःखार्त्ते विना मद्यं मत्ते स्त्रि त्वमिदं शृणु॥ २१
भाषते भारतीमेतां त्वत्प्रभुः परमेश्वरः। २२
स्वप्रजानां निमित्तञ्चोत्तरवादीश्वरस्तव॥
कम्पोत्पादककंसं तं गृह्णामि त्वत्करादहं।
मद्यं मत्कोपकंसस्थं न पातव्यं त्वया पुनः॥
अर्पयिष्यामि तं कंसं त्वत्क्लेशदातॄणां करेष्वहं। २३
भुग्ना भवोत्तरिष्याम इति तै र्भाषिते यतः।
त्वया वर्त्मेव पान्थानां स्वपृष्ठं भूमिसात् कृतं॥

---

५२ द्विपञ्चाशत्तमोऽध्यायः।

१ समाजस्याह्वानं ३ रक्षायाः कथनं ७ सुसंवादप्रचारणकथनं ९ तेन सुखं ११ परित्राणं १३ ख्रीष्टमधि भाविवाक्यञ्च।

जागृहि जागृहि स्वोर्ज्जः परिधत्स्व च हे सियोन्। १
हे पुण्यपुरि यिरूशालम् धर स्वचारुभूषणं।

अच्छिन्नत्वगपूतस्त्वां पुन र्नैव प्रवेक्ष्यति ॥
२ धूलिं मृग्धि यिरूशालम् उत्थायोपविशासने।
वन्दिकुमारि सीयोंस्त्वं गलात् पाशान् विमोचय ॥
३ स्वयं परेश्वरो यस्माद् भाषते भारतीमिमां।
यथाकारि विनामूल्यं युष्माकं विक्रयः पुरा।
परिक्रयो विना रौप्यं पुनः कारिष्यते तथा ॥
४ प्रभुना परमेशेन यत एतन्निगद्यते।
प्रवस्तुं मिसरं देशम् आदौ जग्मु र्मम प्रजाः।
शेषकाले त्वशूरीयैः कृतस्तासामुपद्रवः ॥
५ मम किन्त्वत्र किं लभ्यम् इति ब्रूते परेश्वरः।
यतो देशान्तरं नीता विनामूल्यं मम प्रजाः ॥
क्रोशन्ति शासकास्तासामिति ब्रूते परेश्वरः।
ममापि निन्द्यते नाम प्रतिघस्रं निरन्तरं ॥
६ मम लोकास्ततो हेतोरभिज्ञास्यन्ति नाम मे।
मां पश्येति मयैवोचे तच्च ज्ञास्यन्ति ते तदा ॥
७ किं रम्यं भाति दूतस्य चरणद्वयमद्रिषु।
येन विज्ञाप्यते सन्धिः शुभवार्त्ता च दीयते।
परित्राणस्य संवादो नरेभ्यश्च निवेद्यते।
त्वदीशः कुरुते राज्यमिति येनोच्यते सियोन् ॥
८ अयं त्वद्रक्षिणां नाद उच्चनादं प्रकुर्व्वतां।
प्रगास्यन्त्येकयोगे ते यतस्तैः परमेश्वरः।
सीयोनं पुनरागच्छन् प्रत्यक्षो लक्षयिष्यते ॥
९ हे यिरूशालमाख्याया नगर्य्या निर्जनालयाः।
कुरुतोच्चध्वनिं यूयम् एकयोगे च गायत ॥
स्वयं परेश्वरो यस्मात् स्वप्रजाः सान्त्वयिष्यति।
स यिरूशालमस्यापि मुक्तिदाता भविष्यति ॥
१० सर्व्वदेशीयलोकानां प्रत्यक्षं परमेश्वरः।
स्वीयपवित्रबाहुञ्च कार्य्यायोच्छादयिष्यति ॥
तदानीं यत् परित्राणं कृतवानस्मदीश्वरः।
तत् परिद्रक्ष्यते सर्व्वैः पृथिवीप्रान्तवासिभिः ॥
११ यात यात वहि र्यात न किञ्चित् स्पृशताशुचि।

हे नराः परमेशस्य सामग्रीभारवाहिनः।
तस्या मध्याद्बहिर्यात कुरुध्वञ्चात्मनः शुचीन्॥
निष्क्रमः किन्तु युष्माकं न भविष्यति सत्वरः। १२
न पलायनयुक्ता वा युष्मद्यात्रा भविष्यति॥
यतो युष्माकमग्रे ऽग्रे परमेशः क्रमिष्यति।
इस्रायेलो य ईशः स युष्मत्पार्ष्णिर्भविष्यति॥
मदीयसेवकः पश्य ज्ञानाचारं करिष्यति। १३
तस्मात् स उन्नतो मान्यो ऽतीवोच्चश्च भविष्यति॥
नराद् विकृतवक्त्रं तं विरूपं मर्त्त्यपुत्रतः। १४
दृष्ट्वा तं प्रत्यनेकेषां चमत्कारो ऽभवद्यथा॥
तथैवानेकजातीयान् मनुष्यान् सो ऽभिषेक्ष्यति। १५
रुद्धवक्त्रा भविष्यन्ति भूपाला अपि तं प्रति॥
तेभ्यो यत् कथितं नासीत् तत् तै र्वीक्षिष्यते यतः।
यस्य तै र्न श्रुता वार्त्ता तच्च तैरनुभोत्स्यते॥

---

५३ त्रिपञ्चाशत्तमोऽध्यायः।

ख्रीष्टस्य नानादुःखानि तद्दुःखानां फलञ्च।

अस्मच्छ्रावितवार्त्तायां विश्वासं को विधत्तवान्। १
परमेशस्य बाहुर्वा कं प्रत्यभूत् प्रकाशितः॥
प्रारोहत् तस्य साक्षात् स यथा सुकोमलो ऽङ्कुरः। २
उत्पन्नं शुष्कभूमौ वा यथा पादपमूलकं॥
न श्रीस्तस्य न शोभासीत् अस्मदीक्षणकर्षिका।
नैवासीत् तस्य सौन्दर्य्यम् अस्मत्प्रीतिप्रवर्त्तकं॥
सो ऽवज्ञातो नृणामन्त्यो व्यथाभाजनमार्त्तिवित्। ३
मुखाच्छादीव चास्मत्तस्तुच्छो ऽस्माभिरनादृतः॥
सत्यमस्माकमेवार्त्तीः स गृहीत्वावहत् स्वयं। ४
अस्मदीयव्यथाभारं स चाधार्षीत् स्वभारवत्॥
निगृहीतो मनुष्यः स ईश्वरेण विताडितः।
अभिसन्तापितश्चेति बोधो ऽस्माकमजायत॥
अस्मदीयकुकृत्यानां कृते स जर्ज्जरीकृतः। ५

अस्मदीयापराधानां कृते पिष्टो ऽभवच्च सः॥
६ अस्मत्क्षेमप्रदा शास्तिस्तस्य मूर्धन्यवर्त्तत।
कषाघातैश्च तद्गात्रैरस्मत्स्वास्थ्यं प्रसिध्यति॥
मेषा इव वयं सर्व्वे भ्रान्ता भ्रमणकारिणः।
स्वकीयमार्गमेकैकः सम्मुखीकृत्य चाव्रजत्।
अस्मत्सर्व्वैनसाक्रान्तं तन्त्वकार्षीत् परेश्वरः॥
७ दण्डभोगे च कर्त्तव्ये क्लेशस्तेनाऽरीकृतः।
स स्वकीयमुखञ्चापि तत्र व्याहृतवान् नहि॥
नीयमानो वधस्थानं क्षुद्रमेषशिशुर्यथा।
लोमच्छेत्तुः समक्षं वा नीरवा मेषिका यथा।
तादृगेव निजं वक्त्रं सो ऽपि व्याहृतवान् नहि॥
८ उपद्रवाविचाराभ्यां स वधं प्रत्यकृष्यत।
तात्कालिकमनुष्याणां वर्णने को भवेत् क्षमः॥
जीवतां नीवृतो मध्यात् स उच्छिन्नो ऽभवद् यतः।
कारणं मम लोकानां पापं निग्रहमर्हतां॥
९ दुर्ज्जनैः सह तस्यासीत् शववासो निरूपितः।
धनिनः किन्तु सङ्गी स मृत्योः पश्चादजायत॥
तदीयाचरणं यस्माद् आसीद् दौरात्म्यवर्ज्जितं।
नैवाविद्यत वा तस्य वक्त्रे काचित् प्रवञ्चना॥
१० तं पेष्टुं निग्रहीतुञ्च परमेशस्त्वरोचयत्।
प्रायश्चित्ते ऽपराधानां तस्य प्राणैरनुष्ठिते।
वीक्षिष्यते स्ववंशं स दीर्घायुश्च भविष्यति।
परमेशस्य चाभीष्टं तत्करेण प्रसेत्स्यति॥
११ स्वीयप्राणपणाज्जातं फलं दृष्ट्वा स तर्प्स्यति।
आत्मज्ञानप्रदानेन पुण्यप्राप्तान् करिष्यति।
बहूनेव मनुष्यान् स पुण्यवान् सेवको मम।
अपराधांश्च तेषां स वक्ष्यति स्वीयभारवत्॥
१२ अतो ऽहं तं करिष्यामि महतां सहभागिनं।
स पराक्रमिभिः सार्द्धं लोप्त्रस्यांशी भविष्यति॥
कारणं मृत्युपर्य्यन्तं तेन प्राणव्ययः कृतः।
दुष्क्रियाकारिणां मध्य एकः स गणितो ऽभवत्॥

बहूनां पापभारञ्च तोलयित्वावहत् स्वयं।
पामराणां निमित्तञ्च कुरुते साध्यसाधनं॥

---

५४ चतुःपञ्चाशत्तमोऽध्यायः।

१ अन्यदेशीयजनैः समाजस्य वर्द्धनं ११ तस्य सौन्दर्य्यं सुखानि च।

हे बन्ध्ये प्रसवाज्ञाते त्वमानन्दध्वनिं कुरु। १
गर्भव्यथानभिज्ञाते उच्चै गाय मुदा नद॥
सधवाया अपत्येभ्यो निर्नाथाया यतस्तव।
सन्त्यनेकान्यपत्यानीति ब्रूते परमेश्वरः॥
स्थानं स्वकीयदूष्यस्य विशालीक्रियतां त्वया। २
शिविरस्य च वर्ध्यन्तां सर्व्वा यवनिकास्त्वया॥
मा भवेद् व्ययशङ्का ते सकला दूष्यरज्जवः।
त्वया दीर्घा विधीयन्तां दृढास्तत्कीलकास्तथा॥
यतः प्राप्स्यसि वृद्धिं त्वं वामदक्षिणपार्श्वयोः। ३
त्वत्सन्ताना हरिष्यन्ति चाधिकारं विदेशिनां।
वसतिञ्च करिष्यन्ति नरशून्यपुरेषु ते॥
मा बिभीहि यतो हेतो र्न भविष्यसि लज्जिता। ४
मा विषीद यतो हेतो र्न भविष्यसि वञ्चिता॥
स्वीययौवनकालस्य लज्जां त्वं विस्मरिष्यसि।
वैधव्यस्यापमानञ्च नैवानुचिन्तयिष्यसि॥
यतो यस्तावकस्रष्टा स एवास्ति पतिस्तव। ५
नामधेयञ्च तस्यास्ति सेनाध्यक्षः परेश्वरः॥
इस्रायेलः पवित्रो राट् स्वयं त्वन्मोचको ऽस्ति च।
कृत्स्नभूमण्डलस्येश इत्येव ख्यायते च सः॥
नारीमिव परित्यक्तां मनस्तापसमन्वितां। ६
यौवनात् पतिवर्त्तीं वा भार्य्यामिव निराकृतां।
आह्वयत् परमेशस्त्वामिति ब्रूते परेश्वरः॥
स्वल्पस्थायिनिमेषार्थं त्वं पर्य्यत्यज्यथा मया। ७
महाकरुणया किन्तु त्वं मयानुग्रहीष्यसे॥
क्रोधावेशात् क्षणैकार्थं त्वत्तः प्राच्छादयं मुखं। ८

नित्यस्थायिप्रसादेनानुकम्पे त्वान्त्वहं पुनः ।
भाषते भारतीमेतां मोचकस्ते परेश्वरः ॥
९ मत्साक्षादस्य दृष्टान्तं नोहीयतोयविप्लवः ।
धरा नोहीयतोयैस्तैः पुन र्नाप्लावयिष्यते ।
नरेभ्यः शपथेनैतत् प्रत्यश्रौषमहं यथा ॥
तथैव शपथं कृत्वा तुभ्यं प्रतिश्रुतोस्म्यहं ।
न क्रोत्स्यामि पुनस्तुभ्यं न त्वां क्षोप्स्यामि वा पुनः ॥
१० विचलन्त्यचला जातु प्रक्षुभ्यन्ति च पर्व्वताः ।
मदीयानुग्रहः किन्तु त्वत्तो न विचलिष्यति ॥
न वा क्षेमप्रतिज्ञा मे प्रक्षोभिष्यति कर्हिचित् ।
वक्तीदं परमेशः स यस्त्वां समनुकम्पते ॥
११ हे दीने वात्यया क्षुब्धे सान्त्वनापरिवर्ज्जिते ।
पश्याहं प्रणिधास्यामि सिन्दूरे प्रस्तरांस्तव ।
नीलमणींश्च दास्यामि त्वदीयभित्तिमूलवत् ॥
१२ निर्म्मास्ये पद्मरागैश्च प्रासादशिखराणि ते ।
त्वद्वाराणि करिष्यामि मणीन् मरीचिमालिनः ।
तव कृत्स्नाञ्च सीमानं रमणीयोपलावलिं ॥
१३ त्वत्सन्ताना भविष्यन्ति सर्व्वे परेशशिक्षिताः ।
परमा च ततः शान्तिस्त्वत्सुतानां भविष्यति ॥
१४ धर्म्मेणैव तदानीञ्च त्वं भविष्यसि सुस्थिरा ।
दौरात्म्यादतिदूरा च न भेतव्यं त्वया यतः ।
त्रासाद् दूरा यतस्तस्य त्वमगम्या भविष्यसि ॥
१५ पश्यारयः समेष्यन्ति मान्तु नाप्स्यन्ति सङ्गिनं ।
समेताः सकलास्ते च पतिष्यन्ति कृते तव ॥
१६ अङ्गारानलमुद्दीप्य तत्र स्वकीयकर्म्मणे ।
यः शिल्पी निर्म्मिमीते ऽस्त्रं सृष्टवानहमेव तं ।
तथा विनाशकञ्चापि ध्वंसार्थं सृष्टवानहं ॥
१७ निर्म्मितं त्वद्विरुद्धन्तु किञ्चनास्त्रं न सेत्स्यति ।
विचारे त्वद्विपक्षा च जिह्वा दोषीभविष्यति ॥
परमेशस्य दासानाम् अधिकारो ऽयमस्ति हि ।
पुण्यञ्चेदं मया दत्तम् इति ब्रूते परेश्वरः ॥

५५ पञ्चपञ्चाशत्तमोऽध्यायः।

१ प्रत्यावर्त्तनाय पापिनामाह्वानं ६ ईश्वरमन्वेष्टुम् आह्वानं १० तेन धर्म्मेण यत् सुखं तस्य वर्णनञ्च।

भो भो तृषातुराः सर्व्वे समायात जलान्तिकं। १
रौप्यहीनाः समायात भक्ष्यं क्रीत्वा च खादत।
मद्यं क्रीणीत दुग्धञ्च विना रौप्यं विना पणं॥
अभक्ष्यस्य कृते यूयं कुतो रौप्यं प्रयच्छथ। २
अतृप्तिकारिवस्त्वर्थं कुरुध्वे च कुतः श्रमं॥
मनो निधाय मद्वाक्यं यूयं संश्रोतुमर्हथ।
उत्तमान्येव भक्ष्याणि तदानीं भक्षयिष्यथ।
युष्मत्प्राणाश्च तर्प्स्यन्ति मांससारस्य भोगतः॥
यूयं समाहिता भूत्वा समायात मदन्तिकं। ३
आकर्णयत तेनैव सञ्जीविष्यति वो मनः॥
नियमञ्च मया कृत्वा युष्माभिः सह शाश्वतं।
अवश्यम्भावि दायूदः कल्याणं साधयिष्यते॥
पश्चाहं बहुलोकानां साक्षिणं तं नियुक्तवान्। ४
कृतवांस्तञ्च जातीनां नायकं विधिदायकं॥
यां जातिं त्वं न जानासि सा समाक्रास्यते त्वया। ५
या च त्वां नहि जानाति सा द्रोष्यति त्वदन्तिकं॥
हेतुरस्य परेशो ऽस्ति तावकीनेश्वरः स्वयं।
इस्रायेलः पवित्रो राट् यतस्त्वं तेन शोभितः॥
प्राप्तिकाले ऽनतिक्रान्ते मृगयध्वं परेश्वरं। ६
तस्य नैकट्यकाले च तमाह्वयत यत्नतः॥
स्वमार्गं दुर्जनस्त्यक्त्वा दुरात्मा स्वीयकल्पनाः। ७
परेशं प्रत्युपायातु सो ऽनुकम्पिष्यते च तं।
प्रत्यायात्वस्मदीशञ्च भूरिशः स क्षमिष्यते॥
युष्माकं कल्पना यस्मात् न सन्ति कल्पना मम। ८
मन्मार्गाश्च न वो मार्गा इति ब्रूते परेश्वरः॥
भूमितः किन्तु यत्युच्चं भात्यदो व्योममण्डलं। ९
मार्गा मे सन्ति युष्माकं मार्गेभ्यस्तति प्रांशवः।

युष्माकं कल्पनाभ्यश्च तत्युच्चा मम कल्पनाः॥
१० वृष्टिवारि हिमं वापि पतित्वा व्योमतो यथा।
नैव गच्छति तद् व्योम पुनर्व्वारं कदाचन॥
आर्द्रीकृत्योर्व्वरान्तूर्व्वीं करोत्यङ्कुरभूषितां।
वापकाय च वीजानि भोक्त्रे भक्ष्यञ्च यच्छति॥
११ मद्वक्त्रान्निर्गतं वाक्यं तादृगेव भविष्यति।
निष्फलं तत् पुनर्व्वारं नागमिष्यति मां प्रति॥
तत् किन्तु मामकाभीष्टम् अवश्यं साधयिष्यति।
यत्कृते प्रेरितं तच्च कृतार्थञ्च भविष्यति॥
१२ प्रस्थास्यथ मुदा यूयं शान्तिं प्राप्याग्रगामिनीं।
युष्मदग्रे प्रगास्यन्ति शैलाः सहोपपर्व्वतैः।
करतालं करिष्यन्ति चोचस्थाः सकला द्रुमाः॥
१३ कण्टकिनस्तरोः स्थाने देवदारु प्ररोक्ष्यति।
गोक्षुरस्य स्थले चापि मेन्धीवृक्षो जनिष्यते॥
एतच्च परमेशस्य कृते ख्यातिप्रवर्द्धकं।
अलोप्यं नित्यसंस्थायि लक्षणञ्च भविष्यति॥

---

५६ षट्पञ्चाशत्तमोऽध्यायः।

१ धर्म्मकर्म्म कर्त्तुं विनयः तस्य फलं ९ अन्धरक्षकाणां भर्त्सनञ्च।

१ भाषते भारतीमेतां स्वयमेव परेश्वरः।
यूयमाचरत न्यायं कुरुध्वं धर्म्मसेवनं॥
मया निरूपितं त्राणं यस्मादागन्तुमुद्यतं।
मद्धर्म्मस्य प्रकाशस्य न विलम्बिष्यते चिरं॥
२ धन्यं वच्मि मनुष्यं तं कार्य्यमेतत् करोति यः।
धन्यं तं नरसन्तानं यस्तत्रासज्यते दृढं॥
यो विश्रामदिनं रक्षन् न लङ्घयति कर्हिचित्।
रक्षन् स्वीयकरं काञ्चिन्न करोति च दुष्क्रियां॥
३ परमेशः स्वलोकेभ्यो मां पृथक् कृतवानिति।
नोच्यतां परवंशेन परमेशावलम्बिना।
पश्याहं शुष्कवृक्षोऽस्मीति षण्ढेनापि नोच्यतां॥

स्वयं यत इदं वाक्यं भाषते परमेश्वरः। ४
मम विश्रामवारान् ये यत्ना रक्षन्ति यत्नतः।
ममाभीष्टे च तुष्यन्ति रक्षन्तो नियमं मम॥
पुत्त्रपुत्त्रीगणाच्छ्रेष्ठम् अधिकारञ्च नाम च। ५
तेभ्यो दास्यामि मद्धाम्नि मत्प्राचीरस्य चान्तरे।
अलोप्यमेव नामाहं तेभ्यो दास्यामि शाश्वतं॥
परमेश्वर आसक्ता ये विदेशिकुलोद्भवाः। ६
सेवनं तस्य कुर्व्वन्ति परमेशस्य नाम्नि च।
प्रेमाणमनुतिष्ठन्ति दासास्तस्य भवन्ति च॥
ये च विश्रामवारस्य लङ्घने साध्वसान्विताः।
तं पालयन्ति यत्नेन रक्षन्तो नियमं मम॥
प्रापयिष्यामि तान् सर्व्वान् पवित्रं मम पर्व्वतं। ७
करिष्यामि च तान् हृष्टान् मदीयप्रार्थनागृहे॥
प्रियं भास्यति मद्वेद्यां तेषां होमादियाजनं।
ख्यास्यते सर्व्वजातीनां प्रार्थनाधाम मद्गृहं॥
इस्रायेलो विकीर्णानां न्दणां सङ्ग्रहकारिणा। ८
प्रभुना परमेशेन वाक्यमेतन्निगद्यते।
अधिकान् सङ्ग्रहीष्यामि तस्यैकत्रीकृतान् प्रति॥
सर्व्वे यूयं समायात हे क्षेत्रस्थजन्तवः। ९
भक्षणार्थं समायात हे सर्व्वे वन्यजीविनः॥
पालकास्तस्य सर्व्वे ऽन्धा नहि जानन्ति किञ्चन। १०
भान्ति ते सकलाः श्वानो मूका भषितुमक्षमाः।
स्वप्नदृशः शयानाश्च निद्रावस्थाभिलाषिणः॥
बह्वाशिनस्तु ते श्वानस्तैश्च तृप्ति र्न बुध्यते। ११
पालकाः सकलास्ते च न जानन्ति विवेचनां।
स्वमार्गाभिमुखो लोभाद् एकैकश्चेष्टते पृथक्॥
एको ब्रूते समायात मद्यमानेष्यते मया। १२
तत् पीबन्तो वयं सर्व्वे भविष्यामो मदोद्धताः॥
अद्य यथा तथा श्वो ऽपि पुनर्व्वारं भविष्यति।
सुमहान् वर्णनातीत उत्सवः स भविष्यति॥

५७ सप्तपञ्चाशत्तमोऽध्यायः ।

१ धार्म्मिकाणां लोकानां मङ्गलं ३ यिहूदीयानां दुष्टता १५ नम्रलोकानां रक्षणञ्च ।

१ गच्छन्ति धार्म्मिका लोपं न चिन्तयति को ऽपि तत् ।
पुण्यवन्तो ऽपनीयन्ते को ऽपीदन्तु न बुध्यते ।
यद् भाव्यमङ्गलस्याग्रे धर्म्मशीलो ऽपनीयते ॥
२ शान्तिं यान्ति स्वशय्यासु विश्रान्ता ऋजुगामिनः ॥
३ उपतिष्ठत यूयन्तु गणिकायाः स्त्रियः सुताः ।
पारदारिकतातेन वेश्यायां जनिताः प्रजाः ॥
४ विरुद्धं कस्य युष्माभिः परिहासो विधीयते ।
विरुद्धं कस्य जिह्वा च व्यादितास्यैः प्रसार्य्यते ।
किं न पापात्मजा यूयम् अनृतस्य च सूनवः ॥
५ अधस्तात् सकलानां हि हरिद्वर्णपलाशिनां ।
यूयं कामेन दह्यध्वे देवानामनुरागतः ॥
व्यापादयथ यूयञ्च बालकान् निम्नभूमिषु ।
विदीर्णपर्व्वतस्थानां कन्दराणां तलेषु वा ॥
६ दरीस्थाः स्निग्धपाषाणास्त्वदीयांशा भवन्ति हि ।
ते ते सन्त्यधिकाराश्च तव हे खलसन्तते ॥
तेभ्यस्त्वं पेयनैवेद्यं भक्ष्यञ्चापि प्रयच्छसि ।
तव तादृश आचारे तोष्टुं शक्नोम्यहं कथं ॥
७ उच्चे प्रांशुगिरेः शृङ्गे शय्या विस्तारिता त्वया ।
बलिं तत्र प्रदातुं त्वं तञ्चारूढवती गिरिं ॥
८ पश्चाच्छिलाकपाटाभ्यां स्वीयमस्थापयः स्मरं ।
मदन्यस्य च भोगार्थं त्वमत्याक्षी निजाम्बरं ॥
स्वीयशय्याञ्च विस्तार्य्य त्वं समारूढवत्यसि ।
तेभ्यः प्राप्यां भृतिञ्चाधि नियमो निश्चितस्त्वया ।
९ सम्भोगे प्रीयसे तेषां तत्स्थानञ्च न्यरूपयः ॥
तैलाक्ताभ्यगमो भूपं प्राचुर्य्येणाधिवासिता ।
स्वदूतान् प्रैषयो दूरं नरकञ्चाप्यवातरः ॥
१० श्रान्तापि दीर्घमार्गात्तु भयाशास्तीति नावदः ।
नाडीमबुध्यथाः प्राणवत्क्लान्ता चाभवस्ततः ॥

कस्मात् सन्त्रस्य भीता त्वं मृषावाक्यानि भाषसे। ११
नानुचिन्तयसि त्वं मां न निधत्से मनो मयि।
किं न चिरादहं मौनी नास्ति मत्तो भयं तव॥
अहन्तु ज्ञापयिष्यामि त्वद्धर्म्मस्य गुणागुणं। १२
त्वत्कृतानि च कर्म्माणि त्वं तै र्नोपकरिष्यसे॥
कुर्व्वन्तीमार्त्तरावं त्वां रक्षेत् त्वद्देवसंहतिः। १३
वायु र्नेष्यति सर्व्वांस्तान् श्वासश्चोपहरिष्यति॥
मान्तु यः श्रद्धधानः स देशस्यांशी भविष्यति।
पवित्रे मम शैले च सो ऽधिकारमवाप्स्यति॥
खन्यतां खन्यतां भूमिः समाना क्रियतां हृतिः। १४
मज्जातीयनृणां मार्गात् सर्व्वविघ्नो ऽपनीयतां।
ईदृशीं भारतीं कश्चित् तदानीञ्च गदिष्यति॥
नित्यता वसति यस्य पवित्र इति नाम च। १५
उच्चः सर्व्वोपरिस्थः स वाक्यमेतत् प्रभाषते॥
ऊर्द्ध्वस्थाने पवित्रे च निलये निवसाम्यहं।
मनुष्यस्यापि चूर्णस्य नम्रात्मनश्च सन्निधौ॥
यतो ऽहं नम्रशीलानां सञ्जीवयितुमात्मनः।
सञ्चूर्णानाञ्च चित्तानि पुन र्जीवयितुं यते॥
न नित्यं विवदिष्ये ऽहं न वा क्रोत्स्यामि सर्व्वदा। १६
आत्मा प्राणाश्च मत्सृष्टा मूर्च्छेयु र्मत्पुरः कुतः॥
लोभादिदोषतस्तस्मै क्रुद्धा कुप्यामि संहतः। १७
स्वचित्तस्येष्टमार्गेण स तु याति पराङ्मुखः॥
गतिं पश्याम्यहं तस्य विधास्ये तस्य सुस्थतां। १८
तं नयन् सान्त्वयिष्यामि सह तच्छोकिभिः पुनः।
शान्तिः स्यान्निकटस्थानां शान्तिः स्याद्दूरवर्त्तिनां। १९
एतान्युत्पादयिष्यामि वाक्फलान्योष्ठयोरहं।
तच्च स्वस्थं करिष्यामीति ब्रूते परमेश्वरः॥
दुर्जनास्तु समुद्रस्य तुल्याः क्षुब्धोर्म्मिमालिनः। २०
शान्ततां समवाप्तुं स न शक्नोति कथञ्चन।
उद्गिरष्येते तरङ्गैश्च तस्य जम्बालकर्द्दमौ॥
नास्ति दुरात्मनां शान्तिरिति ब्रूते मदीश्वरः॥ २१

५८ अष्टपञ्चाशत्तमोऽध्यायः।

१ यिहूदिलोकानां कापट्यस्य भर्त्सनम् उपवासस्य निर्णयः ८ धर्म्मकर्म्मणः फलं १३ विश्रामवारपालनस्य फलं।

१ घोषय व्यक्तवक्त्रेण माकार्षीः शब्दसंयमं।
तूरीध्वनिवदुच्चैश्च स्वीयकण्ठध्वनिं कुरु॥
मत्प्रजानामधर्म्मञ्च तासां साक्षात् प्रकाशय।
याकूबीयकुलायापि तस्य पापानि दर्शय॥
२ मामन्विच्छन्ति ते नित्यं ज्ञातुं तुष्यन्ति मत्पथान्।
धर्म्माचारा यथा जातिरत्यक्तेश्वरशासना।
ते मां पृच्छन्ति धर्म्माज्ञास्तुष्यन्तीशस्य सङ्गमे॥
३ उपवासं यदा कुर्म्मस्तदा त्वं तन्न पश्यसि।
तापयामो यदा प्राणांस्तदा त्वं तन्न मन्यसे।
एतस्य कारणं किं स्यादिति वाचं वदन्ति ते॥
स्वोपवासदिने यूयम् अनुगच्छथ कौतुकं।
अभिद्रोहं कुरुध्वे च स्वीयकर्म्मकरान् प्रति॥
४ कलहं कर्त्तुमाकांक्ष्य विवादश्च परस्परं।
पापमुष्ट्या प्रहर्त्तुञ्च युष्माभिः समुपोष्यते॥
युष्माकं प्रार्थनाशब्द ऊर्द्ध्वगामी भवेद् यथा।
उपवासो दिने तस्मिंस्तादृशः क्रियते नहि॥
५ प्रियो ममोपवासो यः स किमेतादृशो भवेत्।
नर एकं दिनं यावत् प्राणान् यत् परितापयेत्।
नलवन्नमयन् शीर्षं शयानः शाणभस्मनोः।
एषः किमुपवासः स्याद् ग्राह्यमीशस्य वा दिनं॥
६ प्रियो ममोपवासो यः स किमेतादृशो नहि।
छेदनं द्रोहपाशानां मोचनं युगकीलयोः॥
मोचयित्वा च युष्माभिस्ताडितानां विसर्ज्जनं।
सर्व्वदास्ययुगस्यापि भञ्जनं शतखण्डशः॥
७ किं नैतद् यन्निजान्नस्य कुर्य्याः क्षुधार्त्तसंशिनं।
दरिद्रांश्च जनान् भ्रान्तान् स्वगृहं यत् समानयेः।
वीक्ष्य नग्नमनुष्यञ्च वाससा परिवेष्टयेः॥
स्वजातीयमनुष्याच्च साहाय्यं नोपसंहरेः॥

अरुणोदयवत् तर्हि तव तेज उदेष्यति । ८
तदा शीघ्रं तव स्वास्थ्यं विकसिष्यति पुष्पवत् ॥
तदा तावकपुण्यञ्च भविष्यत्यग्रगामि ते ।
त्वदीयेशस्य तेजश्च तव पार्ष्णिर्भविष्यति ॥
तदा प्रार्थयमानं त्वां परेशो ऽनुग्रहीष्यति । ९
कृते त्वयार्त्तनादे च सो ऽत्रास्मीति वदिष्यति ॥
तव किन्तूचितं यत् त्वं स्वमध्याद् दवये युगं ।
निन्दकाङ्गुलिनिर्द्देशम् अधर्म्मस्य च भाषणं ॥
क्षीयचित्ते क्षुधार्त्ताय यदि त्वं वितरेः स्वकं । १०
प्राणान् दुःखिमनुष्यस्य यदि त्वं परितर्पयेः ॥
तदानीं तावकालोकस्तमिस्रे ऽप्युज्ज्वलिष्यति ।
मध्याह्नस्य समानञ्च तव ध्वान्तं भविष्यति ॥
नित्यं परेश्वरस्तुभ्यं पन्थानं दर्शयिष्यति । ११
तर्पयिष्यति प्राणांस्ते शुष्केष्वपि स्थलेषु सः ।
अस्थीनि तावकीनानि सम्यक् चाप्याययिष्यति ॥
उद्यानस्य सुसिक्तस्य सदृशस्त्वं भविष्यसि ।
यस्य न वञ्चयन्त्यापस्तस्य जलाकरस्य वा ॥
चिराद् भग्नानि धामानि निर्म्मास्यन्ति तव प्रजाः । १२
अतिप्राचीनप्रासादान् त्वं पुनः स्थापयिष्यसि ॥
भङ्गपूरक इत्येव तव नाम भविष्यति ।
वसत्यर्थं पुराणानां पथां शोधक इत्यपि ॥
निजपादौ निवर्त्त्य त्वं विश्रामवारलङ्घनात् । १३
निजाभीष्टं न कुर्य्याश्चेत् पवित्रे दिवसे मम ॥
यदि विश्रामवारञ्च कीर्त्तयेः सुखदायिनं ।
पवित्रं परमेशस्य दिनं वदेः सगौरवं ॥
गमनं स्वीयमार्गेण स्वसुखस्यानुधावनं ।
जल्पनञ्च परित्यज्य मन्येथा यदि तद्दिनं ॥
तुभ्यं सुखप्रदं तर्हि लप्स्यसे परमेश्वरं । १४
उच्चस्थानेषु मह्यास्त्वां वाहयिष्याम्यहं रथैः ॥
त्वां त्वत्तातस्य याकूबो भोजयिष्याम्यहं भुवं ।
यतो मुखं परेशस्य वाक्यमेतत् प्रभाषते ॥

५९ ऊनषष्टितमोऽध्यायः।

१ पापस्य कथनं तस्य फलं १६ केवलेनेश्वरेण पापाद् रक्षणञ्च।

१ न ह्रस्वोऽभूत् परेशस्य हस्तो न त्रातुमक्षमः।
नाभूद् वा विकलं तस्य श्रोत्रं न श्रोतुमक्षमं॥
२ युष्मद्दोषा वियुञ्जन्ति युष्मान् युष्माकमीश्वरात्।
न शृणोति स पापै र्वा युष्मत्तो विमुखीकृतः॥
३ लिप्तौ रक्तेन हस्तौ वो युष्मदङ्गुलयोऽङ्गसा।
युष्मदोष्ठौ मृषावाचौ युष्मज्जिह्वाघभाषिणी॥
४ धर्म्मप्रचारको नास्ति नास्ति न्याय्यविचारकः।
मायां सर्व्वेऽवलम्बन्ते प्रभाषन्ते च दुष्टतां।
दौरात्म्येन सगर्भास्ते प्रसवन्ति प्रतारणां॥
५ स्फोटयन्त्युरगाण्डानि लूताजालं वयन्ति च।
तेषामण्डानि योऽश्नाति प्राणत्यागं करोति सः।
यच्चाण्डं स्फोट्यते तस्य मध्यादुत्पद्यते फणी॥
६ तेषामूतानि जालानि नोपयुक्तानि वाससे।
न स्वाङ्गं वेष्टयिष्यन्ति ते स्वनिर्म्मितवस्तुभिः॥
तेषां कर्म्माणि सर्व्वाणि पापकर्म्माणि सन्ति हि।
दौरात्म्यस्य क्रिया तेषां हस्तयोरवतिष्ठते॥
७ सत्वरं चरणौ तेषाम् अपकाराय धावतः।
शुचेश्च रक्तपाताय भवतो द्रुतगामिनौ॥
सकलाः कल्पनास्तेषां सन्ति पातककल्पनाः।
क्लेशो नाशश्च विद्येते तेषां सकलवर्त्मसु॥
८ न विदुः शान्तिमार्गं ते नास्ति तेषां गतौ नयः।
सन्ति तेषाञ्च वर्त्मानि वक्रीकृतानि तैः स्वयं।
तत्र गच्छति यः कश्चित् स शान्तिं नावगच्छति॥
९ एतस्मात् कारणान्न्यायोऽस्मत्तो दूरेऽवतिष्ठते।
अस्माकं सन्निधौ धर्म्म उपस्थातुमपारकः॥
दीप्तिं प्रतीक्षमाणेष्वस्मासु ध्वान्तं विदृश्यते।
प्रभां प्रतीक्ष्य चास्माभि र्भ्रम्यते हि तमिस्रके॥
अन्धा यथा वयं कुड्यं परीस्पृक्ष्यामहे तथा।

परीस्पृश्यामहे हस्तै र्नेत्रहीना नरा इव ॥
प्रस्खलामश्च मध्याह्ने सन्ध्यायाः समये यथा। १०
स्थानेष्वालोकहीनेषु प्रमीता वा नरा यथा ॥
भल्लूकाश्च यथा तद्वद् गर्ज्जामः सकला वयं। ११
कपोता इव कुर्म्मश्च शोकजन्यं कलध्वनिं ॥
सम्प्रतीक्षामहे धर्म्मं स तु नैवोपतिष्ठति।
सम्प्रतीक्षामहे त्राणं तत् तु दूरे वितिष्ठते ॥
तव साक्षाद् यतो ऽस्माकम् अपराधाः सुभूरयः। १२
साक्ष्यमस्मद्विरुद्धञ्चास्माकं पापैश्च दीयते ॥
अपराधा यतो ऽस्माकं सन्त्यस्मज्ज्ञानगोचरे।
अवबुध्यामहे सम्यक् स्वीयाधर्म्मक्रिया वयं ॥
परेशस्यापराध्यन्ति सर्व्वे मिथ्या वदन्ति च। १३
सकलाश्च निवर्त्तन्ते अस्मदीशात् पराङ्मुखाः।
दौरात्म्यं सत्यमार्गाच्च भ्रमणं कथयन्ति ते।
चित्तेनानृतवाचश्च सन्धृत्य चिन्तयन्ति ते ॥
पृष्ठतः क्रियते न्यायो धर्म्मो दूरे ऽवतिष्ठते। १४
विचारस्य स्थले यस्मात् स्खलन्ती भाति सत्यता।
सम्प्रवेष्टुञ्च तत् स्थानं न शक्नोति यथार्थता ॥
सत्यता दुर्लभा जाता पापत्यागी च मुष्यते। १५
तद् विलोक्य नयाभावं नामर्षीत् परमेश्वरः ॥
पुरुषः को ऽपि नास्तीति स यदा प्रसमैक्षत। १६
मध्यस्थस्य तदाभावाद् अभवत् स चमत्कृतः।
बाहुरत्रास्त तस्यैव स्वधर्म्मस्तमधारयत् ॥
गृहीत्वा वर्म्मवद् धर्म्मं परित्राणं शिरस्त्रवत्। १७
स प्रतीकारवस्त्राण्यकार्षीत् स्वीयपरिच्छदं।
प्रावारमिव योद्धुश्च जिगीषां पर्य्यधत्त सः ॥
यस्य यादृक् क्रिया तस्मै तादृक् फलं स दास्यति। १८
कोपाग्निं स्वीयशत्रुभ्यः स्वारिभ्यश्चोचितं फलं।
द्वीपवर्गनिवासिभ्यः स दास्यत्युचितं फलं ॥
वित्रसिष्यन्ति पाश्चात्याः परमेशस्य नामतः। १९
सूर्य्योदयप्रदेशस्था भेष्यन्ति तत्प्रतापतः ॥

यद्य स्रोतस्वतीतुल्यः परिपन्थ्याक्रमिष्यति।
तं प्रत्यात्मा परेशस्य ध्वजमुत्थापयिष्यति॥
२० सीयोने मुक्तिदातैकस्तदानीमागमिष्यति।
याकूबो ये जनाः सर्व्वे परावृत्ता अधर्म्मतः।
तेभ्यो दास्यति मुक्तिं स इति ब्रूते परेश्वरः॥
२१ पुनर्व्वारमिदं वाक्यं भाषते परमेश्वरः।
नियमस्तै र्जनैः सार्द्धं मयाकारि स ईदृशः॥
त्वामधिष्ठित आत्मा मे मद्वाचस्त्वन्मुखेऽर्पिताः।
न भ्रंशिष्यन्ति वक्त्रात् ते न त्वद्वंशस्य वक्त्रतः।
न तद्वंशस्य वा वक्त्राद् अद्यावधि कदाचन।
भाषते भारतीमेतां स्वयमेव परेश्वरः॥

---

६० षष्टितमोऽध्यायः।

१ अन्यदेशीयै र्मण्डल्या वृद्धिः ८ स्वल्पकालदुःखभोगानन्तरं तस्याः सुखं।

१ त्वमुत्तिष्ठ प्रभासस्व समायाति तव प्रभा।
प्रतापश्च परेशस्य त्वामभ्युदेतुमुद्यतः॥
२ अन्धकारो यतः पश्य प्रच्छादयति मेदिनीं।
मनुष्याः परदेशीयाश्छाद्यन्ते तिमिरेण च॥
अभ्युदेष्यति किन्तु त्वां स्वयमेव परेश्वरः।
सम्प्रकाशिष्यते तस्य प्रतापस्त्वामधिष्ठितः॥
३ त्वद्दीप्त्या परदेशीयाः करिष्यन्ति गमागमौ।
राजानश्च व्रजिष्यन्ति त्वत्प्रभोदयतेजसा॥
४ उन्मील्य निजनेत्रे त्वं निरीक्षस्व चतुर्द्दिशः।
एकत्रीभूय सर्व्वे ते समायान्ति त्वदन्तिकं।
दूरादायान्ति पुत्रास्ते पुत्र्यश्च धारिताः कटौ॥
५ तदानीं तत् समालोक्य त्वं प्रफुल्ला भविष्यसि।
तवान्तःकरणं कम्पं विकाशञ्च गमिष्यति॥
यतः सामुद्रिकैश्वर्य्यं त्वां प्रत्यावर्त्तयिष्यते।
अन्यजातीयलोकानां तेजस्त्वाञ्चाश्रयिष्यति॥
६ बाहुल्येन क्रमेलानां त्वं भविष्यस्यभिप्लुता।

मिदियनैफयोरेव करभैर्द्रुतगामिभिः ॥
शिवाख्यदेशतः सर्व्वे उपस्थास्यन्ति मानवाः।
आनेष्यन्ति च ते स्वर्णं तेन सार्द्धञ्च कुन्दुरुं।
सानन्दं परमेशस्य कीर्त्तयिष्यन्ति च स्तवान् ॥
सकलाः सङ्ग्रहीष्यन्ते केदरस्था अजास्त्वयि। ७
निवायोतीयमेषैश्च सेवा कारिष्यते तव ॥
ते मयानुग्रहीष्यन्ते मम वेद्यां समुत्थिताः।
मम शोभानिवासश्च मया संशोभयिष्यते ॥
मेघानां डीयमानानां समाः के प्रतिभान्त्यमी। ८
पततां वा कपोतानां स्वविटङ्कगृहं प्रति ॥
यतो मां सम्प्रतीक्षन्ते नरा द्वीपनिवासिनः। ९
अग्रगाः सन्ति तेषाञ्च पोतास्तार्शीशगामिनः।
स्वर्णरौप्यैः समं दूराद् आनेष्यन्तस्तवात्मजान् ॥
त्वत्प्रभोः परमेशस्य कृते तत् ख्यातिवर्द्धकं।
इस्रायेलः पवित्रो राट् त्वां संशोभितवानिति।
तस्मै प्रमाणदश्चापि तदवश्यं भविष्यति ॥
निर्म्मास्यन्ति च प्राचीरं तव भिन्नकुलोद्भवाः। १०
भविष्यन्ति च राजानस्तेषां त्वत्परिचारकाः ॥
यतोऽहं निजकोपेन त्वां प्रहारितवान् यथा।
तथा निजप्रसादेन करिष्यामि कृपां त्वयि ॥
अवस्थास्यन्ति मुक्तानि तव द्वाराणि सर्व्वदा। ११
न दिवा न निशायां वा रोत्स्यन्ते तानि कर्हिचित्।
ऐश्वर्य्यं भिन्नजातीनाम् आनेतव्यं तवान्तिकं।
तासाञ्च ससमारोहा आनेतव्या नरेश्वराः ॥
या त्वां न सेवते जातिर्नीवृद् वा सा विनंक्ष्यति। १२
भिन्नजातीयलोकाश्च धक्ष्यन्ते शापवह्निना ॥
देवदारूणि तीधारास्ताशूराश्च महीरुहाः। १३
सर्व्वमेव लिवानोनस्तेजस्त्वामागमिष्यति ॥
मदीयधर्म्मधाम्नश्च स्थानं शोभिष्यते ततः।
मदीयपादयोः स्थानं मान्यं कारिष्यते मया।
नतास्त्वत्पीडकानां त्वामुपस्थास्यन्ति चात्मजाः। १४

सर्व्वे स्वीयशिरोभिश्च स्पृष्ट्वा त्वत्पादयोस्तलं।
तुभ्यं नमस्करिष्यन्ति तव गर्हणाकारिणः॥
त्वञ्च तैः परमेशस्य पुरीति ख्यास्यसे तदा।
इस्रायेलः पवित्रस्य राज्ञः सीयोनमित्यपि॥
१५ व्यक्ता त्वं गर्हिता चासीः को ऽपि त्वयाव्रजन्नहि।
त्वां किन्त्वहं करिष्यामि नित्यगौरवभाजनं।
पुत्रपौत्रादिवंशानां परमानन्दकारणं॥
१६ भिन्नजातीयलोकानां दुग्धं चूषिष्यते त्वया।
भूपालानां स्तनाभ्याञ्च त्वया पायिष्यते पयः॥
त्वञ्च ज्ञास्यसि यत् त्राता तवास्म्यहं परेश्वरः।
याकूबो बलदाताहं यच्चास्मि तव मोचकः॥
१७ सुवर्णमारकूटस्य स्थान आनेष्यते मया।
लोहस्य परिवर्त्तन रौप्यमानेष्यते मया।
आरकूटस्य काष्ठानाम् आयसञ्चाश्मनां स्थले॥
अहं शान्तिस्वरूपांश्च विधास्ये तव पालकान्।
त्वयि धर्म्मस्वरूपांश्च नियोक्ष्याम्यनुशासकान्॥
१८ तव देशे प्रमाथस्य वार्त्ता न श्रोष्यते पुनः।
न ध्वंसस्य न भङ्गस्य वार्त्ता वा तव सीमनि॥
त्वत्प्राचीरस्य नाम त्वं परित्राणं करिष्यसि।
नाम स्वगोपुराणाञ्च प्रशंसेति विधास्यसि॥
१९ न भविष्यत्यसौ सूर्य्यो दीप्तिदाता दिवा तव।
न ज्योत्स्नार्थमसौ चन्द्रस्त्वां पुन र्द्योतयिष्यति॥
स्वयं परेश्वरः किन्तु दीपः सनातनस्तव।
स्वयञ्च तावकीनेशस्तव शोभा भविष्यति॥
२० नैव त्वदीयसूर्य्यः स पुनरस्तं गमिष्यति।
नैव त्वदीयचन्द्रो वा क्षीणतेजा भविष्यति॥
तव सनातनो दीपः परमेशो भविष्यति।
समाप्तानि भविष्यन्ति तव शोकदिनानि च॥
२१ धार्म्मिकाश्च भविष्यन्ति सकलास्तावकप्रजाः।
अधिकारञ्च देशस्य ता भोक्ष्यन्ते निरन्तरं॥
रोपिता मामकोद्याने पल्लवाः प्रतिभान्ति ते।

मल्कराभ्यां कृतं कर्म्म मत्प्रतापप्रकाशकं ॥
यः चोदिष्ठः स वर्द्धित्वा सहस्री सम्भविष्यति । ११
कनिष्ठश्च पराक्रान्ता जातिरेका भविष्यति ।
तूर्णं तत् साधयिष्यामि स्वकालेऽहं परेश्वरः ॥

---

६१ एकषष्टितमोऽध्यायः।

१ खीष्टस्य कर्म्मणो वर्णनं ४ तस्य फलं १० धार्म्मिकाणां सुखञ्च।

प्रभोः परेश्वरस्यात्मा स्वयं मामधितिष्ठति । १
नम्रशीलमनुष्येषु शुभवार्त्ताप्रचारणे ।
यतो ममाभिषेकं स कृतवान् परमेश्वरः ॥
स मां प्रेषितवान् एनाम् आज्ञां मह्यञ्च दत्तवान्।
यन्नृणां भग्नचित्तानां सम्बध्नीयां क्षतान्यहं ॥
घोषयेयञ्च यन्मुक्तिं दूरदेशप्रवासिनां । २
कारावद्धनराणाञ्च काराद्वारस्य मोचनं ॥
घोषयेयं परेशस्य प्रसादावहवत्सरं ।
अस्मदीयेश्वरस्यापि प्रतीकारदिनं तथा ।
सान्त्वयेयञ्च यत् सर्व्वान् नरान् शोकार्त्तमानसान् ॥
सीयोनि ये च शोकार्त्तास्तान् कुर्य्यामुपशोभितान्। ३
वितरेयञ्च यत् तेभ्यो भूषणं भस्मनः स्थले ।
शोकस्य परिवर्त्तेन तैलम् आनन्दसूचकं ।
विषस्यात्मनः स्थाने स्तवरूपं परिच्छदं ॥
तेषां नाम च यत् कुर्य्यां धर्म्मरूपद्रुमा इति ।
परमेशस्य चोद्यानं तत्प्रतापप्रकाशकं ॥
निर्म्मास्यन्ति पुनर्व्वारं चिरध्वस्तगृहाणि ते । ४
उत्सन्नानि च धामानि स्थापयिष्यन्ति पूर्व्ववत् ॥
ते नवीनीकरिष्यन्ते पतितानि पुराण्यपि ।
यान्युच्छिन्नानि विद्यन्ते पितापितामहावधि ॥
तिष्ठन्तश्चारयिष्यन्ति युष्मन्मेषान् विदेशिनः ५
शस्यक्षेत्रेषु युष्माकं गोस्तनीवाटिकासु च ।
भविष्यन्त्यन्यवंशीया जना युष्मत्कृषीबलाः ॥

६ त्वायुष्मे च तदा यूयं परमेशस्य याजकाः।
अस्मदीशस्य दासेया इति नाम च प्राप्स्यथ॥
ऐश्वर्य्यमन्यजातीनां युष्माभिः परिभोक्ष्यते।
तासां विनिमयाद् यूयं तासां प्राप्स्यथ गौरवं॥
७ यूयं प्राप्स्यथ लज्जायाः स्थाने द्विगुणमङ्गलं।
नराः पूर्व्वमवज्ञाता हर्षिष्यन्ति निजश्रिया॥
यतः स्वकीयदेशे ते द्विगुणांशो ऽधिभोक्ष्यते।
आनन्दश्च नृणां तेषां नित्यस्थायी भविष्यति॥
८ यतो न्यायविचारे ऽहं सम्प्रीये परमेश्वरः।
द्रोहाद् धनापहारश्च गर्हितो मन्यते मया॥
दास्यामि मत्प्रजाभ्यो ऽहं यथार्थं पारितोषिकं।
नियमञ्च करिष्यामि ताभिः सार्द्धं सदा स्थिरं॥
९ तासां वंशो ऽन्यजातीनां मध्ये ज्ञातो भविष्यति।
नानादेशीयलोकानां मध्ये तेषाञ्च सन्ततिः॥
तान् नरान् वीक्ष्य सर्व्वैश्च निश्चित्येदं गदिष्यते।
असावेवास्ति वंशः स आशिःप्राप्तः परेश्वरात्॥
१० करिष्याम्यहमानन्दं परमं परमेश्वरे।
समवाप्स्यति चोल्लासं मदीयात्मा मदीश्वरे॥
यतः स त्राणवस्त्राणि स्वयं मां पर्य्यधापयत्।
स्वयं पर्य्यवेष्टन्मां धर्म्मपरिच्छदेन च॥
वरं विवाहयोग्येन वेषेण भूषितं यथा।
अलङ्कारसमूहेन कन्यां वा शोभितां यथा॥
११ यतो निजाङ्कुरान् भूमिः स्वत उत्पादयेत् यथा।
किंवा रोपितवीजानि यथोद्यानं प्ररोहयेत्॥
प्रभुना परमेशेन साक्षात् सर्व्वविदेशिनां।
धर्म्मनिष्ठा प्रशंसा च तथा प्ररोहयिष्यते॥

---

६२ द्विषष्टितमो ऽध्यायः।

१ समाजं प्रति भविष्यद्वक्तुः प्रार्थनं ६ तद्रक्षकाणां योग्यकर्म्मणो वर्णनञ्च।

१ अनुरोधेन सीयोनो नाहं स्थास्यामि नीरवः।

नाहं मौनी भविष्यामि निमित्तं यिरूशालमः ॥
यतो धर्म्मोदयं तस्या आकाङ्क्षामि द्युतेः समं ।
परित्राणोदयञ्चापि तस्या उज्ज्वलदीपवत् ॥
तदानीमन्यदेशीयै धर्म्मो वीक्षिष्यते तव । २
सकलैश्च महीपालै र्द्रक्ष्यते तव गौरवं ॥
सवक्त्रेण परेशो यत् स्वयमुच्चारयिष्यति ।
तादृशं नूतनं नाम लप्स्यते च तदा त्वया ॥
परेशस्य करे चारु मुकुटं त्वं भविष्यसि । ३
त्वदीयेशस्य हस्ते च किरीटो राज्यसूचकः ॥
नैव त्वाञ्च परित्यक्तां वदिष्यन्ति नराः पुनः । ४
न पुनस्तव भूमिं वा ते गदिष्यन्ति निर्ज्जनां ॥
ख्यास्यसे त्वन्तु हिफ्सीवार्थतो मत्तुष्टिभाजनं ।
ख्यास्यते तव भूमिश्च वियूलार्थाद् विवाहिता ॥
यतस्त्वं परमेशस्य तुष्टिपात्रं भविष्यसि ।
तावकीना च या भूमिः सधवा सा भविष्यति ॥
त्वामुद्वक्ष्यन्ति पुत्रास्ते कुमारीं तरुणो यथा । ५
यादृशेन च कन्यायां वरो हर्षेण हृष्यति ।
तादृशेन त्वदीयेशः परिहर्षिष्यति त्वयि ॥
त्वत्प्राचीरे यिरूशालम् नियुक्ता रक्षका मया । ६
न दिवा ते न रात्रौ वा मौनीभवन्ति कर्हिचित् ॥
बोधकराः परेशस्य यूयं मैव प्रशाम्यत ॥
स च यावत् स्थिरीकृत्य न कुर्य्याद् यिरूशालमं । ७
मेदिन्यां संस्तुतां तावत् तस्मै मा दत्त विश्रमं ॥
स्वीयदक्षिणहस्तेन प्रबलेन च बाहुना । ८
प्रत्यश्रौषीत् शपित्वेदं स्वयमेव परेश्वरः ॥
त्वद्द्वेषिभ्यो न दास्यामि त्वच्छस्यं भक्ष्यवत् पुनः ।
न वा त्वच्छ्रमजं मद्यं पास्यन्त्यपरवंशजाः ॥
तच्छस्यं यै र्नरैश्छिन्नं तैरेव भक्षयिष्यते । ९
तत्कृते परमेशस्य प्रशंसा च करिष्यते ॥
यै र्नरैः सङ्गृहीतानि द्राक्षाफलानि चाभवन् ।
ते पास्यन्ति रसं तेषां पवित्रेष्वङ्गनेषु मे ॥

१० यूयं गोपुरमध्येन प्रगच्छत प्रगच्छत ।
प्रजानां गमनार्थञ्च निर्व्विघ्नं कुरुतायनं ॥
विनिर्म्मात विनिर्म्मात मार्गं प्रस्तरवर्जितं ।
लोकानां शिरसामूर्द्ध्वे उत्थापयत च ध्वजं ॥
११ परेशः श्रावयत्येतद् वचो भूप्रान्तवासिनः ।
यूयं कन्यां सियोनाख्यां वार्त्तां ज्ञापयतेदृशीं ॥
असौ पश्य समायाति त्वत्परित्राणकारकः ।
पश्य तस्य भृतिश्चापि सहिता तेन वर्त्तते ।
तथा श्रमफलं तस्य विद्यते तस्य सम्मुखे ॥
१२ पुण्यवंशः परेशस्य परिक्रीतनरा इति ।
नामधेयं मनुष्यैश्च त्वज्जनेभ्यः प्रदास्यते ।
अन्विष्टा ख्यास्यसे च त्वम् असन्त्यक्ता पुरीति च ॥

---

६३ त्रिषष्टितमोऽध्यायः ।

१ ख्रीष्टस्य जयवर्णनं ७ समाजं प्रति दया १५ तस्मिन् स्वीयलोकानां शरणागतत्वञ्च ।

१ को ऽसावत्रागच्छतीदोमाद् बस्त्रातो रञ्जिताम्बरः ।
परिच्छदेन तेजस्वी महाशक्त्या च सत्वरः ।
आयामि धर्म्मवक्ताहं परित्राणे च सक्षमः ॥
२ कुतस्त्वद्वसनं रक्तं कुतो वा त्वत्परिच्छदः ।
भाति वस्त्रं मनुष्यस्य द्राक्षामर्द्दनकारिणः ॥
३ द्राक्षाकूपे ऽहमेकाकी द्राक्षाफलान्यमर्द्दयं ।
लोकानां मध्य एको ऽपि मत्सहायो ऽभवन्नहि ॥
तदाकार्षमहं तेषां स्वीयक्रोधेन मर्द्दनं ।
स्वीयप्रचण्डकोपेन पादाभ्यां तान् व्यचूर्णयं ॥
ततो मामकवस्त्रेषु तेषां प्रोदपतद्रसः ।
कलङ्कितमकार्षञ्चाहं कृत्स्नं स्वपरिच्छदं ॥
४ दिवसः प्रतिकारस्य मयानुचिन्तितो यतः ।
मत्परिक्रीतलोकानां वर्षश्चाभूदुपस्थितः ॥
५ मध्यवलोकमाने तु को ऽपि नोपकरोद् यदा ।

आश्चर्यं मन्यमाने च धारकः को ऽपि नाभवत्।
तदा मद्बाहुरेवास्त मत्कोपो मामधारयत्॥
क्रोधाविष्टः स्वपादाभ्यां तान् जनांश्च व्यमर्द्दयं। ६
स्वकीयकोपमद्यञ्च भूरिशस्तानपाययं।
भूतलस्योपरिष्टाच्च तेषां प्रास्रावयं रसं॥
अस्मानुद्दिश्य यत् सर्व्वं कृतवान् परमेश्वरः। ७
इस्रायेलीयवंशे च यामकार्षीन्महाकृपां॥
अहं तद्योग्यरूपेण परेशस्य हितक्रियाः।
परेशस्य गुणानाञ्च स्तवं स्मारयितुं यते।
स्वकृपां भूरिप्रीतिञ्च तानुद्दिश्य स आचरत्॥
आह च मज्जना एते सन्ताना अप्रवञ्चकाः। ८
स परित्राणकर्त्ता च तेषां ततो ऽभवत् स्वयं॥
तेषां सकलदुःखं स निजदुःखममन्यत। ९
तस्य श्रीमुखरूपश्च दूतो ऽत्रास्त च तान् स्वयं॥
स्वीयप्रीत्यनुकम्पाभ्यां पर्य्यक्रैषीत् स्वयञ्च तान्।
तानुत्तोल्य च प्राक्काले भारवत् सर्व्वदावहत्॥
द्रोहं कृत्वा तु तैस्तस्य पवित्रात्मनि बाधिते। १०
सो ऽपावृत्तो ऽभवद् द्वेषी स्वयञ्चायुद्ध तैः सह॥
प्राक्कालं मूससश्चापि स्मृत्वाहुस्तत्प्रजास्तदा। ११
येनोद्धृताः समुद्रात् ते मेषरक्षी च कुत्र सः।
तच्चित्ते स्वपवित्रात्मा येन न्यधायि कुत्र सः॥
मूससो दक्षहस्तेन स तान् अचालयज्जनान्। १२
महाप्रतापयुक्तेन स्वकीयबाहुना यथा॥
अनन्तकालसंस्थायि तस्य नाम च यद् भवेत्।
तदर्थं सम्मुखे तेषां व्यभिदत् सागरं द्विधा॥
स्थानैरतीव गम्भीरैः स तदा तानजीगमत्। १३
यथाश्वः प्रान्तरे धावन् तथा ते ऽप्यस्खलन्नहि॥
गावो यथावरोहन्तो निम्नभूमिं प्रयान्ति वा। १४
आत्मना परमेशस्य ते शान्ता अभवंस्तथा।
इत्थं स्वीयप्रजा नीत्वा त्वं स्वनाम व्यशोभयः॥
त्वं स्वर्गात् कुरु दृक्पातं तस्मात् स्ववसतिस्थलात्। १५

शोभायुक्तात् पवित्राच्च कुरुष्वाधो ऽवलोकनं॥
कुत्र गतस्तवोद्योगः कुत्र वा त्वत्पराक्रमः।
अस्मत्तस्त्वदनुक्रोशस्त्वत्स्नेहस्चोपसंहृतः॥
१६ पितास्माकं त्वमेवासीन्नाब्रहीमस्मान् न वेत्ति हि।
इस्रायेलपि नैवास्मान् विजानाति स्ववंशवत्॥
हे परेश त्वमेवासि पितास्माकं न चेतरः।
अस्माकं मुक्तिदातेति प्राक्कालादस्ति नाम ते॥
१७ कुतस्त्वं भ्रमयेरस्मान् स्वमार्गेभ्यः परेश्वर।
गाढचित्तांश्च कृत्वास्मान् स्वभयाद् भ्रंशयेः कुतः॥
अनुरोधात् स्वदासानां त्वं प्रत्यागमनं कुरु।
तवाधिकाररूपाणां वंशानामनुरोधतः॥
१८ पवित्रास्त्वज्जना आसन् स्वल्पकालं प्रतापिनः।
मर्द्दयन्त्यरयो ऽस्माकं पादाभ्यां धर्म्मधाम ते॥
१९ वयं तवैव प्राक्कालात् ते त्वया नहि पालिताः।
न कदाचन वा तेषु तव नामान्वकीर्त्त्यत॥

---

६४ चतुःषष्टितमो ऽध्यायः।

समाजस्य प्रार्थनं विलापकथनञ्च।

१ अहं काङ्क्षामि यद् व्योम त्वं भित्त्वावतरेः स्वयं।
पर्व्वतास्तव साक्षाच्च विस्रवेयु र्द्रवीकृताः॥
२ तृणदाही यथा वह्निः किंवाम्बूत्सेचकानलः।
तथा त्वन्नामधेयं यत् प्रकाश्येत तवारिषु।
अन्यदेशीयलोकाश्च प्रकम्पेरंस्त्वदग्रतः॥
३ त्वयि भीमक्रियाः कर्त्तुम् अस्माभि र्न प्रतीक्षिताः।
अवरूढे द्रवीभूताः शैलास्त्वत्सम्मुखे ऽक्षरन्॥
४ हे ईश वर्जयित्वा त्वां नाश्राव्यनादिकालतः।
नोपालम्भि च कर्णेन न प्रादर्शि च चक्षुषा।
तत् सर्व्वं यत् स्वभक्तस्य कृते त्वं साधयिष्यसि॥
५ मिलसे तेन सार्द्धं त्वं यो हृष्टो धर्म्ममाचरेत्।
तव मार्गेषु ये च त्वाम् अनुस्मरन्ति तैः सह॥

पश्य क्रोधमकार्षीस्त्वं वयं पापमकार्ष्म च।
चिरादेषा दशास्माकं त्राणं लिप्सामहे ततः॥
अशुचिना मनुष्येण समानाः सकला वयं। ६
अस्माकं पुण्यपुञ्जश्च कर्पटो मलदूषितः॥
सञ्जातास्च वयं जीर्णाः पत्राणीव पलाशिनः।
वायुनेव स्वपापेन वयञ्चापक्रियामहे॥
त्वन्नाम्ना प्रार्थनाकारी जनः को ऽपि न विद्यते। ७
त्वाञ्चावलम्बितुं को ऽपि जनः प्रोत्सहते नहि॥
स्वकीयाननमस्मत्तो यतः प्रच्छाद्यते त्वया।
अस्मान् पापस्य तापेन त्वं विलीनीकरोषि च॥
अस्माकन्तु त्वमेवासि पिता हे परमेश्वर। ८
मृद् वयं कुम्भकारस्त्वं वयं त्वत्करनिर्म्मिताः॥
मा भवास्मभ्यमत्यन्तं क्रुद्धो हे परमेश्वर। ९
अस्माकमपराधञ्च मानुस्मर निरन्तरं।
सदयः कुरु दृक्पातं वयं सर्व्वे तव प्रजाः॥
पवित्रास्तव याः पुर्य्यस्ताः सञ्जाता वनोपमाः। १०
अरण्यमभवत् सीयोन् यिरूशालम् मरुस्थलं॥
यत्र त्वामप्रशंसंश्च पूर्व्वमस्मत्पितामहाः। ११
धर्म्मधाम तदस्माकं रम्यं निर्दग्धमग्निना।
अस्माकं प्रियवस्तूनि सर्व्वाणि ध्वंसितानि च॥
त्वं किं क्षमिष्यसे शान्त इदं हे परमेश्वर। १२
मौनीभूय स्वयं वास्मान् अत्यन्तं व्यथयिष्यसि॥

---

६५ पञ्चषष्टितमोऽध्यायः।

१ अन्यदेशीयानां ग्राह्यत्वं यिहूदीयानामग्राह्यत्वं ८ अवशिष्टलोकानां रक्षणं ११ दुष्टलोकानां शास्तिः १६ धार्म्मिकाणां सुखञ्च।

ये मनुष्यै र्न दृष्टो ऽहं ते मया प्रतिभाषिताः। १
ये र्जनै र्नाहमन्विष्टस्ते ममोद्देशमाप्नुवन्॥
मम नाम्ना च विख्याता या जातिरभवन्नहि।
तामहं प्रोक्तवानेतत् पश्य मां पश्य मामिति॥

२ कृत्स्नं किन्तु दिनं यावत् करौ विस्तारितौ मया।
प्रजापुञ्जं प्रति भ्रान्तम् एतानेव नरान् प्रति।
ये पथा यान्त्यभद्रेण स्वसङ्कल्पानुगामिनः॥
३ नित्यमेव मनुष्यास्ते साक्षात् प्रकोपयन्ति मां।
उद्यानेषु यजन्ते ते धूपायन्तीष्टकासु च॥
४ ते वसन्ति श्मशानेषु रात्रौ सन्ति गुहासु च।
शूकरमांसमश्नन्ति घृण्यसूपञ्च बिभ्रति॥
५ ते वदन्त पृथक् तिष्ठ पवित्रो ऽस्मि न मां स्पृश।
मन्नासायामिमे धूमो वह्नि र्वा नित्यमुज्ज्वलः॥
६ तत् पश्यालेखि मत्साक्षान्नाहं स्थास्यामि नीरवः।
फलं किन्तु प्रदास्यामि तेषां दास्यामि वक्षसि॥
७ धूपमद्रिषु प्रज्वाल्य मां शैलेषु विनिन्द्य च।
यद्यदेवापराद्धं तै र्यच्च तेषां पितामहैः॥
फलं तस्य प्रदास्यामि कर्म्म तेषां पुरातनं।
परिमाय फलं तस्य तेषां दास्यामि वक्षसि॥
८ पुनर्व्वारमिदं वाक्यं भाषते परमेश्वरः।
द्राक्षामध्ये रसे दृष्टे द्राक्षां नैव विनाशय।
यतः सा शुभयुक्तेति मनुष्यैरुच्यते यथा॥
तथाहं स्वीयदासानां करिष्याम्यनुरोधतः।
नैवाहं साधयिष्यामि साकल्यस्य विलोपनं॥
९ याकूबो मध्यतो वंशो मया चोत्पादयिष्यते।
यिहूदा मध्यतश्चैको मद्गिरीणामधीश्वरः॥
मद्भूमिञ्चाधिभोक्ष्यन्ते लोका ममाभिरोचिताः।
तत्र गत्वा करिष्यन्ति वसतिं मम सेवकाः॥
१० शारोणं मेषयूथानां सुखस्थानं भविष्यति।
आखोराख्या समा भूमिः शयनीयस्थलं गवां।
निमित्तं मम लोकानां मदन्वेषणकारिणां॥
११ इदं गदामि युष्मांस्तु परेशत्यागिनो जनाः।
युष्माभिरेव विस्मृत्य पवित्रं मम पर्व्वतं॥
कृते गादाख्यदेवस्यायोज्यते भोजनासनं।
मिनिदेवस्य कंसश्च पानीयेन प्रपूर्य्यते॥

दातव्यानसये युष्मान् गणयिष्याम्यहं ततः। १२
सर्व्वे यूयञ्च हत्यायै नतशीर्षा भविष्यथ॥
यतः कृते मयाह्वाने नादद्धं यूयमुत्तरं।
गदिते च मया वाक्ये यूयं न श्रोतुमैच्छत॥
मद्दृष्टौ कुत्सितं यद्यत् तत् तद् यूयमकार्ष्ट च।
यत्राहञ्च न तुष्यामि तद् युष्माभिररोच्यत॥
एतस्मात् कारणादेतत् प्रभु र्वक्ति परेश्वरः। १३
मम दासा अशिष्यन्ति यूयन्तु प्राप्स्यथ क्षुधां॥
मम दासाश्च पास्यन्ति यूयं तृष्णामवाप्स्यथ।
हर्षिष्यन्ति च मद्दासा यूयं लज्जामवाप्स्यथ॥
पश्य प्रफुल्लचित्तत्वाद् गास्यन्ति सेवका मम। १४
यूयं किन्तु मनस्तापाद् आर्त्तनादं करिष्यथ।
उच्चैरुत्साहभङ्गाच्च विलापं प्रकरिष्यथ॥
मम रोचितलोकेषु युष्माभि र्मरणात् परं। १५
शापोदाहारवत् त्यक्तं स्वीयनामार्पयिष्यते॥
प्रभुः परेश्वरो यस्मात् स्वयं युष्मान् हनिष्यति।
नामधेयं स्वदासानाम् अन्यच्चैकं करिष्यति॥

पृथिव्यां तेन यः कश्चित् प्रार्थयिष्यत आशिषं। १६
सत्येश्वरस्य नाम्ना स प्रार्थयिष्यत आशिषं॥
पृथिव्यां यो मनुष्यश्च शपथं प्रकरिष्यति।
सत्येश्वरस्य नाम्नैव शपथं स करिष्यति॥
प्राक्तनव्यसनानाञ्च स्थास्यति स्मरणं नहि।
यतः प्रच्छादयिष्यन्ते मया तानि स्वदृष्टितः॥
नवद्यां नवभूमिञ्च पश्य स्रक्ष्याम्यहं तदा। १७
प्राक्कालः स्मरणाल्लुप्तो नैवानुचिन्तयिष्यते॥
मया यत् सृज्यते यूयं सर्व्वे तस्मिन् प्रहृष्यत। १८
यावदनन्तकालञ्च तत्रानन्दं प्रगच्छत॥
यतः स्रक्ष्याम्यहं पश्यानन्ददां यिरूशालमं।
तन्निवासिप्रजापुञ्जं करिष्यामि च हर्षदं॥
आनन्दं समवाप्स्यामि परमं यिरूशालमि। १९
मामकीनप्रजापुञ्जे मम हर्षो जनिष्यते।

क्रन्दनमार्त्तनादो वा तत्र न श्रोष्यते पुनः ॥
२० नैवापनेष्यते तस्मात् स्थानात् को ऽपि मृतः शिशुः ।
नासम्पूर्णवयस्को वा को ऽपि वृद्धो ऽपनेष्यते ॥
शतवर्षवयस्कस्तु बालस्तत्र मरिष्यति ।
शतवर्षवयस्कश्च पापी शप्तो भविष्यति ॥
२१ ये निर्म्मास्यन्ति वेश्मानि सन्निवत्स्यन्ति तत्र ते ।
ये चोद्यानं करिष्यन्ति भोक्ष्यन्ते तत्फलानि ते ॥
२२ कृते तै र्गृहनिर्म्माणे नापरस्तत्र वत्स्यति ।
द्राक्षोद्याने कृते तैश्च नान्यः फलानि भोक्ष्यते ॥
दीर्घायुषो भविष्यन्ति पादपा इव मज्जनाः ।
निजहस्तकृतं वस्तु नरै र्ममाभिरोचितैः ।
जीर्णताप्राप्तिपर्य्यन्तं नित्यमेव प्रयोक्ष्यते ॥
२३ न वृथा ते श्रमिष्यन्ति न प्रसोष्यन्ति चापदे ।
यतः स्वकीयसन्तानैः पुत्त्रपौत्त्रादिभिः सह ।
ते भविष्यन्ति वंशः स आशिःप्राप्तः परेश्वरात् ॥
२४ तेभ्यश्च प्रार्थनात् पूर्व्वं प्रदास्याम्यहमुत्तरं ।
उपश्रोष्याम्यहं तेषाम् असमाप्तवचांस्यपि ॥
२५ वृको मेषस्य वत्सश्च तदैकत्र चरिष्यतः ।
तदा गौरिव सिंहो ऽपि पलालाशी भविष्यति ।
विषाननस्य भक्ष्यञ्च तदा धूलि र्भविष्यति ॥
कृत्स्ने मम पवित्राद्रौ न हिंसां न विनाशनं ।
कस्यचित् ते करिष्यन्तीति ब्रूते परमेश्वरः ॥

६६ षट्षष्टितमोऽध्यायः ।

१ परमेश्वरीयानुग्रहकथनं ३ कपटिनः प्रति तिरस्करणं ५ नम्रलोकानां सान्त्वनं ७ समाजस्य वृद्धिः सुखञ्च १५ दुष्टलोकानां विनाशनञ्च ।

१ भाषते भारतीमेनां स्वयमेव परमेश्वरः ।
मम सिंहासनं स्वर्गो मम पादासनञ्च भूः ॥
युष्माभि र्मत्कृते कुत्र विनिर्म्मायिष्यते गृहं ।
मद्विश्रामार्थकं स्थानं कुत्र वा समवाप्स्यते ॥

मामकीनेन हस्तेन सर्व्वमेतदसर्जि हि। ३
इत्थञ्च सर्व्वमुत्पेदे वक्तीदं परमेश्वरः॥
नम्रशीलस्तु चूर्णात्मा सकम्पो वचनान्मम।
यो मनुष्यस्तमुद्दिश्य करिष्याम्यवलोकनं॥
वृष उत्सृज्यते येन मनुष्यस्तेन हन्यते। ३
मेषश्च हूयते येन शुनः कण्ठं भनक्ति सः॥
कश्चिद् ददाति नैवेद्यं दूषितं शौकरासृजा।
कश्चिद् दहति धूपञ्च मृषादेवञ्च वन्दते॥
तेषां स्वाभीष्टमार्गास्तु यथा तैरभिरोचिताः।
घृण्येषु स्वेष्टदेवेषु मनस्तेषाञ्च तुष्यति॥
आशाभङ्गस्तथा तेषां मयाभिरोचयिष्यते। ४
यत् सन्त्रासकरं तेषां प्रापयिष्यामि तच्च तान्॥
यतः कृते मयाह्वान उत्तरं को ऽपि नाददात्।
भाषमाणे मया ते च श्रोतुमासन्ननिच्छवः॥
कुत्सितं यत्तु मद्दृष्टौ ते तदेव समाचरन्।
यत्र चाहं न तुष्यामि ते तदेवाभ्यरोचयन्॥
हे नराः परमेशस्य वाक्यात् कम्पसमन्विताः। ५
एतत् तस्य वचो यूयम् आकर्णयितुमर्हथ॥
युष्माकं भ्रातरो युष्मान् मदीयनामकारणात्।
द्विषन्तो दवयन्तश्च मान्यमाहुः परेश्वरं॥
युष्माकमेव हर्षार्थं स प्रदास्यति दर्शनं।
तेषां किन्तु मनुष्याणां महालज्जा भविष्यति॥
नगरात् क्षोभजो नादो नादश्चोदेति मन्दिरात्। ६
परमेशस्य नादः स स्वारिभ्यः फलदायिनः॥
प्रसवार्त्तिमप्राप्तायाः सीयोनः प्रसवो ऽभवत्। ७
अबुद्धा गर्भसन्तापम् अभवत् सा च पुत्रिणी॥
केनैतादृशमश्रावि केनेदृशमदर्शि वा। ८
जनपूर्णः प्रदेशः किम् एकदिने प्रसूयते॥
किं वा कृत्स्नः प्रजापुञ्ज एकजन्मनि जायते।
गतगर्भव्यथा पश्य स्वपुत्रान् प्रासवत् सियोन्॥
किं मया योनिमुद्घाट्य जन्म न साधयिष्यते। ९

भाषते भारतीमेनां स्वयमेव परेश्वरः ॥
आनीय प्रसवावस्थां गर्भः किं रोत्स्यते मया।
भाषते भारतीमेनां तावकीनेश्वरः स्वयं ॥
१० यिरूशालमि ये सर्व्वे प्रीयन्ते वच्मि तान् नरान्।
आनन्दत तया सार्द्धं गानं कुरुत तामधि ॥
तस्याः कृते च यावन्तः सन्ति शोकपरिप्लुताः।
तान् ब्रवीमि तया सार्द्धं यूयमतीव हृष्यत ॥
११ यतस्तत्सान्त्वनस्तन्यं पीत्वा तृप्तिमवाप्स्यथ।
पयो निष्पीड्य तस्याश्च शोभापूर्णस्तनद्वयात्।
युष्माभिः सुखभोगो हि परमः परिलप्स्यते ॥
१२ यतो हेतोरिमां वार्त्तां भाषते परमेश्वरः।
तां प्रति वर्त्तयिष्यामि शान्तिं स्रोतस्वतीमिव।
विदेशिनां प्रतापञ्च धारावाहिनदीमिव ॥
स्तन्यं पास्यथ यूयञ्च वक्ष्यध्वे च कटिस्थले।
जङ्घयोरुपरि प्रीत्या लालिताश्च भविष्यथ ॥
१३ सान्त्वयिष्याम्यहं युष्मान् पुरुषं जननी यथा।
यिरूशालमि युष्माकं सान्त्वना च प्रसेत्स्यति ॥
१४ तां समालोक्य यूयञ्च हृष्टचित्ता भविष्यथ।
अस्थीनि वः सतेजांसि भविष्यन्ति च शष्पवत् ॥
परमेशस्य हस्तश्च स्वदासानां सहायवत्।
ज्ञास्यते तस्य कोपश्च स्वशत्रूणां विपक्षवत् ॥
१५ आयास्यति यतः पश्य परेशो वह्निना वृतः।
रथास्तस्य भविष्यन्ति समानाश्चक्रवायुना ॥
निजकोपं स तापेन कृतकार्य्यं करिष्यति।
सफलं स्वतिरस्कारम् उज्ज्वलक्रोधवह्निना ॥
१६ विचारमनलेनैव परमेशः करिष्यति।
सर्व्वैश्च प्राणिभिः सार्द्धम् असिना विवदिष्यते।
बहवश्च भविष्यन्ति परेशस्य हता नराः ॥
१७ पूतीभूय शुचीभूयोपवनान्याश्रयन्ति ये।
मध्यवर्त्तिन एकस्य पश्चात् पश्चाद् व्रजन्ति च ॥
शूकरमांसभोक्तारो घृण्यकीटेन्दुराशिनः।

युगपत् ते विनंक्ष्यन्ति वक्तीदं परमेश्वरः ॥
अहमेव क्रियास्तेषां सङ्कल्पांश्च प्रदृष्टवान्। १८
सर्व्वदेशीयलोकानां सर्व्वभाषाप्रभाषिणां ॥
सङ्ग्रहायोपयुक्तश्च समयः समुपस्थितः।
ते मनुष्यैः समागत्य महिमा द्रक्ष्यते मम ॥
तेषां मध्ये ततो ऽहञ्च स्थापयिष्यामि लक्षणं। १९
तेषाञ्च रक्षितान् कांश्चित् प्रेषयिष्यामि दूतवत् ॥
तार्शीशं प्रति पूलञ्च लूदीयांश्च धनुर्धरान्।
तूबलं यवनञ्चापि लोकान् विदेशिनः प्रति ॥
द्वीपान् प्रति सुदूरांश्च येषां निवासिभि र्नरैः।
नैवाश्रावि मम ख्याति र्नादर्शि महिमा मम।
महिमा मम तैस्तत्र विदेशे कीर्त्तयिष्यते ॥
सर्व्वविदेशिनां मध्याद् युष्माकं भ्रातरस्तदा। २०
अश्वै रथैः शिरस्काभिरश्वतरैः क्रमेलकैः।
पुनरानाययिष्यन्ते पवित्रं मम पर्व्वतं।
यिरूशालम्पुरीञ्चापि परेशायोपहारवत् ॥
इस्रायेलीयसन्तानैः परमेशस्य मन्दिरं।
शुचिपात्रेषु नैवेद्यं यथैवानीयते तथा।
भाषते भारतीमेनां स्वयमेव परेश्वरः ॥
नियोक्तुं याजकत्वे ऽहं लेवीयानां पदे ऽपि च। २१
तेषां कांश्चिद् ग्रहीष्यामीति ब्रूते परमेश्वरः ॥
मत्सृष्ट्या नवीना द्यु र्नवीना भूश्च यादृशं। २२
मत्साक्षात् स्थास्यतो नित्यं वक्तीदं परमेश्वरः।
वंशो नाम च युष्माकं तादृशं स्थास्यतः सदा ॥
तदानीं प्रतिमासञ्च प्रतिविश्रामवासरं। २३
आयास्यन्त्यर्च्चनां कर्त्तुं मत्साक्षात् सर्व्वप्राणिनः।
भाषते भारतीमेनां स्वयमेव परेश्वरः ॥
ते च द्रक्ष्यन्ति निर्गत्य नृणां मद्द्रोहिणां शवान्। २४
कृमि र्यतो ऽमरस्तेषाम् अशाम्यो ऽग्नि र्भविष्यति।
सर्व्वेषां प्राणिनां ते च भविष्यन्ति घृणास्पदं ॥

यिरिमियस्य भविष्यद्वचनानि।

१ प्रथमोऽध्यायः।

१ यिरिमियस्य कालनिरूपणं ४ भविष्यद्वक्तृत्वपदे तस्य नियोगः ११ वादामतरोः पाकस्थाल्याश्च दृष्टान्ते परमेश्वरेण तस्याश्वासनञ्च।

१ विन्यामीनदेशस्थानाथोत्पुरवासिनां याजकानां मध्यवर्त्तिनो हि-
२ ल्कियसुतस्य यिरिमियस्य वाक्यानि। आमोनस्य सुतो योशियो यदा
यिहूदादेशस्य राजासीत् तदानीमर्थतस्तदीयराजत्वस्य त्रयोदशे वत्सरे
३ परमेश्वरस्य वाणी तं यिरिमियं प्रति प्रादुरभूत्। तदारभ्य यिहूदीय-
भूपते र्योशियसुतस्य यिहोयाकीमस्य राजत्वकाले यिहूदीयभूपते र्यो-
शियसुतस्य सिदिकियस्यैकादशवर्षपरिमिते राजत्वकाले च पञ्चममासे
यिरूशालमो निर्जनीकरणं यावत् प्रादुरभूत्।
४ परमेश्वरस्येयं वाणी मां प्रति प्रादुरभूत्।
५ जठरे तव सृष्टेः प्राक् त्वां परिज्ञातवानहं।
उदरान्निर्गतेः प्राक् च त्वं पवित्रीकृतो मया।
भाविवादी नियुक्तश्च समक्षं परदेशिनां॥
६ ततो मयोक्तं हा प्रभो परमेश्वर, मम वाक्पटुता नास्ति यस्माद् बालो
७ ऽहं। तदा परमेश्वरो मामवादीत् बालोऽहमिति मा ब्रूहि परन्तु
यत्र कुत्रचित् मया प्रहेष्यसे तत्रैव गमिष्यसि यत्किञ्चिच्च मयाज्ञापयि-
८ ष्यसे तदेव वदिष्यसि। तेभ्यो मा बिभीहि यस्मात् त्वां रक्षितुमहं तव
९ सङ्गीति ब्रूते परमेश्वरः। ततः परमेश्वरेण हस्तं प्रसार्य्य मम मुखं स्पृष्टं
१० मां प्रतीदञ्च गदितं पश्याहं तव मुखे मद्वाक्यानि समर्पितवान्। पश्या-
हमुन्मूलनोत्पाटनविनाशनध्वंसननिर्म्माणरोपणार्थमद्य जातिषु राष्ट्रेषु
च त्वामधिकृतवान्।
११ ततः परं परमेश्वरस्येयं वाणी मां प्रति प्रादुरभूत् हे यिरिमिय,
त्वया किं दृश्यते? ततो मयोक्तं शीघ्रपुष्पितस्य (वादामाख्यस्य) तरोः
१२ शाखां पश्यामि। तदानीं परमेश्वरोऽवादीत् यथातथं त्वया दृष्टं
१३ यतोऽहं स्ववाक्यं सफलीकर्त्तुं शीघ्रकर्म्मा भविष्यामि। पुनश्च परमे-

श्वरस्येदं वाक्यं मां प्रति प्रादुरभूत् त्वया किं दृश्यते ? मयोक्तम् उत्तर-
मुखी वाष्पोत्थादिका स्थाली दृश्यते। परमेश्वरो मामिदमप्यगादीत् १४
उत्तरस्माद् एतद्देशनिवासिनां सर्व्वेषाममङ्गलमुत्पत्स्यते। यस्मात् पश्चा- १५
द्दमुत्तरदिक्स्थराष्ट्रवासिनीः सर्व्वजातीराह्वास्यामीति ब्रूते परमेश्वरः,
तैरागत्य यिरूशालमो गोपुराणां प्रवेशस्थानेषु तद्वेष्टकप्राचीरपृष्ठस्य
विविधस्थानेषु यिहूदादेशस्य सर्व्वपुराणां मुख्यस्थानेषु च स्वं स्वं सिंहा-
सनं स्थापयिष्यते। एते जना यन्मां विहायेतरदेवानां कृते धूपदाहं १६
स्वकरनिर्म्मितवस्तूनां भजनञ्च कृतवन्तस्तस्मात् तेषां कृत्स्नदुराचारे
मदीयविचाराज्ञामहं तान् वदिष्यामि। परन्तु त्वं बद्धकटिस्तिष्ठन् १७
मया यद्यदाज्ञापयिष्यसे तत् सर्व्वं तान् ब्रूहि तेभ्यो मा त्रस्य त्रस्येश्चेत्
तेषां समक्षं मया त्रासयेथाः। पश्याहमद्य कृत्स्नदेशे त्वामधिकृत्य १८
यिहूदादेशस्य राज्ञां मुख्यनराणां याजकानां ग्राम्यजनानाञ्च समक्षं
सुदृढनगरं लौहस्तम्भम् आरकूटमयप्राचीरञ्च कृतवान्। ते त्वया सह १९
योत्स्यन्ति न तु तव प्रभविष्यन्ति यतस्त्वां रक्षितुमहं तव सहायो
ऽस्मीति ब्रूते परमेश्वरः।

---

२ द्वितीयोऽध्यायः।

१ यिरूशालमं प्रति परमेश्वरस्यानुग्रहः ४ परमेश्वरं प्रति तन्निवासिजनानां देवार्च्च-
नादयो ऽपराधाः १४ परमेश्वरेण तेषां भर्त्सना च।

परमेश्वरस्येयं वाणी मां प्रति प्रादुरभूत्। त्वं गत्वा यिरूशालमः १,२
कर्णयोरिदं घोषय। परमेश्वरो ब्रूते यथा,

तव स्वल्पवयस्कायाः प्रणयं संस्मराम्यहं।
नवोढायाश्च ते प्रीतिं मत्पश्चात् प्रान्तरेण च।
तवानुव्रजनं भूम्या या कृष्टं नहि शक्यते॥
इस्रायेल् परमेशस्य पवित्रं स्वं तदाभवत्। ३
तदीयायस्य मध्ये च स आसीदग्रिमं फलं॥
ये जनास्तं ग्रसन्ते ते सर्व्वे भवन्ति दोषिणः।
आक्रमिष्यत्यनिष्टं तान् इति ब्रूते परेश्वरः॥
श्रूयतां परमेशस्य वाग् याकूबो ऽन्वय त्वया। ४
श्रूयतां सर्व्वगोष्ठीभिरिस्रायेलो ऽन्वयस्य सा॥

५ परमेशो ब्रवीत्येतत् कमन्यायं निरूप्य मे।
मम सन्निधितो दूरं गतं युष्मत्पितामहैः।
अलीकस्याश्रितो धर्म्मो लब्धा चालीकता ततः॥
६ न तैः पृष्टमिदं कुत्र विद्यते परमेश्वरः।
येनानीता मिसर्द्देशात् तारिताश्च मरुं वयं॥
घोरां गर्त्तमयीं भूमिं भूमिं शुष्कां तमस्विनीं।
पान्थैरसेवितां भूमिं तथानध्युषितां नरैः॥
७ देशमुद्यानतुल्यन्तु युष्मान् आनीतवानहं।
यूयं यथोपभुञ्जीध्वं तस्य फलादि मङ्गलं॥
मम देशस्तु युष्माभिः प्रविष्टैरशुचीकृतः।
मामकोनाधिकारो ऽयं गर्हणीयो व्यधायि च॥
८ परमेशो ऽस्ति कुत्रेति याजकैरुच्यते नहि।
नैव मामभिजानन्ति शास्त्रहस्ता नरा अपि।
मत्प्रजापालकाः सन्ति मयि विश्वासघातिनः॥
बालदेवस्य नाम्ना च भाषन्ते भाविवादिनः।
अनुपकारिवस्तूनां सञ्जाता अनुगामिनः॥
९ परेशो वक्त्यहं तस्माद् युष्माभि र्विवदे पुनः।
विवदिष्ये च युष्माकं सूनूनां सूनुभिः सह॥
१० कित्तीमाख्यान्तरोपाणि यूयं गत्वा परीक्ष्य च।
दूतान् वा केदरं देशं प्रेष्य सूक्ष्मं निरूप्य च।
ईदृशं तत्र सम्भूतं कर्म्म न वेति पश्यत॥
११ कापि किं निममे जातिः स्वीयदेवाननीश्वरान्।
मत्प्रजास्त्वसहायेन न्यमयन्त निजश्रियं॥
१२ हे द्यौस्त्वं विस्मयस्वात्र घोरं रोमाञ्चिता भव।
याहि च स्तम्भनं गाढमिति ब्रूते परेश्वरः॥
१३ मत्प्रजाभि र्यतो हेतोरपराधद्वयं कृतं।
अमृतानामपामुत्सं मामत्याक्षु र्मम प्रजाः॥
स्वार्थञ्च खनितुं कूपान् ता अकार्षुरुपक्रमं।
छिद्रसमन्वितान् कूपान् अशक्तान् जलधारणे॥
१४ क्रीतदासः किमिस्रायेल् स किं चेटो गृहोद्भवः।
स यत् समभवल्लोप्त्रं किं भवेत् तस्य कारणं॥

अभिगर्ज्जन्ति तं सिंहाः स्वनादमीरयन्ति च। १५
विक्षतस्तस्य देशस्तै र्ध्वंसस्थानमजायत।
पुराणि तस्य दग्धानि नरशून्यानि चाभवन्॥
मोफे तफनहेषे च वासकारिजना अपि। १६
आ मुण्डात् तव सर्व्वस्वं चरन्त्यतीव लोभिनः॥
यदा त्वामनयन्मार्गे त्वत्प्रभुः परमेश्वरः। १७
तदानीं तं परित्यज्य साधितेयं गतिस्त्वया॥
किं कर्त्तव्यं त्वयेदानीं मिसर्देशस्य वर्त्मनि। १८
शिहोरस्य जलं पातुं किं त्वदीयमनोरथः॥
अशूर्देशस्य मार्गे वा किं कर्त्तव्यं भवेत् त्वया।
फरातास्यमहानद्या जलं पातुं किमिच्छसि॥
त्वान्तु स्वकीयदौर्ज्जन्यं प्राप्तदण्डां करिष्यति। १९
भ्रमणं तव सन्मार्गात् त्वां विधास्यति लज्जितां।
त्वया मत्तो न सन्त्रस्य स्वप्रभुः परमेश्वरः।
त्यक्तस्तत् कुत्सितं तिक्तम् इति जानीहि पश्य च।
वाक्यमेतत् प्रभु र्ब्रूते सैन्याध्यक्षः परेश्वरः॥
अतीव प्राक्तने काले भङ्क्ता स्वीययुगं त्वया। २०
बन्धनानि च संछिद्य नाहं दासीति भाषितं॥
तत उच्चगिरेरग्रे हरिद्वृक्षस्य वा तले।
सर्व्वत्रैव शयाना त्वं वेश्यावृत्तिं निषेवसे॥
सत्यबीजत उत्पन्ना उत्तमा गोस्तनीलताः। २१
सर्व्वत्र रोपिता यस्मिन् तत् क्षेत्रं त्वं कृता मया॥
हा हा त्वं मम दुःखाय कीदृशं विकृताभवः।
आकीर्णा गोस्तनीवल्ल्या इतरायाः कुपल्लवैः॥
यवक्षारेण कुर्य्याश्चेत् त्वं निजाङ्गस्य मार्ज्जनं। २२
स्वार्थं तत्र प्रयुञ्जीथा बाऊल्येन च सर्जिकां॥
तथापि त्वदघं स्थाता मम साक्षात् कलङ्कवत्।
प्रभुना परमेशेन वाक्यमेतन्निगद्यते॥
नाहं भ्रष्टा न वा देवान् बालाख्याननुयाम्यहं। २३
कथमेतादृशं वाक्यं गदितुं शक्यते त्वया॥
स्वचरित्रं निरीक्षस्व निम्नभूमौ त्वया कृतं।

तावकीनक्रियायाश्च सुपर्य्यालोचनं कुरु ॥
त्वमुष्ट्री लघुपादेव वक्रगत्यवलम्बिनी ।
२४ तुल्या वा वन्यगर्द्दभ्या याभ्यस्ता भ्रमणे मरौ ॥
यया च स्वाभिलाषस्य वेगाद् वायु र्निपीयते ।
मैथुनाय सचेष्टा सा नियन्तुं केन शक्यते ॥
तान्वन्विच्छति यः कश्चित् क्लामथं स न गच्छतु ।
ऋतुकाले गते तस्याः स तामासादयिष्यति ॥
२५ स्वपादौ रक्ष नग्नत्वात् स्वीयकण्ठञ्च शोषतः ।
इत्युक्ता भाषसे त्वं मां मोघाशा तदसम्भवं ।
परपुंसु मम प्रीतिरनुयास्यामि तानहं ॥
२६ धृतः सन् यादृशीं लज्जां समवाप्नोति तस्करः ।
प्राप्स्यन्ति तादृशीं लज्जाम् इस्रायेलीयवंशजाः ॥
ते च तेषाञ्च राजानस्तेषां मुख्यनरा अपि ।
तेषाञ्च याजकास्तेषां नराश्च भाविवादिनः ॥
२७ भाषन्ते काष्ठखण्डं ते त्वमेवासि पिता मम ।
त्वमस्मत्प्रसवित्रीति शिला तैश्चाभिधीयते
यतो मां स्वीयपृष्ठं ते दर्शयन्ति न चाननं ।
विपत्काले तु वक्ष्यन्ति समुत्तिष्ठाभिरक्ष नः ॥
२८ ईश्वरास्तव ते कुत्र स्वार्थं ये निर्म्मितास्त्वया ।
उत्तिष्ठन्तां त एव त्वां विपत्कालेऽभिरक्षितुं ।
यिहूदास्तव यावत्यः पुर्य्यस्तावन्त ईश्वराः ॥
२९ यूयं केन निमित्तेन विवदध्वे मया सह ।
सर्व्वे मत्त्यागिनो यूयमिति ब्रूते परेश्वरः ॥
३० युष्मत्पुत्रान् वृथाताडयं न तैः शास्तिरगृह्यत ।
घातिसिंह इवाग्रासीत् खड्गो वो भाविवादिनः ॥
३१ हे कुवंशाः परेशस्य वाग् युष्माभिरवेक्ष्यतां ।
इस्रायेलं समुद्दिश्याहं किमासं मरुस्थलं ।
किमासं तस्य सम्बन्धे देशो वा तमसावृतः ॥
मत्प्रजाभिः कुतो हेतोरुच्यते प्रभवो वयं ।
इतः पश्चाद् वयञ्च त्वां नोपस्थास्यामहे पुनः ॥
३२ कन्या किं विस्मरेद् भूषां नवोढा वा स्वमेखलाः ।

मत्प्रजानां स्मृतिभ्रष्टो ऽस्मि त्वसङ्ख्यदिनान्यहं ॥
त्वया कामानुवर्त्तिन्या कीदृक् सद्वर्त्म निर्म्मितं। ३३
तत् कृत्वा तु विपन्नो ऽपि त्वन्मार्गे वर्त्म दर्शितं ॥
त्वद्वस्त्रस्य दशास्वासीद् दीननिर्दोषिणामसृक्। ३४
न मयोत्खन्य दृष्टं तत् सर्व्वस्थानेष्वविद्यत ॥
त्वयेदं गद्यते वाक्यं दोषहीना यतो ऽस्म्यहं। ३५
परावर्त्तिष्यते मत्तस्तस्य कोपो न संशयः ॥
नैवाकारि मया पापमिति त्वं भाषसे यतः।
पश्य तत्कारणादेव विवदिष्ये त्वया सह ॥
परिवर्त्तयितुं मार्गं त्वं कुतो ऽसीदृगुत्सुका। ३६
लज्जां यथाश्शुरादाप्ता मिसरो ऽपि तथाप्स्यसि ॥
मूर्द्ध्नि शोकात् करौ दत्त्वा त्वं ततो ऽपि निरेष्यसि। ३७
यतो विश्वासभूम्यस्ते परेशेन निराकृताः।
नैव तासां सहायत्वात् त्वं सिद्धार्था भविष्यसि ॥

---

३ तृतीयोऽध्यायः।

१ यिहूदाया वेश्यावद् आचरणं ६ इस्रायेलश्च तद्रूपाचरणं ११ तदीयजनाम् प्रती-
श्वरस्य निवेदनं प्रतिज्ञा च २१ तेषाम् अनुतापो दोषस्वीकरणञ्च।

परेशेनोच्यते पश्य पत्नी पत्या निराकृता। १
त्यक्ता तत्सङ्गमन्यस्य भर्त्तुर्भार्य्या भवेद् यदि ॥
तर्हि किं स पतिस्तस्यै परावर्त्तिष्यते पुनः।
तथा तेन कृते देशः किं नामेध्यो भविष्यति ॥
सार्द्धं जारैरनेकैस्तु वेश्यावृत्तिः कृता त्वया।
तथाप्येहि पुनर्मह्यमिति ब्रूते परेश्वरः ॥
पर्व्वतान् प्रति दृक्पातं कृत्वा त्वं प्रविलोकय। २
मैथुनं यत्र नाकार्षीस्तत् स्थानं कुत्र विद्यते ॥
त्वं तान् प्रत्यैक्षथा मार्गं मरौ दस्युर्यथारविः।
स्ववेश्यात्वादिपापेन त्वया देशः कलङ्कितः ॥
संहृतास्त्वत्त आसारा वर्षकालश्च नाभवत्। ३
त्वन्तु वेश्याललाटत्वान्नाकरो लज्जने मतिं ॥

४ अद्यारभ्याङ्कयन्ती मां किं न जल्पसि मत्पितः।
मम यौवनकालस्य त्वमासी हृदयेश्वरः॥
५ भवान् किं चिरमन्युः स्यात् किं वा कुप्येन्निरन्तरं।
पश्येत्थं भाषमाणापि दुर्वृत्तासि यथाबलं॥
६ अनन्तरं योशियस्य राजत्वकाले परमेश्वरो मामवादीत्,
किं त्वयोन्मार्गगामिन्या इस्रायेलः क्रियेक्षिता।
भ्राम्यन्त्युच्चगिरेरग्रं हरिद्वृक्षस्य वा तलं।
सा प्राप्नोद् यत्र तत्रैव वेश्यावृत्तिं समाचरत्॥
७ मया चोक्तमियं सर्व्वम् एतत् कृत्वापि मां प्रति।
पर्य्यावर्त्तिष्यते पश्चात् सा तु नैवागमत् पुनः।
छाद्मिकी भगिनी तस्या यिहूदा तद् व्यलोकयत्॥
८ गर्हित्वोन्मार्गगामिन्या इस्रायेलो रतार्थितां।
सन्त्यक्ता सा मया तस्यै त्यागपत्रमदायि च॥
तथापि छाद्मिकी तस्या यिहूदानामिका स्वसा।
न सन्त्रस्य तथा गत्वा वेश्याभूत् पश्यतो मम॥
९ स्ववेश्यात्वस्य चाख्यात्या देशमप्यकलङ्कयत्।
प्रस्तरैः काष्ठखण्डैश्च सहाकार्षीद् रतिक्रियां॥
१० तथापि छाद्मिकी तस्या यिहूदा नामिका स्वसा।
नैवाखण्डेन चित्तेन किन्तु मिथ्योक्तिभावतः।
मां प्रत्यागात् पुनर्व्वारमिति ब्रूते परेश्वरः॥
११ अपरं परमेश्वरो मां जगाद, छाद्मिक्या यिहूदात उन्मार्गगामिनी-
१२ इस्रायेल् आत्मधार्म्मिकतां सप्रमाणामकार्षीत्। त्वं गत्वोत्तरदिशं प्रत्य-
तानि वाक्यानि घोषय, यथा,
उन्मार्गगामिनीस्रायेल् त्वं प्रत्यायातुमर्हसि।
भाषते भारतीमेतां स्वयमेव परेश्वरः॥
अप्रसन्नं मुखं युष्मान् दर्शयिष्याम्यहं नहि।
यस्मात् प्रसादशीलोऽहमिति ब्रूते परेश्वरः।
नैवाहं शाश्वतं कालं यावत् क्रोधं करोमि हि॥
१३ त्वं स्वकीयापराधं तम् अनुजानीहि केवलं।
स्वप्रभौ परमेशे यद् भूत्वा विश्वासघातिनी।
सर्व्वहरित्तरो मूले परेषु व्यसृजो गतिं।

मद्वाक्यां वधिरा यूयमिति ब्रूते परेश्वरः॥
हे मत्यागिसुता यूयं पुनरायातुमर्हथ। १४
इति परेश्वरो ब्रूते नाथो युष्माकमस्म्यहं॥
नगरादेकमादाय वंशतो वा जनद्वयं।
इत्थमेव करिष्यामि युष्मान् सीयोन्युपस्थितान्॥
प्रदास्यामि च युष्मभ्यं पालकान् मदभीप्सितान्। १५
त युष्मान् पालयिष्यन्ति ज्ञानेन पाटवेन च॥
इत्थं देशे यदैधिता बहुवंशा भविष्यथ। १६
तदा नियममञ्जूषा परेशस्येति वाग् जनैः।
नैव गदिष्यते भूय इति ब्रूते परेश्वरः॥
नैवारोक्ष्यति चित्तं सा न वा स्मारिष्यते पुनः।
नानुकाङ्क्षिष्यते वा सा न वा निर्म्मास्यते पुनः॥
तस्मिन् काले यिरूशालम् नगरीयश्च मानवैः। १७
आसनं परमेशस्य नाम्नैतेनाभिधास्यते॥
मनुष्याः सर्व्वजातीया गत्वा तां यिरूशालमं।
तत्र परेशितु र्नाम्ने करिष्यन्ति समागमं।
न पुनः स्वकुचित्तस्य चाचरिष्यन्त्यबाध्यतां॥
इस्रायेलीयवंशेन सङ्गिना परिवारितः। १८
तस्मिन् काले यिहूदीयो वंशो यात्रां करिष्यति॥
उत्तरस्थितदेशाच्च वः पितृभ्यो ऽधिकारवत्।
मया दत्तमिदं देशं तावेकत्रागमिष्यतः॥
मयोक्तं सन्ततिश्रेण्यां कथं त्वां स्थापयाम्यहं। १९
कथं तुभ्यं प्रदास्यामि देशमेनं मनोहरं।
न्रजाते र्देशरत्नानां श्रेष्ठरत्नस्य भोगितां॥
पुनरुक्तं मया त्वं मां हे तातेत्यभिधास्यसि।
मदनुव्रजनान्नैव परावर्त्तिष्यसे पुनः॥
परमेशस्तु वक्तीदं यथा पत्यसती पता। २०
मय्यभक्तास्तथा यूयम् इस्रायेलीयवंशजाः॥
गिरीणामुच्चपृष्ठेषु कर्णौ वाण्युपलभ्यते। २१
इस्रायेलीयवंशानां प्रार्थनावद्रोदनं॥
यतो ऽजायन्त ते सर्व्वे वक्रमार्गावलम्बिनः।

स्वप्रभोः परमेशस्य विस्मृतिं ते जना गताः॥
२२ प्रत्यागच्छत हे यूयं पुत्रा उन्मार्गगामिनः।
युष्मदुन्मार्गगामित्वं प्रतिकारिष्यते मया॥
अत्र विद्यामहे पश्य तुभ्यं प्रत्यागता वयं।
यतो हेतोस्त्वमेवासि नः प्रभुः परमेश्वरः॥
२३ नूनं वृथा गिरिभ्याशा समूहे वा ककुद्मतां।
इस्रायेलो भवेत् त्राणं नः प्रभौ परमेश्वरे॥
२४ अस्मद्यौवनमारभ्य नः पितॄणामुपार्जितं।
श्रमजं सकलं वित्तं तेषां मेषान् गवां व्रजान्।
पुत्रांस्तेषाञ्च पुत्रीश्च तल्लज्जास्पदमग्रसत्॥
२५ लज्जा शयनमस्माकम् अस्मदाच्छादनं त्रपा।
आबाल्यादद्य पर्य्यन्तं नः प्रभोः परमेशितुः।
प्रतिकूले यतो ऽस्माभि र्नस्तातैश्चापराध्यते।
अस्मत्प्रभोः परेशस्य न चानुश्रूयते स्वरः॥

---

४ चतुर्थोऽध्यायः।

१ ईश्वरस्य प्रतिज्ञा ३ यिहूदां प्रति तस्य विनयवाक्यं भविष्यद्दुःखस्य प्रकाशः १० यिरिमियस्य कथा ११ यिहूदायाः शत्रूणां वर्णनं १९ तत्कारणाद् यिरिमियस्य दुःखं २२ लोकानामज्ञानता २३ यिरिमियस्य दर्शनं २७ लोकानां दुःखानि च।

१ हे इस्रायेल् परेशेन वाक्यमेतन्निगद्यते।
प्रत्यावर्त्तितुमिच्छेश्चेत् प्रत्यावर्त्तस्व मां प्रति॥
मदीयदृष्टितो दूरं गर्हणीयक्रियास्तव।
त्वया यद्यपसार्य्यन्ते न भ्रमिष्यस्यनाश्रयः॥
२ अमरः परमेशो ऽस्तीत्युदित्वा सत्यभावतः।
न्यायतो धर्म्मतश्च त्वं यदा दिव्यं करिष्यसि॥
तदानीं समभिज्ञाय तमेवाशिष आकरं।
तस्य श्लाघां करिष्यन्ति सर्व्वजातीयमानवाः॥
३ यिहूदीयमनुष्यांस्तु यिरूशालमनामकं।
नगरञ्च ब्रवीतीमां भारतीं परमेश्वरः।

अन्यथा कृष्यतां वो भूः कण्टकेषूप्यतां नहि ॥
परमेश्वरमुद्दिश्य स्वत्वक्छेदं विधाय च। ४
हे मनुष्या यिहूदीया हे यिरूशालमाश्रयाः।
युष्माभिः स्वीयचित्तानां यत्नात् चर्म्मापसार्य्यतां ॥
न चेद् अग्निवदुत्पत्य क्रोधे प्रज्वलिते मम।
दोषाद् वः कर्म्मणां को ऽपि तं न निर्वापयिष्यति ॥
यिहूदादेश आख्यात भाषध्वं यिरूशालमि। ५
तूरीवाद्येन युष्माभि र्देशे प्रचार्य्यतां वचः ॥
यथाशक्त्युच्चशब्देन वाक्यं विज्ञाप्यतामिदं।
समायात प्रवेक्ष्यामो दुर्गाण्याश्रयवद् वयं ॥
सियोनं प्रति याचार्थं यूयं तोलयत ध्वजं। ६
यतध्वमाश्रयं प्राप्तुं मा विलम्बध्वमध्वनि ॥
यतो हेतोरनिष्टञ्च विनाशञ्च महाद्भुतं।
उद्यतो ऽस्मि समानेतुमहमुत्तरदेशतः ॥
उत्थितो गहनात् सिंहो जातीनां यो विनाशकः। ७
स प्रयाणं समारभ्य स्वस्थानाद्बहिरागतः ॥
इच्छेयं तस्य यत् तेन तव देशे विनाशिते।
नगर्य्यस्ते स्युरुच्छिन्ना अभावाद् वासकारिणां ॥
युष्माभिः शाणवस्त्रेण बद्धा स्वीयकटीस्ततः। ८
क्रियतां शोक उच्चैश्च विलापः संविधीयतां।
यदस्मत्तः परेशस्य कोपाग्नि र्न निवर्त्तते ॥
हृदयं भूमिपालस्य पतीनां हृदयानि च। ९
तस्मिन् दिने ऽवसत्स्यन्तीति ब्रूते परमेश्वरः ॥
याजकाश्च भविष्यन्ति तदानीं विस्मयाकुलाः।
भविष्यद्वादिनश्चापि स्तम्भिष्यन्ते चमत्कृताः ॥
तदानीं मयावादि, १०
हा प्रभो परमेश त्वं नूनमेतान् जनान् प्रति।
यिरूशालम्पुरीञ्चेमां प्रति कृत्वा प्रवञ्चनां ॥
युष्माकं भविता शान्तिरिति वाक्यमभाषथाः।
प्राणवियोगपर्य्यन्तं खड्गाघातस्तु जायते ॥
तस्मिन् काल इदं वाक्यम् एतद्देशनिवासिनः। ११

जनान् प्रति यिरूशालम्पुरञ्च प्रति वक्ष्यते ॥
मरुस्थाद्रिभ्य आयाति मत्प्रजानां पुरीं प्रति।
उष्णो वायु र्न शस्यानां निष्पावाय न शुद्धये ॥
१२ एतस्माद् बलवान् वायुः समायाति ममाज्ञया।
अहमेव विचाराज्ञा अधुना निगदामि तान् ॥
१३ स पश्याभ्र इवोदेति तद्रथा घूर्णवायुवत्।
उत्क्रोशेभ्यो महावेगाः सन्ति तस्य तुरङ्गमाः।
हा हा हता वयं यस्माद् विनाशो न उपस्थितः ॥
१४ त्राणार्थं हे यिरूशालम् त्वं प्रमार्ज्ज मलं हृदः।
कतिकालमसच्चिन्तास्त्वं स्वान्ते वासयिष्यसि ॥
१५ ध्वनिः संश्रूयते दानाद् वार्त्तावाहस्य कस्यचित्।
विघोषयत्यनिष्टञ्च कश्चिद् इफ्रयिमाद्रितः ॥
१६ अन्यजातिषु युष्माभिः समाचारो निवेद्यतां।
यिरूशालममध्येतत् सुस्पष्टञ्च प्रचार्य्यतां ॥
दूरदेशात् समायान्ति जना दुर्गावरोधिनः।
सिंहनादं करिष्यन्तो यिहूदायाः पुराण्यधि ॥
१७ ताञ्च संवेष्टयिष्यन्ति ते यथा क्षेत्ररक्षिणः।
अद्रुहत् सा यतो मह्यमिति ब्रूते परेश्वरः ॥
१८ तवाचारात् क्रियाभ्यश्च त्वया लब्धमिदं फलं।
तव दुर्गतिरस्तीयं तीव्रा हृच्छेदिनी च सा ॥
१९ हा नाडी मम हा नाडी हृत्पिण्डं व्यथते मम।
मम विक्लवति स्वान्तं मया मौनं न सह्यते ॥
हे मदात्मन् यतो हेतोस्त्वं तूर्य्याः श्रुतवान् ध्वनिं।
रणस्य सिंहनादञ्च त्वमुपालब्धवानसि ॥
२० उच्छेदात् परमुच्छेदो भूयो भूयो विघोष्यते।
कृत्स्नदेशो यतो हेतोः सर्व्वनाशं प्रगच्छति ॥
विनाशं सहसा यान्ति मम वस्त्रगृहाणि हि।
यान्ति निमेषमात्रेण नाशं यवनिका मम ॥
२१ कतिकालं मया केतुः सन्द्रष्टव्यो भविष्यति।
श्रोतव्यं कतिकालञ्च तूरीवाद्यं भविष्यति ॥
२२ मत्प्रजा नूनमज्ञाना नाभिजानन्ति मामपि।

बालकाः सन्ति मूढास्ते विवेकेन विवर्जिताः।
ज्ञानिनस्ते कदाचार सदाचार त्वकोविदाः॥
निरीक्षिता मया भूमिः शून्या घोरा च दृश्यते। २३
निरीक्षितं मया व्योम तस्याप्यन्तर्हिता प्रभा॥
निरीक्षिता मया शैलाः सकम्पाः प्रतिभान्ति ते। २४
भूधराणाञ्च सर्व्वेषां जायते भूरिवेपथुः॥
सुनिरीक्ष्य मया दृष्टं नरः को ऽपि न वर्त्तते। २५
आकाशस्थविहङ्गाश्च सर्व्वे दूरं पलायिताः॥
सुनिरीक्ष्य मया दृष्टम् उद्यानान्यभवन् मरुः। २६
देशस्थाः सकलाः पुर्य्यो भग्नताञ्च समाप्नुवन्।
समक्षं परमेशस्य तत्कोपस्य प्रतापतः॥
तथापि परमेशेन वाक्यमेतन्निगद्यते। २७
कृत्स्नो ध्वंसिष्यते देशो न त्वन्तं नेष्यते मया॥
शोकिष्यति ततो भूमिरूर्द्धे कृष्णाम्बरं नभः। २८
अहमुक्त्वा यतः कल्पे न खिद्ये नापयामि वा॥
हयारोहिमनुष्याणां धनुष्मताञ्च शब्दतः। २९
नगरीवासिनः सर्व्वे विधास्यन्ते पलायनं॥
विपिनं ते प्रवेक्ष्यन्त्याश्रयिष्यन्ति च भूधरान्।
त्यक्ष्यते नगरी कृत्स्ना को ऽपि तत्र न शेक्ष्यते॥
भविष्यसि त्वमुच्छिन्ना किं करिष्यसि हे पुरि। ३०
शोणवासोभिराच्छन्ना भूषिता स्वर्णभूषणैः।
अञ्जनेन विदीर्णाक्षी वृथा कान्त्यै यतिष्यसे।
कामुकैस्त्वां निराकृत्य वधस्ते चिन्तयिष्यते॥
संशृणोम्यहमुत्क्रोशं प्रसविन्याः स्त्रिया इव। ३१
यादृगादिप्रसूताया रावस्तादृक् स मन्यते॥
युवती या सियोनाख्या सार्त्तनादं करोति तं।
त्यजन्ती दीर्घनिश्वासं स्वकरौ विस्तृणोति सा।
हा हतास्मि मम प्राणा अवसीदन्ति घातिभिः॥

---

५ पञ्चमोऽध्यायः।

१ पापकारणात् शास्ते र्भविष्यद्वाक्यं १० तस्याः शास्ते र्विशेषवर्णनं २० लोकानां पापस्य विशेषवर्णनं ३० मिथ्याभविष्यद्वादिनां कथनञ्च।

१ यूयं पर्य्यटनं कृत्वा मार्गेषु यिरूशालमः।
वीक्ष्य तत्सन्निवेशेषु जिज्ञासध्वं सुयत्नतः।
युष्माभिः शक्यते तत्र प्राप्तुं न वेति सज्जनः॥
धर्म्मकृत् सत्यसन्धश्च तत्र चेद् वर्त्तते नरः।
अहं तर्हि करिष्यामि क्षमां तां नगरीं प्रति॥
२ परमेशो ऽमरो ऽस्तीति वाक्यमुक्तापि तै र्जनैः।
केवलं वितथोक्त्यर्थं शपथः स विधीयते॥
३ हे परेश्वर दृष्टिस्ते किं सत्यं नानुवर्त्तते।
ते मनुष्यास्त्वया तुन्ना व्यथितास्त्वभवन्नहि।
ते त्वया नाशमानीता निराकार्षुस्तु शासनं॥
स्वाननानि कठोराणि कृत्वा शिलोच्चयादपि।
ते प्रत्यावर्त्तितुं तुभ्यं प्राकाशयन्ननिच्छुतां॥
४ मया चोक्तम् इमे नूनं दरिद्रा मन्दबुद्धयः।
न जानन्ति प्रभो र्मार्गं धर्म्मं स्वीयेश्वरस्य वा॥
५ महतामन्तिकं गच्छन्नालपिष्यामि तानहं।
ते जानन्ति प्रभो र्मार्गं धर्म्मं स्वीयेश्वरस्य च।
नूनं तै र्युगपद् भग्नं युगं छिन्नञ्च बन्धनं॥
६ अतो हेतो र्वनादेत्य केशरी तान् हनिष्यति।
वृकः सायन्तनस्तेषां विनाशञ्च करिष्यति॥
रक्षी तन्नगराणाञ्च चित्रव्याघ्रो भविष्यति।
यः कश्चिद्बहिरायाति स विदीर्णो भविष्यति॥
अपराधा यतस्तेषां सञ्जाता बहुसङ्ख्यकाः।
तेषाञ्चोन्मार्गगामित्वम् अवाप्नोत् प्रभविष्णुतां॥
७ इत्थं सति क्षमां कर्त्तुं त्वय्यहं शक्नुयां कथं।
पश्य त्वदीयसन्तानाः सर्व्वे मां परितत्यजुः।
शपथो ऽनीश्वराणाञ्च नाम्ना तैः संविधीयते॥
मया सन्तोषिताः सम्यक् ते भूत्वा व्यभिचारिणः।

गत्वा कुर्व्वन्ति वेश्याया जनाकीर्णं निवेशनं॥
तुरङ्गा इव पुष्टाङ्गास्ते प्रत्यूषे महोद्यमाः। ८
उच्चैर्ह्रेषन्त एकैकः स्वमित्रस्य स्त्रियं प्रति॥
परेशो ब्रूत एतेषां किं न दास्याम्यहं फलं। ९
दण्डेनैतादृशो जातेः किं न तर्प्स्यति मे मनः॥
तस्याः प्राकारमारुह्य युष्माभिः क्रियतां क्षयः। १०
न तु युष्माभिरुद्यानं तस्या अन्तमवाप्यतां॥
युष्माभिरपसार्य्यन्तां लतास्तस्याः सुविस्तृताः।
यतो हेतोः परेशस्य सन्ति ते तन्तवो नहि॥
इस्रायेलीयवंशेन यिहूदीयान्वयेन च। ११
मयि सम्यक् छलो ऽकारीति ब्रूते परमेश्वरः॥
परमेशमपह्नाय ते सञ्जल्पन्ति नास्ति सः। १२
नास्माभिः प्राप्स्यते ऽनिष्टं न द्रक्ष्येते असिक्षुधे॥
वाता इव भविष्यन्ति भविष्यद्वादिनो नराः। १३
तेषु दैववचो नास्ति तेष्वेवैतत् फलिष्यति॥
तस्मादित्थं ब्रवीतीशः सेनाध्यक्षः परेश्वरः। १४
एतै र्वाक्यमवादीदं ततो हेतो र्विलोक्यतां॥
त्वद्वक्त्रे मम वाक्यानि विधास्यामि हुताशनं।
जनानेतांश्च काष्ठानि स वह्निस्तान् समत्स्यति॥
इस्रायेल्वंश पश्य त्वं वक्त्येतत् परमेश्वरः। १५
जाति र्युष्मद्विपक्षैका दूरादानेष्यते मया॥
सा हि जाति र्बलिष्ठास्ति सा जातिश्च पुरातना।
तद्भाषां त्वं न जानासि तद्वाक्यं त्वं न बुध्यसे॥
तुल्यास्तस्याः शराधाराः शवाधारैरनावृतैः। १६
यावन्तश्च जनास्तस्याः सर्व्वे वीरा हि सन्ति ते॥
सा जातिस्तव शस्यञ्च त्वत्पूपांश्च ग्रसिष्यते। १७
सा जातिस्तव पुत्रांश्च त्वत्पुत्रीश्च ग्रसिष्यते॥
व्रजान् सा तव मेषाणां गवांश्चापि ग्रसिष्यते।
द्राक्षोडुम्बरवृक्षांस्ते सा च जाति र्ग्रसिष्यते॥
प्राचीरवेष्टितत्वाच्च यास्त्वद्विश्वासभूमयः।
तव ता नगरीश्चापि सासिना नाशयिष्यति॥

१८ युष्मांस्त्वन्तं न नेष्यामि नैव तेषु दिनेष्वपि।
भाषते भारतीमेतां स्वयमेव परेश्वरः॥
१९ सर्व्वमेतत् कुतो ऽस्मासु प्रभु र्नः परमेश्वरः।
करोतीति जनैरेतैः पृष्टस्त्वं तान् वदिष्यसि॥
स्वदेशे मां यथा त्यक्त्वा सेवध्वे परदेवताः।
तथा यूयं विदेशस्थाः सेविष्यध्वे विदेशजान्॥
२० युष्माभि र्ज्ञाप्यतामेतद् याकूबीयान्वयं प्रति।
यिहूदादेशमध्ये ऽपि वाक्यमेतच्च घोष्यतां॥
२१ शृणुतैतज्जना मूढा विवेकेन विवर्जिताः।
नेत्रयोस्तिष्ठतोरन्धा वधिराः कर्णयोः सतोः॥
२२ परमेश्वर आहैतत् किं मत्तो ऽपि न भेष्यथ।
मत्साक्षादपि युष्माकं त्रासः किं न जनिष्यते॥
नित्यस्थायिविधानेन सिकताः कृतवानहं।
महार्णवस्य सीमानम् अशक्यां तेन लङ्घितुं॥
चेष्टा दोधूयमानानाम् ऊर्म्मीणामत्र निष्फला।
तरङ्गास्तस्य गर्ज्जन्तु सा तै र्नातिक्रमिष्यते॥
२३ धर्म्मत्यागि प्रतीपञ्च वंशस्यैतस्य मानसं।
धर्म्ममार्गं परित्यज्य ते हि मत्तः प्रतस्थिरे॥
२४ स्वचित्ते तैश्च नावादि भेष्यामः परमेश्वरात्।
स एवास्तीश्वरो ऽस्माकम् अस्मभ्यं वृष्टिदायकः॥
स्वीयकाले ऽग्रिमां वृष्टिम् उत्तराञ्च स यच्छति।
शस्यकालिकसप्ताहान् प्रतिज्ञावच्च रक्षति॥
२५ युष्माकमपराधैस्त्वभवत् तत् सर्व्वमन्यथा।
युष्मत्पापक्रियाभिश्च युष्मत्तो मङ्गलं हृतं॥
२६ विद्यन्ते मत्प्रजानां हि मध्ये दुर्वृत्तमानवाः।
निरीक्षन्ते नताङ्गास्ते धूर्त्ताः शाकुनिका इव।
कूटयन्त्रञ्च संस्थाप्य तत्र बध्नन्ति मानवान्॥
२७ गेहास्तेषां छलैः पूर्णा वीतंसः पक्षिभि र्यथा।
ततो हेतो र्महाभागा धनिनश्च भवन्ति ते॥
२८ पीनाङ्गास्ते विराजन्ते कुवचः स्रावयन्ति च।
न निर्णयन्ति ते न्यायं नानाथस्य शिशोरपि।

श्रीयुक्तैस्तै र्दरिद्राणां विचारो न विधीयते॥
परेशो ब्रूत एतेषां किं न दास्याम्यहं फलं। २९
दण्डेनैतादृशो जातेः किं न तप्स्यति मे मनः॥
आचारो दृश्यते देशे नाशी रोमाञ्चकारकः॥ ३०
प्रवदन्त्यनृतं वाक्यं भविष्यद्वादिनो नराः। ३१
याजकाश्च नयात् तेषां कुर्व्वन्ते देशशासनं॥
एतादृश्याम् अवस्थायां सन्तुष्यन्ति च मत्प्रजाः।
तस्यास्तु परिणामे किं युष्माभिः प्रकरिष्यते॥

---

६ षष्ठोऽध्यायः।

१ लोकानां नानापापप्रकाशनं १६ पापात् प्रत्यावर्त्तनाय विनयः, अप्रत्यावर्त्तनाद् दुःखस्य भविष्यद्वाक्यं २७ यिरिमियं प्रतीश्वरस्य कथनञ्च।

हे विन्यामीनवंशीया मध्यतो यिरूशालमः। १
पलायध्वं तिकोये च तूर्य्याः श्रावयत ध्वनिं॥
वैथक्केरम ऊर्द्ध्वे च प्रत्यक्षीकुरुत ध्वजं।
दुरवस्था महापच्च समुदेत्युत्तराद् यतः॥
इयं कन्या सियोनाख्या सुन्दरी सुखभोगिनी। २
अवसन्नां तु तामेव कर्त्तुमस्म्यहमुद्यतः॥
सव्रजा व्रजपाला हि समायास्यन्ति तां प्रति। ३
दूष्याणि स्थापयिष्यन्ति समन्ताच्च तदन्तिकं।
एकैकश्च निजस्थानं चारयन् नाशयिष्यति॥
यूयं तस्या विरोधेन युद्धमेवानुतिष्ठत। ४
समुत्तिष्ठत मध्याह्ने युद्धयात्रा विधीयतां॥
असुभन्त्विदमस्माकं यद् दिनान्तमुपस्थितं।
यच्च प्रादोषिकं दैर्घ्यं छायया समवाप्यते॥
समुत्तिष्ठत यामिन्यां युद्धयात्रा विधीयतां। ५
तस्या अट्टालिकानाञ्चास्माभिः संसाध्यतां क्षयः॥
यतो हेतो र्जगादैतत् सेनाध्यक्षः परेश्वरः। ६
युष्माभिः शाखिनश्छित्वा विरुद्धं यिरूशालमः।
मृत्तिकायाश्चयः प्राच्चः सयत्नं सम्प्रयुज्यतां॥

यतो निरूपितो यस्या दण्डः सैवास्ति सा पुरी।
यस्मादभ्यन्तरं तस्याः कृत्स्नं निष्ठुरतामयं॥
७ यथा स्वकीयतोयानि प्रहिः स्रावयति स्वयं।
तथा स्वकीयपापानि सापि स्रावयति स्वयं॥
श्रूयते मध्यतस्तस्या दौरात्म्यद्रोहयो रवः।
कष्टं क्षतञ्च जायेते मत्समक्षं निरन्तरं॥
८ श्रूयतां हे यिरूशालम् सुशिक्षा गृह्यतां त्वया।
न चेन्मन्मनसस्त्वत्तो विभेदः सम्भविष्यति।
त्वाञ्चोत्सन्नां करिष्यामि भूमिं निवासिवर्ज्जितां॥
९ भाषते भारतीमेतां सेनाध्यक्षः परेश्वरः।
शेषं द्राक्षालताया हि फलं सञ्चीयते यथा।
इस्रायेलीयवंशस्य शेषः सञ्चेष्यते तथा॥
हे शत्रो निजहस्तं त्वं भूयो भूयः प्रसारय।
यथा द्राक्षाफलच्छेत्ता तद्ग्राहिभाजनं प्रति॥
१० कमालक्ष्य मयादेशे कृते श्रोष्यन्ति मानवाः।
अच्छिन्नचर्म्मकर्णास्ते श्रोतुं तैः शक्यते नहि॥
पश्याभूत् परमेशस्य वाक्यं तेषां त्रपास्पदं।
तत्र तेषाञ्च सन्तोषो न कथञ्चन जायते॥
११ परमेशस्य कोपेन परिपूर्णो ऽभवन्त्वहं।
नैव शक्नोम्यहं स्वान्ते तं सन्धारयितुं पुनः॥
मार्गे क्रीडत्सु बालेषु कुमाराणां सभासु च।
एकस्मिन्नेव काले तं पातयिष्याम्यहं ततः॥
भार्य्यया सहितो भर्त्ता तदानीञ्च धरिष्यते।
जीर्णावस्थामवाप्तेन सार्द्धं वृद्धो धरिष्यते॥
१२ सक्षेत्राणि सभार्य्याणि युगपत् सदनानि च।
तेषां सङ्क्रामयिष्यन्ते मयान्येष्वधिकारिषु॥
यतो ऽहं प्रातिकूल्येन ह्येतद्देशनिवासिनां।
हस्तं प्रसारयिष्यामीति ब्रूते परमेश्वरः॥
१३ यस्मात् क्षुद्रा महान्तश्च सर्व्वे लोभात् तृषातुराः।
आचरन्ति छलं सर्व्वे भविष्यद्वादियाजकाः॥
१४ मत्प्रजारूपकन्यायाः शमयन्ति क्षतं वहिः।

तथा शान्त्यामजातायां शान्तिः शान्ति वदन्ति ते ॥
ते ऽकार्षुर्घृण्यमाचारं किं लज्जामगमंस्ततः । १५
न कथञ्चिदलज्जन्त ते व्रीडायामकोविदाः ॥
अतो निपतितव्यं ये निपतिष्यन्ति तैः सह ।
यस्मिन् काले मया तेभ्यो योग्यं दापयिष्यते फलं ।
तदामी ते स्खलिष्यन्तीति ब्रूते परमेश्वरः ॥
यूयं वर्त्मसु संस्थाय पश्यन्तः परिपृच्छत । १६
कुत्र ते प्राक्तना मार्गाः कुत्र पन्थाः स उत्तमः ॥
ज्ञात्वा गच्छत तत्रैव चित्तशान्तिं तदाप्स्यथ ।
परेशेनेत्थमुक्ते तै र्न यास्याम इतीरितं ॥
मयाधिकृत्य युष्मासु नियुक्ता उपदर्शकाः । १७
तेषां तूरीध्वनिं यूयं शृणुतेत्युदिते मया ।
नैव स श्रोष्यते ऽस्माभिरिति तैः प्रतिभाषितं ॥
अतो हे परजातीया यूयं संश्रोतुमर्हथ । १८
हे सभास्थजनास्तेषाम् अवस्थामवगच्छत ॥
हे धरे शृणु पश्याहम् एतद्वंशीयमानवान् । १९
अनिष्टं प्रापयिष्यामि योग्यं तेषां मतेः फलं ॥
यस्मान्मामकवाक्येषु कर्णपातो न तैः कृतः ।
मम या च व्यवस्था तै र्यस्मात् सापि निराकृता ॥
शिवादेशात् समानीते धूपे किं मे प्रयोजनं । २०
आनीते दूरदेशाद् वा श्रेष्ठे सौगन्धिके नले ॥
होमक्रियासु युष्माकं मम प्रीति र्न वर्त्तते ।
मह्यं वो बलिदानानि न रोचन्ते कथञ्चन ॥
अतो हेतोरिदं वाक्यं भाषते परमेश्वरः । २१
अहं पश्य नियोक्ष्यामि जनेष्वेतेषु बाधकान् ॥
युगपच्च स्खलिष्यन्ति तत्र ताताः सनन्दनाः ।
एककाले विनंक्ष्यन्ति समित्रा देशवासिनः ॥
अधुना भारतीमेतां भाषते परमेश्वरः । २२
निरीक्षध्वं समायान्ति जना उत्तरदेशतः ।
धरण्याः प्रान्तभागेभ्यो महाजातिरुदीर्य्यते ॥
ते धरन्ति धनुःशल्ये निष्ठुरा निर्दयाश्च ते । २३

स्वरेण च गर्ज्जन्ति ते महासागरो यथा ॥
वहन्ते च हयारूढाः सङ्ग्रामार्थं त्वया सह ।
हे सियोनाख्यकन्ये ते व्यूढास्तिष्ठन्ति वीरवत् ॥
२४ वार्त्ता तेषां श्रुतास्माभिरवशा नः करास्ततः ।
वयञ्च शङ्कयाक्रान्ता व्यथया सूतिका यथा ॥
२५ केदारं को ऽपि मा गच्छेत् को ऽपि मार्गेण मा व्रजेत् ।
खड्गपाणि र्यतः शत्रुस्त्रासश्चास्ति समन्ततः ॥
२६ हे मज्जातेः कुमारि त्वं कटौ बधान शाणजं ।
भस्मे लुठ च शोकार्त्ताऽद्वितीयात्मजशोकवत् ॥
स्वनिमित्तं सुतीव्रञ्च विलापं त्वं समाचर ।
यतो विनाशकार्य्यस्मान् अकस्मादाक्रमिष्यति ॥
२७ त्वं नियुक्तो मया दुर्गे मत्प्रजानां परीक्षकः ।
येन ज्ञात्वा परीक्ष्येत तासामाचरणं त्वया ॥
२८ उन्मार्गगामिनां मध्ये ऽधमा उन्मार्गगामिनः ।
सन्ति ते मानवाः सर्व्वे परीवादे च तत्पराः ।
आरकूटश्च लोहश्च ते सर्व्वे सन्ति दूषिताः ॥
२९ भस्त्रायां दह्यमानायां सीसे नष्टे च वह्निना ।
शिल्पिनो गालनं व्यर्थं कलङ्का निःसृता नहि ॥
३० तेषां निराकृतं रूप्यमिति नाम भविष्यति ।
परेशेन यतो हेतोरभवंस्ते निराकृताः ॥

---

७ सप्तमोऽध्यायः ।

१ नानापापानां कारणाद् अनुतापाय लोकानाम् ईश्वरेणाज्ञानं १६ अनुतापे न कृते तेषां दुःखघटननिर्णयः २१ तेषां वलिदानादीनामीश्वरस्याग्राह्यता ३० तोफते तेषां पापस्य शास्तेश्च कथनञ्च ।

१ परमेश्वराद् यिरिमियं प्रति यद् वाक्यं प्रादुरभूत् तदिदं । त्वं पर-
२ मेश्वरीयमन्दिरस्य द्वारे तिष्ठंस्तत्र वाणीमिमां घोषय, यथा, हे
परमेश्वराराधनाय द्वारैरेतैः प्रवेशकारिणः सर्व्वे यिहूदीयजनाः, यूयं
३ परमेश्वरस्य वाक्यं शृणुत । इस्रायेल ईश्वरः सेनाध्यक्षः परमेश्वर

इत्थं ब्रूते, यूयं प्रत्येकं निजाचारं निजक्रियाश्च भद्रीकुरुध्वं तेनाहं
युष्मान् स्थाने ऽस्मिन् वासयिष्यामि। परमेश्वरस्य मन्दिरं परमेश्वरस्य ४
मन्दिरं परमेश्वरस्य मन्दिरमिमानीति मृषावाक्येषु मा विश्वसित।
परन्तु यदि यूयं निजाचारं निजक्रियाश्च भद्रीकुरुथ यदि मिथो न्याय- ५
माचरथ प्रवासिनमनाथं विधवाञ्च न पीडयथ यद्यत्र स्थाने निर्दोषस्य ६
शोणितपातं न कुरुथ निजानिष्टायेतरदेवांश्च नानुचरथ तर्ह्यहम् अत्र ७
स्थाने युष्मत्पूर्व्वपुरुषेभ्यो मया दत्ते देशे युष्मान् अनन्तकालार्थं वासयि-
ष्यामि। पश्यत यूयमनुपकारिषु मृषावाक्येषु विश्वसिथ। चौर्य्यं नर- ८
हत्यां परदारगमनम् अनृतशपथं बालाख्यदेवाय धूपदाहम् अपरिचि- ९
तानामितरदेवानामनुचरणञ्चैतानि समाचरन्तो यूममागत्य मम नाम्ना १०
विख्याते मन्दिरे ऽस्मिन् मम साक्षात् तिष्ठन्तः किं वदिष्यथ निस्तीर्णा
वयम् अतस्तानि सर्व्वाणि गर्हणीयकार्य्याण्यस्माभिः क्रियन्तामिति? मम ११
नाम्ना विख्यात एष प्रासादो युष्माकं दृष्ट्या किं दस्यूनां गह्वरो ऽभूत्?
पश्यताहमपि विलोकयामीति परमेश्वरो भाषते। अतः प्राग् यत्राहं १२
निजनामधेयमवासयं शिलौ स्थितं मम तत् स्थानं गच्छत ममेस्रायेलीय-
प्रजानां दुष्टत्वहेतुना तत् प्रति मया यदकारि तन्निरीक्षध्वञ्च। अतो १३
ऽधुना परमेश्वरो ब्रवीति यूयमेताः क्रिया अकार्ष्ट मयि सयत्नं भाषमाणे
नाश्रौष्ट मयि युष्मानाह्वयति यूयमुत्तरं नादत्त। अतः शिलुं प्रति १४
यादृशमाचारं कृतवानहं तादृशमेवाचारं युष्माकं विश्वासस्थलं मम नाम्ना
विख्यातम् एतन्मन्दिरं प्रति युष्मभ्यं युष्मत्पूर्व्वपुरुषेभ्यश्च मया दत्तम्
एतत् स्थानञ्च प्रति करिष्यामि। यथा चाहं युष्माकं भ्रातॄन् अर्थतः १५
कृत्स्नम् इफ्रयिमीयवंशं निराकृतवान् तथा युष्मान् मम दृष्टितो निरा-
करिष्यामि।

त्वञ्चैतेषां जनानां कृते प्रार्थनां मा कुरु तेषां कृते निवेदनं याञ्चाञ्च १६
मा प्रयुंक्ष्व माञ्च प्रसादयितुं मा प्रवर्त्तस्व यतो ऽहं तव वाक्यं न
ग्रहीष्यामि। यिहूदाया नगरेषु यिरूशालमो मार्गेषु च ते यद् १७
आचरन्ति तत् किं त्वं न पश्यसि? बालका इन्धनानि सञ्चिन्वन्तस्ताता १८
वह्निं ज्वालयन्तो योषितः शक्तुं मृद्नत्यो नभसो महिष्यै पिष्टकान् संस्क-
र्त्तुम् इतरदेवेभ्यः पानीयनैवेद्यान्युत्स्रष्टुम् इत्थं मां बाधितुञ्च यतन्ते।
परमेश्वरो ब्रूते ते किं मां बाधन्ते? किं वा विवर्णमुखा भवितुम् आत्म- १९
बाधनं कुर्व्वते? अतः प्रभुः परमेश्वरो ब्रवीति पश्यत मम क्रोधो मम २०

रोषश्चैतत्स्थानस्योपरि मनुष्यपशूनामुपरि क्षेत्रस्थतरूणां भूम्युत्पन्न-
फलानाञ्चोपरि वर्षिष्यति स क्रोधानलो ज्वलिष्यत्यनिर्व्वाणश्च भविष्यति।
२१ इस्रायेल ईश्वरो यः सेनाध्यक्षः परमेश्वरः स इदं ब्रूते, यूयं स्वीय-
२२ बलिभिः सह होमीयबलीनपि संयुज्य मांसादनं कुरुत। यतोऽहं
यदा युष्माकं पूर्व्वपुरुषान् मिसरदेशाद् बहिष्कृत्यानयं तदा न होमी-
२३ यबलीनधि न वान्यबलीनधि तान् आदिशं। परन्त्विदमेव वाक्यं तान्
आज्ञापयं यूयं मम रवे मनो निधद्ध्वं तेनाहं युष्माकम् ईश्वरो भवि-
ष्यामि यूयञ्च मम प्रजा भविष्यथ, यूयं मदाज्ञापितेन कृत्स्नमार्गेण च
२४ व्रजत तेन मङ्गलमवाप्स्यथ। ते तु न श्रुत्वा कर्णपातञ्च न कृत्वा स्वीय-
दुष्टचित्तजाड्यजां मन्त्रणाम् आचरन् अभिमुखाश्च न भूत्वा पराङ्मुखा
२५ अभवन्। मिसरदेशतो युष्मत्पूर्व्वपुरुषाणां निर्गमनदिनमारभ्याद्य याव-
दहं प्रत्यहं सयत्नं मम सकलदासान् भविष्यद्वादिनो युष्मान् प्रति
२६ प्रेषयामि। जनास्तु न श्रुत्वा कर्णपातञ्च न कृत्वा स्वग्रीवां कठोरीकृत्य
२७ स्वीयपूर्व्वपुरुषेभ्यो ऽपि दुष्टतरा अभवन्। त्वं चेत् तेभ्यः सर्व्वाणीमानि
वचांसि वदेस्तर्हि ते न श्रोष्यन्ति, यदि च तान् आह्वयेस्तर्हि ते तुभ्यम्
२८ उत्तरं न दास्यन्ति। अतस्त्वं तान् ब्रूहि,

स्वप्रभोः परमेशस्य यया न श्रूयते रवः।
न च गृह्यत आदेश इयं सा जातिरस्ति हि।
सत्यतापि विनष्टाभूत् तेषां वक्त्राच्च संहृता॥
२९ कर्तित्वा स्वीयकेशं त्वं स्वतो भूमौ निपात्य च।
विलापं कुरु शैलेषु यस्मात् स्वकोपभाजनं।
इमं वंशं निराकृत्य त्यक्तवान् परमेश्वरः॥

३० परमेश्वरो ब्रूते यिहूदावंशीयजनै र्मम साक्षात् कुत्सिताचारो ऽकारि
मम नाम्ना विख्यातं मन्दिरम् अमेध्यीकर्त्तुं यतित्वा तैस्तन्मध्ये स्वीयगर्ह-
३१ णीयप्रतिमाः स्थापिताः, हिन्नोमसुतस्योपत्यकायाञ्च तोफताख्यं भृगुस्थानं
निर्म्मितं मया यच्च नाज्ञापितं मनसापि नोपलब्धं तत् कार्य्यम् अर्थतो
३२ ऽग्निना स्वपुत्त्रपुत्त्रीणां दाहं कर्त्तुं प्रवृत्तिस्तैः कृता। अतः परमेश्वरो ब्रूते
पश्यतायान्ति दिनानि येषु तोफतं हिन्नोमसुतस्योपत्यका वा नाम न
पुनः प्रयोक्ष्यते परन्तु हत्योपत्यकेति तस्य स्थानस्य नाम भविष्यति
३३ स्थानाभावाच्च जनास्तोफते मृतदेहान् निखनिष्यन्ति। एतेषां जनानां
कुणपानि च खेचरपक्षिणां भूचरपशूनाञ्च भक्ष्याणि भविष्यन्ति कोऽपि

तान् न त्रासयिष्यति। अहञ्च यिहूदाया नगरेभ्यो यिरूशालमश्च ३४
मार्गेभ्य आमोदहर्षयो ध्वनिं वरकन्ययो ध्वनिञ्च विरतं करिष्यामि
यतः कृत्स्नो देशो नरशून्यो भविष्यति।

---

८ अष्टमोऽध्यायः।

१ मृतानां जीवताञ्च दुर्दशा ४ काठिन्यहेतो र्लोकान् प्रति भर्त्सनं १४ तेषां दुःखविषयकं कथनं १८ तेषां दुःखहेतो र्यिरिमियस्य विलपनञ्च।

परमेश्वरो ब्रूते तस्मिन् काले यिहूदादेशीयराजानामस्थीनि तत्रत्या- १
धिपतीनाम् अस्थीनि याजकानामस्थीनि भाविवादिनामस्थीनि यिरू-
शालम्निवासिनामस्थीनि च जनैः श्मशानेभ्यो बहिष्कृत्य सूर्य्यस्य २
चन्द्रस्य कृत्स्नगगनस्थसेनायाश्च समक्षम् अर्थतस्ते येऽप्रीयन्त यांश्चा-
सेवन्त यांश्चान्वचरन्नन्वैच्छन् प्राणमंश्च तेषां समक्षं विस्तारयिष्यन्ते।
तानि पुन र्न सङ्ग्रहीष्यन्ते न वा निखनिष्यन्ते किन्तु भूपृष्ठस्थसार-
स्वरूपाणि स्थास्यन्ति। सेनाध्यक्षः परमेश्वरो ब्रूत एतस्या दुर्वृत्ताया ३
गोष्ठ्या अवशिष्टा जना यत्र यत्र मया निराकृतास्तत्र सर्व्वस्थाने ये
अवशेक्ष्यन्ते ते शेषजनाः सर्व्वे मृत्युं जीवनाद् वाञ्छनीयं मंस्यन्ते।

त्वन्तु तान् वद, परमेश्वर इत्थमुवाच, ४

पतितानां पुनर्व्वारम् उत्थानं किमसम्भवं।
अपक्रान्तैरशक्यं वा किं प्रत्यागमनं भवेत्॥
यिरूशालमीयलोकानां य एतेषामपक्रमः। ५
नित्यस्थायी कुतो हेतोः स्यात् स तेषामपक्रमः।
ते छले दृढमासक्ताः प्रत्यागन्तुमनिच्छवः॥
सावहितो ऽहमश्रौषं न यथार्थं वदन्ति ते। ६
हा मया किमकारीति यो वदेत् तादृशो जनः।
पश्चात्तापी स्वदौर्जन्याद् एक एव न विद्यते॥
स्वीयधावनमार्गेषु सर्व्वेषां निहितं मनः।
युद्धाकाङ्क्षी रणक्षेत्रे प्रधावंस्तुरगो यथा॥
खेचरो यो वकः सो ऽपि कालान् वेत्ति निरूपितान्। ७
कलध्वनि र्बलाका च भरद्वाजश्च पक्षिणः।
समयं परिरक्षन्ति स्वप्रत्यागमनोचितं।

राजनीतिं परेशस्य न तु जानन्ति मत्प्रजाः॥
८ कथं शक्येत युष्माभि र्गदितुं ज्ञानिनो वयं।
अस्मास्वेव परेशस्य शास्त्रञ्चास्ति समर्पितं॥
नूनं पश्यत शास्त्रिणां या लेखन्यनृतप्रिया।
तया विकृत्य तच्छास्त्रम् अनृतोक्तिमयीकृतं॥
९ ज्ञानिनः प्राप्नुवन् लज्जां ते सन्त्रस्ताभवन् धृताः।
परमेशस्य यद् वाक्यं पश्य तत् तै र्निराकृतं।
अतस्तेषां त्वया ज्ञानं किम्भूतं विद्यते पुनः॥
१० ततो हेतोः परेभ्यो ऽहं तेषां दास्यामि योषितः।
अर्पयिष्यामि तेषाञ्च क्षेत्राण्यन्याधिकारिषु॥
यस्मात् क्षुद्रा महान्तश्च सर्व्वे लोभात् तृषातुराः।
अनृताचारिणः सर्व्वे भविष्यद्वादियाजकाः॥
११ मत्प्रजारूपकन्यायाः शमयन्ति क्षतं वहिः।
तथा शान्त्यामजातायां शान्तिः शान्ति र्वदन्ति ते॥
१२ ते ऽकार्षु र्घृण्यमाचारं किं लज्जामगमंस्ततः।
न कथञ्चिदलज्जन्त ते व्रीडायामकोविदाः॥
अतो निपतितव्यं यै र्निपतिष्यन्ति तैः सह।
यस्मिन् काले मया तेभ्यो योग्यं दायिष्यते फलं।
तदानीं ते स्खलिष्यन्तीति ब्रूते परमेश्वरः॥
१३ अहं तान् संहरिष्यामीति ब्रवीति परेश्वरः।
द्राक्षावल्ल्यां नहि द्राक्षा नोडुम्बराण्युडुम्बरे।
अवस्थास्यन्ति पत्रैश्च जीर्णता प्रगमिष्यते।
अहञ्चाधिकरिष्यामि तेष्वाक्रमणकारिणः॥
१४ कुतो हेतोः समासीना अवतिष्ठामहे वयं।
समागच्छत दुर्गाणि प्रविश्य स्याम नीरवाः॥
अस्मत्प्रभुः परेशो ऽस्मान् नीरवीकृतवान् यतः।
विषयुक्तञ्च पानीयम् अस्मभ्यं स प्रदत्तवान्।
अभवाम वयं यस्मात् परशस्यापराधिनः॥
१५ सम्प्रतीक्षामहे शान्तिं न त्वागच्छति मङ्गलं।
प्रतीक्षामह आरोग्यं त्रासः पश्योपतिष्ठति॥
१६ दानो वैरितुरङ्गाणां श्रूयते नासिकारवः।

क्रोधातो हयसिंहानां हत्वा भूमि र्विकम्पते ॥
तैरुपस्थाय देशस्य सर्वैस्तत्पूरकैः सह ।
नगरी च ग्रसिष्यन्ते तन्निवासिजनैः सह ॥
परमेश इदं ब्रूते पश्यताहीन् फणाधरान्। १७
समर्थो यान् वशीकर्त्तुं मन्त्रः कोऽपि न विद्यते।
युष्मन्मध्ये प्रहेष्यामि ते वो दंक्ष्यन्ति निर्द्दयं॥
मनस्तापप्रतीकारी विनोदः को भवेन्मम । १८
मम स्वान्तमसुस्थत्वाद् धुरावद् गुरु मन्यते ॥
दूरवर्त्तिमनुष्याणां देशतो विनिशम्यते । १९
मज्जातिरूपकन्याया रुदत्याः परिदेवनं ॥
किं सियोननगर्य्यां न वर्त्तते परमेश्वरः ।
किं तस्याः स महाराजस्तस्या मध्ये न विद्यते ॥
ते मां विरञ्जयामासुः स्वीयतक्षितविग्रहैः ।
असारैश्चेतरै र्देवैः किमर्थं तैरिदं कृतं ॥
शस्यकालो व्यतिक्रान्तो व्यतीतः फलसंग्रहः । २०
अस्माकन्तु परित्राणम् अधुनापि न साधितं ॥
मज्जातिरूपकन्याया भङ्गाद् भङ्गो ऽभवन्मम । २१
अस्म्यहं मलिनः शोकाद् आक्रान्तः साध्वसेन च ॥
गिलियादि किमप्राप्यः स रोगघ्नतरो रसः । २२
किं वा चिकित्सकः कोऽपि तत्र स्थाने न विद्यते ॥
मज्जातिरूपकन्याया आघातानां प्रतिक्रिया ।
यन्न प्रवर्त्तते तस्य किं भवेत् तर्हि कारणं॥

---

९ नवमोऽध्यायः।

१ यिहूदीयानां दोषप्रकाशनं १० दोषस्य भाविनो शास्तिः १२ शास्तेः कारणम् अनाज्ञाग्राहित्वं १७ विनाशतः खेदस्यावश्यकत्वं २३ परमेश्वरस्य श्लाघा २५ अन्यदेशीयानां शास्तिकथनञ्च।

हा शिरो मम चेदब्धि र्लोचने चेज्जलाकरौ। १
मज्जातिरूपकन्याया आहतानां नृणां कृते।
अश्रुपातमहं तर्हि करिष्यामि दिवानिशं॥

२ हा मरौ चेत् कुटीरो मे स्यात् पान्थानां कुटीरवत्।
विहाय स्वजनांस्तर्हि तेषां त्यच्यामि सङ्गमं।
ते पारदारिकाः सर्व्वे खलानाञ्च सभा यतः॥
३ जिह्वाधनुषि वाणं ते योजयन्त्यनृतं वचः।
देशे सत्यस्य पच्चे तु पुरुषत्वं न कुर्व्वते॥
पापात् परं पुनः पापम् अनुष्ठातुं प्रयान्ति च।
मां तु ते नाभिजानन्तीति ब्रूते परमेश्वरः॥
४ भवेद् युष्माकमेकैकः सावधानः स्वमित्रतः।
भ्रातृणामपि कस्मिंश्चिद् विश्वासं मा समाचरेत्॥
भ्रातृणां यत एकैको विप्रलम्भपरायणः।
मित्राणां तद्वदेकैकं परीवादे ऽनुरज्यते॥
५ छलयन्ति मिथः सर्व्वे सत्यं तैरुच्यते नहि।
कृताभ्यासा मृषोक्तौ तै र्जिह्वा पक्वाश्च ते छले॥
६ त्वद्वासः शठतामध्ये ते जनाः शाठ्यहेतुतः।
नेच्छन्ति मामभिज्ञातुम् इति ब्रूते परेश्वरः॥
७ अत एतद्वचो वक्ति सेनाध्यक्षः परेश्वरः।
अहं विलाययिष्यामि परीक्षिष्ये च तान् जनान्।
मत्प्रजारूपकन्यायाः साक्षादन्यत् करोमि किं॥
८ मारकवाणवत् तेषां जिह्वा शाठ्यं प्रभाषते।
यो मित्रं प्रति वक्त्रेण व्याहरत्यनुकूलतां।
स तस्याक्रमणायैव स्वान्ते चिन्तयति छलं॥
९ परेशो वक्त्यहं तेभ्यः किं न दास्यामि तत्फलं।
दण्डेनैतादृशो जातेः किं न तर्प्स्यति मे मनः॥
१० क्रन्दनं प्रकरिष्यामि रोदनञ्च गिरीनधि।
गोचारणभुवञ्चाधि लपिष्यामि स्थितां वने॥
तद्दाहो भविता यस्मात् तत्र न द्रक्ष्यते ऽध्वगः।
गोमेषादिव्रजानाञ्च रवो न श्रोष्यते पुनः॥
आकाशस्था गरुत्मन्तः पशवश्च वनेचराः।
सर्व्वे स्थानान्तरं गत्वा भविष्यन्त्यनुपस्थिताः॥
११ शिलाराशिमयीञ्चाहं करिष्ये यिरुशालमं।
जन्तूनां दीर्घरावाणां वसतिः सा भविष्यति॥

उत्पन्नानि करिष्यामि यिहूदायाः पुराणि च।
नरस्तत्र निवासी च कोऽपि नैवावशेक्ष्यते॥
को नरस्तादृशं ज्ञानी येन बुध्येत वागियं। ११
येन वा सा निवेद्येत परेशस्य मुखाच्छ्रुता॥
कुतो हेतोरयं देशो नष्टो दग्धश्च वह्निना।
भविता मरुसङ्काशः पथिकैः परिवर्ज्जितः॥
अत्र परेश्वरो ब्रूते तस्यैतदेव कारणं। १२
साक्षात् तेषां मया दत्ता व्यवस्था तै र्यदुज्झिता।
अश्रुत्वा मम वाक्यं तैः सा समाचरिता नहि॥
स्वकीयचित्तजाड्यस्य निर्दिष्टानाञ्च जन्मदैः। १४
वालाख्येतरदेवानां कृतं तैरनुवर्त्तनं॥
अतो हेतोरिदं ब्रूते सेनाध्यक्षः परेश्वरः। १५
इस्रायेलः प्रभु र्यो ऽस्ति पश्यैतद्देशवासिनां।
किरातितिक्तमन्नार्थम् अहं प्रदातुमुद्यतः।
विषयुक्तञ्च पानीयं पाययिष्यामि तानहं॥
ते च तेषाञ्च ताता यान् न विदुः परदेशिनः। १६
तेषां विदेशिनां मध्ये विकरिष्यामि तानहं॥
मया तेषां विनाशस्य यावन्न साधयिष्यते।
अनुधावकवत् तेषाम् असिस्तावत् प्रहेष्यते॥
भाषते भारतीमेतां सेनाध्यक्षः परेश्वरः। १७
यूयमालोचनां कृत्वा नारी र्विलापजीविनीः।
समाह्वयत ताभिश्च स्थानमेतत् प्रविश्यतां॥
तस्मिन् कर्म्मणि या विज्ञा दूतान् सम्प्रेष्य ताः प्रति।
ता आनयत ताभिश्च स्थानमेतत् प्रविश्यतां॥
सत्वरञ्च कृते ऽस्माकं विलापः क्रियतां तथा। १८
यथा तेन भवेदृष्टिरस्माकं वारिवाहिनी।
अस्मन्नेत्रच्छदेभ्यश्च कीलालस्य सरित् स्रवेत्॥
नूनं रावो विलापस्य सियोनो विनिशम्यते। १९
कथं नष्टा वयं जाता अतीव व्रीडिता वयं।
देशो ऽस्माभि र्विहातव्यो वासा नो भूमिसात्कृताः॥
हे नार्य्यः परमेशस्य युष्माभिः श्रूयतां वचः। २०

तदास्यान्निर्गता वाणी युष्माकर्णैश्च गृह्यतां॥
अनुशिक्षयितुं कन्या विलापं यूयमर्हथ।
एकैका स्वसखीं गानं शिक्षयेच्छोकसूचकं॥
२१ अस्मदातायनैः कृत्वा मृत्युरारोहणं यतः।
अस्माकं राजहर्म्याणां गर्भागारं प्रवेक्ष्यते।
उच्छेत्स्यन्ते पथो बाला युवानश्च निकर्षणात्॥
२२ त्वं भाषस्व परेशेन वाक्यमेतदुदीर्य्यते।
पतिष्यन्ति शवा नृणां क्षेत्रे यद्वदवस्कराः।
यथैका शस्यमुष्टि र्वा छेत्तुः पश्चादसञ्चिता॥
२३ पुनर्व्वारमिदं वाक्यं भाषते परमेश्वरः।
मा करोतु स्वविद्यायाः श्लाघां विद्यान्वितो नरः॥
मा करोतु स्वशौर्य्यस्य श्लाघां शौर्य्यान्वितो नरः।
मा करोतु स्ववित्तस्य श्लाघां वित्तान्वितो नरः॥
२४ श्लाघमानस्तु यः कश्चित् श्लाघामस्य करोतु सः।
यद् विवेचनयुक्तो ऽस्ति यच्च मामेव वेत्ति सः॥
परेशो ऽहं यतः पृथ्व्यां करुणान्यायधर्म्मकृत्।
अत्रैवाहं प्रतुष्यामीति ब्रूते परमेश्वरः॥
२५ परमेशो ब्रवीतीदं पश्यागच्छन्ति वासराः।
येषु कर्त्तितचर्म्मभ्यः सहाकर्त्तितचर्म्मभिः।
सकलेभ्यः प्रदास्यामि क्रियाणामुचितं फलं॥
२६ मिसरे च यिहूदे च इदोमे ऽम्मोनजातये।
मोयाबे छिन्नगुम्फानां मरुस्थानां व्रजाय च॥
अच्छिन्नचर्म्मलिङ्गा हि सर्व्वे सन्तीतरान्वयाः।
अच्छिन्नचर्म्मचित्तास्त्विस्रायेलो ऽखिलवंशजाः॥

---

१० दशमोऽध्यायः।

१ परमेश्वरेण सह प्रतिमायास्तुलनाकरणं १७ भाविवादिनो विनयवाक्यं १९ मेषपालकानां शास्तिकथनं २३ यिरिमियस्य प्रार्थना च।

१ इस्रायेल्वंश युष्मभ्यं कथितं परमेशितुः।
यदेतद् वचनं यूयं तदुपश्रोतुमर्हथ॥

परमेशो ब्रवीतीदं युष्माभि र्मा कथञ्चन। २
शिक्ष्यतामितरासां हि जातीनामनुगामिता॥
नभसो लक्षणेभ्यश्च यूयं त्रासं न गच्छत।
सन्त्रस्यन्ति यतस्तेभ्य इतरा एव जातयः॥
अलीका विधयः सन्ति परदेशनिवासिनां। ३
काष्ठं छत्तं वने त्वष्टुः कराभ्यां वासिसंस्कृतं॥
मनुष्यः स्वर्णरूप्याभ्यां विदधाति सुशोभितं। ४
बद्धं मुद्गरकीलैश्च जायते तदजङ्गमं॥
तालवत् स्तम्भरूपैस्ते देवै र्नोदीर्य्यते वचः। ५
सर्व्वथा ते च वोढव्याः पदपाते यतो ऽक्षमाः॥
तेभ्यो मा भवत त्रस्ता अहितं नाचरन्ति ते।
हितमाचरितुं वा तै र्न कथञ्चन शक्यते॥
क्वापि त्वदुपमः कश्चिन्नास्ति हे परमेश्वर। ६
महांस्त्वं तव नामापि महदस्ति पराक्रमात्॥
हे सर्व्वदेशिनां राजन् कस्त्वत्तो न प्रभेष्यति। ७
त्वं भयस्योचितं पात्रं यस्मादितरदेशिनां।
ज्ञानिवृन्दे च राज्ये च नास्ति त्वदुपमः क्वचित्॥
पशुतुल्याः प्रमूढाश्च सङ्काशः प्रतिभान्ति ते। ८
अलीकस्यैव सा शिक्षा काष्ठमात्रा च देवता॥
तर्शीशाद् रौप्यपत्राण्यानाय्य काञ्चनमूफसः। ९
निर्म्मिताः स्वर्णकारेण हस्ताभ्यां द्रावकस्य च।
नीलं ते परिधीयन्ते धूमलं वा परिच्छदं।
देवास्ते शिल्पिभि र्द्क्षै रचिताः सन्ति सर्व्वशः॥
यिहोवास्त्वीश्वरः सत्यः स्वयञ्जीवित ईश्वरः। १०
राजा चानन्तकालस्य स एवास्ति न चेतरः॥
तत्क्रोधस्य प्रचण्डत्वात् कम्पते विश्वधारिणी।
सोढुं तस्य च कोपाग्निम् अक्षमाः सर्व्वजातयः॥
यूयं तान् ब्रूत यै र्देवै र्द्यावाभूमी न निर्म्मिते। ११
भूमावस्या दिवश्चाधो विनंक्ष्यन्ति त ईश्वराः॥
स ससर्ज्ज स्वशक्त्या द्यां स्वधिया विदधे जगत्। १२
स च विस्तारयामास स्वप्रवीणतया दिवं॥

१३ ईरिते स्वरवे तेन व्योम्नि सञ्चीयते जलं।
उत्पाद्यन्ते च मेदिन्याः प्रान्तात् तेनोच्चवारिदाः॥
तेन वृष्टिप्रदानाय मेघवह्नि र्विधीयते।
निःसार्य्य निजकोषेभ्यस्तेन चानीयते मरुत्॥
१४ पशुतुल्या जनाः सर्व्वे ज्ञानहीनाश्च सन्ति ते।
लज्जन्ते विग्रहात् सर्व्वे धातुद्रावकशिल्पिनः॥
व्याजा एव यतः सन्ति विग्रहास्तै र्विनिर्म्मिताः।
श्वासस्याभ्यन्तरे तेषां न कथञ्चन विद्यते॥
१५ अलीका एव ते सन्ति निर्म्मिताश्च प्रमादतः।
यदा दायिष्यते योग्यं फलं नंक्ष्यन्ति ते तदा॥
१६ याकूबस्य तु या दायः स न तादृश ईश्वरः।
कृत्स्नस्रष्टेः स निर्म्मातेस्रायेल् तस्य निजं धनं।
नामधेयञ्च तस्यास्ति सेनाध्यक्षः परेश्वरः।

---

१७ देशतः संगृहाण त्वं स्वभाण्डान् रुद्धवासिनि॥
१८ यतो हेतोरिमां वाचं भाषते परमेश्वरः।
पश्याहमेककृत्वैव यथा गोफणया शिलां।
प्रक्षेप्स्यामि तथा दूरम् एतद्देशनिवासिनः।
ते यथा चावगच्छेयु र्व्यथयिष्यामि तांस्तथा॥
१९ हा हतास्मि प्रभग्नाहम् आघातो मे व्यथाकरः।
मयागादि व्यथैवेयं विषोढव्या मया हि सा॥
२० नष्टं दूष्यं मम छिन्नाः सकलास्तस्य रज्जवः।
आत्मजाः प्रस्थिता मत्तो न विद्यन्ते च कुत्रचित्॥
मम कोऽपि जनो नास्ति यो दूष्यं स्थापयेत् पुनः।
यो वा यवनिकास्तस्य मत्कृते योजयेत् पुनः॥
२१ पालकाः पशुतां प्राप्य नान्विच्छन्ति परेश्वरं।
हीनश्रीणां ततस्तेषां विकीर्णाः सकला व्रजाः॥
२२ वार्त्तायाः श्रूयते शब्दः पश्य सा चोपतिष्ठति।
समायात्युत्तरस्माद्धि देशात् कोलाहलो महान्॥
परिणामश्च तस्यायं यिहूदायाः पुराणि यत्।
भवेयु र्नरशून्यानि ह्नरवैराश्रितानि च॥

ह परेश्वर जाने ऽहं मर्त्यो न स्वगतेः प्रभुः। २३
कर्त्तुं स्वपादविन्यासं स्थिरं गन्ता नरो ऽक्षमः॥
विचारेणैव शास्तिं मे कुरु हे परमेश्वर। २४
मा स्वकोपेन मां शाधि किं जाने मां क्षयिष्यसि॥
ये त्वां नैवाभिजानन्तीतरजातीयमानुषाः। २५
प्रार्थनां तव नाम्ना च ये वंशा नहि कुर्व्वते।
त्वं तेषामेव शीर्षेषु स्वक्रोधमवतारय॥
यतस्तै र्भक्षितो याकूब् अत्त्वा निःशेषितः स तैः।
वासस्थानञ्च यत् तस्य तत् तैरेव विनाशितं॥

---

११ एकादशोऽध्यायः।

१ परमेश्वरस्य नियमकथनं ९ तन्नियमलङ्घनाद् यिहूदायास्तिरस्करणं भाविशास्तिश्च १८ यिरिमियस्य विरुद्धम् अनाथोतीयलोकानां कुमन्त्रणा तन्निमित्तञ्च तेषां भाविशास्तिः।

ततः परं परमेश्वरेणोदिता वागियं यिरिमियं प्रत्युपतस्थौ, यथा, १
यूयमस्य नियमस्य वाक्यानि श्रुत्वा यिहूदादेशस्थजनान् यिरूशालम्- २
निवासिनश्च गदत। त्वं तान् वद, इस्रायेलः प्रभुः परमेश्वर इत्थं ३
ब्रवीति, शप्तो भूयात् स नरो यो नियमस्यैतस्य वाक्यानि न गृह्णाति
यानि लौहचुल्लितो मिसरो मया निर्यापणस्य दिने युष्मत्पूर्व्वपुरुषा ४
आज्ञापिताः, यथा, यूयं मम रवे मनो निधाय यथाहं युष्मान् आ-
दिशामि तथैव मम वचांस्याचरत, तेन यूयं मम प्रजा भविष्यथ,
अहञ्च युष्माकम् ईश्वरो भविष्यामि। इत्थं मया युष्मत्पूर्व्वपुरुषेभ्यो दुग्ध- ५
मधुप्रवाहिण एतस्य देशस्याद्येव दानं प्रतिश्रुण्वता यः शपथो ऽकारि
स रक्षिष्यते। तदा मयोक्तं हे परमेश्वर तथास्तु।

अनन्तरं परमेश्वरो मामवादीत्, त्वं यिहूदादेशस्य नगरेषु यिरू- ६
शालमो मार्गेषु चैतानि वचांसि घोषय, यथा, यूयमस्य नियमस्य वाक्येषु
मनो निधाय तान्याचरत। यतो मिसरदेशात् युष्मत्पूर्व्वपुरुषाणाम् ७
आनयनदिनमारभ्याद्यपर्य्यन्तमहं युष्मत्पूर्व्वपुरुषान् अतन्द्रितम् उपादिशं
यूयं मम रवे मनांसि निदद्धमिति। तैस्तु न मनो निधाय न कर्णपातं ८
कृत्वा स्वपापिष्ठचित्तानां जाड्यं समाचरितम्, अतस्तेषामाचरणाय

मयाज्ञापितो यो ऽयं नियमस्तैर्न समाचरितस्तत्सम्पर्कीयाणां सर्व्व-
वाक्यानां फलं ते मया प्रापयितव्याः।
९ अनन्तरं परमेश्वरो मामवादीत्, यिहूदादेशस्थजनानां यिरूशालम्-
१० निवासिनाञ्च मध्ये राजद्रोहः सम्प्राप्तः। मद्वाक्ये मनो निधातुमनिच्छूनां
स्वीयपूर्व्वपुरुषाणां दुष्क्रियाः प्रति प्रत्यावृत्य ते सेवनार्थमितरदेवानाम्
अनुगामिनो ऽभवन्। तेषां पूर्व्वपुरुषैः सार्द्धं कृतो मम नियम इस्रा-
११ येल्वंशेन यिहूदावंशेन च लङ्घितः। अतः परमेश्वरो ब्रवीति पश्याहं
तांस्तादृशीं विपदं प्रापयिष्यामि या तैस्तरितुं न शक्ष्यते, ते मा-
मुद्दिश्योच्चध्वनिं करिष्यन्ति किन्त्वहं तत्र कर्णपातं न करिष्यामि।
१२ तदानीं यिहूदीयपुरीणां जना यिरूशालमो निवासिनश्च यानुद्दिश्य
धूपदाहं कुर्व्वते तान् देवान् उपस्थास्यन्ते ते तु विपत्काले न कथञ्चन
१३ तेषां परित्राणं करिष्यन्ति। यतो हे यिहूदे तव यावत्यः पुर्य्यस्तावत्यो
देवताः सन्ति यिरूशालमि च यावन्तो मार्गाः सन्ति तावत्यो लज्जा-
स्पदोद्देश्या वेद्यो ऽर्थतो बालाख्यदेवाय धूपदाहार्थिका वेद्यो युष्माभिः
१४ स्थापिताः। अतस्त्वमेतेषां जनानां कृते मा प्रार्थयस्व, तेषां कृते विलापं
प्रार्थनां वा मोदीरय यतस्तेषु स्वविपत्काले मामुद्दिश्योच्चनादं कुर्व्वत्सु
नाहं मनो निधास्ये।

१५ प्रासादे मम किं कुर्य्यात् पुन र्मत्प्रीतिभाजनं।
तन्महापातकं कर्त्तुं यतन्ते मुख्यमानवाः।
दूरीकर्त्तुं पवित्रञ्च मांसं त्वदीयसम्मुखात्।
कुत्सिताचारकाले त्वं भवस्युल्लासकारिणी॥
१६ त्वं हरिज्जीतवृक्षो ऽसि सुन्दरः फलशोभया।
इत्येव नामधेयं ते कृतवान् परमेश्वरः॥
सार्द्धं महाजनौघस्य नादेन तत्र पादपे।
वह्निस्तु ज्वलितस्तेन तस्य शाखाश्च खण्डिताः॥
१७ यस्त्वां रोपितवान् पूर्व्वं सेनाध्यक्षः परेश्वरः।
तेनैवानिष्टवाक्यं तत् त्वद्विरुद्धमुदीर्य्यते॥
इस्रायेलीयवंशेन यिहूदीयान्वयेन च।
धूपं बालाख्यदेवाय प्रज्वाल्य मम मन्यवे।
स्वेच्छातो ऽकारि यत् पापं तदेवैतस्य कारणं॥
१८ ज्ञापितो भवताहं तज्ज्ञाने हे परमेश्वर।

क्रियास्तेषां जनानाञ्च मह्यं त्वयैव दर्शिताः ॥
मेषवत्सो यथा दान्तो नीयमानो बधस्थलं। १९
तथैवासमहं तेषां न जानंश्चिन्तितं मयि ॥
वृक्षो नाशयितव्यो ऽसावस्माभिः सहितः फलैः।
आयात जीवतां देशात् समुत्कृन्ताम तं वयं।
मनुष्यैस्तस्य नामापि पुन र्न स्मर्य्यतामिति ॥
सेनाध्यक्ष परेश त्वम् असि न्यायविचारकृत्। २०
त्वं नरस्यान्तरात्मानं हृदयञ्च परीक्षसे ॥
अहञ्चालोकयिष्यामि तेभ्यो दत्तं त्वया फलं।
यतोऽहं स्वविवादस्य भारमर्पितवांस्त्वयि ॥

त्वं परमेश्वरस्य नाम्ना भविष्यद्वाक्यकथनाद् विरम, न चेदस्माभि २१
र्हनिष्यस इति वाक्यं त्वत्प्राणनाशाय सचेष्टै र्यैरनाथोतीयनरैस्त्वां प्रत्य-
वादि तेषां वैपरीत्येन परमेश्वर इत्थं भाषते।

अतो हेतोरिदं ब्रूते सेनाध्यक्षः परेश्वरः। २२
पश्य तेभ्यो नरेभ्योऽहं प्रदास्याम्युचितं फलं ॥
तेषां मध्ये युवानो ये ते मरिष्यन्ति खड्गतः।
तेषां पुत्त्राश्च पुत्र्यश्च मरिष्यन्ति क्षुधाहताः ॥
शेषवंशो नृणां तेषां कश्चिन्न सम्भविष्यति। २२
वत्सरे फलदानस्य ते ऽनाथोतीयमानवाः।
यतः सम्प्रापयिष्यन्ते मयानिष्टं यथोचितं ॥

---

१२ द्वादशोऽध्यायः।

१ ईश्वरं प्रति यिरिमियस्य काकूक्तिः ५ तं प्रति तस्य भ्रातृणां कापट्यं ७ यिहूदीयानां भाव्युत्पाटनं १५ परावृत्तमनःसु दया च।

हे परेश्वर धर्म्मी त्वं विवादेऽपि कृते मया। १
तथापि त्वां विचाराज्ञा अधि प्रष्टुमुपक्रमे ॥
दुश्चरित्रमनुष्याणां या गतिः सा शुभा कुतः।
कुतस्तिष्ठन्ति चाक्षुब्धाः कपटाचारिणो नराः ॥
त्वद्रोपिताः समूलास्ते प्रवर्धन्ते फलप्रदाः। २
अदूरस्त्वं मुखात् तेषां सुदूरस्त्वसि चित्ततः ॥

३ हे परेश्वर मामेव त्वं परिज्ञातवानसि।
त्वया दृष्टा च मच्चित्तं त्वदासक्तं परीक्षितं॥
त्वं मेषानिव हन्तव्यान् धृत्वापाकर्ष तान् जनान्।
निमित्तं बधघस्रस्य कृत्वा तांश्च नियोजय॥
४ मलिना प्रोक्ता भूमिः कतिकालं भविष्यति।
सर्व्वक्षेत्रस्थघासश्च शोषितः प्रतिभास्यति॥
पशुपक्षिण उच्छिन्ना दौर्जन्याद् देशवासिनां।
गदतां सो ऽन्तमो द्रष्टुम् अन्तिमां नो दशामिति॥
५ सार्द्धं पदातिभि र्धावंस्तैश्चेत् त्वं क्लान्तिमाप्नुयाः।
कथं स्पर्धिष्यसे तर्हि धावनेन हयैः सह॥
अत्र निष्कण्टके देशे त्वं कथञ्चिदशङ्कितः।
यर्द्दनद्यास्त्वलङ्कारे कान्तारे किं करिष्यसि॥
६ त्वं स्वभ्रातृगणेनापि स्वपैतृकान्वयेन च।
वञ्च्यसे मुक्तकण्ठैस्तैस्त्वत्पश्चादीर्य्यते ध्वनिः।
मा विश्वसिहि तेषु त्वं प्रीतिवाचो गदत्स्वपि॥
७ निजगेहं मया त्यक्तं निजसम्पत्तिरुज्झिता।
प्राणप्रियतमं पात्रं शत्रुहस्ते समर्पितं॥
८ मत्पक्षे मम सम्पत्ति र्वन्यसिंहीसमाभवत्।
सा गर्ज्जतीव मां दृष्ट्वा तामाहं गर्हये ततः॥
९ सम्पत्ति र्मे मदर्थं किं चित्राङ्गः शकुनि र्भवेत्।
तद्विरुद्धं समन्तात् किं शकुनीनां सभा भवेत्॥
युष्माभि र्वन्यजन्तूनां सर्व्वेषामेव सङ्ग्रहः।
क्रियतां भोजनार्थञ्चानीयन्तां ते प्रयत्नतः॥
१० द्राक्षाक्षेत्रं ममानेकै र्ध्वंसितं पशुरक्षकैः।
मम या कृष्टभूमिस्तैः साप्यभूत् पादमर्द्दिता।
मन्मनोहारिभूमिस्तैः शून्याकारि यथा मरुः॥
११ तैश्च शून्यीकृतास्ते सा शून्या शोचति मां प्रति।
कृत्स्नः शून्योकृतो देशः को ऽपि तत्र न यत्नवान्॥
प्रान्तरस्थगिरीन् सर्व्वान् समारोहन्ति नाशकाः।
आदेशात् परमेशस्य यतः सर्व्वं चरत्यसिः॥
१२ आप्रान्तात् प्रान्तपर्य्यन्तम् एतन्नोदति कुत्रचित्।

कस्यचित् प्राणिनः काचित् शान्ति र्न सम्भविष्यति॥
गोधूमञ्च जना उप्त्वा सङ्ग्रहीष्यन्ति कण्टकान्। १३
परिश्रान्तैश्च तैः कश्चिदुपकारो न लप्स्यते॥
क्षेत्रोत्पन्नफलेभ्यश्च ते भविष्यन्ति लज्जिताः।
पारमेश्वरकोपस्य ज्वलनं तस्य कारणं॥

परमेश्वर इदं ब्रूते, ममेस्रायेलीयप्रजाभ्यो ऽहमधिकारार्थं यां भूमिं १४
दत्तवान् तत्स्पर्शकारिणः स्वीयदुष्टप्रतिवेशिनः सर्व्वानध्यहं भाषे,
पश्चाहं तेषां भूमितस्तान् उत्पाटयिष्यामि तेषां मध्याच्च यिहूदावंशमु-
त्पाटयिष्यामि। तेषामुत्पाटनात् परमहं तान् पुनरनुकम्प्य प्रत्येकं स्वी- १५
याधिकृतभूमिं स्वीयदेशञ्च प्रत्यावर्त्तयिष्यामि। ते च यथा वालदेवस्य १६
नाम्ना शपनं मम प्रजा अशिक्षयन्, तथा मम नाम्ना परमेश्वरो
जीवतीति शपनाय यदि मम प्रजानां नीतिं शिक्षेरन्, तर्हि मत्प्रजानां
मध्ये ते दृढोन्नतिमवाप्स्यन्ति। परन्तु चेन्मनांसि न निदधीरंस्तर्ह्यहं १७
तां जातिं सर्व्वश उत्पाट्य विनाशयिष्यामीति ब्रूते परमेश्वरः।

---

१३ त्रयोदशोऽध्यायः।

१ कटिबन्धनस्य दृष्टान्तः १२ द्राक्षारसपूर्णपात्राणां दृष्टान्तात् पापहेतो र्भाविदुःखस्य कथनं १५ विनीतिकथनं २२ सकलदुःखस्य कारणं पापमिति दर्शनञ्च।

परमेश्वरो मामिदं वचनम् अवादीत् त्वं गत्वा क्षार्थमातसं कटि- १
बन्धनं क्रीत्वा कटौ धारय जलं मा प्रवेशय। ततः परमेश्वरस्य वाक्या- २
न्मया कटिबन्धनं क्रीतं कटौ धारितञ्च। पश्चाद् द्वितीयवारं परमेश्वरस्य ३
वाक्यमिदं मां प्रति प्रादुरभूत्, स्वक्रीतेन तेन कटिबन्धनेन बद्धकटिस्त्वमु- ४
त्थाय फरातनदस्य तीरं गत्वा तत्र शैलस्य विदीर्णस्थाने तत् प्रच्छादय।
अतोऽहं यथा परमेश्वरेणादिष्टस्तथा गत्वा फराततीरे तत् प्राच्छादं। ५
अतः परं बहुदिनेषु गतेषु परमेश्वरो मामवादीत् त्वम् उत्थाय फरातं ६
गत्वा ममादेशात् तत्र प्रच्छादितं तत् कटिबन्धनं गृहाण। अतोऽहं ७
फरातं गत्वा यत्र स्थाने तत् कटिबन्धनं प्रच्छादितवान् तत्र खनित्वा
तदुदग्रहिषं। तत्तु कटिबन्धनं पश्य शीर्णं सर्व्वशो निरुपयोगञ्चासीत्। ८
तदानीं परमेश्वरस्येदं वाक्यं मां प्रति प्रादुरभूत्, परमेश्वरो ब्रूते, इत्य- ९

१० मेव यिहूदाया दर्पो यिरूशालमस्य महादर्पो मया विकारिष्यते। इमे
ये दुष्टजना मम वाक्यानि ग्रहीतुमनिच्छां प्रकाश्य स्वीयचित्तानां जाड्य-
माचरन्त इतरदेवान् सेवितुमाराधयितुञ्च तेषामनुगामिनो जातास्ते
११ सर्व्वेऽपि निरुपयोगेनानेन कटिबन्धनेन तुल्या भविष्यन्ति। यतः कटि-
बन्धनं यथा नरस्य कटौ समासज्यते तथैवाहं कृत्स्नमिस्रायेलीयवंशं
कृत्स्नं यिहूदावंशञ्च मयि समासंज्य ता मदीयप्रजाः ख्यातिस्तुतिशोभा-
स्वरूपाः कर्त्तुमैच्छमिति भाषते परमेश्वरः। तै र्जनैस्तु मम वाक्यं न
गृहीतं।

१२ त्वं तान् एतद् वचनमपि वद, इस्रायेलः प्रभुः परमेश्वर इदं ब्रूते,
एकैकया कुत्वा द्राक्षारसपूर्णया भवितव्यं। अत्र ते तुभ्यं कथयिष्यन्ति,
एकैका कुतू यद् द्राक्षारसेन पूर्णा भविष्यति तत् किं वयं न जानीम
१३ इति। त्वन्तु तान् वद, परमेश्वर इदं कथयति,

पश्याहं मानवान् सर्व्वान् एतद्देशनिवासिनः।
दायूदंशजभूपांश्चासीनांस्तस्य नृपासने॥
याजकान् भाविवक्तृंश्च यिरूशालमवासिनः।
जनान् सर्व्वांश्च मादेन पूरयिष्यामि निश्चितं॥
१४ प्रसभं पातयिष्याम्येकं तेषामपरं प्रति।
तातान् सुतांश्च सङ्कीर्णानिति ब्रूते परेश्वरः॥
नाहं तान् अनुकम्पिष्ये न करिष्याम्यनुग्रहं।
नैव तेषां विनाशान्मां करुणा वारयिष्यति॥
१५ यूयं शुश्रूषवो भूत्वा कर्णं गृह्णीत मद्वचः।
दर्पोद्धताश्च मा भूत वक्ता यस्मात् परेश्वरः॥
१६ स्वप्रभोः परमेशस्य यथार्हं कुरुतादरं।
न चेत् तेनाचिरादेव ध्वान्तमुत्पादयिष्यते।
स्खलिष्यन्ति च युष्माकं चरणास्तामसाद्रिषु॥
युष्मदाकाङ्क्षिता दीप्तिस्तेनैव विकृता सती।
मृत्युच्छाया सुघोरं वा तमिस्रं सम्भविष्यति॥
१७ मद्वचस्तु ग्रहीतुं चेद् युष्माकं न भवेन्मतिः।
प्रच्छन्ने दर्पतः स्थाने मच्चित्तं तर्हि तप्स्यते॥
तोयपूर्णाच्च मन्नेत्राद् धाराश्रुः प्रहरिष्यति।
परेशस्य व्रजो यस्माद् दास्यं नीतो भविष्यति॥

राजानं ब्रूहि राज्ञीञ्च युवां निम्ने निषीदतं। १८
शोभादायि किरीटं वां मूर्द्धतः पतितं यतः॥
रुद्धा दाक्षिणिकाः पुर्य्यो नोद्घाट्यन्ते च केनचित्। १९
दासीभूता यिहूदास्ति दासीभूताखिला हि सा॥
उन्मील्य स्वीयनेत्रे त्वं पश्यायान्त्युत्तराद् द्विषः। २०
कुत्रास्ति त्वयि दत्तः स चारुमेषव्रजस्तव॥
सखिवत् त्वत्प्रभुत्वे ये विनीता अभवंस्त्वया। २१
तैश्चेत् त्वां शासयेदीशस्तर्हि त्वं किं वदिष्यसि।
तदा किं प्रसवन्तीव व्यथया न ग्रसिष्यसे॥
इमा मां यदुपातिष्ठन् विपदो हेतुरस्य कः। २२
इत्थं त्वं हृदि चेत् पृच्छेः शृणु तर्हि तदुत्तरं॥
अपराधबहुत्वात् ते वस्त्रान्तो विवृतोऽभवत्।
सृष्टे त्वत्पादमूले च दुष्टाचारन्तथा करैः॥
किं कूशीयमनुष्येण स्वत्वचः परिवर्त्तनं। २३
शार्दूलेन स्वरेखाणां निमयो वापि सम्भवेत्॥
यदि तत् सम्भवेत् तर्हि चिराभ्यस्तकुकर्म्मभिः।
युष्माभिरपि धर्म्मस्यानुष्ठानं सम्भविष्यति॥
अतोऽहं विकरीष्यामि चतुर्दिक्षु जनानिमान्। २४
मरौ वातस्य वेगेनापोह्यमानान् नडानिव॥
त्वद्भाग्यमेतदेवास्ति मत्तो लभ्यो धनस्य च। २५
अयमेव त्वदीयांश इति ब्रूते परेश्वरः।
मां विस्मृत्य त्वया यस्माद् असत्ये प्रत्ययः कृतः॥
अतस्तावकवस्त्रान्तं विवरिष्याम्यहं तथा। २६
यथाच्छन्नमुखायास्ते लज्जा दृश्या भविष्यति॥
जारैः सार्द्धं तव क्रीडां हेषितं कामसूचकं। २७
प्रान्तरस्थेषु शैलेषु व्यभिचारेण कुक्रियां।
सर्व्वमेव तवाचारं घृणार्हं दृष्टवानहं॥
धिक् धिक् त्वां हे यिरूशालम् नाभवस्त्वं परिष्कृता।
कियत्कालम् इतः पश्चात् त्वं शुचि र्न भविष्यसि॥

---

१४ चतुर्द्दशोऽध्यायः।

१ आकालस्य भविष्यत्कथनं ७ यिरिमियस्य प्रार्थना १० परमेश्वरेण तदीयप्रार्थनाया निराकरणं १३ मिथ्याभविष्यद्वादिनां दोषः १७ यिरिमियस्य निवेदनञ्च।

१ शुष्ककालानधि यिरिमियं प्रति परमेश्वरस्य यद् वाक्यं प्रादुरभूत् तदिदं यथा,

२ यिहूदा कुरुते शोकं स्थानानि गोपुराणि च।
तस्या अङ्गारवर्णानि व्यवसीदन्ति भूमिसात्।
यिरूशालम्नगर्य्याश्च समुद्गच्छति रोदनं॥
३ तोयार्थं नायकास्तेषां प्रेषयन्ति स्वकिङ्करान्।
ते तु कूपानुपस्थाय नाप्नुवन्त्यम्बु किञ्चन॥
शून्यभाजनहस्ताश्च प्रत्यायान्ति यथागतं।
लज्जापन्ना विवर्णास्या वस्त्रैश्छादितमस्तकाः॥
४ देशे वृष्टेरभावेन भूमेः शुष्कां निरीक्ष्य च।
लज्जापन्नाः स्वशीर्षाणि छादयन्ति कृषीबलाः॥
५ क्षेत्रस्था या मृगी सापि प्रसूतैव स्वशावकं।
प्रजहाति पुनर्व्वारं यवसानामभावतः॥
६ आरण्यगर्द्दभास्तद्वत् तिष्ठन्तो निर्द्दुमाद्रिषु।
वायुं पिवन्ति मुक्तास्याः पवनाशनसन्निभाः।
तेषां नेत्राणि सीदन्ति घासो यस्मान्न विद्यते॥
७ साक्ष्यं यद्यपराधा नो दद्युरस्मद्विरुद्धतः।
स्वनामोद्दिश्य कार्य्यं त्वं कुरु हे परमेश्वर॥
भूयो भूयो यतोऽकुर्म्म विपथे गमनं वयं।
अतस्त्वद्वैपरीत्येन सञ्जाता अपराधिनः॥
८ त्वम् इस्रायेल आशाभू र्विपत्काले च मुक्तिदः।
अत्र देशे कुतो हेतोस्त्वं विदेशीव वर्त्तसे।
यामिनीयापनेच्छाद् वा त्यक्तमार्गो यथाध्वगः॥
९ किमर्थं वर्त्तसे च त्वं नरः स्तब्धमना इव।
अक्षमस्य परित्राणे युद्धवीरस्य वा समः॥
अस्माकं मध्यवर्त्ती तु त्वमेवासि परेश्वर।
तव नाम्ना वयं ख्याता अतोऽस्मान् मैव सन्त्यज॥

जनानेतानधि ब्रूते वाक्यमेतत् परेश्वरः। १०
ते स्वपादान् असंयम्य प्रीयन्ते भ्रमणे सदा॥
अहृत्वा परमेशो ऽपि तान् जनान् प्रत्यनुग्रहं।
अधुनैव तमेतेषाम् अपराधं स्मरिष्यति।
योग्यं पापक्रियाणाञ्च फलं तेभ्यः प्रदास्यति॥
अवादीत् परमेशो मां त्वयैतान् मानवानधि। ११
अर्थाद्धितार्थमेतेषां प्रार्थना क्रियतां नहि॥
नैवोपवसतां तेषाम् अहं श्रोष्यामि रोदनं।
यच्छतो बलिनैवेद्ये न ग्रहीष्यामि तानहं। १२
असिदुर्भिक्षमारीभि र्नाशयिष्याम्यहन्तु तान्॥
तदानीं प्रत्यभाषे ऽहं हा प्रभो परमेश्वर। १३
दृश्यतां भाविवक्तारो गदन्त्येतानिदं वचः॥
नैव द्रक्ष्यथ निस्त्रिंशं युष्मान् नोपैष्यति क्षुधा।
युष्मभ्यं क्षेममेवात्र सत्यं दायिष्यते मया॥
तदानीं परमेशो मां प्रत्यवादीदिदं वचः। १४
मम नाम्ना मृषावाक्यं भाषन्ते भाविवादिनः॥
नैव प्रेषितवानेतान् न वाज्ञापितवानहं।
न कदाचन वाक्यं वा तेभ्यः कथितवानहं॥
असत्यदर्शनं मन्त्रम् अलीकं स्वमतेश्छलं।
एतान्यैशवचांसीव युष्मभ्यं कथयन्ति ते॥
अतो ये भाविवक्तारो मया न प्रहिता अपि। १५
मम नाम्नेव भाषन्ते परेशो वक्ति तानधि॥
तैरुक्तं नात्र देशे ऽसिः क्षुधा वा सम्भविष्यति।
त एवासिक्षुधाभ्यान्तु नंक्ष्यन्ति भाविवादिनः॥
यान् जनांश्च समुद्दिश्य दैववाक्यं वदन्ति ते। १६
क्षेप्स्यन्ते ऽसिक्षुधाभ्यां ते मार्गेषु यिरूशालमः॥
तान् जायापुत्त्रपुत्त्रीश्च न कश्चिन्निखनिष्यति।
तेषां स्वदुष्टता तेषु मयावतारयिष्यते॥
तानुद्दिश्य त्वया तस्माद् वाक्यमेतदुदीर्य्यतां। १७
स्रवतामश्रु मन्नेत्रे दिवारात्रम् अनारतं॥
मज्जातेरात्मजा कन्या महाभङ्गं गता यतः।

अयं तस्या य आघातः स चातीव व्यथाकरः॥
१८ यदि क्षेत्रं प्रगच्छेयं नरान् वीक्षे ऽसिना हतान्।
पुरीं चेत् प्रविशेयञ्च वीक्षे क्षुत्क्षाममानवान्॥
भविष्यद्वक्तृवर्गो ऽपि याजकानां गणस्तथा।
गन्तव्यं स्थानमज्ञात्वा परिभ्राम्यन्ति नीवृति॥
१९ हा यिहूदां नितान्तं किं त्वं निराकृतवानसि।
सियोन् वा सर्व्वथाभूत् किं गर्हितं मनसा तव।
कुतस्त्वयाहतानां न आरोग्यं जायते नहि॥
आकाङ्क्षामो वयं शान्तिं कल्याणं तु न दृश्यते।
आरोग्यकालमीक्षामः सन्त्रासस्तूपतिष्ठति॥
२० स्वदोषं पैत्रिकं पापं जानीमो हे परेश्वर।
त्वद्विरुद्धं कृतो ऽस्माभिरपराधो न संशयः॥
२१ स्वीयनाम्नो ऽनुरोधात् त्वम् अस्मान् न त्यक्तुमर्हसि।
श्रीमत् सिंहासनं यत् ते निस्तेजो मा कुरुष्व तत्।
नियमं ते सहास्माभिः कृतं मा भंग्धि तं स्मर॥
२२ अलीका अन्यजातीनां देवाः किं वृष्टिदायिनः।
अन्तरीक्षं स्वयं वा किम् आसारान् सम्प्रयच्छति॥
किं त्वमेव न तत्कर्त्ता हे परेश्वर नः प्रभो।
त्वामाकाङ्क्षाम एतेषां त्वं यतो ऽसि विधायकः॥

---

१५ पञ्चदशोऽध्यायः।

१ यिहूदिलोकानां दण्डविषयकं भविष्यद्वाक्यं १० स्वमधि यिरिमियस्य विलापः ११ शत्रून् प्रति भर्त्सनमीश्वरस्य १५ ईश्वरस्य सन्निधौ यिरिमियस्य निवेदनं १९ यिहूदिलोकानधि चेश्वरस्य प्रतिज्ञा।

१ अपरं परमेशो माम् एतद्वचनमब्रवीत्।
यदि मूसाः शिमूयेल् च तिष्ठेतां मम सम्मुखे।
तथाप्येतेषु लोकेषु न वर्त्तेत मतिर्मम।
दृष्टितो मे विहृष्यन्तां त्वया ते ऽपसरन्तु च॥
२ अपगच्छेम किं स्थानम् इति ते यदि पृच्छ्यसे।
तर्हि तान् प्रतिभाषस्व वक्तीत्थं परमेश्वरः॥

मृत्योः पात्रं व्रजेन्मृत्युम् असेः पात्रमसिं व्रजेत्।
क्षुधां गच्छेत् क्षुधापात्रं दास्यं दास्यस्य भाजनं॥
पुनर्व्वारमिदं वाक्यं भाषते परमेश्वरः। २
चतस्रो ऽधिकरिष्यामि जातीस्तेषु जनेष्वहं।
कृपाणं प्राणनाशाय कर्षणाय च कुक्कुरान्।
खगान् भूचरजन्तूंश्च ग्रासायोत्पाटनाय च॥
कृते हिष्किययपुत्त्रस्य मिनशे यिहूदापतेः। ४
यिरूशालमि तेनैवाचरितानाञ्च कर्म्मणां।
तान् मह्याः सर्व्वराज्येष्वर्पयिष्यामि विधूनने॥
अाः कस्त्वां हे यिरूशालम् अनुकम्पिष्यते पुनः। ५
शोकार्त्तस्त्वन्निमित्तं वा को विलापं करिष्यति।
मङ्गलं तव प्रष्टुं वा कस्त्वाम् अभ्यागमिष्यति॥
परेशो वक्ति मां त्यक्त्वा त्वं गतासि पराङ्मुखा। ६
अतस्त्वद्वैपरीत्येनाहं विसार्य्य निजं करं।
त्वाम् उच्छिन्नां करिष्यामि क्षन्तुं क्लान्तो ऽभवं यतः॥
शूर्पैः प्रस्फोटयिष्यामि देशस्थगोपरेषु तान्। ७
निरपत्याः करिष्यामि नाशयिष्यामि मत्प्रजाः।
यतस्ताः स्वकुमार्गेभ्यो नाकुर्व्वन् प्रतिवर्त्तनं॥
सामुद्रसिकताभ्यो ऽप्यनेकास्तद्विधवास्ततः। ८
तेषाञ्च वैपरीत्येन तेषां मातृपुरीं मया।
मध्याह्ने नाशयन् वीरः समानायिष्यते युवा।
अकस्माच्च करिष्यामि तां तापत्रासविह्वलां॥
सप्तानां प्रसवित्री सा म्लाना प्राणान् प्रहास्यति। ९
अनतीते दिने तस्या भास्करो ऽस्तं गमिष्यति।
लज्जापन्ना च तस्मात् सा विवर्णा च भविष्यति॥
तेषां शेषजनांश्चाहं शत्रूणामेव सम्मुखे।
खड्गे समर्पयिष्यामीति ब्रूते परमेश्वरः॥
हा मातु र्मम हा मां धिक् यन्मां प्रजातवत्यसि। १०
वाग्वितण्डास्पदं कृत्स्नलोकस्य द्वन्द्वभाजनं॥
न कस्याप्युत्तमर्णो ऽहं नाधमर्णो ऽपि वाभवं।
तथा सत्यपि शप्ये तैः सकलैरेव मानवैः॥

११ परेश हे वह्नि किं त्वं न क्षेमार्थं मोक्ष्यसे मया।
आगते दुर्द्दशाकाले समये सङ्कटस्य च।
त्वां प्रसादयितुं शत्रुः किं नानायिष्यते मया॥

१२ लौह उत्तरजो लौहस्ताम्रं वा किं प्रभज्यते॥
१३ विभवं तव कोषांश्च वितरिष्यामि लोप्त्रवत्।
निर्मूल्यं पापबाहुल्यात् तव त्वत्कृत्स्नसीमनि॥
१४ तांस्त्वदज्ञातदेशञ्चापनेष्याम्यरिभिस्तव।
यतो मे प्राज्वलत् कोपाद् वह्नि युष्मान् स धक्ष्यति॥

१५ सर्व्वज्ञोऽसि परेश त्वं स्मर मां पश्य मे दशां।
फलं मद्बाधकेभ्यश्च योग्यं दत्त्वाभिरक्ष मां॥
त्वं स्वकोपस्य मान्द्येन न मां संहर्त्तुमर्हसि।
त्वदर्थं यदहं निन्दां सहे तञ्ज्ञायतां त्वया॥
१६ तव वाक्यानि सम्प्राप्य भक्षितान्यभवन्मया।
आनन्दश्चित्तहर्षश्चाभवन्मे तव वाक्यतः॥
अभवत् कीर्त्तितं यस्मात् तव नाम ममोपरि।
हे परेश जगत्कर्त्ता वाहिनीनामधीश्वर॥
१७ नाहमुपाविशं कर्त्तुं हर्षं निन्दकसंसदि।
गत्वा तु त्वत्करात् त्रासमहमेकाक्युपाविशं।
यतस्त्वं कृतवान् पूर्णं मां स्वरोषस्य भाजनं॥
१८ किमर्थं मद्व्यथा नित्या कुतो ऽशाम्यं मम क्षतं।
चिकित्सा च कुतस्तेन ग्रहीतुं शक्यते नहि।
मत्कृते वञ्चकं स्रोतः किमभूरम्बु चाध्रुवं॥

१९ परमेशस्ततो ब्रूते त्वं परावर्त्तसे यदि।
प्रत्यानीतो मया तर्हि स्थास्यसि त्वं मदन्तिके॥
रत्नं यद्युद्धरेस्तुच्छात् तर्ह्यास्यं मे भविष्यसि।
ते हि त्वां प्रति वर्त्तन्तां त्वं मा वर्त्तस्व तान् प्रति॥
२० जनसाक्षाद् विधास्ये त्वां प्राचीरं दृढ़मायसं।
ते त्वया सह योत्स्यन्ते त्वन्तु जायिष्यसे नहि॥
यतस्त्वां जयिनं कर्त्तुं विधातुं तारणञ्च ते।
तव सङ्गेऽहमस्मीति भाषते परमेश्वरः॥

दुर्जनानां करेभ्यस्त्वं समुद्धारिष्यसे मया । ११
अहं त्वां मोचयिष्यामि हस्तेभ्यः क्रूरकर्म्मणां ॥

---

१६ षोडशोऽध्यायः ।

१ विवाहादे ईष्टान्तकथया यिरूशालेमलोकान् प्रति विनाशस्य भविष्यद्वाक्यं १० पूर्व्वपुरुषेभ्योऽपि तेषां पापबाहुल्यभवनं १४ मिसर्देशात् मुक्तितोऽपि तेषां भाविमहामुक्तेर्महत्त्वं १९ देवपूजानिमित्तं तेभ्यः शास्तिदानञ्च ।

अपरं परमेश्वरस्यैतद्वाक्यं मां प्रति प्रादुरभूत् । १
नैव त्वम् उद्वहे भार्य्याम् अत्र स्थाने कथञ्चन । २
पुत्रा दुहितरो वापि स्थाने ऽस्मिन् मा भवन्तु ते ॥
यस्मात् स्थाने ऽत्र जायन्ते ये बाला याश्च बालिकाः । ३
अत्र देशे च यास्तेषां मातरः प्रसवन्ति तान् ।
जनयन्ति च ये तातास्तानध्याह परेश्वरः ॥
ते रोगै र्विविधैः क्षीणाः समुत्स्रक्ष्यन्ति जीवनं । ४
न शोचिष्यति तान् कोऽपि भूमौ वा निखनिष्यति ॥
स्थास्यन्ति पतितास्ते हि भूमेरुपरि सारवत् ।
असिना क्षुधया वापि मरिष्यन्ति च केचन ॥
भूविहारिपशूनाञ्च खेचराणाञ्च पक्षिणां ।
भक्ष्या एव भविष्यन्ति कायास्तेषां गतासवः ॥
यस्मात् परेश आहैतत् मा चीत्कारगृहं विश । ५
शोकं कर्त्तुञ्च मा गच्छ मा वा विलप तैः सह ॥
यस्माज्जनेभ्य एतेभ्यो हरिष्यामि निजाशिषं ।
प्रसादं करुणाञ्चेति भाषते परमेश्वरः ॥
इमे क्षुद्रा महान्तश्च मरिष्यन्त्यत्र नीवृति । ६
न त्वन्त्येष्टिक्रियां तेषां जनः कोऽपि करिष्यति ॥
न शोचिष्यति तान् कश्चित् न क्षताङ्गो भविष्यति ।
न वा तेषां कृते कश्चित् स्वशिरो मुण्डयिष्यति ॥
न मृतानां कृते कोऽपि तान् सान्त्वयितुमिच्छया । ७
पूपं शोके यथायोग्यं भङ्क्त्वा तेभ्यः प्रदास्यति ॥
पितरं मातरं वापि यो ऽनुशोचति कोऽपि तं ।

सान्त्वनासूचके पात्रे पेयं न पाययिष्यति ॥
८ यत्रोपविश्य तैः सार्द्धं कुर्य्यास्त्वं पानभोजने ।
तादृशं पानगेहं त्वं नैव प्रवेष्टुमर्हसि ॥
९ यतो हेतोरिदं ब्रूते सेनाध्यक्षः परेश्वरः ।
इस्रायेलः प्रभुः पश्य युष्माकमेव सम्मुखे ।
युष्माकमेव काले चाहमुच्छेत्स्याम्यतः स्थलात् ।
हर्षप्रीततयोः शब्दं शब्दञ्च वरकन्ययोः ॥
१० उक्तेष्वेतेषु वाक्येषु जातिमेतां प्रति त्वया ।
यदि ते त्वां वदन्तीदं कुतो हेतोः प्रभाषते ।
अस्मानधि महानिष्टम् ईदृशं परमेश्वरः ॥
अस्माकमपराधः कः केन वा पापकर्म्मणा ।
अस्मत्प्रभोः परेशस्य साक्षात् पातकिनो वयं ॥
११ त्वं तान् वक्ष्यसि तर्हीदं परमेशस्य वागियं ।
ताता वो मां परित्यज्यान्यान् देवान् अनुगत्य च ।
सेवका अभवंस्तेषाम् आर्चयंश्च प्रणम्य तान् ।
तैस्त्यक्तो ऽहं व्यवस्था च मम तै र्नहि रक्षिता ॥
१२ यूयन्तु स्वीयतातेभ्यः कुत्सिताचारकारिणः ।
पश्यत मे रवं श्रोतुं सर्व्वे यूयमनिच्छवः ।
तस्मात् स्वदुष्टचित्तानां जडतामनुगच्छथ ॥
१३ प्रक्षेप्स्यामि ततो युष्मान् अस्य देशस्य मध्यतः ।
दूरदेशं न युष्माभि र्न युष्मज्जनकै र्गतं ॥
यूयं तत्रेतरान् देवान् सेविष्यध्वे दिवानिशं ।
अनुकम्पान्तु युष्मासु वर्त्तयिष्याम्यहं नहि ॥
१४ अत्र परेश्वरो ब्रूते काल आयाति तादृशः ।
इस्रायेलीयवंशान् यो मिसर्देशात् समानयत् ।
परमेशः स साक्षीति न पुन र्वक्ष्यते यदा ॥
१५ इस्रायेलीयवंशांस्तु य उदीचीनदेशतः ।
तांश्च विकीर्णवान् यत्र तस्माद् देशसमूहतः ।
आनयत् परमेशः स साक्षीति वक्ष्यते तदा ॥
तेषां पितामहेभ्यश्च प्रदत्तायां मया पुरा ।
स्वीयभूमौ पुनर्व्वारं स्थापयिष्यामि तानहं ॥

समानेष्यामि पश्चाहं धीवरान् बहुसङ्ख्यकान्।
ते जनांस्तान् धरिष्यन्तीत्थं ब्रूते परमेश्वरः॥
समानेष्यामि च व्याधान् बहुसङ्ख्यांस्ततः परं। १६
सर्व्वाद्रौ सर्व्वशैले च सर्व्वच्छिद्रे च पार्व्वते।
यत्नान्मृगयमाणास्ते तान् धरिष्यन्ति मानवान्॥
मम नेत्रे यतस्तेषां वर्त्तेते सर्व्ववर्त्मसु। १७
मम प्रत्यक्षतस्ते च न विद्यन्ते तिरोहिताः।
न प्रच्छन्नो ऽस्ति तेषां वापराधो दृष्टितो मम॥
आदौ तेभ्यो ऽपराधस्याघस्य च द्विगुणं फलं। १८
प्रदास्यामि यतस्तेषां गर्हितप्रतिमाचयैः।
अर्पितैः कुणपै र्देशो मम तैरशुचीकृतः।
ममाधिकारभूमिश्च पूरिता स्वघृणास्पदैः॥
प्रभो त्वं मे बलं दुर्गं सङ्कटे च गति र्मम। १९
पृथिव्याः प्रान्तभागेभ्यः सर्व्वजातीयमानवाः।
त्वामेवाभ्यागमिष्यन्ति भाषमाणा इदं वचः॥
अस्माकं जन्मदातॄणां य आसीत् पैतृको विधिः।
व्याज एव स वाप्यश्च सर्व्वथानुपकारकः॥
स्वार्थं किं निर्म्मिमीतेशान् मनुष्यस्ते त्वनीश्वराः॥ २०
अतः पश्चावकाशे ऽस्मिन् ज्ञापयिष्यामि तानहं। २१
ज्ञापयिष्यामि मद्धस्तं मत्प्रभुत्वञ्च तान् जनान्।
ते च ज्ञास्यन्ति यत् ख्यातिरस्ति मे परमेश्वरः॥

---

१७ सप्तदशोऽध्यायः।

१ पापकारणाद् यिहूदाया दूरदेशगमनस्य भविष्यद्वाक्यं ५ मनुष्याश्रितेश्वराश्रितजनयो र्दृष्टान्तः ९ ईश्वरं विश्वासयितुं कपटिमानवस्यासमर्थता १२ केवलम् ईश्वरेण परित्राणं १५ निन्दाया निमित्तं यिरिमियस्य विलापः १९ लोकान् प्रति विश्रामवारपालनस्य कथां कथयितुं यिरिमियस्य प्रेरणञ्च।

लिखितं लौहलेखन्या हीरकाग्रविशिष्टया। १
पापमस्ति यिहूदायाः कल्पितं शिल्पकर्म्मणा।
तषां हृदयपत्रेषु तेषां वेदिशिखासु च॥

२ संस्मर्य्यन्ते ततस्तेषां सन्तानैः स्वीयवेदयः।
आशेराभिधदेवीनां सर्व्वे च स्वीयविग्रहाः।
हरिद्वर्णेषु चैत्येषु प्रोच्चशैलेषु च स्थिताः॥
३ हे क्षेत्रस्थित मे शैल मया तावकगौरवं।
त्वत्कोषागाराश्च साकल्यं लोप्त्रवद् वितरिष्यते।
सपापा उच्चदेशास्ते कृत्स्नायां तव सीमनि॥
४ स्वाधिकारान्मया दत्तात् त्वं स्वदोषै र्वियोक्ष्यसे।
देशे चाविदिते ऽरीणां दासीकारिष्यसे मया॥
युष्माभि र्ज्वालितो यस्माद् अभूत् कोपानलो मम।
यावच्चानन्तकालं स स्थास्यते चण्डदाहवान्॥
५ परमेश इदं ब्रूते शप्तो भूयात् स मानवः।
यो मर्त्यं शरणं गच्छेत् मांसं मन्येत बाहुवत्।
यस्यान्तःकरणञ्चापि निवर्त्तेत परेश्वरात्॥
६ स मनुष्यो मरुस्थस्य तरो र्निस्तेजसः समः।
शुभस्यागमनं तेन न समालोकयिष्यते॥
स च स्थानेषु शुष्केषु प्रान्तरस्थेषु वत्स्यति।
भूमौ क्षारविशिष्टायां यत्र केनापि नोष्यते॥
७ आशीर्युक्तो नरस्तु स्यात् परेशं शरणं गतः।
यस्य विश्वासभूमिश्च जायते परमेश्वरः॥
८ स मनुष्यो जलासन्ने रोपितस्य तरोः समः।
सुखं विस्तृतमूलस्य तोयप्रवाहपार्श्वतः॥
निदाघागमनाद्यस्य हरिद्वर्णच्छदस्य च।
येनानावृष्टिवर्षे ऽपि म्लानता नहि गम्यते।
स्वफलोत्पादने यश्च चाञ्चल्यं न समाचरेत्॥
९ वञ्चकं सर्व्वतश्चित्तं विकारप्राप्तमेव च।
अतएव परिज्ञातुं तच्चित्तं केन शक्यते॥
१० चित्तज्ञो मर्म्मनिर्णेताहमेवास्मि परेश्वरः।
मनुष्याय यथाचारं फलं दास्यामि कर्म्मणां॥
११ सञ्चिनोत्यप्रसूयापि शावकांस्तित्तिरो यथा।
अधर्म्मेण तथा लोभी विभवं प्रतिपद्यते॥
तेनाप्यर्द्धवयः प्राप्य तत् त्यक्तव्यं भविष्यति।

स स्वीयान्तिमगत्या च मूढवत् प्रतिभास्यति ॥
सिंहासनं महौजस्कम् उन्नतो ऽनादिकालतः । ११
अस्माकम् अद्वितीयस्य पुण्यभूमिवदाश्रयः ॥
इसरायेल आशा च त्वमेवासि परेश्वर । १२
लज्जापन्ना भविष्यन्ति सर्व्वे त्वत्त्यागिनो जनाः ॥
धूलौ लिखितनामानः सर्व्वे मत्तो ऽपसारिणः ।
यस्मात् तैरमृताम्बूत्सस्त्यजे परमेश्वरः ॥
हे प्रभो देहि मे स्वास्थ्यं स्वास्थ्यं यास्याम्यहं तदा । १४
कुरु त्वञ्च मम त्राणं त्राणं तर्ह्याप्स्यते मया ।
यतो हेतोस्त्वमेवासि प्रशंसायाः स्थलं मम ॥
पश्य मां प्रति भाषन्ते ते मनुष्या इदं वचः । १५
परमेशस्य वाक् कुत्र सा सिद्धार्था भवत्विति ॥
नातितिच्चुरहन्त्वासं गोपवत् ते ऽनुवर्त्तने । १६
न वाकाङ्क्षं विपद्युक्तं दिनं तज्ज्ञायते त्वया ।
निःसृतं यन्मदोष्ठाभ्यां प्रत्यक्षं तदभूत् तव ॥
मा भवेस्त्रासहेतु र्मे त्वं गति र्मम दुर्गतौ ॥ १७
बाधका मम लज्जन्तां न तु लज्जा भवेन्मम । १८
ते भवन्तु च सन्त्रस्ता मम त्रासो न जायतां ॥
त्वं तेषां वैपरीत्येन दुर्गते र्दिनमानय ।
द्विगुणेनैव भङ्गेन तान् प्रभग्नान् विधेहि च ॥

परमेश्वरो माम् एतद् वाक्यम् अवादीत्, यिहूदाया राजानो येन १९
प्रविशन्ति निर्गच्छन्ति च त्वं जानपदप्रजानां तद् द्वारं यिरूशालमः
सकलानि द्वाराणि च गत्वावतिष्ठमानस्तानुद्दिश्येदं व्याहर, हे यिहू- २०
दाया राजानः, हे कृत्स्न यिहूदावंश, हे यिरूशालमो निवासिनः सर्व्वे,
द्वारैरेतैः प्रविशथ ये यूयं युष्माभिः परमेश्वरस्य वाक्यं निशम्यतां ।
परमेश्वरो ब्रवीति यूयं स्वस्वप्राणेषु सावधाना भवत विश्रामवारे २१
कमपि भारं मा वहत यिरूशालमो द्वारै र्वा मा समानयत । विश्राम- २२
वारे च यूयं स्वस्वगृहेभ्यो भारान् मा वहिष्कुरुत कमपि व्यापारं वा
मा कुरुत परन्त्वहं युष्माकं पूर्व्वपुरुषान् यथादिष्टवान् तथा विश्राम-
वारं पवित्रं मन्यध्वं । ते तु श्रोतुमादेशं ग्रहीतुञ्चानिच्छातो ऽश्रुत्वा २३
कर्णावनिधाय च स्वग्रीवाः कठोरा अकार्षुः । परमेश्वरो ब्रवीति, यदि २४

यूयं ममादेशं सम्यग् आकर्ण्य विश्रामवारे नगरस्यैतस्य द्वारै र्भारान्
न समानयथ विश्रामवारं पवित्रं मन्यमानाश्च तस्मिन् दिने कमपि
२५ व्यापारं न कुरुथ, तर्हि दायूदीयसिंहासनासीना राजानो नायकाश्च
रथारूढा अश्वारूढा वा सन्तो नगरस्यैतस्य द्वारैः प्रवेक्ष्यन्ति त एव
तेषां (सङ्गिनो) नायकाश्च यिहूदाया जनाश्च यिरूशालमो निवा-
२६ सिनश्च प्रवेक्ष्यन्ति नगरमेतच्च शाश्वतं वसतिस्थानं भविष्यति। यिहू-
दाया नगरेभ्यो यिरूशालमश्चतुर्दिक्स्थग्रामेभ्यो विन्यामीनदेशात् सम-
भूमितः पर्व्वतात् दाक्षिणात्यदेशाच्च हव्यबलिनैवेद्यधूपान् आनयन्तः
परमेश्वरस्य मन्दिरे प्रशंसासूचकोपहारानानयन्तो वा जना आग-
२७ मिष्यन्ति। परन्तु यदि यूयं ममादेशम् अनाकर्ण्य विश्रामवारं पवित्रं
न मन्यध्वे विश्रामवारे भारान् वहन्तो यिरूशालमो द्वारैः प्रविशथ च
तर्हि मया तस्या द्वारेषु वह्नि र्ज्वालयिष्यते स यिरूशालमो हर्म्म्याणि
ग्रसिष्यते न च निर्व्वाणं गमिष्यति।

---

१८ अष्टादशोऽध्यायः।

१ कुलालचक्रस्य दृष्टान्तः ११ यिहूदीयानां कर्म्मणां फलं १८ बाधकानां विषये यिरिमियस्य वाक्यञ्च।

१ परमेश्वरादियं वाणी यिरिमियं प्रति प्रादुरभूत्, त्वमुत्थाय कुम्भ-
२ कारस्य गृहं गन्तुमवरोह तत्राहं त्वां मम वाक्यानि श्रावयिष्यामि।
३ अतो मयावरुह्य कुम्भकारस्य गृहं प्राप्य स कुलालचक्रेण कर्म्म करो-
४ तीति दृष्टं। यश्च घटस्तेन निरमीयत स नष्टा कुलालस्य हस्ते मृत्पि-
ण्डाकारम् अवाप्नोत्, ततः स तेन पुनरपरं घटं निरमिमीत। कुला-
५ लस्य दृष्टौ यथायोग्यो घटस्तेन निरमीयत। तदानीं परमेश्वरस्येदं
६ वाक्यं मां प्रति प्रादुरभूत्। हे इस्रायेल्वंश, परमेश्वरो ब्रवीति, अस्य
कुम्भकारस्य वृत्तिमिव युष्मासु वृत्तिं वर्त्तितुं किं ममाधिकारो नास्ति?
७ हे इस्रायेल्वंश, कुलालहस्तगतो मृत्पिण्ड इव यूयं मद्धस्तगताः। एक-
दाहं जाते राज्यस्य वा प्रातिकूल्येनोन्मूलनस्य निपातनस्य विनाशनस्य
८ च वाक्यं व्याहरामि। सा तु जाति र्यस्याः प्रातिकूल्येनाहं तदुक्तवान्
यदि स्वदौर्जन्यात् प्रत्यावर्त्तते तर्ह्यहं तां यदनिष्टं प्रापयितुं चिन्तित-

वांस्तदधि ममानुतापो जायते। अन्यदाहं जाते राज्यस्य वानुकूल्येन ९
निर्म्माणस्य रोपणस्य च वाक्यं व्याहरामि। सा तु जाति र्यदि मम १०
दृष्टौ दौर्जन्यमाचरति तर्ह्यहं तां येन शुभान्वितां कर्त्तुं चिन्तितवां-
स्तच्छुभमधि ममानुतापो जायते।

इदानीं त्वं यिहूदाया जनान् यिरूशालमो निवासिनश्चेदं वाक्यं वद, ११
परमेश्वर इदं ब्रवीति,

पश्य वः प्रातिकूल्येन मयानिष्टं प्रचिन्त्यते।
युष्माकं वैपरीत्येन सङ्कल्पश्चोपकल्प्यते॥
अत एकैकशो यूयं प्रत्यायात कुमार्गतः।
भवत स्वीयमार्गेषु स्वक्रियासु च सज्जनाः॥
अत्र ते प्रतिभाषन्ते मोघाशा तदसम्भवं। १२
स्वमनःकल्पना एवानुवर्त्तिष्यामहे वयं।
एकैकः स्वकुचित्तस्य जडताम् आचरिष्यति॥
अतो हेतोरिदं वाक्यं भाषते परमेश्वरः। १३
ईदृगश्रावि केनेति पृच्छतेतरजातिषु।
इस्रायेलाख्यकन्याया आचारोऽतीव गर्हितः॥
लिबानोनो हिमं किं तं शैलं दिग्दर्शिनं त्यजेत्। १४
किं दूरात् स्निग्धवेगास्ता आपः शोष्यन्ति कर्हिचित्॥
मत्प्रजा मान्तु विस्मृत्य धूपं दहन्त्यवस्तवे। १५
स्खलितास्ताः स्वमार्गेषु शाश्वतेष्वेव वर्त्मसु।
प्रगच्छन्त्यध्वभिः क्षुद्रैः पथिभिश्चासमीकृतैः॥
कुर्व्वन्तीत्थं स्वदेशं ताः शून्यं नित्यघृणास्पदं। १६
यो व्रजेत् तत्र स क्षुब्ध्वा मूर्द्धानं चालयिष्यति॥
पूर्व्वीयवायुनेवाहं विकरिष्यामि तान् द्विषा। १७
पृष्ठं तान् दर्शयिष्यामि न चास्यं दुर्गते दिने॥
तदानीं ते जना आहु र्यूयमायातुमर्हथ। १८
अस्माभिश्चिन्त्यतामस्मिन् यिरिमीये कुमन्त्रणा॥
याजके धर्म्मशास्त्रस्य मन्त्रणाया मनीषिणि।
भाविवक्तरि वाक्यस्य विरहो नहि युज्यते॥
अस्माभी रसनादण्डैः स मनुष्यो विताड्यतां।
कस्मिंश्चित् तस्य वाक्ये च श्रोत्रं नैव निधीयतां॥

१९ अवधानं कुरुष्व त्वं मयि हे परमेश्वर।
मया ये विवदन्ते च तेषां शब्दं निशामय॥
२० अपकारेण किं न्याय्यम् उपकारस्य शोधनं।
यस्मान्मत्प्राणनाशाय तेऽन्धकूपमखानिषुः॥
तव कोपानलं तेभ्यः प्रत्यावर्त्तयितुन्त्वहं।
शुभं तेषां ब्रुवाणस्त्वाम् उपातिष्ठमिति स्मर॥
२१ अतस्तेषामपत्यानि त्वं दुर्भिक्षे समर्पय।
अग्रेषु चन्द्रहासानां तान् जनांश्च निपातय॥
निरपत्या अनाथाश्च तेषां भवन्तु योषितः।
नराः कालेन हन्यन्तां युवानश्चासिना रणे॥
२२ आनीतायां त्वया सद्यः सेनायां तान् प्रबाधितुं।
रोदनं श्रूयतां तीव्रं तेषां गेहेभ्य उद्गतं॥
मां धर्त्तुं ते जना यस्माद् अन्धकूपमखानिषुः।
तथा मे चरणौ बद्धुं त उन्माथान् अयूयुजन्॥
२३ मद्विपक्षाखिला तेषां मन्त्रणा मम मृत्यवे।
तत् परेश भवान् वेत्ति तेषां मा क्षमतामघं।
भवत्साक्षाच्च तत् तेषां पातकं मा प्रमार्ज्यतां॥
ते जनाः स्खलनं प्राप्ता निपतन्तु त्वदग्रतः।
त्वं स्वीयक्रोधकाले च तेभ्यो देह्युचितं फलं॥

---

१९ ऊनविंशोऽध्यायः।

१ भग्नत्वाचस्य विनाशेन पापकारणाद् यिरूशालमो विनाशस्य सूचनं १४ तोफते तद्वचःप्रचारणात् परं परमेश्वरीयमन्दिरेऽपि तद्घोषणं।

१ अपरं परमेश्वरेणेदं वाक्यमवादि त्वं गत्वा कुम्भकारनिर्म्मितं कलसमेकं क्रीत्वा मुख्यप्रजानां मुख्ययाजकानाञ्च कतिपयजनान् सङ्गिनः कृत्वा
२ घटनिर्म्माणशालाद्वारसमीपस्थां हिन्नोमसुतस्य निम्नभूमिं प्रगत्य मया
३ वक्ष्यमाणानि वचांसि तत्र घोषय। त्वं वद, हे यिहूदाया राजानः, हे यिरूशालम्निवासिनः, परमेश्वरस्य वाक्यं युष्माभिः श्रूयतां।
वक्षीवायेल ईशः स सेनाध्यक्षः परेश्वरः।
पश्यानेष्याम्यहं स्थानमेतत् तादृगमङ्गलं।

येन सर्व्वस्य तच्छ्रोतुः शिञ्जीत श्रवणेन्द्रियं॥
जनैरेतैरहं त्यक्तः स्थानमेतच्च दूषितं। ४
यान् न ते नाग्रजास्तेषां न यिहूदा नृपा विदुः।
अत्र ते परदेवास्तै र्धूपदाहेन पूजिताः।
शोणितै र्दोषहीनानां स्थानमेतच्च पूरितं॥
मयानाज्ञापितं नोक्तं नोपलब्धञ्च चेतसा। ५
दाहं स्वपुत्त्रपुत्त्रीणां वालै र्हव्यमिवाग्निना।
कर्त्तुं तै र्निरमीयन्त वाले र्भगुस्थलानि च॥
तस्मात् परेश्वरो ब्रूते कालः पश्चागमिष्यति। ६
यस्मिन् न तोफतं भूयो न हिन्नोमात्मजस्य वा।
निम्नभूमिमिदं स्थानं कीर्त्तयिष्यन्ति मानवाः।
हत्याभूमिरिति त्वस्य नामधेयं भविष्यति॥
अत्र स्थाने यिहूदाया यिरूशालम्पुरस्य च। ७
मन्त्रणा कलसो यद्वत् शून्यीकारिष्यते मया॥
असिना वैरिणां साक्षात् जिघांसूनाञ्च पाणिभिः।
तान् निपात्य शवांस्तेषां खेचराणां गरुत्मतां।
भूचराणां पशूनाञ्चाहं प्रदास्यामि भक्ष्यवत्॥
हीनां हास्यास्पदञ्चैव विधास्यामि पुरीमिमां। ८
यो व्रजेत् तत्र स क्षुब्ध्वा तत्क्षतेभ्यो रसिष्यति॥
मांसं स्वपुत्त्रपुत्त्रीणां प्राशयिष्यामि तानहं। ९
तेषामेकः परस्यैव पललं भक्षयिष्यति॥
प्राबल्यादवरोधस्य व्याकुलत्वस्य तस्य च।
येन क्लेक्ष्यत्यरीणां तान् जिघांसूनाञ्च वाहिनी॥

ततः परं त्वया स्वसङ्गिपुरुषाणां प्रत्यक्षं तं कलसं भङ्क्त्वा तान् प्रतीदं १०
वाक्यं गदिष्यते, ११

भाषते भारतीमेतां सेनाध्यक्षः परेश्वरः।
निर्म्मितः कुम्भकारस्य यथायं खण्ड्यते घटः॥
यः केनापि पुनर्व्वारं सन्धातुं नहि शक्यते।
इमां जातिं पुरीञ्चेमां खण्डयिष्याम्यहं तथा॥
प्रेतान् निखनितुं भूमौ स्थानाभावाच्च मानवाः।
मृतानां कुणपानञ्च निखनिष्यन्ति तोफते॥

१२ परमेश इदं ब्रूते मया स्थानमिदं प्रति ।
तन्निवासिजनांश्चाधि तादृगेवाचरिष्यते ।
येनेयं प्रतिपाद्येत नगरी तोफतोपमा ॥
१३ यिरूशालमीयवेश्मानि यिहूदायाश्च भूभृतां ।
राजहर्म्याण्यमेध्यानि तोफताख्यस्थलं यथा ।
तद्वदेव भविष्यन्ति यतस्ते सर्व्ववेश्मनां ।
पृष्ठेष्वाकाशवाहिन्यै धूपदाहमकुर्व्वत ।
पेयांश्चेतरदेवेभ्य उपहारानुपाहरन् ॥

१४ अनन्तरं यिरिमियो यत्र स्थाने भविष्यद्वाक्यकथनार्थं परमेश्वरेण
प्रेषितोऽभूत् तस्मात् तोफतात् प्रत्यागत्य परमेश्वरीयमन्दिरस्य प्राङ्गणे
१५ तिष्ठन् सर्व्वजनान् जगाद, इस्रायेल ईश्वरः सेनाध्यक्षः परमेश्वर इदं
ब्रूते, पश्य मया नगर्य्या एतस्या वैपरीत्येन यदनिष्टमवादि, तत्सर्व्वं तां
तदधीनानि सर्व्वनगराणि च प्रापयिष्यामि, यतस्तदीयजना मम वा-
क्यानि श्रोतुम् अनिच्छवः स्वस्वग्रीवां कठोरीकृतवन्तः ॥

---

२० विंशतितमोऽध्यायः ।

१ यिरिमियस्य प्रहारः कारागारे बन्धनञ्च तत्कारणात् पशहूरस्य विपरीतं भवि-
ष्यद्वाक्यं ७ दुःखप्रतारणयो र्विषये यिरिमियस्य विलापः १४ महादुःखाद् उद्धार-
कारणाद् ईश्वरस्य प्रशंसा च ।

१ तदानीम् इम्मेरसुतः पशहूर इति नाम्ना यो याजकः परमेश्वरीय-
मन्दिरेऽधिकृतोऽध्यक्ष आसीत् स यिरिमियस्य कथनकाले तानि भवि-
२ ष्यद्वचनान्यश्रौषीत् । स च पशहूरस्तं भाविवक्तारं यिरिमियं ताडयित्वा
प्रोच्चतरेऽर्थतः परमेश्वरीयमन्दिरसमीपस्थे बिन्यामीनीयगोपुरे या
३ कारासीत् तत्र तं प्रवेश्य न्यरौत्सीत् । परेऽहनि पशहूरेण कारातो
बहिरानीतः सन् यिरिमियस्तम् अवादीत् परमेश्वरस्तुभ्यं पशहूर इति
(वर्द्धक इति) नाम न दत्त्वा मागोर-मिःसावीव् इति (समन्तात् त्रास-
४ हेतुरिति) नाम दत्तवान् । यतः परमेश्वर इदं वाक्यं ब्रूते,
पश्याहं त्वां विधास्यामि सर्व्वेषां त्रासहेतुकं ।
तव त्वद्बान्धवानाञ्च चक्षुर्भ्यां पश्यति त्वयि ।
ते पतिष्यन्ति शत्रूणाम् असिभि र्विनिपातिताः ॥

निखिलं यिहूदावंशं बाबिलीयमहीपतेः।
करे ऽहमर्पयिष्यामि स तानादाय दासवत्।
बाबिलं नगरं नीत्वा कृपाणेन हनिष्यति॥
अस्याः पुर्य्या धनं कृत्स्नं सर्व्वञ्चोपार्ज्जितं फलं। ५
सर्व्वरत्नानि तस्याश्च वितरिष्याम्यहं तदा॥
यिहूदीयनरेन्द्राणां कोषेषु यच्च सञ्चितं।
अर्पयिष्यामि तत्सर्व्वं तेषां विद्वेषिणां करे।
ते च तल्लोप्त्रवद्धृत्वादाय नेष्यन्ति बाबिलं॥
त्वया पश्हूर सर्व्वैश्च त्वद्गृहस्य निवासिभिः। ६
दासीभूयापगन्तव्यं त्वं गमिष्यसि बाबिलं।
त्वं मरिष्यसि तत्रैव तत्र त्वं निखनिष्यसे॥
त्वं मृषाभाविवाक्यानि येषां साक्षादभाषथाः।
प्राप्स्यन्ति तां दशां तेऽपि सकलाः सुहृदस्तव॥
अनुनीयान्वनीयेऽहं त्वया हे परमेश्वर। ७
त्वं दृढं चोदयित्वा मां कृतवान् मे पराजयं।
अपहस्ये दिनं कृत्स्नं सर्वे ह्याक्षारयन्ति मां॥
यति वारं प्रभाषेऽहं तति वारं प्ररोदिमि। ८
दौरात्म्यमपकर्म्मेति चीत्कारमीरयामि च॥
मदर्थं परमेशस्य वाक्यं कृत्स्नदिनं यतः।
कारणं परिहासस्य परुषोक्तेश्च जायते॥
न पुनस्तं स्मरिष्यामि न कदाचन वा पुनः। ९
भाषिष्ये तस्य नाम्नेति वाक् तस्मादीरिता मया॥
तदानीं मम चित्ते तु तापो वह्नेरिवाभवत्।
ज्वलितस्य मदीयास्थ्नाम् अन्तरे संवृतस्य च।
तापं सोढुमचेष्टे तं कृतकार्य्यस्तु नाभवं॥
यस्माद् बहुमनुष्याणां परीवादं शृणोम्यहं। १०
त्रासहेतुं चतुर्द्दिक्षु युष्माभिः सूच्यतामिति।
सूचयिष्यत एतस्य दोषो ऽस्माभिरपीति च॥
जना मत्सन्धिताः सर्व्वे स्खलनं लक्षयन्ति मे।
अनुनीतः कथञ्चित् सो ऽस्माभि र्निर्जीयतां नरः।
योग्यं दत्त्वा फलं तस्मै वैरं निर्यात्यतामिति॥

११ मया सार्द्धं परेशस्तु वर्त्तते भीमवीरवत्।
ततो हेतोः स्खलिष्यन्त्यसिद्धार्था मद्विधीषवः॥
स्वचिन्तां निष्फलां दृष्ट्वा लज्जिष्यन्ते च ते भृशं।
नित्यं स्थास्यति सा लज्जा विस्मृतिं नैव यास्यति॥
१२ सेनाध्यक्ष परेश त्वं धार्म्मिकस्य परीक्षकः।
त्वं मर्म्मस्थानदर्शी च त्वञ्च चित्तनिरीक्षकः॥
तेषां वैरप्रतीकारं वीक्षिष्येऽहं त्वया कृतं।
यतः स्वीयविवादस्य भारस्त्वय्यर्पितो मया॥
१३ परमेश्वरमुद्दिश्य यूयं गीतं प्रगायत।
प्रशंसा परमेशस्य युष्माभिः परिकीर्त्त्यतां।
दुष्टानां मुष्टितस्तेन प्राणा दीनस्य रक्षिताः॥
१४ भूयात् स वासरः शप्तो यस्मिन् जन्म ममाभवत्।
दिनं तच्च निराशीष्कं यस्मिन् मां प्रासवत् प्रसूः॥
१५ जातस्ते पुत्त्रसन्तान इमां वार्त्तां प्रदाय च।
येन मे हर्षितस्तातः शप्तो भूयात् स मानवः॥
१६ अनुतापं विनोच्छिन्नाः परमेशेन याः पुरा।
तासामेव पुरीणां स पुरुषः सदृशो भवेत्।
स प्रातः शृणुयात् क्रुष्टं मध्याह्ने च भयध्वनिं॥
१७ यतस्तेनोदरस्थस्य मम प्राणा न नाशिताः।
मज्जनन्या जरायु र्न शवाधारः कृतो मम।
न वा गर्भाशयस्तस्या नित्यगर्भभृतः कृतः॥
१८ व्यसनश्रमभोगाय क्रियायुर्यापनाय च।
उदरान्मम निर्गत्यां किमासीद् वा प्रयोजनं॥

---

२१ एकविंशोऽध्यायः।

१ यिरिमियं प्रति सिद्किियस्य दूतप्रेरणं २ नगरावरोधोद्भवदुःखविषये यिरिमियस्य भविष्यद्वाक्यं ८ कल्दीयलोकानां हस्तेषु पौराणां समर्पणं ११ राजवंशान् प्रति यिरिमियस्यानुयोगश्च।

१ बाबीलीयराजो निबूखद्नित्सरोऽस्माभिः सह युध्यते, अतस्त्वम् अस्मत्कृते परमेश्वरं प्रसादयस्व, परमेश्वरश्चेत् कथञ्चनास्मान् प्रति स्वीयसर्व्वा-

स्वर्य्यक्रियानुयायिनम् आचारं कुर्य्यात् तद्ध्वंसत्तस्तेनापगन्तव्यमिति वाचं २
गदितुं यदा मल्कियसुतः पश्हूरो मासेयसुतः सिफनियो याजकश्च
राज्ञा सिदिकियेन यिरिमियान्तिकं प्रहितौ तदा परमेश्वरादियं वाणी
यिरिमियं प्रति प्रादुरभूत्। यिरिमियस्तावब्रवीत्, युवां सिदिकियं ३
वदतं,

इस्रायेलो य ईशः स इदं ब्रूते परेश्वरः। ४
ये युष्मान् अवरुन्धन्ति प्राचीरस्य बहिः स्थिताः॥
तैः कल्दीयजनैः सार्द्धं बाबिलीयन्टपेण च।
योद्धुं यान्यायुधास्त्राणि यूयं धरत पाणिभिः॥
तान्येव विपरीतानि कर्त्तुं मां पश्यतोद्यतं।
अस्याः पुर्य्याश्च मध्येऽहं संग्रहीष्यामि तान् जनान्॥
अहमेव करिष्यामि युष्माभिः सह विग्रहं। ५
सुविस्तीर्णेन हस्तेन बलिष्ठेन च बाहुना।
कोपेन रोषभावेन प्रचण्डेन च मन्युना॥
हनिष्यन्ते मयैतस्याः पुर्य्याः सर्व्वनिवासिनः। ६
मनुष्याः पशवश्चापि मार्य्या नंक्ष्यन्ति तीव्रया॥
परमेशः पुन ब्रूते प्रदास्यामि ततः परं। ७
यिहूदाः सिदिकीयाख्यं न्टपं तस्य च सेवकान्।
तत्प्रजा मार्य्यसिक्षुद्भिः पुरेऽस्मिन्नवशेषितान्।
सर्व्वांस्तैव जनान् हस्ते बाबिलीयमहीपतेः।
निबूखद्रित्सराख्यस्य द्विषां तेषां करेषु च।
तेषां प्राणविनाशाय सचेष्टानां करेषु च॥
स हनिष्यति खड्गैस्तान् नानुकम्पिष्यते च तान्।
न विधास्यति कारुण्यं न क्षमां वा करिष्यति॥
वद त्वञ्च प्रजा एता ब्रवीतीदं परेश्वरः। ८
युष्माकं चक्षुषोरग्रे पश्यत स्थापयाम्यहं।
जीवनस्य च पन्थानं पन्थानं मरणस्य च॥
नगर्य्या मध्य एतस्या यः करिष्यत्यवस्थितिं। ९
मारीखड्गक्षुधाभि र्हि म्टत्युस्तस्य भविष्यति॥
बहि र्गत्वा तु कल्दीयान् युष्मदीयावरोधिनः।
यो जनः शरणं गच्छेत् स रक्षिष्यति जीवनं।

लोप्त्रवच्च निजप्राणान् स जनः प्रतिलप्स्यते ॥
१० यस्मात् परेश्वरो ब्रूत एतस्मिन् नगरे मया ।
न भूत्यै किन्तु दुर्गत्यै स्वीयदृष्टि र्निवेशिता ॥
बाबिलीयमहीपस्य हस्ते तच्चार्पयिष्यते ।
तेन भूमिभृता तच्च वह्निदग्धं करिष्यते ॥
११ यिहूदाराजगोष्ठ्यापि श्रूयतां वाक् परेशितुः ॥
१२ परमेश इदं ब्रूते हे दायूदीयगोत्रजाः ।
न्यायप्रणयनं यूयं संविधद्धमतन्द्रितं ।
पीडकस्य कराभ्याञ्च हृतस्वं परिरक्षत ॥
न चेद् वः कर्म्मदुष्टत्वात् प्रपत्याग्निशिखा यथा ।
युष्मान् धक्ष्यति कोपो मे यः केनापि न शम्यते ॥
१३ परमेशः पुन र्ब्रूते हे निम्नस्थलवासिनि ।
हे शैल समभूदर्शिन् पश्य त्वामभियाम्यहं ॥
भाषध्वे यूयमस्मान् कः शक्नोत्याक्रमितुं जनः ।
वासस्थानानि वास्माकम् अपरः कः प्रवेक्ष्यति ॥
१४ परेशो वक्ति दास्यामि योग्यं वः कर्म्मणां फलं ।
एतस्मिन् नगरारण्ये ज्वालयिष्यामि चानलं ।
सोऽस्याः पुर्य्याश्चतुर्दिक्स्थं सर्व्वमेव ग्रसिष्यते ॥

---

२२ द्वाविंशोऽध्यायः ।

१ भर्त्सनमङ्गलप्रतिज्ञाभिरनुतापाय जनान् प्रति विनयः १० शल्लूमस्य भाविदण्डः १३ यिहोयाकीमस्य भाविदण्डः २० कनियस्य भाविदण्डश्च ॥

१ परमेश्वर इदं वाक्यमब्रवीत् त्वं यिहूदाराजस्य राजपुरीं गत्वा तत्र
२ वाचमिमां भाषस्व । त्वं वद, हे दायूदीयसिंहासनासीन यिहूदाराज,
परमेश्वरस्य वाणी त्वया श्रूयतां । त्वया तव भृत्यैस्तव प्रजाभिश्च द्वारै-
३ रेतैः प्रविशद्भिः सर्व्वजनैरेवावधीयतां । परमेश्वर इत्थमाह,

न्यायो धर्म्मश्च युष्माभि र्विचारेण विधीयतां ।
पीडकस्य कराभ्याञ्च हृतस्वो रक्ष्यतां जनः ॥
विदेशीयेषु निर्नाथबालेषु विधवासु च ।
युष्माभि र्निर्दयाचारो द्रोहो वा क्रियतां नहि ।

दोषहीनस्य रक्तं वा स्थानेऽस्मिन् स्राव्यतां नहि॥
यूयं चेत् कुरुथाचारम् एतदाज्ञानुयायिनं। ४
दायूदो वंशजास्तर्हि नृपास्तदासनाश्रिताः।
रथारूढा हयारूढा भृत्यप्रजागणै र्वृताः।
एतद्राजगृहद्वारैः करिष्यन्ति गमागमौ॥
यदि त्वेतेषु वाक्येषु युष्माभि र्नावधीयते। ५
स्वनाम्ना शपथं कुर्व्वं ब्रवीतीदं परेश्वरः।
तदानीं राजधानीयम् उत्सन्नत्वं गमिष्यति॥
यिहूदाराजवेश्माधि ब्रवीतीदं परेश्वरः। ६
गिलियद् त्वं लिबानोनः कूटो वा प्रतिभासि मे॥
किन्तु प्रान्तरतुल्यं त्वां विधास्येऽहं न संशयः।
समानं नगरै र्वा तै र्यंत्र केनापि नोष्यते॥
पुरुषान् सहितानस्त्रैः संहरिष्यामि नाशकान्। ७
अहं त्वद्वैपरीत्येन प्रोच्छेत्स्यन्त्युत्तमानि ते।
त्वदीयैरसदारूणि विनिक्षेप्स्यन्ति चानले॥
अस्याः पुर्य्या उपान्तेन क्राम्यन्तो बहवो जनाः। ८
वक्ष्यन्तीतरजातीया एतां महापुरीं प्रति।
कुत ईदृशमाचारं परेशः कृतवानिति॥
तदा तेभ्योऽपरैस्तस्य कारणं कथयिष्यते। ९
स्वप्रभोः परमेशस्य नियमो ऽत्याजि तै र्जनैः।
प्रणम्येतरदेवानां सेवाकारि च तैरिति॥
मा मृतं प्रति युष्माभीरुद्यतां मा स शुच्यतां। १०
गतो यस्तु कृते तस्य क्रियतां तीव्ररोदनं।
यस्माज्जन्मस्थलं द्रष्टुं स न प्रत्यागमिष्यति॥

यतो यिहूदाराजस्य योशियस्य पुत्त्रो यः शल्लूम् स्वतातस्य योशि- ११
यस्य स्थाने राजत्वं प्राप्यैतस्मात् स्थानान्निरक्रमीत् तमधि परमेश्वर
इत्थमाह, स इदं स्थानं न प्रत्यागमिष्यति। परन्तु स यत् स्थानं १२
दासवन्नीतस्तत्रैव मरिष्यति देशमिमं स पुन र्न द्रक्ष्यति।

हा हा यस्त्वमधर्म्मेण निर्म्मिमीषे स्वमन्दिरं। १३
अन्यायेनैव तत्पृष्ठे स्वकोष्ठानि करोषि च॥
विनामूल्यं स्वजातीयं जनं कारयसि श्रमं।

उचितं वेतनं तस्मै न ददासि कथञ्चन ॥
१४ यस्त्वं ब्रवीषि निर्मास्ये सुविशालं निकेतनं।
वायुसेवनयोग्यानि तस्य पृष्ठे गृहाणि च ॥
वातायनद्वयञ्चापि यस्त्वं तच्छित्तवानसि।
यस्त्वमेरसकाष्ठस्य पत्रै मंण्डितवान् गृहं।
सिन्दूरलेपनं कृत्वा तच्च चित्रितवानसि ॥
१५ एरस्काष्ठे जिगीषातो राज्यं किं स्थास्यते तव।
तव यो जनकः किं सोऽशनं पानञ्च नाकरोत्।
न्यायं धर्म्मञ्च सोऽकार्षीत् तदा चासीच्छुभान्वितः ॥
१६ विचारं दुःखिदीनानां कुर्व्वन्नासीच्छुभान्वितः।
एतत् किं मदभिज्ञानं नास्तीत्याह परेश्वरः ॥
१७ किन्तु त्वद्दृष्टिचित्ताभ्यां न किञ्चिल्लक्ष्यतेऽपरं।
केवलं निजलाभस्ते निर्द्दोषरक्तपातनं।
पीडनाद्यपकारैश्च स्वाभिलाषस्य पूरणं ॥
१८ अतो हेतो र्यिहूदाया राजानं योशियसुतं यिहोयाकीममधि परमेश्वर इत्थं भाषते।
हा भ्रात र्हा स्वसः प्रोच्य स न शोचिष्यते जनैः।
हा प्रभो हा महाश्रीमन्नित्थं तै र्न लपिष्यते ॥
१९ किन्तु तस्य खरस्येव प्रेतकृत्यं भविष्यति।
स यिरूशालमो द्वारात् कृष्टः प्रक्षेप्स्यते बहिः ॥
२० त्वं लिबानोनमारुह्य तीव्रं कुरुष्व रोदनं।
बाशनं देशमाश्रित्य प्रोच्चरावमुदीरय।
क्रन्दाबारीमि यस्मात् ते सकलाः कामिनो हताः ॥
२१ शान्तिकाले मयाभ्युक्ता न श्रोष्यामीत्यभाषथाः।
तवाबाल्यादियं रीति र्यद्रवं न शृणोषि मे ॥
२२ वायुना भक्षयिष्यन्ते रक्षकाः सकलास्तव।
दासत्वञ्चापयास्यन्ति सकलास्तव कामिनः ॥
तस्मिन्नेव च काले त्वं प्रतिभास्यसि लज्जिता।
स्वीयकृत्स्नकदाचाराद् विवर्णा च भविष्यसि ॥
२३ कृतवासा लिबानोनि कृतनीडोच्चशाखिषु।
त्वाः कीदृक् करुणापात्रं तदानीं त्वं भविष्यसि।

महावेदनयाक्रान्ता प्रसवव्यथया यथा॥
परमेश इदं ब्रूतेऽहं स्वामरतया शपे। २४
यिहूदाया असौ राजा यिहोयाकीम आत्मजः॥
कनियो दक्षहस्ते मे मुद्रावत् सज्यते यदि।
तर्हि तस्मादपि स्थानात् स व्यपाकृष्यते मया॥
त्वत्प्राणान्तचिकीर्षूणां हस्ते त्वच्चार्पयिष्यसे। २५
येभ्यस्त्वं जायसे चासस्तेषामेव नृणां करे॥
बाबिलीयमहीपस्य निबूखद्रित्सरस्य च।
कल्दीयाख्यजनानाञ्च हस्ते मयार्पयिष्यसे॥
त्वञ्च त्वया सपुत्री च तव माता युवामुभौ। २६
प्रक्षेप्स्येथे मयैतस्माद् देशाद् देशान्तरं प्रति।
नाभवद् यत्र वां जन्म तत्रैवासून् प्रहास्यथः॥
तत्र प्रवासिनो यच्च प्रत्यागन्तुं स्वचेतसा। २७
आकाङ्क्षन्ति स्वदेशन्तै र्न प्रत्यायास्यते पुनः॥
कनियाख्यो नरोऽयं किं गर्हितं भग्नभाजनं। २८
स वा किं तादृशं पात्रं यत् कस्मैचिन्न रोचते॥
कुतो हेतोः सवंशः स बलात्कारेण तोलितः।
प्रक्षिप्तः परदेशे च तेषामविदिते पुरा॥
हे भू भू भूः परेशस्य वाक्यं त्वं श्रोतुमर्हसि॥ २९
परमेश इदं ब्रूते लिखतायं नरोऽप्रजः। ३०
भविता हीनभाग्यश्च यावज्जीवमसाविति॥
यतस्तद्वंशजः कोऽपि न भविष्यति भाग्यवान्।
दायूदीयासनासीनो यिहूदाराज्यभाक् पुनः॥

---

२३ त्रयोविंशोऽध्यायः।

१ पालकानां विरुद्धं भविष्यद्वचनं ५ प्रजानां पालकं ख्रीष्टमधि भविष्यद्वचनं ९ असत्यभविष्यद्वादिनां विरुद्धं भविष्यद्वचनं ३३ तथ्यभविष्यद्वादिगणनिन्दकस्य विरुद्धं भविष्यद्वचनञ्च।

परमेश इदं ब्रूते धिक् धिक् तान् मेषपालकान्। १
ये मत्क्षेत्रे स्थितान् मेषान् छिन्दन्ति विकिरन्ति च॥

२ अतस्त व्रजपाला ये पालयन्ति मम प्रजाः।
तानधीदमहं वच्मीस्रायेलः प्रभुरीश्वरः॥
मामकीनाविहन्दस्याहला तत्त्वावधारणं।
स युष्माभि र्विकीर्णास्च निरस्ताश्चाभवद् यतः॥
ततो वः कर्म्मणां दोषे प्रणिधाय मनो मया।
तत्फलं प्रापयिष्यध्व इत्थं ब्रूते परेश्वरः॥
३ मम मेषा मया यत्र निरस्ता अभवन् पुरा।
तेभ्यः सकलदेशेभ्यस्तच्छेषः सङ्ग्रहीष्यते॥
ते स्वीयचारणस्थानं समानीता मया पुनः।
प्रजावन्तो भविष्यन्ति वर्धिष्यन्ते च सङ्ख्यया॥
४ मयोत्पाद्य नियुक्तास्तांश्चारयिष्यन्ति पालकाः।
ते पुन र्न प्रभेष्यन्ति न वा प्राप्स्यन्ति साध्वसं।
न भविष्यन्त्यनुद्दिष्टा इत्यमाह परेश्वरः॥
५ कालः पश्य स आयातीत्थं ब्रूते परमेश्वरः।
यस्मिन्नुत्पादयिष्यामि दायूदे धर्म्मपल्लवं॥
राजा भूत्वा स राजत्वं कुर्व्वन् श्रीमान् भविष्यति।
देशे न्याय्यविचारं स धर्म्मञ्च संविधास्यते॥
६ तस्य राजत्वकाले च यिहूदास्त्राणमाप्स्यति।
इस्रायेलपि निःशङ्कं तदा वासं करिष्यति॥
येन नाम्ना च विख्यातः स महात्मा भविष्यति।
वक्ष्यते नामधेयं तद् 'अस्मद्धर्म्मः परेश्वरः'॥
७ तस्मात् परेश्वरो ब्रूत आयाति काल ईदृशः।
इस्रायेलीयवंशान् यो मिसर्देशात् समानयत्।
परमेशः स साक्षीति यदा न वक्ष्यते पुनः॥
८ इस्रायेलीयजातेस्तु वंशा उत्तरदेशतः।
मया यत्र विकीर्णास्चाभूवंस्तत्सर्व्वदेशतः॥
येनोद्धृत्य समानीता निवसन्ति स्वनीवृति।
परमेशः स साक्षीति तदानीं वक्ष्यते जनैः॥
९ भविष्यद्वक्तृनधि।
ममान्तःकरणं भग्नं मम सर्व्वास्थि कम्पते।
तुल्यो मत्तजनस्यास्मि सुराक्रान्तनरस्य वा।

सकाशात् परमेशस्य तत्पुख्योक्तेश्च शङ्कितः॥
यतः पूर्णोऽस्ति देशोऽयं मनुष्यैः पारदारिकैः। १०
अभिशापसकाशाद्धि शोकार्त्ता प्रतिभाति भूः॥
पशूनां चारणस्थानं सर्व्वं शुष्कञ्च प्रान्तरे।
सपापं धावनं तेषाम् असाधुश्चास्ति विक्रमः॥
याजको भाविवक्ता च निर्धर्म्माचारिणावुभौ। ११
प्रभु र्ब्रूते मया प्राप्यधर्म्मस्तेषां स्वधाम्न्यपि॥
अतो यद्वद् भवेद् ध्वान्ते स्खलनोत्पादकं स्थलं। १२
तेषां यद् वर्त्म गन्तव्यं तद् भविष्यति तत्समं।
तेषां तत्र निरस्तानां पतनं सम्भविष्यति॥
यस्मादकुशलं तेषां फलदानस्य वत्सरं।
ते मया प्रापयिष्यन्त इत्थं ब्रूते परेश्वरः॥
पुरा ये शोमिरोणासन् भविष्यद्वाक्यवादिनः। १३
तान् निरीक्ष्य मया तेषु बालिश्यमवधारितं॥
ते वाल्देवस्य नाम्नैव भाविवाक्यान्युदैरयन्।
अनयंश्च प्रजावृन्दं मम्मेस्रायेलमुत्पथं॥
यिरूशालमि ये सन्ति भविष्यद्वाक्यवादिनः। १४
तान् वीक्ष्य तेषु पश्यामि रोमाञ्चजनिकां क्रियां॥
गच्छन्ति परदारांस्ते निःसत्यमाचरन्ति च।
ते हस्तान् दुश्चरित्राणां सबलीकुर्व्वते तथा।
यथा ते न निवर्त्तेरन् स्वदौर्जन्यात् कथञ्चन॥
तत्साकल्यं ततो जातं मम साक्षात् सिदोमिव।
अमोरीयजनानाञ्च तुल्याः पौरजना इमे॥
भाविवक्तॄनधि ब्रूते तस्मात् सेनाधिपः प्रभुः। १५
पश्य किरातत्तिक्तेन भोजयिष्यामि तानहं।
पाययिष्यामि तांश्चाहं पानीयं विषदूषितं॥
यिरूशालमि ये सन्ति भविष्यद्वाक्यवादिनः।
व्यभिचारो यतस्तेभ्यः प्रगतः कृत्स्नमीवृतं॥
भाषते भारतीमेतां सेनाध्यक्षः परेश्वरः। १६
व्याहरन्तीशवाक्यानि युष्मान् ये भाविवादिनः।
तेषां वाक्येषु युष्माभि र्मनो मा प्रणिधीयतां॥

यतः कुर्व्वन्ति ते युष्मान् अलीकाश्रयसंस्थितान्।
जल्पन्तः स्वहृदां स्वप्नं न त्वादेशात् परेशितुः॥
१७ यूयं सम्प्राप्स्यथ क्षेमम् इत्यमाह परेश्वरः।
वदन्ति स्पष्टमेतत् ते मां निराकुर्व्वतो जनान्॥
ये जनाः स्वीयचित्तानां जडतामाचरन्ति च।
तांस्ते वदन्ति दौर्गत्यं युष्मान् नैवाक्रमिष्यति॥
१८ किन्तु कः स्थितवांस्तेषां परमेशस्य संसदि।
को वा तं दृष्टवांस्तत्र तस्य च श्रुतवान् वचः।
कर्णौ निधाय वा केन गृहीता उक्तयो मम॥
१९ झञ्झावातः परेशस्यात्युग्रः पश्य प्रवर्त्तते।
सा झञ्झा घूर्णते मूर्द्धि दुष्टानाञ्च स्फुटिष्यति॥
२० स्वमनस्कल्पना यावन्न कुर्य्यान्न च साधयेत्।
तावत् क्रोधः परेशस्य न निवर्त्तिष्यते पुनः।
भाविकालेऽत्र युष्माकं स्पष्टबोधो जनिष्यते॥
२१ अधावन् भाविवक्तार एते न प्रेषिता मया।
अभाषन्तैशवाक्यञ्च मया नालपिता अपि॥
२२ मम मन्त्रिसभायान्तूपास्थास्यंस्ते जना यदि।
तर्हि मामकवाक्यान्यश्रावयिष्यन् मम प्रजाः।
प्रत्यानेष्यन् कुमार्गाच्च ताः क्रियाणाञ्च दौष्ठवात्॥
२३ पुनर्व्वारमिदं वाक्यं भाषते परमेश्वरः।
अदूरस्य किमीशोऽहं स्यां दूरस्य त्वनीश्वरः॥
२४ कश्चित् किं निभृते स्थाने भवेत् तादृक् तिरोहितः।
यथाहं तं न पश्येयम् इत्यमाह परेश्वरः।
किं न स्वर्गं भुवञ्चाहं व्याप्नोमीति प्रभो र्वचः॥
२५ स्वप्नं सन्दृष्टवानस्मि स्वप्नं सन्दृष्टवानहं।
इत्थं मृषैशवाक्यानि मम नाम्ना वदन्ति ये।
भविष्यद्वादिनां तेषां पर्य्यश्रौषमहं वचः॥
२६ कतिकालमिदं स्थायि मृषैशोक्ती र्ब्रुवन्ति ये।
स्वमनस्काल्पितं व्याजं जल्पन्तो भाविवादिनः।
किमन्तःकरणे तेषाम् अयमास्ते मनोरथः॥
२७ वाल्देवार्थे यथा तेषां तातै र्मन्नाम विस्मृतं।

स्वस्वप्नानां कथामेतें कथयन्तः परस्परं।
तत्स्वप्नार्थे प्रजाभि र्मे तथा मन्नाम विस्मृतं।
कुर्य्युरेनमभिप्रायं किं स्वान्ते कल्पयन्ति ते॥
स्वप्नो यस्यास्ति स स्वप्नं भाविवादी प्रभाषतां। २८
मम वाक्यन्तु यस्यास्ति स मद्वाक्यं वदेदृतं।
कः शस्यबुसयोः सङ्ग इत्यमाह परेश्वरः॥
किं न वह्निसमा मे वाग् इत्यमाह परेश्वरः। २९
किं न सा मुद्गरेणैव तुल्या शैलविभेदिना॥
परमेशस्ततो ब्रूते पश्य ये भाविवादिनः। ३०
मिथो मुष्णन्ति मद्वाक्यं निग्रहिष्यामि तानहं॥
पुनर्व्वारमिदं वाक्यं भाषते परमेश्वरः। ३१
पश्याहं प्रतिकूलोऽस्मि तेषाञ्च भाविवादिनां।
प्रयुज्य स्वीयजिह्वा यैरित्यमाहेति गद्यते॥
पुनर्व्वारमिदं वाक्यं भाषते परमेश्वरः। ३२
पश्याहं प्रतिकूलोऽस्मि तेषाञ्च भाविवादिनां॥
ये पश्यन्ति मृषा स्वप्नान् जनेभ्यः कथयन्ति च।
स्वालीकोक्तिप्रपञ्चैस्ते भ्रान्ताः कुर्व्वन्ति मत्प्रजाः॥
न तान् प्रेषितवानस्मि न वाज्ञापितवानहं।
ते जनान् नोपकुर्व्वन्तीमानित्याह परेश्वरः॥
प्रजया भाविवक्त्रा वा केनचिद् याजकेन वा। ३३
परमेशस्य को भार एतत् त्वं यदि पृच्छ्यसे॥
तर्हि तान् प्रति भाषस्व को भारस्तन्निशम्यतां।
अहं युष्मान् विहास्यामीत्थं ब्रूते परमेश्वरः॥
भारः परेश्वरस्येति वाग् येन भाविवादिना। ३४
येन वा याजकेनापि यया वा प्रजयोच्यते।
दण्डं तस्मै प्रदास्यामि तस्य वंशाय चोचितं॥
प्रभुः किमुत्तरं प्रादात् किमवादीत् परेश्वरः। ३५
इत्थं मित्राय भ्रात्रे वा व एकैकेन कथ्यतां॥
भारः परेश्वरस्येति वाक्यं मोच्चार्य्यतां पुनः। ३६
न चेद् यद् यस्य वाक्यं स तस्य भारो भविष्यति॥
यस्मादस्माकमीशो यः सेनाध्यक्षः परेश्वरः।

तस्य जीविन ईश्वरस्योक्तीनां यूयं विकारिणः ॥
३७ प्रभुः किमुत्तरं प्रादात् किमवादीत् परेश्वरः।
इत्थं युष्माकमेकैको भविष्यद्वादिनं वदेत् ॥
३८ भारः परेश्वरस्येति यूयं ब्रूथ पुन र्यदि।
तर्हि तत्कारणादित्थं भाषते परमेश्वरः ॥
भारः परेश्वरस्येति युष्माभि र्नोच्यतामिति।
प्रेषयित्वा मया दूतान् यूयमाज्ञापिता अपि।
भारः परेश्वरस्येत्यभाषध्वं वचनं यतः ॥
३९ ततो हेतोरहं पश्य युष्मानुत्तोल्य भारवत्।
सहितानया पुर्य्या पितृभ्यो वः प्रदत्तया।
युष्मान् निपातयिष्यामि सुदूरं मम दृष्टितः ॥
४० आक्रान्तांश्च विधास्यामि युष्मान् शाश्वतनिन्दया।
कलङ्केन च नित्येन विस्मृतिं यो न यास्यति ॥

---

२४ चतुर्विंशोऽध्यायः।

१ उत्तमाधमोडुम्बरफलानां दृष्टान्तः ४ ये लोका बाबिलतो यिहूदां परावृत्यागमिष्यन्ति तेषामुत्तमोडुम्बरफलरूपत्वं ८ सिदिकियप्रभृतयो येऽवशिष्टलोका देशान्तरे विकीर्णा भविष्यन्ति तेषामधमोडुम्बरफलरूपत्वञ्च।

१ बाबिलीयराजेन निबूखद्नित्सरेण यिहूदीयराजे यिहोयाकीमसुते
यिहोयाखीने यिहूदायाः प्रमुख्यजनेषु सूत्रधरेषु लोहकारेषु च दासवद्
यिरूशालमो बहिष्कृत्य बाबिलं नीतेषु परमेश्वरो मह्यं दर्शनं दत्तवान्
ततोऽहं परमेश्वरीयमन्दिरस्य सम्मुखे निवेदिते उडुम्बरफलपूर्णे द्वे भाजने
२ दृष्टवान्। तयोरेकस्य पात्रस्योडुम्बरफलानि प्रथमपक्वोडुम्बरफलानीवा-
तीवोत्कृष्टानि द्वितीयस्य तु पात्रस्य फलान्यतीवापकृष्टान्यपकर्षादखाद्या-
३ न्येव चासन्। ततः परं परमेश्वरो मामवादीत्, हे यिरिमिय, त्वया किं
दृश्यते? मया चोक्तम् उडुम्बरफलानि दृश्यन्ते, तत्र चोत्कृष्टफलान्यतीवो-
त्कृष्टानि अपकृष्टानि तु फलान्यतीवापकृष्टान्यपकर्षादखाद्यानि च सन्ति।
४ तदानीं परमेश्वरस्येदं वाक्यं मां प्रति प्रादुरभूत्,
५ इस्रायेलो य ईशः स इत्थं ब्रूते परेश्वरः।
उडुम्बरफलानीवोत्तमानीमानि तान् जनान्।

यिहूदीयान् निरीक्षिष्ये तेषां क्षेमाय ये मया ।
प्रहिता दासवत् स्थानाद् अस्मात् कल्दीयनीवृतं ॥
क्षेमायैव मया तेषु दृष्टि र्निवेशयिष्यते । ६
पुनर्व्वारमिमं देशं समानेष्यामि तानहं ॥
अकृत्वोन्मूलनं तेषां करिष्यामि च वर्द्धनं ।
नैव तान् पातयित्वा च रोपयिष्यामि निश्चलं ॥
परमेशोऽहमस्मीति मदभिज्ञानभाजनं । ७
चित्तं तेभ्यश्च दास्यामि ते भविष्यन्ति मे प्रजाः ॥
तथा तेषां मनुष्याणां भविष्याम्यहमीश्वरः ।
यस्मात् स्वकृत्स्नचित्तैस्ते प्रत्यायास्यन्ति मां प्रति ॥
उडुम्बरफलानीवात्यपकृष्टानि तानि तु । ८
अपकर्षादखाद्यानि (ब्रवीतीदं परेश्वरः) ।
अहं तं सिदिखीयाख्यं यिहूदाया महीपतिं ।
तस्य मुख्यमनुष्यांश्च यिरूशालम्निवासिनां ।
शेषांश्च मानवान् सर्व्वान् ये शिष्यन्तेऽत्र नीवृति ।
वसन्तो वा मिसर्देशे तानुत्स्रक्ष्यामि सर्व्वथा ॥
तानहं सर्व्वराष्ट्रेषु वेपनायाशुभाय च । ९
यत्र वा निरसिष्यामि तत्रोत्स्रक्ष्यामि सर्व्वतः ।
निन्दायै वाच्यतायै च सीत्काराय शपाय च ॥
तेषु तेषाञ्च तातेषु मया या भूमिरर्पिता । १०
तस्या मध्यत उच्छेदस्तेषां यावन्न सेत्स्यति ।
तावत् खड्गक्षुधामारीः प्रहेष्यामि च तान् प्रति ॥

---

२५ पञ्चविंशोऽध्यायः ।

१ लोकानां दोषानधि यिरिमियस्य भविष्यद्वाक्यं ८ तत्कारणात् सप्ततिवत्सरान् यावत् तेषां भाविदण्डः १२ तेषां शत्रूणां बाबिलीयलोकानां भाविदण्डः १५ बहुदेशीयलोकेभ्यः पानार्थं क्रोधरूपकंसप्रदानं तद्विषये यिरिमियस्य भविष्यद्वाक्यं २९ मेषपालकानां भाविविनाशश्च ।

यिहूदाया राज्ञो योशियसुतस्य यिहोयाकीमो राजत्वस्य चतुर्थे १
वत्सरेऽर्थतो बाबिलीयराजस्य निबूखद्नित्सरस्य प्रथमवत्सरे कृत्स्नं

२ यिहूदीयप्रजागणमधि यिरिमियं प्रति वाक्यमिदं प्रादुरभूत्। स च
भविष्यद्वक्ता यिरिमियः कृत्स्नं यिहूदीयप्रजागणमधि यिरूशालम्निवा-
३ सिनः सर्व्वजनांश्चाधि तद् व्याहर्षीत्। तद्यथा, यिहूदीयराजस्यामोन-
सुतस्य योशियस्य राजत्वस्य त्रयोदशं वत्सरमारभ्याद्य यावत् त्रयो-
विंशतिवत्सरानेव परमेश्वरस्य वाक्यं मां प्रति प्रादुर्भवति मया चात-
४ न्द्रिणा भाषित्वा युष्मभ्यं कथ्यते युष्माभिस्तु तत्रावधानं न क्रियते। परमे-
श्वरेणातन्द्रिणा युष्मान् प्रति स्वसेवकेषु सकलभविष्यद्वक्तृषु प्रहितेषु यु-
५ ष्माभिरवधानं न क्रियते श्रवणाय श्रोत्रञ्च न निवेश्यते। तेनोक्तं यथा,

प्रत्यावर्त्तितुमेकैको यूयं स्वीयकुमार्गतः।
स्वक्रियाणाञ्च दुष्टत्वात् प्रत्यावर्त्तितुमर्हथ॥
तेन शाश्वतभोगार्थं यां भूमिं परमेश्वरः।
युष्मभ्यं वः पितृभ्यश्च दत्तवांस्तत्र वत्स्यथ॥
६ यूयञ्चेतरदेवानां सेवायै भजनाय च।
मानुगच्छत तान् मा वा क्रियाभिः स्वीयहस्तयोः।
मां क्रोधयत तेनाहं न करिष्यामि वः क्षतिं॥
७ यूयन्तु मद्वचोऽश्रुत्वा (वक्तीदं परमेश्वरः)।
क्रुद्धं स्वक्षतयेऽकार्ष्ट मां क्रियाभिः स्वहस्तयोः॥
८ अतो हेतोरिदं ब्रूते सेनाध्यक्षः परेश्वरः।
मम वाक्येषु युष्माभि र्नावधानं कृतं यतः॥
९ पश्य तस्मादहं दूतैर्वंशान् उत्तरवासिनः।
सकलान् सङ्ग्रहीष्यामि मामकीनञ्च सेवकं।
बाबिलीयमहीपालं निबूखद्रित्सरं तथा॥
आनेष्यामि च तानस्य देशस्य तन्निवासिनां।
तच्चतुर्दिक्स्थवंशानां सर्व्वेषाञ्च विरुद्धतः॥
ध्वंसे तान् विनियोक्ष्यामि विधास्ये विस्मयस्य च।
धिक्कारस्य च लक्ष्यं तान् नित्योच्छेदस्य च स्थलं॥
१० आमोदहर्षयोः शब्दं शब्दञ्च वरकन्ययोः।
पेषणीजातशब्दञ्च प्रदीपस्य प्रभां तथा।
समुच्छेत्स्याम्यहं तेषां जनानां मध्यतस्तदा॥
११ भविता कृत्स्नदेशोऽयं ध्वंसविस्मययोः स्थलं।
सप्ततिवत्सरान् यावद् अत्रत्याः सर्व्वजातयः।

बाबिलीयनरेन्द्रस्य सम्भविष्यन्ति किङ्कराः॥
तेषु सप्ततिवर्षेषु सम्पूर्णत्वं गतेष्वहं। १२
बाबिलीयनरेन्द्राय तत्रत्यायै च जातये।
कल्दीयानाञ्च देशाय तेषां दुष्कर्म्मणः फलं।
प्रदास्यामि यथायोग्यम् इत्थं ब्रूते परेश्वरः।
तं देशञ्च विधास्यामि नित्यस्थायिमरुस्थलं॥
अहं तत्प्रातिकूल्येन यानि वाक्यानि चोक्तवान्। १३
सर्व्वेष्वितरवंशेषु यिर्मियेण प्रभाष्य च।
यावन्ति भाविवाक्यानि लिखितान्यत्र पुस्तके॥
प्रापयिष्यामि तं देशं तानि सर्व्ववचांस्यहं॥
यस्माद् विक्रमिणो वंशा महान्तश्च महीभृतः। १४
दासत्वं कारयिष्यन्ति तद्देशीयजनानपि॥
इत्थं तेषां यथाचारो यथा कर्म्म च हस्तयोः।
तथा निर्यातयिष्यामि तेभ्यो दत्त्वोचितं फलं॥

यत इस्रायेलः प्रभुः परमेश्वरो मामिदं वाक्यमवादीत् त्वं रोषरूप- १५
मद्यपूर्णम् इमं कंसं मम करादादाय याः प्रत्यहं त्वां प्रहिणोमि ताः सर्व्वा
जातीस्तत्र पायय। तेन ते पीत्वा तेषां मध्यं मया प्रहितस्यासेः सका- १६
शाद् विचलिष्यन्त्युन्मदिष्यन्ति च। अतोऽहं परमेश्वरस्य करात् तं कंस- १७
मादाय स याः प्रति मां प्राहिणोत् ताः सर्व्वा जातीरपाययं। अर्थतो १८
यिरूशालमं यिहूदायाः सर्व्वनगराणि च तस्या राज्ञः प्रमुख्यनरांश्चापा-
ययं, ध्वंसाय विस्मयाय सीत्काराय शापास्पदाय च यथाद्य दृश्यते तथा
तेषां संस्थापनं येन भवेत्। अपरञ्च मिस्रीयराजं फिरौणं तस्य भृत्यान् १९
प्रमुख्यनरान् सर्व्वप्रजाश्च, सर्व्वान् सङ्करजातीयजनान् सर्व्वान् ऊषदे- २०
शस्य राज्ञः सर्व्वान् पिलेष्टीयदेशस्य राज्ञोऽर्थतोऽस्किलोनम् अस्साम् २१
इक्रोणम् अश्दोदस्य शेषञ्च, इदोमं मोयावम् अम्मोनवंशांश्च, सर्व्वान् २२
सोरसो राज्ञः सर्व्वान् सीदोनस्य राज्ञः सागरपारस्थद्वीपस्य च राज्ञः,
दिदानं तेमां बूषं छिन्नश्मश्रूकोणान् सर्व्वजनांश्च, सर्व्वान् आरव- २३
देशस्य राज्ञो मरुनिवासिसङ्करजातीयानां सर्व्वान् राज्ञश्च, सर्व्वान् २४
सिम्रिदेशस्य राज्ञः सर्व्वान् एलमदेशस्य राज्ञः सर्व्वान् मादीयदेशस्य
राज्ञश्च, निकटवर्त्तिनो दूरवर्त्तिनो वा निर्विशेषान् सर्व्वान् उत्तर- २५
देशानां राज्ञश्च भूमण्डले स्थितानि पृथिव्याः सर्व्वराष्ट्राणि चापाययं,

१६ शेशकराजश्च तेषां पश्चात् पास्यति। त्वञ्च तान् वद, इस्रायेल ईश्वरः
सेनानाम् अधिपतिः परमेश्वरः इदं ब्रवीति,

२७ यूयं पिवत मत्ताश्च भूत्वा वमत कुत्सितं।
युष्मन्मध्यं मया यश्च कृपाणः प्रेषयिष्यते।
पतित्वा तत्पुरो यूयं नैवोत्तिष्ठत कर्हिचित्॥

२८ ते च यदि पानाय तव हस्तात् तं कंसं ग्रहीतुम् अनिच्छां प्रकाशयर-
स्तर्हि त्वं तान् वद,

२९ सेनाध्यक्षः प्रभुर्ब्रूते यूयं पास्यथ निश्चितं॥
यस्मात् पश्यत मे नाम यस्या उपरि कीर्त्तितं।
तस्याः पुर्य्यां मयारभ्य प्रथमं क्रियते क्षतिः।
किं स्यातादण्डिता यूयं नादण्डिता भविष्यथ॥
पश्याहं प्रातिकूल्येन सर्व्वेषां भूनिवासिनां।
आङ्कास्याम्यसिमित्याह सेनाध्यक्षः परेश्वरः॥

३० त्वञ्च तानुद्दिश्य सर्व्वाण्येतानि भविष्यद्वाक्यानि भाषमाणो तान् वद,
करिष्यत्युन्नतस्थाने गर्जनं परमेश्वरः।
स्वीयपुण्यनिवासाच्च स्वनादं श्रावयिष्यति।
तिष्ठन् स्वालयपार्श्वे स चेरयिष्यति गर्जनं॥
यादृशं कुर्व्वते नादं द्राक्षामर्द्दनकारिणः।
स पृथ्वीवासिनः सर्व्वान् तादृशं श्रावयिष्यति॥

३१ पृथिवीप्रान्तपर्य्यन्तं महाशब्दो व्यश्यिष्यते।
विवादो जातिभिः सार्द्धं प्रभोर्यस्माद् भविष्यति॥
विचारं सकलानाञ्च प्राणिनां स विधास्यति।
स दास्यत्यसये दुष्टान् इत्थं ब्रूते परेश्वरः॥

३२ भाषते भारतीमेनां सेनाध्यक्षः परेश्वरः।
वीक्षध्वं जातितो जातिं विपत्तिः प्रगमिष्यति।
महावात्या च मेदिन्याः प्रान्तेभ्यः प्रपतिष्यति॥

३३ भूमण्डलस्य चाप्रान्तात् प्रान्तं यावद्धि तद्दिने।
शयिष्यन्ते परेशेन घातिता नरविग्रहाः॥
अशोचिता अनादत्ता अप्राप्तोत्तरसत्क्रियाः।
भूमिपृष्ठे विकीर्णाश्च ते भविष्यन्ति सारवत्॥

३४ हे मेषपालका यूयं हाहाकारं विधत्त हि।

लुठन्तः क्रन्दत प्रोच्चैर्यूयं मेषाग्रगामिनः॥
बधार्थं दिनसङ्ख्या वो यस्मात् सम्पूर्णतां गता।
विकीर्णाः पतितव्यश्च युष्माभी रम्यपात्रवत्॥
हीनाश्रया भविष्यन्ति तदानीं मेषपालकाः। ३५
हीनप्रधावनोपाया मेषाणाम् अग्रगामिनः॥
श्रोष्यते मेषपालानां क्रन्दनस्य रवस्तदा। ३६
श्रोष्यते चार्त्तनादोऽपि प्रोच्चो मेषाग्रगामिनां।
तेषां मेषप्रचारस्य परमेशेन नाशनात्॥
शान्तिवासा विनङ्क्ष्यन्ति प्रभोः कोपानलेन च॥ ३७
स निजं त्यक्ष्यति स्थानं केशरी गह्वनं यथा। ३८
यतस्तेषां नृणां देशः समुच्छिन्नो भविष्यति।
नाशकस्यानलोत्तापात् तत्कोपाग्नेश्च दीपनात्॥

---

२६ षड्विंशोऽध्यायः।

१ यिरूशालममधि यिरिमियस्य भविष्यद्वाक्यं ७ तत्कारणाद् याजकैर्धृतस्य तस्योत्तरदानं १६ अधिपतिभिर्मीखायस्योरीयस्य चोदाहरणकथनं यिरिमियस्य रक्षणञ्च।

यिहूदादेशीयराजस्य योशियसुतस्य यिहोयाकीमस्य राजत्वारम्भ- १
काले परमेश्वरस्येदं वाक्यं प्रादुरभूत्, यथा, परमेश्वरो ब्रूते, भजनार्थं
परमेश्वरीयमन्दिरम् आगतान् यिहूदायाः सर्व्वनगरवासिनो यानि २
वाक्यानि ममादेशात् त्वया वक्तव्यानि त्वं परमेश्वरीयमन्दिरस्य प्राङ्गणे
तिष्ठन् तानि सर्व्वाणि वाक्यानि तान् वद तत्रैकमपि वाक्यं मा ह्रासय।
स्यात् ते तत्रावधाय निजकुमार्गात् प्रत्यावर्त्तिष्यन्ते तथा सति तेषां ३
क्रियादोषाद् यदमङ्गलं तान् प्रापयितुमचिन्तयं ततः क्षान्तो भविष्यामि।
अतस्त्वं तान वद, परमेश्वर इत्थं ब्रूते, युष्मत्सम्मुखे मया या व्यवस्था ४
स्थापिता तदादिष्टमाचरितुं, विशेषतो मयातन्द्रिणा युष्मान् प्रति प्रहि- ५
तानां मद्दासानां येषां भविष्यद्वादिनां वाक्येषु यूयमवधानं न कुरुथ
तेषां वाक्येष्ववधातुं यदि युष्माभिर्मनो न निवेक्ष्यते, तर्ह्यहमिदं मन्दिरं ६
शीलोहस्य तुल्यम् इदञ्च नगरं भूमण्डलवासिनीनां सर्व्वजातीनां शापा-
स्पदं करिष्यामि।

७ यिरिमियो यदा परमेश्वरस्य मन्दिरे वाक्यान्येतान्यवदत् तदा
८ याजका भाविवक्तारः सर्व्वे जनाश्च तान्यश्रौषुः। अतः परमेश्वरस्यादे-
शात् सर्व्वान् जनान् प्रति यद्यद् वक्तव्यं यिरिमियेण तत्कथने समापिते
ते याजका भाविवक्तारः सर्व्वे जनाश्च तं धृत्वा कथितवन्तस्त्वमवश्यं
९ हन्तव्योऽसि। मन्दिरमिदं शीलोहस्य तुल्यं भविष्यति नगरञ्चेदमुच्छिन्नं
निवासिहीनञ्च भविष्यतीति भाविवाक्यं त्वं परमेश्वरस्य नाम्ना कुतः
कथितवान्? इत्युक्त्वा सर्व्वे जनाः परमेश्वरस्य मन्दिरे यिरिमियस्य प्रा-
१० तिकूल्येन जनतामकार्षुः। तां कथां श्रुत्वा यिहूदादेशस्याधिपतयो राज-
प्रासादात् परमेश्वरस्य मन्दिरं गत्वा नूतनस्य परमेश्वरीयद्वारस्य प्रवेश-
११ स्थान उपविविशुः। तदानीं याजका भाविवक्तारश्च तान् अधिपतीन्
सर्व्वजनांश्च जगदुः, अस्य नरस्य प्राणदण्डार्थको विचारः कर्त्तव्यः, यतो-
ऽयम् एतस्य नगरस्य प्रतिकूलं भाविवाक्यं कथितवान् तद् यूयं स्वकर्णैः
१२ श्रुतवन्तः। तदानीं यिरिमियस्तान् सर्व्वान् अधिपतीन् सर्व्वजनांश्चा-
वादीत्, यूयं यानि वाक्यानि श्रुतवन्तस्तानि सर्व्वाण्येतन्मन्दिरस्यैतन्नग-
१३ रस्य च प्रातिकूल्येन भाविवाण्या प्रचारयितुं परमेश्वरेणाहं प्रेषितः।
अतोऽधुना यूयं स्वमार्गान् स्वक्रियाश्च शोधयत युष्मत्प्रभोः परमेश्वरस्य
रवे चावधानं कुरुध्वं तेन परमेश्वरो युष्मद्वैपरीत्येन यद् अमङ्गलवाक्यं
१४ कथितवांस्ततः क्षान्तो भविष्यति। अहन्तु पश्यत युष्माकं हस्तगतः,
१५ युष्मभ्यं यद्यद् भद्रं यथार्थञ्च प्रतिभाति मामधि तदेव कुरुध्वं। केवल-
मिदं युष्माभिर्ज्ञातव्यं, यूयं चेन्मां हन्यात तर्हि युष्मास्वस्मिन् नगरे तन्नि-
वासिषु च निर्दोषरक्तपातापराधम् अर्पयिष्यथ, यतो युष्मत्कर्णगोचरे
सर्व्वाण्येतानि वाक्यानि गदितुमहं परमेश्वरेण युष्मान् प्रति प्रहित
इति सत्यं।

१६ ततोऽधिपतयः सर्व्वे जनाश्च याजकान् भाविवक्तॄंश्च जगदुः, अस्य
नरस्य प्राणदण्डार्थको विचारो न कर्त्तव्यः, यतोऽस्मत्प्रभोः परमेश्वरस्य
१७ नाम्ना सोऽस्मान् प्रति भाषितवान्। अधिकन्तु देशस्य प्राचीनानां
१८ कतिपयपुरुषा उत्थाय प्रजानां कृत्स्नां जनतां जगदुः, यिहूदादेशीय-
राजस्य हिष्कियस्य काले मोरेष्टीयो मीखायो भाविवाणीं भाषमाणो
यिहूदायाः सर्व्वजनान् अवादीत्, यथा,

भाषते भारतीमेनां सेनाध्यक्षः परेश्वरः।
यथा क्षेत्रं तथा सीयोन् हलकृष्टं भविष्यति।

नगरी च यिरूशालम् भविष्यत्यस्मराशयः।
मन्दिरस्य गिरिश्चापि भविष्यत्युच्चकाननं॥

यिहूदाया राजा हिष्कियः कृत्स्नयिहूदावंशो वा किं तम् अवधीत्? स १९
(राजा) किं न परमेश्वराद् अभैषीत् परमेश्वरञ्च प्रासीषदत्? तस्मात्
परमेश्वरस्तेषां विरुद्धं यद् अमङ्गलम् उक्तवान् ततः क्षान्तोऽभवत्। वयन्तु
स्वप्राणानां महाविपदावहां क्रियां कुर्म्महे।

अधिकन्तु परमेश्वरस्य नाम्ना भाविवाक्यवाद्यन्य एको नर आसीत् २०
किर्यत्-यियारीमीयशिमायाहसुत ऊरिय इति तस्य नाम। यिरिमि-
यस्य सर्व्ववाक्यानीव स एतन्नगरमेतद्देशञ्चाधि भाविवाक्यान्यकथयत्।
राज्ञा यिहोयाकीमेन तस्य सर्व्ववीरैः सर्व्वैश्चाधिपतिभिस्तस्योरियस्य २१
वाक्येषु श्रुतेषु राजा तं हन्तुं चेष्टितवान्। तन्निशम्य स ऊरियो भीत्वा २२
पलाय्य मिसरं जगाम। ततो राजा यिहोयाकीमः कतिपयजनान्
मिसरं प्रेषितवान् अर्थतोऽक्बोरसुतम् इल्नाथनं तस्य सङ्गिनश्च जनान्
मिसरं प्रहितवान्। ते चोरियं मिसरदेशाद् बहिष्कृत्य राज्ञो यिहो- २३
याकीमस्य समीपम् आनिन्युः। स च तमसिना घातयामास तस्य
शवञ्चेतरजनानां श्मशाने निक्षेपयामास। परन्तु यिरिमियो यथा २४
बधार्थं लोकानां करेषु समर्पितो न भवेत् तदर्थं शाफनस्य पुत्त्रोऽही-
कामस्तस्य सहायो बभूव।

---

२७ सप्तविंशोऽध्यायः।

१ युगानां दृष्टान्तेन नानादेशीयराजानां दासत्वसूचनं तदङ्गीकरणाय च यिरि-
मियस्य परामर्शः १२ सिदिकियराजं प्रति परामर्शः १६ याजकान् प्रति तद्व-
द्भविष्यद्वाक्यं १९ मन्दिरस्यावशिष्टानि धातुपात्त्राणि बाबिलम् अपनेतव्यानीति
भाविवाक्यञ्च।

यिहूदीयराजस्य योशियसुतस्य यिहोयाकीमस्य राजत्वारम्भकाले १
परमेश्वरस्येदं वाक्यं यिरिमियं प्रति प्रादुरभूत्। परमेश्वरो मामि- २
त्यमब्रवीत्। त्वं योक्त्राणि युगानि च निर्म्माय स्वग्रीवायां धत्स्व। ये च ३
राजदूता यिरूशालमं यिहूदीयराजस्य सिदिकियस्य समीपम् आ-
गतास्तैर्दूतैरिदोमीयराजस्य मोयाबीयराजस्याम्मोनवंशीयराजस्य सो-
रीयराजस्य सीदोनीयराजस्य च सन्निधिं तानि प्रेषय। तान् दूतांश्च ४
स्वस्वामिभ्यो निवेदनीयामिमां कथामादिश, यथा, इस्रायेलः प्रभुः

५ सेनाध्यक्षः परमेश्वरो ब्रूते, यूयं स्वस्वामिन इत्थं वदत। अहमेव स्वीय-
महाशक्त्या स्वप्रसारितबाहुना च पृथिवीं मनुष्यान् भूतलस्थपशूंश्च सृ-
६ ष्टवान् यस्य भद्रं मन्ये तस्मै दत्तवान्। अधुना त्वहं सर्व्वान् इमान् देशान्
स्वदासस्य बाबिलीयराजस्य निबूखद्नित्सरस्य करे समर्पितवान् तत्सेव-
७ नार्थं वन्यपशूनपि तस्मै दत्तवान्। अतस्तदीयदेशस्यापि कालो यावन्नो-
पस्थास्यते तावत्सर्व्वा जातयस्तं तस्य पुत्त्रं पौत्त्रञ्च सेविष्यन्ते, पश्चाद्
बहुसङ्ख्यकजातयो महान्तो राजानश्च तेन दास्यकर्म्म कारयिष्यन्ति।
८ या तु जातिर्यच्च राज्यं तं बाबिलीयराजं निबूखद्नित्सरं न सेविष्यते
तस्य च बाबिलीयराजस्य युगं स्वग्रीवां न प्रवेशयिष्यति तस्या जाते-
स्तत्करेण संहारपर्य्यन्तमहम् असिदुर्भिक्षमारीभिस्तस्यै समुचितं फलं
९ प्रदास्यामीति परमेश्वरो ब्रूते। अतो यूयं बाबिलीयराजस्य दासा न
भविष्यथेति वाक्यं ये वदन्ति युष्माकं तेषां भाविवादिनां मन्त्रवेत्तॄणां
स्वप्नदर्शिनां गणकानां दैवज्ञानाञ्च वाक्येषु युष्माभिर्मावधीयतां यतो
१० यूयं स्वदेशाद् दूरीकृता मया प्रवासिताश्च येन नश्येत तादृगनृतं
११ भाविवाक्यं ते युष्मान् गदन्ति। या तु जातिर्बाबिलीयराजस्य युगं स्व-
ग्रीवां प्रवेश्य तं सेविष्यते, सा मया निजभूम्यां सविश्रामं संस्थापिता
तां कृक्ष्यति तत्र निवत्स्यति चेति परमेश्वरो ब्रूते।
१२ अपरमहं तानि सर्व्ववाक्यानीव यिहूदीयराजं सिदिकियमिदं
गदितवान्, यथा, यूयं बाबिलीयराजस्य युगं स्वग्रीवाः प्रवेश्य तं तस्य
१३ जनांश्च सेवध्वं तेन जीविष्यथ। या जातिर्बाबिलीयराजं न सेविष्यते
तामधि परमेश्वरेणोदितवाक्यानुसाराद् यूयम् अर्थतस्त्वं तव प्रजाश्च
१४ कुतोऽसिदुर्भिक्षमारीभिर्म्रियेध्वं? यूयं बाबिलीयराजस्य दासा न भविष्य-
थेति वाक्यं ये युष्मान् वदन्ति तेषां भाविवक्तॄणां वाक्येषु युष्माभिर्नाव-
१५ धीयतां यतस्तैरनृतं भाविवाक्यम् उच्यते। यतः परमेश्वरो ब्रूते नाहं
तान् प्रहितवान्, अमी ये भाविवादिनो युष्मभ्यं भाविवाक्यं कथयन्ति ते
यूयञ्च येन मया प्रवासिता विनश्येत तादृगनृतभाविवाक्यं मम नाम्ना
तैरुच्यते।
१६ अपरमहं याजकान् एतद्देशीयसर्व्वजनांश्चेदमवादिषं, परमेश्वरो
ब्रूते, पश्यत परमेश्वरीयमन्दिरस्य पात्राण्यधुना शीघ्रं बाबिलः पुनरा-
नायिष्यन्त इति भाविवाक्यं ये वदन्ति तेषां युष्मदीयभाविवक्तॄणां वाक्येषु
१७ युष्माभिर्मावधीयतां यतस्ते युष्मान् अनृतभाविवाक्यं वदन्ति। यूयं तेषां

वाक्येषु मावधद्धं बाबिलीयराजं सेवध्वं तेन जीविष्यथ, नगरमिदं
कुतोऽवसन्नं भवेत्? परन्तु यदि ते भाविवादिनः स्यु र्यदि च पर- १८
मेश्वरस्य वाक्यं तेषां सन्निधौ वर्त्तेत तर्हि परमेश्वरस्य मन्दिरे यिहूदीय-
राजस्य प्रासादे यिरूशालमि चावशिष्टानि पात्राण्यपि यथा बाबिलं
न नीयेरन् तदर्थमेव ते सेनाध्यक्षं परमेश्वरं प्रसादयन्तु।
यतो बाबिलीयराजो निबूखद्नित्सरो यदा यिहूदीयराजं यिहोया- १९
कीमसुतं यिहोयाखीनं यिहूदाया यिरूशालमस्य मुख्यनरैः सहितं
यिरूशालमः प्रवास्य बाबिलमनयत् तदा यानि प्रात्राणि नापहृतवान्
तान्यर्थतः स्तम्भद्वयं सागरपात्रं पीठानि नगरेऽस्मिन्नवशिष्टान्यपराणि २०
च सर्व्वपात्राण्यधि सेनाध्यक्षः परमेश्वर इत्थं ब्रूते। परमेश्वरस्य २१
मन्दिरे यिहूदीयराजस्य प्रासादे यिरूशालमि चावशिष्टानि पात्राण्यधी-
स्रायेलः प्रभुः सेनाध्यक्षः परमेश्वर इत्थं भाषते, तानि बाबिलमपनायि-
ष्यन्ते यस्मिन् दिने चाहं तेषु विचारकदृष्टिपातं करिष्यामि तत्पर्य्यन्तं २२
तत्र स्थास्यन्त इति परमेश्वरो वदति, तदानीं चाहं तान्यानाय्य स्थाने-
ऽस्मिन् पुनः स्थापयिष्यामि।

---

२८ अष्टाविंशोऽध्यायः।

१ हनानियस्य मिथ्याभविष्यद्वाक्यं ५ तदधि यिरिमियस्य वाक्यं १० हनानियेन यिरिमियस्य काष्ठमययुगभञ्जनं १२ लौहयुगमधि यिरिमियस्य वचनं १५ हनानियस्य मरणमधि यिरिमियस्य भविष्यद्वाक्यं।

तस्मिन् वत्सरेऽर्थतो यिहूदीयराजस्य सिदिकियस्य राजत्वारम्भ- १
कालस्य चतुर्थवत्सरस्य पञ्चममासे अस्सुरसुतो हनानिय इति नामवि-
शिष्टो गिबियोन्निवासी भाविवक्ता परमेश्वरस्य मन्दिरे याजकानां
सर्व्वजनानाञ्च साक्षान्मामब्रवीत्, यथा, इस्रायेलः प्रभुः सेनाध्यक्षः २
परमेश्वर इत्थं भाषते बाबिलीयराजस्य युगं मयाभञ्जि। बाबिलीय- ३
राजो निबूखद्नित्सरः परमेश्वरीयमन्दिरस्य यानि पात्राण्यस्मात् स्थानाद्
अपहृत्य बाबिलं नीतवान् तानि सर्व्वाण्यहं वत्सरद्वयात् परं स्थानमेतत्
पुनरानाययिष्यामि। यो यिहूदीयराजो यिहोयाकीमसुतो यिहोया- ४
खीनोऽन्ये च ये प्रवासिता यिहूदीयजना बाबिलं गतास्तान् सर्व्वानहं
स्थानमेतत् पुनरानेष्यामीति परमेश्वरो ब्रूते यतो बाबिलीयराजस्य
युगं मया भङ्क्ष्यते।

५ अपरं भविष्यद्वक्ता यिरिमियः सदाप्रभो र्मन्दिरे तिष्ठतां याज-
कानां सर्व्वजनानाञ्च साक्षात् तं भाविवादिनं हनानियमवादीत्।
६ फलतो यिरिमियो भविष्यद्वक्ताब्रवीत् तथास्तु सदाप्रभुस्तथा करोतु,
सदाप्रभो र्मन्दिरस्य पात्राणि प्रवासिताः सर्व्वे जनाश्च बाबिलः स्थान-
मेतत् पुनरानायिष्यन्त इति यानि भाविवाक्यानि त्वयोक्तानि सदाप्रभु-
७ स्तव तानि वाक्यानि सफलानि करोतु। परन्तु तव कर्णगोचरे सर्व्व-
८ जनानाञ्च गोचरे मया यद् वक्ष्यते मम तद्वाक्यमिदं त्वं श्रोतुमर्हसि। मम
पूर्व्वं तव पूर्व्वञ्च ये पुराकालिका भाविवक्तार आसन् ते बहून् देशानधि
महान्ति राज्यानि चाधि युद्धामङ्गलमारीसूचकानि भाविवाक्यान्य-
९ वादिषुः। यो भाविवादी क्षेमसूचकं भाविवाक्यं भाषते तस्य भावि-
वादिनो वाणी यदा सिद्धिं गच्छति तदा स यथातथ्यं सदाप्रभुना प्रेषि-
तो भाविवादीति परिचीयते।
१० ततः परं स भाविवादी हनानियो भाविवादिनो यिरिमियस्य ग्री-
११ वातो युगं हृत्वा बभञ्ज। सर्व्वजनानाञ्च साक्षात् स हनानियो जगाद
सदाप्रभु र्ब्रूते, वत्सरद्वयात् परमहम् इत्थमेकं बाबिलीयराजस्य निबू-
खद्नित्सरस्य युगं सर्व्वजातीनां ग्रीवात आदाय भङ्क्ष्यामि। ततो भवि-
ष्यद्वक्ता यिरिमियः स्वमार्गं जगाम।
१२ भाविवक्तु र्यिरिमियस्य ग्रीवातो भाविवादिना हनानियेनापहृतस्य
युगस्य भञ्जनात् परं सदाप्रभोरिदं वाक्यं यिरिमियं प्रति प्रादुरभूत्।
१३ त्वं गत्वा हनानियं वद सदाप्रभुरित्थं भाषते त्वया काष्ठयुगानि भङ्क्त्वा
१४ तेषां परिवर्त्तेन लौहयुगानि निर्म्मितानि। यत इस्रायेल ईश्वरः सेनानां
सदाप्रभुरित्थं ब्रूते बाबिलीयराजस्य निबूखद्नित्सरस्य दासत्वायाहम्
एतासां सर्व्वजातीनां ग्रीवासु लौहयुगं स्थापितवान् स च ताभिः
सेवितव्यः, अधिकन्त्वहं वन्यपशूनपि तस्मै दत्तवान्।
१५ अपरं भविष्यद्वक्ता यिरिमियस्तं भविष्यद्वक्तारं हनानियं जगाद, हे
हनानिय शृणु सदाप्रभुस्त्वां न प्रहितवान् त्वन्त्वनृतवाक्ये जनान् एतान्
१६ विश्वासितवान्। ततो हेतोः सदाप्रभुरित्थं भाषते पश्चाहं त्वां भूतलाद्
अपसारयिष्यामि त्वमेतस्मिन्नेव वत्सरे मरिष्यसि यतस्त्वं सदाप्रभु-
१७ त्यागाय भाषितवान्। अपरं तस्य वत्सरस्य सप्तममासे स भाविवक्ता
हनानियो ममार।

२९ एकोनत्रिंशोऽध्यायः।

१ प्रवासितजनान् प्रति यिरिमियस्य पत्रप्रेषणं ४ बाबिलि वासाय विनयः ८ मिथ्याभविष्यद्वक्तॄणां वाक्येऽवधानमकर्त्तव्यमित्युपदेशः १० सप्ततिवत्सरेभ्यः परं मुक्तिप्राप्तेर्भविष्यद्वाक्यं १५ अवशिष्टलोकानां पापकारणाद् विनाशस्य भविष्यद्वाक्यं २१ मिथ्याभविष्यद्वादिद्वयस्य विनाशस्य भविष्यद्वाक्यं २४ यिरिमियस्य विरुद्धं शिमयियस्य पत्रं २९ यिरिमियेण शिमयियस्य सर्व्वनाशसूचकं भाविवाक्यं।

राज्ञि यिहोयाखीने महिष्यां नपुंसकेषु यिहूदाया यिरूशालमश्च १
मुख्यनरेषु सूत्रधरेषु लोहकारेषु च यिरूशालमः प्रस्थितेषु भविष्यद्वक्ता २
यिरिमियो यत् पत्रं लिखित्वा यिहूदीयराजेन सिदिकियेन बाबिलं
बाबिलीयराजस्य निबूखद्नित्सरस्य समीपं प्रेषितयोर्दूतयोरर्थतः शा-
फनसुतस्येलियासाहस्य हिल्कियसुतस्य गिमरियस्य च करैस्तेषां प्रवा- ३
सितानां जनानाम् अवशिष्टान् प्राचीननरान् याजकान् भाविवक्तॄन्
निबूखद्नित्सरेण यिरूशालमो बाबिलं प्रवासितान् सर्व्वजनांश्च प्रति
यिरूशालमः प्रेषयामास तस्य पत्रस्य कथेयं यथा,

"इस्रायेल ईश्वरः सेनानां सदाप्रभुरित्थमाह ये सर्व्वे जना मया ४
यिरूशालमो बाबिलं प्रवासितास्तानिदमादिशामि, यूयं गृहाणि ५
निर्म्माय तत्र वसत, उद्यानानि च कृत्वा तेषां फलानि भुंग्ध्वं, योषितो ६
गृहीत्वा पुत्रान् पुत्रीश्च जनयत स्वपुत्रान् योषितो ग्राहयत स्वपुत्रीश्च
पतिभ्यो दत्त ताश्च पुत्रान् दुहितॄश्च प्रसवन्तु यूयञ्च तत्र न न्यूनीभूय
वर्धध्वं। यत्र च मया प्रवासिता आध्वे तस्य नगरस्य मङ्गलाय यतध्वं ७
तस्य कृते सदाप्रभवे प्रार्थनां कुरुध्वञ्च यतस्तस्य मङ्गलेन युष्माकं
मङ्गलं भविष्यति।

"यत इस्रायेल ईश्वरः सेनानां सदाप्रभुरिदं भाषते युष्मन्मध्यवर्त्तिनो ८
भाविवक्तारो युष्माकं मन्त्रज्ञाश्च युष्मान् मा प्रतारयन्तु यानि च
स्वप्नानि तैर्दर्शयथ युष्माकं तेषु स्वप्नेषु मनांसि न निधद्ध्वं। यतस्ते मिथ्या ९
मम नाम्ना युष्मान् भाविवाक्यानि वदन्ति नाहं तान् प्रहितवानिति
सदाप्रभु र्वदति।

"यतः सदाप्रभुरित्थं ब्रूते बाबिलमधि सप्ततिवत्सरेषु पूर्णेषु सत्स्वहं १०
युष्माकं तत्त्वावधारणं करिष्यामि स्थानमेतद् युष्माकं पुनरानयनाय
मम मङ्गलसूचकवाक्यं युष्मत्कृते साधयिष्यामि च। यतोऽहं युष्मा- ११
नधि यान् सङ्कल्पान् कल्पयामि तान् जान इति सदाप्रभु र्ब्रूते, ते

सङ्कल्पा मङ्गलावहा न त्वमङ्गलावहाः, अर्थतो युष्मभ्यं भाविशुभदशाम्
१२ आशासिद्धिञ्च दास्यामि। यूयञ्च मां ज्ञास्यध्वे मत्समक्षमुपस्थाय च
१३ प्रार्थनां करिष्यथ मया च युष्मद्वाक्ये मनो निधायिष्यते। यूयं माम्
अन्वेषिष्यथ मां प्राप्स्यथ च यतः सर्व्वान्तःकरणैर्मां गवेषयिष्यथ।
१४ अहञ्च युष्माभिः प्राप्य इति सदाप्रभु र्वदति, युष्माकं दास्यदशां परि-
वर्त्तयिष्यामि यासां जातीनां मध्ये येषु स्थानेषु च यूयं मयापसारिता-
स्तेभ्यः सर्व्वेभ्यो युष्मान् संग्रहीष्यामीति सदाप्रभु र्वदति यस्मात् स्थानाच्च
यूयं मया प्रवासितास्तत् स्थानमहं युष्मान् प्रत्यानेष्यामि।
१५ "यूयन्तु वदथ सदाप्रभु र्बाबिल्यस्मत्कृते भविष्यद्वक्तॄन् उत्पादितवान्।
१६ किन्तु यो राजा दायूदः सिंहासन उपविष्ट आस्ते ये च जना
नगरेऽस्मिन् वसन्त्यर्थतो युष्माकं ये भ्रातरो युष्माभिः सह प्रवासं न
१७ गतास्तान् सर्व्वानधि सदाप्रभुरित्थमाह। सेनानां सदाप्रभु र्वदति
पश्यताहं तेषां मध्यम् असिं क्षुधां मारीञ्च प्रेषयिष्यामि यानि च
कुत्सत्वाद् अखाद्यानि तेषां दुष्टोडुम्बरफलानां तुल्यांस्तान् करिष्यामि।
१८ तांश्चासिक्षुन्मारीभिरनुधाविष्यामि मेदिन्याः सर्व्वराज्यानां कम्पोदा-
हरणानि यासां मध्ये च ते मयापसारितास्तासां सर्व्वजातीनां शापवि-
१९ स्मयसीत्कारनिन्दापात्राणि करिष्यामि। यतो हेतोस्ते मम वाक्येष्वव-
धानं नाकार्षुरिति सदाप्रभु र्भाषते मम दासा भविष्यद्वक्तारो मया-
तन्द्रिणा तान् प्रति प्रहिताः किन्तु यूयं तेषां वाक्येष्ववधानं नाकार्ष्टेति
२० सदाप्रभु र्वदति। परन्तु हे यिरूशालमो बाबिलं मया प्रहिताः सर्व्वे
प्रवासिता जना यूयमेव सदाप्रभो र्वाक्येऽवधातुमर्हथ।
२१ "कोलायसुत आहाब् मासेयसुतः सिदिकियश्चेतिनामानौ यौ नरौ
मिथ्या मम नाम्ना युष्मान् भाविवाक्यानि वदतः, तावधीश्वायेल ईश्वरः
सेनानां सदाप्रभुरित्थमाह। पश्यताहं बाबिलीयराजस्य निबूखद्नि-
त्सरस्य करे तौ समर्पयिष्यामि स च युष्मत्प्रत्यक्षं तौ घातयिष्यति।
२२ बाबिलि च प्रवासितैः सर्व्वैर्यिहूदीयलोकैस्तयोर्दशातः शापमन्त्रोऽय-
मुद्भावयिष्यते यथा सदाप्रभुस्त्वां बाबिलीयराजेनाग्निना भर्ज्जितौ सि-
२३ दिकियाहाबाविव करोत्विति। यतो हेतोस्ताविस्रायेलि धर्म्मावज्ञां
स्वप्रतिवासिनां भार्य्याभिः सह व्यभिचारञ्च कृतवन्तौ मत्तश्चाज्ञां न
प्राप्य मृषा मम नाम्ना भाविवाक्यानि कथितवन्तौ, तदहमेव जाने तस्य
साक्षी चास्मीति सदाप्रभु र्ब्रूते।"

अधिकन्तु त्वं निहिलामीयशिमयियं वद, इस्रायेल ईश्वरः सेनानां २४
सदाप्रभुरित्थं भाषते, त्वं यिरूशालम्निवासिनः सर्व्वान् जनान् प्रति २५
मासेयसुतं सिफनियं याजकं प्रति सर्व्वान् याजकांश्च प्रति स्वनाम्ना
पत्राणि लिखित्वावादीर्यथा, "यः कश्चिद् उन्मत्तीभूय भाविवाक्यं वावद्येत २६
तद्दमनाय सदाप्रभो र्मन्दिरस्याध्यक्षा यथा भवेयुस्त्वञ्च यथा तं जनं
काष्ठयन्त्रे हडिषु चार्पयेस्तदर्थं यिहोयादायाजकस्य विनिमयेन सदा-
प्रभुस्त्वां याजकत्वपदे नियुक्तवान्। अतोऽनाथोतीयो यो यिरिमियो २७
युष्मन्मध्ये भाविवक्तेव वर्त्तते स त्वया कुतो न तर्ज्जितः? स तु बाबिलम् २८
अस्मान् प्रति पत्रं प्रेषयित्वा गदितवान्, दीर्घकालो भविष्यति यूयं
गृहाणि निर्म्माय तत्र वसत, उद्यानानि च कृत्वा तेषां फलानि
भुंग्ध्वमिति।"

याजकः सिफनियस्तत् पत्रं भाविवक्तुर्यिरिमियस्य कर्णगोचरे पठि- २९
तवान्। अतः सदाप्रभोरिदं वाक्यं यिरिमियं प्रति पादुरभूत्। त्वं तान् ३०
सर्व्वान् प्रवासितजनान् प्रत्येतानि वचांसि प्रेषय, यथा, सदाप्रभु- ३१
र्निहिलामीयं शिमयियमधीत्थमाह, मया न प्रहितः स शिमयियो
युष्मान् भाविवाक्यानि गदितवान् अन्टतवाक्ये च युष्मान् विश्वासितवान्,
तस्मात् सदाप्रभुरित्थं भाषते पश्यताहं तस्य निहिलामीयशिमयियस्य ३२
तदीयवंशस्य च तत्त्वमवधारयिष्यामि,एतज्जातीयजनानां मध्ये वासकारी
तस्य कश्चिन्नरो न भविष्यति; सदाप्रभु र्ब्रूते मम प्रजानां यन्मङ्गलमहं
करिष्यामि स तन्न वीक्षिष्यते, यतः स सदाप्रभुत्यागाय कथितवान्।

---

३० त्रिंशत्तमोऽध्यायः।

१ यिहूदीयलोकानां मुक्तेर्भविष्यद्वाक्यं ४ दुःखात् परतः सुखस्य कथनं १० याकूबं प्रति शान्तेः कथनं १८ याकूबीयवंशस्योन्नतेः कथनं २३ पापिलोकानां दण्डस्य कथनञ्च।

सदाप्रभोरिदं वाक्यं यिरिमियं प्रति प्रादुरभूत्। इस्रायेल ईश्वरः १
सदाप्रभु र्ब्रूते यानि वाक्यान्यहं त्वां गदितवान् त्वं तानि सर्व्वाणि ग्रन्थे २
लिख, यस्मात् सदाप्रभुराह पश्य येषु दिनेष्वहं स्वप्रजानाम् अर्थत ३
इस्रायेलो यिहूदायाश्च दासदशां परिवर्त्तयिष्यामि तानि दिनान्याग-
मिष्यन्तीति सदाप्रभु र्वदति, तदानीं यो देशो मया तेषां पूर्व्वपुरुषेभ्यो

दत्तस्तमेव देशमहं तान् जनान् पुनरानाययिष्यामि, ते च तस्याधिकारं भोक्ष्यन्ते।

४ इस्रायेलं यिहूदाञ्चाधि सदाप्रभुरेतानि वाक्यानि गदितवान्। यथा,

५ सदाप्रभुरिदं ब्रूते शङ्कायाः शृणुमो ध्वनिं।
सान्त्वनापरिहीनस्य परित्रासस्य स ध्वनिः॥

६ यूयं दृष्ट्वा विलोकध्वं पुरुषः प्रसुवीत किं।
प्रसवन्ती यथा नारी पुरुषाः सकलास्तथा।
कृतहस्तार्पणाः श्रोण्यौ संदृश्यन्ते मया कुतः।
विषादात् सर्व्ववक्त्रञ्च पाण्डुवर्णं गतं कुतः॥

७ हा हा महानसौ घस्रो नास्ति तेन समं दिनं।
याकूबः कष्टकालोऽसौ स तु रक्षिष्यते ततः॥

८ भाषते भारतीमेतां वाहिनीनां सदाप्रभुः।
मया तस्य युगं भङ्क्त्वा त्वद्ग्रीवातोऽपनेष्यते।
छेत्स्यन्ते तावकीनानि बन्धनानि च तद्दिने।
न पुनः कारयिष्यन्ते परैर्दास्यं तव प्रजाः॥

९ सदाप्रभुं निजेशन्तु दायूदञ्च स्वभूपतिं।
कृते तेषां मयोत्थाप्यं सेविष्यन्ते जनास्तव॥

१० सदाप्रभुरिदं ब्रूते हे याकूब् मम किङ्कर।
त्वं माभैषीर्निराशस्त्वं हे इस्रायेल् भवेर्नहि॥
यतः पश्चादहमेव त्वां तारयिष्यामि दूरतः।
त्वदंशांश्चोद्धरिष्यामि तेषां प्रवासदेशतः॥
प्रत्यावर्त्तिष्यते याकूब् विश्राममुपभोक्ष्यते।
वसन्तं तञ्च निःशङ्कं कोऽपि नोद्वेजयिष्यति॥

११ त्वत्त्राणायाहमेवास्मि त्वत्सङ्गीति प्रभोर्वचः।
त्वं यासां परजातीनां मध्ये व्यकीर्य्यथा मया।
सकलानां मया तासां सर्व्वनाशो विधास्यते।
तवैव सर्व्वनाशस्तु नहि कारिष्यते मया॥
शास्तिर्विचारसिद्धैव तुभ्यं दायिष्यते मया।
सर्व्वथा शास्तिहीनन्तु त्वां न शक्नोमि रक्षितुं॥

१२ सत्यमेव ब्रवीत्येतद् वचनं शाश्वतप्रभुः।
दुश्चिकित्स्यस्तवाघातो गलितञ्च क्षतं तव॥

प्रतिकाराय ते कोऽपि पक्षवादी न विद्यते। १३
चिकित्सोपायवत् किञ्चित् भेषजं ते न विद्यते॥
अस्मृता कामिभिः सर्व्वैस्त्वं नैवान्विष्यसे पुनः। १४
त्वां यतोऽरिकृतेनेवाघातेनाहतवानहं।
तुभ्यञ्च दत्तवान् शास्तिं दयाहीनो नरो यथा।
यतस्ते बहवो दोषाः पापानि प्रबलानि च॥
स्वाघातेन कुतो रुष्टा दुश्चिकित्स्यक्षतेन वा। १५
यतस्ते बहवो दोषाः पापानि प्रबलानि च।
ततो हेतोर्मयाकारि त्वां प्रत्याचार ईदृशः॥
तथापि ग्रासयिष्यन्ते सकलास्त्वद्विंसिपवः। १६
दास्यस्थानञ्च यास्यन्ति क्लेशारः सकलास्तव।
हृतवित्ता भविष्यन्ति तव वित्तापहारिणः।
ये त्वां लुण्ठन्ति तान् सर्व्वान् करिष्यामि च लुण्ठितान्॥
प्रभु र्ब्रूते तवाघातेऽहं प्रयोक्ष्यामि बन्धनं। १७
प्राप्तस्वास्थ्यां क्षतेभ्यश्च त्वां करिष्याम्यहं पुनः॥
यतस्त्वामधि तैरुक्तम् एषाभूदपसारिता।
या सीयोन् इयमेतस्याः कोऽप्यन्वेषी न विद्यते॥
सदाप्रभु र्ब्रवीतीत्थं याकूबः पटमण्डपाः। १८
यद् गताः पश्य तद् दास्यं विपरीतं करोम्यहं।
करुणार्द्रो भविष्यामि तस्य वासस्थलेषु च॥
पुनर्निजाप्सराशौ च विनिर्म्मायिष्यते पुरी।
राजपुर्य्यां मनुष्याश्च निवत्स्यन्ति यथोचितं॥
उद्गमिष्यति तन्मध्यात् स्तवः शब्दश्च नन्दतां। १९
अहं तान् वर्द्धयिष्यामि नैव यास्यन्ति ते क्षयं।
पूजितांस्तान् करिष्यामि ते न प्राप्स्यन्ति लाघवं॥
तत्सन्ताना यथा पूर्व्वं भविष्यन्ति पुनस्तथा। २०
तत्समाजश्च मत्साक्षात् प्राप्तस्थैर्य्यो भविष्यति।
सर्व्वांस्तत्पीडकांश्चाहं शासिष्यामि यथोचितं॥
यश्च तस्याग्रगामी स तद्वंशीयो भविष्यति। २१
तस्य शासनकर्त्ता च तस्य मध्याद् उदेष्यति॥
मन्नेदिष्ठं करिष्ये तं समुपस्थास्यते स मां।

स्वचित्तं मामुपस्थातुं को न्यस्तेदिति वाक् प्रभोः॥
२२ मामकीनप्रजा यूयम् इत्थमेव भविष्यथ।
अहञ्चापि भविष्यामि तदा युष्माकमीश्वरः॥
२३ सदाप्रभोरतीवोग्रो झञ्झावातः प्रवर्त्तते।
सा झञ्झा घूर्णते मूर्द्ध्नि दुष्टानाञ्च स्फुटिष्यति॥
२४ स्वमनस्कल्पना यावन्न कुर्य्यान्न च साधयेत्।
सदाप्रभोः स कोपाग्निस्तावन्न विरमिष्यति॥
भाविकालेऽत्र युष्माकं मनोयोगो जनिष्यते॥

---

३१ एकत्रिंशोऽध्यायः।

१ इस्रायेलो मुक्तेर्भविष्यद्वाक्यं १० तस्य प्रचारणं १५ विलपन्तीं राहेलं प्रति प्रबोधकथनं १८ इफ्रयिमो विलापकथनं २१ इस्रायेलः पुनरागमनं २७ परमेश्वरस्य प्रतिज्ञा ३१ समाजेन समं तस्य भाविनियमः ३५ समाजस्य स्थिरता ३८ तस्य वृद्धिश्च।

१ सदाप्रभु र्ब्रवीतीदं काले तस्मिन्नुपस्थिते।
इस्रायेलीयवंशानां सर्व्वेषामहमीश्वरः।
भविष्यामि तथा तेऽपि भविष्यन्ति मम प्रजाः॥
२ सदाप्रभु र्ब्रवीतीदम् असेः साक्षात् पलायिता।
जातिरेषा मरुस्थाने जाता प्रसादभाजनं।
इस्रायेलं सुविश्रान्तं कर्त्तुं प्रगच्छतो मम॥
३ दूरतो दर्शनं मह्यं दत्त्वा प्राह सदाप्रभुः।
प्रेम्ना सदातनेनैव त्वयि सम्प्रीतवानहं।
ततो हेतोः करोमि त्वां प्रसादाच्चिररक्षितां॥
४ इस्रायेलः कुमारि त्वां विनिर्म्मास्याम्यहं पुनः।
निर्म्मिता स्थास्यसे तर्हि स्वमृदङ्गैश्च भूषिता।
आनन्दकारिणां श्रेण्यां पुनर्निर्विक्रमिष्यसि॥
५ शमरीयाद्रिषु द्राक्षाः पुनस्त्वं रोपयिष्यसि।
ये च ता रोपयिष्यन्ति ते ता भोक्ष्यन्ति रोपकाः॥
६ आयाति तद्दिनं यस्मिन् इफ्रयिम्पर्व्वते स्थिताः।
रक्षका घोषयिष्यन्ति समुत्तिष्ठत हे जनाः।
याम सीयोनमस्माकमीशं सदाप्रभुं प्रति॥

यतो हेतोरिदं वाक्यं भाषते स सदाप्रभुः। ७
याकूबमधि युष्माभिर्हर्षनादो विधीयतां।
प्रोच्चैः कुरुत जातीनां शिरोवर्त्तिनि नन्दनं॥
एवं श्रावयत स्तुध्वं कुरुध्वं प्रार्थनामिमां।
भो प्रभो त्वत्प्रजा इस्रायेलः शेषमुद्धर॥
पश्यतानाययिष्याम्यहं तानुत्तरदेशतः। ८
मेदिन्याः प्रान्तभागेभ्यः सङ्ग्रहीष्यामि तानहं॥
अन्धैः खञ्जैः सगर्भाभिः सूतीभिश्च समन्वितः।
जनसङ्घो महांस्तेषाम् अत्र प्रत्यागमिष्यति॥
आयास्यन्ति रुदन्तस्ते तान् नेष्यामि कृताञ्जलीन्। ९
समीपञ्च जलौघानाम् ऋजुमार्गेण तानहं।
गमयिष्यामि तेषाञ्च स्खलनं न भविष्यति॥
इस्रायेलः पिता यस्मात् सम्भविष्याम्यहं स्वयं।
तद्भविष्यतीफ्रायिम् अग्रजस्तनयो मम॥
हे भिन्नजातयो यूयं शृणुतोक्तिं सदाप्रभोः। १०
विज्ञापयत तां वार्त्तां द्वीपेषु दूरवर्त्तिषु॥
इत्थं ब्रूत च यः पूर्व्वम् इस्रायेलं विकीर्णवान्।
स तं सङ्गृह्य रक्षीव स्वव्रजं पालयिष्यति॥
याकूबो मोचनं यस्मात् कृतवान् शाश्वतप्रभुः। ११
यस्तो बलवांस्तस्य करादुद्धृतवांश्च तं॥
ते समागत्य सीयोनः शृङ्गे गायन्ति हर्षतः॥ १२
गोधूममदिरातैलमेषगोशावकाधिकं।
सदाप्रभोः प्रसादञ्च तेऽनुधावन्ति वीचिवत्॥
सुसिक्तोद्यानसङ्काशं मनस्तेषाञ्च जायते॥
न भविष्यन्ति ते म्लानाः पुनर्व्वारं कदाचन।
आनन्दिष्यति तत्काले कुमारी नृत्यकारिणी। १३
आनन्दिष्यन्ति चैकत्र तरुणास्थविरा जनाः॥
शोकस्य परिवर्त्तेन दास्यामि तेभ्य उत्सवं।
सान्त्वयन् खेदतो हर्षं प्रापयिष्यामि तानहं॥
प्राणान् आप्याययिष्यामि याजकानाञ्च मेदसा। १४
मत्प्रजा मत्प्रसादे च तर्प्स्यन्तीति प्रभोर्वचः॥

१५ सदाप्रभुरिदं ब्रूते रामायां श्रूयते रवः ।
रवो विलापगानस्य गाढशोकस्य रोदनं ॥
स्वसुतान् अनुशोचन्ती राहेल् करोति रोदनं ।
सा सुतेषु न गृह्णाति सान्त्वं यस्मान्न सन्ति ते ॥
१६ तामुद्दिश्य त्विदं वाक्यं भाषते परमेश्वरः ।
रोदनात् स्वरवं वाष्पात् स्वनेत्रे च निवर्त्तय ॥
त्वच्छ्रमस्य फलं यस्माद् भवितेति प्रभो र्वचः ।
अरातेर्देशतस्ते च प्रत्यायास्यन्ति निश्चितं ॥
१७ तव भाविगतिश्चाधि प्रत्याशास्तीति वाक् प्रभोः ।
सीमानञ्च स्वदेशस्य प्रत्यायास्यन्ति नन्दनाः ॥
१८ इफ्रयीमो मयाश्रावि सविलापमिदं वचः ।
त्वयाऽहं शासितः शिक्षीकृतोऽनभ्यस्तगौरिव ॥
परिवर्त्तय मां तर्हि स्थास्यामि परिवर्त्तितः ।
मामकीनेश्वरो यस्मात् त्वमेवासि सदाप्रभो ॥
१९ अनुतापं यतोऽकार्षं स्वपरावर्त्तनात् परं ।
शिक्षालाभात् परं तद्वद् अकार्षम् ऊरुताडनं ॥
अभवं लज्जितश्चाहम् अगमञ्च विवर्णतां ।
यतो यौवनकालस्य निन्दाभारमहं वहे ॥
२० इफ्रयिम् मम दृष्टौ किं दयितस्तनयो भवेत् ।
किं मह्यं प्रतिभायाद् वा हर्षदायी स नन्दनः ॥
यतो यावन्मया तस्य विरुद्धं गद्यते वचः ।
तावदेव मया तस्य स्मरणं क्रियते पुनः ॥
अतो हेतो र्मम स्वान्तम् आर्द्रं भवति तं प्रति ।
प्रीये च वत्सलस्तस्मिन्निति ब्रूते सदाप्रभुः ॥
२१ त्वं स्तूपान् स्थापय स्वार्थं स्तम्भान् स्वार्थं विधेहि च ।
मनसा लक्षयाध्वानं पन्थानं चरितं त्वया ॥
इस्रायेलः कुमारि त्वं प्रत्यावर्त्तितुमर्हसि ।
तवैतानि पुराण्येव प्रत्यावर्त्तितुमर्हसि ॥
२२ धर्म्मत्यागिनि कन्ये त्वं कतिकालं भ्रमिष्यसि ।
नूतनं स्रष्टा प्रभुर्देशे नारी वेष्टिष्यते नरं ॥
२३ इस्रायेलः प्रभु र्ब्रूते बाहिनीनां सदाप्रभुः ।

मया यिहूदिलोकानां दासत्वे परिवर्त्तिते।
स्वपुरेषु स्वदेशे च वक्ष्यते तैरिदं पुनः।
भो धर्म्मस्य समावास पुण्यधाम्नश्च पर्व्वत।
सदाप्रभु र्विदध्यात् त्वाम् आशीर्व्वादसमन्वितं॥
वत्स्यत्यत्र यिहूदाश्च सहितः सर्व्वनागरैः। २४
जनैः कर्षणनिष्ठै र्वा भ्राम्यद्भि र्वा व्रजैः सह॥
यत आप्याययिष्यामि प्राणान् तृषातुरानहं। २५
प्राणांश्च क्षुधया म्लानान् तर्पयिष्यामि कृत्स्नशः॥
एतेन भग्ननिद्रोऽहं लोचने उदमीलयं। २६
क्षीयनिद्राममन्ये च मह्यं सुखप्रदायिनीं॥
सदाप्रभु र्ब्रवीतीदं पश्यायान्ति दिनानि हि। २७
येष्विस्रायेलवंशस्य यिहूदीयान्वयस्य च।
वृद्धयेऽहं करिष्यामि तत्कृते वीजरोपणं।
नृणां वीजं पशूनाञ्च वीजं वप्स्याम्यहं तदा॥
पूर्व्वमुन्मूलनायैव तेषामुत्पाटनाय च। २८
प्रध्वंसाय विनाशाय हिंसाय च यथाभवं।
तानधि जागरूकोऽहं निर्म्माणरोपणेच्छया।
जागरूकस्तथा तेषु भविष्यामीति वाक् प्रभोः॥
जनकैरम्लमद्यानां भोगाज्जीर्णरदाः सुताः। २९
एतद्वाक्यं पुनर्व्वारं तत्काले न गदिष्यते॥
स्वीयापराधहेतोस्त्वेकैको जनो मरिष्यति। ३०
जन एवाम्लमद्याशी जीर्णदन्तो भविष्यति॥
सदाप्रभुरिदं ब्रूत पश्यागच्छन्ति वासराः। ३१
येष्विस्रायेलवंशेन यिहूदीयान्वयेन च।
सहित नियमो नूत्नो मया संस्थापयिष्यते॥
मिसर्देशात् पितृंस्तेषां वहिरानेतुमिच्छया। ३२
पाणिग्रहणकालेऽहं यमकार्षं हि तैः सह।
नैव तेन समानोऽयं नियमोऽपि भविष्यति॥
यस्माल्लङ्घितवन्तस्ते नियमं तं मया कृतं।
अहं तु प्राभवं तेषामिति ब्रूते सदाप्रभुः॥
किन्त्विस्रायेलवंशेन साकं तत्कालतः परं। ३३

नियमं स्थापयिष्याम्येवम्भूतमिति वाक् प्रभोः॥
अव्यवस्थान्तरे तेषां प्रणिधायिष्यते मया।
तेषां हृदयपत्रेषु मया लेखिष्यते च सा।
भविष्यामीश्वरस्तेषां ते भविष्यन्ति मत्प्रजाः॥
३४ सदाप्रभुं विजानीहीति वाक्यं प्रतिवेशिनं।
नैव ते शिक्षयिष्यन्ति न वा स्वभ्रातरं पुनः॥
आक्षोधिष्ठगरिष्ठास्ते सर्व्व एव जना यतः।
मदभिज्ञा भविष्यन्ति वाक्यमेतत् सदाप्रभोः॥
यतो हेतो मया तेषाम् अपराधः क्षमिष्यते।
न पुनश्च स्मरिष्यन्ते तेषां पापानि वा मया॥

३५ सदाप्रभुरिदं ब्रूते यः सूर्य्यं दीपकं दिवा।
विधींश्च चन्द्रताराणां निशि द्युत्यै प्रदत्तवान्।
येन महार्णवे सृष्टे प्रगर्ज्जन्ति तदूर्म्मयः।
ब्रूते स वाहिनीनाथ सदाप्रभुरिति श्रुतः॥
३६ मत्साक्षाद् विधयस्ते चेन्निवर्त्तेरन् कदाचन।
तर्ह्येस्रायेलवंशोऽपि मत्साक्षान्नित्यजातिवत्।
स्थितितो भविता भ्रष्ट इति ब्रूते सदाप्रभुः॥
३७ पुनर्व्वारमिमां वाचं भाषते स सदाप्रभुः।
उपरिष्टाद् यदि व्योम परिमीयेत केनचित्।
अधस्ताद् अनुसन्धानं भूमूलानां क्रियेत वा।
कृत्स्नेस्रायेलवंशस्यापि निराकरणं मया।
तर्हि तेषां क्रियादोषात् सम्भवेदिति वाक् प्रभोः॥

३८ सदाप्रभुः पुन र्ब्रूते पश्यागच्छन्ति वासराः।
सदाप्रभोः कृते येषु हननेलस्य दुर्गतः।
कोणस्थद्वारपर्य्यन्तं विनिर्म्मायिष्यते पुरी॥
३९ मानरज्जुस्तदग्रश्च गारेबाख्येन भूभृता।
किञ्चित् प्रगत्य गोयाथं प्रत्यावर्त्तिष्यते पुनः॥
४० पूर्व्वदिक्स्थहयद्वारकोणपर्य्यन्तमेव च।
भस्मस्थानं शवानाञ्च स्थानं या कृत्स्ननिम्नभूः।
सा क्षेत्राणि च सर्व्वाण्याकिद्रोणाख्यप्रवाहतः।

पुण्यस्थलं भविष्यन्ति कृते सदाप्रभोः सदा।
अनुन्मूल्यम् अनाश्यञ्चाकालान्तात् तद् भविष्यति॥

---

३२ द्वात्रिंशोऽध्यायः।

१ यिरिमियस्य कारागारे स्थितेः कारणं ६ यिरिमियेण हनमेलस्य क्षेत्रक्रयकरणं १२ बारूकस्य हस्ते क्रयपत्रस्य समर्पणं १६ यिरिमियस्य प्रार्थनं २६ यिहूदीयानां निर्व्वासनमधि भविष्यद्वाक्यं ३६ स्वदेशे पुनरागमनस्य भविष्यद्वाक्यञ्च।

यिहूदीयराजस्य सिदिकियस्य राजत्वस्य दशमवत्सरे सदाप्रभोः १
(पश्चाद् वक्ष्यमाणं) वाक्यं यिरिमियं प्रति प्रादुर्बभूव। उक्तो वत्सरो
निबूखद्रित्सरस्य राजत्वस्याष्टादशवत्सर आसीत्। तदानीञ्च तस्य २
बाबिलीयराजस्य बलानि यिरूशालमम् अवारुन्धन्। स भविष्यद्वक्ता
यिरिमियस्तु यिहूदीयराजप्रासादस्थकारागृहस्य प्राङ्गणे रुद्ध आसीत्।
यतो यिहूदीयराजः सिदिकियस्तं तत्र रुद्धवान् इदञ्च कथितवान्, ३
कुतस्त्वम् एतादृशीं भाविवार्त्तां वदसि यथा, सदाप्रभुरित्थमाह,
पश्याहं नगरमिदं बाबिलीयराजस्य करे समर्पयिष्यामि स च तद्
धरिष्यति, यिहूदीयराजः सिदिकियश्च कल्दीयानां हस्तान्नैवोद्धारिष्यते ४
किन्त्ववश्यं बाबिलीयराजस्य करे समर्पयिष्यते तत्सम्मुखीभूय च स्वमुखेन
तमालपिष्यति स्वनेत्राभ्यां तस्य नेत्रे द्रक्ष्यति च, सिदिकियश्च तेन ५
बाबिलम् अपनायिष्यते यावच्चाहं तस्य तत्त्वावधारणं न करिष्यामि
तावत् तत्र स्थास्यतीति सदाप्रभु र्ब्रवीति यूयञ्च कल्दीयैः सह यं सङ्ग्रामं
कुरुथ तत्र न कृतार्था भविष्यथेति।

यिरिमियो जगाद, सदाप्रभोरेतद् वाक्यं मां प्रति प्रादुरभूत्। ६
पश्य त्वत्पितृव्यस्य शल्लुमस्य सुतो हनमेलस्त्वत्समीपम् आगत्य वदिष्यति, ७
अनाथोते मम यत् क्षेत्रमस्ति तत् त्वं क्रेतुमर्हसि यतस्तत्क्रयार्थको
मोचनाधिकारस्त्वय्येव वर्त्तते। ततः सदाप्रभो र्वाक्यानुसारतो मम पि- ८
तृव्यसुतः स हनमेलः कारागृहस्य प्राङ्गणे मत्समीपमागत्यावादीत्,
बिन्यामीनदेशस्थानाथोते मम यत् क्षेत्रम् अस्ति त्वं तत् क्रीणीष्व यत-
स्तस्य स्वत्वाधिकारो मोचनाधिकारश्च त्वय्येव वर्त्तते, अतस्त्वं स्वार्थं तत्
क्रेतुमर्हसि। तदा तत् सदाप्रभो र्वाक्यमिति मयोपालम्भि। अतोऽहं ९
स्वपितृव्यसुतस्य हनमेलस्य समीपाद् अनाथोति स्थितं तत् क्षेत्रं क्रीतवान्

तस्य कृते च रूप्यमर्थतः सप्तदशशेकलपरिमितं रूप्यं तोलितवान्।
१० पत्रे च स्वाक्षरं कृत्वा मुद्राङ्कं कृतवान् साक्षिणश्च प्रयोज्य तत् रूप्यं
११ तुलया तोलितवान्। अपरं तत् क्रयपत्रम् अर्थतो विधिव्यवस्थानुरूपेण
मुद्राङ्कितम् एकं मुक्तञ्चापरं पत्रं गृहीतवान्।
१२ अपरमहं स्वपितृव्यसुतस्य हनमेलस्य साक्षात् तत्क्रयपत्रे कृत-
स्वाक्षराणां साक्षिणाञ्च साक्षात् काराप्राङ्गण उपविष्टानां सकल-
यिहूदीयानाञ्च साक्षात् तत्क्रयपत्रं मह्सेयपौत्राय नेरियपुत्राय
१३ बारूकाय दत्तवान् तेषां साक्षाच्च तं बारूकमित्थं समादिशं। इस्रायेल
१४ ईश्वरो वाहिनीनां सदाप्रभुरित्थमाह, यथा, त्वं पत्रद्वयमेतदर्थतो
मुद्राङ्कितमेतत् क्रयपत्रं मुक्तमेतत् पत्रञ्चादाय बहुदिनानि यावद् अव-
१५ स्थितये मृत्पात्रे निधेहि। यत इस्रायेल ईश्वरो वाहिनीनां सदाप्रभु-
रित्थमाह, अत्र देशे गृहाणि क्षेत्राणि द्राक्षोद्यानानि च पुनर्व्वारं
क्रायिष्यन्ते।
१६ नेरियसुताय बारूकाय तत्क्रयपत्रस्य प्रदानात् परं मया सदाप्रभु-
१७ मुद्दिश्येयं प्रार्थनाकारि। भो प्रभो सदाप्रभो, पश्य त्वमेव स्वीयमहा-
बलेन स्वीयप्रसारितबाहुना च द्यावाभूमी सृष्टवान् तवासाध्यं किमपि
१८ नास्ति। त्वं सहस्रेषु प्रसादाचारी पूर्व्वपुरुषैश्च यदपराद्धं पश्चात् तेषां
सन्तानेभ्यस्तत्फलदातासि महान् शौर्य्यवांश्चेश्वरो वाहिनीनां सदा-
१९ प्रभुरिति तव नाम। त्वं मन्त्रणेन महान् क्रियाभिश्च परमः, एकैक-
नराय तदाचारस्य शोधनार्थं तत्कर्म्मणां फलदानार्थञ्च मनुष्यसन्तानानां
२० सर्व्वमार्गाणामुपरि तव नेत्रे उन्मीलिते। त्वम् अद्यपर्य्यन्तं स्थायीनि
चिह्नान्यद्भुतलक्षणानि च मिसर्देश इस्रायेलि मनुष्यगणे च स्थापयित्वाद्य-
२१ पर्य्यन्तं स्थायि महानाम स्वार्थं निष्पादितवान्। त्वञ्च चिह्नैरद्भुतक्रियाभि
र्बलिहस्तेन प्रसारितबाहुना महाभयानकत्वेन च मिसर्देशात् स्वप्रजाम्
२२ इस्रायेलीयजातिमुद्धृत्य नीतवान्। यस्य च देशस्य दानं तेषां पूर्व्व-
पुरुषेभ्यस्त्वया शप्त्वा प्रत्यश्रावि तं दुग्धमधुप्रवाहिनमिमं देशं त्वं तेभ्यो
२३ दत्तवान्। स च तैः प्रविश्य वशीकृतः, परन्तु तव रवे तैरवधानं न कृतं
तव व्यवस्था न समाचरिता यद्यत् तवादेशात् तैः कर्त्तव्यं तत्तन्न कृतं
२४ तस्मात् त्वं सर्व्वैरेतैरामङ्गलैन तान् उपाक्रमयसि। पश्य नगरावस्कन्दा-
र्थकाः सेतवस्तदव्यवधाना अभवन् असिदुर्भिक्षमारीप्राबल्याच्च नगरं तद्वि-
रुद्धं युध्यमानानां कल्दीयलोकानां हस्तगतप्रायमस्ति, त्वं यद् गदितवान्

तदेव जायते त्वञ्च तद् वीक्षसे। तथापि भो प्रभो सदाप्रभो, त्वं मां २५
वदसि, त्वं रूप्येण तत् क्षेत्रं क्रीणीष्व साक्षिणश्च प्रयुङ्क्ष्वेति, नगरन्तु
कल्दीयानां हस्तगतप्रायमस्ति।

तदानीं सदाप्रभोरिदं वाक्यं यिरिमियं प्रति प्रादुरभूत, पश्चाहं २६
सर्व्वप्राणिनामीश्वरः सदाप्रभुः किमपि किं ममासाध्यं भवेत्? तस्मात् २८
सदाप्रभुरित्थमाह, पश्चाहं कल्दीयानां करे बाबिलीयराजस्य निबू-
खद्नित्सरस्य च करे नगरमेतत् समर्पयिष्यामि स च तद् धरिष्यति।
ये च कल्दीयजना एतन्नगरस्य विरुद्धं युध्यन्ते ते तत् प्रविश्य नगरे २९
ऽस्मिन् अग्निं दास्यन्ति, तन्निवासिनश्च मम क्रोधोत्पादनाय येषां गृहाणां
पृष्ठेषु वालमुद्दिश्य धूपम् उदहजन् इतरदेवांश्चोद्दिश्य पेयनैवेद्यान्युद-
सिञ्चन् तानि गृहाणि नगरञ्च ते दाहयिष्यन्ति। यत इस्रायेलीयवंशा ३०
यिहूदीयवंशाश्च आबाल्यान्मम दृष्टौ यत् कुत्सितं केवलं तदाचारिणो
ऽभवन्, फलत इस्रायेलीयवंशाः स्वहस्तकृतक्रियाभिः केवलं मम
कोपम् उत्पादयन्ति। यतो नगरमेतन्निर्म्माणदिनाद् अद्यपर्य्यन्तं मम ३१
कोपस्य रोषस्य च पात्रमभवत्, अतो मत्प्रत्यक्षतस्तद् अपसारयितव्यं।
एतस्य कारणम् इस्रायेलीयवंशानां यिहूदीयवंशानाञ्च सर्व्वदुष्कृतम् ३२
अर्थतो मम क्रोधोत्पादनाय ते तेषां राजानो मुख्यनरा याजका भावि-
वादिनो यिहूदीयजना यिरूशालम्निवासिनश्च यद् दुष्कृतमकार्षुस्तदेव।
ते मदभिमुखा न भूत्वा मत्तः पराङ्मुखा अभवन्। तेषां शिक्षाप्र- ३३
दानेऽतन्द्रिणो मम शिक्षायां तैरुपदेशग्रहणायावधानं नाकारि। यस्य ३४
च मन्दिरस्योपरि मम नाम कीर्त्तितं तदशुचीकरणाय तेषां घृण्यविग्रहा-
स्तन्मध्ये स्थापिताः। यिहूदीयजनांश्च पापिनः कर्त्तुम् अर्थतो मोलकाय ३५
स्वपुत्त्राणां स्वपुत्त्रीणाञ्च दाहनमिति या घृण्यक्रिया मया नाज्ञापिता
मम चित्तञ्च न प्रविष्टा तां कारयितुं ते वालमुद्दिश्य हिन्नोमसुतस्योपत्य-
कायां भृगुस्थानानि निर्म्मितानि।

अतो नगरमेतदसिक्षुन्मारीप्राबल्याद् बाबिलीयराजस्य करे सम- ३६
र्पितप्रायमिति वाक्यं यन्नगरमधि युष्माभिरुच्यते तदधीदानीम् इस्रायेल
ईश्वरः सदाप्रभुरित्थमाह। पश्चाहं स्वक्रोधेन स्वकोपेन स्वमहारोषेण च ३७
तदीयजनान् यत्र विकीर्णवान् तेभ्यः सर्व्वदेशेभ्यस्तान् सङ्ग्रहीष्यामि
स्थानमेतच्च पुनरानेष्यामि तांश्च निष्कण्टकं वासयिष्यामि। ते मम प्रजा ३८
भविष्यन्त्यहञ्च तेषाम् ईश्वरो भविष्यामि। तेषां मङ्गलाय तेषाञ्च भावि- ३९

सन्तानानां मङ्गलाय यथा ते निरन्तरं मत्तो बिभीयुस्तदर्थमहं तेभ्य एकं
४० चित्तम् एकं मार्गञ्च दास्यामि। तेषां मङ्गलकरणाय तेषामनुगमनादहं
न निवर्त्तिष्य इतिसूचकं शाश्वतनियमं तैः सह स्थापयिष्यामि ते च
४१ यथा मत्तो नापसरेयुस्तदर्थं तेषां चित्तेषु मद्भक्तिं निधास्यामि। तेषां
मङ्गलकरणाय च तेष्वानन्दिष्यामि सत्यभावेन च स्वीयकृत्स्नान्तःकरणेन
४२ कृत्स्नमनसा च देशेऽस्मिन् तान् रोपयिष्यामि। यतः सदाप्रभुराह,
यथाहं जनानेतान् कृत्स्नमिदम् अमङ्गलं प्रापितवान् तथैव तेभ्यो मत्प्र-
४३ तिश्रुतं कृत्स्नं मङ्गलं तान् प्रापयिष्यामि। यूयञ्चेमं यं देशम् उत्सन्नं नर-
पशुवर्ज्जितं कल्दीयानां करे समर्पितञ्च वदथ तस्मिन्नेव क्षेत्रक्रयः
४४ सम्भविष्यति। फलतो बिन्यामीनदेशे यिरूशालमः परितो यिहूदाया
नगरेषु पर्व्वतीयनगरेषु समभूमिस्थनगरेषु दाक्षिणात्यनगरेषु च जना
रूप्येण क्षेत्राणि क्रेष्यन्ति क्रयपत्रे च स्वाक्षरं कृत्वा मुद्राङ्कं साक्षिणश्च
प्रयोक्ष्यन्ते, यतोऽहं तेषां दासत्वं परिवर्त्तयिष्यामीति सदाप्रभुराह।

---

३३ त्रयस्त्रिंशोऽध्यायः।

१ वन्दित्वान्मोचनायेश्वरस्य प्रतिज्ञा १० तया मुक्त्यानन्दस्य भविष्यद्वचनं १४ पल्लव-स्वरूपख्रीष्टमधि भविष्यद्वचनं १९ तदीयराज्यस्य स्थितिमधि भविष्यद्वचनं २३ तस्य वंशस्य स्थिरता च।

१ ततः परं सदाप्रभोर्वाक्यं द्वितीयवारं यिरिमियं प्रति प्रादुरभूत्
तदानीमपि स काराप्राङ्गणे रुद्ध आसीत्।

२ भाषते भारतीमेनाम् एतत्कर्त्ता सदाप्रभुः।
एतत्संस्थापनायैवैतद्विधायी सदाप्रभुः।
स सदाप्रभुरित्येव नामधेयेन कीर्त्तितः॥
३ त्वं माम् आह्वय तेनाहं दास्यामि तुभ्यमुत्तरं।
त्वज्ज्ञानातीतगूढार्थांस्त्वां वक्ष्यामि महत्तमान्।
४ इस्रायेलो य ईशः स ब्रवीतीदं सदाप्रभुः।
सेतूनां कारणादेव घृतासीनाञ्च कारणात्।
पुरस्यैतस्य गेहानि यिहूदायाश्च भूभृतां।
सर्व्ववेश्मानि भग्नानि तान्यधीदं ब्रवीम्यहं॥
५ ये कल्दीयजनैः सार्द्धं युद्धं कर्त्तुमुपस्थिताः।

जनानां सर्व्वदौर्जन्याद् एतत्पूर्य्या पराङ्मुखः।
अहं स्वकोपरोषाभ्यां यान् निघातितवान् नरान्।
गेहानि कुणपैस्तेषां ते पूरयितुमागताः॥
पश्य क्षतानि बद्धाहं तस्यै दास्यामि सुस्थतां। ६
आरोग्यं तज्जनानाञ्च कृत्वा कल्याणसत्ययोः।
प्राचुर्य्यं सम्मुखे तेषां स्थापयिष्याम्यनावृतं॥
यिहूदायाश्च दासत्वम् इस्रायेलश्च दासतां। ७
परिवर्त्त्य करिष्यामि पूर्व्ववत् तान् प्रतिष्ठितान्॥
यद्यन्ममापराद्धं तैः शुद्धांस्तत्सर्व्वदोषतः। ८
तान् करिष्यामि तेषाञ्च क्षमिष्ये सर्व्वपातकं।
मम यत्तैरपाराधि मद्विद्रोहादकारि च॥
पृथिव्याः सर्व्वजातीनां साक्षात् स्तुत्यं विभूषकं। ९
मम हर्षप्रदं नाम नगरीयं भविष्यति॥
यतोऽहं यत् करिष्यामि क्षेममेतान् जनान् प्रति।
तस्य श्रोष्यन्ति वार्त्तां ता एतेषाञ्च मया कृतात्।
सकलक्षेमकल्याणाद् भीत्वा यास्यन्ति वेपनं॥
सदाप्रभुरिदं ब्रूते स्थानमेतन्निरालयं। १०
निर्जनं पशुहीनञ्चेति युष्माभि र्निगद्यते॥
नग्रेषु जनहीनेषु निवासिवर्जितेषु च।
पशुहीनेषु चैतेषु यिहूदायाः पुरेषु तु।
यिरूशालमश्च मार्गेषु पुनः संश्रोष्यते ध्वनिः॥
हर्षध्वनिः प्रमोदस्य ध्वनि र्वरस्य च ध्वनिः। ११
कन्यायाश्च ध्वनि र्नृणां ध्वनि र्व्याहरतामिदं।
यथा संस्तुत यूयं हि वाहिनीनां सदाप्रभुं।
यस्मात् सदाप्रभुः साधुः करुणा तस्य शाश्वती॥
ध्वनिः सदाप्रभो र्गेहे स्तवेनोत्सृजतां बलिं।
यतो देशस्य दासत्वं परिवर्त्त्य मया दशा।
आद्या दायिष्यते तस्मै ब्रवीतीदं सदाप्रभुः॥
भाषते भारतीमेनां वाहिनीनां सदाप्रभुः। १२
अस्मिन्निरालये स्थाने निर्जने पशुवर्जिते।
पुरेष्वस्य च सर्व्वेषु स्वान् विश्रामयतां व्रजान्।

वसति मेषपालानां पुनर्व्वारं भविष्यति ॥
१३ भूयो गिरिपुरेष्वेव समभूमेः पुरेषु च।
पुरेषु दाक्षिणात्येषु बिन्यामीनीयनीवृति।
यिरूशालमश्चतुर्दिक्षु यिहूदायाः पुरेषु च।
मेषा गणयतः पार्श्वे व्रजिष्यन्तीति वाक् प्रभोः॥
१४ सदाप्रभुरिदं ब्रूत इस्रायेलन्वयं प्रति।
यिहूदीयान्वयञ्चाधि प्रोक्ता या शुभवाञ्छया।
येषु तां साधयिष्यामि ते पश्चायान्ति वासराः॥
१५ दिनेषु तेषु तस्मिंश्च समये धर्म्मपल्लवं।
एकं प्ररोहयिष्याम्यहं दायूदोऽनुरोधतः।
देशे न्यायविचारं स धर्म्मञ्च साधयिष्यति॥
१६ यिहूदा समये तस्मिन् परित्राणमवाप्स्यति।
निर्व्विघ्नञ्च यिरूशालम् वसतिं प्रकरिष्यति।
ख्यास्यतेऽनेन नाम्ना च "अस्मद्धर्म्मः सदाप्रभुः"॥
१७ यस्मात् सदाप्रभु ब्रूत इस्रायेलो नृपासने।
आसीनः पुरुषो नैव दायूदः संहरिष्यते॥
१८ पुरुषः सर्व्वकाले च होमार्थबलिमुत्सृजन्।
नैवेद्यं ज्वलयन् यज्ञं कुर्व्वंश्च मम सम्मुखे।
लेवीययाजकेभ्यो हि नैवोपसंहरिष्यते॥
१९ अपरं सदाप्रभोरेतद् वाक्यं यिरिमियं प्रति प्रादुरभूत्।
२० सदाप्रभुरिदं ब्रूते दिनस्य नियमो मम।
नियमो मम रात्रेश्च युष्माभि र्यदि लुप्यते।
दिवसस्तेन रात्रिश्च स्वकाले नानुजायते॥
२१ तर्हि मद्दासदायूदा सह यो नियमो मम।
सोऽपि विलोप्स्यते तस्य कश्चिद् वंशोद्भवो नरः।
तत्सिंहासन आसीनो राजत्वं न करिष्यति॥
मदुपासकलेवीययाजकैश्च समं मया।
कृतो यो नियमः सोऽपि तदानीं विप्रलोप्स्यते॥
२२ व्योम्नो बलं यथागण्यम् अमेयञ्चाब्धिसैकतं।
तथैव स्वीयदासस्य दायूदोऽप्यन्वयो मया।
मदुपासकलेवीयश्रेणी च वर्द्धयिष्यते॥

अपरं सदाप्रभोरेतद् वाक्यं यिरिमियं प्रति प्रादुर्बभूव। यौ द्वौ २३
वंशौ सदाप्रभुना वरितौ तौ तेन पुन र्निराकृताविति वदन्तो जना इमे २४
स्वसाक्षात् मम प्रजानां जातित्वं लुप्तमिवावमन्यन्ते, त्वयेदं किं नादर्शि?
सदाप्रभुस्त्वित्थमाह, २५

मया चेत् स्थापिता न स्यान्नियमो दिनरात्रयोः।
मया चेत् स्थापिता न स्युः विधयो व्योममर्त्त्ययोः॥
याकूबः स्वीयदासस्य दायूदश्चान्वयं तदा। २६
निराकृत्य मयेब्राहीमिस्हाक्याकूब्कुलस्य हि।
राजत्वाय नरस्तस्य वंशान्नैव ग्रहीष्यते॥
तेषां दास्यं निवर्त्त्याहं भविष्ये तेषु वत्सलः॥

---

३४ चतुस्त्रिंशोऽध्यायः।

१ सिदिकियस्य प्रवासमधि भविष्यद्वाक्यं ८ अधिपै र्दासदासीनां मोचनात् परं पुन-र्दासत्वपदे नियोगः १२ तत्कारणाच्च दूरदेशे तेषां भाविदासत्वस्य भविष्यद्वचः।

बाबिलीयराजो निबूखद्नित्सरस्तस्य कृत्स्नबलं तत्कर्त्टत्वाधीनभूमेः सर्व्व- १
राज्यानि सर्व्वजातयश्च यदा यिरूशालमा तदीयसर्व्वनगरैश्च सहा-
युध्यन्त तदा सदाप्रभोरेतद् वाक्यं यिरिमियं प्रति प्रादुर्बभूव, यथा,
इस्रायेल ईश्वरः सदाप्रभुरित्थमाह, त्वं गत्वा यिहूदीयराजं सिदि- २
कियमालप तञ्च वद सदाप्रभुरित्थं ब्रूते पश्चाहं नगरमिदं बाबिलीय-
राजस्य करे समर्पयिष्यामि स च तदग्निना दाहयिष्यति। त्वञ्च तस्य ३
करान्नैव रक्षिष्यसे यतस्त्वं धारिष्यसे तस्य हस्ते च समर्पयिष्यसे
स्वनेत्राभ्याञ्च तस्य बाबिलीयराजस्य नेत्रे विलोकिष्यसे सम्मुखीभूय च
स्वमुखेन तमालपिष्यसि बाबिलञ्च गमिष्यसि। परन्तु भो यिहूदीय- ४
राज सिदिकिय त्वं सदाप्रभो र्वाक्यं शृणु त्वामधि सदाप्रभुरित्थमाह
त्वमसिना न मरिष्यसि। त्वं निरुद्वेगं मरिष्यसि तव पूर्व्वपुरुषान् ५
अर्थतस्त्वत्पूर्व्वं ये पुरातना राजान आसन् तानुद्दिश्य जनै र्यादृशो धूप-
दाहोऽकारि तादृशो धूपदाहस्त्वामप्युद्दिश्य कारिष्यते हा प्रभो हाहेति
विलापश्च विधायिष्यते यतो वाक्यमिदं मया गद्यत इति सदाप्रभुराह।
ततो भाविवादी यिरिमियस्तानि सर्व्ववाक्यानि यिरूशालमि यिहू- ६
दीयराजं सिदिकियं बभाषे। तदानीं बाबिलीयराजस्य बलानि ७

यिरूशालमा सार्द्धं यिहूदायाश्चावशिष्टैः सर्व्वनगरैः सार्द्धम् अर्थतो
लाखीशेनासेकया च सार्द्धमयुध्यन्त यतो यिहूदाया दृढनगराणां मध्ये
ते नगरे अवशिष्टे आस्तां।
८　मोचनस्य घोषणा भविष्यतीति नियमस्य यिरूशालमि स्थितैः सर्व्व-
जनैः सह राज्ञा सिदिकियेन निर्द्धारणात् परं सदाप्रभो र्वाक्यं
९ यिरिमियं प्रति प्रादुर्बभूव। फलत एकैको जनः स्वम् इब्रीयदासं स्वाम्
इब्रीयदासीञ्च मोचयित्वा विस्रक्ष्यति तेषां कोऽपि जनः स्वभ्रातरं
१० यिहूदीयजनं दास्यकर्म्म न कारयिष्यतीति नियमो बभूव। सर्व्वे मुख्य-
नरा यावन्तश्च जनाः स्वदासदासीनां मोचनार्थकं दास्यकर्म्मणि पुन
र्न नियोजनार्थकञ्च तं समयम् अङ्गीकृतवन्तस्ते सर्व्वे तत्रावधानं चक्रु-
११ रर्थतस्तत्रावधाय दासान् मोचयामासुः। तत्पश्चात्तु ते परावृत्य तान्
मोचितान् विसृष्टांश्च दासान् दासीश्च पुनरानाय्य दासान् दासी र्वा
कृत्वा वशीचक्रिरे।
१२　ततः सदाप्रभोः सम्मुखाद् यिरिमियं प्रति सदाप्रभोरिदं वाक्यं प्रादु-
१३ र्बभूव यथा, इस्रायेल ईश्वरः सदाप्रभुरित्थमाह, यस्मिन् कालेऽहं
दास्यगेहान्मिसरदेशाद् युष्मत्पूर्व्वपुरुषान् आनयं तस्मिन् काले तैः
१४ सह नियममेनं कृतवान् यथा, तव भ्राता य इब्रीयो जनस्त्वयि विक्री-
यते स सप्तवर्षाणां परिणामे युष्माकमेकैकजनेन विस्रष्टव्यः स षड्वर्षाणि
यावत् तव दास्यकर्म्म करोतु तत्पश्चात् त्वं तं मोचयित्वा स्वतो विस्र-
क्ष्यसीति। परन्तु युष्मत्पूर्व्वपुरुषै र्मम वाक्येऽवधानं कर्णपातो वा
१५ नाकारि। यूयन्त्वद्य परावृत्य मद्दृष्टौ यद् यथार्थं तदकार्ष्टार्थतः स्व-
भ्रातॄणां मोचनस्य घोषणामकार्ष्ट यस्योपरि च मम नाम कीर्त्त्यते
१६ तत्र मदीयमन्दिरे मत्साक्षान्नियममकार्ष्ट। पुनश्च परावृत्य मम नामा-
पवित्रीकृत्य युष्माकमेकैको जनः स्वातन्त्र्यलाभाय मोचितं विसृष्टञ्च
१७ स्वदासं स्वदासीञ्च पुनरानाय्य दासं दासीं वा कृत्वा वशीकृतवान्। ततो
हेतोः सदाप्रभुरित्थमाह स्वभ्रातुः स्वप्रतिवेशिनश्च मोचनस्य घोषणाय
युष्माभि र्ममाज्ञायाम् अवधानं नाकारि, तस्मात् सदाप्रभुराह पश्य-
ताहं युष्मद्विरुद्धम् असिमारीक्षुधानां मोचनं घोषयिष्यामि, युष्मांश्च
१८ पृथिव्याः सर्व्वराष्ट्रेषु वेपनास्पदं विधास्यामि। ये च नरा मम नियमं
लङ्घितवन्तोऽर्थतो वृषवत्सं द्विखण्डीकृत्य तत्खण्डयो र्मध्येन क्राम्यन्तो
१९ मम साक्षाद् यं समयम् अकार्षुस्तत्प्रतिज्ञां न साधितवन्तस्तान् अर्थतो

यिहूदाया मुख्यनरान् यिरूशालमस्य मुख्यनरान् नपुंसकान् याजकान्
वृषवत्सस्य खण्डयो र्मध्येनातिक्रान्तान् सर्व्वान् देशीयनरांश्च तद्वैरिणां २०
तत्प्राणनाशार्थिनाञ्च करेषु समर्पयिष्यामि तेषां कुणपानि चाकाशीय-
पक्षिणां भूचरजन्तूनाञ्च खाद्यानि भविष्यन्ति। यिहूदीयराजं सिदि- २१
कियं तस्य मुख्यनरांश्च तद्वैरिणां तत्प्राणनाशार्थिनाञ्च करेषु विशेषतो
युष्मत्तोऽपक्रान्तानां बाबिलीयराजस्य योद्धृणां करेषु समर्पयिष्यामि।
सदाप्रभु र्ब्रूते पश्याहम् आज्ञां कृत्वा तान् पुनर्व्वारमेतन्नगरस्य विरुद्धम् २२
आनाययिष्यामि, ते च तद्विरुद्धं युद्धं कृत्वा तद् धरिष्यन्ति वह्निना
दाहयिष्यन्ति च यिहूदायाश्च नगराणि मया निवासिवर्ज्जितान्युत्सन्न-
स्थानानि कारिष्यन्ते।

---

३५ पञ्चत्रिंशोऽध्यायः।

१ रेखबीयैः स्वपूर्व्वपुरुषाणाम् आज्ञापालनं १२ यिहूदाया ईश्वराज्ञालङ्घनं १८ पूर्व्वपुरुषाणाम् आज्ञापालनहेतो रेखबीयान् प्रतीश्वरस्याशीर्व्वचनञ्च।

यिहूदीयराजस्य योशियसुतस्य यिहोयाकीमस्य राजत्वकाले सदा- १
प्रभोरिदं वाक्यं यिरिमियं प्रति प्रादुर्बभूव, यथा, त्वं रेखबीयजनानां २
समीपं गत्वा तानालप सदाप्रभो र्मन्दिरं नीत्वा कोष्ठमेकं प्रवेश्य तान्
द्राक्षारसं पायय च। ततोऽहं हबत्सिनियस्य पौत्त्रं यिर्मियाहस्य पुत्त्रं ३
यासनियं तस्य भ्रातॄन् सर्व्वपुत्त्रांश्च सर्व्वानेव रेखबीयजनानादाय सदा- ४
प्रभो र्मन्दिरं नीत्वा द्वारपालस्य शल्लूमसुतस्य मासेयस्य कोष्ठस्योर्द्ध्वे
मुख्यनराणां कोष्ठस्य पार्श्वे च स्थितम् ईश्वरीयनरस्य यिगदलियसुतस्य
हाननस्य पुत्त्राणां कोष्ठं प्रावीविशं। तेषां रेखबवंशीयजनानां समक्षं ५
द्राक्षारसेन पूर्णानि भाण्डानि कंसांश्च स्थापयित्वा तानवादिषं यूयं
द्राक्षारसं पिवत। ते तु जगदुः, वयं द्राक्षारसं न पास्यामो यतो- ६
ऽस्मत्पूर्व्वपुरुषो रेखबस्य सुतो योनादबोऽस्मान् इत्थम् आदिष्टवान्
यथा, यूयं युष्माकं वंशाश्च कालान्तं यावद् द्राक्षारसं न पास्यथ।
गेहानि च न निर्म्मास्यथ वीजवपनं द्राक्षाक्षेत्राणि वा न करिष्यथ ७
युष्माकं तानि मव सन्तु। किन्तु यूयं यावज्जीवनं पटवेश्मसु वत्स्यथ तथा
सति यस्यां भूमौ प्रवसथ तत्र दीर्घकालं स्थास्यथ। अतो वयं स्वपूर्व्व- ८
पुरुषस्य रेखबसुतस्य योनादबस्य वाक्येऽवधायास्माभिरस्मद्भार्य्यापुत्त्र-

९ दुहितृभिश्च यावज्जीवनं द्राक्षारसो न पेयो वासाय च गृहाणि न
निर्म्मितव्यानि द्राक्षोद्यानं क्षेत्रं वीजवपनं वास्माभिरकर्त्तव्यमिति यद्यत्
१० तेनादिष्टास्तदेवाचरितवन्तः। वयं पटवेश्मसूषितवन्तो यद्यच्चास्माकं
११ पूर्व्वपुरुषेण योनादबेनादिष्टास्तत्रावधायाचरितवन्तः। अपरं यदा बाबि-
लीयराजो निबूखद्नित्सरो देशमिमम् आक्राम्यत् तदा वयं कथितवन्तः,
आगच्छत कल्दीयबलानां सम्मुखाद् अरामीयबलानां सम्मुखाच्च वयं
यिरूशालमं प्रविशामस्ततो हेतोरस्माभि र्यिरूशालमि वसतिरकारि।
१२ ततः सदाप्रभोरिदं वाक्यं यिरिमियं प्रति प्रादुर्बभूव यथा, इस्रायेल
१३ ईश्वरो वाहिनीनां सदाप्रभुरित्थमाह, त्वं गत्वा यिहूदाया जनान्
यिरूशालमो निवासिनश्च वद, सदाप्रभु र्ब्रूते मम वाक्येऽवधानाय यूयं
१४ किं शिक्षां न ग्रहीष्यथ? द्राक्षारसपानमकर्त्तव्यमित्यादीनि यानि वा-
क्यानि रेखबसुतो योनादबः स्वसन्तानानादिष्टवांस्तानि दृढान्यभवन्,
अद्यापि तै र्द्राक्षारसो न पीयते यतः स्वपूर्व्वपुरुषस्यादेशस्तैः पाल्यते,
अहन्त्वतन्द्री सन् युष्मान् यद्यद् गदितवान् मम तद्वाक्ये युष्माभिरवधानं
१५ नाकारि। अहम् अतन्द्री सन् स्वदासान् सर्व्वभाविवादिनोऽपि युष्मद-
न्तिकं प्रहित्य कथितवान् सर्व्वे यूयं स्वकुमार्गात् परावर्त्तध्वं सदाचारञ्च
कुरुध्वम् इतरदेवानां सेवनाय तान् मानुगच्छत तथा कृते यो देशो
मया युष्मभ्यं युष्मत्पूर्व्वपुरुषेभ्यश्च प्रादायि तत्र निवत्स्यथ, यूयन्तु कर्णपातं
१६ मम वाक्येऽवधानं वा नाकार्ष्ट। यतो हेतो रेखबसुतस्य योनादबस्य
वंशाः स्वपूर्व्वपुरुषस्य दत्तम् आदेशं पालितवन्तो जनास्त्वेते मम वाक्यं न
१७ गृहीतवन्तस्ततो हेतोरिस्रायेल ईश्वरो वाहिनीनामीश्वरः सदाप्रभु-
रित्थमाह पश्य यिहूदाया यिरूशालम्निवासिनाञ्च सर्व्वेषां विरुद्धं यस्य
कथामहं कथितवान् तत् सर्व्वममङ्गलं तान् प्रापयिष्यामि, यतस्तान्
प्रति भाषमाणस्य मम वाक्यं तै र्न गृहीतं मयि तान् आह्वयति च तैः
किमप्युत्तरं नादायि।
१८ अपरं यिरिमियस्तान् रेखबवंशीयजनान् जगाद, इस्रायेल ईश्वरो
वाहिनीनां सदाप्रभुरित्थमाह यतो हेतो यूयं स्वपूर्व्वपुरुषस्य योना-
दबस्याज्ञां गृहीतवन्तस्तस्य च सर्व्वमादेशं पालितवन्तस्तेन यद्यद् आ-
१९ दिष्टास्तत् सर्व्वमाचरितवन्तश्च ततो हेतोरिस्रायेल ईश्वरो वाहिनीनां
सदाप्रभुरित्थमाह सर्व्वकाले मत्समक्षं दण्डायमानो नरो रेखबसुताद्
योनादबान्नैवोपसंहारिष्यते।

३६ षट्त्रिंशोऽध्यायः।

१ ईश्वरस्याज्ञातो यिरिमियेण पुस्तकलेखनं ४ तत्पठनाय बारूकं प्रति यिरिमियस्याज्ञा ९ जनानां सन्निधौ बारूकेण पुस्तकपठनं ११ मीखायेन बारूकस्य कथाया अधिपाभ्यर्णे प्रकाशनं २० अधिपैस्तद्वाचि राजानं श्राविताया तत्पुस्तकानयनाय राज्ञा यिहूदेः प्रेषणं तत्पाठं निशम्य पुस्तकदाहनं २७ अपरपुस्तकलेखनायादिष्टेन यिरिमियेण राज्ञो भाविदण्डप्रचारः ३२ बारूकेण द्वितीयपुस्तकलेखनञ्च।

यिहूदीयराजस्य योशियसुतस्य यिहोयाकीमस्य राजत्वस्य चतुर्थ- १
वत्सरे सदाप्रभोरेतद् वाक्यं यिरिमियं प्रति प्रादुर्बभूव यथा, त्वं लिपि- २
योग्यं पुस्तकं गृहाण त्वां प्रत्यादौ मम कथनकालादर्थत आयोशिय-
राजत्वाद् अद्य यावद् इस्रायेलमधि यिहूदामधि सर्व्वा इतरजातीश्चाधि
यानि वाक्यान्यहं तुभ्यं कथितवान् तानि सर्व्वाणि तत्र लिख। स्याद् ३
यिहूदावंशीयानां सर्व्वं यदमङ्गलं कर्त्तुं सङ्कल्पयामि तन्निशम्य त एकैकशः
स्वकुमार्गात् परावर्त्तिष्यन्ते तथा सत्यहं तेषाम् अपराधं पापञ्च क्षमिष्ये।
ततो यिरिमियो नेरियसुतं बारूकम् आह्वाययामास बारूकश्च ४
यिरिमियं प्रति सदाप्रभुना कथितानि सर्व्ववाक्यानि तद्वक्त्राच्छ्रुत्वा
तस्मिन् लिपियोग्ये पुस्तके लिलेख। अपरं यिरिमियो बारूकम् इदम् ५
आदिदेश यथा, अहं रुद्धोऽस्मि सदाप्रभो र्मन्दिरं गन्तुं न शक्नोमि।
त्वन्तु तत्र गत्वा मम वक्त्राच्छ्रुतानि यानि वाक्यान्यत्र पुस्तके लिखित- ६
वान् सदाप्रभोस्तानि वाक्यान्युपवासदिने सदाप्रभो र्मन्दिरे उच्चैःस्वरेण
जनानां कर्णगोचरे पठ स्वपुरेभ्य आगतानां सर्व्वयिहूदीयजनानाञ्च
कर्णगोचरेऽपि तानि पठ। स्यात् सदाप्रभोः साक्षात् तैः साध्यसाधना ७
निवेदयिष्यते ते चैकैकशः स्वकुमार्गात् परावर्त्तिष्यन्ते यतः सदाप्रभु-
रेतस्या जाते र्वैपरीत्येन यस्य कथां कथितवान् स कोपो रोषश्च महान्।
ततस्तस्मिन् पुस्तके लिखितानां सदाप्रभो र्वाक्यानां सदाप्रभो र्मन्दिरे ८
पाठमधि नेरियसुतो बारूको भाविवादिना यिरिमियेण यद्यद् आ-
दिष्टस्तच्चकार।
अपरं यिहूदीयराजस्य योशियसुतस्य यिहोयाकीमस्य राजत्वस्य ९
पञ्चमवत्सरस्य नवममासे यिरूशालमि स्थिताः सर्व्वे जना यिहूदाया
नगरेभ्यो यिरूशालमम् आगताः सर्व्वे जनाश्च सदाप्रभोः समक्षम्
उपवासं घोषयामासुः। तदानीं बारूकः सदाप्रभो र्मन्दिरं गत्वा सदा- १०
प्रभो र्मन्दिरस्य नूतनद्वारस्य प्रवेशस्थाने उच्चतरप्राङ्गणस्थे शाफनसुतस्य

गिमरियस्य लेखकस्य कोष्ठे सर्व्वजनानां कर्णगोचरे तस्मिन् पुस्तके
लिखितानि यिरिमियस्य वाक्यानि पपाठ।
११ तदानीं शाफनस्य पौत्त्रो गिमरियस्य पुत्त्रो मीखायस्तत्पुस्तकपठनात्
१२ सदाप्रभोस्तानि सर्व्ववाक्यानि श्रुत्वा राजप्रासादं लेखकस्य कोष्ठं
जगाम। तत्र सर्व्वेऽधिपा अर्थतो लेखक इलीशामाः शिमयियस्य सुतो
दिलायोऽक्बोरस्य सुत इल्नाथनः शाफनस्य सुतो गिमरियो हननि-
१३ यस्य सुतः सिदिकियश्चेत्यादयः सर्व्वेऽधिपा उपविष्टा आसन्। ततो
जनानां कर्णगोचरे बारूकेण पुस्तकपठनकाले मीखायो यानि वाक्यानि
१४ श्रुतवान् तानि सर्व्वाणि तान् जगाद। ततोऽधिपाः सर्व्वे कूशेः प्रपौत्त्रं
शेलिमियस्य पौत्त्रं निथनियस्य पुत्त्रं यिहूदिं बारूकस्य समीपं प्रहित्य तं
जगदुः जनानां कर्णगोचरे यत् पुस्तकं त्वयापाठि तद् हस्तेनादायागच्छ।
ततो नेरियस्य पुत्त्रो बारूकस्तत् पुस्तकं हस्तेनादाय तेषाम् अन्तिकम्
१५ उपतस्थौ। ते च तं जगदुः, त्वमुपविश्यास्मत्कर्णगोचरे तत् पठ। तदा
१६ बारूकस्तेषां कर्णगोचरे पपाठ। ततस्तानि सर्व्ववाक्यानि शृण्वन्तस्ते
परस्परं सभयदृष्टिं चक्रिरे बारूकञ्च जगदुः, वयमेतानि सर्व्ववाक्या-
१७ न्यवश्यं राजानं ज्ञापयिष्यामः। अपरं ते बारूकं पप्रच्छुः, त्वं कथमेतानि
१८ सर्व्ववाक्यानि तस्य वक्त्राल्लिखितवान् तदस्मान् वदितुमर्हसि। बारूक-
स्तान् जगाद स स्ववक्त्रेण सर्व्वाण्येतानि वाक्यानि मत्समक्षम् उच्चा-
१९ रितवान् अहञ्च मस्या तानि पुस्तके लिखितवान्। ततस्तेऽध्यक्षा बा-
रूकमूचुः, त्वं यिरिमियश्च गत्वात्मानं गुहायां कुत्र स्थस्तत् कोऽपि न
जानातु।
२० अपरं ते तत् पुस्तकम् इलीशामानाम्नो लेखकस्य कोष्ठे निधाय प्राङ्गणं
राज्ञः समीपं गत्वा तानि सर्व्वाणि वाक्यानि राज्ञः कर्णगोचरे जगदुः।
२१ ततो राजा तत्पुस्तकानयनार्थं यिहूदिं प्रेषयामास स च यिहूदि-
रिलीशामानाम्नो लेखकस्य कोष्ठात् तदानीय राज्ञः कर्णगोचरे राज्ञः
२२ समक्षं तिष्ठतां सर्व्वेषाम् अधिपानां कर्णगोचरे च पपाठ। तदानीं
नवममासि राजा हैमन्तिकगेहे उपविष्ट आसीत् तत्समक्षं हसन्ती
२३ चाज्वलत्। अपरं यिहूदिना त्रिषु चतुर्षु वा पत्रेषु पठितेषु स लेखकस्य
क्षुरिकया तानि कर्त्तित्वा हसन्तीस्थवह्निमध्येऽक्षिपत्। इत्थं समस्तमेव
२४ तत् पुस्तकं हसन्तीस्थवह्निना भस्मीचक्रे। तानि सर्व्वाणि वाक्यानि
श्रुत्वापि तेन राज्ञा तस्य सर्व्वै र्भृत्यैश्च त्रासो वस्त्रविदारणं वा

नाकारि। पुस्तकं मा दह्यतामितील्नाथनेन दिलायेन गिमरियेण २५
च प्रार्थितोऽपि सन् राजा तेषां प्रार्थनां न जग्राह। अपरं राजा २६
लेखकस्य बारूकस्य भाविवादिनो यिरिमियस्य चानयनार्थं राजपुत्त्रं
यिरह्मेलम् अस्रीयेलसुतं सिरायम् अब्देलसुतं शेलिमियञ्च प्राहिणोत्।
सदाप्रभुस्तु तौ गूढवान्।

राज्ञा तस्य पुस्तकस्य दाहनात् तत्र यिरिमियस्य वक्त्राद् बारूकेण २७
लिखितानां वाक्यानाञ्च दाहनात् परं यिरिमियं प्रति सदाप्रभोरेतद्
वाक्यं प्रादुर्बभूव, यथा, त्वं पुनर्व्वारमपरमेकं पुस्तकं गृहीत्वा यिहूदीय- २८
राजेन यिहोयाकीमेन दग्धे तस्मिन् प्रथमे पुस्तके यानि वाक्यान्यासन्
तानि पुरातनवाक्यानि च तत्र लिख। यिहूदीयराजं तं यिहोयाकीम- २९
मधि चेदं वद, सदाप्रभुरित्थं ब्रूते बाबिलीयराज आगमिष्यति देशमिमं
विनाशयिष्यति मनुष्यपशुहीनं करिष्यति चेदृशीं कथां त्वमत्र पुस्तके
किमर्थं लिखितवानिति ब्रुत्वा तत् पुस्तकं त्वया दाहितं। ततो हेतोः ३०
सदाप्रभुस्तं यिहूदीयराजं यिहोयाकीममधीत्थं भाषते दायूदः सिंहासन
आसीनस्तस्य कोऽपि जनो न भविष्यति तस्य कुणपञ्च दिवा रौद्रे
यामिन्याञ्च हिमे निक्षिप्तं पतिष्यति। अहञ्च तस्मै तस्य वंशाय भृत्ये- ३१
भ्यश्च तेषाम् अपराधस्य फलं दास्यामि, यस्यामङ्गलस्य कथायां मया
गदितायां ते यिरूशालमो निवासिनश्च यिहूदाया जनाश्चावधानं न
कृतवन्तस्तत् सर्व्वम् अमङ्गलं तान् प्रापयिष्यामि च।

ततो यिरिमियेणान्यत् पुस्तकमादाय नेरियसुताय बारूकाय लेखका- ३२
यादायि यिहूदीयराजेन यिहोयाकीमेन भस्मीकृते पुस्तके च यानि
वाक्यान्यासन् तानि सर्व्वाणि स यिरिमियस्य वक्त्रात् तत्र पुस्तके लिलेख
तत्सदृशान्यपराण्यपि बहूनि वाक्यानि च तत्र तेन लिलिखिरे।

---

३७ सप्तत्रिंशोऽध्यायः।

१ कल्दीयेषु यिरूशालमोऽपगतेषु ईश्वराय प्रार्थनार्थं यिरिमिये सिदिकियस्य निवेदनं ६ कल्दीया यिरूशालमं परावृत्य तद् धरिष्यन्तीति यिरिमियस्य भविष्यद्वचः ११ तत्कारणाद् यिरिमियस्य कारायां बन्धनं १६ नृपेण सार्कं यिरिमियस्य सम्भाषणं निवेदनञ्च।

यिहोयाकीमसुतस्य यिहोयाखीनस्य विनिमये योशियसुतः सिदि- १
कियो राजा बभूव, यतो बाबिलीयराजो निबूखद्नित्सरस्तं यिहूदादेशस्य

२ राजत्वे नियुक्तवान्। स तु तस्य भृत्या देशीयजनाश्च भाविवादिना
३ यिरिमियेणोक्तेषु सदाप्रभो र्वाक्येष्ववधानं न चक्रिरे। अपरं सिदि-
कियो राजा शेलिमियसुतं यिहूखलं मासेयसुतं सिफनियं याजकञ्च
भविष्यद्वक्तु र्यिरिमियस्यान्तिकं प्रहित्य जगाद त्वम् अस्मत्कृतेऽस्मदीश्वरं
४ सदाप्रभुं प्रसादयितुम् अर्हसि। तदानीं यिरिमियः कारागृहे रुद्धो
५ नासीत् स जनानां मध्ये गमागमावकरोत्। फिरौणो बलानि च मि-
सरदेशान्निर्गतान्यासन् तेषां वार्त्ताञ्च निशम्य यिरूशालमवरोधकारिणः
कल्दीयजना यिरूशालमोऽपगता आसन्।

६ ततो भाविवादिनं यिरिमियं प्रति सदाप्रभोरिदं वाक्यं प्रादुर्ब-
७ भूव। इस्रायेल ईश्वरः सदाप्रभुरित्थं ब्रूते यूयं मां प्रष्टुं येन यिहूदी-
यराजेन प्रहितास्तमिदं वदत, पश्यत युष्मत्साहाय्याय फिरौणो यानि
८ बलानि निष्क्रान्तानि तानि स्वदेशं मिसरं पुन र्गमिष्यन्ति। कल्दी-
याश्च प्रत्यावृत्य नगरस्यैतस्य विरुद्धं योत्स्यन्ते तच्च धृत्वा वह्निसात्
९ करिष्यन्ति। सदाप्रभुरित्थं ब्रूते कल्दीयाः सर्व्वथास्मत्तोऽपगमिष्यन्तीति
१० वदन्त आत्मवञ्चनं मा कुरुध्वं यतस्ते नैवापगमिष्यन्ति। परन्तु युष्माभिः
सह युध्यमानानां कल्दीयानां कृत्स्नबलेषु युष्माभि र्हतेषु सत्सु यदि
तेषाम् असिविद्धा नराः शिष्येरंस्तर्हि त एकैकशः स्वपटवेश्मसूत्थाय
नगरमेतद् वह्निसात् करिष्यन्ति।

११ फिरौणो बलानां कारणात् कल्दीयानां बलेषु यिरूशालमः सम्मु-
१२ खात् प्रस्थितेषु यिरिमियो बिन्यामीनदेशं गन्तुं जनानां मध्ये तस्मात्
१३ स्थानाद् अंशमादातुञ्चेच्छन् यिरूशालमो निरगच्छत्। बिन्यामीनीय-
गोपुरे तु तस्मिन्नुपस्थिते हननियस्य पौत्रः शेलिमियस्य पुत्रो यिरिय
इतिनामा यो रक्षिवर्गाधिकारी तत्राविद्यत, स तं जगाद त्वं कल्-
दीयान् आश्रयितुमुद्यत इत्युक्त्वा च तं भाविवादिनं यिरिमियं दधार।
१४ यिरिमियो बभाषे तदसत्यं नाहं कल्दीयान् आश्रयितुमुद्यतोऽस्मि।
स तु तस्य वाक्यं न जग्राह। यिरियेण धृतो यिरिमियश्चाधिपानां सम-
१५ क्षं नीतः। ते चाधिपा यिरिमियाय क्रुद्धा तं ताडयामासुः कारायाः
श्चार्थंतो लेखकस्य योनाथनस्य गृहे च तं निरुरुधुः, यतस्ते तदेव का-
रागृहं कृतवन्तः।

१६ तत् कूपगृहं सङ्कुचितगुहावलिञ्च प्रविष्टेन यिरिमियेण दीर्घकालं
१७ तत्रावस्थितेः परं राजा सिदिकियो जनान् प्रहित्य तम् आनाययामास।

अपरं राजा स्वप्रासादे रहसि तं पप्रच्छ सदाप्रभोः किमपि वाक्यं किं
विद्यते? यिरिमिय आह विद्यते त्वं बाबिलीयराजस्य हस्ते समर्पयि-
ष्यसे। ततः परं यिरिमियः सिदिकियं राजानं जगाद, तव त्वदीय- १८
दासानाम् एतज्जनानाञ्च मया किम् अपराद्धं यत्कृते यूयं मां कारागृहे
निहितवन्तः? बाबिलीयराजो युष्मद्विरुद्धम् एतद्देशस्य च विरुद्धं नैवा- १९
गमिष्यतीति भाविवाणीं ये युष्मान् उक्तवन्तस्ते युष्मदीयभाविवादिनः
कुत्र विद्यन्ते? अधुना भो मत्प्रभो राजन् भवान् शृणोतु भवतः समक्षं २०
ममेयं प्रार्थना निवेद्यतां भवान् मां लेखकस्य योनाथनस्य गृहे पुन र्न
निदधातु तत्र मम मृत्यु र्वा न भवतु। ततो राज्ञः सिदिकियस्यादेशाद् २१
यिरिमियः कारायाः प्राङ्गणेऽरक्ष्यत यावच्च नगरे पूपा निःशेषा नाभवं-
स्तावत् प्रतिदिनं तस्मै पूपकाराणाम् आपणाद् एकैकः पूपोऽदीयत।
इत्थं यिरिमियः कारायाः प्राङ्गणेऽवतस्थे।

---

३८ अष्टत्रिंशोऽध्यायः।

१ मल्कियस्य कारायां यिरिमियस्य समर्पणं ७ एबद्-मेलकेन तन्मुक्तिः १४ राज्ञा साकं सम्भाषणं २४ राजाज्ञया तत्सम्भाषणस्य गोपनञ्च।

अपरं मत्तनसुतः शिफटियः पश्हूरसुतो गिदलियः शेलिमियसुतो १
यिहूखलो मल्कियसुतः पश्हूरश्च सर्व्वजनान् प्रति कथ्यमानानि यिरि-
मियस्यैतानि वाक्यानि शुश्रुवु र्यथा, सदाप्रभुरित्थमाह यो जनो नग- २
रमध्ये स्थास्यति स खड्गक्षुधामारीभि र्मरिष्यति यस्तु कल्दीयान् प्रति
निर्गमिष्यति स जीविष्यति तस्य प्राणाश्च लोप्त्रवत् तस्य भविष्यन्ति
स च जीविष्यति। सदाप्रभुरित्थमाह नगरमिदम् अवश्यं बाबिलीय- ३
राजस्य बलानां करेषु समर्पयिष्यते तैश्च धारिष्यते। अतस्तेऽधिपा ४
राजानम् ऊचुः, नरस्यैतस्य प्राणदण्डो भवतु यतो हेतोरेतादृशवाक्या-
नि भाषमाणः सोऽत्र नगरेऽवशिष्टानां योद्धॄणां हस्तान् सर्व्वजनानाञ्च
हस्तान् शिथिलीकरोति यतो नरोऽयं न जनानां क्षेमाय किन्त्वमङ्ग-
लाय चेष्टते। ततो राजा सिदिकियस्तान् जगाद, पश्यत स युष्माकं ५
हस्तगतोऽस्ति यतो राजा युष्माकं किमपि न प्रभवति। तदा ते यिरि- ६
मियं धृत्वा कारायाः प्राङ्गणे स्थिते राजपुत्त्रस्य मल्कियस्य कूपे निचि-
क्षिपुः। ते रज्जुभि र्यिरिमियं तत्रावरोहयामासुः। कूपे तु तोयं नासीत्
पङ्क एवासीत् यिरिमियश्च तत्र पङ्केऽमज्जत्।

७ ततः परं यिरिमियः कूपे न्यधायीति वार्त्ता राजपूर्य्यां स्थितेन
कूशीय एबद्-मेलक इतिनाम्ना नपुंसकेनाश्रावि तदानीं राजा वि-
८ न्यामीनीयगोपुरे उपविष्ट आसीत्। अत एबद्-मेलको राजप्रा-
९ सादान्निर्गत्य राजानं जगाद, यथा, भो मत्प्रभो राजन् अमी
नरा भाविवादिनं यिरिमियं प्रति यत् कृतवन्तस्तत् सर्व्वं कर्म्म दुष्टं स
तैः कूपे निःक्षिप्तः। स तु स्वस्थाने क्षुधार्त्तो मरणोद्यत आसीत् यतो
१० नगरे भक्ष्यं नावशिष्यते। ततो राजा तं कूशीयम् एबद्-मेलकम्
आदिदेश यथा, त्वम् अतः स्थानात् त्रिंशन्नरान् आदाय भाविवक्तु
११ र्यिरिमियस्य मरणात् पूर्व्वं तं कूपाद् उद्धर। ततः एबद्-मेलकस्तान्
नरान् आदाय राजप्रासादं गत्वा धनागारस्याधो निविश्य जीर्ण-
वस्त्राणि जीर्णपटखण्डांश्च गृहीत्वा रज्जुभिः कूपे यिरिमियस्य समक्षम्
१२ अवतारयामास। स च कूशीय एबद्-मेलको यिरिमियं जगाद त्वम्
एतानि जीर्णवस्त्राण्येतांश्च पटखण्डान् स्वभुजकोटरयो रज्जूनाम् अधो
१३ धत्स्व। यिरिमियेण तथा कृते ते रज्जुभि र्यिरिमियम् उत्कर्षन्तः
कूपाद् उद्दध्रुः। ततः परं यिरिमियः कारायाः प्राङ्गणेऽवतस्थे।
१४ अपरं राजा सिदिकियो दूतं प्रहित्य भाविवादिनं यिरिमियं सदा-
प्रभो र्मन्दिरस्य तृतीयं प्रवेशस्थानं स्वान्तिकम् आनाययामास। तत्र च
राजा यिरिमियं जगाद, अहं त्वाम् एकां कथां प्रक्ष्यामि त्वं मत्तः कि-
१५ मप्यपह्नोतुं नार्हसि। ततो यिरिमियः सिदिकियं जगाद, यद्यहं त्वां
ज्ञापयामि तर्हि त्वं मां किं न हनिष्यसि? यदि च तुभ्यं मन्त्रं ददामि
१६ तर्हि त्वं मम वाक्ये मनो नावधास्यसे। तदा राजा सिदिकियो रहसि
यिरिमियाय दिव्येन प्रतिशुश्राव यथा, अस्मत्प्राणानां स्रष्टा सदा-
प्रभु र्यदि जीवति तर्ह्यहं त्वां न हनिष्यामि न च त्वत्प्राणनाशार्थिनाम्
१७ अमीषां नराणां करेषु त्वां समर्पयिष्यामि। ततो यिरिमियः सिदि-
कियं जगाद, इस्रायेल ईश्वरो वाहिनीनाम् ईश्वरः सदाप्रभुरित्थमाह,
यदि त्वं बाबिलीयराजस्य मुख्यनराणाम् अन्तिकं निर्गच्छसि तर्हि तव
प्राणा जीविष्यन्ति नगरीयञ्च वह्निना न धक्ष्यते त्वञ्च सपरिवारो जी-
१८ विष्यसि। यदि तु त्वं बाबिलीयराजस्य मुख्यनराणाम् अन्तिकं न नि-
र्गच्छसि तर्हि नगरीयं कल्दीयानां करेषु समर्पयिष्यते तै र्वह्निसात्
१९ कारिष्यते च त्वमपि तेषां करेभ्यो न रक्षिष्यसे। पुनश्च राजा सिदि-
कियो यिरिमियं जगाद, ये यिहूदीयजनाः कल्दीयान् आश्रितवन्त-

स्तेभ्योऽहम् उद्विजे तेषां करेषु चेत् समर्प्येय तर्हि ते माम् आह्लारयि-
ष्यन्ति। यिरिमियो जगाद, त्वं न समर्पयिष्यसे। अहं त्वां यद् व्याह- २०
रामि तत्र सदाप्रभो र्वाक्ये त्वमवधातुम् अर्हसि तथा कृते तव मङ्गलं
सम्भविष्यति त्वत्प्राणाश्च जीविष्यन्ति। यदि तु त्वं निर्गन्तुम् असम्मतो २१
भवसि तर्हि सदाप्रभुनाहं यद् वचो ज्ञापितस्तत् शृणु। पश्य यिहूदी- २२
यराजप्रासादेऽवशिष्टाः सर्व्वा योषितो वहि र्बाबिलीयराजस्य मुख्य-
नराणां समीपं नायिष्यन्ते वाक्यमिदञ्च वक्ष्यन्ति,

तव ये बन्धवस्ते त्वां प्रलोभ्य प्राभवंस्तव।
पङ्के त्वच्चरणौ मग्नौ तेऽपक्रान्ताः पराङ्मुखाः॥

सकला एव तव भार्य्या तव सन्तानाश्च वहिः कल्दीयानां समीपं २३
नायिष्यन्ते त्वमपि तेषां करेभ्यो न रक्षिष्यसे किन्तु बाबिलीयराजस्य
हस्तेन धारिष्यसे नगरमिदञ्च वह्निसात् कारयिष्यसि।

ततः परं सिदिकियो यिरिमियं जगाद, कोऽप्येताः कथा न जानातु २४
तेन त्वं न मरिष्यसि। त्वया सार्द्धमहं सम्भाषितवानिति श्रुत्वा यद्य- २५
धिपास्त्वाम् उपागत्य वदेयुः, राजा तुभ्यं किं कथितवांस्तदस्मान् ज्ञा-
पय किमप्यस्मत्तोऽपह्नोतुं नार्हसि तेनास्माभि र्न घानिष्यसे, अतो राजा
त्वां किं गदितवानिति, तर्हि त्वं तान् वद योनाथनस्य गृहेऽहं यत्पुन र्न २६
नीयेय तत्र न म्रियेय च तदर्थं मम प्रार्थनां राज्ञः समक्षं निवेदितवान्।
ततः परमधिपा यिरिमियम् उपागत्य पप्रच्छुः स तु राज्ञ आदेशात् २७
तानि सर्व्वाणि वाक्यानीवोत्तरं तेभ्यो ददौ, अतः सा वार्त्ता नाश्रावि
तस्मात् ते तत्सम्भाषणान्निवृत्ताः। अपरं यिरूशालमो धरणदिनं यावद् २८
यिरिमियः कारायाः प्राङ्गणेऽवतस्थे। यदा च यिरूशालम् अध्रियत
तदा स तत्रासीत्।

---

३९ ऊनचत्वारिंशोऽध्यायः।

१ यिरूशालमः पराजयः ४ सिदिकियस्य नेत्रान्धता बाबिलं तस्य नयनं ८ पुरदाहो लोकानां नयनं ११ यिरिमियमधि निबूखद्नित्सरस्याज्ञा १५ एबद्-मेलकमधि परमेश्वरस्य प्रतिज्ञा च।

यिहूदीयराजस्य सिदिकियस्य राजत्वस्य नवमवत्सरस्य दशममासे १
बाबिलीयमहीपति र्निबूखद्नित्सरस्तस्य निखिलसैन्यानि च यिरूशा-
लमो विरुद्धं समेत्य तद् अवरुरुधुः। अपरं सिदिकियस्य राजत्वस्यैका- २

३ दशवत्सरस्य चतुर्थमासस्य नवमदिने नगरं भग्नतां जगाम। ततो बाबि-
लीयराजस्य सर्व्वे मुख्यनरा अर्थतो नेर्गल-शरेत्सरः सम्गर-निबु र्नषूं-
सकानाम् अध्यक्षः सरसिखीमो गणकानाम् अध्यक्षो नेर्गल-शरेत्सरो
बाबिलीयराजस्यावशिष्टाश्च सर्व्वे मुख्यनरा प्रविश्य मध्यमे पुरद्वार
उपविविशुः।
४ तांस्तु निरीक्ष्य यिहूदीयराजः सिदिकियः सर्व्वे योद्धारश्च निशायां
पलाय्य राजोद्यानस्य मार्गेण द्वयोर्भित्त्यो र्द्वारेण नगरान्निष्क्रम्य प्रा-
५ न्तरगामिनं पन्थानं जग्मुः। परन्तु कल्दीयानां बलानि तेषां पश्चाद्
धावित्वा यिरीहोः प्रान्तरे तान् प्रापुस्तञ्च धृत्वा हमातदेशस्थरिब्लां बा-
बिलीयराजस्य निबूखद्नित्सरस्यान्तिकं निन्युः स च तस्य विचारनिष्पत्तिं
६ चकार। ततो बाबिलीयराजो रिब्लायां सिदिकियस्य समक्षं तस्य
७ तनयान् घातयामास। स बाबिलीयराजो यिहूदायाः सर्व्वकुलीना-
नपि घातयामास सिदिकियस्य लोचने चोत्पाट्य बाबिलम् अपनयनार्थं
पित्तलीयनिगडैस्तं बन्धयामास।
८ कल्दीयाश्च राजप्रासादं जनपदानां वासस्थानञ्च वह्निना दाहया-
९ मासु र्यिरूशालमः कृत्स्नप्राचीरञ्च भूमिसाच्चक्रुः। शेषजनाश्चार्थतो
नगरेऽवशिष्टा ये च तमाश्रितवन्तस्ते पलायिता जना ये चापरे-
ऽवशिष्यन्त ते सर्व्व एव शेषजना रक्षकसेनाध्यक्षेण निबूषरदनेन
१० बाबिलं प्रवासयाञ्चक्रिरे। परन्तु येषां किञ्चन नासीत् तादृशाः
कतिपया दुर्गतजनास्तेन रक्षकसेनाध्यक्षेण निबूषरदनेन यिहूदादेशे
शेषयाञ्चक्रिरे तस्मिन् दिने च तेभ्यो द्राक्षोद्यानानि क्षेत्राणि च
ददिरे।
११ अपरं यिरिमियमधि बाबिलीयराजो निबूखद्नित्सरो रक्षकसेना-
१२ ध्यक्षं निबूषरदनम् इदम् आदिदेश, त्वं तं गृहाण तस्मिंश्च स्वदृष्टिं
निधत्स्व तस्य किमप्यहितं मा कुरु, परन्तु स त्वां यद् वदिष्यति तदेव तं
१३ प्रत्याचर। ततो रक्षकसेनाध्यक्षो निबूषरदनो नपुंसकाध्यक्षो निबूषस्-
बनो गणकाध्यक्षो नेर्गल-शरेत्सरो बाबिलीयराजस्य सर्व्वे मुख्यनराश्च
१४ जनान् प्रेषयामासुः। प्रहित्य च कारायाः प्राङ्गणाद् यिरिमियम् उद्धृत्य
गृहं नयनार्थं शाफनपौत्रस्याहीकामपुत्रस्य गिदलियस्यान्तिकम् उप-
स्थापयामासुस्ततः स जनानां मध्येऽवसत्।
१५ कारायाः प्राङ्गणे यिरिमियस्यावस्थितिकाले सदाप्रभोरिदं वाक्यं

यिरिमियं प्रति प्रादुर्बभूव, त्वं गत्वा कूशीयम् एबद-मेलकं वद, इस्रा- १६
येल ईश्वरो वाहिनीनां सदाप्रभुराह, पश्याहममङ्गलाय न च मङ्ग-
लाय नगरेऽस्मिन् मम वाक्यानि सफलीकरिष्यामि तस्मिन् दिने तानि
त्वत्समक्षं सिद्धिं यास्यन्ति। त्वान्तु तस्मिन् दिने रक्षिष्यामीति सदा- १७
प्रभुराह, येषां भयात् त्वम् उद्विजसे तेषां नराणां करेषु नैव समर्प-
यिष्यसे। अवश्यमहं त्वाम् उद्धरिष्यामि त्वम् असिना न पतिष्यसि तव १८
प्राणाश्च लोप्त्रवत् तव भविष्यन्ति यतस्त्वं मामेव शरणं गत इति सदा-
प्रभुराह।

---

४० चत्वारिंशोऽध्यायः।

१ यिरिमियस्य मुक्ति गिदलियमुपगमनं ७ विकीर्णयिहूदीनां गिदलियसमीपगमनं १३ नियनियस्तुतस्येश्मायेलस्य कुमन्त्रणाया योहाननेन प्रकाशस्तत्र गिदलियस्या-विश्वासश्च।

रक्षकसेनाधिपेन निबूषरदनेन रामातो यिरिमियस्य विसर्जनात् १
परं सदाप्रभो र्यद् वाक्यं यिरिमियं प्रति प्रादुरभूत् तद्वृत्तान्तोऽयं।
यदा स तमासादयत् तदा यिरूशालमो यिहूदादेशस्य च ये सर्व्वे
धृतजनाः प्रवासार्थं बाबिलम् अपानीयन्त तेषां मध्ये स निगडबद्ध
आसीत्। स रक्षकसेनापति र्यिरिमियं गृहीत्वा जगाद, तवेश्वरः २
सदाप्रभुरिदं स्थानमध्येतस्यामङ्गलस्य वाक्यं कथितवान्। सदाप्रभु र्यथा ३
गदितवान् तथैव तद् वर्त्तयामास साधयामास च। यतो युष्माभिः
सदाप्रभो र्विरुद्धं पापं कृत्वा तस्य वाक्येऽवधानं न कृतं ततो युष्माक-
मियं दशाभवत्। अधुना पश्याहम् अद्य त्वत्करस्थनिगडेभ्यस्त्वां मोचि- ४
तवान्, मया सार्द्धं बाबिलगमनं यदि तुभ्यं रोचते तर्ह्येहि, अहं त्वयि
दृक्पातं करिष्ये, यदि तु मया सार्द्धं बाबिलगमनं तुभ्यं न रोचते
तर्हि निवर्त्तस्व। पश्य कृत्स्नो देशस्त्वत्सम्मुखे स्थितः, यत् स्थानं
गमनाय तव भद्रम् उचितञ्च प्रतिभाति तदेव स्थानं याहि। तच्च तदा- ५
नीमपि न प्रत्यावर्त्तमानं स पुन र्जगाद, शाफनस्य पौत्रोऽहीका-
मस्य पुत्रो यो गिदलियो बाबिलीयराजेन यिहूदादेशस्य नगरे-
ष्वधिकृतस्तत्समीपं वा याहि जनानां मध्ये च निवस यत् किञ्चन
स्थानं वा गमनाय तवोचितं प्रतिभाति तत् स्थानं याहि। अपरं स
रक्षकसेनाध्यक्षस्तस्मै पाथेयम् उपहारञ्च दत्त्वा तं विससर्ज। ततो ६

यिरिमियो मिष्पाम् अहीकामसुतस्य गिदलियस्यान्तिकं गत्वा तस्य
सङ्गे देशेऽवशिष्टानां जनानां मध्येऽवसत्।
७ अपरं बाबिलीयराजो ऽहीकामसुतं गिदलियं देशेऽधिकृतवान् ये
च जना बाबिलि प्रवासार्थं नापनीतास्तेषां मध्यात् तेन सार्द्धम् अव-
स्थित्यर्थं पुरुषान् योषितो बालकांश्च देशस्थान् कतिपयदुर्गतजनांश्च
८ नियुक्तवान् इति वार्त्ता क्षेत्रस्थैः सेनाध्यक्षैस्तेषां नरैश्चाश्रावि। तदानीं
ते ऽर्थतो निथनियसुत इस्मायेलः कारेहस्य सुतौ योहाननो योनाथनश्च
तन्हूमतसुतः सिरायो निटोफातीयस्यैफेः सुता माखातीयसुतो यिष-
नियश्चेमे स्वनरैः सहिता मिष्पां गिदलियस्य समीपम् उपतस्थुः।
९ ततः शाफनस्य पौत्रोऽहीकामस्य पुत्रो गिदलियः शपथेन तान् तेषां
नरांश्च जगाद कल्दीयानां सेवनान्मा बिभीत यूयमत्र देशे वसन्तो
१० बाबिलीयराजं सेवध्वं तेन युष्माकं मङ्गलं भविष्यति। पश्यताहम् अ-
स्मत्समीपम् आगच्छतः कल्दीयान् परिचरितुं मिष्पायां वत्स्यामि।
यूयन्तु द्राक्षारसं फलानि तैलञ्च संगृह्य पात्रेषु निधाय युष्मद्धृतनग-
११ रेषु वसत। बाबिलीयराजेन यिहूदायाः कतिपयशेषजना रक्षिताः शा-
फनपौत्रो ऽहीकामपुत्रो गिदलियस्तेष्वधिकृतश्चेति वार्त्ता यदा मोयाबे
ऽम्मोनवंशस्य मध्य इदोमे ऽन्यान्यदेशेषु च प्रवासिभिः सर्व्वै र्यिहूदीयैर-
१२ श्रावि, तदा तेऽपि सर्व्वे यिहूदीया येषु स्थानेषु विकीर्णा आसंस्तेभ्यः
प्रत्यागत्य यिहूदादेशस्थमिष्पां गिदलियस्य समीपम् उपस्थायातीव प्रा-
चुर्य्येण द्राक्षारसं फलानि च सञ्जगृहुः।
१३ अपरं कारेहस्य पुत्रो योहाननः सर्व्वे च क्षेत्रस्थसेनाध्यक्षा मिष्पां
१४ गिदलियस्य समक्षम् आगत्य तं जगदुः, निथनियसुत इस्मायेलस्त्वत्प्रा-
णाघातायाम्मोनवंशस्य राज्ञा बालीषेण प्रहितस्तत् त्वया किं ज्ञा-
१५ यते? अहीकामसुतो गिदलियस्तु तेषां वाक्यमसत्यं मेने। परन्तु का-
रेहस्य पुत्रो योहाननो मिष्पायां गिदलियं रहसि जगाद, भवतोऽनु-
मत्याहं गत्वा तं निथनियसुतम् इस्मायेलं हनिष्यामि कोऽपि तन्न
ज्ञास्यति भवान् कुतस्तेन हन्येत भवत्समीपं समागताः सर्व्वे यिहू-
१६ दीयाः किमर्थं विकीर्य्येरन् यिहूदायाः शेषजनाश्च कुतो नश्येयुः? अही-
कामसुतो गिदलियस्तु तं कारेहसुतं योहाननं जगाद, तत् कर्म्म मा
कार्षीरिस्मायेलमधि त्वं यद् वदसि तन्न सत्यं।

४१ एकचत्वारिंशोऽध्यायः।

१ इश्मायेलेन गिदलियादिजनानां वधः शेषजनान् आदायाम्मोनीयानां समीपं यातुं यात्रा ११ कारेहसुतेन योहाननेन तस्य कराद् अवशिष्टान् जनान् उद्धृत्य कल्दीयेभ्यो भयात् मिसरदेशं यातुम् उपक्रमश्च।

अपरं सप्तममासे राजामात्यानां मध्ये गणित इलीशामापौत्त्रो नि- १
थनियपुत्त्रः स राजवंशोद्भव इश्मायेलस्तेन सार्द्धं दशनराश्च मिष्पां गि-
दलियस्य समीपम् आजग्मुस्तत्र मिष्पायाञ्चैकत्राहारं चक्रिरे। अनन्तरं २
निथनियसुत इश्मायेलस्तत्सङ्गिनो दशजनाश्चोत्थाय शाफनस्य पौत्त्रम्
अहीकामस्य पुत्त्रं गिदलियम् असिना जघ्नुः। इत्थं यो नरो बाबिली-
यराजेन देशेऽधिकृतस्तं स (इश्मायेलो) मारयामास। यावन्तश्च यिहू- ३
दीया मिष्पायां तेन गिदलियेन सार्द्धम् आसन् ये च कल्दीययोद्धार-
स्तत्राविद्यन्त तान् स इश्मायेलो जघान। गिदलियस्य हननात् परं द्वि- ४
तीयदिने यदा कोऽपि तन्नाजानात्, तदा शिखिमात् शीलोतः शमरो- ५
णाच्च छिन्नश्मश्रवो विदीर्णवस्त्रा अस्त्राहताङ्गाश्चाशीतिनरा आजग्मुः
सदाप्रभो र्मन्दिरं नयनार्थं तेषां करेषु भक्ष्यनैवेद्यं धूपश्चासीत्। तदा ६
निथनियस्य पुत्त्र इश्मायेलस्तान् प्रत्युद्गन्तुं मिष्पातो निश्चक्राम गमन-
काले च नित्यं रुरोद तेषां समीपमुपस्थाय च तान् जगाद यूयम् अ-
हीकामपुत्त्रस्य गिदलियस्य समीपम् आगच्छत। तेषु तु नगरं प्रविश्य ७
तन्मध्यस्थान उपस्थितेषु निथनियसुत इश्मायेलस्तदीयसङ्गिनश्च तान्
मारयामासुः कूपमध्यं निचिक्षिपुश्च। तेषां मध्ये तु दशजना अविद्यन्त, ८
त इश्मायेलमूचुः, अस्मान् मा जहि यतः क्षेत्रेऽस्माकं गूढानि गोधूम-
यवतैलमधुधनानि विद्यन्ते ततः स निवृत्य तेषां भ्रातॄणां मध्ये तान् न
मारयामास। गिदलियस्याधीनान् तान् नरान् हत्वा तेषां शवान् इ- ९
श्मायेलो यस्य कूपस्य मध्यं निचिक्षेप स इस्रायेलीयराजस्य वाशाः भ-
याद् आसाराजेन कृतः कूप आसीत्, निथनियसुत इश्मायेलस्तमेव
हतानां देहैः पूरयामास। अपरम् इश्मायेलो मिष्पायां विद्यमानान्
सर्व्वान् शेषजनान् दासत्वायापनिनाय, अर्थतो या राजदुहितरो मि- १०
ष्पायाम् अवशिष्टा अपरे च यावन्तो जना रक्षकसेनाध्यक्षेण निबूषर-
दनेनाहीकामसुतस्य गिदलियस्याधीनत्वे नियुक्ता आसन् तान् सर्व्वान्
निथनियसुत इश्मायेलो दासत्वार्थम् अपनीयाम्मोनवंशीयानां सन्निधिं
गन्तुं प्रतस्थे।

११ निथनियसुतेनेश्मायेलेन हतस्य सर्व्वदुष्कर्म्मणो वार्त्तायां कारेह-
१२ सुतेन योहाननेन तत्सङ्गिभिः सर्व्वैः सेनाध्यक्षैश्च श्रुतायां ते सर्व्व-
नरान् आदाय निथनियसुतेनेश्मायेलेन सार्द्धं योधनार्थं निष्क्रम्य
१३ गिबियोनस्थस्य वृहज्जलाशयस्य समीपं तम् आसादयामासुः। ततो
ये सर्व्वे जना इश्मायेलेन सार्द्धम् आसन् ते कारेहसुतं योहाननं तत्स-
१४ ङ्गिनश्च सर्व्वान् सेनाध्यक्षान् दृष्ट्वा हर्षं गताः। इश्मायेलेन मिष्पातो
दासत्वार्थम् अपनीताश्च ते सर्व्वे जना वक्रमार्गेण परावृत्य कारेहसुतस्य
१५ योहाननस्यान्तिकम् आजग्मुः। निथनियसुत इश्मायेलस्त्वष्टभि र्नरैः
सहितः योहाननस्य सम्मुखात् पलाय्याम्मोनवंशीयानां देशं जगाम।
१६ इत्थम् अहीकामसुतस्य गिदलियस्य वधात् परं मिष्पातो ऽपगतस्य
निथनियसुतस्येश्मायेलस्य कराद् अवशिष्टजनान् उद्धृत्य कारेहसुतो
योहाननस्तत्सङ्गिनः सर्व्वे सेनाध्यक्षाश्च तान् अर्थतो गिबियोनात्
१७ पुनरानीतान् योद्धॄन् नरान् योषितो बालकान् नपुंसकांश्चादाय
वैत्लेहमपार्श्वस्थं किम्हमस्य पथिकाश्रमं गत्वा कल्दीयानां सम्मुखात्
१८ मिसरदेशं प्रवेष्टुं जिगमिषवस्तत्रावतस्थिरे। यतो बाबिलीयराजेन
देशेऽधिकृतस्याहीकामसुतस्य गिदलियस्य निथनियसुतेनेश्मायेलेन हन-
नात् ते कल्दीयेभ्यो बिभ्युः।

---

४२ द्वाचत्वारिंशोऽध्यायः।

१ ईश्वरे प्रार्थयितुं यिरिमियं प्रति योहाननस्य निवेदनम् ईश्वराज्ञयाचरितुम् अङ्गीकारः ७ यिहूदादेशेऽवस्थिति र्मङ्गलावहेत्युत्तरं १३ मिसरदेशयाने नाशो भावीतीश्वरोत्तरं १९ कापट्यात् तान् प्रति यिरिमियस्य तिरस्क्रिया च।

१ ततः परं कारेहसुतो योहाननो होशयियसुतो यिषनियः सर्व्वे
२ सेनाध्यक्षाः क्षुद्रमहान्तश्च सर्व्वे जना उपागम्य भाववादिनं यिरिमि-
यमूचुः, अस्माकं निवेदनं त्वदन्तिकं ग्राह्यं भवतु, त्वमस्मत्कृतेऽर्थतः सर्व्वे-
षाम् एतेषां शेषजनानां कृते निजेश्वरं सदाप्रभुम् उद्दिश्य प्रार्थनां कुरु,
यतो वयं बहव आस्म परन्त्वधुनाल्पेऽवशिष्टास्तत् त्वया प्रत्यक्षं दृश्यते।
३ अतस्तवेश्वरः सदाप्रभुरस्मान् गन्तव्यं मार्गं कर्त्तव्यं कर्म्म च ज्ञापयतु।
४ तदा भाववादी यिरिमियस्तान् जगाद पश्यत युष्मद्वाक्यादहं युष्मदीश्वरं
सदाप्रभुम् उद्दिश्य प्रार्थनां करिष्यामि तदुत्तररूपञ्च यद्यद् वचः स मां

गदिष्यति तद् युष्मान् ज्ञापयिष्यामि, युष्मत्तः किमपि वाक्यं नापक्षोष्ये।
ततस्ते यिरिमियम् ऊचुः, अद्य सदाप्रभुरस्माकं सत्यो विश्वस्तश्च साक्षी ५
भवतु। तवेश्वरः सदाप्रभु र्यद्यद् वाक्यं त्वयास्मत्समीपं प्रहेष्यति तद-
नुयायि कर्म्म वयम् अवश्यं करिष्यामः। भद्रं भवेदभद्रं वा भवेत्, ६
यस्यान्तिकं वयं त्वां प्रेषयामस्तस्य त्वदीयेश्वरस्य सदाप्रभो र्वाक्ये वयम्
अवधानं करिष्यामस्तथा कृतेऽस्मदीश्वरस्य सदाप्रभो र्वाक्येऽवधाना-
दस्माकं मङ्गलं सम्भविष्यति।

अपरं दशदिनेष्वतीतेषु सदाप्रभो र्वाक्यं यिरिमियस्य समीपम् उ- ७
पतस्थौ। तदा स कारेहसुतं योहाननं तत्सङ्गिनः सर्व्वान् सेनापतीन् ८
क्षुद्रमहतः सर्व्वजनांश्चाह्वाययामास। तांश्च जगाद, युष्माकं साध्य- ९
साधनं निवेदयितुं यस्यान्तिकमहं युष्माभिः प्रहित इस्रायेल ईश्वरः
स सदाप्रभुरित्थं ब्रूते, यदि यूयं पुनर्व्वारम् एतस्मिन् देशे वसतिं कुरुथ १०
तर्ह्यहं युष्मान् नैव संहृत्य वर्द्धयिष्यामि नैव चोत्पाद्य रोपयिष्यामि
यतो युष्माकं यद् अमङ्गलं मया कृतं तत्र ममानुतापो जातः। यूयं बा- ११
बिलीयराजान्मा बिभीत, यूयं तस्माद् भीताः, सदाप्रभुस्तु ब्रूते तस्मान्मा
बिभीत, यतो युष्माकं परित्राणाय तस्य कराद् उद्धरणाय चाहमेव
युष्माकं सहायोऽस्मि। अहं युष्मान् अनुकम्पाभाजनानि करिष्यामि १२
ततो हेतोः स युष्मान् अनुकम्पिष्यते युष्मद्देशञ्च पुनः प्रापयिष्यति।

वयम् अत्र देशे न वत्स्याम इत्युक्त्वा यदि यूयं स्वीयेश्वरस्य सदाप्रभो १३
र्वाक्येऽवधानं कर्त्तुम् अनिच्छवो वदथ, तन्न करिष्यामः, वयं मिसर- १४
देशं प्रवेक्ष्यामस्तत्रास्माकं युद्धदर्शनं तूर्य्यश्रवणम् अन्नाभावात् क्षुधा वा
न सम्भविष्यति वयं तत्रैव निवत्स्याम इति, तर्हि हे यिहूदायाः १५
शेषजना यूयं सदाप्रभो र्वाक्यं शृणुत, इस्रायेल ईश्वरो वाहिनीनां
सदाप्रभुरित्थमाह, यूयं चेन्मिसरदेशं प्रवेष्टुम् उन्मुखीभूय प्रवासार्थं
तं प्रविशेत, तर्हि यस्माद् बिभीथ सोऽसिस्तत्र मिसरदेशे युष्मान् प्रा- १६
प्स्यति यस्याश्च त्रस्यथ सा क्षुधा मिसरे युष्मासासञ्जिष्यते तत्र च युष्माकं
मृत्यु र्भविष्यति। यावन्तश्च नराः प्रवासार्थं मिसरं प्रवेष्टुम् उन्मुखास्ते १७
तत्रैवासिक्षुन्मारीभि र्मरिष्यन्ति, तेषु च मया यद् अमङ्गलं वर्त्तयिष्यते
तत्कारणात् तेषां रक्षितः पलायितो वा कोऽपि नावशेक्ष्यते। यत १८
इस्रायेल ईश्वरो वाहिनीनां सदाप्रभुरित्थमाह, यिरूशालम्निवासिषु
यथा मम कोपो रोषश्चावतारितस्तथैव मिसरं प्रविष्टेषु युष्मासु मम

रोषोऽवतारयिष्यते, यूयञ्च शापोच्छेदाभिसम्पातलज्जास्पदानि भविष्यथ
स्थानमिदञ्च पुन र्न द्रक्ष्यथ।
१९ हे यिहूदायाः शेषजनाः, युष्मानधि सदाप्रभुराह, यूयं मिसरदेशं
२० मा प्रविशतेत्यहमद्य युष्मान् दृढोक्त्यादिशामि तन्निश्चितं जानीत। यतो
यूयं स्वप्राणानां हानये चञ्चला भवथ, फलतस्त्वम् अस्मत्कृतेऽस्मदीश्वरं
सदाप्रभुम् उद्दिश्य प्रार्थनां कुरु, यद्यच्चास्माकम् ईश्वरः सदाप्रभु र्वदि-
ष्यति तद् अस्मान् ज्ञापय, वयं तथैव करिष्याम इत्युक्त्वा यूयं मां युष्मदी-
२१ येश्वरस्य सदाप्रभोः समीपं प्रहितवन्तः। अद्य तु मयि युष्मान् ज्ञापि-
तवति यूयं स्वीयेश्वरस्य सदाप्रभो र्वाचि मया प्रेरितायाञ्चैकस्यामप्या-
२२ ज्ञायाम् अवधानं न कुरुथ। अतोऽधुना निश्चितं जानीत यूयं प्रवासार्थं
यत् स्थानं प्रवेष्टुं प्रवृत्तमनसस्तत्रासिक्षुन्मारीभि र्मरिष्यथ।

---

४३ त्रिचत्वारिंशोऽध्यायः।

१ योहाननेन यिरिमियस्य वाक्यमवमन्य तस्य शेषयिहूदीयानाञ्च मिसरमपनयनं
८ बाबिलो राज्ञा मिसरदेशः पराजायिष्यते इति यिरिमियस्य भविष्यद्वाक्यञ्च।

१ जनान् प्रति तेषाम् ईश्वरस्य सदाप्रभो र्वाक्यानाम् अर्थतस्तेषाम्
ईश्वरः सदाप्रभु र्यिरिमियेण तान् प्रत्येतानि यानि प्रहितवान् तेषां
२ सर्व्वेषां वाक्यानां कथने यिरिमियेण समापिते होशयियसुतोऽसरियः
कारेहसुतो योहाननोऽपरे च दुःसाहसिनः सर्व्वे नरा यिरियिममूचुः,
त्वं मृषावाक्यं भाषसे प्रवासार्थं मिसरदेशो युष्माभि र्न प्रवेष्टव्य इति
३ वाक्यम् अस्मदीश्वरः सदाप्रभुस्त्वया न प्रहितवान्, परन्त्वस्माकं हत्यार्थं
बाबिलं दासवद् अपनयनार्थञ्च कल्दीयानां करेष्वस्मान् समर्पयितुम्
४ इच्छु र्नेरियसुतो बारूकस्त्वां प्रलोभितवानिति। अतो यिहूदादेशे-
ऽवस्थितये सदाप्रभो र्वाक्यं कारेहसुतेन योहाननेन सर्व्वसेनाध्यक्षैः सर्व्व-
५ जनैश्च न जगृहे। परन्तु सर्व्वेषां परजातीयानां मध्ये विकीर्णा ये यिहू-
दीयाः शेषजना यिहूदादेशे प्रवासार्थं तेषां मध्यात् प्रत्यागता आसन्
६ कारेहसुतो योहाननः सर्व्वे सेनाध्यक्षाश्च तान् सर्व्वान् शेषजनान्
अर्थतो नरान् योषितो बालकान् राजपुत्रीः शाफनपौत्रस्याहीकाम-
पुत्रस्य गिदलियस्य सङ्गे रक्षकसेनाध्यक्षेण निबूषरदनेन निहितान्
७ सर्व्वप्राणिनो भाववादिनं यिरिमियं नेरियसुतं बारूकञ्चादाय सदाप्रभो
र्वाक्येऽनवधानात् मिसरदेशं प्रविविशुस्तफनहेषञ्च प्रापुः।

तत्र तफन्हेषे सदाप्रभोरिदं वाक्यं यिरिमियं प्रति प्रादुरभूत्, त्वं ८
करेण कतिपयान् वृहत्प्रस्तरान् आदाय तफन्हेषस्थराजप्रासादस्य ९
प्रवेशस्थान इष्टकाचितिसन्निधाने लेपनीयचूर्णमध्ये यिहूदीयनराणां
साक्षान्निगूह, तांश्च वद, इस्रायेल ईश्वरो वाहिनीनां सदाप्रभुरित्थमाह, १०

पश्यतानाययिष्याम्यहं दूतैः स्वीयसेवकं।
बाबिलीयमहीपालं निबूखद्रिस्सराभिधं॥
एतेषां मन्निगूढानाम् उपरिष्टान्महाश्मनां।
मया सिंहासनं तस्य राज्ञः संस्थापयिष्यते।
एतेषामुपरिष्टात् स स्ववितानं तनिष्यति॥
आगत्य मिसरं देशं स तदा दण्डयिष्यति। ११
स मृत्यो र्भोजनं मृत्यौ खड्गे खड्गस्य भाजनं।
प्रवासे च प्रवासस्य पात्रं समर्पयिष्यति॥
मिस्रीयदेवगेहेषु वह्निं प्रज्वलयाम्यहं। १२
तेन स तानि सन्दाह्य देवान् प्रवासयिष्यति॥
विवर्त्तयति यद्वच्च स्ववस्त्रं मेषपालकः।
स इमं मिसरं देशं तद्वद् विवर्त्तयिष्यति।
तन्मध्याच्च पुनर्व्वारं कुशलं निष्क्रमिष्यति॥ १३
स्तम्भान् मिसरदेशस्थसूर्य्यपूर्य्याः स भङ्क्ष्यति।
मिस्रीयदेवगेहानि वह्निसाच्च करिष्यति॥

---

४४ चतुश्चत्वारिंशोऽध्यायः।

१ देवपूजाहेतो यिहूदाया विनाशस्य भावोक्तिः ११ मिसरदेशे प्रवासिनो जनानधि भावोक्तिः १५ यिहूदीयानां मनःकाठिन्यं २० तस्माद् यिरिमियेण तेषां तिरस्करणं २४ सर्व्वान् प्रति पुनस्तिरस्करणं २९ मिसरदेशस्य राज्ञो रिपुकरे समर्पणसूचका भावोक्तिश्च।

मिग्दोल-तफन्हेष-नोफ-पथ्रोष-देशनिवासिनो ये सर्व्वे यिहूदीय- १
जना मिसरदेशे न्यवसन् तानधीदं वाक्यं यिरिमियं प्रति प्रादुरभूत्,
यथा, इस्रायेल ईश्वरो वाहिनीनां सदाप्रभुरित्थं भाषते, यिरूशालमि २
यिहूदादेशस्य सर्व्वनगरेषु च यत् कृत्स्नम् अमङ्गलं मया वर्त्तितं तद्
यूयं दृष्टवन्तः, पश्यत तान्यद्योच्छिन्नानि विद्यन्ते कोऽपि तत्र न निव-
सति। तत्कारणं मत्क्रोधनार्थं तेषां कृतं कदाचरणं, फलतस्ते यूयं ३

युष्मत्पितामहाश्च यान् न ज्ञातवन्तस्तेषाम् इतरदेवानां सेवनाय ता-
४ नुद्दिश्य धूपदाहनाय च ते गताः। मया चातन्द्रिणा स्वीयदासान् स-
र्व्वान् भाववादिनो युष्मदन्तिकं प्रहित्यावादि, यूयं मया गर्हितम् एतद्
५ घृण्यं कर्म्म मा कुरुतेति। ते त्वितरदेवानुद्दिश्य धूपदाहनादिकदाचा-
६ रान्निवर्त्तनाय न शुश्रुवुः कर्णपातञ्च न चक्रिरे। तस्मान्मम रोषः कोप-
श्चावतारितो यिहूदाया नगरेषु यिरूशालमश्च मार्गेषु प्रज्वलितश्च तत-
७ स्तान्युच्छिन्नानि ध्वंसितानि चाभवन् अद्यापि च सन्ति। अतोऽधुनेस्रा-
येल ईश्वरो वाहिनीनाम् ईश्वरः सदाप्रभुरित्थमाह, युष्माकं कोऽपि शेषो
यथा न रक्ष्येत तथैव यिहूदाया मध्यान्नरनारीबालकस्तन्यपायिशि-
शून् छेदयितुं कुतो यूयं स्वप्राणानां विरुद्धम् एतां महतीं दुष्क्रियां
८ कुरुथ? कुतः स्वहस्तानां क्रियाभि र्मां कोपयथ, प्रवासार्थञ्च यत्रागताः
स्थ तस्मिन् मिसरदेशे किमर्थम् इतरदेवान् उद्दिश्य धूपं दाहयथ?
अनेन युष्माकम् उच्छेदः सम्भविष्यति यूयञ्च पृथिव्याः सर्व्वजातीनां शाप-
९ निन्दास्पदानि भविष्यथ। यिहूदादेशे यिरूशालमो मार्गेषु च या अ-
क्रियन्त ता युष्मत्पितृणां दुष्क्रिया यिहूदीयराजानाञ्च दुष्क्रियास्त-
दीययोषिताञ्च दुष्क्रिया युष्माकञ्च दुष्क्रिया युष्मद्भार्य्याणाञ्च दुष्क्रिया
१० यूयं किं विस्मृतवन्तः? इमेऽद्यापि न चूर्णा न वा भीताः, युष्मत्समक्षं
युष्मदीयपूर्व्वपुरुषाणाञ्च समक्षं मया या स्थापिता मम तां व्यवस्थां
तान् विधींश्च नैवाचरन्ति।

११ अतो हेतोरिस्रायेल ईश्वरो वाहिनीनां सदाप्रभुरित्थमाह, पश्यता-
हम् अमङ्गलाय कृत्स्नयिहूदाया उच्छेदाय च युष्मासु स्थिरदृष्टिं करि-
१२ ष्यामि। यिहूदायाश्च ये शेषजनाः प्रवासार्थं मिसरदेशं प्रवेष्टुम् उन्मुखा
अभवंस्तानहम् आदास्ये ते निःशेषं विनंक्ष्यन्ति सर्व्वे च तत्र मिसरदेशे
पतिष्यन्ति क्षुद्रा महान्तश्च खड्गक्षुधाभ्यां निःशेषं विनंक्ष्यन्ति खड्गक्षुधाभ्यां
१३ मरिष्यन्ति शापोच्छेदाभिसम्पातलज्जास्पदानि भविष्यन्ति च। यथा
चाहं यिरूशालमनिवासिनाम् उचितदण्डं कृतवान् तथैवासिक्षुन्मा-
१४ रीभि र्मिसरदेशनिवासिनाम् उचितदण्डं विधास्यामि। मिसरदेशे
प्रवासार्थं तत्प्रविष्टानां यिहूदायाः शेषजनानां पलायितो रक्षितो
वा कोऽपि न भविष्यति, यत्र यिहूदादेशे वासार्थं पुनर्गन्तुं ते मनांसि
प्रवर्त्तयन्ति तत्र कतिपयपलायितजनेभ्योऽपरे केऽपि न परावर्त्तिष्यन्ते।

१५ ततोऽस्माकं योषित इतरदेवानुद्दिश्य धूपदाहं कुर्व्वन्तीत्यभिज्ञाः

सर्व्वे पुरुषास्तत्र दण्डायमानाः सर्व्वा योषितश्च महत्येव सभा मिसर-
पथ्रोष-देशनिवासिनः सर्व्वे जनाश्च यिरिमियम् ऊचु र्यथा, त्वं सदा- १६
प्रभो र्नाम्नास्मान् यद् वाक्यं गदितवान् तव तस्मिन् वाक्ये वयम् अव-
धानं न करिष्यामहे। परन्त्वस्माकं वक्त्राद् यद्यन्निःसृतं तत्तद्वाक्यानु- १७
यायि कर्म्मावश्यं करिष्यामोऽर्थतो व्योमराज्ञीम् उद्दिश्य धूपदाहं पेयनैवे-
द्यदानञ्च करिष्यामः, यतो यिहूदादेशस्य नगरेषु यिरूशालमो मार्गेषु
चास्माभिरस्मदीयपितृभीराजभि र्मुख्यनरैश्च तदेवाक्रियत तदा पूपैस्तृ-
प्तानाम् अस्माकं मङ्गलमासीत् दृष्टिपथे किमप्यमङ्गलं नाविद्यत। यस्मिन् १८
काले तु वयं तां व्योमराज्ञीम् उद्दिश्य धूपदाहनात् पेयनैवेद्यदानाच्च
निवृत्तास्तमारभ्यास्माकं सर्व्वस्याभावो जातो वयञ्चासिक्षुधाभ्यां क्षीया-
महे। परन्तु वयं चेद् व्योमराज्ञीम उद्दिश्य धूपदाहं पेयनैवेद्यञ्च कृत- १९
वत्यस्तर्हि किम् अस्मत्पतीनां साहाय्यं विना ताम् उद्दिश्यास्माभिः पूपान्
निर्म्माय तस्याः प्रतिमाः कल्पितास्तस्यै पेयनैवेद्यानि च दत्तानि ?
ये पुरुषा या योषितः सर्व्वे च ये जना यिरिमियाय तदुत्तरं दत्तव- २०
न्तस्तान् सर्व्वान् जनान् स जगाद, यिहूदाया नगरेषु यिरूशालमो मा- २१
र्गेषु च यद् धूपदाहनं युष्माभि र्युष्मत्पितृभि र्युष्माकं राजभि र्युष्माकं
मुख्यनरै र्देशवासिजनैश्च कृतं तदेव सदाप्रभुः किं न स्मृतवान्? तदेव
च किं न तस्य चित्त उदितं? युष्माकं क्रियाणां दुष्टता युष्मदनुष्ठितो २२
गर्हणीयाचारश्च सदाप्रभुना सोढुं नाशक्यत तस्माद् अद्य यथास्ति तथा
युष्माकं देश उच्छिन्नो विनष्टः शप्तो निवासिवर्ज्जितश्च जातः। यूयं धूप- २३
दाहं कृतवन्तः सदाप्रभोः प्रातिकूल्येन पापं कृतवन्तः सदाप्रभो र्वाच्यव-
धानं न कृतवन्तस्तस्य व्यवस्थां विधीन् प्रमाणवाक्यानि च नाचरितवन्त-
स्तत्कारणादेव यथाद्यास्ति तथा विपत्तिरियं युष्मान् आक्रान्तवती।
अनन्तरं यिरिमियः सर्व्वान् जनान् सर्व्वा योषितश्च जगाद, भो २४
मिसरदेशस्था यिहूदीयजनाः सर्व्वे यूयं सदाप्रभो र्वाक्यं शृणुत। इस्रा- २५
येल ईश्वरो वाहिनीनां सदाप्रभुरित्थमाह, यथा, हे नरा नार्य्यश्च, व्योम-
राज्ञीम् उद्दिश्य धूपदाहे पेयनैवेद्यदाने चास्माभि र्यानि व्रतानि प्रतिश्रु-
तानि तान्येव साधयिष्यन्त इति युष्मद्वक्त्रैरुच्यते युष्मत्करैश्चानुष्ठीयते। यूयं
स्वव्रतानि स्थिरीकरिष्यथ स्वव्रतानि च साधयिष्यथेति निश्चितं। अतो २६
भो मिसरदेशवासिनो यिहूदीयजनाः सर्व्वे यूयं सदाप्रभो र्वाक्यं शृणुत,
सदाप्रभुराह स्वीयमहानाम्नाहं शपे कृत्स्नमिसरदेशे कुत्रापि कोऽपि

यिहूदीयनरः प्रभुः सदाप्रभु र्जीवतीति शप्तुं स्ववक्त्रेण मम नाम पुनर्नै-
२७ वोच्चारयिष्यति। पश्याहममङ्गलाय न च मङ्गलाय तेषु जागरूको भवि-
ष्यामि यावन्तश्च यिहूदीयजना मिसरदेशे सन्ति ते सर्व्वे निःशेषं यावद्
२८ असिक्षुधाभ्यां विनंक्ष्यन्ति। असितो रक्षिताः स्वल्पे जना मिसरदेशाद्
यिहूदादेशं प्रत्यागमिष्यन्ति। ततो मम तेषाञ्च मध्ये कस्य वाक्यं स्थिरीभ-
विष्यति तन्मिसरदेशे प्रवासार्थं तत्रविष्टै र्यिहूदायाः सर्व्वैः शेषजनै
र्ज्ञायिष्यते।
२९ युष्मानधि ममामङ्गलावहानि वाक्यानि स्थिरीभविष्यन्तीति यथा
यूयं जानीयात तदर्थमहम् अत्र स्थाने युष्माकं दण्डं विधास्याम्येतस्य
३० युष्मन्निमित्तकं चिह्नमेतद् भविष्यतीति सदाप्रभुराह। पश्यत यिहू-
दीयराजः सिदिकियो यद्वन्मया तद्द्वेषिणस्तत्प्राणनाशार्थिनश्च बाबि-
लीयराजस्य निबूखद्रित्सरस्य करे समर्पितस्तद्वन्मिस्रीयराजः फि-
रौन्-हफ्रा मया तद्द्वेषिणां करेषु तत्प्राणनाशार्थिनाञ्च करेषु समर्प-
यिष्यते, इति सदाप्रभुराह।

---

४५ पञ्चचत्वारिंशोऽध्यायः।

बारूकस्य भयात् तं प्रति यिरिमियस्योपदेशनं सान्त्वनञ्च।

१ यिहूदीयराजस्य योशियसुतस्य यिहोयाकीमस्य राजत्वस्य चतुर्थवत्सरे
यदा नेरियस्य पुत्रो बारूको यिरिमियस्य वक्त्राद् एतानि सर्व्वाणि
वाक्यानि श्रुत्वन् पुस्तकेऽलिखत् तदा भाववादी यिरिमियस्तं यद् वा-
२ क्यम् अवादीत् तदिदं, यथा, हे बारूक, त्वामधीशायेल ईश्वरः सदा-
प्रभुरित्थमाह,

३ त्वयोक्तं हा व्यथायां मे खेदं युङ्क्ते सदाप्रभुः।
दीर्घोच्छ्वासादहं श्रान्तो नैव प्राप्नोमि निर्वृतिं॥
४ अतस्त्वं तमिदं ब्रूहि वदतीत्थं सदाप्रभुः।
मया यन्निर्म्मितं पश्य तन्मयोत्पाटयिष्यते।
मया यद् रोपितं तच्च मयैवोन्मूलयिष्यते।
अर्थतः कृत्स्नदेशोऽयं मया विध्वंसयिष्यते॥
५ स्वकृते त्वञ्च माहात्म्यं किं काङ्क्षे मैव काङ्क्ष तत्।
पश्याहं वर्त्तयिष्यामि सर्व्वप्राणिष्वमङ्गलं॥

वाक्यं सदाप्रभोरेतत् त्वन्तु यत्रैव यास्यसि।
तत्र सर्व्वत्र दास्यामि त्वत्प्राणान् तव लोप्त्रवत्॥

---

४६ षट्चत्वारिंशोऽध्यायः।

१ फरातनदीतीरे राज्ञः फिरौणः सेनायाः पराजयस्य भविष्यद्वाक्यं १३ निबूखद्नित्सरेण मिसरदेशस्य पराजयस्य भविष्यद्वाक्यं २७ याकूबवंशं प्रतीश्वरस्य सान्त्वनावाक्यञ्च।

परजातीरधि भाववादिनं यिरिमियं प्रति प्रादुर्भूतं सदाप्रभो र्वाक्यं। १

मिसरदेशस्य भाग्यं। २

यिहूदीयराजस्य योशियसुतस्य यिहोयाकीमस्य राजत्वस्य चतुर्थवत्सरे फरातनदीतीरस्थकर्कमीशे उपस्थिता मिस्रीयराजस्य फिरौन-निखो र्या वाहिनी बाबिलीयराजेन निबूखद्नित्सरेण पराजिग्ये तामधि।

फलकं चर्म्म चादद्धं युद्धार्थञ्चोपतिष्ठत। ३
रथै र्योजयताश्वांश्च हयारूढाः प्रगच्छत। ४
तिष्ठध्वं सशिरस्त्राणा म्रक्षशूलाः सुवर्म्मिताः॥
किमर्थं ते मया दृष्टाः शङ्कमानाः पराङ्मुखाः। ५
वीरास्तेषाञ्च सम्पिष्टाः प्रद्रवन्त्याश्रयार्थिनः।
स्वदृष्टिञ्चैकवत्सेऽपि न प्रत्यावर्त्तयन्ति ते।
व्याशङ्कास्ति चतुर्दिक्षु ब्रवीतीदं सदाप्रभुः॥
द्रुतगाम्याश्रयं प्राप्तुं दक्षो वीरो न शक्ष्यति। ६
स्वलित्वा ते पतिष्यन्त्युदीच्यां फ्रातसरित्तटे॥
नीलाख्यनदसङ्काशो योऽयमायाति को नु सः। ७
उत्क्षिप्यन्ते हि तस्यापः स्रोतसामनुरूपतः॥
मिसरोऽयं समायाति नीलाख्यातनदोपमः। ८
उत्क्षिप्यन्ते च तोयानि स्रोतसामनुरूपतः॥
स ब्रूतेऽहं प्रयास्यामि छादयिष्यामि भूतलं।
पुरीं विनाशयिष्यामि तन्निवासिजनैः सह॥
हे हया यूयमायात हे रथा धावतोन्मदाः। ९
प्रगच्छन्तु महावीराः कूशपूटीयचर्म्मिणः।
धनुर्विस्फारयन्तश्च लूदीयाश्चापधारिणः॥

१० दिवसोऽयं प्रभोरेव वाहिनीनां सदाप्रभोः।
दिवसो दण्डदानाय वैरिणां वैरशुद्धये॥
तर्प्स्यति ग्रसमानोऽसि भूरिरक्तञ्च पास्यति।
यतो हेतोः प्रभोरेव वाहिनीनां सदाप्रभोः।
उदीच्यां फ्रात्सरित्तीरे तदा यज्ञो भविष्यति॥
११ अनूढे मिसराख्याते कन्ये गिलियदं व्रज।
रोगघ्नं तरुनिर्य्यासं तद्देशीयं गृहाण च॥
बह्वौषधप्रयोगस्ते विफलस्तु भविष्यति।
नैव यास्यति वा सिद्धिं त्वदीयव्रणरोपणं॥
१२ तावकीनापमानस्य वार्त्तां श्रोष्यन्ति जातयः
तावकीनार्त्तरावश्च पूरयिष्यति मेदिनीं॥
वीरोपरि यतो वीरः स्खलनं प्रगमिष्यति।
उभयोरेककाले च पतनं सम्भविष्यति॥

१३ मिसरदेशस्य पराजयार्थं बाबिलीयराजस्य निबूखद्रित्सरस्यागमन-
मधि सदाप्रभु र्भाववादिनं यिरिमियं प्रति यद् वाक्यं जगाद तस्य
वृत्तान्तोऽयं।

१४ आख्यातेदं मिसर्द्देशे मिग्दोले च विघोषत।
नोफे तफनहेषे च वार्त्तामेतां विघोषत॥
इत्थं ब्रूत च तिष्ठ त्वम् आत्मानं सज्जितं कुरु।
कृपाणस्त्वच्चतुर्द्दिक्षु सकलं ग्रसते यतः॥
१५ विच्छिन्नोऽभूत् कुतो हेतो र्वीरवृषगणस्तव।
स न तस्थौ यतो हेतोस्तमभ्याहन् सदाप्रभुः॥
१६ बहवः स्खालितास्तेन पतत्येकोऽपरोपरि।
ते वदन्ति समुत्तिष्ठ घातिखड्गस्य सम्मुखात्।
स्वजनान् जन्मदेशञ्च गमिष्यामो वयं पुनः॥
१७ ते तत्रेदञ्च घोषन्ति मिस्रीयन्टपतिः फिरौन्।
शब्दमात्रो यतस्तेन समयो व्यतिचक्रमे॥
१८ सेनाध्यक्षप्रभ्वाख्यो राजेदं भाषते वचः।
यदि जीवाम्यहं तर्हि स विजेतागमिष्यति।
ताबोरिव गिरिश्रेष्ठः कर्म्मिलो वार्णवान्तिकः॥
१९ मिसर्वासिनि कन्ये त्वं दास्यार्थं सम्भृतिं कुरु।

नष्टं दग्धं यतो नोफं निर्जनञ्च भविष्यति॥
प्रतिभाति मिसर्नीवृद् गोवत्सेव सुरूपिणी। १०
उदीचीतः समायाति समायाति विदारकः॥
तन्मध्ये ये च वर्त्तन्ते तस्या वेतनजीविनः। ११
योद्धारस्तेऽपि गोवत्सा गोगोष्ठे पोषिता इव॥
तेऽपि पराङ्मुखीभूय न स्थित्वैकत्र दुद्रुवुः।
नाशदिनं फलप्राप्तेः कालस्तान् यत आक्रमीत्॥
भुजङ्गेनेव शब्दस्य तया शब्द उदीर्य्यते। १२
यतो हेतोः समायान्त्यरयः सैन्यसमन्विताः।
आक्राम्यन्ति कुठारैश्च तां ते वृक्षच्छिदो यथा॥
कर्त्तिष्यन्ति वनं तस्या ब्रवीतीदं सदाप्रभुः। १३
अभेद्यं भात्यरण्यं तत् शलभेभ्यस्तु शत्रवः।
बहवः सन्ति तेषाञ्च सङ्ख्या ज्ञातुं न शक्यते॥
कुमारी मिसराख्याता लज्जापन्ना भविष्यति। १४
उत्तरीयमनुष्याणां हस्ते सा चार्पयिष्यते॥
इस्रायेलो य ईशः स वाहिनीनां सदाप्रभुः। १५
ब्रूते पश्चाहमामोने देवाय नोनिवासिने।
फिरौणे मिसरे तस्या देवराजगणाय च।
फिरौणे तच्छ्रितेभ्यश्च प्रदास्याम्युचितं फलं॥
अहं तान् अर्पयिष्यामि प्राणनाशार्थिनां करे। १६
निबूखद्नित्सरस्यैव बाबिलीयमहीपतेः।
तद्भृत्यानाञ्च हस्तेषु ततः पश्चात् मिसर् पुनः।
आवत्स्यते यथा पूर्व्वम् इत्यमाह सदाप्रभुः॥
त्वञ्च मा साध्वसं गच्छ हे याकूब् मम किङ्कर। २७
इस्रायेल् त्वञ्च नैराश्यं मैव याहि कथञ्चन॥
यतः पश्चाहमेव त्वां तारयिष्यामि दूरतः।
त्वद्वंशांश्चोद्धरिष्यामि तेषां प्रवासदेशतः॥
प्रत्यावर्त्तिष्यते याकूब् विश्रामञ्चोपभोक्ष्यते।
वसन्तं तञ्च निःशङ्कं कोऽपि नोद्वेजयिष्यति॥
मैव त्वं साध्वसं गच्छ हे याकूब् मम किङ्कर। २८
सदाप्रभुरिदं वक्ति तव सङ्गी यतोऽस्म्यहं॥

त्वं यासां परजातीनां मध्ये व्यकीर्य्यथा मया।
सकलानां मया तासां सर्व्वनाशो विधास्यते।
तवैव सर्व्वनाशस्तु नहि कारिष्यते मया॥
शास्ति विचारसिद्धैव तुभ्यं दायिष्यते मया।
सर्व्वथा शास्तिहीनन्तु त्वां न शक्नोमि रक्षितुं॥

४७ सप्तचत्वारिंशोऽध्यायः।

पिलेष्टीयानां नाशस्य भविष्यद्वचनं।

१ फिरौणा घःसायाः पराजयस्य पूर्व्वं पिलेष्टीयानधि सदाप्रभो र्यद्
वाक्यं भाववादिनं यिरिमियं प्रति प्रादुरभूत् तद्वृत्तान्तोऽयं।
२ सदाप्रभुरिदं ब्रूते पश्यायान्त्याप उत्तरात्।
ता भूत्वा स्रोत आप्लाव्याप्लावयिष्यन्ति नीवृतं।
तदापूरकवस्तूनि सपौराणि पुराणि च॥
क्रन्दनञ्च करिष्यन्ति तदा तत्रत्यमानवाः।
उच्चैश्च विलपिष्यन्ति सर्व्वे देशनिवासिनः॥
३ तद्वीराणां खुराघातैः समुत्पादितगर्जनात्।
तद्रथानाञ्च निर्घोषात् तच्चक्राणाञ्च शव्दतः।
ताताः श्लथकरीभूता न द्रक्ष्यन्ति निजात्मजान्॥
४ यतः सर्व्वपिलेष्टीयजनानां सूदनाय हि।
सोरसीदोनयोः पुर्य्योस्तयोः शेषोपकारिणां।
सकलानाञ्च नाशाय दिनं तदागमिष्यति॥
यतो हेतोः पिलेष्टीयान् उच्छेत्स्यति सदाप्रभुः।
कप्तोर्द्वीपस्य कृत्स्नञ्च शेषं विनाशयिष्यति॥
५ घःसा यास्यति मुण्डत्वम् अस्किलोनञ्च लुप्ततां।
शेषस्तत्समभूमेश्च दशां प्राप्स्यति तादृशीं।
कतिकालं त्वमात्मानं कुरुषे क्षतविक्षतां॥
६ कतिकालम् अशान्तस्त्वं स्थास्यसे सदाप्रभोः।
उपाश्रय निजं कोषं प्रशाम्य नीरवो भव॥
७ आः कथं स भवेच्छान्त आदिक्षत् तं सदाप्रभुः।
अस्किलोनेऽब्धिवङ्के चाजिज्ञपत् तच्च वर्त्तितुं॥

४८ अष्टचत्वारिंशोऽध्यायः ।

गर्व्वनिर्भयत्वात्मश्लाघानाम् ईश्वरीयलोकनिन्दायाश्च हेतो र्मोयाबस्य दण्डस्य भविष्यद्वाक्यं शेषे तस्य मुक्ते र्भविष्यद्वचनञ्च ।

मोयाबस्य भाग्यं । १

इत्थायेलीश्वरो ब्रूते वाहिनीनां सदाप्रभुः ।
हाहाकारो निबो र्योग्यो यस्मादुच्छेत्स्यते निबुः ॥
धारिष्यते विपक्षैश्च लज्जितं किरियाथयिम् ।
भविष्यत्यस्थिरं चासात् लज्जापन्नश्च मिष्गबं ॥
इतःपश्चान्मोयाबस्य प्रशंसा न भविष्यति । २
हिष्बोने तस्य हिंसायै युक्तिः कारिष्यते जनैः ।
आयात कर्त्तयिष्यामस्तं जातीनां गणाद् वयं ॥
हे मद्मेन त्वमेवापि सम्भविष्यसि नीरवं ।
तव पश्चात् कृपाणश्च गमनं प्रकरिष्यति ॥
होरोणायिमतः शब्दो रोदनस्य निशम्यते । ३
सर्व्वनाशो महाभङ्ग एवास्माकमभूदिति ॥
मोयाबो भग्न एवेति शिशूनां श्रूयते रवः ॥ ४
लूहीतगामिनः पान्था येनारोहन्ति वर्त्मना । ५
तत्रारोहति तैः सार्द्धं क्रन्दनं क्रन्दनात् परं ॥
येन पथावरोहन्ति होरोणायिमगामिनः ।
तत्र भङ्गप्रणादानां क्लिष्टानां श्रूयते रवः ॥
यूयं पलायनं कृत्वा स्वप्राणान् परिरक्षत । ६
भवत प्रान्तरस्थस्य तेजोहीनतरोः समाः ॥
त्वं स्वकर्म्मसु विश्वासं स्वीयकोषेषु चाकरोः । ७
तस्माद् धारिष्यसे त्वञ्च किमोशश्च प्रवासितः ।
सार्द्धं स्वयाजकाध्यक्षै र्दैशतो निर्गमिष्यति ॥
उपस्थास्यति सर्व्वाणि नगराणि विनाशकः । ८
पुरं रक्षिष्यते नैकं निम्नभूमि र्विनङ्क्ष्यति ।
समभूः प्राप्स्यति ध्वंसम् इत्थमाह सदाप्रभुः ॥
पतत्रं दत्त मोयाबे स पतन् प्रपतिष्यति । ९
तत्पुराणि विनङ्क्ष्यन्ति कोऽपि तत्र न वत्स्यति ॥

१० स शप्तो यः सशैथिल्यं कुर्य्यात् कार्य्यं सदाप्रभोः।
स शप्तो निजखड्गं यो रक्तपातान्निवारयेत्॥
११ मोयाबः स्वस्य आबाल्यात् स्वकल्कोपरि सुस्थिरः।
अच्छिन्नः पात्रतः पात्रे न च दास्यदशां गतः।
तत्स्वादोऽद्यापि तन्निष्ठस्तद्गन्धो विकृतो नहि॥
१२ तस्मात् सदाप्रभु र्ब्रूते पश्चागच्छन्ति वासराः।
येष्वहं प्रेषयिष्यामि भाण्डव्यापारिमानवान्।
ते न्युब्जीकृत्य तद्भाण्डान् रिक्ता भङ्क्ष्यन्ति तत्कुतूः॥
१३ यथा लज्जित इस्रायेल्वंशो बैथेल आश्रयात्।
किमोशादेव मोयाबस्तथा लज्जामवाप्स्यति॥
१४ वयं वीरा बलिष्ठाश्च युद्धायेति वदेत किं।
१५ मोयाब् नङ्क्ष्यति धूमश्च तत्पुरीणाम् उदेष्यति॥
उत्कृष्टांशश्च तद्यूनाम् आघातायावरोक्ष्यति।
वाहिनीनां प्रभु र्यस्य नाम राजा स वक्ति तत्॥
१६ मोयाबस्य समुच्छेदः समुपागन्तुमुद्यतः।
अतितूर्णञ्च तं तस्य दौर्गत्यमनुधावति॥
१७ हे जनास्तच्चतुर्द्दिक्स्थाः सर्व्वे तं परिशोचत।
सर्व्वे तन्नामवेत्तारो ब्रूत यूयमिदं वचः।
कथं भग्नो बली दण्डो राजयष्टिश्च शोभना॥
१८ हे दीबोनाभिधे कन्ये सुखं निवासकारिणि।
अवरोह निजैश्वर्य्यात् मरुस्थाने निषीद च॥
आक्रमिष्यति यस्मात् त्वां मोयाबस्य विनाशकः।
दृढस्थानानि सर्व्वाणि तव स ध्वंसयिष्यति॥
१९ तिष्ठन्ती पथि वीक्षस्व हे अरोयेरवासिनि।
पलायिनं द्रवन्तीञ्च किमभूदिति पृच्छ च॥
२० लज्जापन्नोऽस्ति मोयाबः स भग्नाशोऽभवद् यतः।
आवयतार्त्तनादञ्च कुरुध्वञ्चोच्चरोदनं।
वदतार्णोनतीरे च मोयाबो ध्वंसितोऽभवत्॥
२१ विचारसाधको दण्डः समभूमिम् उपाक्रमीत्।
होलोनं यहसञ्चापि मेफातनामिकां पुरीं॥
२२ दिबोनञ्च निबुञ्चापि बैतदिबलथायिमं।

किरियाथयिमं बैत-गामूलं बैत-मायुनं॥ २३
किरियोतञ्च बस्राञ्च मोयाबस्य पुराणि सः। २४
दूरवर्त्तीनि सर्व्वाणि निकटस्थानि चाक्रमीत्॥
शृङ्गं छिन्नं भुजो भग्नो मोयाबस्येति वाक् प्रभोः॥ २५
मत्तं कुरुत तं यस्मात् सोऽतिदृप्तः प्रभुं प्रति। २६
मोयाबोऽपि स्ववान्ते हि लुठन् हास्यो भविष्यति॥
इस्रायेलं पुरा त्वं किं नोपहास्यममन्यथाः। २७
स किं चौर्य्यकृतां मध्ये धृतो यत् त्वं स्वभाषणे।
सर्व्वदैव तमुद्दिश्याकुरुथा मूर्द्धचालनं॥
त्यजत स्वपुरीं यूयं हे मोयाबनिवासिनः। २८
दरीमुखस्य पारे च कृतनीडकपोतवत्।
भूत्वा यूयं कुरुध्वं हि शैलं स्ववसतिस्थलं॥
मोयाबस्य वयं दर्पम् अश्रौष्मातीव दर्पिणः। २९
गर्व्वं तस्याभिमानञ्च धर्षं चित्तोन्नतिं तथा॥
प्रभु र्ब्रवीत्यहं जाने निर्म्मूलां तस्य चण्डतां। ३०
गर्व्वोक्तीस्तस्य कार्य्यं च तासां स्थैर्य्यविहीनतां॥
मोयाबमध्यहं तस्मात् करिष्ये परिदेवनं। ३१
मोयाबस्यैव साकल्ये करिष्यामि च रोदनं।
कीरहेरश्वासिस्यार्त्तरावश्चोद्गमिष्यति॥
यासेरीयविलापेन सिब्मायां गोस्तनीलते। ३२
त्वामहं विलपिष्यामि तेरुस्त्वत्तन्तवोऽर्णवं।
छायासेरार्णवाद् व्याप्ता किन्तु त्वत्फलसङ्ग्रहं।
त्वद्द्राक्षाचयनञ्चापि ध्वंसकारक आक्रमीत्॥
आनन्दो हृत उद्यानाद् हर्षो मोयाबदेशतः। ३३
द्राक्षाकुण्डे रसस्यापि स्रवणं वारितं मया॥
द्राक्षाणां हर्षनादेन न भविष्यति मर्द्दनं।
यो भविष्यति नादः स न स नादो भविष्यति॥
हिष्बोनस्य च चीत्काराद् रावः कारिष्यते जनैः। ३४
स इलीयालिपर्य्यन्तं यहसञ्च व्यप्स्यते॥
पुनः सोयरमारभ्य होरोणैमं स यास्यति।
घेनुकायास्त्रिहायण्या उच्चहम्भारवो यथा।

यत ऊषो भविष्यन्ति निम्नीमस्थसरांस्यपि ॥
२५ उच्चस्थानं प्रगच्छन्तं देवेभ्यो धूपदाहकं।
मनुष्यं संहरिष्यामि मोयाबादिति वाक् प्रभोः।
२६ तस्माद् ध्वनति वंशीव मोयाबे हृदयं मम।
हृन्मे ध्वनति वंशीव कीरहेरसवासिषु।
तैरुपार्जितवित्तानां शेषो नष्टोऽभवद् यतः ॥
२७ सर्व्वेषां मुण्डितो मुण्डः सर्व्वेषां श्मश्रु कर्त्तितं।
सर्व्वेषां सच्छतौ हस्तौ बद्धशाणाम्बरा कटिः ॥
२८ गृहपृष्ठेषु सर्व्वेषु हट्टेषु सकलेषु च।
मोयाबस्यैव साकल्यं दृश्यते शोकपूरितं ॥
यतोऽहमेव मोयाबं भग्नवान् भाजनं यथा।
यस्मिन्न जायते प्रीतिरिति ब्रूते सदाप्रभुः ॥
२९ आशा तस्य कथं भग्ना तस्माद् रुदन्ति तज्जनाः।
कथं पराङ्मुखीभूतो मोयाबो लज्जते ततः ॥
तच्चतुर्द्दिक्स्थलोकानां सर्व्वेषां हसनास्पदं।
आशाभङ्गास्पदञ्चापि मोयाबः समजायत ॥
४० यस्मात् सदाप्रभु र्वक्ति पक्षीत्क्रोशवदापतन्।
मोयाबोपरि जेता स पक्षौ विस्तारयिष्यति ॥
४१ पुरं धारिष्यते सर्व्वं दुर्गं हारिष्यते तथा।
गर्भव्यथातुरायाश्च योषितश्चेतसा समं।
मोयाबस्यापि वीराणां तदा चेतो भविष्यति ॥
४२ उच्छेत्स्यते च मोयाबो जातिवर्गस्य मध्यतः।
सदाप्रभो र्विरोधेन सोऽभिमान्यभवद् यतः ॥
४३ नियुक्ताः सन्ति युष्मासु हे मोयाबनिवासिनः।
त्रासो गर्त्तश्च पाशश्चेति ब्रवीति सदाप्रभुः ॥
४४ यः पलायिष्यते त्रासात् स गर्त्ते निपतिष्यति।
य उत्थास्यति गर्त्ताच्च स पाशेन धरिष्यते ॥
अमुष्मिन्नेव मोयाबे फलदानस्य वत्सरं।
यतोऽहं वर्त्तयिष्यामीत्थं ब्रवीति सदाप्रभुः ॥
४५ हिश्बोनस्याश्रयिष्यन्ते छायां क्लान्ताः पलायिनः।
वह्निस्तूद्गत्य हिश्बोनात् शिखा सीहोनमध्यतः।

मोयाबस्यैव गण्डस्थं सर्व्वलोम ग्रसिष्यते।
विरोधकारिवंशस्य मस्तकाग्रञ्च धक्ष्यति॥
सन्तापस्तव मोयाब किमोश्स्तानशन् प्रजाः। ४६
तव पुत्त्रा गता दास्यं तव पुत्त्र्यश्च दासतां॥
किन्तु पाश्चात्यकालेऽहं मोयाबस्यापि दासतां। ४७
पुनर्निवर्त्तयिष्यामीति ब्रवीति सदाप्रभुः॥

इति मोयाबस्य विचारवृत्तान्तः समाप्तः।

---

४९ ऊनपञ्चाशत्तमोऽध्यायः।

१ अम्मोनवंशीयानधि भविष्यद्वाक्यं ७ इदोममधि वाक्यं २३ दम्मेशकमधि वाक्यं २८ केदरहात्सोरावधि वाक्यं ३४ एलममधि भविष्यद्वाक्यञ्च।

अम्मोनवंशीयानां भाग्यं। १

सदाप्रभुरिदं ब्रूत इस्रायेल् किम् अपुत्त्रकः।
तस्योत्तराधिकारी वा कोऽपि किं नहि विद्यते॥
कुतो मल्कमदेवेन गाददेशोऽधिभुज्यते।
तत्पुरेषु किमर्थं वा तस्य प्रजाभिरुष्यते॥
तस्मात् सदाप्रभु र्वक्ति पश्यागच्छन्ति वासराः। २
येष्वम्मोनीयवंशानाम् अहं रब्बाभिधां पुरीं।
समरस्यैव नादेन करिष्याम्यभिनादितां॥
सा पुरी च समुच्छेदाद् अस्रराशि र्भविष्यति।
तत्कन्यारूपपुर्य्यश्च धक्ष्यन्ते वह्निना तदा॥
इस्रायेलोऽधिकारश्च हृतो यैरध्यभुज्यत।
स तेषां भोक्ष्यते द्रव्यमित्यमाह सदाप्रभुः॥
रोदनं कुरु हिश्बोन यदं नष्टं यतोऽभवत्। ३
यूयं क्रन्दत रब्बायाः कन्याः शाणाम्बराः कटौ॥
कुरुध्वं स्तन आघातं गोष्ठेषु परिधावत।
यतो याज्यधिपैः सार्द्धं दास्यं यास्यति मल्कमः॥
श्लाघसे निम्नभूमिभिः किं निम्नभूस्ते विलीयते। ४
हे उन्मार्गप्रिये कन्ये को मामुपाक्रमिष्यति।

इत्थमुक्ता स्वकोषेषु विश्वासः क्रियते त्वया ॥
५ भाषते तु प्रभुस्त्वां स वाहिनीनां सदाप्रभुः।
पश्चाहं त्वां करिष्यामि त्रासाक्रान्तां चतुर्द्दिशः ॥
यूयञ्च विकरीष्यध्व एकैकः स्वीयसम्मुखं।
जनान् पलायमानांश्च कोऽपि न संग्रहीष्यति ॥
६ इतः पश्चादहं किन्वम्मोनवंशस्य दासतां।
पुनर्निवर्त्तयिष्यामीत्थं ब्रवीति सदाप्रभुः ॥
७ इदोमस्य भाग्यं।
भाषते भारतीमेनां वाहिनीनां सदाप्रभुः।
तैमने किमपि ज्ञानं शेषं किं विद्यते नहि।
किं नष्टो धीमतां मन्त्रो ज्ञानं किं विलयं गतं ॥
८ दिदानवासिनो यूयं कुरुध्वं प्रपलायनं।
परित्यज्य कुरुध्वञ्च वसतिं निम्नभूमिषु ॥
एषौवंशं स्वविध्वंसं प्रापयिष्याम्यहं यतः।
तस्मै फलप्रदानस्यानेष्यामि समयं मम ॥
९ द्राक्षासञ्चयिनो लोकास्त्वेदायास्यंस्त्वदान्तिकं।
तर्हि तैः फलशेषः किं नैवात्यक्ष्यत कश्चन ॥
क्षणदायां यदि स्तेनैरकारिष्यत वाक्रमः।
तर्हि प्रयोगमात्रा तैः किं नाकारिष्यत क्षतिः ॥
१० एषावन्तु करिष्याम्यहं निष्पत्रतरूपमं।
सकलान् विवरिष्यामि तस्य गूढनिधीनपि ॥
प्रच्छादयितुमात्मानं न कथञ्चित् स शक्ष्यति।
वंशो ध्वंसिष्यते तस्य नङ्क्ष्यन्ति तत्सहोदराः।
तत्परिवासिनश्चापि नैवावस्थास्यते च सः ॥
११ निजबालान् त्यजानाथान् जीवयिष्यामि तानहं।
तव या विधवा नार्य्यो मयि ता विश्वसन्तु च ॥
१२ यतो हेतोरिदं वाक्यं व्याजहार सदाप्रभुः।
पश्चैतद्भाजने येषां पानं नासीद् यथोचितं।
ते पपुस्त्वन्तु निर्द्दोषः कथञ्चित् किं भविष्यसि।
न भविष्यसि निर्द्दोषस्त्वमवश्यं हि पास्यसि ॥
१३ यस्मात् सदाप्रभु र्ब्रूते स्वनाम्ना शप्तवानहं।

त्रासनिन्दामरुस्थानं शप्तं वन्ध्या भविष्यति।
नित्यं स्थास्यन्ति जीर्णानि तस्याः सर्व्वपुराणि च॥
अश्राव्येका मया वार्त्ता सदाप्रभोः समीपतः। १४
जातीनां मध्य आज्ञेयं दूतेन प्रहिताभवत्॥
मिलित्वा सकला यूयं तद्विरुद्धं प्रगच्छत।
समुत्तिष्ठत सर्व्वे हि सङ्ग्रामं कर्त्तुमुद्यताः॥
चोदिष्ठां पश्य जातीनां मध्ये त्वां कृतवानहं। १५
मनुष्याणां समाजे त्वम् अवज्ञाता भविष्यसि॥
त्वं स्वीयभीषणत्वेन चित्तोन्नत्या च मोहिता। १६
वसन्ती शैलभेदेषु भूधराग्रावलम्बिनी॥
उच्चस्थाने यथोत्क्रोशः कृतनीडासि यद्यपि।
तथापि त्वं ततः स्थानान्मयावतारयिष्यसे।
भाषते भारतीमेनां स्वयमेव सदाप्रभुः॥
शून्यं भविष्यतीदोमं यः कश्चित् तत्र यास्यति। १७
स तद्दण्डेषु सीत्कारम् ईरयिष्यति विस्मितः॥
सदाप्रभुरिदं ब्रूते सिदोमामरयोरिव। १८
तदासन्नपुरीणाञ्चैव तद्ध्वंसो भविष्यति॥
तत्र स्थाने नरो वासं न करिष्यति कश्चन।
नैव मानवसन्तानस्तं देशं वाश्रयिष्यते॥
यर्द्दनाभरणारण्याद् उद्गच्छन् केशरी यथा। १९
जेता पश्य तथा वासम् अचलं तं गमिष्यति॥
निमिषेण तदग्राच्च द्रावयिष्याम्यहं जनान्।
मया यश्च मनोनीतः स तत्राधिकरिष्यते॥
यतः को मम तुल्योऽस्ति वादी को वाह्वयेत मां।
मम साक्षादवस्थातुं शक्तः को वास्ति पालकः॥
इदोममधि निर्णीता मन्त्रणैव सदाप्रभोः। २०
तैमनावासिनश्चाधि कल्पितास्तस्य कल्पनाः।
निशाम्यन्तां ततो हेतो र्युष्माभिः सुसमाहितैः॥
अवश्यं परिकर्ष्यन्ति तान् कनिष्ठा अजा अपि।
अवश्यं वसतिस्तेषां तेषु स्तब्धा भविष्यति॥
तेषां पातस्य शब्दाच्च धरा यास्यति वेपथुं। २१

तेषां स्रूफार्णवं यावच्छ्रोष्यते रोदनस्वरः॥
२२ पश्योत्क्रोश इवोत्पत्य डयनं स करिष्यति।
वस्रायास्योपरि स्वीयौ पक्षौ विस्तारयिष्यति॥
गर्भव्यथातुरायाश्च योषितश्चेतसा समं।
इदोमस्यापि वीराणां तदा चेतो भविष्यति॥
२३ दम्मेशकस्य भाग्यं।
हमातस्यार्पदस्यापि कातरत्वं प्रतीयते।
निशम्याशुभवार्त्तां तौ गतवन्तौ विलीनतां।
उत्पन्नः सागरे क्षोभः शमितुञ्चाक्ति सोऽक्षमः॥
२४ दम्मेशकपुरी क्लान्ता प्रद्रोतुं परिवर्त्तते।
कम्पग्रस्ता सवन्तीवाक्रान्ता क्लेशार्त्तिभिश्च सा॥
२५ कथं त्यक्ता पुरी स्राघ्या नगरी मम हर्षदा॥
२६ तस्मात् तस्याः पतिष्यन्ति तरुणाः पुरवीथिषु।
योद्धारः सकलास्तस्याः स्तम्भिष्यन्ते च तद्दिने।
भाषते भारतीमेनां वाहिनीनां सदाप्रभुः॥
२७ दम्मेशकस्य प्राचीरे मयाग्निं ज्वालयिष्यते।
वेन्‌हदादस्य हर्म्याणि सोऽनलश्च ग्रसिष्यति॥
२८ बाबिलीयराजेन निबूखद्रित्सरेण पराजितानां केदारादीनां हात्सो-
रीयराज्यानां भाग्यं। सदाप्रभुरित्थमाह,
उत्थाय केदरं यात प्राच्यानुच्छिन्त मानवान्॥
२९ तेषामपक्रियन्तां हि दूष्यैः सार्द्धं पशूव्रजाः।
तेषां यवनिकादीनि भाजनानि क्रमेलकाः।
सकलान्येव नीयन्तां विपक्षैरात्मवृद्धये।
समन्ताद् विद्यते त्रास इति तान् प्रति घोष्यतां॥
३० प्रभुराह पलायध्वं हे हात्सोरनिवासिनः।
दूरं द्रुत्वातिनिम्नञ्च स्थानमावसताश्रिताः॥
यतो युष्मासु बाबीलो निबूखद्रित्सरो नृपः।
मन्त्रणां कृतवानेकां कल्पितवांश्च कल्पनां॥
३१ यूयमुत्थाय तां जातिम् उपाक्रामत सुस्थिरां।
निवसन्तीं सुनिश्चिन्तं कपाटार्गलवर्जितां।
पृथगेव कृतावासामिति ब्रूते सदाप्रभुः॥

मद्दाङ्गा लोठयिष्यन्ते तेषामित्येव वाक् प्रभोः। २१
तेषां गोमेषवृन्दञ्च लोप्तमेव भविष्यति॥
लूनश्मश्रून् चतुर्द्दिक्षु विकरीष्यामि तान् जनान्।
तेषाञ्च सर्व्वपार्श्वेभ्यः समानेष्याम्यमङ्गलं॥
हात्सोरं व्यालवासश्च नित्यं मरु र्भविष्यति। ३३
तत्र स्थाने नरो वासं न करिष्यति कश्चन।
नैव मानवसन्तानस्तं देशं वाश्रयिष्यते॥

यिहूदीयराजस्य सिदिकियस्य राजत्वारम्भकाल एलाममधि सदाप्र- ३४
भो र्यद् वाक्यं भाववादिनं यिरिमियं प्रति प्रादुरभूत् तद्वृत्तान्तोऽयं यथा,

भाषते भारतीमेनां वाहिनीनां सदाप्रभुः। ३५
पश्य भङ्क्ष्याम्यहं चापम् एलामस्योर्ज्जकारणं॥
एलामस्य विरुद्धञ्च व्योम्नः प्रान्तचतुष्टयात्। ३६
वायूंश्चतुर आनाय्य तैः सर्व्वैरेव वायुभिः।
तान् जनान् विकरीष्यामि तेनैलामाद् वहिष्कृतैः।
नरैरनाश्रिता जाति र्नैका कुत्राप्यवाप्स्यते॥
एलामीयान् करिष्यामि सम्मुखात् स्वीयवैरिणां। ३७
प्राणनाशार्थिनाञ्चापि सम्मुखात् साध्वसातुरान्॥
अधिकं वर्त्तयिष्यामि जनेषु तेष्वमङ्गलं।
अर्थतो मम कोपाग्निमिति ब्रूते सदाप्रभुः॥
यावत्तेषाञ्च निःशेषो नाशो न क्रियते मया।
तावदेव कृपाणो हि तेषां पश्चात् प्रहेष्यते॥
स्थापयिष्यत एलामे निजसिंहासनं मया। ३८
उच्छेत्स्यन्ते ततो राजाधिपाश्चेति प्रभो र्वचः॥
किन्तु पाश्चात्यकालेऽहम् एलामस्यापि दासतां। ३९
पुन र्निवर्त्तयिष्यामीति ब्रवीति सदाप्रभुः॥

---

५० पञ्चाशत्तमोऽध्यायः।

बाबिलनगरस्य दण्डस्य इस्रायलीयलोकानाम् उद्धारस्य च भविष्यद्वाक्यं।

बाबिलं कल्दीयानां देशञ्चाधि सदाप्रभु र्भाववादिना यिरिमियेण १
यद् वाक्यं कथितवान् तद्वृत्तान्तोऽयं।

२ जातीनां मध्य एतद्धि यूयमाख्यातुमर्हथ।
घोषत ध्वजमुत्तोल्य मैवापह्नुत्य घोषत॥
ब्रूध्वं बाबिल् धृता क्लीता बेलस्त्रस्तो मिरोदकः।
लज्जिता विग्रहास्तस्यास्त्रस्ता गर्हितमूर्त्तयः॥
३ उदीचीतो यतस्तस्या विपद्धा जातिरुत्थिता।
सा च जनपदं तस्या मरुस्थानं करिष्यति॥
तन्मध्ये वासकारी च नैव स्थास्यति कश्चन।
पलाय्यापगमिष्यन्ति मनुष्याः पशुभिः सह॥
४ तेषु दिनेषु तस्मिंश्च काल (एतत् प्रभो र्वचः)।
इस्रायेलीयवंशीया यिहूदीयाश्च तैः सह।
एकत्रैवागमिष्यन्ति क्रन्दन्तश्च पदे पदे।
करिष्यन्ते ऽनुसन्धानं स्वेश्वरस्य सदाप्रभोः॥
५ जिज्ञासिष्यन्ति सीयोनं सम्मुखीकृत्य तत्पथं।
समायात भविष्यामः समासक्ताः सदाप्रभौ।
नियमेनैव नित्येन यो विस्मर्त्तुं न शक्ष्यते॥
६ मामकीनप्रजा आसन् मेषा विनष्टुमुद्यताः।
पालकै र्भ्रमिताः स्वीयैस्ते प्राव्राज्यन्त चाद्रिषु।
अटन्तो गिरितश्चाद्रिं व्यस्मरन् स्वशयस्थलं॥
७ तान् आसाद्यैव सर्व्वे हि भक्ष्यवत् समभक्षयन्।
पीडकाश्चाब्रुवंस्तेषां न भवामोऽत्र दोषिणः॥
यतोऽपराद्धवन्तस्ते धर्म्माश्रयसदाप्रभोः।
स्वपूर्व्वपुरुषाणाञ्चाशास्थानस्य सदाप्रभोः॥
८ बाबिलो मध्यतो यूयं कुरुध्वं प्रपलायनं।
कल्दीयानाञ्च देशस्य मध्यात् कुरुत निर्गमं।
जायध्वञ्च यथा छागा मेषपालाग्रगामिनः॥
९ यस्मात् पश्य मया देशाद् उदीच्याद् बाबिलं प्रति।
सङ्घो विकटजातीनां प्रबोध्यानाययिष्यते॥
तद्विरुद्धं कृते ताभि र्व्यूहे धारिष्यते च सा।
दक्षवीरोपमस्तासां वाणो न रिक्त एष्यति॥
१० कल्दीयानां तदा जातिरवश्यं लोठयिष्यते।
तस्याः सर्व्वेऽपहर्त्तारस्तृप्स्यन्तीति प्रभो र्वचः॥

ममाधिकारहर्त्तारो यूयं हृष्टा अनन्दत। ११
अनर्त्तिष्ट यथा धेनुः शस्यमर्द्दनकारिणी।
अकुरुध्वं प्रणादञ्च क्रेषमाणा हया इव॥
अतिक्रीतास्ति वो माता जननी वत्रपान्विता। १२
अन्त्या सा पश्य जातीनाम् ऊषी धन्वा मरुस्थलं॥
क्रोधात् सदाप्रभोः सा च वसति र्न भविष्यति। १३
तस्याः साकल्यमूच्छिन्नं स्थानमेव भविष्यति॥
बाबिलः सन्निधानेन यः कश्चित् प्रगमिष्यति।
स तद्दण्डेषु सीत्कारम् ईरयिष्यति विस्मितः॥
बाबिलः परितो व्यूहं कुरुध्वं हे धनुर्धराः। १४
वाणांस्त्यजत तस्याञ्च मोद्विज्यध्वं शरव्यये।
यस्मात् सदाप्रभोरेव विरुद्धं सापराधिनी॥
कुरुध्वं तद्विरुद्धञ्च जयनादं समन्ततः। १५
सा कृताञ्जलिरुन्मूला तत्प्राचीरं निपातितं॥
एतत् सदाप्रभोरेव वैरनिर्य्यातनं यतः।
तस्माद् वैरफलं तस्यै प्रदातुं यूयमर्हथ।
यद्वत् कृतवती सा च तद्वत् कुरुत तां प्रति॥
उच्छिन्त बाबिलो मध्यान्मनुष्यं वीजवापकं। १६
शस्यकर्त्तनकाले वा हस्ते लवित्रधारिणं॥
साक्षात् प्रपीडकस्यासेः प्रतियान्तु निजं जनं।
स्वदेशञ्च पलायन्तां प्रत्येकं सकला नराः॥
मेषो विक्षिप्त इस्रायेल् मृगेन्द्रास्तं व्यदुद्रवन्। १७
आदावाशूरराजस्तम् अबभक्षत् स्वभक्ष्यवत्॥
अन्तेऽसौ बाबिलीयस्तु निबूखद्नित्सराभिधः।
महीपालस्तदस्थीनि सकलान्यप्यचर्वयत्॥
इस्रायेलीश्वरस्त्वाह वाहिनीनां सदाप्रभुः। १८
ततो हेतो र्मया पश्य पुराशूरीयभूभृते।
यथादायि फलं युक्तं तथा बाबिलभूभुजे।
तद्वश्याय च देशाय युक्तं दायिष्यते फलं॥
इस्रायेलं निजावासं प्रत्यानेष्याम्यहं पुनः। १९
कर्म्मिलं वाशनञ्चापि स पुन र्विचरिष्यति।

इफ्रयिम्-गिलियादद्रौ स प्राणांस्तर्पयिष्यति ॥
२० तेषु दिनेषु तस्मिंश्च काले (प्रभोरिदं वचः)।
इस्रायेलोऽपराधो यो सोऽन्विष्टोऽपि न लप्स्यते ॥
यिहूदायाश्च पापानां गन्धोऽन्विष्टोऽपि नाप्स्यते।
यतो यं शेषयिष्यामि क्षमिष्ये तस्य पातकं ॥
२१ द्विगुणद्रोहिदेशं तं तस्मिन् दण्डस्य भाजने।
हतवासान् मनुष्यांश्च त्वम् आक्रमितुमर्हसि ॥
ध्वंसयोच्छिन्धि पश्चाच्च तेषामिति प्रभो र्वचः।
त्वामादेक्ष्याम्यहं यद्यत् तत्तत् त्वं कर्त्तुमर्हसि ॥
२२ रणस्य श्रूयते नादो देशे महच्च भञ्जनं।
२३ कथं छिन्नः कथं भग्नः कृत्स्नमर्त्त्यस्य मुद्गरः।
कथं जाता मरुस्थानं सा बाबिल् जातिमण्डले ॥
२४ हे बाबिल् धरणार्थं ते जालं विस्तारितं मया।
तेनैव त्वम् अधारिष्ठा न तु तत् समबुध्यथाः।
निर्णीता त्वं गृहीता च यतोऽक्रुध्यः सदाप्रभोः ॥
२५ प्रभुः स्वकोषमुद्घाट्य स्वकोपास्त्राण्युपानयत्।
कल्दीयानां यतो देशे कर्त्तव्यः समुपस्थितः।
व्यवहारः प्रभोस्तस्य वाहिनीनां सदाप्रभोः ॥
२६ तस्या विरुद्धमायात मेदिन्याः प्रान्तभागतः।
उद्घाटयत तत्कोषान् तामाचिनुत राशिवत् ॥
तां च सर्व्वश उच्छिन्त तस्याः शेषं न रक्षत ॥
२७ हत तस्या वृषान् सर्व्वान् वधायावतरन्तु ते।
हा हा तेषां दिनं शास्तेः कालश्चायमुपस्थितः ॥
२८ धावतां बाबिलो देशाद् रवो रक्षार्थिनामसौ।
ज्ञापयिष्यति सीयोनम् ईशस्य नः सदाप्रभोः।
वैरनिर्य्यातनं तस्य मन्दिरार्थां प्रतिक्रियां ॥
२९ बाबिलं प्रति युष्माभि र्हूयन्तां शरजीविनः।
हूयन्तां सकला एव धनुर्विस्फारका जनाः।
अवरुन्ध समन्तात्तां शेषः कोऽपि न रक्ष्यतां ॥
तस्या यादृक् क्रिया तादृक् फलं तस्यै प्रदत्त च।
सर्व्वथा सा यथाकार्षीत् तद्वत् कुरुत तां प्रति ॥

यतो गर्व्वोद्धतासीत् सा वैपरीत्यात् सदाप्रभोः।
इस्रायेलः पवित्रस्य राज्ञश्च वैपरीत्यतः॥
तस्मात् तस्याः पतिष्यन्ति तरुणाः पथवीथिषु। ३०
योद्धारः सकलास्तस्याः स्तम्भिष्यन्ते च तद्दिने।
भाषते भारतीमेनां स्वयमेव सदाप्रभुः॥
पश्य त्वत्प्रतिकूलोऽहं हे दृष्टत्वस्वरूपक। ३१
वाक्यमेतत् प्रभोरेव वाहिनीनां सदाप्रभोः।
दिनं ते यत आयातं कालस्त्वच्छास्तये मया॥
स दृष्टत्वस्वरूपश्च स्खलित्वा निपतिष्यति। ३२
तस्योत्थापनकारी च न भविष्यति कश्चन॥
अग्निं प्रज्वलयिष्यामि तस्य सर्व्वपुरेष्वहं।
तत्समन्तात् स्थितं सर्व्वं भक्षयिष्यति चानलः॥
भाषते भारतीमेनां वाहिनीनां सदाप्रभुः। ३३
इस्रायेलीयवंशीया यिहूदाश्च कुलोद्भवाः।
अविशेषेण पीड्यन्ते नीतास्ते यैश्च दासतां।
सकलैस्तैः प्ररुध्यन्ते तान् विस्रष्टुमनिच्छुभिः॥
तेषान्त्वस्ति बली त्राता वाहिनीप्रभुनामकः। ३४
तेषां पक्षे विवादं सोऽवश्यं निर्व्वाहयिष्यति।
पृथिव्यै शान्तिदानाय कम्पयन् बाबिलाश्रितान्॥
हे खड्गाक्राम कल्दीयान् इत्यमाह सदाप्रभुः। ३५
बाबिल्वासिन आक्रामाधिपांस्तस्याश्च धीमतः॥
हे खड्गाक्राम वाचालान् बुद्धिहीना भवन्तु ते। ३६
हे खड्गाक्राम तद्वीरान् भग्नाशाश्च भवन्तु ते॥
हे खड्गाक्राम तत्सप्तीन् तस्याः सारथिकान् रथान्। ३७
तत्रत्यं कृत्स्नसङ्घञ्च ते भवन्त्वबलोपमाः।
हे खड्गाक्राम तत्कोषान् लोठिता हि भवन्तु ते॥
हे ताप त्वम् अपस्तस्या जहि शुष्का भवन्तु ताः। ३८
यतो देशः स मूर्त्तीनाम् उन्मत्तास्ते च भीषणैः॥
अतो जाङ्गलमार्जारा वत्स्यन्ति क्रोष्टुभिः सह। ३९
देशे तस्मिंस्तदानीञ्च निवत्स्यन्त्युष्ट्रपक्षिणः॥
नराणां वसतिस्तत्र न कदाचिद् भविष्यति।

पुरुषानुक्रमं यावत् कोऽपि तत्र न वत्स्यति ॥
४० सदाप्रभुरिदं ब्रूते सिदोमामरयोः पुरा।
तदासन्नपुरीणाञ्च यं ध्वंसमीश्वरोऽकरोत्।
तस्याः पुर्य्या अपि ध्वंसस्तत्समानो भविष्यति ॥
तत्र स्थाने नरो वासं न करिष्यति कश्चन।
नैव मानवसन्तानस्तत् स्थानं वाश्रयिष्यते ॥
४१ उत्तरस्या दिशः पश्य जातिरेकागमिष्यति।
मह्या निम्नतभागेभ्यो वंश एको विशङ्कटः।
बहवश्च महीपाला उत्थास्यन्ति प्रबोधिताः ॥
४२ धन्विनः शक्तिहस्तास्ते क्रूराः कारुण्यवर्ज्जिताः।
सामुद्रनादनादास्ते हयारूढा द्रवन्ति च।
बाबिल् कन्ये त्वदासन्ने व्यूहितास्ते च योद्धृवत् ॥
४३ तेषां वार्त्तां समश्रौषीद् बाबिलीयमहीपतिः।
तस्माच्च सर्व्वथा तस्य जडीभूतं करद्वयं।
क्लेशेनाभूत् स आक्रान्तः प्रसवन्तीव चार्त्तिभिः ॥
४४ यर्द्दनाभरणारण्याद् उद्गच्छन् केशरी यथा।
जेता पश्य तथावासम् अचलं प्रगमिष्यति ॥
निमिषेण तदग्राच्च द्रावयिष्याम्यहं जनान्।
मया यश्च मनोनीतः स तत्राधिकरिष्यते ॥
यतः को मम तुल्योऽस्ति वादी को वाह्वयेत मां।
मम साक्षादवस्थातुं शक्तो को वास्ति पालकः ॥
४५ बाबिलं प्रति निर्णीता मन्त्रणैव सदाप्रभोः।
कल्दीयानां भुवञ्चाधि कल्पितास्तस्य कल्पनाः।
निशाम्यन्तां ततो हेतो र्युष्माभिः सुसमाहितैः ॥
अवश्यं परिकर्ष्यन्ति तान् कनिष्ठा अजा अपि।
अवश्यं वसतिस्तेषां तेषु स्तब्धा भविष्यति ॥
४६ सत्यं बाबिल् अधारीति श्रुत्वा कम्पिष्यते धरा।
सर्व्वत्रैवार्त्तनादश्च श्रोष्यते जातिमण्डले ॥

---

५१ एकपञ्चाशोऽध्यायः।

१ बाबिलपुरीयदण्डस्य भाविवचः ५९ यिरिमियेण बाबिलि प्रहितायास्तद्वार्त्तायाः पाठात् परं तत्र शिलां बद्धा फरान्नद्यां मज्जनस्य दृष्टान्तकथा च।

इत्थं सदाप्रभु र्ब्रूते बाबिलः प्रातिकूल्यतः। १
मद्द्वेषिणाञ्च हृद्देशे वासिनां प्रातिकूल्यतः।
पश्य संहारको वायुरुत्पादयिष्यते मया॥
बाबिलञ्च प्रहेष्यामि परान् शूर्पप्रयोजकान्। २
शूर्पैस्तां शोधयित्वा ते देशः शून्यीकरिष्यते॥
यस्माद् विपद्दिने तस्याः सर्व्वदिग्भ्यः समागताः।
जनास्तद्वैपरीत्येन ते भविष्यन्त्युपस्थिताः॥
धन्वी विस्फारयेच्चापं चापविस्फारकं प्रति। ३
वर्म्मणा चाभिसन्नद्धम् ऊर्द्धशीर्षं नरं प्रति।
तद्यूनो मानुकम्पध्वं कृत्स्नमुच्छिन्त तद्बलं॥
तत्र कल्दीयदेशे च निपतन्तु हता जनाः। ४
निपतन्त्वस्त्रविद्धाश्च नरास्तत्पुरवीथिषु॥
यस्मान्नैव समत्याक्षीद् इस्रायेलम् अनाथवत्। ५
न यिहूदां तयोरीशो वाहिनीनां सदाप्रभुः॥
एतेषां परिपूर्णस्तु देशोऽभूत् पापकर्म्मभिः।
इस्रायेलः पवित्रस्याधीश्वरस्यापराध्यतां॥
बाबिलो मध्यतो यूयं कुरुध्वं प्रपलायनं। ६
स्वप्राणान् रक्षतैकैकस्तस्या दोषे न नश्यत॥
यस्मात् सदाप्रभोरेष समयो वैरशुद्धये।
प्रतिदास्यति तस्यै स कर्म्मणाम् उचितं फलं॥
आसीत् सदाप्रभो र्हस्ते बाबिल् काञ्चनभाजनं। ७
कृत्स्नभूमण्डलस्यैव मद्योन्मत्तत्वसाधकं।
तन्मद्यं जातिभिः पीतं तेनोन्माद्यन्ति जातयः॥
अकस्मात् पतिता बाबिल् भग्नताञ्च गता ततः। ८
रुत तामधि तस्याश्च क्षते प्रयुङ्ध्वमौषधं।
किंस्वित् तस्याः प्रतीकारस्तदानीं सम्भविष्यति॥
बाबिलः प्रतिकाराय यत्नोऽस्माभिरनुष्ठितः। ९
तस्यास्तु प्रतिकारस्य सिद्धि र्नैवाभवत् ततः॥

आयात तां वयं त्यक्त्वैकैको यामो निजां भुवं।
नभःस्पर्शी यतस्तस्या दण्ड उच्चश्च मेघवत्॥
१० अस्माकं कृतवान् व्यक्तं धार्म्मिकत्वं सदाप्रभुः।
आयाताख्याम सीयोन्यस्मदीशस्य प्रभोः क्रियां॥
११ शरान् मार्ज्जत चर्म्माणि नह्यध्वं सकला द्रुतं।
प्रभु र्मादीयराजानाम् उत्साहं समतेजयत्॥
यतो बाबिलि चिन्तां स कुरुते तद्विनष्टये।
वैरशुद्धिः प्रभोः सा हि मन्दिरार्था प्रतिक्रिया॥
१२ बाबिलप्राचीरमाक्रान्तुं यूयमुच्छ्रयत ध्वजं।
कुरुध्वं सुदृढं रोधं संस्थापयत रक्षिणः॥
सैनिकान् विनियुंग्ध्वञ्च प्रच्छन्नान् निभृते स्थले।
यत् सदाप्रभुना प्रोक्तं बाबिल्वासिजनानधि।
तस्य कल्पनकारी स तस्य सोऽप्यस्ति साधकः॥
१३ बह्वावासी महापस्त्वं महाकोषाधिकारिणी।
तवान्तस्तु समायाति परा काष्ठार्ज्जनस्य च॥
१४ स्वप्राणैः शप्तवान् एतद् वाहिनीनां सदाप्रभुः।
अवश्यं पूरयिष्यामि नरैस्त्वां शलभैरिव।
जयनादो विरुद्धं ते तैरेवोदीरयिष्यते॥
१५ स ससर्ज्ज स्वशक्त्या क्ष्मां स्वधिया विदधे जगत्।
स च विस्तारयामास स्वप्रवीणतया दिवं॥
१६ ईरिते स्वरवे तेन व्योम्नि सञ्चीयते जलं।
उत्थाप्यन्ते च मेदिन्याः प्रान्तात् तेनोच्चवारिदाः॥
तेन वृष्टिप्रदानाय मेघवह्नि र्विधीयते।
निःसार्य्य निजकोषेभ्यस्तेन चानीयते मरुत्॥
१७ पशुतुल्या जनाः सर्व्वे ज्ञानहीनाश्च सन्ति ते।
लज्जन्ते विग्रहात् सर्व्वे धातुद्रावकशिल्पिनः॥
व्याजा एव यतः सन्ति विग्रहास्तै र्विनिर्म्मिताः।
श्वासस्वाभ्यन्तरे तेषां न कथञ्चन विद्यते॥
१८ अलीका एव ते सन्ति निर्म्मितास्च प्रमादतः।
यदा दापयिष्यते योग्यं फलं नंक्ष्यन्ति ते तदा॥
१९ याकूबस्य तु यो दायः स न तादृश ईश्वरः।

कृत्स्नसृष्टेः स निर्म्माता स्वाधिकारस्य वैभवं ।
नामधेयञ्च तस्यास्ति वाहिनीनां सदाप्रभुः ॥
मम मुद्गर आसीस्त्वं मम युद्धास्त्रसंहतिः । २०
त्वयैवाखण्डयं जातीस्त्वया राज्यान्यनाशयं ॥
त्वयैवाखण्डयञ्चाहम् अश्वमारोहिणा सह । २१
त्वयैवाखण्डयञ्चाहं स्यन्दनं रथिना सह ॥
त्वयैवाखण्डयञ्चाहं भर्त्तारं भार्य्यया सह । २२
त्वयैवाखण्डयञ्चाहं स्थविरं शिशुना सह ।
त्वयैवाखण्डयञ्चाहं तरुणं बालया सह ॥
त्वयैवाखण्डयञ्चाहं पालकं तस्य च व्रजं । २३
त्वयैवाखण्डयञ्चाहं क्षेत्राजीवं सगोयुगं ।
त्वयैवाखण्डयञ्चाहं देशाध्यक्षान् सशासकान् ॥
युष्मत्साक्षात्तु सीयोनो यः कल्दीयजनैः कृतः । २४
तस्य कृत्स्नापकारस्य फलं दास्यामि बाबिले ॥
कल्दीयदेशवासिभ्यः सर्व्वेभ्यश्च यथोचितं ।
भाषते भारतीमेनां स्वयमेव सदाप्रभुः ॥
पश्य त्वत्प्रातिकूल्योऽस्म्यहं हे ध्वंसकपर्व्वत । २५
एतत् सदाप्रभो वाक्यं कृत्स्नभू ध्वंसिता त्वया ॥
त्वान्तु हस्तं प्रसार्य्याहं घूर्णयिष्यामि शैलतः ।
त्वामहञ्च विधास्यामि भूधरं वह्निसात्कृतं ॥
न त्वत्तो गृहकोणाय ग्रावा ग्राहीष्यते जनैः । २६
न त्वत्तो गृहमूलायाश्मा वादायिष्यते नरैः ।
नित्यं स्थास्यसि तूच्छिन्नो ब्रवीतीदं सदाप्रभुः ॥
ध्वज उच्छ्रीयतां देशे तूर्य्यं जातिषु वाद्यतां । २७
तस्या हि वैपरीत्येन संस्क्रियन्ताञ्च जातयः ॥
अराराट्मिन्निरस्कास इतिनामानि यानि च ।
राज्यानि तानि हूयन्तां संग्रामार्थं तया सह ॥
तद्विरुद्धञ्च युष्माभिः सेनाध्यक्षो नियोज्यतां ।
आनीयन्ताञ्च युद्धाश्वाः सूकिनः शलभा इव ॥
तस्या हि वैपरीत्येन संस्क्रियन्ताञ्च जातयः । २८
मादीया एव राजानः सपुरोगाः सशासकाः ।

तेषाञ्च शासनाधीनाः सकला विषया अपि ॥
२९ कम्पते भूमिरेतेन वेदनार्त्ता च जायते।
यतो बाबिलमुद्दिश्य सङ्कल्पः सिध्यति प्रभोः।
स बाबिल्देशमुच्छिन्नं वासिहीनं विधास्यति ॥
३० निवृत्ता बाबिलो वीरा युद्धाद् दुर्गेषु चासते।
नष्टोऽभूद् विक्रमस्तेषां ते जाता अबलोपमाः।
निवासा दाहितास्तस्याः खण्डितान्यर्गलानि च ॥
३१ धावको धावकादग्रे दूताद् दूतश्च धावति।
वदिष्यन् बाबिलो भूपं त्वत्पुरी सर्व्वशो हृता ॥
३२ सकलानि गृहीतानि नद्यास्तार्य्यस्थलानि च।
नलारण्यानि दग्धानि योद्धारो विकला इति ॥
३३ इस्रायेलो य ईशः स वाहिनीनां सदाप्रभुः।
भाषते भारतीम् एतां कन्येयं बाबिलाभिधा।
शस्यमर्द्दनकालीनखलतुल्या बभूव हि।
अचिराच्छस्यलावस्य समयस्तामुपैष्यति ॥
३४ मां खादन् बाबिलो राजा निबूखद्नित्सरोऽलुपत्।
शून्यपात्रमिव न्यस्य मामगालीत् तिमि र्यथा।
मत्सुखाद्यैः स्वतुण्डञ्चापूपुरन्मान्वदुद्रवत् ॥
३५ मत्पीडामांसयो र्योग्यो दण्डो बाबिलि वर्त्ततां।
ईदृशीं भाषतां वाचं कन्या सीयोनवासिनी ॥
वर्त्ततां मम रक्तस्य दण्डः कल्दीयवासिषु।
यिरूशालम्पुरी चैतद् वचनं वक्तुमर्हति ॥
३६ ततो हेतोरिमां वाचं व्याजहार सदाप्रभुः।
पश्य निर्व्वाहयिष्यामि त्वद्विवादम् अहं स्वयं।
अहमेव करिष्यामि वैरनिर्य्यातनं तव ॥
तस्यास्तोयनिधिञ्चाहं विधास्यामि मरुस्थलं।
तस्या वारिप्रवाहञ्च करिष्यामि विशोषितं ॥
३७ राशीनामेव सङ्घातस्तदा बाबिल् भविष्यति।
क्रोष्टूनां वास उच्छिन्नः शीत्कारार्थो निरालयः ॥
३८ एककाले विनर्द्दन्ते ते हि केशरिणो यथा।
सकलाश्च विगर्ज्जन्ति सिंहीनां शावका इव ॥

सम्प्रीतिस्तु मया तेषां तप्तानां रचयिष्यते। ३९
तत उल्लासिनो भूत्वा ते सुप्ता नित्यनिद्रया।
न पुन र्जागरिष्यन्ति ब्रवीतीदं सदाप्रभुः॥
मयावतारयिष्यन्ते वधार्थं मेषवत्सवत्। ४०
ते मनुष्यास्तदा छागैः सहिता एडका इव॥
कथं वन्दीकृता श्रेशक् हृता कृत्स्नभुवः प्रभा। ४१
कथं जाता समुच्छिन्ना सा बाबिल् जातिमण्डले॥
अब्धि र्बाबिलमारुह्यत् सा तदूर्म्मिचयावृता। ४२
तस्याः पुर्य्यः समुच्छिन्ना देशः शुष्कं मरुस्थलं॥ ४३
तत्र देशे नरो वासं न करिष्यति कश्चन।
न वा मानवसन्तानस्तन्मध्येन व्रजिष्यति॥
बाबिल्येव प्रदास्यामि बेल्देवायोचितं फलं। ४४
तस्य चोद्गारयिष्यामि कवलं मुखतः पुनः॥
न पुनस्तत्समीपस्थ जातीनां वक्ष्यते सरित्।
भूमिसात्कृतमेवास्ति प्राचीरमपि बाबिलः॥
हे मदीयप्रजा यूयं तस्या मध्यात् प्रगच्छत। ४५
स्वप्राणान् रक्षतैकैकः कोपज्वालात् सदाप्रभोः॥
देशे या श्रूयते वार्त्ता ततो मा यात साध्वसं। ४६
ततश्चित्तञ्च युष्माकं द्रवीभूतं न जायतां॥
वार्त्तैकायाति वर्षेऽस्मिन् वार्त्तान्या परवत्सरे।
दौरात्म्यं विद्यते देशे शास्त्रा शास्ता च बाध्यते॥
अतो हेतोरवेक्षस्व ते समायान्ति वासराः। ४७
येष्वहं बाबिलो मूर्त्तीः शासिष्यामि यथोचितं॥
देशस्तस्यास्तदा कृत्स्नो लज्जापन्नो भविष्यति।
सकलाश्च पतिष्यन्ति तस्या मध्ये हता जनाः॥
स्वर्गमर्त्त्यौ तयो र्मध्ये स्थितं साकल्यमेव च। ४८
बाबिलं तां समुद्दिश्य प्रोच्चै र्गास्यन्ति हर्षतः॥
उदीचीतो यतस्तस्या वैपरीत्येन नाशकाः।
मानवा आगमिष्यन्ति ब्रवीतीदं सदाप्रभुः॥
बाबिला पातिता यद्वद् इस्रायेलो हता जनाः। ४९
तद्वद् बाबिलि कृत्स्नोर्व्याः पतिष्यन्ति हता जनाः॥

५० हे जना असितखाता अग्रं यातावि‌लम्बिनः।
यूयं सदाप्रभुं दूराद् अनुसंस्मर्त्तुमर्हथ।
युष्माकं हृदयाकाशे यिरूशालम् उदेतु च॥
५१ लज्जापन्ना वयं यस्मात् कथामश्रौष्म निन्दकां।
व्रीडया च समाच्छन्नं विद्यतेऽस्माकमाननं॥
यतो हेतो र्विदेशीयै र्दैष्टभि र्नः सदाप्रभोः।
मन्दिरान्तराः सर्व्वा लङ्घिताः पुण्यभूमयः॥
५२ तस्मात् सदाप्रभु र्ब्रूते पश्यागच्छन्ति वासराः।
येषु तद्विग्रहेभ्योऽहं प्रदास्याम्युचितं फलं।
तस्या देशे च सर्व्वत्र स्तनिष्यन्त्याहता जनाः॥
५३ बाबिल् किं गगनारूढा दुर्गोच्चत्वाद् दुराक्रमा।
मत्तस्तु ध्वंसकास्तस्या आयास्यन्तीति वाक् प्रभोः॥
५४ श्रूयते विपदार्त्तानां रावो बाबिल उद्गतः।
महाभङ्गस्य शब्दश्चोदेति कल्दीयदेशतः॥
५५ यतो बाबिलमुच्छिन्नां विदधाति सदाप्रभुः।
तस्या मध्याच्च तेनैव महाघोषः प्रशाम्यते॥
प्रध्वनन्त्यूर्म्मयस्तेषां महतीनाम् अपामिव।
तेषाञ्च सिंहनादस्य प्रोच्च उद्गच्छति स्वनः॥
५६ आयातो ध्वंसकस्तस्या आयातो बाबिलं प्रति।
वीरा वन्दीकृतास्तस्यास्तेषां चापाश्च खण्डिताः॥
कर्म्मशोधी यतो हेतोरीश्वरोऽस्ति सदाप्रभुः।
यस्य यच्च फलं योग्यं तस्मै तत् प्रददाति सः॥
५७ पतीन् विद्वज्जनान् तस्याः प्रभून् शास्तॄन् सयोधिनः।
अहं मत्तान् करिष्यामि ते सुप्ता नित्यनिद्रया।
न पुन र्जागरिष्यन्तीति राजा व्याजहार सः।
यस्येदं विद्यते नाम वाहिनीनां सदाप्रभुः॥
५८ पुनश्चेदं वचो ब्रूते वाहिनीनां सदाप्रभुः।
प्राचीरं बाबिलः प्रस्थं हृतसज्जं पतिष्यति।
तस्या द्वाराणि चोच्चानि भस्यन्ते हव्यवर्त्मना॥
इत्यश्चावस्तुमात्रायानुष्ठितो जातिभिः श्रमः।
साधितश्चाग्निमात्राय प्रजावृन्दैः क्लमातुरैः॥

यिहूदीयराजस्य सिदिकियस्य राजत्वस्य चतुर्थवत्सरे यदा मह्सेयस्य ५९
पौत्रो नेरियस्य पुत्रः सिराय इतिनामा सेनानिवेशाध्यक्षस्तेन राज्ञा
सह बाबिलमगच्छत् तदा भाववादी यिरिमियस्तं यद् वाक्यम् आदि-
क्षत् तस्य वृत्तान्तोऽयं। यत् सर्व्वम् अमङ्गलं बाबिलमाक्रमिष्यति तद्वा- ६०
क्यान्यर्थतो बाबिलो विरुद्धानि यान्येतानि वाक्यानि लिलिखिरे तानि
सर्व्वाणि यिरिमिय एकस्मिन् पत्रेऽलेखीत्। ततः परं यिरिमियस्तं ६१
सिरायमवादीत्, यदा त्वं बाबिल्युपस्थितो भविष्यसि, तदा सर्व्वाण्ये-
तानि वाक्यान्यालोक्य पठिष्यसि, इत्यञ्च भाषिष्यसे, हे सदाप्रभो, ६२
अत्र यथा न मनुष्यस्य न पशोर्वा वसतिर्भवेत् केवलम् अनन्तकालं
यावत् सर्व्वम् उच्छिन्नं तिष्ठेत् तथैवैतस्य स्थानस्योत्कर्त्तनाय वाक्यं त्वया-
गादीति। अपरम् एतत्पत्रस्य पठने समाप्ते त्वं तेन सह प्रस्तरमेकं बद्ध्वा ६३
तत् फरातनद्या मध्यं निक्षेप्स्यसि, वाक्यमिदञ्च गदिष्यसि, ६४

मङ्क्ष्यतीत्थमियं बाबिल् नैवोत्थास्यति सा पुनः।
मया सा प्रापितानिष्टं तज्जनाश्चावसन्नतां॥

इति यिरिमियस्य वाक्यानि समाप्तानि।

---

५२ द्विपञ्चाशोऽध्यायः।

१ सिद्‌किियेन बाबिलीयनृपस्याज्ञालङ्घनं ४ यिरूशालमो रोधनं पराजयो दाहनं लोकानां बाबिलं नयनं २८ वन्दिलोकानां संख्या ३१ यिहोयाखीनस्योन्नतिश्च।

सिदिकिय एकविंशतिवत्सरवयस्कः सन् राजत्वं कर्त्तुं प्रारभ्यैका- १
दशवत्सरान् यावद् यिरूशालमे राजत्वं चकार। लिब्नानिवासिनो
यिरिमियस्य हमूटल्नाम्नी दुहिता तस्य प्रसूरासीत्। स यिहोयाकीमस्य २
निखिलकर्म्मानुसारात् सदाप्रभोः साक्षात् कुत्सिताचारं चकार। यतो ३
यिरूशालमनगरं यिहूदावंशञ्च प्रति सदाप्रभोः क्रोधात् तौ यत् तस्य
सम्मुखाद् दूरीभवेताम् एतदर्थम् एतादृशी दशा जघटे। अपरं सि-
दिकियो बाबिलीयराजस्याधीनत्वम् अनङ्गीकृतवान्।

अनन्तरं तस्य राजत्वस्य नवमवत्सरे दशममासस्य दशमे दिने बाबि- ४
लीयमहीपतिर्निबूखद्नित्सरस्तस्य निखिलसैन्यानि च यिरूशालमस्य
विरुद्धं समेत्य शिविरं स्थापयाञ्चक्रिरे तस्य चतुर्दिक्षु दुर्गाणि निर्म्म-
मिरे च। सिदिकियस्यैकादशं राजत्ववत्सरं यावत् नगरं रुध्यमानं ५

६ तस्थौ। ततश्चतुर्थमासस्य नवमे दिने नगरे महादुर्भिक्षं बभूव जन-
पदस्य मनुजानां निमित्तं भक्ष्यं किमपि नासीत्।
७ अनन्तरं नगरे भग्नत्वं गते सर्व्वे योद्धारः पलायनं विधाय निशायां
नगरमध्यतो निष्क्रम्य राजोद्यानस्य समीपस्थयो र्द्वयो र्भित्त्यो र्द्वारस्य
मार्गेण प्रान्तरगामिनं पन्थानं जग्मुः किन्तु कल्दीयाश्चतुर्दिक्षु नगरम्
८ अवेष्टन्त। परन्तु कल्दीयानां बलानि राज्ञः पश्चाद् धावित्वा यिरीहोः
प्रान्तरे सिदिकियं प्रापुस्ततस्तस्य निखिलसैन्यानि तस्य सन्निधितो व्यकी-
९ र्य्यन्त। ततस्ते राजानं धृत्वा हमातदेशस्थरिब्लां बाबिलीयराजस्यान्तिकं
१० निन्युः स च तस्य विचारनिष्पत्तिं चकार। अपरं बाबिलीयराजः सि-
दिकियस्य समक्षं तस्य तनयान् घातयामास यिहूदायाः सर्व्वकुलीनानपि
११ रिब्लायां घातयामास। सिदिकियस्य लोचने चोत्पाट्य पित्तलीयनिगडैस्तं
बन्धयामास। बाबिलीयराजश्च तं बाबिलं नीत्वा मरणदिनपर्य्यन्तं शास-
नागारे निरुरोध।
१२ अपरञ्च पञ्चममासस्य दशमदिने बाबिलीयमहीपते र्निबूखद्नित्सर-
स्योनविंशे राजत्ववत्सरे बाबिलीयराजस्य प्रत्यक्षमधिष्ठितो रक्षकसे-
१३ नानाम् अध्यक्षो निबूषरदनो यिरूशालममागत्य सदाप्रभो र्मन्दिरं
राजसदनं यिरूशालमस्य निखिलगृहाणि च दाहयामास विशेषतो
१४ वृहदट्टालिकाः सर्व्वा वह्निना दाहयामास। अपरं तस्य रक्षकसेनाप-
तेरनुगामिन्यः कल्दीयसेना यिरूशालमस्य चतुर्दिक्षु प्राचीरम् अभञ्जन्।
१५ ततः परं कतिपया निःस्वजना नगरेऽवशिष्टाः शेषजना बाबिलीयनर-
पतेः पक्षं गताः पलातका अवशिष्टा जनपदाश्च रक्षकसेनाध्यक्षेण निबू-
१६ षरदनेन प्रवासयाञ्चक्रिरे। केवलं द्राक्षाक्षेत्रसेचनाय भूमिखननाय च
कतिपया दुर्गतजना रक्षकसेनाधिपतिना निबूषरदनेन शेषयाञ्चक्रिरे।
१७ अपरं कल्दीयैः सदाप्रभो र्मन्दिरे स्थितौ पित्तलमयौ स्तम्भौ पीठानि
सदाप्रभो र्मन्दिरे स्थितं पित्तलमयं सागरपात्रञ्च खण्डं खण्डं विधाय
१८ तेषां कृत्स्नपित्तलं बाबिलं निन्ये। अपरम् स्थाल्यो दर्व्यो वर्त्तिकाकर्त्तिन्यः
कुण्डानि चमसाश्चेत्यादीनि यावन्ति सेवार्थकानि पित्तलमयभाजना-
१९ न्यासन् तानि सर्व्वाणि तैरपहृतानि। भाण्डवह्निपात्रकुण्डस्थालीदी-
पाधारचमसनिषेकार्थपात्राणां मध्ये स्वर्णपात्राणां सुवर्णानि रूप्यपा-
२० त्राणां रूप्याणि च रक्षकसेनापतिना हृतानि। सदाप्रभो र्मन्दिरस्य कृते
राजा सुलेमान् यत् स्तम्भद्वयं सागरपात्रमेकञ्च पीठरूपाश्च पित्तलमया

या द्वादश गा निर्म्मितवान् तेषां सर्व्वेषां पात्राणां पित्तलान्यपरिमेयाण्या-
सन्। तयोः स्तम्भयोरेकस्योच्चत्वम् अष्टादशहस्तपरिमितं, द्वादशहस्तप- २१
रिमितं सूत्रञ्च तमवेष्टत, तदीयधातोः स्थूलता चतुरङ्गुलिपरिमिता, स
त्वन्तःशून्य आसीत्। तदुपरि च पित्तलीयमूर्द्धा आसीत्, एकस्य मूर्द्ध उ- २२
च्चता पञ्चहस्तपरिमिता। तत्र मूर्द्ध्नि जालाकृतिः परितश्च दाडिम्बफला-
न्यासन्। तत्साकल्यं पित्तलमयं। द्वितीयस्य स्तम्भस्यापि तत्समाना नि-
र्म्मिति र्दाडिम्बफलानि चासन्। दिशां सम्मुखानि षण्णवतिदाडिम्बफला- २३
न्यविद्यन्त, साकल्यतस्तत्र जालाकृतौ परितः शतदाडिम्बफलान्यासन्।
अनन्तरं रक्षकसेनापतिः प्रधानयाजकं सिरायं द्वितीयं याजकं २४
सिफनियं त्रीन् द्वारपालांश्च दधार। अपरं नगरमध्याद् स योद्धृणाम् २५
अध्यक्षमेकं राजपुरुषं नगरे लब्धान् राजसभासदः सप्तजनान् जनपदी-
यसेनानाम् अध्यक्षं सेनागणयितारं लेखकमेकं नगरे लब्धान् जनपदी-
यषष्टिजनांश्च दधार। रक्षकसेनापति र्निबूषरदनस्तान् धृत्वा रिब्लां २६
बाबिलीयनरपतेः सन्निधिं निनाय। अनन्तरं बाबिलीयो नरेश्वरो २७
हमातदेशस्थायां रिब्लायां तान् ताडयित्वा मारयामास। इत्थं यिहूदा-
वंशीयलोका निजदेशाद् दूरे प्रवासयाञ्चक्रिरे।
निबूखद्नित्सरेण प्रवासार्थम् अपनीतानां जनानां संख्येयं। सप्तम- २८
वत्सरे यिहूदीयानां त्रयोविंशत्यधिकानि त्रीणि सहस्राणि। निबूख- २९
द्नित्सरस्याष्टादशे वत्सरे यिरूशालम्निवासिनां द्वात्रिंशदधिकान्यष्टश-
तानि। निबूखद्नित्सरस्य त्रयोविंशे वत्सरे च रक्षकसेनाधिपति र्निबूष- ३०
रदनो यिहूदीयानां पञ्चचत्वारिंशदधिकानि सप्तशतानि जनान् प्रवासा-
र्थम् अपनिनाय। जनानां साकल्यं षट्शताधिकानि चतुःसहस्राणि।
अपरं यिहूदावंशीयनृपस्य यिहोयाखीनस्य प्रवासस्य सप्तत्रिंशवत्स- ३१
रस्य द्वादशमासस्य पञ्चविंशे दिवसेऽर्थतो बाबिलीयनृप इविल्मिरो-
दको यस्मिन् राजत्वं कर्त्तुम् आरेभे तस्मिन् वत्सरे स यिहूदीयराजस्य
यिहोयाखीनस्य मूर्द्धानम् उन्नम्य तं कारागेहतो मोचयामास। अपरं ३२
तं प्रति प्रीत्यालापं चकार यावन्तो भूपतयश्च तेन समं बाबिल्यासन्
तेषां सर्व्वेषाम् आसनेभ्यस्तस्मै श्रेष्ठम् आसनं ददौ, तदीयानि कारावस- ३३
नानि परिवर्त्तयामास च, ततः स यावज्जीवनं तेन समं भोजनपानेऽकु-
रुत। अपरं तस्य कृते आमरणदिनाद् नित्यवृत्तौ बाबिलो राज्ञा निरू- ३४
पितायां तस्य यावज्जीवनं प्रतिदिनं नित्यजीवनोपायस्तस्मै व्यश्राणत।

यिरिमियस्य विलापसंहिता ।

१ प्रथमोऽध्यायः ।

१ पापहेतो यिरूशालमो दुर्द्दशा १२ तस्या विलापकथा १८ ईश्वरस्य न्यायतास्वीकारश्च ।

१ कथमेका समासीना नगरी प्रचुरप्रजा ।
जातीनां या गरिष्ठासीत् सा जाता विधवोपमा ।
देशानां या महिष्यासीत् सा जाता करदायिनी ॥
२ उग्रं क्रन्दति सा नक्तं तद्गण्डौ चाश्रुणाप्लुतौ ।
सर्व्वेषां कामिनां तस्या नैकोऽप्यस्ति प्रियंवदः ।
तां प्रलभ्य च मित्राणि तस्या विद्वेषिणोऽभवन् ॥
३ क्लेशात् प्रचुरदास्याच्च यिहूदाभूत् प्रवासिता ।
जातीनां मध्य आसीना सा न प्राप्नोति विश्रमं ।
तत्पश्चाद्धावकाः सर्व्वे तां प्रापुः सङ्कटे स्थले ॥
४ मार्गाः शोचन्ति सीयोनो वर्ज्जिताः पर्व्वगामिभिः ।
तस्या द्वाराणि शून्यानि याजका निष्टनन्ति च ।
कन्यास्तस्या विषीदन्ति विक्लवास्ति च सा स्वयं ॥
५ श्रैष्ठ्यं तत्पीडकाः प्रापुस्तस्याश्च द्वेषिणः श्रियं ।
यतस्तत्पापबाहुल्यात् तां चिक्लेश सदाप्रभुः ।
प्रवासं शिशवस्तस्याः पीडकस्याग्रतो गताः ॥
६ सीयोनाख्यकुमार्य्या हि विगता निखिला प्रभा ।
कुलीना अभवंस्तस्यास्तृणहीना मृगा इव ।
ते स्वानुधावकस्याग्रे विप्रगच्छन्ति निर्बलाः ॥
७ यिरूशालम् स्वदुःखस्यापनोदस्य च वासरे ।
सकलं पूर्व्वकालस्य काम्यवस्तु समस्मरत् ॥
पीडकानां करैस्तस्या न्यपतंस्तु प्रजा यदा ।
उपकारी जनस्तस्यास्तदा नैकोऽप्यविद्यत ।
द्विषस्तां तादृशीं दृष्ट्वा तस्या उत्सादनेऽहसन् ॥
८ कृतपापा यिरूशालम् जाता साशौचिनी ततः ।

पूजकै र्गर्ह्यते सर्व्वैस्तस्याः सन्दृश्य नग्नतां ।
निश्वसन्ती स्वयं सापि व्यपयाति पराङ्मुखी ॥
अञ्चलेऽस्ति रजस्तस्या नास्मरत् सा फलोदयं । ९
अत्याश्चर्य्यं न्यपप्तत् सा न सान्त्वयति कोऽपि तां ।
हे प्रभो पश्य मद्दुःखं यतो द्वेषी विकत्थते ॥
काम्यवस्तुषु सर्व्वेषु तस्या द्वेष्यार्पयत् करं । १०
त्वत्समाजप्रवेशाद् ये वारिता आज्ञया तव ।
विष्टं स्वपुण्यगेहं तै र्विजातीयै र्ददर्श सा ॥
विश्वसन्ति जनास्तस्याः सर्व्वे भक्ष्यानुकाङ्क्षिणः । ११
खाद्यार्थं प्राणरक्षायै काम्यवस्तूनि ते ददुः ।
हे प्रभो पश्य वीक्षस्व हीनीभूता यतोऽस्म्यहं ॥
हे अध्वगामिनो यूयं सकलाः किं निरुत्सुकाः । १२
यूयमालोच्य वीक्षध्वं मयि यद्दुःखमर्पितं ।
तेन मामकदुःखेन समानं दुःखमस्ति किं ।
स्वकोपोद्दीपनस्याह्नि यतो मां क्लिष्टवान् प्रभुः ॥
ऊर्द्धात् सम्प्रेष्य वह्निं स ममास्थीन्युदशोषयत् । १३
बद्ध्वा जालेन मत्पादौ माम् अनैषीत् पराङ्मुखीं ।
निर्जनां मामकार्षीच्च विषण्णां कृत्स्नवासरं ॥
रचयित्वापराधान्मे तत्करेण युगं कृतं । १४
संश्लिष्टैस्तैः स मद्ग्रीवां बद्धाक्षैषीद् बलं मम ।
यस्य रोधो मयाशक्यस्तत्करे मामदात् प्रभुः ॥
मम मध्ये स्थितान् सर्व्वान् वीरान् निराकरोत् प्रभुः । १५
मम यूनाञ्च भङ्गायाघोषयन्मद्द्विषां सभां ।
द्राक्षाकुण्डे यिहूदाख्यां कुमारीमपिषत् प्रभुः ॥
क्रन्देऽहं तत्र मच्चक्षु र्मच्चक्षुः स्रावयत्यपः । १६
दूर आश्वासको मत्तो प्राणसञ्जीवको मम ।
मत्पुत्रा अभवन् नष्टा विद्वेषी प्राभवद् यतः ॥
सीयोन् कृताञ्जलि र्भाति न सान्त्वयति कोऽपि तां । १७
याकूबं परितो रोद्धुं तच्छत्रूनादिशत् प्रभुः ।
तेषां साक्षाद् यिरूशालम् प्रतिभाति कलङ्किता ॥
स तु नित्यप्रभु र्न्याय्यस्तद्दिष्टोल्लङ्घिण्यहं यतः । १८

हे वंशाः सकला यूयं श्रुत्वा पश्यत मद्व्यथां।
युवत्यो मे युवानश्च प्रवासायापनिन्यिरे॥
१९ कामिनो मे मयाहूता विप्रालम्भिषि तैस्त्वहं।
याजका मे पुरोगाश्च पुरीमध्येऽत्यजन्नसून्।
खाद्यं स्वप्राणरक्षार्थं वृथैवान्वगयन्त ते॥
२० भो प्रभो पश्य दीनाहं ममान्त्रं परितप्यते।
अन्तर्व्यकारि मच्चित्तं यस्माद् द्रोहो मया कृतः।
वहिः खड्गः प्रजा हन्ति मृत्युस्तु स्वयमन्तरे॥
२१ जनाः शृण्वन्ति रावं मे न सान्त्वयति कोऽपि मां।
द्वेषिणो मम यावन्तः सर्व्वेऽश्रौषु र्ममापदं।
त्वञ्च तां कृतवांस्तस्माद् आनन्दं ते प्रकुर्व्वते।
दिनं त्वानेष्यसि ज्ञप्तं ते भविष्यन्ति मत्समाः॥
२२ कृत्स्ना तेषाञ्च दुर्वृत्तिस्त्वत्प्रत्यक्षीभविष्यति।
सर्व्वेषां मद्धर्म्माणां हेतो मां प्रति यादृशं।
कर्म्माकार्षीश्च तादृक् त्वं तान् प्रत्यपि करिष्यसि।
यतो भूरि र्ममोच्छ्वासो मम चित्तञ्च सामयं॥

---

२ द्वितीयोऽध्यायः।

१ यिरूशालमो दुःखाद् यिरिमियस्य विलापकथनं २० ईश्वरस्य सन्निधौ तस्य दुःखप्रकाशश्च।

१ कथं प्राच्छादयत् कन्यां सीयोनं कोपतः प्रभुः।
इस्रायेलः प्रभां स्वर्गाद् भूतले स न्यपातयत्।
स निजं पादपीठञ्च नास्मरत् क्रोधवासरे॥
२ प्रभु र्जग्रास याकूबः सर्व्ववासान् कृपां विना।
स यिहूदाकुमार्य्याश्च दुर्गाणि क्रोधतोऽभिदत्।
भूमिसात्कृत्य राज्यञ्च तत्पतींश्च व्यदूषयत्॥
३ इस्रायेलोऽखिलं शृङ्गं सोऽच्छिदद् रोषतापतः।
दक्षिणं वैरिणः साक्षात् स्वं प्रत्यावर्त्तयत् करं।
दाहयामास याकूबं सर्व्वाग्निज्वलदग्निवत्॥
४ चापं द्वेषीव विस्फार्य्य स्थिरीकृत्यारिवत् करं।

स नेत्रानन्दकान् सर्व्वान् मनुष्यान् अभ्यदूषयत्।
रोषं सीयोनकुमार्य्याश्च दूष्येऽपातयदग्निवत्॥
प्रभु र्वैरिसमो भूत इस्रायेलम् उपाग्रसत्। ५
सर्व्वं तस्याग्रसद् हर्म्म्यं तस्य दुर्गाण्यनाशयत्।
व्यथां शोकञ्च कन्याया यिहूदाया अवर्धयत्॥
उद्यानस्येव तस्याश्च प्रावृतिं स व्यलोपयत्। ६
निजमेवोत्सवस्थानं स च व्यध्वंसयत् स्वयं।
पर्व्वविश्रामवारान् सोऽकार्षीत् सीयोनि चास्मृतान्।
क्रोधावेशेन राजानं याजकञ्च निराकरोत्॥
स्ववेदिं प्रभुरत्याक्षीत् स्वपुण्यौको न्यगर्हयत्। ७
तद्धर्म्याणाञ्च प्राचीरं शत्रुहस्ते समार्पयत्।
यद्वत् पर्व्वदिने तद्वत् प्राणदंस्ते प्रभो र्गृहे॥
सालान् सीयोनकन्याया निर्भेत्तुं कल्पना प्रभोः। ८
सोऽतानीत् सूत्रमुच्छेदाद् हस्तं नैव न्यवर्त्तयत्।
शोचिते खातप्राचीरे तेनैकत्रावसीदतः॥
भूमिमध्ये निमग्नान्यभवंस्तद्गोपुराणि च। ९
अर्गलान्यपि तस्याः स नाशयित्वा व्यखण्डयत्।
राजा तस्याः पुरोगाश्च परदेशप्रवासिनः।
शास्त्रं न विद्यते तत्र तस्या ये भाववादिनः।
ते सदाप्रभुना दत्तं दर्शनं नाप्नुवन्ति च॥
स्तब्धाः सीयोनकन्यायाः प्राचीना आसते भुवि। १०
धूलिस्तै र्निहिता मूर्द्ध्नि बद्धा शाणेन तैः कटिः।
यिरूशालमीयकन्याश्चाभूतलान्नतमस्तकाः॥
क्षीयेते मेऽश्रुभि र्नेत्रे ममान्त्रं परितप्यते। ११
शून्यीभूतं यकृद् भूमौ मत्प्रजायाः प्रभञ्जनात्।
पुरीवीथिषु मूर्च्छातः शिशोः स्तनन्धयस्य च॥
गोधूमाः कुत्र मद्यञ्चेति स्वमातॄ र्वदन्ति ते। १२
वदन्तः पुरमार्गेषु मूर्च्छां यान्त्याहता इव।
मातृक्रोडे निजप्राणान् युगपद् विसृजन्ति वा॥
भो कुमारि यिरूशालम् किं मयोक्ता शमिष्यसि। १३
उपमा वा त्वदर्थं का मया प्रयोजयिष्यते॥

हे सीयोन्दुहितः कन्ये केन त्वामुपमाय वा।
तव शोकापहारस्य सिद्धिः कारिष्यते मया॥
तव भङ्गो यतो हेतो र्महासागरवन्महान्।
चिकित्सां तव कर्त्तुं वा को जनः सक्षमो भवेत्॥
१४ व्यर्थं वदन्त्यसारञ्च स्वप्नं त्वां भाववादिनः।
त्वद्दास्यप्रतिकाराय न विवृण्वन्त्यघं तव।
व्यर्था भ्रान्त्यावहाश्च त्वां भावोक्ती र्ज्ञापयन्ति ते॥
१५ त्वामुद्दिश्याध्वगाः सर्व्वे ददते हस्ततालिकं।
यिरूशालमकुमार्य्याश्च शीशशब्दं प्रकुर्व्वते।
चालयन्तः शिरश्चाहुः किमियं सा पुरी भवेत्।
ख्याता या पूर्णसौन्दर्य्या कृत्स्नच्छित्याश्च नन्दना॥
१६ त्वामधि व्यात्तवक्त्राश्च सर्व्वे सन्त्यरयस्तव।
शीशशब्दं प्रकुर्व्वाणा घर्षन्तश्च रदान् रदैः।
ते वदन्ति न्यगालिष्म यच्चास्माभिः प्रतीक्षितं।
अद्य तद्दिनमायातं प्राप्यस्माभिरदर्शि च॥
१७ यत् कर्त्तुं चिन्तयामास तदकार्षीत् सदाप्रभुः।
निजञ्चासीद्यद् वाक्यं निर्द्दिष्टं पूर्व्वकालतः॥
निर्द्दयो निरभैत्सीत् त्वां शत्रुञ्चाहर्षयत् त्वयि।
त्वत्शत्रूणां विषाणञ्च प्रापयत् स समुच्छ्रयं॥
१८ प्रभुमुद्दिश्य लोकानां चित्तमुच्चैः प्ररोदिति।
हे सीयोनाख्यकन्यायाः प्राचीर त्वम् अहर्निशं।
स्रोतोवत् स्रावयाश्रूणि विरतिं तत्र मा कुरु।
मानुजानीहि विश्रान्त्यै स्वनेत्रस्य कनीनिकां॥
१९ उत्तिष्ठ क्रन्द यामिन्यां प्रहराणाम् उपक्रमे।
स्वान्तमुत्सृज वारीव स्वप्रभो र्दृष्टिगोचरे।
स्वशिशूनाञ्च प्राणांस्त्वं प्रार्थयस्व कृताञ्जलिः।
सर्व्वासां वीथिनामग्रे मूर्च्छितानां बुभुक्षया॥
२० हे प्रभो पश्य वीक्षस्व कं प्रतीदं त्वया कृतं।
किं स्वगर्भफलं नार्य्योऽश्नीयुः स्वलालितान् शिशून्।
किं याजी भाववादी च घात्यौ पुण्यालये प्रभोः॥
२१ बालो वृद्धश्च मार्गेषु शयाते भूमिसात्कृतौ।

युवत्यो मे युवानश्च न्यपतन्नसिना हताः ।
स्वक्रोधस्य दिने यस्माद् अवधीस्त्वं कृपां विना ॥
त्रासाः पर्व्वदिनायेवाहूता मत्परितस्त्वया । २२
प्रभोः कोपदिने शेषो रक्षितः कोऽपि नाभवत् ।
लालयित्वाववर्धं यान् उच्छिन्नास्ते ममारिणा ॥

---

३ तृतीयोऽध्यायः ।

१ नानादुःखाद् विलापः २१ दुःखसहनायोपदेशकथनं ३७ ईश्वरीयन्यायस्वीकार उद्धारार्थं प्रार्थनं रिपुविनाशकथनञ्च ।

नरोऽहं दृष्टदौर्गत्यस्तदीयामर्षदण्डनात् । १
मां नयन्नन्धकारं स न चालोकमवापयत् । २
मयि कृत्स्नदिनं तस्य विपक्षो वर्त्तते करः ॥ ३
जरिते चर्म्ममांसे मे भग्नान्यस्थीनि तेन च । ४
समन्तात् तेन रुद्धोऽहं विषाधिभ्याञ्च वेष्टितः । ५
वासितश्च तमःस्थाने चिरप्रेतजना इव ॥ ६
मां रुरोध स प्रावृत्या न शक्यो मम निर्गमः । ७
निगडै माम् अभान्त्सीत् स सभारैस्ताम्रनिर्म्मितैः ।
क्रन्दतोऽपि मम प्रोच्चैः प्रार्थनां संरुणद्धि सः । ८
तक्षितप्रस्तराणाञ्च प्रावृत्या मेऽरुधत् पथः । ९
सकलान् मम मार्गांश्च सोऽकार्षीद् वक्रगामिनः ॥
मत्कृते गूढभल्लः स सिंहो वा रहसि स्थितः । १०
मन्मार्गानन्यथा कृत्वा मां भित्त्वा स व्यनाशयत् । ११
स्वकोदण्डं स विस्फार्य्य मां शरव्यमिव व्यधात् ॥ १२
स्वतूणीरसुतै र्बाणैर्व्याप्सीन्मम मर्म्म च । १३
सर्व्वेषां बान्धवानां मे जातोऽहं हास्यभाजनं । १४
कृत्स्नमेव दिनं यावत् तेषां गानस्य चास्पदं ।
स माञ्चाभूभुजत् तिक्तम् अपीप्यच्चेन्द्रवारुणीं ॥ १५
शर्कराचूर्णदन्तं मां सोऽकार्षीत् भस्मशायिनं । १६
क्षेमात् त्वं मन्मनोऽपास्यस्तेनाहं व्यस्मरं सुखं । १७
मयोचे विगताशा मे प्रतीक्षा च सदाप्रभौ ॥ १८

१९ स्मर मे दुर्गतिभ्रंशाविन्द्रवारुणिकाविषे।
२० तानि स्मरति मच्चित्तं मदन्तश्चावसीदति॥
२१ मनसेदं त्ववेक्ष्येऽहं तेनाशा जायते मम॥
२२ प्रभोरेव कृपाधिक्यान्न निःशेषोकृता वयं।
यस्मान्नैव क्षयं प्राप्तोऽद्यापि तत्करुणानिधिः॥
२३ प्रातः प्रात र्नवीना सा प्रचुरा तव सत्यता।
२४ प्रभु र्मामकदायांश इति ब्रूते मनो मम।
ततो हेतो र्मया तस्मिन् आशा समर्पयिष्यते॥
२५ प्रभुं ये सम्प्रतीक्षन्ते स तेभ्यो मङ्गलप्रदः।
यत् तं मृगयते चित्तं तस्य क्षेमकरोऽस्ति सः॥
२६ प्रतीक्षा सशमा क्षेमा प्रभुतस्त्राणकाङ्क्षिणे।
२७ युगस्य वहनं बाल्ये पुरुषाय फलप्रदं॥
२८ एकाक्यास्तां स निःशब्दो यतस्तेनार्पितो धुरः।
२९ स्पृशत्वास्येन धूलिं स आशा किं स्यादिति ब्रुवन्।
३० गण्डं दद्यात् प्रहर्त्रे स निन्दया च प्रपूर्य्यतां॥
३१ यस्मान्न नित्यकालार्थं सम्परित्यजति प्रभुः।
३२ क्लेशयित्वापि कारुण्यं कृपाधिक्यात् करोति सः।
३३ न कामात् स नृसन्तानान् क्लिश्नात्यार्त्तीकरोति वा॥
३४ पृथिव्या वन्दयः सर्व्वे मृद्यन्ते चरणै र्यदा।
३५ सर्व्वश्रेष्ठस्य साक्षाद्वा नरस्यार्थो विकार्य्यते।
३६ पीड्यतेऽर्थी विचारे वा न प्रसन्नस्तदा प्रभुः॥
३७ प्रभोराज्ञां विना केनोदीरिता वाक् प्रसिध्यति।
३८ सर्व्वश्रेष्ठस्य वक्त्राद्वा किं नोदेति शुभाशुभं।
३९ कुतो जीवं जनो निन्देत् निजपापं स निन्दतु॥
४० स्वमार्गान् वीक्ष्य निर्णीय प्रत्यायाम प्रभुं प्रति।
४१ स्वर्गेशं प्रति चित्तानि प्रोन्नयाम करैः सह।
४२ पापद्रोहै र्वयं लिप्तास्तत्र त्वं नाकरोः क्षमां॥
४३ कोपाच्छन्नस्त्वनुद्रुत्यावधीरस्मान् कृपां विना।
४४ आत्मानञ्चावृणो र्मेघैरभेद्यैः प्रार्थनांशुना।
४५ जातीनां मध्य उच्छिष्टान् अस्मांस्त्वं वर्जितान् व्यधाः॥
४६ तिष्ठन्त्यस्मद्द्विषः सर्व्वे व्यात्तास्या अस्मदन्तिके।

कम्पस्त्रासो विनाशश्च भङ्गश्चास्मासु वर्त्तिताः। ४७
मज्जाते र्दुहितु र्भङ्गात् मद्दृष्टि र्निम्नगाभवत्॥ ४८
मन्नेत्रं स्यन्दतेऽश्रान्तं विरतिस्तत्र नास्ति हि। ४९
स्वर्गात् सदाप्रभो र्दृष्टौ दृक्पातं तत् प्रतीक्षते। ५०
मत्पुर्य्याः सर्व्वकन्यासूपहन्त्यक्षि मनो मम॥ ५१
यै र्विनाकारणं द्विष्येऽनुधाव्ये तैः खगो यथा। ५२
मत्प्राणांस्तेऽरुधन् कूपे मदूर्द्धे च शिलां न्यधुः। ५३
शीर्षं मेऽप्लावयंश्चाप उच्छिन्नोऽस्मीति चागदं॥ ५४
तस्माद् गभीरकूपात्त्वहं त्वन्नामाकृयं प्रभो। ५५
मम रावस्त्वयाश्रावि मदीयोच्छ्वासरोदनात्। ५६
इदानीमपि कर्णौ त्वं नोपसंहर्त्तुमर्हसि॥
यस्मिंस्त्वामाकृयं तस्मिन् दिने त्वं निकटोऽभवः। ५७
माभैषीरिति वाक्यञ्च तदा मां प्रत्यभाषथाः॥
प्रभो त्वं मम प्राणानां विवादान् निरवाहयः। ५८
मदीयजीवनस्यापि मुक्तिदाताभवः स्वयं॥
त्वमन्यायं मया भुक्तं दृष्टवान् हे सदाप्रभो। ५९
मामकीनविचारञ्च त्वं विनिर्णेतुमर्हसि॥
त्वं तेषां दृष्टवान् हिंसां सर्व्वचिन्ताश्च मामधि॥ ६०
प्रभो त्वं श्रुतवांस्तेषां निन्दां चिन्ताश्च मामधि। ६१
वाचो मद्वैरिणां तेषां नित्यचेष्टाश्च मामधि। ६२
पश्योपवेशनोत्थानं तेषां गीयेऽहमेव तैः॥ ६३
प्रभो देहि फलं तेभ्यो हस्तानां कर्म्मणः समं। ६४
देहि चित्तस्य जाड्यञ्च त्वच्छापस्तेषु वर्त्ततां। ६५
तान् कोपेनानुधावंस्त्वोच्छिन्धि प्रभो दिवस्तलात्॥ ६६

---

४ चतुर्थोऽध्यायः।

१ सीयोनः क्षते विलापकथनं १३ स्वेषां पापाङ्गीकारः २१ इदोमीयजनानां दण्डस्य भविष्यद्वाक्।

कथं हीनप्रभं स्वर्णं विकृतं शुद्धकाञ्चनं। १
पुण्यरत्नानि सर्व्वस्मिन् विक्षिप्तानि चतुष्पथे॥

२ हिमतुल्या महामूल्याः सीयोनो नन्दनाः कथं।
मृद्भाण्डा इव गण्यन्ते कुलालकरनिर्म्मिताः॥
३ क्रोष्ट्र्योऽपि स्तनमुच्छाद्य पाययन्ति स्वशावकान्।
युवती मत्प्रजा क्रूरा प्रान्तरस्थोष्ट्रपक्षिवत्॥
४ तृष्णया दुग्धपोष्यस्य जिह्वा तालुनि सज्यते।
याचन्ते शिशवः पूपं नास्ति पूपविभागकृत्॥
५ विशिष्टान्नस्य भोक्तारो व्यवसीदन्ति वीथिषु।
आबाल्याद् राजवेशा येऽवस्करं संश्रयन्ति ते॥
६ यत् सिदोमं क्षणाद् ध्वस्तमनाक्रान्तं नृणां करैः।
तस्य पापान्महत् पापं मत्प्रजादुहिताकरोत्॥
७ अभिषिक्ता जनास्तस्या हिमादासन् सुनिर्म्मलाः।
दुग्धाच्छुभ्राः प्रबालेभ्यो रक्ताङ्गा नीलरूपिणः॥
८ तान् मसीतोऽपि कृष्णास्यान् न जानन्ति जनाः पथि।
तेषां चर्म्मास्थिसंसक्तं शुष्कीभूतञ्च काष्ठवत्॥
९ ये जनाः क्षुधया विद्धाः क्षेमास्तेभ्योऽसिना हताः।
क्षुद्विद्धास्तेऽवसीदन्ति वर्जिताः क्षेत्रजैः फलैः॥
१० स्वहस्तैः सदया नार्य्यो निजापत्यानि पेचिरे।
तासां भक्ष्याणि तान्यासन् मत्प्रजादारिकापदि॥
११ प्रभुः स्वक्रोधमापूर्य्य रोषवह्निमवीवृषत्।
सीयोन्यज्वालयच्चाग्निं दग्धास्तेन तदालयाः॥
१२ यिरूशालमपुरद्वारं शत्रुद्विड्भिः प्रवेक्ष्यते।
न प्रत्यैच्छन्त तद् भूपा न भूमण्डलवासिनः॥
१३ सिद्धं तद् भाववक्तॄणां पापै र्दोषैश्च याजिनां।
साधूनां रक्तपातं ये मध्ये तस्या अकुर्व्वत॥
१४ अन्धा मार्गेषु तेऽभ्राम्यन् शोणितेन कलङ्किताः।
तस्मादस्पृश्यवस्त्रास्ते सञ्जाताः सर्व्वमानवैः॥
१५ याह्यमेध्येति ते प्रोक्ता याहि याहि न मां स्पृशेः।
द्रुतांस्तान् भ्राम्यतोऽप्यूचे जातिभिस्ते गताश्रयाः॥
१६ प्रभो र्दृष्टि र्व्यभैत्सीत् तान् स तान् नेक्षिष्यते पुनः।
याजका नाभिपूज्यन्ते वृद्धै र्न प्राप्यते कृपा॥
१७ क्षीयतेऽद्यापि नेत्रे नो व्यर्थसाहाय्यकाङ्क्षया।

अरद्यां जातिमुद्दिश्य रचितस्थानेषु जाग्रमः॥
क्रमान् रुन्धन्ति तेऽस्माकं गमनादस्मदध्वसु। १८
अन्तो नो निकटः पूर्णम् आयुरन्त उपागतः॥
शून्यस्थोत्क्रोशतोऽप्यासन् जविनो नोऽनुधावकाः। १९
अस्मान् धर्त्तुं गिरौ चण्डाः प्रान्तरे च रहःस्थिताः॥
अस्माकं नासिकावायुर्योऽभिषिक्तः सदाप्रभोः। २०
जीविष्यामो वयं तस्य छायायां जातिमध्यतः।
इत्यवोचाम तेषान्तु छन्नगर्त्तेष्वधारि सः॥
हर्षोल्लासाद् इदोमाख्ये कन्ये ऊषदेशवासिनि। २१
ईदृशं पानपात्रन्तु पश्चात् त्वामप्युपैष्यति।
तेन त्वं मत्ततां गत्वात्मानं नग्नीकरिष्यसि॥
हे सीयोनाभिधे कन्ये संशुद्धं तव दुष्कृतं। २२
तव दास्यदशा तेन न विधायिष्यते पुनः॥
हे इदोमाभिधे कन्ये भोक्तव्यं तव दुष्कृतं।
स च तावकपापान्यनावृतानि करिष्यति॥

---

५ पञ्चमोऽध्यायः।

यिरिमियस्य प्रार्थना पापाङ्गीकारो विलापकथनञ्च।

अस्माकं या दशा जाता स्मर तां हे सदाप्रभो। १
दृक्पातं कुरु निन्दाञ्चास्मद्भुक्तामवधारय॥
अस्माकं योऽधिकारोऽयं स परेषु समर्पितः। २
वेश्मानीमानि चास्माकम् अर्पितानि विदेशिषु॥
अनाथा हि वयं जाता जन्मदाता न विद्यते। ३
अस्माकं मातरश्चापि वर्त्तन्ते विधवा इव॥
मूल्यं प्रदाय चास्माभिरस्माकं पीयते जलं। ४
आनीयन्ते भरण्यार्थम् अस्मदीयेन्धनानि च॥
अस्मद्ग्रीवासु पाशश्च क्लिष्टा द्राव्यामहेऽरिभिः। ५
क्लान्ता जाता वयं कच्चिद् विश्रामं न समाप्नुमः॥
पूपैरुदरपूर्त्तिर्नो भविष्यतीत्यपेक्षया। ६
मिस्रीयेभ्यः करं दद्म आशूरीयजनाय च॥

७ अस्माकं पितरः पापं कृतवन्तो न सन्ति च।
तैः कृतानान्तु दोषाणाम् अस्माभि र्भार उह्यते॥
८ अस्मान् दासगणः शास्ति नास्त्युद्धर्त्ता च तत्करात्॥
९ प्रान्तरे वर्त्तमानस्य कृपाणस्यैव सम्मुखात्।
स्वभक्ष्यानयनेनापि कुर्म्मः प्राणपणं वयं॥
१० क्षुधोत्तापेन चुल्लीव जाताः कृष्णत्वचो वयं॥
११ महिलानां बलात्कारः सीयोनि क्रियतेऽरिभिः।
अनूढानां कुमारीणां यिहूदीयपुरेषु च॥
१२ निजहस्तैः कुलीनांश्च नरान् उल्लम्बयन्ति ते।
प्रत्यक्षः क्रियते तैश्च प्राचीनानाम् अनादरः॥
१३ पेषणार्थकपाषाणा उह्यन्ते तरुणै र्जनैः।
आक्रान्ताः काष्ठभारेण प्रस्खलन्ति च बालकाः॥
१४ निवृत्ता गोपुराद् वृद्धा युवानश्च स्ववाद्यतः।
१५ निवृत्तोऽस्मद्धृदां हर्षो नृत्यं जातश्च रोदनं॥
१६ किरीटो नस्युतः शीर्षाद् अस्मान् धिक् कृतपातकान्।
१७ पापान्नो व्याधितं चित्तं पापात् क्षीणे च लोचने॥
१८ सीयोनाद्रौ समुच्छिन्ने शृगाला विचरन्ति हि॥
१९ नित्यं सिंहासनासीनः स्थास्यसि त्वं सदाप्रभो।
पुरुषानुक्रमं यावत् स्थिरं भद्रासनं तव॥
२० किमर्थं शाश्वतं कालं त्वमस्मान् विस्मरिष्यसि।
किमर्थं चिरकालञ्च यावदस्मान् प्रहास्यसि॥
२१ स्वं प्रत्यावर्त्तयास्मांस्त्वम् आवर्त्तिष्यामहे प्रभो।
पूर्व्वकालमिवास्मभ्यं कालं देहि च नूतनं॥
२२ त्वं यतोऽस्मान् निराकार्षीरुग्रश्चास्मभ्यमक्रुधः॥

यिहिष्केलस्य भविष्यद्वचनानि।

१ प्रथमोऽध्यायः।

१ यिहिष्केलस्य भविष्यद्वाक्यकालनिर्णयः ४ चतुःप्राणिनां दर्शनं १५ चतुश्चक्रदर्शनं २६ ईश्वरीयप्रतापदर्शनं।

त्रिंशवत्सरस्य चतुर्थमासस्य पञ्चमदिने किबारनदीतीरे प्रवासितानां १
जनानां मध्ये ममावस्थितिकाले स्वर्गद्वारम् उद्घाटितम् अभवत् मया
चेश्वरीयदर्शनान्यदर्शिषत। स राज्ञो यिहोयाखीनस्य प्रवासस्य पञ्च- २
मो वत्सर आसीत्। उक्तमासस्य पञ्चमदिने कल्दीयानां देशे किबार- ३
नदीतीरे सदाप्रभो र्वाक्यं बूषिसुतं यिहिष्केलं याजकं प्रति प्रादुरभूत्
सदाप्रभोश्च करस्तत्र तस्मिन्नर्पितोऽभूत्।

मया दृक्पातं कृत्वेदम् अदर्शि, उदीचीत आगच्छन्ती प्रचण्डवात्या ४
महामेघो जाज्वल्यमानो वह्निस्तत्परिधिस्तेजोमयस्तन्मध्यस्थलाच्च वह्नि-
मध्यस्थतैजसधातोः प्रभायास्तुल्या प्रभा प्रोद्भूता। तन्मध्याच्च चतुर्णां ५
प्राणिनां रूपं प्रतिभाति, तेषामाकृतिरियं, ते मनुष्यरूपिणः। तेषामेकै- ६
कस्य चत्वार्य्यास्यानि चत्वारः पक्षाश्चासन्। तेषां पादा ऋजवः पादत- ७
लानि च गोवत्सस्य पादतलानां सदृशानि पादाश्च परिष्कृततामस्य
तेजसेव प्रभाविशिष्टा आसन्। तेषां पक्षाणाम् अधस्ताच्चतुर्षु पार्श्वेषु ८
मानवहस्ता आसन् तेषां चतुर्णामेकैकस्यास्यानि पक्षाश्चासन्। तेषां ९
पक्षाः परस्परं संयुक्ताः, गमनकाले ते न परिवृत्यैकैकः सम्मुखदिशम्
अगच्छन्। तेषामास्यानां रूपमिदं,(पूर्व्वदिशि) मनुष्यस्यास्यं दक्षिणदिशि १०
सिंहस्यास्यं चतुर्णामासीत् सव्यदिशि चतुर्णां गोरास्यं (शेषदिशि च)
चतुर्णामोत्क्रोशस्यास्यमासीत्। ऊर्द्ध्वे तेषाम् आस्यानि पक्षाश्च पृथक् ११
पृथक् आसन् तेषान्त्वेकस्य द्वौ पक्षावन्यस्य (द्वाभ्यां पक्षाभ्यां) संयुक्तौ
द्वाभ्याञ्च शरीरम् आच्छाद्यत। तेषामेकैकः सम्मुखम् अगच्छत् यां दिशं १२
गन्तुम् आत्मनोऽभिमतं तामेव दिशं तेऽगच्छन् गमनकाले च न पर्य्य- १३
वर्त्तन्त। तादृशरूपाणां तेषां प्राणिनामाभा प्रज्वलिताङ्गाराणां सदृशी,
दीपानामिवाभा तेषां प्राणिनां मध्ये गमागमावकरोत् तस्याश्चेस्तेजो-
ऽविद्यत वह्नितश्च विद्युद् उदपद्यत। यथा चाग्निवृष्टेराभा तथा ते १४
प्राणिन इतस्ततश्चाधावन्।

१५ मयि तान् प्राणिनो निरीक्षमाणे भूमौ तेषां प्राणिनां पार्श्वे चतुर्म्मु-
१६ खम् एकं चक्रं प्रादुर्बभूव। चक्राणां वैदूर्य्यमणेरिवाभा निर्म्मितिश्चासीत्
चतुर्णाञ्चैकं रूपम् आसीत् चक्रमध्यवर्त्तिचक्रस्येव तेषाम् आकृति र्निर्म्मि-
१७ तिश्चासीत्। गमनकाले तानि स्वदिक्चतुष्टयेनागच्छन् गमने न पर्य्या-
१८ वर्त्तन्त। तेषां नेमय उच्चा भीषणाश्च ते चत्वारो नेमयश्च सर्व्वत्र चक्षुर्भिः
१९ परिपूर्णा आसन्। प्राणिनां गमनकाले तानि चक्राणि तेषां पार्श्वेणाग-
२० च्छन्, भूमितश्च प्राणिनाम् उत्थानकाले चक्राण्यप्युदतिष्ठन्। यां दिशं
गन्तुम् आत्मनोऽभिमतं तामेव दिशं तान्यगच्छन् किमपि स्थानं गन्तुम्
आत्मनोऽभिमते जाते तेषां पार्श्वे तानि चक्राण्युदतिष्ठन् यतः प्राणिनाम्
२१ आत्मा चक्रेष्वविद्यत। तेषु गच्छत्सु तान्यगच्छन् तेषु तिष्ठत्सु च तान्यति-
ष्ठन् भूमितस्तेषूत्तिष्ठत्सु तेषां पार्श्वे चक्राण्युदतिष्ठन् यतः प्राणिन आत्मा
चक्रेष्वविद्यत।
२२ तस्य प्राणिनो मूर्द्धामूर्द्धे चेदं रूपम् आसीत् भीषणकरकावद् आभा-
२३ विशिष्टमेकं वितानम् ऊर्द्धे तेषां मूर्द्धामुपरि विततमासीत्। तस्य वि-
तानस्याधस्तेषां पक्षा ऋजवः परस्परम् अभिमुखाश्चासन्। एकपार्श्वे
शरीराच्छादकमेकं पक्षयुगम् अन्यपार्श्वे च शरीराच्छादकं द्वितीयं
२४ पक्षयुगम् एकैकस्यासीत्। तेषां पक्षाणां ध्वनिं मयाश्रावि स भूरितोयानां
ध्वनिरिव तेषाञ्च गमनकाले सर्व्वशक्तिमतो ध्वनिरिव, स सेनानि-
वेशस्य ध्वनिरिव तुमुलध्वनिः, तेषु तु तिष्ठत्सु तेषां पक्षाः स्लथा अभ-
२५ वन्। तेषां मूर्द्धामूर्द्धे स्थितस्य वितानस्योपरि ध्वनिरुदपद्यत, तेषु तु
तिष्ठत्सु तेषां पक्षाः स्लथा अभवन्।
२६ तेषां मूर्द्धामूर्द्धे स्थितस्य वितानस्योपरि नीलमणेरिव तेजोविशिष्ट-
स्यैकस्य सिंहासनस्याकृतिरासीत्। तस्याः सिंहासनाकृतेरुपरि तदूर्द्धे
२७ स्थितस्यैकस्य मानवरूपस्य सदृशाकृतिरासीत्। तदीयकटेराकृतित-
स्तदूर्द्धे च मया तैजसधातोरिव प्रभादर्शि, अनलस्य रूपं परितस्तस्या
वेष्टनम् आसीत्, तदीयकटेराकृतितस्तदधश्चानलस्य रूपं परितश्च द्युति-
२८ रदर्शि। वृष्टिदिने मेघे यश्चाप उत्पद्यते तदीयरूपस्य सदृशं परितस्तस्या
द्युतेरूपम् आसीत् तत् सदाप्रभोः प्रतापस्याकृते रूपं। तद् दृष्ट्वाहं
न्युब्जीभूयापतं।

---

२ द्वितीयोऽध्यायः।

१ यिहिष्क्लेलस्य नियोगः ६ तस्योपदेशनं ९ तस्मै पुस्तकप्रदानञ्च।

अनन्तरं मया भाषमाणस्य कस्यचिद् रवोऽश्रावि, स मां जगाद, १
भो नरसन्तान स्वचरणयोस्तिष्ठ, अहं त्वया सह संलपिष्यामि। तस्मिन् २
माम् आलपत्यात्मा मामाविश्य चरणयोरस्थापयत्, ततोऽहं तस्य मामा-
लपतो वाक्यम् अश्रौषं। स मां जगाद, ३

नृसन्तान प्रहेष्यामि त्वामिस्रायेल्सुतान् प्रति।
द्रोहिणस्तान् विजातीयान् ये मयि द्रोहमाचरन्॥
मम हि प्रातिकूल्येन ते तेषाञ्च पितामहाः।
चिराद्द्यैव पर्य्यन्तं भक्तित्यागं प्रकुर्व्वते॥
सन्तानांस्तान् कठोरास्यान् जडान्तःकरणान् प्रति। ४
त्वामहं प्रेषयिष्यामि (भो मनुष्यशरीरज)।
त्वं तान् वक्ष्यसि प्राहेत्थं प्रभुरेव सदाप्रभुः॥
आश्रवाः स्युरयत्ना वा द्रोहिवंशो हि सन्ति ते। ५
ज्ञास्यन्त्युपस्थितं तेषाम् अन्तरे भाववादिनं॥
त्वञ्च भो नरसन्तान तेभ्यो मा गच्छ साध्वसं। ६
तेषां सकलवाक्येभ्यो नैव त्वं भेतुमर्हसि॥
कुलयः कण्टका वा चेत् सन्ति ते सङ्गिनस्तव।
वृश्चिकानां समीपे च विद्यते वसतिस्तव॥
तेषां वाक्यात् तु मा भैषीस्तेषां साक्षाच्च मा त्रस।
यस्माद् विद्रोहिवंशस्ते सन्ति नास्त्यत्र संशयः॥
आश्रवाः स्युरयत्ना वा (द्रोहिणः सन्ति ते यतः)। ७
त्वन्तु मामकवाक्यानि तान् श्रावयितुमर्हसि॥
त्वञ्च भो नरसन्तान वक्तव्यं मे वचः शृणु। ८
द्रोहिवंश इवासौ च द्रोही त्वमपि मा भव।
यच्च दास्याम्यहं तुभ्यं मुखं व्यादाय तद् गिल॥

ततो मया दृक्पातं कृत्वा प्रसारितहस्तोऽदर्शि तन्मध्ये दीर्घगोला- ९
कारं पुस्तकमेकमासीत्। स च मम साक्षात् तद् व्यवृणोत् तस्याग्रपृष्ठरे- १०
शयो लिपिरासीत् सा च लिपि विलापशोकसन्तापसूचका।

३ तृतीयोऽध्यायः।

१ यिहिष्केलेन पुस्तकभोजनं ४ तं प्रति परमेश्वरस्योपदेशः १२ आत्मना शून्यमार्गेण तस्य नयनं १५ वन्दीनां मध्यं गत्वा ईश्वरस्योपदेशप्राप्तिः २२ ईश्वरेण तदीयमुखस्य बन्धनं मोचनञ्च।

१ अपरं स मामवादीत् भो नरसन्तान, त्वया यत् प्राप्यते तद् भक्षय,
२ इदं पुस्तकमेव भक्षय गत्वा चेस्रायेल्वंशम् आलप। ततो मया मुखे
३ व्यादत्ते स मां तत् पुस्तकम् अबूभुजत्, माञ्चावादीत्, भो नरसन्तान,
मद्दत्तं पुस्तकमिदं स्वजठरेण भक्षय निजान्त्राणि च तेन पूरय। ततो
मया तस्मिन् भक्षिते मम मुखे तन्मधुवन्मधुरमभूत्।
४ ततः स मां जगाद भो नरसन्तान, त्वम् इस्रायेल्वंशानां समीपं गत्वा
५ मम वाक्यानि तान् वद। यतस्त्वं न गम्भीरौष्ठानाम् अस्फुटजिह्वानां वा
६ जनानां समीपं किन्त्विस्रायेल्वंशस्यैव समीपं प्रेष्यसे। गम्भीरौष्ठानाम्
अस्फुटजिह्वानां त्वद्बोधागम्यभाषिणां वा भूरिजनानां समीपमहं त्वां
न प्रहिणोमि, यदि तेषां समीपं त्वां प्राहेष्यं तर्हि ते तव वाक्यमश्रौ-
७ ष्यन्। इस्रायेल्वंशास्तु तव वाक्यं श्रोतुं नैषिष्यन्ति, ते ममापि वाक्यं
श्रोतुं नेच्छन्ति, यत इस्रायेल्वंशाः सर्व्वे कठिनललाटा जडचित्ताश्च
८ सन्ति। पश्याहं तवास्यं तेषाम् आस्यादपि कठिनं तव ललाटञ्च तेषां
९ ललाटादपि कठिनं कृतवान्। अहं तव ललाटं वज्रकण्टकमिव शैलात्
कठिनं कृतवान्। ते द्रोहिवंशाः सन्ति त्वन्तु तेभ्यो मा बिभीहि तेषां
१० साक्षाच्च मा त्रस। पुनश्च स मां जगाद, भो नरसन्तान, यानि वा-
क्यान्यहं त्वां वदिष्यामि त्वं मम तानि सर्व्वाणि वाक्यानि स्वान्तःकरणेन
११ गृहाण स्वकर्णाभ्याञ्च शृणु। तव स्वजातीयानां प्रवासितजनानाञ्च
समीपं गत्वा तान् वद, सदाप्रभुः प्रभुरित्थमाहेति ते च शृणुयुरवधी-
रयेयु र्वा।

१२ अपरमहम् आत्मनोत्थापितः स्वपश्चात् महाघोषयुक्तमिमं शब्दम-
१३ श्रौषं स्वस्थानात् सदाप्रभोः प्रतापो धन्य इति। तेषां प्राणिनाञ्च परस्परं
संसक्तानां पक्षाणां शब्दस्तेषां पार्श्ववर्त्तिचक्राणाञ्च शब्दो महाघोषस्य च
१४ शब्दोऽश्रावि। आत्मना चोत्थापितो नीतश्चाहं मनस्तापेन विक्लोऽगच्छं
सदाप्रभोश्च हस्तो मयि सप्रभावम् अर्पित आसीत्।

१५ अनन्तरमहं किबारनद्यास्तीरे वसतां तेलाबीबे प्रवासिनां जनानां

समीपमुपस्थायोपाविशं ते च यत्रासीना आसन् तत्राहं सप्ताहं यावत्
स्तब्धस्तेषां मध्य आसीन आसं। सप्तदिनेषु वर्त्तितेषु मां प्रति सदाप्रभो- १६
रिदं वाक्यं प्रादुरभूत्,

नृसन्तान नियुञ्जे त्वाम् इस्रायेलवंशरक्षकं। १७
ममास्यात् त्वं वचः श्रुत्वा तान् मत्तो बोधयिष्यसि॥
त्वया मर्त्तव्यमित्युक्ते मया दुष्टजनं प्रति। १८
त्वया चेत् स न बोध्येत तस्य प्राणांश्च रक्षितुं।
दुष्टं दुष्टत्वमार्गस्य त्यागाय त्वं न बोधयेः॥
तर्हि स्वीयापराधेन दुर्जनः स मरिष्यति।
तस्य रक्तस्य शोधन्त्वहमादास्ये करात् तव॥
बोधितस्तु त्वया चेन्न त्यजेत् दुष्टः स्वदुष्टतां। १९
स्वीयदुष्टत्वमार्गाच्च न निवर्त्तेत स स्वयं॥
तर्हि स्वीयापराधेन तस्य मृत्यु र्भविष्यति।
त्वन्तु स्वकीयप्राणानाम् उद्धारं साधयिष्यसि॥
धार्म्मिकश्च स्वधर्म्माच्चेन्निवृत्याधर्म्ममाचरेत्। २०
तत्साक्षात् तर्हि दास्यामि विघ्नं स च मरिष्यति॥
बोधितश्चेत् त्वया न स्यात् स्वाघात् तर्हि मरिष्यति।
स च यं कृतवान् धर्म्मं स नैवानुस्मरिष्यते।
तस्य रक्तस्य शोधन्त्वहमादास्ये करात् तव॥
धार्म्मिकश्च यथा पापं न कुर्य्याद् बोधितस्तथा। २१
त्वया स धार्म्मिकः पापं यदि नैव समाचरेत्॥
तर्हि स बोधितस्तस्मात् स हि जीविष्यति स्वयं।
त्वञ्च स्वकीयप्राणानाम् उद्धारं साधयिष्यसि॥

अपरं सदाप्रभोर्हस्तस्तत्र मय्यर्पितोऽभूत् स च मामवादीत् उत्तिष्ठ २२
निम्नभूमिञ्च प्रगच्छ, तत्राहं त्वाम् आलपिष्यामि। ततोऽहमुत्थाय निम्न- २३
भूमिं प्रगतः, यादृशञ्च प्रतापमहं पुरा किवारनद्यास्तीरे दृष्टवांस्तादृशः
सदाप्रभोः प्रतापस्तत्र दण्डायमान आसीत्, अहञ्च न्युब्जीभूय पतितः।
अपरम् आत्मा मामाविश्य चरणयोरस्थापयत् माञ्चाब्रवीत् त्वं स्वगृहं २४
प्रविश्य तत्र रुद्धस्तिष्ठ। भो नरसन्तान, पश्य ते त्वयि रज्जूरर्पयित्वा २५
ताभिस्त्वां भन्त्स्यन्ति त्वञ्च तेषां मध्यं न प्रगमिष्यसि। अहञ्च तव जिह्वां २६
तालुन्यासक्तां करिष्यामि तेन त्वं मूको भविष्यसि तानुद्दिश्यानुयोगी

१७ नरो भवितुं न शक्ष्यसि, यतस्ते द्रोही वंशः। अहन्तु यदा त्वाम् आ-
लपिष्यामि तदा तव मुखम् उद्घाटयिष्यामि त्वञ्च तान् गदिष्यसि
सदाप्रभुः प्रभुरित्थमाहेति, ततो य आश्रवः स श्रोष्यति यश्चायत्नः सो-
ऽवधीरयिष्यति यतस्ते द्रोही वंशः।

---

४ चतुर्थोऽध्यायः।

१ यिरूशालमो रोधदृष्टान्तः ४ पापदण्डभोगस्य दृष्टान्तः ९ दुर्भिक्षकालीनदुःखस्य दृष्टान्तश्च।

१ त्वञ्च भो नरसन्तान, इष्टकामेकां गृहीत्वा स्वसमक्षं निधेहि
२ तत्र च पुर्य्या अर्थतो यिरूशालमः प्रतिरूपं लिख। तस्याश्चावरोधं
विधेहि तत्प्रतिकूलम् उच्चगृहं निर्म्मिमीष्व सेतुं निचिनु तद्विपक्षान्
३ सेनानिवेशान् रचय तत्परितश्च युद्धयन्त्राणि स्थापय। त्वञ्च लौहखे-
दनीमेकामादाय लौहप्राचीरमिव तव पुर्य्याश्चान्तराले निधेहि तस्यां
स्थिरदृष्टिं कुरुष्व ताञ्चेत्थमवरुद्धमानामवरुन्धि, तद् इस्रायेल्वंशस्य
निमित्तं चिह्नं भविष्यति।
४ त्वञ्च सव्यपार्श्वे शयानस्तत्रेस्रायेल्वंशस्यापराधमर्पय, यावन्ति दिनानि
५ त्वं तस्मिन् शयिष्यसे तावन्ति दिनानि तेषाम् अपराधं वक्ष्यसि। मया
तु तेषाम् अपराधस्य वत्सरसंख्या त्वत्कृते दिनसंख्याकारि, सा दिनानां
नवत्यधिकानि त्रीणि शतानि, एतावत्कालं त्वम् इस्रायेल्वंशस्यापराधं
६ वक्ष्यसि। तेषु दिनेषु समापितेषु त्वम् अन्यतरेऽर्थतो दक्षिणे पार्श्वे शयानो
यिहूदावंशस्यापराधं चत्वारिंशद् दिनानि वक्ष्यसि, एकैकस्य वत्स-
७ रस्य परिवर्त्तेन मया त्वदर्थम् एकैकं दिनं व्यधायि। त्वमनावृतबाहुः
सन् यिरूशालमोऽवरोधं प्रति स्थिरदृष्टिं करिष्यसे तस्या विरुद्धां
८ भावोक्तिं व्याहरिष्यसि च। पश्याहं त्वयि रज्जूरर्पयिष्यामि तेन त्वद-
वरोधदिनानि यावत् त्वया न समापयिष्यन्ते तावत् त्वया पार्श्वपरिव-
र्त्तनम् अशक्यं भविष्यति।
९ त्वञ्च खाद्यं गोधूमयवमाषमसूरकङ्गुकोद्रवान् आदायैकस्मिन् पात्रे
निधेहि यतिदिनानि च स्वपार्श्वे शयिष्यसे ततिसङ्ख्याकान् पूपांस्तैः
पचस्व, दिनानां नवत्यधिकानि त्रीणि शतानि यावत् ते त्वया खाद्याः।
१० यच्च खाद्यं भक्षयिष्यसि तत् परिमाय प्रतिदिनं विंशतिशेकलपरिमितं

कृत्वा भक्षयिष्यसि निरूपितेषु समयेषु तत् भक्षयिष्यसि। जलमपि ११
परिमाय हिनपात्रस्य षष्ठांशपरिमितं कृत्वा पास्यसि, निरूपितेषु
समयेषु च तत् पास्यसि। यवपूपाकारं कृत्वा स्वखाद्यं भक्षयिष्यसि १२
तेषां साक्षात् मानवकरीषेण तत् पक्ष्यसे। पुनश्च सदाप्रभुराह, इस्रा- १३
येल्वंशीयजना यासां मध्ये मया विकीर्य्यन्ते तासां परजातीनां मध्ये
तथैवामेध्यं स्वीयखाद्यं भक्षयिष्यन्ति। तदा मयोक्तम् अहो भो प्रभो १४
सदाप्रभो, पश्य मम प्राणा नैवामेध्यीभूताः, आबाल्याद् अद्यपर्य्यन्तं स्वयं
मृतं विदीर्णं वा किमपि मया न भक्षितं गर्हणीयमांसञ्च मम मुखं न
प्रविष्टं। ततः स माम् अब्रवीत् पश्य मानवकरीषस्य परिवर्त्तनाहं तुभ्यं १५
गोकरीषं ददामि त्वं तेनैव स्वखाद्यं पक्ष्यसे। अपरं स मां जगाद, १६
भो नरसन्तान, पश्याहं यिरूशालमि भक्ष्ययष्टिं खण्डयिष्यामि तेन ते
परिमाणेन मनस्तापेन च पूपान् भक्षयिष्यन्ति परिमाणेन स्तब्धत्वेन च
जलं पास्यन्ति। अन्नजलयोरभावस्ते भोक्तव्यः परस्परं स्तब्धता निजा- १७
पराधात् क्षयश्च गन्तव्यः।

---

५ पञ्चमोऽध्यायः।

१ केशानां दृष्टान्तः ५ पापकृते यिरूशालमो भाविदण्डस्य वाक्य १२ केशदृष्टान्तस्य तात्पर्य्यञ्च।

त्वञ्च भो नरसन्तान, निशितं खड्गम् अर्थतो नापितस्य क्षुरमेकम् आ- १
दाय स्वमुण्डं स्वश्मश्रु च मुण्डय तुलायष्टिञ्च गृहीत्वा केशान् विभज।
तेषामेकं तृतीयांशम् अवरोधकालेऽवसीदति पुर्य्या मध्ये वह्निना दाहय, २
तदन्यं तृतीयांशञ्चादाय तस्याश्चतुर्द्दिक्ष्वसिना जहि, शेषञ्च तृतीयांशं ३
वायुं प्रति विकिर, तेषां पश्चाच्चाहम् असिं निष्कोषं करिष्यामि। त्वन्तु
तस्मात् स्वल्पान् केशान् उद्धृत्य स्ववस्त्राञ्चले बधान। पुनश्च तेषां कति- ४
पयान् गृहीत्वा वह्निमध्ये निक्षिप्य वह्निसात् कुरु, तन्मध्याद् वह्निरुद्गत्य
कृत्स्नम् इस्रायेल्वंशम् आक्रमिष्यति।

प्रभु र्नित्यप्रभुः प्राह यिरूशालम्पुरीदृशी। ५
जातीनामेव मध्ये सा मया संस्थापिताभवत्।
तथा तस्याश्चतुर्द्दिक्षु देशाः संस्थापिता मया॥
जातिभ्योऽपि चतुर्द्दिक्स्थदेशेभ्योऽपि च चञ्चला। ६

सा मत्सूत्रविधानानि दुष्कृत्या पर्य्यवर्त्तयत्॥
यतो मामकसूत्राणि प्रत्याख्यातानि तज्जनैः।
मामकीनविधानानि न समाचरितानि तैः॥
७ ततो हेतोरिदं वाक्यं प्रभुराह सदाप्रभुः।
स्वचतुर्द्दिक्स्थजातिभ्यो यूयं भूयिष्ठपातकाः॥
न विधीन् मेऽन्ववर्त्तध्वं न सूत्राण्यन्वतिष्ठत।
स्वचतुर्द्दिक्स्थजातीनां सूत्राणि नान्वकार्ष्ट च॥
८ ततो हेतोरिदं वाक्यं प्रभुराह सदाप्रभुः।
पश्य त्वामहमेवाप्यधुनाक्रमितुमुद्यतः।
जातीनाञ्चाग्रतो दण्डं विधास्ये तव मध्यतः॥
९ यादृशीमितिपूर्व्वञ्च नैवाहं कृतवान् क्रियां।
न पश्चाच्च करिष्यामि तां विधास्ये क्रियां त्वयि।
सर्व्वेषां गर्हणीयानां कर्म्मणां तव कारणात्॥
१० त्वन्मध्ये स्वीयसन्तानान् पितरौ भक्षयिष्यतः।
सन्ताना भक्षयिष्यन्ति स्वकीयौ पितरौ तथा॥
त्वामुद्दिश्य विचारस्य विधास्येऽहञ्च साधनं।
विकरीष्यामि सर्व्वञ्च त्वच्छेषं सर्व्ववायुभिः॥
११ अतोऽहं यदि जीवामि (प्रभु र्वक्ता सदाप्रभुः)।
त्वं स्वैः कुविग्रहैः सर्व्वैः सर्व्वै र्घृण्यैश्च कर्म्मभिः।
धाम मेऽदूषयः पुण्यं ततोऽहं विमुखस्त्वयि।
नार्द्रनेत्रो भविष्यामि न करिष्यामि वा कृपां॥
१२ एकस्तव तृतीयांशो महामार्य्या मरिष्यति।
तव मध्ये क्षुधातो वा निःशेषं प्राप्स्यति क्षयं॥
असिनान्यस्तृतीयांशस्त्वत्समन्तात् पतिष्यति।
तृतीयांशं त्वहं सर्व्वं विकरीष्यामि वायुभिः।
तस्य पश्चाच्च निष्कोषं चालयिष्याम्यसिं निजं॥
१३ इत्थं सेत्स्यति मत्कोप इत्थमेव च तेष्वहं।
स्वमन्युं शमयिष्यामि भविष्यामि च तर्पितः॥
सदाप्रभुरहं वच्मीदं स्वमानानुरागतः।
एतत् तेषु मम क्रोधे सिद्धे ज्ञायिष्यते हि तैः॥
१४ त्वच्चतुर्द्दिक्स्थजातीनां मध्ये ध्वस्तां विनिन्दितां।

त्वां करिष्यामि सर्व्वेषाम् अध्वगानां समक्षतः ॥
त्वच्चतुर्दिक्स्थजातीनां निन्दाधर्षणभाजनं । १५
शिक्षाविस्मयहेतुश्च त्वं तदानीं भविष्यसि ॥
यतोऽहं कोपमन्युभ्यां तिरस्कारैश्च मन्युजैः ।
विचारं ते करिष्यामीदं ब्रूवेऽहं सदाप्रभुः ॥
तेषु त्यक्ष्यामि मद्बाणान् क्रूरान् नाशाय निर्म्मितान् । १६
क्षुधारूपान् असिष्यामि युष्मन्नाशाय तान् शरान् ॥
अर्पयिष्यामि युष्मासु धरवद् दुर्व्वहां क्षुधां ।
प्रभङ्क्ष्यामि च युष्माकं सर्व्वम् अन्नावलम्बनं ॥
युष्मदाक्रमणार्थञ्च क्षुधां जन्तूंश्च हिंसकान् । १७
प्रहेष्यामि ततो यूयं तैरपुत्रा भविष्यथ ॥
तव मध्ये महामारी रक्तञ्च विचरिष्यतः ।
कृपाणञ्च करिष्यामि त्वद्विपक्षमुपस्थितं ।
वचनं प्रोक्तवानेतद् अहमेव सदाप्रभुः ॥

---

६ षष्ठोऽध्यायः ।

१ देवार्च्चाकृते इस्रायेलो दण्डः ८ शेषजनानां भाविदशाया भाविवाक्यं ११ दण्डस्य कृते शोकाय प्रचोदनञ्च ।

अपरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, १
त्वम् इस्रायेलः पर्व्वतेषु स्थिरदृष्टिं विधाय तानुद्दिश्य भावोक्तिं व्याहर, २
इदञ्च वद, भो इस्रायेलः पर्व्वता यूयं प्रभोः सदाप्रभो र्वाक्यं शृणुत । ३
प्रभुः सदाप्रभुः पर्व्वतान् उपपर्व्वतान् निम्नभूमीरुपत्यकाश्चाधीत्थं भाषते,

पश्यतानाययिष्यामि खड्गं वः प्रातिकूल्यतः ।
युष्माकं ध्वंसयिष्यामि सर्व्वाण्युच्चस्थलानि च ॥
वेदयो वो विनङ्क्ष्यन्ति भङ्क्ष्यन्ते सूर्य्यविग्रहाः । ४
युष्माकं गर्हणीयानां प्रतिमानाञ्च सम्मुखे ।
निहतान् पातयिष्यामि युष्माकं मानवानहं ॥
तेषां विगर्हणीयानां मूर्त्तीनामेव सम्मुखे । ५
इस्रायेलः सुतानाञ्च निधास्यामि शवानहं ।
विकरीष्यामि चास्थीनि वेदीनां वः समन्ततः ॥

६ युष्माकं सर्व्ववासेषु ध्वंसिष्यन्ते पुराणि च।
विलुप्तानि भविष्यन्ति सर्व्वाण्युच्चस्थलानि च॥
ध्वंसो लोपश्च प्राप्तव्यौ युष्माकं वेदिभि र्यतः।
प्राप्तव्यौ भङ्गनिर्भेदौ युष्माकं घृण्यमूर्त्तिभिः॥
प्राप्तव्यश्च समुच्छेदो युष्माकं सूर्य्यविग्रहैः।
निःशेषत्वञ्च प्राप्तव्यं युष्मन्निर्म्मितवस्तुभिः॥
७ निहताश्च पतिष्यन्ति युष्माकं मध्यतो जनाः।
अभिज्ञास्यथ यूयञ्च तदानीं मां सदाप्रभुं॥
८ रक्षिष्यामि त्वहं शेषं युष्माकं केऽपि मानवाः।
अवस्थास्यन्ति जातीनां मध्ये खड्गात् पलायिताः।
नानादेशेषु युष्मांश्च विकरीष्याम्यहं तदा॥
९ तत्र प्रवासितास्ते च मनुष्या वः पलायिताः।
मां तत्रानुस्मरिष्यन्ति जातीनां मध्य एव ते॥
चित्तं भङ्क्ष्याम्यहं तेषां मत्त्यागि व्यभिचारि च।
प्रतिमा अनुधावन्तीं दृष्टिञ्च व्यभिचारिणीं॥
सर्व्वाभि र्गर्हणीयाभिः स्वक्रियाभिः कृतानि च।
स्वदुष्कर्म्माणि तैः स्मृत्वा बीभत्सः स्वेषु भोत्स्यते॥
१० अभिज्ञायिष्यते चेदं यत् सदाप्रभुरस्म्यहं।
अनिष्टं वो विधास्यामीति च नैवोक्तवान् वृथा॥
११ भाषते भारतीमेतां प्रभुरेव सदाप्रभुः।
हस्तमाजहि हस्तेन भुवं पादेन चाजहि॥
इस्रायेलीयवंशस्य सकला घृण्यकुक्रियाः।
स्मृत्वा वद च हाहेति यतस्तासां हि कारणात्।
असिक्षुन्मारिभिस्तेषां पतनं सम्भविष्यति॥
१२ यो जनो दूरवर्त्ती स महामार्य्या मरिष्यति।
यश्च समीपवर्त्ती स कृपाणेन पतिष्यति॥
शेषो यो रक्षितो वा यः क्षुधया स मरिष्यति।
इत्थं सिद्धीकरिष्यामि मन्युं तेषु जनेष्वहं॥
१३ अभिज्ञास्यथ यूयञ्च तदानीं मां सदाप्रभुं।
तदा यस्माद् भविष्यन्ति जनास्तेषां समाहताः।
मध्ये स्वघृण्यमूर्त्तीनां वेदीनाञ्च समन्ततः॥

सर्व्वस्मिन् प्रोन्नताद्रौ च गिरीणां शिखरेषु च।
हरिद्वृक्षस्य चाधस्तात् सुपर्णालतरोस्तले।
यत्र स्वघृण्यमूर्त्तिभ्यः सर्व्वाभ्यो बलिसौरभं।
तैर्दत्तं तत्र सर्व्वत्र शयिष्यन्ते हता जनाः॥
हस्तं प्रसारयिष्याम्यहं निजं तान् जनान् प्रति। १४
तेषां सर्व्वेषु वासेषु दिब्लाथाया मरुस्थलात्।
देशञ्चाहं विधास्यामि ध्वस्तम् उच्छिन्नमेव च।
अभिज्ञास्यन्ति मामेव तदानीं ते सदाप्रभुं॥

---

७ सप्तमोऽध्यायः।

१ इस्रायेलो नाशस्य भाविवाक्यं १६ शेषलोकानां दुःखं दुर्दशा च।

अपरं सदाप्रभोरेतद् वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, १
प्रभुः सदाप्रभुरिस्रायेल्देशमधीत्थं भाषते, २

अन्त आयात्यसावन्तो नीहतो दिक्चतुष्टयं।
अधुना त्वामुपैत्यन्तः कोपं प्रास्याम्यहं त्वयि॥ ३
विचारं ते करिष्यामि त्वदाचारानुरूपतः।
तव घृण्यक्रियाः सर्व्वा वर्त्तयिष्यामि च त्वयि॥
नार्द्रनेत्रो भविष्यामि न वा कारुणिकस्त्वयि। ४
भारवत्तु तवाचारम् अर्पयिष्याम्यहं त्वयि॥
तव घृण्यानि कर्म्माणि प्रवेक्ष्यन्ति तवान्तरं।
अभिज्ञास्यथ यूयञ्च तदानीं मां सदाप्रभुं॥
पुनश्च व्याजहारेमां वाणीं प्रभुः सदाप्रभुः। ५
हा दुःखं केवलं दुःखं पश्यतायातुमुद्यतं।
आयात्यन्तोऽन्त आयाति जाग्रत् त्वय्येति पश्य सः। ६
वर्त्तते त्वयि प्रत्यूषो भो देशे वासकृज्जन। ७
काल आयाति नेदिष्ठं दिनं कोलाहलान्वितं।
पर्व्वतोद्गतनादेन हर्षयुक्तेन वर्ज्जितं॥
स्वरोषं पातयिष्याम्यधुना तूर्णं तवोपरि। ८
त्वयि स्वकीयकोपञ्च प्रापयिष्यामि सिद्धतां॥
त्वद्विचारं करिष्यामि त्वदाचारानुरूपतः।

कर्म्म ते सकलं घृणं वर्त्तयिष्यामि च त्वयि ॥
९ नार्द्रनेत्रो भविष्यामि न करिष्यामि वा क्षमां।
त्वदाचारोचितं भारम् अर्पयिष्याम्यहं त्वयि ॥
तव घृण्यानि कर्म्माणि प्रवेक्ष्यन्ति तवान्तरं।
अभिज्ञास्यथ यूयञ्च ताडकं मां सदाप्रभुं ॥
१० दिनं पश्यागतं पश्य प्रत्यूषोऽयमुदेति च।
पुष्पितो जायते दण्डः स्फुटो धर्षः प्रभाति च ॥
११ वर्द्धमानश्च दौरात्म्यं दण्डः पापस्य जायते।
न तेषां शिष्यते किञ्चिन्न तेषां निवहस्य वा।
न तेषां वार्थतृष्णाया जातास्ते हीनकान्तयः ॥
१२ काल एव समायाति नेदिष्ठश्चाभवद्दिनं।
मा प्रहृष्टो भवेत् क्रेता विक्रेता मैव शोचतु।
क्षत्स्ने तस्या यतो वृन्दे क्रोधो वर्त्तितुमुद्यतः ॥
१२ प्राणेषु क्रेतृविक्रेत्रो र्जीवनेऽवस्थितेष्वपि।
विक्रेता स्वीयविक्रीतं वस्तु नायास्यति पुनः।
क्षत्स्ने तस्या यतो वृन्दे दर्शनं वर्त्तनोद्यतं ॥
स नायास्यति भूयस्तत् तयोः कोऽपि स्वजीवनं।
स्वापराधे ह्यवस्थाय दृढीकर्त्तुं न शक्ष्यति ॥
१४ तूर्य्यं वादयत प्रोच्चैः सर्व्वं कुरुत सज्जितं।
युद्धे गमनकारी तु न भविष्यति कश्चन।
क्षत्स्ने तस्या यतो वृन्दे मत्क्रोधो वर्त्तनोद्यतः ॥
१५ कृपाणो वहिरन्तस्तु मारी तिष्ठति सक्षुधा।
यो जनो विद्यते क्षेत्रे स कृपाणान्मरिष्यति।
पुर्य्यां यस्त्वस्ति मार्य्या स क्षुधया वा ग्रसिष्यते ॥
१६ तेषां मध्ये च ये केऽपि रक्षिष्यन्ते पलायिताः।
ते गिरीन् आश्रयिष्यन्ति दरीवासिकपोतवत्।
सकला एव कूजन्त एकैकः स्वापराधतः ॥
१७ शिथिलत्वम् अवाप्नोति सकलानां करद्वयं।
जलवत् प्रविलीयेते सकलानाञ्च जानुनी ॥
१८ कटिं शाणेन बध्नन्ति ते छाद्यन्ते च शङ्कया।
लज्जा सर्व्वानने भाति सर्व्वमुण्डे च मुण्डता ॥

मार्गेषु क्षिप्यते रूप्यं स्वर्णं ते मंस्यते मलं। १९
सदाप्रभोश्च क्रोधस्य दिने तान् परिरक्षितुं।
रूप्यं तेषां सुवर्णं वा समर्थं न भविष्यति॥
न प्राणास्तेन तप्स्यन्ति नोदरं पूरयिष्यते।
अपराधावहं विघ्नं तत् तेषामभवद्यतः॥
तेषां शोभाप्रदां भूषां ते दर्पाय व्यकुर्व्वत। २०
तया स्वघृणमूर्त्तीश्च कुदेवानामकल्पयन्।
ततो हेतोरहं तेषां दूषिकां विदधामि तां॥
पराणामेव हस्तेषु लोप्त्रवच्चार्पयामि तां। २१
लुटिता सा जनै र्म्लेच्छैः पापिष्ठै दूर्षयिष्यते॥
एतेभ्यश्च मनुष्येभ्यश्छादयिष्येऽहमाननं। २२
निगूढञ्चापि मे स्थानं ततोऽमेध्यीभविष्यति।
जनैः साहसिकैस्तच्च प्रविष्टै दूर्षयिष्यते॥
शृङ्खलं निर्मिमीष्व त्वं रक्तपातादिपातकैः। २३
पूर्णा यस्मादभूद्देशः पुरी क्रोहेण पूरिता॥
आनेष्यामि विजातीयान् जनान् दुष्टतमानहं। २४
स्वाधिकारं करिष्यन्ते तेषां वेश्मानि ते जनाः॥
दर्पं निवर्त्तयिष्याम्यहं जनानां बलीयसां।
विपक्षा उपभोक्ष्यन्ते तेषां पुण्यस्थलानि च॥
ध्वंस आयाति शान्तिस्तु तैरन्विष्टापि नाप्स्यते। २५
नाशो नाशात् परं भावी वार्त्ता वार्त्तानुवर्त्तते॥ २६
भाववक्तुः समीपं ते याचिष्यन्ते च दर्शनं।
विगतं याजकाच्छास्त्रं प्राचीनेभ्यश्च मन्त्रणं॥
राजा करिष्यते शोकं पतिः क्षोभं वसिष्यते। २७
हस्ता जनपदानाञ्च भविष्यन्ति सवेपनाः॥
यादृक् तेषां नयस्तादृग् आचरिष्यामि तान् प्रति।
तेषां निजविचारैश्च करिष्यामि विचारणं।
अभिज्ञास्यन्ति माञ्चैव तदानीं ते सदाप्रभुं॥

८ अष्टमोऽध्यायः।

१ यिरूशालमि यिहिष्केलस्येश्वरीयदर्शनं ५ विग्रहस्य दर्शनं ७ विग्रहस्य गेहदर्शनं १३ तम्मूषपूजिकानां योषितां दर्शनं १५ सूर्य्यार्चकानां दर्शनं १७ देवार्च्चाहतेः परमेश्वरस्य कोपश्च।

१ अपरं षष्ठवत्सरस्य षष्ठमासस्य पञ्चमदिनेऽहं स्वगृहे उपविष्ट आसं
यिहूदायाः प्राचीनजनाश्च मत्समक्षम् आसीना आसन् इत्यवसरे प्रभोः
२ सदाप्रभो र्हस्तस्तत्र मय्यर्पितोऽभूत्। तदा मया दृक्पातं कृत्वा वह्नि-
रूपिणी मूर्त्तिरेकादर्शि तत्कट्याकृतिस्तदधोदेशश्च वह्निः, कटितस्त-
३ दूर्द्धदेशश्च ज्योतिष आभायास्तैजसधातोः प्रभाया वा सदृशः। सा
हस्ताकृतिं प्रसार्य्य मूर्द्धः शिखायां मां दधार तत आत्मा द्यावापृ-
थिव्यो र्मध्यमार्गेण मां नयन् ऐश्वरदर्शने यिरूशालम्युत्तरमुखस्याभ्य-
न्तरद्वारस्य प्रवेशस्थान उपस्थापयामास, तद् ईर्ष्योत्पादिकायाः ईर्ष्या-
४ प्रतिमायाः स्थानम् आसीत्। निम्नभूम्यां यादृश्याकृति र्मयादर्शि तादृश
इस्रायेल ईश्वरस्य प्रतापस्तत्र आसीत्।
५ अपरं स मां जगाद भो नरसन्तान, त्वमुत्तरदिशं प्रति दृक्पातं
कुरुष्व। ततो मयोत्तरदिशं प्रति दृक्पातं कृत्वा वेद्या द्वारस्योत्तरस्मिन्
६ ईर्ष्याप्रतिमा तत्र प्रवेशस्थाने ददृशे। स मां जगाद भो नरसन्तान,
अमी यत् कुर्व्वन्ति तत् किं पश्यसि? निजपुण्यगेहतो मां दवयितुम्
इस्रायेलः कुलम् अत्र या महाघृण्यक्रियाः करोति ताः किं पश्यसि?
पुनस्ततोऽप्यधिकमहती र्घृण्यक्रिया द्रक्ष्यसि।
७ ततः परं स मां प्राङ्गणद्वारसमीपं निनाय तत्र मया दृक्पातं कृत्वा
८ कुड्ये छिद्रमेकमदर्शि। स मां जगाद भो नरसन्तान, कुड्यं भिन्धि।
९ ततो मया कुड्ये भिन्ने द्वारमेकमदर्शि। स मां जगाद, प्रविश, जना
१० अमी या गर्हणीया दुष्क्रियाः कुर्व्वन्ति ता निरीक्षस्व। ततो मया प्रविश्य
दृक्पातं कृत्वा कुड्यस्य चतुर्द्दिक्षु चित्रितान्यमेध्यानां सरीसृपादीनां
यावतीयजन्तूनाम् इस्रायेल्कुलस्य सर्व्वासां घृण्यदेवमूर्त्तीनाञ्च प्रतिरू-
११ पाणि ददृशिरे। तासामग्रत इस्रायेल्कुलस्य प्राचीनानां सप्ततिजनास्ति-
ष्ठन्ति, तेषां मध्ये च शाफनस्य सुतो यासनीयो दण्डायमानोऽस्ति, तेषाम्
१२ एकैकस्य करे धूपपात्रं विद्यते, धूपमेघस्य सौरभञ्चोद्गच्छति। स मां
जगाद, भो नरसन्तान, इस्रायेल्कुलस्यामी प्राचीनजना अन्धकारे प्रत्यकं

स्वप्रतिमागारे यत् कुर्व्वन्ति तत् किं त्वया दृश्यते? यतस्ते वदन्ति, सदा-
प्रभुरस्मान् नैव पश्यति, सदाप्रभु र्देशं त्यक्तवानिति।
अपरं स मां जगाद, पुनश्च त्वं तैः क्रियमाणा महाघृणार्हाः क्रिया १३
द्रक्ष्यसि। ततः स मां सदाप्रभो र्मन्दिरस्योत्तरदिक्स्थद्वारस्य प्रवेशस्थानं १४
निनाय, मया चादर्शि तत्र समासीना योषितस्तम्मूषदेवं विलपन्ति।
अपरं स मां जगाद, भो नरसन्तान, त्वं किमिदं पश्यसि? पुनश्च १५
त्वम् एतस्मादपि महाघृणार्हाः क्रिया द्रक्ष्यसि। ततः स मां सदाप्रभो १६
र्मन्दिरस्याभ्यन्तरप्राङ्गणं निनाय, तत्रालिन्दवेद्यो र्मध्यस्थाने सदाप्रभोः
प्रासादस्य द्वारे प्रायशः पञ्चविंशतिनरा आसन्, तेषां पृष्ठदेशाः सदा-
प्रभो र्मन्दिरं प्रति मुखानि च पूर्व्वदिशं प्रत्यवर्त्तन्त, ते च पूर्व्वमुखाः सूर्य्यं
प्राणमन्।
ततः स मां जगाद, भो नरसन्तान, त्वं किमेतत् पश्यसि? अत्र क्रि- १७
यमाणाः स्वघृण्यक्रियाः किं यिहूदाकुलेन क्षुद्रा मन्यन्ते यत् ते दौरात्म्येन
देशं पूरयन्ति माञ्च पुनः पुनः क्रोधयन्ति प्रसारितपल्लवैश्च (पश्य)
स्वनासिकाः स्पृशन्ति। अतोऽहमपि कोपाचारं करिष्यामि, नैवार्द्रनेत्रो १८
भविष्यामि करुणां वा न करिष्यामि, तेषु प्रोच्चशब्देन मत्कर्णगोचरे
क्रोशत्स्वपि मयावधानं न विधायिष्यते।

---

९ नवमोऽध्यायः।

१ कतिपयानां शेषजनानां रक्षा ५ तदन्येषाञ्च पापेन विनाशः।

अपरं स मम कर्णगोचरे प्रोच्चशब्देन कथयामास, हे नगरस्य प्रह- १
रयः, प्रत्येकं निजं विनाशकास्त्रं करेणादाय समीपम् आगच्छत। तत २
उत्तरदिशि स्थितस्योर्द्धद्वारस्य वर्त्मना षट् नरा आजग्मुस्तेषाम् एकैकस्य
हस्ते निजं भञ्जकास्त्रमविद्यत,तेषां मध्ये चैकस्य जनस्य शुक्लवासांसि कटौ
च लेखकस्य मस्याधार आसन्, ते चागत्य पित्तलमयवेद्याः पार्श्वे तस्थुः।
इस्रायेल ईश्वरस्य प्रतापश्च यस्मिन् किरूब आरूढ आसीत् तस्मान्म- ३
न्दिरस्य शिलां प्रत्युज्जगाम तं शुक्लाम्बरं कटौ मस्याधारधारिणं नरम्
आजुहाव च। सदाप्रभुश्च तं जगाद, त्वं नगरमध्येनार्थतो यिरूशालमो ४
मध्यस्थानेन प्रगच्छ, तन्मध्ये क्रियमाणानां घृण्यक्रियाणां हेतो र्ये जना
उच्छ्वसन्ति विलपन्ति च तेषां ललाटेष्वङ्कं लिख च।

५ तदितरांश्च नरान् स मम कर्णगोचरे जगाद, यूयं पुरीमध्येनामुम्
६ अनुगच्छन्तो हत्यां विधद्ध्वं कृपां मा कुरुत मा वार्द्रनेत्रा भवत। वृद्धतरु-
णतरुणीशिशुयोषितः संहारायैव हत, परन्त्वङ्कविशिष्टस्य कस्यचिज्ज-
नस्य समीपं मैवोपतिष्ठत मम पुण्यधाम्न्येवारभध्वं। ततस्ते मन्दिर-
७ स्याग्रतः स्थितेषु वृद्धजनेष्वारम्भं चक्रिरे। अपरं स तान् जगाद, यूयम्
अन्तर्मन्दिरम् अमेध्यीकुरुत प्राङ्गणानि च कुणपैः पूरयत, ततः परं
८ निर्गच्छत। ततस्ते निर्गत्य नगरमध्ये हत्यां चक्रुः। तै हत्यां कुर्व्वद्भि-
श्चाहं शेषितः। तदाहं न्युब्जीभूय क्रोशन्नवादिषं, हा प्रभो सदाप्रभो,
भवान् यिरूशालम उपरि स्वकोपम् अवतारयन् किम् इस्रायेलः
९ कृत्स्नं शेषं ध्वंसयिष्यति? ततः स मां जगाद, इस्रायेल्कुलस्य यिहूदा-
याश्चापराधोऽतीव महान्, देशः शोणितैः परिपूर्णः पुरी च विकारेण
परिपूर्णा, यतस्ते वदन्ति, सदाप्रभुर्देशं त्यक्तवान् सदाप्रभु र्न पश्यतीति।
१० अहमप्यार्द्रनेत्रो न भविष्यामि कृपां वा न करिष्यामि, परन्तु तेषां
११ मूर्द्धसु तेषाम् आचारं वर्त्तयिष्यामि। तदानीं कटौ मस्याधारधारी स
शुक्लाम्बरो नरः सन्देशम् आनयन् जगाद, भवताहं यद् आज्ञापित-
स्तदेव कृतवान्।

---

१० दशमोऽध्यायः।

१ पुरे चिप्तानाम् अङ्गाराणां दर्शनं ८ किरूबाणां दर्शनञ्च।

१ ततः परं मया दृक्पाते कृते किरूबाणां मूर्द्ध उपरि स्थिते विताने
नीलमणेः सदृशं किञ्चिददर्शि, सिंहासनरूप्याकृतिरेव तेषाम् उपरि-
२ ष्टाददर्शि। स च तं शुक्लाम्बरम् आलप्य जगाद त्वं चक्रस्यान्तरालैः
किरूबस्याधःस्थानं प्रविश्य किरूबाणाम् अन्तरालेभ्यः प्रज्वलिताङ्गारान्
आदाय स्वमुष्टी पूरयित्वा नगरस्योपरि विकिर। ततः स मम दृष्टि-
३ गोचरे प्रविष्टः। ते किरूबास्तस्य नरस्य प्रवेशकाले मन्दिरस्य दक्षिणे
४ दण्डायमाना आसन्, परन्त्वन्तःप्राङ्गणं मेघेन पूरितम् आसीत्। अपरं
सदाप्रभोः प्रतापः किरूबस्योर्द्धत उद्गत्य मन्दिरस्य शिलायाम् अधि-
तस्थौ, ततो मन्दिरं मेघेनापूर्य्यत प्राङ्गणञ्च सदाप्रभोः प्रतापस्य तेजसा
५ पूरितमभवत्। वहिःस्थप्राङ्गणेऽपि किरूबाणां पक्षशब्दः सर्व्वशक्तिमत
६ ईश्वरस्य कथनशब्द इवाश्रूयत। त्वं चक्रस्यान्तरालेभ्यः किरूबाणामेवा-

न्तरालेभ्यो वह्निं गृहाणेत्याज्ञायां तस्मै शुक्लाम्बरनराय प्रदत्तायां यदा स
प्रविश्य चक्रस्य पार्श्वेऽतिष्ठत्, तदा किरूब एकः किरूबाणाम् अन्तरा- ७
लेभ्यः स्वहस्तं प्रसार्य्य किरूबाणाम् अन्तरालेषु स्थितं वह्निम् आदाय
तस्य शुक्लाम्बरनरस्य मुष्टिद्वयेऽर्पयामास स च तमादाय निश्चक्राम।

तेषां किरूबाणां पक्षाणाम् अधो मानवहस्ताकृतिरविद्यत। मया ८
च दृक्पातं कृत्वादर्शि, एकैकस्य किरूबस्य पार्श्वे एकैकं चक्रम् इत्थं तेषां ९
किरूबाणां पार्श्वेषु चत्वारि चक्राण्यविद्यन्त, तेषां चक्राणाम् आभा वैदूर्य्य-
मणेः प्रभायाः सदृशी। तेषां चतुर्णामाकारश्चैकरूप आसीत् स चक्रान्त- १०
र्वर्त्तिचक्ररूपः। गमनकाले ते स्वपार्श्वचतुष्टयानुसारेणागच्छन् गमने न ११
पर्य्यवर्त्तन्त। तेषाम् एकतमस्य शिरसः सम्मुखं स्थानमेवागच्छन् गमने न
पर्य्यवर्त्तन्त। तदीयमांसपृष्ठहस्तपक्षाणां चक्राणाञ्च साकल्यं चक्षुभिः १२
पूर्णमासीत् चतुर्णाञ्च स्वस्वचक्राण्यासन्। मम कर्णगोचरे तानि चक्राणि १३
चक्रवात इतिनाम्ना सम्बोधितानि। एकैकस्य प्राणिनश्चत्वारि वदना- १४
न्यासन्, प्रथमं किरूबस्य वदनं, द्वितीयं नरस्य वदनं, तृतीयं सिंहस्य
वदनं, चतुर्थञ्चोत्क्रोशस्य वदनं। अपरं ते किरूबा ऊर्द्धम् उद्गताः। १५
किबारनद्यास्तीरे यः प्राणी मयादर्शि प्राण्ययं स एव। किरूबाणां गम- १६
नकाले चक्राणि तेषां पार्श्वेनागच्छन्, भूमित उद्गमनाय किरूबैः स्वप-
क्षेषूत्थाप्यमानेषु चक्राण्यपि तेषां पार्श्वान्न पर्य्यवर्त्तन्त। तेषु तिष्ठत्सु तान्य- १७
तिष्ठन्, तेषूद्गच्छत्सु तानि तैः सार्द्धम् उदगच्छन्, यतस्तस्य प्राणिन
आत्मा तेष्वविद्यत।

अपरं सदाप्रभोः प्रतापो मन्दिरस्य शिलाया ऊर्द्धतोऽपगत्य किरू- १८
बाणामुपरि संस्थितः। ततः किरूबाः स्वपक्षान् उत्थाप्य मम दृष्टिगो- १९
चरे प्रगमनकाले भूतलाद् उद्गताश्चक्राणि च तेषां सम्मुखम् उद्गतानि,
तत्साकल्यञ्च सदाप्रभो र्मन्दिरस्य पूर्व्वद्वारे संस्थितं। उपरिष्टाद् इस्रा-
येल ईश्वरस्य प्रतापस्तेषु संस्थितः। अयम् इस्रायेल ईश्वरस्य वाहनस्व- २०
रूपः स प्राणी यः किबारनद्यास्तीरे मया दृष्टः। ते च किरूबा इति
मयाभिज्ञातं। एकैकस्य चत्वारि वदनान्येकैकस्य चत्वारः पक्षाश्चासन्, २१
पक्षाणाञ्चाधो मानवहस्तस्याकृतिरविद्यत। तेषामास्यानाञ्च रूपमधीदं
वक्तव्यं किबारनद्यास्तीरे यान्यास्यानि मया दृष्टानि, इमानि तत्समा- २२
नाकाराणि तान्येव चासन्, एकैकः प्राणी निजास्यस्य सम्मुखदिशम्
अगच्छत्॥

११ एकादशोऽध्यायः।

१ अधिपानां प्रगल्भकथनं ५ तेषां दण्डकथनं १३ यिद्दिष्कीलस्य विलपनं १७ परमेश्वरस्य प्रतिज्ञा २२ किरूबाणां गमनं वन्दिलोकानां समीपं यिद्दिष्कीलस्य पुनर्गमनञ्च।

१ अनन्तरमात्मा मामुत्थाप्य सदाप्रभो मन्दिरस्य पूर्व्वदिगभिमुखं पू-
र्व्वद्वारं निनाय। तत्र द्वारप्रवेशस्थाने पञ्चविंशतिनरा आसन् तेषां
मध्येऽसुरस्य पुत्त्रो यासनियो बिनायस्य पुत्त्रः पिलटियश्चेतौ जनाध्यक्षौ
२ मया दृष्टौ। स च मां जगाद, भो नरसन्तान, पुर्य्यामस्याम् अधर्म्म-
३ सङ्कल्पकाः कुमन्त्रणाकारिणश्च नरा इमे। ते वदन्ति, गृहनिर्म्माणम्
४ अनासन्नं, पुरीयं खेदनी वयञ्च तत्रत्यं मांसमिति। अतस्त्वं तानधि
भावोक्तिं व्याहर, भो नरसन्तान, भावोक्तिं व्याहर।

५ तदानीं सदाप्रभोरात्मा मामाविश्य जगाद, सदाप्रभुरित्थमाह,

प्रोक्तं तदेव युष्माभि र्भो इस्रायेल्कुलोद्भवाः।
उद्भूतं वो हृदाकाशे सकलं ज्ञायते मया॥
६ भूरयोऽत्र पुरीमध्ये सन्ति युष्मद्धता जनाः।
यूयं नगरवर्त्मानि शवपूर्णान्यकार्ष्ट च॥
७ ततो हेतोरिदं वाक्यं प्रभुराह सदाप्रभुः।
युष्मद्धता मनुष्या ये पुरीमध्ये निपातिताः।
सन्ति मांसस्वरूपास्ते खेदनी च पुरी स्वयं।
तस्मात्तु मध्यतो यूयं भ्रंशिष्यथ वहिष्कृताः॥
८ सम्भीता व्यसितो यूयम् असिं युष्मास्वहं ततः।
वर्त्तयिष्यामि वक्तीदं प्रभुरेव सदाप्रभुः॥
९ युष्मांस्तस्या वहिष्कृत्य निधास्ये परपाणिषु।
करिष्यामि च युष्मासु विचारफलसाधनं॥
१० निपतिष्यथ यूयञ्च तदानीमसिना हताः।
विचारं वः करिष्यामीस्रायेल्देशस्य सीमनि।
अभिज्ञास्यथ यूयञ्च तदानीं मां सदाप्रभुं॥
११ युष्मदर्थम् पुरीयञ्च खेदनी न भविष्यति।
तन्मध्ये च स्थितं मांसं यूयं नैव भविष्यथ।
विचारं वः करिष्यामीस्रायेल्देशस्य सीमनि॥

अभिज्ञास्यथ यूयञ्च तदा मां तं सदाप्रभुं। १२
विधयो यस्य युष्माभि र्न समाचरिताः पुरा॥
यस्य विचारनिर्देशा युष्माभिश्च न पालिताः।
स्वचतुर्द्दिक्स्थजातीनां विचाराज्ञानुगामिभिः॥

मयि त्विथं भाववाक्यं कथयति विनायस्य सुतः पिलटियो ममार। १३
तदाहं न्युब्जीभूय प्रोच्चरवेणोतक्रुश्यावोचं, हा प्रभो सदाप्रभो, त्वं किम्
इस्रायेलः शेषं निःशेषयिष्यसि? तदा सदाप्रभोरिदं वाक्यं मां प्रति १४
प्रादुरभूत्, भो नरसन्तान, तव भ्रातरस्तव प्रकृतभ्रातरः के? इस्रायेलः १५
कृत्स्नं कुलं, तत्साकल्यमेव। यिरूशालम्निवासिनस्तान् गदितवन्तः,
यूयं सदाप्रभोः सान्निध्याद् दूरीभवत, देशोऽधिकारवदस्मभ्यमेव दत्तः।
अतो हेतो र्वद, प्रभुः सदाप्रभुरित्थमाह यद्यप्यहं तान् परजातीनां मध्यं १६
नीत्वा दूरीकृतवान् यद्यपि च नानादेशेषु तान् विकीर्णवान् तथापि ते
यं यं देशं गतास्तत्राहं कियत्कालं यावत् तेषां पुण्यधाम भविष्यामि।

अतस्त्वं वद, प्रभुः सदाप्रभुरित्थमाह, १७
सङ्ग्रहीष्याम्यहं युष्मान् जातीनां मध्यतः पुनः।
यूयं यत्र विकीर्णाः स्थ नानादेशप्रवासिनः॥
सञ्चेष्यामि पुन र्युष्मांस्तेभ्यो देशेभ्य एव च।
पुन र्दास्यामि युष्मभ्यम् इस्रायेलश्च नीवृतं॥
तां प्रविश्य जना भूमिं तन्मध्यात् सर्व्वविग्रहान्। १८
सर्व्वांस्तस्याः कलङ्कांश्च दवयिष्यन्ति यत्नतः॥
तेभ्योऽन्तःकरणञ्चैकं सम्प्रादस्याम्यहं तदा। १९
आत्मानञ्चान्तरे तेषां स्थापयिष्यामि नूतनं॥
दवयिष्यामि तेषाञ्च देहाच्चित्तं शिलामयं।
वितरिष्यामि तेभ्यश्च चित्तं मांसमयं तदा॥
ततो मद्विधिमार्गेण प्रगमिष्यन्ति ते जनाः। २०
मत्सूत्राणि च रक्षन्तः पालयिष्यन्ति कर्म्मभिः॥
मत्प्रजास्ते भविष्यन्त्यहं तेषां भवितेश्वरः। २१
स्वीयघृणार्हदेवानां वशे घृण्यक्रियासु च।
येषान्त्वासज्यते चित्तं तेषां तत्कर्म्मणः फलं।
मूर्द्ध्न्यहं वर्त्तयिष्यामीत्याह नित्यप्रभुः प्रभुः॥

अपरं स्वपार्श्वस्थचक्रैः स्वोपरिस्थितेनेस्रायेल ईश्वरस्य प्रतापेन च २२

२३ सहिताः किरूबाः स्वपक्षान् उत्थापयामासुः, सदाप्रभोः प्रतापश्च पुर्य्या
२४ मध्यस्थानस्योर्द्धत उद्गत्य पुर्य्याः पूर्व्वदिक्स्थपर्व्वतस्य शृङ्गे तस्थौ। अप-
रम् ईश्वरीयात्मनः प्रभावेनात्मा दर्शनयोगे माम् उत्थाप्य कल्दीयदेशं
प्रवासितजनानाम् अन्तिकं निनाय, यच्च दर्शनमहं दृष्टवान् तन्म-
२५ त्तोऽपजगाम। अपरं सदाप्रभु र्याः कथा मां प्रदर्शितवांस्तस्य ताः
सर्व्वकथा अहं तान् प्रवासितजनान् अवादिषं।

---

१२ द्वादशोऽध्यायः।

१ यिहिष्कलस्य यात्राया दृष्टान्तः ८ यात्रायास्तात्पर्य्यं सिदिकियस्य वन्दित्वाया-
पगमनं १७ यिहिष्केलस्य सकम्पं भोजनपानाभ्यां यिहूदीयानां दुःखस्य दृष्टान्तः
२१ दृष्टान्तकथाकृते यिहूदीयानां भर्त्सनं २६ भाविवाचः शीघ्रसफलत्वञ्च।

१ अपरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्। भो नरसन्तान, त्वं
२ विद्रोहिकुलस्य मध्ये वर्त्तसे, दर्शनार्थं तेषां चक्षूंषि विद्यन्ते, ते तु न
पश्यन्ति; श्रवणार्थं तेषां कर्णाश्च विद्यन्ते तथापि ते न शृण्वन्ति
३ यतस्ते विद्रोहिकुलाः। त्वञ्च, भो नरसन्तान, स्वार्थं प्रवाससामग्रीं वि-
धाय दिवा तेषां साक्षात् प्रवासं याहि, तेषां साक्षात् प्रवासार्थं स्वस्था-
४ नात् स्थानान्तरं प्रगच्छ, किंस्वित् ते यद् विद्रोहिकुलास्तद् द्रक्ष्यन्ति। त्वं
दिवा तेषां साक्षात् प्रवासार्थकसामग्रीमिव स्वसामग्रीं वहिष्कुरुष्व
५ स्वयञ्च प्रवासाय निर्गमनेनेव सन्ध्यायां तेषां साक्षान्निर्गच्छ। तेषां सा-
६ क्षात् कुड्ये छिद्रं कृत्वा तेनैव तां वहिष्कुरुष्व। तेषां साक्षात् स्कन्धे भारं
वहन्नन्धकारे वहिष्कुरुष्व स्ववदनञ्चाच्छाद्य भूमौ दृक्पातं मा कुरुष्व, यत
७ इस्रायेलः कुलस्य कृतेऽहं त्वाम् अद्भुतलक्षणमिव नियुक्तवान्। ततोऽहं
यथादिष्टस्तथैवाकार्षं, दिवा प्रवासार्थकसामग्रीमिव स्वसामग्रीं वहिर-
कार्षं, सन्ध्यायाञ्च हस्तेन कुड्ये स्वार्थं छिद्रम् अकार्षं,अन्धकारे तद्वहिष्क-
८ रणकाले च तेषां साक्षात् स्कन्धे भारम् अवाक्षं। अपरं प्रातःकाले सदा-
९ प्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, त्वं किं करोषीति
१० किम् इस्रायेलः कुलस्य ते विद्रोहिकुला जनास्त्वां न पृष्टवन्तः? अत-
स्तान् वद, प्रभुः सदाप्रभुरित्थमाह, यिरूशालमि नरपतिरेव ते च
११ यस्य मध्यवर्त्तिनस्तत् कृत्स्नम् इस्रायेल्कुलमेव धुरोऽयं। त्वं वद, युष्मद-
र्थम् अहम् अद्भुतलक्षणं। मया यादृशमकारि तान् प्रति तादृशं कारि-

ष्यते, ते प्रवासं बन्दिदशाञ्च यास्यन्ति। तेषां मध्यवर्त्ती नरपतिरन्धकारे १२
स्कन्धे भारं वहन् निष्क्रमिष्यति, बहिष्करणार्थकद्वाराय जनैः प्राचीर
च्छिद्रं विधायिष्यते, स यथा स्वयं स्वचक्षुर्भ्यां भूमिं न पश्येत् तदर्थं निजव-
दनम् आच्छादयिष्यति। मया च तस्योपरि स्वजाले विस्तारिते स मत्स- १३
क्राहेण धारिष्यते मया च बाबिलं कल्दीयभूमिं नायिष्यते, स तु तां न
द्रक्ष्यति तत्रैव च मरिष्यति। तस्य चतुर्द्दिक्स्थान् सर्व्वजनान् सहायान् १४
सैन्यनिवहांश्चाहं सर्व्ववायुभि र्विकरीष्यामि तेषां पश्चान्निष्कोषमसिं
चालयिष्यामि च। मया परजातीयानां मध्ये तेषां विक्षेपणेन देशानां १५
मध्ये विकिरणेन च ते मां सदाप्रभुम् अभिज्ञास्यन्ति। अहन्तु तेषां १६
स्वल्पजनान् असिक्षुन्मारीभ्योऽवशेषयिष्यामि ते येषां मध्यं गतास्तेषां
परजातीयानां समक्षं स्वघृण्यक्रियाणां सर्व्वासां वृत्तान्तं ज्ञापयिष्यन्ति,
अहं सदाप्रभुरस्मीतच्च ते ज्ञास्यन्ति।

अपरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, १७
त्वं कम्पमानः स्वखाद्यं भक्ष्य, उद्विज्यमानो व्यथमानश्च स्वतोयं पिब १८
च। देशस्य जनांश्च वद, प्रभुः सदाप्रभुरिस्रायेलो भूमिमधि यिरूशाल- १९
म्निवासिनो वदति ते व्यथमानाः स्वखाद्यं भक्षयिष्यन्ति स्तब्धाश्च स्वतो-
यानि पास्यन्ति तेन स्वनिवासिनां दौरात्म्यात् स्वपूरकद्रव्यै र्हीनो देशः
स्तब्धो भविष्यति। वसतिनगराणि च निर्जनानि भविष्यन्ति देशश्चो- २०
त्सन्नो भविष्यति, अहं सदाप्रभुरस्मीदञ्च युष्माभि र्ज्ञायिष्यते।

पुनश्च सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, २१
कालो दीर्घो भविष्यति सर्व्वं दर्शनञ्च नङ्क्ष्यतीत्ययम् इस्रायेलो भूमौ २२
युष्माकं कः प्रवादः? अतस्त्वं तान् वद, प्रभुः सदाप्रभुराह, स प्रवादो २३
मया विरतः कारिष्यते, स इस्रायेलि पुन र्न प्रयोजयिष्यते, परन्तु त्वं
तान् वद, कालः सर्व्वदर्शनस्य वाक्यञ्चोपतिष्ठते। यतः किमप्यनर्थकद- २४
र्शनं चाटुमन्त्रपठनं वेस्रायेलः कुले पुन र्न सम्भविष्यति। परन्तु सदा- २५
प्रभुरहमेव कथां व्याहरिष्यामि याञ्च कथां व्याहरिष्यामि सा सिद्धिम्
अवाप्स्यति विलम्बः पुन र्न सम्भविष्यति। किन्तु भो विद्रोहिकुलाः,
युष्माकमेव जीवनकाले कथां व्याहरिष्यामि साधयिष्यामि चेति प्रभुः
सदाप्रभुराह।

पुनश्च सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, पश्य, २६
इस्रायेलः कुलभुक्ता जना वदन्ति, यद् दर्शनमसौ पश्यति तद् बहुदि- २७

२८ नानां दर्शनम्, असौ सुदूरकालानधि भावोक्तिं व्याहरतीति। अतस्त्वं
तान् वद, प्रभुः सदाप्रभुरित्थमाह, मम केषाञ्चन वाक्यानां विलम्बः पुन
र्न सम्भविष्यति, यद्यद् वाक्यं मया गदिष्यते तत्तत् सिद्धिमवाप्स्यतीति
प्रभुः सदाप्रभुराह।

---

१३ त्रयोदशोऽध्यायः।

१ मृषाभाववादिनां भर्त्सनं १० आर्द्रलेपस्य दृष्टान्तः १७ भाववादिनीनाम् उपधान-
दृष्टान्तश्च।

१ अपरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, त्वं
२ भावोक्तिप्रचारकान् इस्रायेलो भाववादिनोऽधि भावोक्तिं व्याहर, तान्
३ आत्ममनोनीतभाववादिनश्च वद, यूयं सदाप्रभो र्वाक्यं शृणुत। प्रभुः
सदाप्रभुरित्थमाह धिक् तान् मूढान् भाववादिनो ये निजात्मानम् अ-
४ नुसरन्त्यलीकञ्च पश्यन्ति। हे इस्रायेल्, तव भाववादिनो निर्जनस्था-
५ नानां शृगालैस्तुल्याः। यूयं प्राचीरच्छिद्रेषु नैवोत्थितवन्तः, इस्रायेलः
कुलस्य कृते वा सदाप्रभो र्दिवसे युद्धायावस्थानार्थं प्राकारं नैव निर्म्मि-
६ तवन्तः। ते जना अलीकदर्शनम् अन्टतमन्त्रञ्च पश्यन्ति। सदाप्रभुना
न प्रहिता अपि सदाप्रभुराहेति वदन्ति वाक्यस्य सिद्धिं प्रतीक्षन्ते च।
७ किं न यूयम् अलीकदर्शनानि पश्यथान्टतमन्त्रांश्च व्याहरथ? मयि न
८ कथितवत्यपि सदाप्रभुराहेति किं न वदथ? अतो हेतोः प्रभुः सदाप्र-
भुरित्थमाह, यूयम् अलीकं वदथान्टतञ्च पश्यथ, ततोऽहं युष्मान् आक्र-
९ मिष्यामीति प्रभुः सदाप्रभुराह। मम हस्तश्च तान् अलीकदर्शिनोऽन्टत-
मन्त्रव्यवहारिणश्च भाववादिन आक्रमिष्यति ते मम प्रजानां संसदि
न स्थास्यन्ति, इस्रायेल्कुलस्य नामावल्यां न लेखिष्यन्त इस्रायेलो भूमिञ्च
न प्रवेक्ष्यन्ति, तेनाहं प्रभुः सदाप्रभुरस्मीति यूयं ज्ञास्यथ।
१० शान्त्यां न सत्यामपि शान्तिरस्तीति वदन्तो यतस्ते मम प्रजा भ्रम-
यन्ति यतश्च ताभिः कुड्ये निर्म्मिते पश्य कुलेपेन तद् उपलेप्स्यन्ति,
११ ततो हेतोस्त्वं तान् पतनोद्यतकुलेपेन लेप्यकृतो वद, आप्लाविवृष्टिरायास्य-
१२ ति, यूयञ्च भो करकाः पतत, झञ्झावातश्च प्रपततु। पश्यत सा भित्तिः
१३ पतिष्यति, जनाश्च युष्मान् प्रक्ष्यन्ति, युष्माभिः कृतं लेपनं कुत्रेति। अतः
प्रभुः सदाप्रभुरित्थमाह, पश्याहं रोषेण झञ्झावातस्य प्रपतनं विधा-

ष्यामि, मम क्रोधाच्चाश्मविवृष्टि र्मम कोपाच्च संहारकः वरकापातो भवि-
ष्यति। यूयं यां भित्तिं कुलेपेनोपलिप्तवन्तस्तामहं निर्भेत्स्यामि भूमि- १४
साच्च करिष्यामि, तस्या मूलस्थानावृतं भविष्यति, तस्यां पतितायाञ्च यूयं
तन्मध्ये विनङ्क्ष्यथ ततोऽहं सदाप्रभुरस्मीति ज्ञास्यथ। इत्थं तस्यां भित्त्यां १५
कुलेपेन तस्या लेप्यकृत्सु चाहं स्वरोषं सफलं करिष्यामि युष्मांश्च वदि-
ष्यामि, गता सा भित्ति र्गताश्च तल्लेप्यकृतः। अर्थतो गता इस्रायेलस्ते १६
भाववादिनो ये यिरूशालमे भावोक्तिं कथयन्ति शान्त्यां न सत्यामपि
शान्तिरस्तीति दर्शनं पश्यन्ति च, प्रभुः सदाप्रभुरिदं ब्रूते।

भो नरसन्तान, त्वज्जनानां या योषितः स्वमनोनीतभावोक्तिं व्याहृ- १७
रन्ति त्वं ताः प्रति स्थिरदृष्टिं कृत्वा भावोक्तिं व्याहर। त्वं वद, प्रभुः १८
सदाप्रभुरित्थमाह, ता योषितो धिक् याः प्राणानां मृगयार्थं सर्व्वकक्षा-
णां कृत उपधानानि सीव्यन्ति यावतीयपरिमाणस्य मस्तकाच्छादकवा-
सांसि च संस्कुर्व्वन्ति। मत्प्रजानां प्राणानां मृगयां कुर्व्वाणा यूयं किं
स्वप्राणान् जीवयिष्यथ? तदर्थं किं कतिपयमुष्टिप्रमाणयवानां कतिपय- १९
पूपखण्डानां वा लोभान्मत्प्रजानां समक्षं माम् अमेध्यीकुर्व्वाणा अनृत-
वाक्येऽवधानकारिणी र्मम प्रजा अनृतवाक्यानि गदन्त्यो येषां मरणम-
नुचितं तान् प्राणान् मारयितुं येषाञ्च जीवनमनुचितं तान् प्राणान्
जीवयितुं चेष्टध्वे? ततो हेतोः प्रभुः सदाप्रभुरित्थमाह, पश्यत यूयं २०
यैः प्राणानां मृगयां कुरुध्वे, युष्माकं तान्युपधानान्यहम् आक्रमिष्यामि
ते च प्रोड्डयिष्यन्ते, युष्माकं बाहुभ्यश्च तान्याच्छेत्स्यामि, युष्मद्धृतान् तान्
प्राणांश्च मोचयिष्यामि ते च प्रोड्डयिष्यन्ते। युष्माकमाच्छादनार्थकवा- २१
सांसि च छेत्स्यामि, मम प्रजाश्च युष्मत्करेभ्य उद्धरिष्यामि, ता मृग-
याहृता इव पुन र्युष्मत्करगता न भविष्यन्ति, अहञ्च सदाप्रभुरस्मीति
यूयं ज्ञास्यथ। धार्म्मिको यो जनो मया नोद्वेजितो यूयं मृषावाक्येन २२
तम् उद्वेजयथ, दुर्जनश्च यथा जीवनलाभार्थं स्वकुमार्गं न त्यजेत् तथा
यूयं तं सबलहस्तं कुरुथ। ततो हेतो र्यूयं पुनरलीकदर्शनानि न द्रक्ष्यथ २३
मन्त्रांश्च न व्याहरिष्यथ, युष्मत्करेभ्योऽहं स्वप्रजा उद्धरिष्यामि तदाह-
मेव सदाप्रभुरस्मीति यूयं ज्ञास्यथ।

१४ चतुर्दशोऽध्यायः।

१ प्राचीनलोकानां कापट्यप्रकाशनं ६ इस्रायेल्वंशान् प्रति भीतिदर्शनं १२ ईश्वरीयशास्तेरनिवार्य्यता २२ कतिपयजनानां दण्डादवशेषणस्य भविष्यद्वाक्यञ्च।

१ अपरम् इस्रायेलः प्राचीननराणां कतिपयजना मत्समीपम् आगत्य
२ मदग्रत उपविविशुः। तदा सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्,
३ भो नरसन्तान, इमे नराः स्वीयघृण्यदेवान् स्वान्तःकरणारूढीकृतवन्तो
निजापराधजनकविघ्नानि स्वमुखानाम् अग्रतः स्थापितवन्तश्च, एतैरहं
४ किं परिप्रष्टव्यः? अतस्त्वं तान् आलप्य वद, प्रभुः सदाप्रभुरित्थमाह,
इस्रायेल्कुलस्य यो नरः स्वीयघृण्यदेवान् स्वान्तःकरणारूढीकृत्य निजापराधजनकविघ्नं स्वमुखस्याग्रतः स्थापयित्वा च भाववादिनः समीपम्
आयाति, सदाप्रभुरहमेव तस्य तद्विषये ऽर्थतस्तस्य घृण्यदेवानां
५ बाहुल्यात् तस्य प्रतिवादी भविष्यामि। इत्थम् अहम् इस्रायेलः कुलं
तदीयान्तःकरणपाशेन धरिष्यामि, यतस्ते सर्व्वे स्वीयघृण्यदेवानां कृते
मत्तः पराङ्मुखा जाताः।

६ अतस्त्वम् इस्रायेलः कुलं वद, प्रभुः सदाप्रभुरित्थमाह, यूयं प्रत्यायात,
स्वीयघृण्यदेवेभ्यः पराङ्मुखा भवत, स्वीयगर्हणीयक्रियाभ्यश्च स्वमुखानि
७ परावर्त्तयत। यत इस्रायेल्कुलोद्भव इस्रायेलो मध्ये प्रवासी वा यो
जनो मदनुगमनान्निवृत्य स्वघृण्यदेवान् अन्तःकरणारूढीकृत्य स्वीयापराधजनकविघ्नं स्वमुखस्याग्रतः स्थापयित्वा च मां परिप्रष्टुं भाववादिनः
समीपम् आयाति, सदाप्रभुरहमेव स्वयन्तो तस्य प्रतिवादी भविष्यामि,
८ तं जनं प्रति स्थिरदृष्टिं कृत्वा चाभिज्ञानमिव प्रवादास्पदमिव च तं
निःशेषयिष्यामि, मत्प्रजानां मध्यात् तम् उच्छेत्स्यामि च, तेनाहं सदा-
९ प्रभुरस्मीति यूयं ज्ञास्यथ। भाववादी च मुग्धीभूय यदि वाक्यं व्याहरेत्, तर्हि सदाप्रभुरहं तं भाववादिनं मोहयिष्यामि तस्य विरुद्धं स्वकरं
१० प्रसार्य्य च स्वप्रजानाम् इस्रायेल्जनानां मध्यात् तम् उच्छेत्स्यामि। तावुभौ निजापराधस्य दण्डं भोक्ष्येते, प्रष्टु र्यादृशो दण्डो भाववादिनस्तादृशो
११ दण्डो भविष्यति। तथा कृते इस्रायेल्कुलीयजना न पुन र्मत्तः पराङ्मुखीभूय विभ्रमिष्यन्ति स्वीयाधर्म्मक्रियाभिश्च न पुनरशुचीभविष्यन्ति,
परन्तु ते मम प्रजा भविष्यन्त्यहञ्च तेषाम् ईश्वरो भविष्यामीति प्रभुः
सदाप्रभुराह।

अनन्तरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, १२
भो नृसन्तान यो देशः पापेनापकरोति मे। १३
अहं तत्प्रातिकूल्येन निजहस्तं प्रसार्य्य चेत्।
भक्ष्यावलम्बनं भिन्द्यां प्रापयेयञ्च तं क्षुधां।
उच्छिन्द्यां तस्य मध्याच्च मनुष्यान् पशुभिः सह॥
तदा त्रयो नरा नोहो दानीयेल् आयुबश्च चेत्। १४
मध्यतस्तस्य देशस्य भवेयुः समुपस्थिताः॥
स्वप्राणानेव ते तर्हि रक्षिष्यन्ति स्वधर्म्मतः।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः॥
मया देशस्य सर्व्वत्रानीतैः हिंस्रकजन्तुभिः। १५
यदि क्रियेत सोऽनाथो जन्तूनाञ्च भयाद् यदि।
मरु र्जायेत देशः स पथिकैरपि वर्जितः॥
प्रभु र्नित्यप्रभुः प्राह सत्यश्चेन्मम जीवनं। १६
तस्य मध्ये स्थितास्तर्हि पूर्व्वोक्तास्ते त्रयो नराः।
स्वपुत्त्रान् स्वीयपुत्त्री र्वा नैव शक्ष्यन्ति रक्षितुं।
केवलं ते तरिष्यन्ते देशो ध्वंसं गमिष्यति॥
तद्देशस्य विरुद्धं वा खड्गमानीय चेदहं। १७
देशमध्येन खड्गस्यानुजानीयां गतागतं।
तन्मध्याच्च समुच्छिन्द्यां मनुष्यान् पशुभिः सह॥
तस्य मध्ये तदानीञ्च विद्येरंस्ते त्रयो नराः। १८
(प्रभु र्नित्यप्रभुः प्राह) सत्यश्चेन्मम जीवनं॥
ते स्वपुत्त्रान् स्वपुत्त्री र्वा नैव शक्ष्यन्ति रक्षितुं।
रक्षणं केवलं तेषां त्रयाणां सम्भविष्यति॥
तं देशं प्रति मारीं वा प्रेरयेयमहं यदि। १९
रोषं शोणितरूपं मे यदि तत्रावतार्य्य च।
मनुष्यान् पशुभिः सार्द्धम् उच्छिन्द्यां तस्य मध्यतः॥
तत्र स्युश्च तदा नोहो दानीयेल् आयुबश्च चेत्। २०
(प्रभु र्नित्यप्रभुः प्राह) सत्यश्चेन्मम जीवनं।
ते स्वपुत्त्रं स्वपुत्त्रीं वा नैव शक्ष्यन्ति रक्षितुं।
निजप्राणान् स्वधर्म्मेण ते रक्षिष्यन्ति केवलं॥
तथापीदं वचो ब्रूते प्रभुरेव सदाप्रभुः। २१

यिरूशालममावेष्टुं ध्वंसिदण्डचतुष्टयं।
ममार्थात् खड्गदुर्भिक्षहिंस्रश्वापदमारकं।
प्रेष्य यद्यपि तन्मध्याद् उच्छिन्द्यां सपशून् नरान्॥
२१ पश्य तथापि तन्मध्ये शिक्ष्यन्ते रक्षिता जनाः।
ते च निर्गमयिष्यन्ते पुत्त्रदुहितृभिः सह॥
ते च पश्यागमिष्यन्ति निष्क्रान्ता युष्मदन्तिकं।
यूयं तेषां तदाचारं क्रियाश्चालक्षयिष्यथ॥
यिरूशालम् मया यच्च प्रापिताभूदमङ्गलं।
यत् सर्व्वं प्रापिताभूत् सा लप्स्यध्वे तत्र सान्त्वनं॥
२२ ते जना एव युष्माकं जनयिष्यन्ति सान्त्वनं।
यस्मात् तेषां यदाचारं क्रियाश्चालक्षयिष्यथ।
तदा यद्यन्मयाकारि तस्यां तन्न निरर्थकं।
एतज्ज्ञास्यथ वक्तीदं प्रभुरेव सदाप्रभुः॥

---

१५ पञ्चदशोऽध्यायः।

१ द्राक्षालताकाष्ठस्य दृष्टान्तः ६ तस्य तात्पर्य्यञ्च।

१ अपरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान,
२ अन्यकाष्ठसमूहाद् द्राक्षालतायाः काष्ठं कथमुत्कृष्टं? वनतरूणां मध्य-
३ वर्त्तिन्यास्तस्या लतायाः क उत्कर्षः? कार्य्योपयोगि किमपि निर्म्मातुं जनैः
किं तस्मात् काष्ठं गृह्यते? तत्र पात्राणामुल्लम्बनार्थको नागदन्तो वा किं
४ तस्माद् गृह्यते? पश्य तद् भक्ष्यवद् वह्नये दीयते। वह्निना तु तस्या-
ग्रद्वयं भक्षयित्वा मध्यदेशे कृष्णीकृते तत् किं कस्यचित् कार्य्यस्य योग्यं
५ भविष्यति? पश्य तद् यदाविकलमासीत् तदा कार्य्ये न प्रायुज्यत, पुनर-
ग्निना भक्षितं कृष्णीकृतञ्च तत् किं कार्य्ये प्रयोक्ष्यते?
६ ततो हेतोः प्रभुः सदाप्रभुरित्थमाह, वनकाष्ठानां मध्ये यथा द्रा-
क्षालतायाः काष्ठं मया भक्ष्यवद् अग्नये दत्तं तथा यिरूशालमो निवा-
७ सिनो मया दायिष्यन्ते। अहञ्च तेषु स्थिरदृष्टिं करिष्यामि, अग्नितो
निर्गतास्तेऽग्निना भक्षयिष्यन्ते। मया तेषु स्थिरदृष्टौ क्रियमाणायामहं
८ सदाप्रभुरस्मीति यूयं ज्ञास्यथ। अहञ्च देशं ध्वंसयिष्यामि यतस्तैराचि-
त्यलङ्घनं कृतमिति प्रभुः सदाप्रभुराह।

१६ षोडशोऽध्यायः ।

१ प्रान्तरे क्षिप्तसद्योजातकन्यया समं यिरूशालम उपमानं ६ तां कन्यां भृत्वा उद्वहति यः पुमान् तेन समं परमेश्वरस्योपमानं १५ तत्कन्याया अर्थाद् यिरूशालमो व्यभिचारस्य वर्णनं ३५ तद्व्यभिचारात् तस्या भाविदण्डस्य कथनं ४४ तस्या भगिनीद्वयेनार्थात् सिदोमशोमिरोणाभ्यां सह तस्या उपमानं ६० शेषे दयालाभस्य कथनञ्च।

अपरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, यि- १
रूशालमं तस्या विविधगर्हणीयतां ज्ञापय। त्वं वद, प्रभुः सदाप्रभु र्यि- २
रूशालममिदं ब्रूते, तवोत्पत्ति र्जन्म च किनानीयदेशात्, तव जनक
इमोरीयजनस्तव माता च हित्तीया। तव जन्मनस्स वृत्तान्तोऽयं। तव ४
जन्मदिने तव नाभिच्छेदनं संस्कारार्थं वा तोये स्नपनं लवणेन वा मर्द्दनं
वस्त्रेण वा वेष्टनं नाकारि। एतेषां किमपि कार्य्यं कर्त्तुं त्वयि दयामाच- ५
रितुं वा कस्यापि लोचनं त्वयि स्नेहदृष्टिं नाकार्षीत्। त्वत्प्राणानां गर्हणी-
यत्वात् त्वं जन्मदिन एव क्षेत्रपृष्ठे निक्षिप्ताभूः।
तदाहं त्वत्समीपेनातिक्रामन् त्वां सहजशोणिते दूष्यमाणाम् अदर्शं ६
सहजशोणितशय्यां त्वाञ्चावादिषं जीवेति सहजशोणितशय्यामेव त्वां जी-
वेत्यवादिषं। क्षेत्रस्योद्भिदमिव त्वां वर्द्धिष्णुमकार्षं तेन त्वं वृद्धा महत्यभवः ७
परमकान्तिश्चाप्नोस्तुङ्गस्तनी दीर्घकेशी चाभवः, त्वन्तु विवस्त्रा नग्ना चासीः।
ततो मया त्वत्समीपेनातिक्रामता त्वामालोक्य तव कालः प्रेमकाल इत्य- ८
दर्शि, ततोऽहं तवोपरि स्ववस्त्रं विस्तार्य्य तव नग्नतामाच्छादितवान्
शपथेन च त्वां विश्वास्य त्वया सह समयं कृतवानिति प्रभुः सदाप्रभु-
राह, इत्थं त्वं ममैवाभूः। अहञ्च त्वां तोये स्नापयित्वाङ्गाद् रुधिरं प्रक्षा- ९
ल्य तव तैलाभ्यङ्गं कृतवान्। त्वाञ्च शिल्पितपरिच्छदेन तहश्चर्म्मपादुका- १०
भ्यां सूक्ष्मवस्त्रनिर्म्मितकटिबन्धनेन कौशेयप्रावारेण च परिधापितवान्।
त्वाञ्चालङ्कारै र्भूषितवान् तव करद्वये कङ्कणद्वयं कण्ठे हारं नासिका- ११
यां नासाभरणं कर्णयुगले कुण्डले शिरसि च शोभाजनकं किरीटं दत्त- १२
वान्। इत्थं त्वं स्वर्णरूप्याभ्यां भूषिता सूक्ष्मवस्त्रकौशेयशिल्पितवासः- १३
परिहिता चाभवः, सूक्ष्मगोधूमचूर्णमधुतैलं तव भक्ष्यमासीत्, त्वञ्चातीव
परमसुन्दरी राज्ञीत्वस्य योग्या चाभवः। तव सौन्दर्य्याच्च तव कीर्त्ति १४
र्जातीनां मध्ये व्यानशे, यतस्त्वय्यर्पितया मद्दत्तशोभया तत् सिद्धमासी-
दिति प्रभुः सदाप्रभुराह।

१५ त्वञ्च स्वसौन्दर्य्येणाश्वासिता स्वकीर्त्त्या व्यभिचारिणी चाभवः स्वव्य-
भिचारञ्च तोयवत् प्रायुङ्क्थाः, त्वत्समीपेन यः कश्चिद् अगच्छत् तस्यैव
१६ तद्भोगोऽभवत्। त्वञ्च तव कतिपयवासांसि गृहीत्वा स्वार्थं कलङ्कितयव-
निकाभूषितान्यूच्चस्थलानि रचयित्वा तत्र व्यभिचारमकरोः, तानि त्व-
१७ द्रचनायानि तच्च कर्म्माकर्त्तव्यं। अपरं त्वं मया दत्ताया मदीयस्वर्ण-
रूप्यनिर्म्मितायास्तव भूषाया अभरणानि गृहीत्वा तैः पुंविग्रहान् नि-
१८ र्म्माय तैः सह व्यभिचारम् अकरोः। तव शिल्पितवस्त्राणि चादाय
१९ तान् अवेष्टयो मम तैलं मम धूपञ्च तेषां साक्षाद् अस्थापयः। यच्च भ-
क्ष्यमहं तुभ्यं दत्तवान् मम तद् भक्ष्यम् अर्थतो यै गोधूमचूर्णतैलमधुभि-
रहं त्वामभोजयं तानि त्वं सौरभघ्राणाय तेषां समक्षमस्थापयः,
२० ईदृशं कर्म्माक्रियतेति प्रभुः सदाप्रभुराह। मत्कृते प्रसूतास्तव पुत्त्र-
पुत्त्रीश्च गृहीत्वा त्वं तेषां भक्षणार्थं बलिवत् तेभ्यः प्राददाः। तव व्यभि-
२१ चारं किं क्षुद्रमन्यथाः? तस्मात् किं मम सन्तानान् हत्वा तान् उद्दि-
२२ श्याग्निमध्येन गमयित्वा तेभ्योऽददाः? तव कुत्सानां घृणक्रियाणां व्यभि-
चारस्य च मध्ये तव तं बाल्यकालं व्यस्मरो यस्मिंस्त्वं नग्नानावृतलज्जा
२३ निजशोणिते पादमर्दिता चासीः। सन्तापः सन्ताप एव त्वयि वर्त्ति-
२४ ष्यत इति प्रभुः सदाप्रभुराह, यतस्तव सर्व्वदुष्टतायाः परं त्वं स्वार्थं वे-
२५ श्यालयं निरमिमीथाः, एकैकस्मिंश्चत्वरे प्रोच्चस्थलं निरमिमीथाः। एकै-
कस्मिन् मार्गाग्रे तव प्रोच्चस्थलं निरमिमीथाः स्वसौन्दर्य्यं गर्हणीयम् अ-
करोरेकैकस्य पथिकस्य कृते स्वचरणौ व्यस्तृणुथाः स्वव्यभिचारञ्चावर्धयः।
२६ त्वं स्वसमीपवासिभिः स्थूलमांसैर्मिस्रीयसन्तानैः सह व्यभिचारमकरो
२७ र्मम क्रोधोत्पादनाय स्वव्यभिचारम् अवर्धयश्च। ततः पश्य मया त्व-
द्विरुद्धं हस्तं प्रसार्य्य तव वृत्तिर्न्यूनीकृता त्वञ्च तव द्वेषिणीनां तव क-
२८ दाचाराल्लज्जापन्नानां पिलेष्टीयपुत्त्रीणां स्वेच्छायां समर्पिता। पुनस्त्व-
मतृप्तिबोधाद् अशूरीयसन्तानैः सार्द्धं व्यभिचारम् अकरोस्तैः सह व्य-
२९ भिचारं कृत्वापि तृप्तिं नागच्छः। पुनस्त्वं वाणिज्यस्थानं कल्दीयदेश-
३० मुद्दिश्य स्वव्यभिचारम् अवर्धयस्तेनापि तृप्तिं नागच्छः। प्रभुः सदाप्र-
भुराह कथं विकृतं तव चित्तं येन त्वम् अमर्य्यादायाः पुंश्चल्याः स्त्रिया
३१ योग्यम् एतत् सर्व्वं कर्म्माकरोः, एकैकस्मिन् मार्गाग्रे स्ववेश्यालयं नि-
रमिमीथा एकैकस्मिंश्चत्वरे निजप्रोच्चस्थलम् अस्थापयः पणस्यावज्ञानेन
३२ वेश्याया असदृशी चाभवः। हा सतीत्वभ्रष्टे पत्नि, त्वं पत्युः परिवर्त्तेन

परान् गृह्णीषे । सर्व्ववेश्याभ्यो जनैः पणो दीयते, त्वन्तु तव सर्व्वेभ्यः प्रे- ३३
मकारिभ्यः पणं ददासि निजव्यभिचारवशाच्च तेभ्यश्चतुर्दिग्भ्यस्त्वत्समी-
पमागमनार्थं पुरस्कारं वितरसि । इत्थं तव व्यभिचारेण स्त्रीणां विप- ३४
रीतं त्वयि जातं ताभिश्च त्वामानुकृत्य वेश्यावृत्ति र्न क्रियते, त्वया पणो-
ऽदायि तुभ्यन्तु नादायीत्यनेन विपरीतं जातं ।
अतो भो वेश्ये, सदाप्रभो र्वाक्यं शृणु । प्रभुः सदाप्रभुरित्थमाह, व्य- ३५
भिचारेण तव प्रेमकारिषु तव गर्हणीयेषु सर्व्वघृणास्पदेषु च त्वया नि- ३६
जधनस्यापव्ययोऽकारि निजलज्जा च व्यवारि तेभ्यः स्वसन्तानानां शोणि-
तमदायि च, ततो हेतोः पश्य त्वं यानुद्दिश्यात्मानं पणितवती तव तान् ३७
सर्व्वान् प्रेमकारिणः सर्व्वांश्च तव प्रियान् द्विष्टांश्च जनान् अहं सङ्ग्रही-
ष्यामि, तव विरुद्धमेव सर्व्वदिग्भ्यस्तान् सङ्गृह्य तेषां समक्षं तव लज्जां
विवरिष्यामि, ते तव कृत्स्नां लज्जां द्रक्ष्यन्ति । अहञ्च व्यभिचारिणीनां ३८
शोणितपातिनीनाञ्च स्त्रीणां योग्येन विचारेण तव विचारं निष्पादयि-
ष्यामि त्वाञ्च रोषेर्ष्ययोः शोणितस्वरूपां विधास्यामि । तेषां करेषु च त्वां ३९
समर्पयिष्यामि, ते च तव वेश्यालयं ध्वंसयिष्यन्ति तव प्रोच्चस्थलान्युत्-
पाटयिष्यन्ति त्वां विवस्त्रां करिष्यन्ति तव भूषाया अभरणानि हरिष्य-
न्ति त्वाञ्च नग्नां दिगम्बरीञ्च विहास्यन्ति । त्वद्विरुद्धं समितिञ्चानाय- ४०
यिष्यन्ति प्रस्तराघातेन त्वां मारयिष्यन्ति स्वखड्गैः परिव्यत्स्यन्ति च । तव ४१
गृहाणि वह्निना दाहयिष्यन्ति बहुस्त्रीणां समक्षं त्वयि विचारं नि-
ष्पादयिष्यन्ति च । इत्थं त्वं वेश्यावृत्तितो मया निवर्त्तयिष्यसे पणमपि ४२
पुन र्न दास्यसि । अहञ्च त्वयि स्वरोषं क्षान्तं करिष्यामि ममेर्ष्या च
त्वत्तो निवर्त्तिष्यतेऽहञ्च शान्तिं यास्यामि पुन र्न क्रोत्स्यामि च । यत- ४३
स्त्वं स्वशैशवकालं न स्मृत्वा सर्व्वैरेतैः कर्म्मभि र्ममामर्षमुत्पादितवती ततो
हेतोः पश्चादहमपि तवाचारस्य फलं तव मस्तके वर्त्तयिष्यामीति प्रभुः
सदाप्रभुराह, तव सर्व्वेभ्यो गर्हणीयकर्म्मभ्यः परं नाहं कुकर्म्मणा लिप्तो
भविष्यामि ।
पश्य यः कश्चित् प्रवादान् प्रयुङ्क्ते स त्वामधीमं प्रवादं वदिष्यति, माता ४४
यादृशी तस्या दुहिता तादृशी । त्वं निजमातु र्दुहिता सा स्वपतिं ४५
स्वसन्तानांश्च निराकृतवती । त्वञ्च स्वभगिन्यो र्भगिनी ते स्वपतिसन्तानान्
निराकृतवत्यौ । युष्माकं माता हित्तीया पिता चेमोरीयः । तव वृह- ४६
ती भगिनी तवोत्तरदिशि निवासिनी सदुहितृगणा शोमिरोन्, तव

क्षुद्रा भगिनी च तव दक्षिणदिशि निवासिनी सदुहितृगणा सिदोम् ।
४७ त्वञ्च तयो र्मार्गैस्तयो र्गर्हणीयाचारानुसारेण चरित्वाल्पकालात् परं
क्लान्ताभवस्तन्न, परन्तु तव सर्व्वाचरणेन ताभ्यामधिकापकर्षमसाधयः ।
४८ प्रभुः सदाप्रभुराह यद्यहं जीवामि तर्हि सदुहितृगणा तव भगिनी सि-
४९ दोम् सदुहितृगणायास्तव क्रियया तुल्यां क्रियां न कृतवती । पश्य तव
भगिन्याः सिदोमोऽपराधोऽयमासीत्, दर्पो भक्ष्याढ्यता निश्चिन्ततायुक्ता
शान्तिस्तस्यास्तदीयदुहितृणाञ्चासीत् तास्तु दुःखिदरिद्राणां करान्
५० सबलान् नाकुर्व्वन् । ता गर्व्विता मत्समक्षं गर्हणीयाचारम् अकुर्व्वन्,
५१ ततोऽहं तद् दृष्ट्वा ता दवयितवान् । शोमिरोनपि तव पापानाम् अर्द्धेन
समं पापं न कृतवती त्वं ताभ्यां बहुतरा गर्हणीयक्रिया अकरोः स्वकृ-
ताभिः सर्व्वाभि र्गर्हणीयक्रियाभिस्त्वं स्वभगिन्यो र्निर्द्दोषतां प्रतिपादित-
५२ वती । त्वं स्वभगिन्यो र्यां लज्जाम् अवधारितवती तामेव निजलज्जां त्वम-
पि भुङ्क्ष्व । तव यैः पापैस्त्वं तयो र्गर्हणीया जाता तैरेव ते त्वत्तो नि-
र्द्दोषे प्रतिपन्ने । अतस्त्वं स्वभगिन्यौ निर्द्दोषीकृतवती तस्मात् त्वमपि त्रपस्व
५३ निजलज्जाञ्च भुङ्क्ष्व । अहञ्च तयोरर्थतः सदुहितृगणायाः सिदोमः
सदुहितृगणायाः शोमिरोणश्च निर्व्वासं तयो र्मध्ये च तव प्रवासानां
५४ प्रवासं प्रत्यावर्त्तयिष्यामि । तेन त्वं स्वलज्जां भोक्ष्यसे तयोराश्वासाय
५५ च यत् सर्व्वं कृतवती तस्माल्लज्जिष्यसे । तव भगिनी सिदोम् तदीयदु-
हितरश्च स्वीयपूर्व्वदशायां प्रत्यावर्त्तिष्यन्ते शोमिरोनपि तदीयदुहितरश्च
स्वीयपूर्व्वदशायां प्रत्यावर्त्तिष्यन्ते त्वं त्वदीयदुहितरश्च यूयमपि स्वपूर्व्वद-
५६ शायां प्रत्यावर्त्तिष्यध्वे । तव भगिनी सिदोम् तव गर्व्वकाल उपदेशसूत्र-
५७ वत् तव जिह्वाग्रे नाविद्यत । तदा च तव दुष्टता न विवृतासीत् पश्चात्
त्वरामीयकन्याभिः सर्व्वाभिश्च तत्समीपवासिनीभिः पिलेष्टीयकन्याभि
५८ र्निन्दनकाले समन्तात् तवावमननकाले च [विवृताभवत्] । तव कुक-
५९ र्म्मणो गर्हणीयक्रियायाश्च फलं त्वया भोक्तव्यमिति सदाप्रभुराह । यतः
प्रभुः सदाप्रभुरित्थं ब्रूते, त्वया नियमस्य व्यर्थीकरणाय शपथमवज्ञाय
६० यादृगाचारः कृतस्तादृशमाचारमहं त्वां प्रति करोमि । परन्त्वहं तव
यौवनकाले त्वया सह यं नियमं कृतवान् तं स्मरिष्यामि त्वत्कृतेऽनन्तका-
लीननियमं स्थिरीकरिष्यामि च ।

६१ त्वञ्च निजाचारं स्मरन्ती लज्जिष्यसे स्वतो महत्तराः क्षुद्रतराश्च स्वभ-
६२ गिनी र्ग्रहीष्यसि च । तास्तव नियमस्यांशिन्यो न सन्ति किन्त्वहं ता

दुहितृरिव तुभ्यं दास्यामि। अहञ्च त्वया सह स्वनियमं स्थिरीकरिष्यामि
त्वञ्च मां सदाप्रभुमभिज्ञास्यसि। त्वं यत् सर्व्वं कृतवती तदहं क्षमिष्ये ६३
तेन त्वं स्मृत्वा त्रपिष्यसे लज्जातश्च वक्तुं पुनरुद्घाटयितुं न प्रोत्सहिष्यस
इति प्रभुः सदाप्रभुराह।

---

१७ सप्तदशोऽध्यायः।

१ एकस्या द्राक्षालताया उत्क्रोशद्वयस्य च दृष्टान्तः ११ तस्य दृष्टान्तस्य तात्पर्य्य २२ ख्रीष्टरूपतरुरोपणस्य दृष्टान्तश्च।

अपरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, त्वम् १
इस्रायेलः कुलमधि गूढवाक्यं व्याहर दृष्टान्तकथाञ्च कथय। त्वं वद, २
प्रभुः सदाप्रभुराह, वृहत्पक्षो दीर्घपर्णश्चित्रवर्णतनुरुहैः पूर्ण एको म-
हान् उत्क्रोशपक्षी लिबानोनमागत्यैरसतरोरग्रभागमादायार्थतत्तदी- ४
यपल्लवानाम् उच्चतमपल्लवमुत्कृत्य बाणिज्यदेशं नीत्वा बणिजां नगरे
स्थापयामास। देशस्य वीजमेकञ्च गृहीत्वा वीजयोग्ये क्षेत्रे निदधे, महा- ५
तोयानां पार्श्वं नीत्वा वेतसमिव रोपयामास च। ततस्तत् प्ररुह्य वितता ६
क्षुद्रकाण्डा द्राक्षालता बभूव, तस्याः पल्लवास्तस्य पक्षिणोऽभिमुखा मूला-
नि च तस्याधःस्थितानि भविष्यन्तीत्यभिप्रेतं, सा च द्राक्षालता भूत्वा शा-
खावती पर्णमयी च बभूव। परन्तु वृहत्पक्षो भूरितनुरुहोऽपर एको ७
महान् उत्क्रोशपक्ष्यासीत्, ततः पश्य सा द्राक्षालता सेचनमाकाङ्क्ष्य
निजोद्यानसीताभ्यस्तमेवोद्दिश्य स्वमूलानि व्यस्तृणोत् स्वपल्लवांश्च व्यत-
नोत्। सा तूत्तमक्षेत्रे बहुतोयानां पार्श्वे रोपितासीत् तत्र पल्लविता ८
फलवती सत्तमा द्राक्षालता भवितुमशक्नोत्। त्वं ब्रूहि प्रभुः सदाप्रभु- ९
राह तत् किं सेत्स्यति? प्रथमपक्षिणा तस्या मूलान्युत्पाट्य फलेषु कर्त्ति-
तेषु सा किं न शोक्ष्यति? तस्या नवीनपल्लवाः सर्व्वे शोक्ष्यन्ति सा च
महाबाहुना बहुजनै र्वापि स्वमूलेभ्यः पुनरुन्नमयितुं न शक्ष्यते। पश्य सा १०
रोपिता सती किं सेत्स्यति? पूर्व्ववायुना स्पृष्टैव सा किं न शोक्ष्यति?
यत्र सा प्ररूढ़ा तासु सीतासु शोक्ष्यति।

अपरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, त्वं तद् विद्रोहिकुलं ११
वद, यूयं किम् एतस्य तात्पर्य्यं न जानीथ? पून र्वद, पश्यत, बाबिलीयरा- १२
जो यिरूशालमम् आगत्य तदीयराजं तदीयाध्यक्षांश्चादाय बाबिलं स्व-
सन्निधिं नीतवान्। राजवंशीयमेकं जनञ्च गृहीत्वा तेन सह समयं १३

१४ विधाय शपथं कारयामास देशस्य बलवतो जनांश्चापनिनाय। राज्यं
क्षुद्रं भविष्यति, नैव दर्पं करिष्यति, मम समयं रक्षिष्यति, स्थिरं भवि-
१५ ष्यति चेति तस्याभिप्रेतमासीत्। स तु जनस्तमभिद्रुह्य हयान् बहुसै-
न्यञ्च याचितुं मिसरदेशं स्वदूतान् प्रेरयामास। इदं येनाकारि स किं
कृतार्थो भूत्वा रक्षिष्यते? समयं व्यर्थीकृत्य स किं रक्षामवाप्स्यति?
१६ प्रभुः सदाप्रभुराह, यद्यहं जीवामि, तर्हि स येन राजत्वे नियुक्तो यस्य
शपथमवज्ञातवान् समयञ्च व्यर्थीकृतवान्, तस्यैव राज्ञो वासस्थाने
१७ तस्यैव समीपे च बाबिलि स मरिष्यति। बहुप्राणानाम् उच्छेदाय मृत्स-
यसेतुनिचय उच्चगृहनिर्म्माणे च कृतेऽपि समरे फिरौन् महाबलेनापि
१८ बहुजननिवहेनापि च तस्योपकारं न करिष्यति। स समयं व्यर्थी-
कर्त्तुं शपथम् अवज्ञातवान्, पश्य हस्तं दत्त्वापि सर्व्वमेतत् कृतवान्, स
१९ नैव रक्षाम् अवाप्स्यति। अतो हेतोः प्रभुः सदाप्रभुराह, यद्यहं जीवा-
मि तर्हि यो मदीयशपथस्तेनावज्ञातो यश्च मदीयसमयस्तेन व्यर्थीकृत-
२० स्तावहं तस्य शिरसि वर्त्तयिष्यामि। तस्योपरि मम जालं विस्तारयि-
ष्यामि च, तेन स मम पाशे धारिष्यते, अहञ्च तं बाबिलं गमयिष्यामि
स च मद्विपरीत्येन यद् औचित्यलङ्घनं कृतवान् तद्विषये तत्रैव तेन सार्द्धं
२१ विवदिष्ये। तस्य यावतीयसैन्यानां पलायिताः सर्व्वे जना असिना प-
तिष्यन्ति, तदवशिष्टाश्च सर्व्ववायुभि र्विकरीष्यन्ते, ततः सदाप्रभुरहमे-
वैतद् उक्तवानिति यूयं ज्ञास्यथ।

२२ प्रभुः सदाप्रभुरित्थमाह,

मया प्रांश्वेरसस्याग्रं गृहीतं रोपयिष्यते।
शीर्षात् तत्पल्लवानाञ्चैकं हरिष्यामि कोमलं।
उदग्रेऽद्रावतीवोच्चे रोपयिष्यामि च स्वयं॥
२३ इस्रायेलः शिखायाञ्च रोपयिष्यामि तं गिरेः।
भूषितः स ततः पत्रैः फलवांश्च भविष्यति।
वर्धिष्णुरेरसवृक्षश्च विशालः सम्भविष्यति॥
तस्याधः सर्व्वजातीया निवत्स्यन्ति च पक्षिणः।
छायायां तस्य शाखानां समवाप्स्यन्ति चाश्रयं॥
२४ नित्यप्रभुरहं प्रांशुं तरुं क्षुद्रीकरोमि यत्।
क्षुद्रकाण्डस्तु यो वृक्षस्तं यदुच्चीकरोम्यहं॥
रसपूर्णश्च यो वृक्षस्तं यत् संशोषयाम्यहं।

शुष्को यस्तु तरुस्तं यद् विदधामि सपल्लवं॥
क्षेत्रस्थास्तरवः सर्व्व परिज्ञास्यन्ति तत् तदा।
अहं सदाप्रभु र्वच्मि साधयिष्याम्यहञ्च तत्॥

---

१८ अष्टादशोऽध्यायः।

१ अम्लद्राक्षाफलदृष्टान्तः ५ धार्म्मिकतातेन सार्द्धम् ईश्वरस्य व्यवहारः १० धार्म्मिकतातस्य दुष्टसुतेन सममीश्वरस्य व्यवहारः १४ पापिष्ठपितु र्धार्म्मिकसुतेन समभीश्वरस्य व्यवहारः १९ अनुतापिपापिना धर्म्मत्यागिधार्म्मिकेण च समभीश्वरस्य व्यवहारः २५ परमेश्वरस्य न्यायकरणं मनःपरावर्त्तनाय लोकाह्वानञ्च।

अपरं सदाप्रभोरेतद् वाक्यं मां प्रति प्रादुर्बभूव, युष्माकं किमभूत्? १,२
जनकैरम्लम्द्दीनां भोगाज्जीर्णरदाः सुताः।
प्रवादोऽयं इस्रायेल्देशे युष्माभि र्व्याक्रियते। प्रभुः सदाप्रभुराह, ३
यद्यहं जीवामि तर्ह्येतस्य प्रवादस्य व्यवहारो युष्माभिरिस्रायेलो मध्ये
पुन र्न कर्त्तव्यः। पश्यत सर्व्वे प्राणा ममैव सन्ति। यथा पितुः प्राणास्तथा ४
पुत्त्रस्य प्राणा ममैव सन्ति। यः प्राणी पापं कुर्य्यात् स एव मरिष्यति।

यो नरो धार्म्मिको भवति, न्यायं धर्म्मञ्चाचरति, पर्व्वतेष्वाहारं न ५
करोति, इस्रायेल्कुलस्य गर्हणीयदेवप्रतिमा उद्दिश्य दृक्पातं न करो- ६
ति स्वसमीपवासिनो भार्य्यां न दूषयति, अशुचिं योषितं नोपगच्छति,
कमपि न पीडयति ऋणार्थं न्यस्तम् आधिं प्रतियच्छति कस्यापि द्रव्यं ७
नापहरति स्वभक्ष्यं बुभुक्षवे ददाति नग्नं वस्त्रेणाच्छादयति, कुसीदायार्थं ८
न ददाति, वृद्धिं न गृह्णाति स्वहस्तमन्यायान्निवर्त्तयति, वादिप्रतिवादि-
नो र्मध्ये यथार्थं विचारं करोति, मम विधीन् पालयति सत्यमाचरितुं ९
मम विचारसूत्राणि रक्षति च स एव धार्म्मिकः, सोऽवश्यं जीविष्यती-
ति प्रभुः सदाप्रभुराह।

तस्य य आत्मज आततायी रक्तपातको वा भवति परं प्रति पूर्व्वोक्तं १०
कमप्यपराधं करोति पूर्व्वोक्तं वा कमपि सदाचारं न करोति परन्तु पर्व्व- ११
तेष्वप्याहारं करोति स्वसमीपवासिनो भार्य्यां दूषयति, दुःखिनं दरि- १२
द्रञ्च पीडयति परस्य द्रव्यमपहरति, न्यस्तम् आधिं न प्रतियच्छति गर्ह-
णीयदेवप्रतिमासु दृक्पातं कुरुते घृणार्हक्रिया आचरति कुसीदायार्थं १३
ददाति वृद्धिं गृह्णीते च स किं जीविष्यति? स नैव जीविष्यति स

सर्व्वा एता घृणार्हक्रियाः कृतवान्, सोऽवश्यं मरिष्यति, तस्य रक्तपा-
तापराधस्तस्यैव मूर्ध्नि वर्त्तिष्यते ।
१४ पुनस्तस्य य आत्मजः स्वजनकेन कृतं सर्व्वपापं दृष्ट्वा बिभेति तदनुरूप-
१५ माचारं न करोति, पर्व्वतेष्वाहारं न करोति, इस्रायेल्कुलस्य गर्हणीयदे-
१६ वप्रतिमासु दृक्पातं न कुरुते स्वसमीपवासिनो भार्य्यां न दूषयति, कमपि
न पीडयति न्यस्तम् आधिम् आत्मसान्न कुरुते परद्रव्यं नापहरति स्व-
१७ भक्ष्यं बुभुक्षवे ददाति नग्नञ्च वस्त्रेणाच्छादयति, दीनपीडनात् स्वहस्तं नि-
वर्त्तयति कुसीदं वृद्धिं वा न गृह्णाति मम विचारसूत्राण्याचरति मम वि-
धीन् पालयति च, स निजपितुरपराधान्न मरिष्यति सोऽवश्यं जीविष्य-
१८ ति । तस्य पिता दौरात्म्यम् आचरितवान् भ्रातुर्द्रव्यम् अपहृतवान् स्व-
जातीयजनानां मध्ये चासत्क्रियाः कृतवान्, ततो हेतोः पश्य निजापरा-
धात् स मृतः ।
१९ तथापि यूयं वदथ, पुत्रः किमर्थं पितुरपराधान्न मृत इति । स पुत्रो
न्यायं धर्म्मञ्चाचरितवान् मम सर्व्वान् विधीन् रक्षितवान् आचरितवां-
२० श्च सोऽवश्यं जीविष्यति । यः प्राणी पापं करोति स एव मरिष्यति । पि-
तुरपराधः पुत्रेण न भोक्ष्यते, पुत्रस्यापराधो वा पित्रा न भोक्ष्यते । धा-
र्म्मिकस्य या धार्म्मिकता सा तस्मिन्नेव वर्त्तिष्यते, दुष्टस्य च या दुष्टता सा
२१ तस्मिन्नेव वर्त्तिष्यते । दुष्टो जनोऽपि चेत् स्वकृतेभ्यः सर्व्वपापेभ्यः प्रत्यावृत्य
मम सर्व्वविधीन् पालयेत्, न्यायं धर्म्मञ्चाचरेत् तर्ह्यवश्यं जीविष्यति नैव
२२ मरिष्यति । तेन कृतानि सर्व्वाण्यधर्म्मकर्म्माणि न स्मारिष्यन्ते स स्वकृत-
२३ धार्म्मिकतया जीविष्यति । प्रभुः सदाप्रभुराह, दुष्टजनस्य मरणे किं कथ-
ञ्चिदहं प्रीये ? किं न तस्य स्वमार्गात् प्रत्यावर्त्तने जीवने चैव प्रीये ?
२४ परन्तु धार्म्मिको जनो यदि स्वधर्म्मतः प्रत्यावृत्यान्यायकारी भूत्वा दुर्जन-
कृतानां घृणार्हक्रियाणाम् अनुरूपमाचारं कुर्य्यात् तर्हि स किं जीवि-
ष्यति ? तेन कृताः सर्व्वा धर्म्मक्रिया न स्मारिष्यन्ते, स यद् औचित्य-
लङ्घनं यानि च पापानि कृतवान् तेषामेव हेतुना मरिष्यति ।
२५ यूयन्तु वदथ, प्रभो र्मार्गो न समान इति । भो इस्रायेलः कुल, यूयं
२६ शृणुत, मम मार्गः किमसमानः ? युष्माकं वा मार्गः किमसमान ? धा-
र्म्मिको जनः स्वधर्म्मतः परावृत्यान्यायकारी भूत्वा च तत्र चेन्म्रियेत तर्हि
२७ स्वकृतान्यायस्य हेतुनैव स म्रियते । दुष्टश्च जनः स्वकृतदुष्टतातः
परावृत्य चेन्न्यायं धर्म्मञ्चाचरेत् तर्हि स निजप्राणान् जीवयिष्यति ।

स समालोच्य स्वकृतेभ्यः सर्व्वेभ्योऽधर्म्मकर्म्मभ्यः प्रत्यावृत्तः, तस्मात् २८
जीविष्यति नैव मरिष्यति। तथापीस्रायेलः कुलेन गद्यते प्रभो र्मार्गो २९
न समान इति। भो इस्रायेल्कुल, मम मार्गः किमसमानः? युष्माकं वा
मार्गः किम् असमानः? अतो हेतोः प्रभुः सदाप्रभुराह, भो इस्रायेलः ३०
कुल, अहमेकैकस्य जनस्याचारानुसाराद् युष्माकं विचारं विधास्ये, अतः
प्रत्यावर्त्तध्वं, निजसर्व्वाधर्म्मात् प्रत्यावर्त्तध्वं तथा कृते युष्माकम् अपराध-
जनकं विघ्नं न सम्भविष्यति। यूयं येनाधर्म्मिणो जाता युष्माकं तं सर्व्वम् ३१
अधर्म्मं स्वतो दूरम् अपास्यत नूतनमन्तःकरणं नूतनमात्मानञ्च स्वार्थं
सम्पादयत। भो इस्रायेलः कुल, किमर्थं यूयं म्रियेध्वं? यतः प्रभुः सदा- ३२
प्रभुराह, म्रियमाणस्य मरणेऽहं न प्रीये, तस्माद् यूयं प्रत्यावर्त्तध्वं तेन
जीविष्यथ।

---

१९ ऊनविंशोऽध्यायः।

१ सिंहीधरणदृष्टान्त इस्रायेलोऽधिपानां विलापः १० द्राक्षालताया दृष्टान्तश्च।

अथ त्वम् इस्रायेलोऽध्यक्षान् उद्दिश्य विलापगीतं व्याहर। त्वं वद, १

माता का तव सिंही सा सिंहीनां मध्यशायिनी। २
सा मध्ये युवसिंहानां निजापत्यान्यवर्धयत्॥
एकस्तद्वर्धितः शावो युवसिंहोऽभवद् यदा। ३
पशुदारणमभ्यास्यत् नरांश्चाभक्षयत् तदा॥
तदान्या जातिभिः श्रुत्वा गर्त्ते तेषामधारि सः। ४
वलयै र्यन्त्रितस्तैश्च निन्ये मिसरनीवृतं॥
प्रतिपाल्य तु सा स्वाशां यदा नष्टां समैक्षत। ५
तदान्यं शावमादाय युवसिंहं न्ययोजयत्॥
सिंहीनां मध्यचारी स युवसिंहोऽभवद् यदा। ६
पशुदारणमभ्यास्यत् नरांश्चाभक्षयत् तदा॥
उपायत् विधवास्तेषां नगराणि व्यनाशयत्। ७
स्वहुङ्कारस्य शब्देन ससर्व्वाश्चाछिणोद्भुवं॥
नानादेशात् तमाक्रम्य चतुर्द्दिक्स्थितजातिभिः। ८
जाले तस्योपरि क्षिप्ते गर्त्ते तेषामधारि सः॥
अपरं वलये र्बद्धा वीतंसे निहितश्च तैः। ९
अपनिन्ये विदेशं स बाबिल्राजस्य सन्निधिं॥

इस्रायेलो गिरीणाञ्च नैव कुत्रापि तद्रवः।
श्रूयतामिति तैरुक्ता स दुर्गाणि प्रवेशितः॥
१० त्वन्माता तव कल्याण आसीद् द्राक्षालता यथा।
रोपिता वारिणः पार्श्वे वारिबाहुल्यतश्च सा।
फलयुक्ताभवत् तत्र शाखाभिश्च विभूषिता॥
११ सुदृढा विटपास्तस्या अभवन् राजयष्टयः।
उच्चत्वाद् दीर्घता तस्या मेघस्पर्शिन्यजायत।
उच्चत्वे पल्लवानाञ्च बाहुल्ये सा व्यराजत॥
१२ कोपेनोत्पाटिता सा तु भूतले च निपातिता।
सकलञ्च फलं तस्याः शोषितं पूर्व्ववायुना।
विटपाश्च दृढाश्छिन्नाः शुष्का अनलभक्षिताः॥
१३ मरौ सा रोपितेदानीं शुष्के तृष्णातुरे स्थले॥
१४ तच्छाखाकाण्डतो वह्निं निर्गत्यात्ति च तत्फलं।
नास्त्येको विटपस्तस्याम् आदेयो राजयष्टये॥
विलापस्यैव गीतं तद् विलापाय च सिध्यति॥

---

२० विंशोऽध्यायः।

१ इस्रायेलः प्राचीनजनैः परमेश्वरस्याप्रष्टव्यता ४ मिसरि तैराज्ञालङ्घनं १० प्रान्तर आज्ञालङ्घनं २७ किनानदेश आज्ञालङ्घनं ३३ पुनरपि स्वदेशे तेषां संग्रहणञ्च।

१ अपरं सप्तमवर्षस्य पञ्चममासस्य दशमदिन इस्रायेलः प्राचीनवर्गस्य
२ केचिन्नराः सदाप्रभुं प्रष्टुम् आगत्य मत्समक्षम् उपविविशुः। ततः सदा-
३ प्रभो र्वाक्यं मां प्रति प्रादुर्बभूव, यथा, भो नरसन्तान, त्वम् इस्राये-
लस्तान् प्राचीननरान् आलप तांश्च वद, प्रभुः सदाप्रभुरित्थम् आह यूयं
किं मां प्रष्टुमागताः? यद्यहं जीवामि तर्हि युष्माभि र्न प्रष्टव्योऽहम् इति
४ प्रभुः सदाप्रभुराह। त्वं किं तेषां विचारं करिष्यसि? भो नरसन्तान,
किं विचारं करिष्यसि? तर्हि तेषां पूर्व्वपुरुषाणां गर्हणीयक्रियास्तान्
५ ज्ञापय। तांश्च वद, प्रभुः सदाप्रभुरित्थमाह,
इस्रायेलं पुरा यस्मिन् दिवसेऽहं वरीतवान्।
याकोबस्य च वंशाय शप्तुम् उच्छ्रितवान् करं।

मिसर्द्देशे च मज्ज्ञानं स्वयं तेभ्यः प्रदत्तवान्॥
योऽहं सदाप्रभुः सोऽहम् अस्मि युष्माकमीश्वरः।
एतत् तेभ्यः प्रतिश्रोतुं शपथेनोच्छ्रितवान् करं॥
प्रत्यश्रौष दिने तस्मिंस्तेभ्य उच्छ्रितपाणिना। ६
अहं युष्मान् मिसर्द्देशाद् युष्मदर्थे गवेषितं।
आनेष्याम्यपरं देशं दुग्धमधुप्रवाहिनं।
देशानां सकलानाञ्च मध्ये रत्नं मनोहरं॥
तांश्चावोचं स्वनेत्राणाम् इष्टमूर्त्तीरपास्यत। ७
मात्मानं कुरुताशुद्धं मिसरो घृण्यविग्रहैः।
योऽहं नित्यप्रभुः सोऽहम् अस्मि युष्माकमीश्वरः॥
ते तु मद्द्रोहिणो जाताः श्रोतुं नैच्छन् वचो मम। ८
नैव तैः स्वीयनेत्राणाम् अपास्यन्तेष्टमूर्त्तयः।
नैव वा तैर्व्यहीयन्त मिसरो देवविग्रहाः॥
तदावोचं मम क्रोधं मिसर्द्देशस्य मध्यतः।
तेष्वहं साधयिष्यामि स्वरोषं तेषु वर्षयन्॥
आचारेण तु मन्नाम्नोऽपेक्षामकरवं तदा। ९
न चेत् ते मज्जना यासां जातीनां मध्यवर्त्तिनः।
मिसर्द्देशस्य मध्याच्च तान् समुद्धर्त्तुमिच्छया।
यासां साक्षादहं तेभ्यो मम ज्ञानं प्रदत्तवान्।
तासां साक्षादशुद्धं तद् अभविष्यन्न संशयः॥
तानुद्धृत्य मिसर्द्देशात् प्रान्तरं नीतवांस्ततः॥ १०
मनुष्यः पालनं कुर्व्वन् येषां जीवति हेतुना। ११
मम तानि विधानानि तत्र तेभ्यश्च दत्तवान्।
विचारस्य च सूत्राणि तानि ज्ञापितवांस्तदा॥
योऽहं नित्यप्रभुः सोऽहं यत् तेषामस्मि पावकः। १२
एतज्ज्ञानप्रदानाय मम तेषाञ्च मध्यतः।
चिह्नानीव च तेभ्योऽदां मम विश्रामवासरान्॥
किन्तु मद्द्रोहि सञ्जातम् इस्रायेलः कुलं मरौ। १३
मनुष्यः पालनं कुर्व्वन् तेषां जीवति हेतुना।
तान् विधीन मम नारक्षत् मत्सूत्राणि निराकरोत्।
मम विश्रामवारांश्च सातिशयमदूषयत्॥

अतोऽवोचमहं तेषां संहाराय मरुस्थले।
स्वीयक्रोधानलं तेषां वर्षयिष्यामि मूर्द्धसु॥
१४ आचारेण तु मन्नाम्नोऽपेक्षामकरवं तदा।
न चेत् ते हि मया यासां जातीनाम् अग्र उद्धृताः।
तासां साक्षाद् अशुद्धं तद् अभविष्यन्न संशयः॥
१५ पुनरुच्छ्रितहस्तेन मरौ तानध्यवादिषं।
यं देशं दत्तवांस्तेभ्यो दुग्धमधुप्रवाहिनं।
देशानां सकलानाञ्च मध्ये रत्नं मनोहरं।
नैव प्रवेशयिष्यामि तं देशं तान् जनानहं॥
१६ मम विचारसूत्राणाम् अवज्ञा तै र्यतः कृता।
मामकीनविधानानि न तैराचरितानि च॥
अपवित्रीकृतास्तैश्च मम विश्रामवासराः।
किन्त्वन्तःकरणं तेषां स्वमूर्त्तीरनुगच्छति॥
१७ आर्द्रदृष्टिस्त्वहं तेषु भूत्वा तान् न व्यनाशयं।
न संहारमकार्षं वा तेषां तत्र मरुस्थले॥
१८ सन्तानांस्तु पुनस्तेषां मरावेतदवादिषं।
स्वतातानां विधानानि यूयं मैवानुतिष्ठत॥
तेषां विचारसूत्राणि यूयं मा परिरक्षत।
मात्मानं कुरुताशुद्धं तेषां वा देवविग्रहैः॥
१९ योऽहं नित्यप्रभुः सोऽहम् अस्मि युष्माकमीश्वरः।
मम यानि विधानानि तान्याचरितुमर्हथ॥
यूयं ममैव सूत्राणि रक्षन्तश्चानुतिष्ठत।
२० मम विश्रामवारांश्च पवित्रीकर्त्तुमर्हथ॥
योऽहं नित्यप्रभुः सोऽहमस्मि युष्माकमीश्वरः।
एतज्ज्ञानाय चिह्नान्यस्माकं मध्ये भवन्तु ते॥
२१ तेषां तु तेऽपि सन्ताना मम विद्रोहिणोऽभवन्।
मनुष्यः पालनं कुर्व्वन् येषां जीवति हेतुना।
मम तानि विधानानि तेऽपि नैव समाचरन्॥
मम तानि च सूत्राणि नानुष्ठातुमपालयन्।
अपवित्रानकुर्व्वंश्च मम विश्रामवासरान्॥
ततोऽवोचं मम क्रोधं प्रान्तरस्यास्य मध्यतः।

तेष्वहं साधयिष्यामि स्वरोषं तेषु वर्षयन्॥
हस्तं रुड्वा तु मन्नाम्नोऽपेक्षयाकरवं क्रियां। २१
न चेत् ते हि मया यासां जातीनामग्र उद्धृताः।
तासां साक्षादशुद्धं तद् अभविष्यन्न संशयः॥
पुनरुच्छ्रितहस्तेन मरौ तानध्यवादिषं। २२
जातीनामेव मध्येऽहं विकरीष्यामि तान् जनान्।
सकलेष्वेव देशेषु विक्षेप्स्यामि च धूलिवत्॥
यस्मान्मामकसूत्राणि न समाचरितानि तैः। २४
मामकीनविधानानां तै र्निराकरणं कृतं॥
अपवित्रीकृतास्तैश्च मम विश्रामवासराः।
स्वीयपैटकमूर्त्तीश्च तेऽन्वगच्छन् स्वलोचनैः॥
नैव मङ्गलयुक्ता येऽदां तेभ्यस्तादृशान् विधीन्। २५
मनुष्या यै र्न जीवन्ति तादृक्सूत्राणि चाददां॥
मया तेषां विनाशार्थं यदहञ्च सदाप्रभुः। २६
तेभ्यस्तज्ज्ञानदानार्थमहं तेषामुपायनैः।
सर्व्वप्रथमजातानां भस्मना तानदूषयं॥

अतो भो नरसन्तान, त्वम् इस्रायेलः कुलम् आलप, तांश्च वद, प्रभुः २७
सदाप्रभुरित्थमाह, युष्माकं पूर्व्वपुरुषा एतेनापि माम् अधिक्षिप्तवन्तो
यत् ते मां प्रत्यौचित्यम् अलङ्घयन्। यस्य देशस्य दानमहम् उच्छ्रितहस्तेन २८
तेभ्यः प्रतिश्रुतवान् तं देशं तान् आनैषं, ते तु सर्व्वम् उच्चगिरिं सर्व्वं
पर्णमयतरुञ्च निरीक्ष्य तत्र स्वयज्ञान्यकुर्व्वन् तत्र च क्रोधजनकान्
स्वीयोपहारान् न्यवेदयन् तत्र च स्वीयाघ्राणार्थकसुगन्धानस्थापयन् तत्र
च स्वपानीयनैवेद्यानि न्यसिञ्चन्। ततोऽहं तान् अपृच्छं यूयं यत्र गच्छथ २९
तद् उच्चस्थलं किं? तस्माद् अद्यापि तस्योच्चस्थलमिति नाम विद्यते।

अतो हेतोस्त्वम् इस्रायेलः कुलं वद, प्रभुः सदाप्रभुरित्थमाह, यूयं ३०
किं स्वपूर्व्वपुरुषाणां मार्गेणात्माशौचं विधद्ध्वे तेषां घृण्यमूर्त्तीनाम् अनु-
गमनेन च किं व्यभिचारिणो भवथ? स्वीयोपहारान् आनयन्तः स्वीय- ३१
सन्तानान् अग्निना गमयन्तश्च यूयं स्वीयदेवविग्रहैः सर्व्वैरद्य यावद् आ-
त्माशौचं सम्पादयथ, अतो भो इस्रायेलः कुल, युष्माभिः किमहं प्रष्टव्यः?
प्रभुः सदाप्रभुराह, यद्यहं जीवामि तर्हि नाहं युष्माभिः प्रष्टव्यः। युष्माकं ३२
हृदयाकाशे च यदुदेति तद् अर्थतः काष्ठानां प्रस्तराणाञ्चोपासनायै वयं

परजातीयानां विदेशिगोष्ठीनां तुल्या भविष्याम इति यद् वचो यूयं व-
दथ, तन्नैव सेत्स्यति।
३३ प्रभुः सदाप्रभुराह, यद्यहं जीवामि तर्हि बलवता हस्तेन प्रसा-
रितेन बाहुना विस्रावितेन रोषेण चाहं युष्माकम् उपरि राजत्वं
३४ करिष्यामि। युष्मांश्च जनसमूहानां मध्याद् वहिष्करिष्यामि, येषु
च यूयं विकीर्णा वर्त्तध्वे तेषां देशानां मध्याद् बलवता हस्तेन प्रसारि-
३५ तेन बाहुना विस्रावितेन रोषेण च युष्मान् सङ्ग्रहीष्यामि। जनसमू-
हानां प्रान्तरञ्च युष्मान् नीत्वा तत्र प्रत्यक्षीभूय युष्माभिः सह विवदिष्ये।
३६ यथाहं मिसर्देशस्य प्रान्तरे युष्मत्पूर्व्वपुरुषैः सह विवदितवान् तथैव यु-
३७ ष्माभिः सह विवदिष्य इति प्रभुः सदाप्रभुराह। युष्मांश्च यष्टेरधो गम
३८ यिष्यामि नियमस्य यन्त्रणाः प्रवेशयिष्यामि च। मद्विद्रोहिणो मदपरा-
धिनश्च जनान् युष्मत्तः पृथक् करिष्यामि, ते स्वप्रवासदेशान्मया वहि-
ष्कारिष्यन्ते किन्त्विस्रायेलो देशं न प्रवेक्ष्यन्ति, तेनाहं सदाप्रभुरस्मीति
यूयं ज्ञास्यथ।
३९ भो इस्रायेलः कुल, प्रभुः सदाप्रभु र्युष्मान् इदं वदति, यूयं यात
प्रत्येकं स्वदेवमूर्त्तीराराधयत, परन्तु पश्चात् किं न यूयं मम रवे-
ऽवधानं करिष्यथ? तदा स्वीयोपहारैः स्वीयदेवविग्रहैश्च मम पवित्रं
४० नाम न पुनरपवित्रीकरिष्यथ। यतः प्रभुः सदाप्रभुराह, मम पवित्रे
पर्व्वते इस्रायेलः शिखास्वरूपे पर्व्वते कृत्स्नमिस्रायेलः कुलम् अर्थतो
देशे स्थितं तत्साकल्यं मामाराधयिष्यति, तत्राहं तान् अनुग्रहीष्यामि
तत्र च युष्मदीयपवित्रवस्तूनां मध्ये युष्माकम् उत्तोलनीयद्रव्याणि नैवे-
४१ द्यानां प्रथमजातफलानि च लिप्सिष्ये। सौरभाघ्राणेनेवाहं युष्मान् अ-
नुग्रहीष्यामि जनसमूहानां मध्याद् उद्धरिष्यामि येषु देशेषु च यूयं
विकीर्णास्तेभ्यो युष्मान् संग्रहीष्यामि परजातीयानां समक्षं युष्मासु
४२ पवित्रीभविष्यामि च। युष्माकं पूर्व्वपुरुषेभ्यो यस्य देशस्य दानमहमु-
च्छ्रितकरेण प्रतिज्ञातवान् तं देशम् अर्थत इस्रायेलो भूमिं युष्मान् प्रवे-
४३ शयिष्यामि, एतेन यूयं मां सदाप्रभुम् अभिज्ञास्यथ। यैश्च यूयम् आत्मा-
शौचं कृतवन्तो युष्माकं तमाचारं तानि सर्व्वाणि कर्म्माणि च तत्र स्म-
४४ रिष्यथ युष्मत्कृताभिः सर्व्वदुष्क्रियाभि र्युष्माकं बीभत्सा जनिष्यते च। हे
इस्रायेलः कुल, अहञ्च युष्माकं कदाचारस्य युष्माकं भ्रष्टक्रियाणां वानुरूपं
व्यवहारं न कृत्वा मम नाम्न एवापेक्षया युष्माभिः सार्द्धं व्यवहारं

करिष्याम्यनेन यूयं मां सदाप्रभुम् अभिज्ञास्यथ, इयं प्रभोः सदाप्र-
भोरुक्तिः।

अपरं सदाप्रभो र्वाक्यं मां प्रति प्रादुरभूत्, यथा, भो नरसन्तान, त्वं ४५
दक्षिणदिशोऽभिमुखो भव, ग्रीष्मदेशे वाक्यानि वर्षयावाचीनक्षेत्रस्थं का- ४६
ननमुद्दिश्य भावोक्तिं व्याहर। तद् अवाचीनकाननं वद च, त्वं सदाप्रभो ४७
र्वाक्यं शृणु। प्रभुः सदाप्रभुरित्थमाह,

पश्याहं तव मध्येऽग्निम् उद्दीपयितुमुद्यतः।
स त्वन्मध्ये तरूनार्द्रान् सकलान् भक्षयिष्यति॥
स तरून् परिशुष्कांश्च सकलान् भक्षयिष्यति।
उच्छिखा सा शिखा नैव निर्वाणं समवाप्स्यति।
आदक्षिणोत्तरस्माच्च सर्व्वास्यं धक्ष्यते तया॥
योऽहं नित्यप्रभुः सोऽहं वह्निं ज्वालितवान् स्वयं। ४८
तत् सर्व्वो द्रक्ष्यति प्राणी स निर्वाणं न यास्यति॥

तदा मयोक्तं, हा प्रभो सदाप्रभो, पश्य ते मां वदन्ति, असौ किं नो- ४९
पमावचनानि व्याहरतीति।

---

२१ एकविंशोऽध्यायः।

१ यिरूशालममधि यिहिष्केलस्य विलापः ८ तीक्ष्णशाणितखड्गस्य कथनं १८ यि-रूशालमो विरुद्धं तदसिप्रेषणं २५ राज्ञो विरुद्धं भाविवाक्यं २८ अम्मोनलोकानां विरुद्धं तदसिप्रेषणञ्च॥

अपरं सदाप्रभो र्वाक्यं मां प्रति प्रादुरभूत्, यथा, भो नरसन्तान, त्वं १
यिरूशालममुद्दिश्य स्थिरदृष्टिं कुरुष्व, तस्याः पुण्यस्थानेषु च वर्षय, इ- २
स्रायेलो भूमिमुद्दिश्य भावोक्तिं व्याहर। त्वमिस्रायेलो भूमिं वद, सदा- ३
प्रभुरित्थमाह,

पश्य त्वाम् आक्रमिष्यामि स्वविकोषीकृतासिना।
जनं साधुञ्च दुष्टञ्चोच्छेत्स्यामि तव मध्यतः॥
यस्मात् साधुञ्च दुष्टञ्चोच्छेत्स्यामि तव मध्यतः। ४
तस्मादेव मदीयासिः स्वकोषान्निर्गमिष्यति।
आक्रमिष्यति सर्व्वांश्च जनान् आदक्षिणोत्तरात्॥
अहं नित्यप्रभुः स्वासिं विकोषीकृतवान् स्वयं। ५
तत् सर्व्वो ज्ञास्यति प्राणी स नावर्त्तिष्यते पुनः॥

६ त्वञ्च भो नरसन्तान, निष्ठन कटिभङ्गाय मनस्तापाय च तेषां समक्षं
७ निष्ठन। कुतो निष्ठनसीति तैः पृष्टो वद च, वार्त्तायाः कारणात्, यतः
सायाति, ततः सर्व्वं हृदयं गलितं सर्व्वं करद्वयञ्च शिथिलं सर्व्व आत्मा
निस्तेजा भवति सर्व्वं जानुद्वयं जलवद् विलीयत च। पश्य सायाति
सिद्धिञ्चाप्नोतीति प्रभुः सदाप्रभुराह।
८ पुनश्च सदाप्रभो र्वाक्यं मां प्रति प्रादुरभूत्, यथा, भो नरसन्तान,
९ भावोक्तिं व्याहर, सदाप्रभुरित्थमाहेति वद च। त्वं ब्रूहि,

असिरेकोऽसिरकोऽसौ निशातो मार्जितश्च सः॥
१० हननाय निशातः स द्योतनाय च मार्ज्जितः।
अत्रास्माभिः किमामोदं कृत्वेदं वा गदिष्यते।
मम पुत्रस्य दण्डेन सर्व्वकाष्ठं निराकृतं॥
११ स करेणैव धर्त्तव्यो मार्जनायार्पितस्ततः।
घातकस्य करे देयः शातोऽसि मार्जितश्च सः॥
१२ क्रन्द त्वं नरसन्तान हाहाकारमुदीरय।
स यतो मत्प्रजा हन्तीस्रायेलः सर्व्वनायकान्॥
मत्प्रजाभिः समं तेऽपि पातिता असिसम्मुखं।
ततो हेतोः कराघातः स्वकटौ क्रियतां त्वया॥
१३ परीक्षासिद्ध एवासिस्तस्माचेत् तस्य सम्मुखे।
निराकारी स दण्डोऽपि न सिध्येत् तत् किमद्भुतं।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः॥
१४ त्वञ्च भो नरसन्तान भाववाक्यमुदीरय।
तलतालं कुरुष्व त्वं त्रिगुणः स भवत्वसिः॥
वध्यानां घातकोऽसिः स वध्यस्यैव गुरोरसिः।
स एवासि मनुष्याणां परितः परिवर्त्तते॥
१५ यथा चित्तं विलीयेत विघ्नानि स्यु र्बहूनि च।
तथा सर्व्वपुरद्वारे हन्तासिः स्थापितो मया।
हा सृष्टो द्योतनार्थं स आकृष्टो हननाय च॥
१६ भव दक्षिण एकाग्रः सव्यां लक्षय वा दिशं।
यत्र धारा नियुक्ता ते तत्र वर्त्तितुमर्हसि॥
१७ तलतालं करिष्येऽहम् अमर्षं शमयन् निजं।
वचनं व्याहरामीदम् अहं नित्यप्रभुः स्वयं॥

अपरं सदाप्रभो र्वाक्यं मां प्रति प्रादुरभूत्, यथा, भो नरसन्तान, १८
त्वं बाबिलीयराजस्यासेरागमनार्थं द्वौ मार्गौ रचय ताव्भावेकस्माद् १९
देशान्निर्गच्छतां। त्वञ्च करस्याकृतिं तक्ष, नगरगामिमार्गस्य मूर्द्धि तां
तक्ष। अम्मोनवंशीयानां रब्बापुर्य्यां यिहूदादेशे चार्थतो दृढ यिरूशा- २०
लम्यसेरागमनार्थं मार्गौ रचय। यतो बाबिलीयराजो मार्गस्य सङ्गम- २१
स्थाने मार्गद्वयस्य मूर्द्धि मन्त्रपाठार्थम् अवस्थितः। स शरान् सञ्चालि-
तवान् ठक्कुरान् पृष्टवान् यकृतं निरीक्षितवांश्चास्ति। मन्त्रेण दक्षिण- २२
दिक् निर्द्दिश्यते, यिरूशालम, तत्र प्राचीरभेदकयन्त्राणि स्थाप्यन्तां
हत्यायै वक्त्रं व्यात्तीक्रियतां सिंहनादायोच्चरव उदीर्य्यतां पुरद्वाराणां
विरुद्धं भेदकयन्त्राणि स्थाप्यन्तां मृन्मयसेतु र्निचीयताम् अवरोधार्थको-
ऽगृहं निर्म्मीयतामिति। स तु मन्त्रपाठस्तैर्लोको मन्यते यतस्ते शप- २३
थानां शपथान् लब्धवन्तः, ईश्वरस्तु तान् धरिष्यन्नपराधं स्मारयिष्यति।
तस्मात् प्रभुः सदाप्रभुरित्थमाह, २४

हतत्वे युष्माकमाचारे पापप्रदर्शनाय हि।
स्वीयाधर्म्मप्रकाशेन स्मारयन्तः स्वदुष्कृतं।
यूयं यस्मात् स्मृतास्तस्माद् हस्तग्रस्ता भविष्यथ॥
त्वञ्च हन्तव्य दुष्टात्मन् इस्रायेलो नराधिप। २५
अन्तकाघस्य काले हि समायास्यति ते दिनं॥
प्रभु र्नित्यप्रभु र्ब्रूत उष्णीषोऽप्यपसार्य्यतां। २६
क्रियतां मुकुटश्चापि यच्च यद् तन्न तद् भवेत्।
यद् क्षुद्रं तद् भवेदुच्चम् उच्चं क्षुद्रीभवेत् तथा॥
विपर्य्यासं विपर्य्यासं विपर्य्यासं करोम्यहं। २७
विचारस्याधिकारी यः स यावन्नागमिष्यति।
तावत् किञ्चन न स्थायि तस्मै दास्यामि तं तदा॥

त्वञ्च भो नरसन्तान, भाविोक्तिं व्याहर वद च, अम्मानवंशीयानधि २८
तेषाम् अवमानवाक्यानि चाधि प्रभुः सदाप्रभुरित्थमाह, त्वं ब्रूहि,

असिरेकोऽसिरेकोऽसौ हननाय विकोषितः।
निःशेषग्रसनार्थं स द्योतनाय च मार्ज्जितः॥
अलीकं दर्शनं यावत् त्वदर्थं क्रियते जनैः। २९
अनृतो मन्त्रपाठश्च त्वत्कृते ते विधीयते॥
तावत् कालेऽन्तकाघस्य दिनं येषामुपागतं।

हतानां पापिनां तेषां कण्ठेषु त्वां स योक्ष्यति॥
१० पुनः स्थापय तं कोषे यस्मात् सृष्टिस्थले तव।
त्वदीयोत्पत्तिदेशेऽहं विधास्ये शासनं तव॥
३१ स्वकोपं वर्षयिष्यामि तदानीञ्च तवोपरि।
फूत्कारञ्च करिष्यामि त्वयि स्वक्रोधवह्निना॥
नृणाम् अग्निस्वरूपाणां विनाशस्यैव शिल्पिनां।
करमध्ये तदानीं त्वाम् अर्पयिष्यामि निश्चितं॥
३२ अनलस्यैव वस्तु त्वं भक्षणीयं भविष्यसि।
तव रक्तञ्च भूमध्ये तिरोधानं गमिष्यति।
नानुस्मारिष्यसे त्वञ्चेत्यहं वच्मि सदाप्रभुः॥

---

२२ द्वाविंशोऽध्यायः।

१ यिरूशालमः पापनिर्णयः १३ दण्डनिर्णयः १७ तन्मालिन्यपरिष्करणकथन २३ भाववादियाजकराजप्रजानां दोषनिर्णयश्च।

१ अपरं सदाप्रभो र्वाक्यं मां प्रति प्रादुरभूत्, यथा, भो नरसन्तान, त्वं
२ किं विचारं करिष्यसि? तस्या रक्तपातिपुर्य्या विचारं किं करिष्यसि?
३ तर्हि तस्याः सर्व्वा गर्हणीयक्रियास्तां ज्ञापय। ताञ्च वद, प्रभुः सदाप्र-
भुरित्थमाह,

स्वकालानयनाय त्वं स्वमध्ये रक्तपातिनी।
अशौचाय निजार्थञ्च मूर्त्तीनां शिल्पिनी पुरी॥
४ स्वीयपातितरक्तेन त्वं सञ्जातापराधिनी।
अशुचिस्त्वञ्च जातासि स्वीयनिर्म्मितमूर्त्तिभिः॥
स्वदिनान्तस्त्वयानीतस्त्वं वयोऽन्त उपस्थिता।
जातिभिस्त्वामवज्ञेयाम् अहं तस्मान्नियुक्तवान्।
विद्रूपस्यास्पदञ्चैव सर्व्वदेशनिवासिनां॥
५ ये देशास्त्वत्समीपस्थास्त्वत्तो वा दूरवर्त्तिनः।
त्वद्विद्रूपं करिष्यन्ति मनुष्यास्तन्निवासिनः।
त्वमशुच्यभिधानासि विप्लवैश्च महाधना॥
६ पश्य शोणितपाताय स्वीयशक्त्यनुसारिणः।
वर्त्तन्ते तव मध्ये हीस्रायेलो नायकाः जनाः॥

मातापित्रोरवज्ञानं त्वन्मध्ये क्रियते जनैः। ७
विदेशीयेषु दौरात्म्यं तव मध्ये विधीयते।
पीड्यन्तेऽनाथबालाश्च विधवाश्च स्त्रियस्त्वयि॥
अवज्ञेयानि मन्यन्ते पुण्यवस्तूनि मे त्वया। ८
अपवित्रीक्रियन्ते च मम विश्रामवासराः॥
रक्तपाताय वर्त्तन्ते त्वन्मध्ये परिवादिनः। ९
पर्व्वतोपरि चाहारं त्वन्मध्ये कुर्व्वते जनाः।
तव मध्ये कुकर्म्माणि मनुष्या आचरन्ति च॥
विमात्रा सह दुष्कर्म्म त्वन्मध्ये केऽपि कुर्व्वते। १०
त्वन्मध्ये चोपगच्छन्त्यशुचिं पुष्पवतीं स्त्रियं॥
मित्रपत्न्या समं कश्चित् घृणकर्म्म करोति च। ११
दुष्कृतेनापरः कश्चिन्निजां दूषयति स्नुषां।
स्वपितु र्वात्मजां यामीं कोऽप्याधर्षयति त्वयि॥
रक्तपातार्थमुत्कोचस्त्वन्मध्ये गृह्यते जनैः। १२
कुसीदस्यापि वृद्धेश्च ग्रहणं क्रियते त्वया॥
मित्रं मृष्णासि दुर्वृत्त्या माञ्च विस्मृतवत्यसि।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः॥
लाभे त्वया कृते पश्य करतालं करोम्यहं। १३
पातिते च त्वया रक्ते विद्यमाने तवान्तरे॥
अहं यावत् त्वया सार्द्धं विदधामि विचारणं। १४
तावत् किं ते स्थिरं चित्तं दृढं वा ते करद्वयं।
अहं नित्यप्रभु र्वच्मि साधयिष्याम्यहं तथा॥
जातीनामेव मध्ये त्वां विकरीष्याम्यहं स्वयं। १५
सकलेषु च देशेषु त्वां विक्षेप्स्यामि धूलिवत्।
तवाशौचञ्च निःशेषं हरिष्यामि त्वदग्रतः॥
जातीनाञ्च समक्षं त्वं सञ्जातास्यात्मदूषिता। १६
अहं नित्यप्रभुस्त्वस्मि तद् विज्ञायिष्यते त्वया॥

अपरं सदाप्रभो र्वाक्यं मां प्रति प्रादुरभूत्, यथा, भो नरसन्तान, १७
इस्रायेलः कुलं मम दृष्टौ धातुभस्म जातं। तत्साकल्यं मूषाया मध्ये १८
ताम्रत्रपुलोहसीसकं जातं ते रौप्यभस्मानि परिणताः। अतः प्रभुः सदा- १९
प्रभुरित्यमाह, सर्व्वे यूयं धातुभस्मानि परिणतास्तस्मात् पश्यताहं युष्मान्

२० सङ्गृह्य यिरूशालमो मध्ये निधास्यामि। विद्रावाय फूत्कारार्थं मूषाया
मध्ये निहितं रूप्यताम्रलोहसीसकत्रपूणां सङ्गहमिवाहं स्वकोपेन
२१ स्वरोषेण च युष्मान् सङ्ग्रहीष्यामि निधाय विलापयिष्यामि च। युष्मान्
सञ्चित्य स्वीयकोपाग्निना युष्मासु फूत्कारं कृत्वा तस्या मध्ये विलापयि-
२२ ष्यामि च। मूषाया मध्ये यथा रूप्यं विलाप्यत तथा यूयं तस्या मध्ये
विलापयिष्यध्वे, इत्थञ्च यदाहं युष्मासु स्वरोषं वर्षयिष्यामि तदाहं
यत् सदाप्रभुरस्मि तद् यूयम् अभिज्ञास्यथ।
२३ पुनश्च सदाप्रभो र्वाक्यं मां प्रति प्रादुरभूत्, यथा, भो नरसन्तान,
२४ त्वं तां वद,

त्वं क्रोधस्य दिने भूमि र्धुत्या वृष्ट्या च वर्ज्जिता।
२५ द्रोहिणः सन्ति तन्मध्ये तस्या भावप्रचारकाः॥
सिंहो गर्जनकारी च मृगं यद्वद् विदारयेत्।
तद्वत् प्राणान् ग्रसन्ते तेऽर्थं मणींश्च हरन्ति च।
तन्मध्ये विधवानाञ्च संख्यां संवर्धयन्ति ते॥
२६ क्रियते याजकैस्तस्या मम शास्त्रस्य लङ्घनं।
अपवित्रीक्रियन्ते तै र्मम पुण्यस्थलानि च॥
तैः पवित्रापवित्राणां प्रभेदोऽपि न मन्यते।
न शौचाशौचयो र्मध्ये ज्ञाप्यते च विवेचनं॥
मम विश्रामवारेभ्यस्तैः स्वदृष्टि र्निवर्त्त्यते।
इत्थमभ्यन्तरे तेषाम् अपवित्रीकृतोऽस्म्यहं॥
२७ लाभार्थं रक्तपातेन प्राणविध्वंसनेन च।
तन्मध्यवर्त्तिनोऽध्यक्षा वृकैस्तुल्या जनाशनैः॥
२८ कुलेपेनोपलिम्पन्ति तांस्तस्या भाववादिनः।
दृष्ट्वालीकं कृते तेषां मिथ्यामन्त्रान् पठन्ति च॥
मयि नित्यप्रभौ किञ्चिद् वचनं नोक्तवत्यपि।
प्रभु र्नित्यप्रभुः प्राहेति वाक्यं ते वदन्ति च॥
२९ दौरात्म्यं दस्युवृत्तिञ्च कुर्व्वते प्राकृतप्रजाः।
दुःखिनश्च दरिद्रांश्च मनुष्यान् पीडयन्ति ते।
विदेशीयेषु दौरात्म्यम् अन्यायेनाचरन्ति च॥
३० भमे र्नाशनिवाराय प्राकारं निर्म्मिमीत यः।
छिद्रमध्ये कृते तस्या उत्तिष्ठेच्च मदग्रतः।

तेषां मध्येऽहमन्विष्य नाप्नवांस्तादृशं नरं॥
निजक्रोधमहं तस्मात् तेषु वर्षितुमुद्यतः। २१
तान् निःशेषीकरिष्यामि स्वीयकोपानलेन च॥
आचारस्य फलं तेषां प्रदास्यामि च मूर्धसु।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः॥

---

२३ त्रयोविंशोऽध्यायः।

१ अहलाया व्यभिचारकर्म्म ११ अहलीबाया व्यभिचारकर्म्म २१ प्रेमकारिभिरहलीबायाः क्लेशः २६ उभयो र्भर्त्सना ४५ उभयो र्दण्डश्च।

अपरं सदाप्रभो र्वाक्यं मां प्रति प्रादुरभूत्, यथा, भो नरसन्तान, १
एकस्या मातुस्तनुजे द्वे स्त्रियावास्तां। ते मिसरि व्यभिचारम् अकुर्व्वातां २
स्वतारुण्यकाले व्यभिचारम् अकुर्व्वातां, तत्र जनास्तयोस्तनान् अपीडयं-
स्तयोः कौमार्य्यकुचांश्च समकोचन्। तयो र्ज्येष्ठाया नामधेयमहला ४
(निजावासा), तत्स्वसुश्च नामधेयमहलीबा (मदावाससम्बलिता)।
अपरं ते ममाभूतां पुत्रान् पुत्रीश्च प्रासवतां। तयो र्नामनीमे, शोमि-
रोनहला, यिरूशालम् चाहलीबा।

अहला मदधीना सत्यपि व्यभिचारं कृत्वा स्वप्रेमकारिषु नेदिष्ठेष्वशू- ५
रीयेष्वनुरक्ताभवत्। ते नीलाम्बरा देशाधिपा नायकाः सर्व्वे कान्त्योत्कृष्टा ६
हयारूढा योद्धारः। सा तेभ्यः स्वव्यभिचारं न्यवेदयत्, अशूरीयसन्ता- ७
नानां मध्ये ते सर्व्वे उत्कृष्टाः। सा येष्वनुरक्ताभवत् तैस्तेषां सर्व्वेषां सर्व्व-
देवविग्रहैश्च दूषिताभवत्। मिसरदेश आरब्धं स्वव्यभिचारमपि सा ८
नात्याक्षीत् यतस्तस्यास्तारुण्यकाले ते जनास्ताम् उपगतवन्तस्तस्याः कौ-
मार्य्यकुचौ कोचितवन्तस्तस्यां स्वव्यभिचारं निषिक्तवन्तश्च। ततो हेतोः ९
सा स्वप्रेमकारिणाम् अर्थतो येष्वशूरीयसन्तानेषु सानुरक्ताभवत् तेषां
करेषु मया समर्पिता। ते तस्या लज्जाम् अनावृतां कृत्वा, तस्याः १०
पुत्रान् पुत्रीश्चापानैषुस्ताञ्चासिनाबधिषुः, ततः सा स्त्रीणां वाच्याभवत्,
इत्थं तस्या विचारनिर्णयोऽकारि।

तस्या भगिन्यहलीबा तद् दृष्ट्वा तस्याः कामजन्यानुरागतोऽप्यधिकम् ११
अनुरागं स्वस्वसु र्व्यभिचारादप्यधिकव्यभिचारञ्च कृत्वाधिकभ्रष्टाभूत्।
साशूरीयसन्तानेष्वनुरक्ताभवत्। ते देशाधिपा नायका नेदिष्ठा अनु- १२

१३ यमपरिच्छदान्विता हयारूढयोद्धारः सर्व्वे कान्त्योत्कृष्टाः। ततः सा
१४ दूषिताभूत् तयोरुभयोरेका गतिरिति मयादर्शि। पुनश्च सा स्वव्यभि-
१५ चारम् अवर्धयत्। सा कुड्ये लिखितान् पुरुषान् अर्थतः कटिबन्धनै
र्बद्धकटीनां लम्बमानै रञ्जितशिरस्त्रै र्बद्धमस्तकानां कल्दीयनराणां
सिन्दूरेण लिखिताः प्रतिमूर्त्तीरदर्शत्, तेषां सर्व्वेषां रथिनामिवाकृतिः,
कल्दीयदेशो येषां जन्मभूमिस्तादृशानां बाबिलीयसन्तानानामिव रूप-
१६ ञ्चासीत्। सा च तस्मात् स्वदृष्टिपथारूढदर्शनात् तेष्वनुरक्ता भूत्वा
१७ कल्दीयदेशे तेषां सन्निधिं दूतान् प्राहिणोत्। ततस्ते बाबिलीयसन्ता-
नाः कामजन्यशयनार्थं तस्याः समीपं प्रविश्य स्वव्यभिचारेण ताम्
१८ अदूषयन्, तैस्तु दूषितायास्तस्यास्तेषु बीभत्सो जातः। इत्थं तया स्वव्य-
भिचारे प्रकाशिते स्वलज्जायाम् अनावृतीकृतायाञ्च यथा तस्या भगिन्यां
१९ तथा तस्यामपि मम बीभत्सो जातः। पुनश्च सा स्वव्यभिचारं बर्धयन्ती
२० मिसरदेशे व्यभिचारेण यापितं स्वतारुण्यकालम् अस्मारीत्, येषाञ्च
गर्द्दभाणामिव मांसम् अश्वानामिव रेतःपातश्चास्ति तेषु तत्रत्येषु जारे-
ष्वनुरक्ताभूत्।
२१ इत्थं तव तारुण्यस्तनयो र्हेतुना यदा मिस्रीयजनैस्तव कुचौ सम-
२२ कुच्येतां तस्य स्वीयतारुण्यकालस्य कुकर्म्म त्वं लक्षितवती। अतो हेतो
र्भो अहलीबे, तव येषु प्रेमकारिषु तव बीभत्सो जातस्तानहं त्वत्प्राति-
२३ कूल्येन जागरयित्वा चतुर्द्दिग्भ्यस्त्वद्विरुद्धम् आनेष्यामि। बाबिलीय-
सन्ताना अधिपतयः श्रीलाः कुलीनाः सर्व्वे कल्दीयास्तेषां सङ्गिनो-
ऽश्शूरीयसन्तानाश्च आगमिष्यन्ति, ते सर्व्वे कान्त्योत्कृष्टा देशाधिपा ना-
२४ यका रथिनः प्रसिद्धाः सर्व्वे च हयारूढाः। आयुधरथचक्रै र्जाति-
समाजेन च ते त्वद्विरुद्धम् आयास्यन्ति फलकचर्म्मशिरस्त्राणि त्वद्विरुद्धं
परितो रचयिष्यन्ति च, ततोऽहं तेषु विचारं समर्पयिष्यामि ते च
२५ स्वशासनानुरूपेण तव विचारं विधास्यन्ति। अहञ्च त्वयि निजेर्ष्यां
प्रयोक्ष्ये ततस्ते त्वां प्रति कोपाचारं करिष्यन्ति तव नासिकां कर्णद्वयञ्च
छेत्स्यन्ति तव शेषश्चासिना पतिष्यति। ते तव पुत्त्रान् पुत्त्रीश्चापनेष्यन्ति
२६ तव शेषश्च वह्निना भक्षयिष्यते। ते त्वां विवस्त्रां करिष्यन्ति तव शोभा-
२७ र्थकाभरणानि हरिष्यन्ति च। इत्थमहं तव कुकर्म्म मिसरदेश आ-
रब्धं व्यभिचारञ्च त्वत्तो निवर्त्तयिष्यामि त्वं तान् जनान् उद्दिश्य पुन-
२८ र्दृष्टिपातं न करिष्यसि मिस्रीयनरांश्च पुन र्न स्मरिष्यसि। यतः प्रभुः

सदाप्रभुरित्थमाह, पश्य त्वं यान् गर्हसे येषु च तव बीभत्सो जातस्तेषां
करेषु मया समर्पयिष्यसे। ते च त्वां प्रति घृणामाचरिष्यन्ति तवोपा- २९
र्ज्जितं धनं हरिष्यन्ति त्वाञ्च विवस्त्रां नग्नाञ्च विहास्यन्ति तेन तव
व्यभिचारस्य लज्जा तव कुकर्म्म तव वेश्यावृत्तिश्च साकल्यम् अनावृतं
भविष्यति। त्वं परजातीयान् अनुगच्छन्ती व्यभिचारम् अकरोस्तेषां ३०
विग्रहैरात्मदूषिताभवश्च, तस्मादेव कारणात् त्वां प्रति सर्व्वमेतत् कारि-
ष्यते। त्वं निजस्वसुः पथा गच्छसि तस्मादहं तस्याः पानपात्रं तव हस्ते ३१
दास्यामि। प्रभुः सदाप्रभुरित्थमाह, त्वं निजस्वसु र्गम्भीरे विशाले च ३२
पानपात्रे पास्यसि। तत् तवोपहासविद्रूपजनकं भविष्यति, तत् पानी-
यधारणाय विशालं। त्वं मत्ततया श्रान्त्या च पूरयिष्यसे तव स्वसुः ३३
शोमिरोणस्तत् पात्रं विस्मयविनाशयोः पात्रं। त्वं तस्मिन् पास्यसि ३४
चूषिष्यसि च तदीयखण्डानि चर्व्वयिष्यसि स्वकुचौ विदारयिष्यसि च,
यतोऽहमिदमुक्तवानिति प्रभुः सदाप्रभुराह। अतो हेतोः प्रभुः सदाप्रभु- ३५
राह, त्वं मां विस्मृतवती पृष्ठतः कृतवती च, तस्मात् त्वमपि स्वकुकर्म्मणः
स्वव्यभिचारस्य च दण्डं भुङ्क्ष्व।

पुनश्च सदाप्रभु र्मां जगाद, भो नरसन्तान, त्वम् अहलाया अहली- ३६
बायाश्च विचारं किं करिष्यसि? तर्हि तयो र्घृणीयक्रियास्ते ज्ञापय।
यतस्ते व्यभिचारं कृतवत्यौ तयोः करेषु शोणितं विद्यते ते स्वदेवविग्रहैः ३७
सह व्यभिचारं कृतवत्यौ मदर्थञ्च यान् सन्तानान् प्रासाविष्टां तान्
भक्ष्यवत् तेषां कृते वह्निसात् कृतवत्यौ। पुनरेतदपि मत्प्रातिकूल्येन कृत- ३८
वत्यौ ते तस्मिन् काले मम पुण्यस्थानम् अमेध्यम् अकार्ष्टां मम विश्राम-
वारान् अपवित्रान् अकार्ष्टां। यस्मिन् दिने ते स्वीयविग्रहाणां कृते ३९
स्वसन्तानान् अहतां तस्मिन् दिने मम पुण्यस्थानम् अपवित्रीकर्त्तुं प्रावि-
शतां पश्य मम गृहस्य मध्य ईदृशं कर्म्म ते कृतवत्यौ। अपिच ते दूरादा- ४०
गतानां नराणां समीपं दूतान् प्राहिणुतां। दूतेषु प्रहितेषु च यदा
तेषाम् आगमनम् अबुध्यथास्तदा त्वं तेषामपेक्षया स्नानं नेत्रयोरञ्जन-
लेपनं भूषापरिधानञ्चाकुरुथाः,शुभ्रशय्यायामुपविश्य तदग्रे भोजनमञ्चम् ४१
अरचयस्तत्र च मम धूपं तैलञ्चास्थापयः। तत्र निश्चिन्तजनसमूहस्य ४२
शब्दोऽभवत्, जननिवहस्य नराणां समीपं प्रान्तरात् सुरापा आनी-
यन्त, ते च तयो र्वेश्ययो र्हस्तेषु कङ्कणानि शिरसोः शोभार्थकमुकुटे च
न्यदधुः। ततस्तां व्यभिचारेण शीर्णां स्त्रियमधि मयोक्तम् इदानीमपि ४३

४४ साक्षाद् वेश्यावृत्तिरियं व्यभिचारं करोति। अपरं जनो यद्वद् वेश्या-
याः स्त्रियः समीपं प्रविशति तद्वत् तस्याः समीपं प्राविशत् तद्वदेव च
ते तयोः कुकर्म्मपरायणयोरहलाहलीबयोः समीपं प्राविशन्।
४५ परन्तु व्यभिचारिणीनां विचारेण रक्तपातिनीनां विचारेण च
धार्म्मिका नरा एव तयो विंचारं करिष्यन्ति, यतस्ते व्यभिचारिण्यौ
४६ तयो र्हस्तेषु रक्तं विद्यते च। यतः प्रभुः सदाप्रभुरित्थमाह, अहं तयो
र्विरुद्धं समाजम् आनेष्यामि ते च विक्षेपास्पदे लोप्त्रे च करिष्यामि।
४७ तस्य समाजस्य जनाश्च प्रस्तराघातेन ते मारयिष्यन्ति निजासिभिश्च ते
व्यालेखिष्यन्ति, तयोः पुत्रान् पुत्रीश्च मारयिष्यन्ति तयो र्गृहाणि वह्नि-
४८ सात् करिष्यन्ति च। अहञ्च देशात् कुकर्म्म निवर्त्तयिष्यामि, सर्व्वा
योषितश्च शिक्षां गृहीत्वा युष्मत्कुकर्म्मानुरूपमाचारं न करिष्यन्ति।
४९ जना युष्मत्कुकर्म्मणो दण्डं युष्माभ्यां दास्यन्ति, युवाञ्च स्वविग्रहाणां पा-
पानि भोक्ष्येथे, अहञ्च यत् प्रभुः सदाप्रभुरस्मि तत् ज्ञास्यथः।

---

२४ चतुर्विंशोऽध्यायः।

१ पाकस्थाल्या दृष्टान्तकथनं ६ यिरूशालमो विनाशरूपं तस्य तात्पर्य्यं १५ यिहिष्के-
लस्य जायाया मरणं १९ लोकानां दुःखरूपं तत्तात्पर्य्यञ्च।

१ अपरं नवमवत्सरस्य दशममासस्य दशमदिने सदाप्रभो र्वाक्यं मां
२ प्रति प्रादुरभूत्, यथा, भो नरसन्तान, त्वं स्वार्थम् अद्यतनस्यार्थत एत-
स्यैव दिनस्य नाम लिख, एतस्मिन्नेव दिने बाबिलीयराजो यिरूशालमि
३ हस्तार्पणम् अकार्षीत्। त्वञ्चैतद् विद्रोहिकुलमुद्दिश्य दृष्टान्तं प्रयुज्य
व्याहर, जनांश्च वद, प्रभुः सदाप्रभुरित्थमाह, स्थालीं संस्थापय सं-
४ स्थाप्य तन्मध्ये जलं देहि च। तदीयमांसखण्डान् अर्थात् ऊरुस्कन्धादीन्
५ उत्तमान् खण्डान् सर्व्वान् सङ्गृह्य तांश्चोत्कृष्टैरस्थिभिः पूरय। मेषव्र-
जस्योत्कृष्टतमं मेषं गृहाण तस्या अधःस्थाद् अस्थ्नां कृते काष्ठचितिमेकां
निधेहि, तत् सर्व्वञ्च क्वाथ्यतां तन्मध्यवर्त्तीन्यस्थीन्यपि पच्यन्तां।
६ ततो हेतोः प्रभुः सदाप्रभुरित्थमाह,

हा पुरी रक्तपूर्णा त्वं स्थाली समलगर्भिणी।
यतस्तस्या मलं नैव तस्या मध्याद् विनिर्गतं॥
तान् खण्डान् एकमेकञ्च कृत्वोद्धरत सर्व्वशः।

गुटिकापातनं यस्मात् तामुद्दिश्य न साधितं ॥
तस्या मध्ये यतो हेतोस्तस्या रक्तम् अविद्यत। ७
आसीत् शुष्कस्य शैलस्य पृष्ठे तत् स्थापितं तया।
तच्छाद्येत यथा धूल्या न निषिक्तं तथा भुवि ॥
अत उत्पाद्यतां क्रोधः प्रतिकारश्च साध्यतां। ८
शुष्कशैलस्य पृष्ठेऽहं तस्याः सेच्यामि शोणितं।
न च प्रच्छादनं तस्य कर्त्तुं केनापि शक्ष्यते ॥
अतो वाक्यमिदं ब्रूते प्रभुरेव सदाप्रभुः। ९
हा पुरी रक्तपूर्णा त्वं सन्तापस्ते भविष्यति।
काष्ठराशिं मयाप्येकः समाचायिष्यते महान् ॥
बहुकाष्ठानि सञ्चित्य सम्यक् प्रज्वलयानलं। १०
मांसं पाचय साद्यन्तं सिद्धान्नं गलितं कुरु।
भस्मरूपाणि तन्मध्ये जायन्तां कीकसान्यपि ॥
तप्ताङ्गारोपरि स्थालीं शून्यामेव निधेहि च। ११
तेन तस्याः सुतप्तायास्ताम्रं भस्म भविष्यति ॥
तस्या मध्ये निजाशौचं द्रवभावञ्च यास्यति।
सकलञ्च मलं तस्या निःशेषत्वम् अवाप्स्यति ॥
व्यर्थकारि तयायासस्तस्या यत् प्रचुरं मलं। १२
तन्मध्यात् तन्न निर्यातं तन्मलं वह्निसाद् भवेत् ॥
तवाशौचे कुकर्म्मास्ति त्वां शुचीकृतवानहं। १३
त्वन्तु नैव शूचीभूता तस्माद् यावदहं त्वयि ॥
न रोषं शमयिष्यामि तावदेव कदाचन।
निजाशौचात् पुनर्व्वारं शुचिस्त्वं न भविष्यसि ॥
अहं नित्यप्रभु र्वच्मि तच्च यास्यति सिद्धतां। १४
अहं तत् साधयिष्यामि न भविष्याम्युपेक्षकः।
नार्द्रनेत्रो भविष्यामि नानुतप्स्येऽत्र वा पुन ॥
तव यादृश आचारो यादृशाश्च क्रियास्तव।
तादृशस्त्वद्विचारस्य निर्णयः सम्भविष्यति।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः ॥

अनन्तरं सदाप्रभो र्वाक्यं मां प्रति प्रादुरभूत्, यथा, भो नरसन्तान १५
पश्चादहम् आघातेन तव नेत्रयोः प्रीतिभाजनं त्वत्तो हरिष्यामि, त्वन्तु १६

१७ मा शोच मा रुदिहि मा वाश्रूणि पातय। समौनं निश्वस गतप्राणायां
विलापं मा कुरुष्व शिरसि शिरोभूषां बधान चरणद्वये पादुके च
१८ धत्स्व श्मश्रु वस्त्रेण माच्छादय जनप्रेषितपूपांश्च मा भक्षय। ततोऽहं
प्रातःकाले जनान् आलापिषं, सन्ध्यायान्तु मम भार्य्या ममार, पुनः प्रातः-
काले सत्यहं यथादिष्टस्तथैवाकार्षं।
१९ अपरं जना माम् अवादिषुः, सर्व्वमेतद् अस्मदर्थं तादृशं किं यत्
२० त्वमेतत् करोषि? तत् किमस्मान् न ज्ञापयिष्यसि? ततोऽहं तान्
२१ अवादिषं सदाप्रभो र्वाक्यं मां प्रति प्रादुरभूत्, यथा, त्वमिस्रायेलः कुलं
वद, प्रभुः सदाप्रभुरित्थमाह, पश्यत मम यत् पुण्यस्थानं युष्माकं बल-
दायिनी श्री युष्मन्नेत्राणां प्रीतिभाजनं युष्मत्प्राणानाञ्चाकाङ्क्षितं पात्रं
तदहम् अपवित्रं करिष्यामि, युष्माभिस्त्यक्ता युष्माकं पुत्त्रा पुत्त्र्यश्चासिना
२२ पतिष्यन्ति। अहञ्च यथा कृतवान् यूयमपि तथा करिष्यथ, श्मश्रूणि
२३ वस्त्रैर्नाच्छादयिष्यथ जनप्रेषितपूपान् न भक्षयिष्यथ, शिरःसु शिरोभूषां
चरणेषु च पादुका धास्यध्वे शोकं रोदनं वा न करिष्यध्वे, परन्तु
२४ निजापराधैः क्षेष्यध्वे मिथो दीर्घं निश्वसिष्यथ च। इत्थं यिहिष्केलो
युष्मदर्थम् अद्भुतलक्षणं भवति। स यथा कृतवान् यूयं सर्व्वथा तथैव
करिष्यथ। एतद् यदा सेत्स्यति तदाहं यत् प्रभुः सदाप्रभुरस्मि तद्
२५ यूयमभिज्ञास्यथ। भो नरसन्तान, पश्य यस्मिन् दिनेऽहं तेषां बलं तेषां
शोभाप्रदमामोदं तेषां दृष्टेः प्रीतिभाजनं तेषां प्राणानाम् आकाङ्क्षितं
२६ पात्रं तेषां पुत्त्रान् पुत्त्रीश्च तेभ्योऽपहरिष्यामि, तस्मिन् दिने कश्चित्
पलायितो जनस्त्वत्समीपमागत्य तव कर्णगोचरे तत् श्रावयिष्यति।
२७ तस्मिन् दिने तस्य पलायितजनस्य समक्षं तव वक्त्रम् उद्घाटितं भवि-
ष्यति, त्वञ्च भाषिष्यसे पुन र्मूको न भविष्यसि, त्वञ्च तेषां कृतेऽद्भुतलक्षणं
भविष्यसि, तेनाहं यत् सदाप्रभुरस्मि तत् तै र्ज्ञायिष्यते।

---

२५ पञ्चविंशोऽध्यायः।

१ यिहूदिलोकानां हिंसनाद् अम्मोनीयानां दण्डस्य भाविवाक्यं ८ मोयाबस्य दण्डः
१२ इदोमो दण्डः १५ पिलेष्टीयानां दण्डश्च।

१ अपरं सदाप्रभो र्वाक्यं मां प्रति प्रादुरभूत्, यथा, भो नरसन्तान,

त्वम् अम्मोनसन्तानेषु स्थिरदृष्टिं कृत्वा तेषां विरुद्धं भावोक्तिं व्याहर। २
त्वं तान् अम्मोनसन्तानान् वद, यूयं प्रभोः सदाप्रभो र्वाक्यं शृणुत। ३
प्रभुः सदाप्रभुरित्थमाह,

अपवित्रीकृतं दृष्ट्वा मम पुण्यस्थलं प्रति।
प्राप्तनाशाञ्च सन्दृश्येस्रायेलीयभुवं प्रति।
दास्यावस्थागतान् दृष्ट्वा यिहूदीयकुलं प्रति।
साधु साध्विति दुर्व्वाक्यं त्वया यस्मादुदीरितं॥
तस्मात् पूर्व्वीयजातिभ्योऽहं त्वां दास्यामि दायवत्। ४
त्वन्मध्ये स्वनिवेशांश्च रचयिष्यन्ति ते जनाः॥
स्वकीयवस्त्रवेश्मानि स्थापयिष्यन्ति ते त्वयि।
ते त्वत्फलान्यशिष्यन्ति ते पास्यन्ति पयस्तव॥
उष्ट्रशालां करिष्यामि तदा रब्बां पुरीमहं। ५
अम्मोनीयप्रदेशञ्च मेषाणां शयनस्थलं।
अभिज्ञास्यथ यूयञ्च तदानीं मां सदाप्रभुं॥
यतो हेतोरिदं ब्रूते प्रभुरेव सदाप्रभुः। ६
इस्रायेल्भूमिमुद्दिश्य तलतालः पदध्वनिः।
अवज्ञानाच सम्पूर्णात् प्राणे हर्षः कृतस्त्वया॥
पश्य तस्मान्निजं हस्तं प्रसार्य्य त्वद्विरोधतः। ७
जातिभ्यः सकलाभ्योऽहं त्वां प्रदास्यामि लोप्त्रवत्॥
जातिश्रेण्याश्च मध्यात् त्वां संविधास्यामि कर्त्तितं।
त्वामुच्छेत्स्यामि देशेभ्यः करिष्यामि च सादितं।
मां सदाप्रभुमेतेन त्वञ्चाभिज्ञास्यसि स्वयं॥
प्रभु र्नित्यप्रभु र्ब्रूते यादृश्यः सर्व्वजातयः। ८
पश्य तादृशमेवाभूत् यिहूदा अप्यदः कुलं।
इत्थं मोयाबसेयीरावुक्तवन्तावुभौ यतः॥
ततोऽहं पश्य मोयाबः स्कन्धमुद्घाट्य तत्पुरीः। ९
आदेशान्तात् पुरीस्तस्य वेत् यिशीमोतनामिकां।
भूभूषां बाल्मियोनञ्च किरियाथयिमामपि।
हारीकृत्य विधास्यामि मार्गं पूर्व्वीयदेशिनां। १०
यथाम्मोनञ्च दास्यामि मोयाबं दायवत् तथा।
अम्मोन् जात्यावलीमध्ये नैव स्मारिष्यते पुनः॥

११ मोयाबस्य करिष्याम्यहं विचारं यथोचितं।
मां सदाप्रभुमेतेन तावभिज्ञास्यतः स्वयं॥
१२ पुनरेतद् वचो ब्रूते प्रभुरेव सदाप्रभुः।
वैरनिर्य्यातनेनेदोम् यिहूदाकुलमाचरत्।
वैरनिर्य्यातनात् तेषु दण्डार्हश्चाभवद् यतः॥
१३ ततो हेतोरिदं ब्रूते प्रभुरेव सदाप्रभुः।
इदोमः प्रातिकूल्येनाहं प्रसार्य्य निजं करं।
समुच्छेत्स्यामि तन्मध्यान्मनुष्यान् पशुभिः सह॥
ध्वंसितं तं विधास्यामि देशम् आतैमनादहं।
दिदानेऽपि पतिष्यन्ति तज्जना असिना हताः॥
१४ यद् इदोमि च कर्त्तव्यं वैरनिर्य्यातनं मम।
इस्रायेलः प्रजाया मे हस्ते तन्निहितं मया॥
यादृशश्च मम क्रोधो मम कोपश्च यादृशः।
इदोमं प्रति कार्य्यं ते साधयिष्यन्ति तादृशं॥
तेन ज्ञायिष्यते तैश्च वैरनिर्य्यातनं मम।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः॥
१५ पुनरेतद् वचो ब्रूते प्रभुरेव सदाप्रभुः।
वैरनिर्य्यातनात् कर्म्म पिलेष्टीयजनैः कृतं॥
चिरशात्रवभावाच्च निःशेषं कर्त्तुमिच्छुभिः।
तैः सम्पूर्णादवज्ञानाद् वैरनिर्य्यातनं कृतं॥
१६ ततो हेतोरिदं वाक्यं प्रभुराह सदाप्रभुः।
पश्य विस्तारयिष्यामि पिलेष्टीयेषु मत्करं॥
क्रिरेथीयजनानाञ्च विधास्यामि निकर्त्तनं।
शेषं सामुद्रवङ्कस्य करिष्यामि च नाशितं॥
१७ भर्त्सनैः कोपजातैश्च महतीः साधयन् क्रियाः।
तेषां मध्ये करिष्यामि वैरनिर्य्यातनं स्वयं॥
इत्थं सिद्धीकृते तेषु वैरनिर्य्यातने मम।
यत् सदाप्रभुरेवाहम् एतज्ज्ञास्यन्ति ते जनाः॥

---

२६ षड्विंशोऽध्यायः।

१ सोरस्य दण्डः ७ तद्विरुद्धं निबूखद्नित्सरराजस्य रणयात्रा १५ तत्पतनाद् अन्यदेशिनां विस्मयशोकौ च।

अपरम् एकादशवर्षे मासस्य प्रथमदिने सदाप्रभो र्वाक्यं मां प्रति १
प्रादुरभूत्, यथा, भो नरसन्तान, सोरपुरी यिरूशालममधि वदति, २
साधु, जातीनां कपाटद्वयं भग्नं, तासाम् आगमो मयि वर्त्तितः, तस्याम्
उच्छिन्नायाम् अहं पूर्णा भविष्यामि। अतो हेतोः प्रभुः सदाप्रभुरित्थमाह, ३

पश्य त्वामेव भो सोराध्याक्रमिष्याम्यहं स्वयं।
समुद्रेण निजोर्म्मीणाम् उत्क्षेपः क्रियते यथा।
बहुजाती र्विरुद्धं ते समुत्क्षेप्स्याम्यहं तथा॥
ते मनुष्यैश्च सोरस्य प्राचीरं ध्वंसयिष्यते। ४
तैश्च निपातयिष्यन्ते तदीयोच्चगृहाण्यपि॥
तस्याः पुर्य्याश्च या धूलिः साप्यामार्ज्जिष्यते मया।
शुष्कं पाषाणमेवाहं करिष्यामि च तां पुरीं॥
जालविस्तारणस्थानं साब्धिमध्ये भविष्यति। ५
यतोऽहं तद् ब्रवीमीति प्रभुराह सदाप्रभुः।
सा पुरी सर्व्वजातीनां लोप्त्रमेव भविष्यति॥
क्षेत्रस्थास्तद्दुहित्र्यश्च पतिष्यन्त्यसिना हताः। ६
यत् सदाप्रभुरेवाहं तच्च ज्ञास्यन्ति ते जनाः॥
यतो हेतोरिदं वाक्यं प्रभुराह सदाप्रभुः। ७
पश्यानीयोत्तराशातो निबूखन्नित्सराभिधं।
बाबिलीयमहीपालं राजराजं हयैर्वृतं।
रथैराश्विकसैन्यैश्च पदातीनाञ्च भूरिणा।
समाजेन वृतं सोरेऽहं करिष्याम्युपस्थितं॥
क्षेत्रस्थास्त्वद्दुहित्रीः स कृपाणेन हनिष्यति। ८
त्वद्विरुद्धञ्च युद्धार्थम् उच्चं निर्म्मास्यते गृहं॥
त्वद्विरुद्धञ्च सेतुं स समाचेष्यति मृण्मयं।
त्वद्विरुद्धञ्च चर्म्माणि परितः स्थापयिष्यति॥
दुर्गभेदि स्वयन्त्रञ्च त्वत्प्राचीरे प्रयोक्ष्यते। ९
त्वदीयोच्छ्रितगेहानि स्वासिभिश्च प्रभङ्क्ष्यति॥

१० भग्नदुर्गप्रवशीव स त्वद्द्वारैः प्रवेच्यति।
बाहुल्याच्च तदश्वानां धूलिस्त्वां छादयिष्यति।
सादिचक्ररथोद्घोषात् प्राचीरं ते चलिष्यति॥
११ स निजाश्वखुरैः सर्व्वांस्त्वन्मार्गान् मर्द्दयिष्यति।
तावकीनप्रजाश्चापि कृपाणेन हनिष्यति।
त्वद्बलच्छापकाः स्तम्भा निपतिष्यन्ति भूतले॥
१२ ते लुण्ठिष्यन्ति वित्तं ते मोषिष्यन्ति च ते वसु।
प्राचीरं तव भेत्स्यन्ति रम्यान् भङ्च्यन्ति चालयान्।
त्वच्छिलाकाष्ठधूलीश्च निक्षेप्स्यन्ति पयोनिधौ॥
१३ निवृत्तस्तव गीतानां शब्दः कारिष्यते मया।
वीणानां तव वाद्यञ्च नैव श्राविष्यते पुनः॥
१४ शुष्कं पाषाणमेवाहं त्वां करिष्यामि च स्वयं।
त्वं भविष्यसि च स्थानं जालविस्तारणार्थकं।
न पुनस्तव निर्म्माणं सम्भविष्यति कर्हिचित्॥
यस्मान्नित्यप्रभु र्योऽहं सोऽहमेवेदमुक्तवान्।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः॥
१५ सोरमुद्दिश्य वक्तीत्थं प्रभुरेव सदाप्रभुः।
त्वन्निपातस्य शब्देन विद्धानां निस्वनेन च।
त्वन्मध्ये हन्यमानानां नराणां हननेन च।
द्वीपानामपि सर्व्वेषां कम्पः किं न भविष्यति॥
१६ समुद्रस्याधिपाः सर्व्वे स्वासनेभ्योऽवरुह्य च।
स्वप्रावारान् परित्यज्य चित्रवेशान् विमुच्य च॥
सन्त्रासान् परिधास्यन्त उपवेच्यन्ति भूतले।
अनुक्षणं त्रसिष्यन्ति स्तम्भं यास्यन्ति च त्वयि॥
१७ कृत्वा विलापगानञ्च वक्ष्यन्तीदं वचस्त्वयि।
कथं नाशमवाप्ता त्वं सागरोत्पत्तिवासिनि॥
कीर्त्तितासीः पुरी सिन्धौ प्रबला पौरिकैः सह।
र्अपितं यैः स्वभीमत्वं तव सर्व्वनिवासिषु॥
१८ त्रस्यन्ति त्वधुना द्वीपाः पतनस्य दिने तव।
विह्वलाः सन्ति चाब्धिस्था द्वीपाः शेषगतौ तव॥
१९ यतो हेतोरिदं ब्रूते प्रभुरेव सदाप्रभुः।

पुरीं त्वामहमुच्छिन्नां वासिहीनाः पुरीरिव ।
यस्मिन् काले करिष्यामि त्वय्युत्क्षिप्ते मयार्णवे ।
यदा त्वं सलिलानाञ्च राशिनाच्छादयिष्यसे ॥
तदा गर्त्तेऽवरूढैस्तैः प्राक्कालीनजनैः सह । १०
तवावस्थितयेऽहं त्वां करिष्याम्यवरोहिणीं ॥
सङ्गे गर्त्तेऽवरूढानां चिरोच्छिन्नस्थलेषु च ।
त्वामधोभुवनस्यैव करिष्यामि निवासिनीं ॥
यतस्त्वं वसतिस्थानं पुन र्नैव भविष्यसि ।
किन्त्वहं जीवतां देशे विधास्यामि प्रभोदयं ।
भयदां त्वां करिष्यामि त्वं निःसत्त्वा भविष्यसि । ११
अन्विष्टानन्तकालेऽपि नाविष्कारिष्यसे पुनः ।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः ॥

---

२७ सप्तविंशोऽध्यायः ।

१ सोरस्यैश्वर्य्यं २६ तस्य महापतनञ्च ।

अपरं सदाप्रभो र्वाक्यं मां प्रति प्रादुरभूत्, यथा, भो नरसन्तान, १
त्वं सोरमधि विलापगानं प्रणय । त्वं सोरं वद, २

हा हा महासमुद्रस्य प्रवेशेषु निवासिनि ।
बहुद्वीपेषु जातीनां व्यवसायविधायिनि ।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः ।
भो सोर त्वं ब्रवीषीदम् अहं परमसुन्दरी ॥
तव भूमिः समुद्रस्य मध्यस्थाने हि विद्यते । ४
निर्म्मातारस्तवाकार्षुः सौन्दर्य्यं परमं तव ॥
सिनीरात् सरलान् नीत्वा कृतास्तैः फलकास्तव । ५
एरसञ्च लिबानोनान्नीत्वा त्वत्कूपकः कृतः ॥
बाशनोऽल्लोनकाष्ठैश्च कृताः क्षेपण्यस्तव । ६
कित्तीयद्वीपजाते च देवदारुणि संस्थितैः ।
दन्तिदन्तैरकार्षुस्ते पोतवाहासनं तव ॥
पताकावत् प्रयोगार्थं वायुवस्त्रञ्च यत् तव । ७
तदानीतं मिसर्देशात् कार्पासं शिल्पिनाङ्कितं ।

इलीशाद्वीपजं वस्त्रं नीलं धूम्रञ्च ते छदः ॥
८ अभवन् पोतवाहास्ते सीदोनार्वदवासिनः ।
विद्वांसस्तव हे सोर कर्णधारास्तवान्तरे ॥
९ गिबल्देशस्य ये वृद्धा मनुष्या ये च कोविदाः ।
त्वन्मध्ये तेऽप्यविद्यन्त त्वच्छिद्रप्रतिकारिणः ॥
सर्व्वाः सामुद्रनावश्च सहिताः स्वनियामकैः ।
भाण्डविनिमयार्थिन्य उपातिष्ठंस्तवान्तरे ॥
१० पारस्लूदपूटीया योद्धारस्त्वद्बले स्थिताः ।
ते स्वचर्म्मशिरस्त्राणां कुर्व्वन्त्युद्बन्धनं त्वयि ।
यत् तवादरणीयत्वं तच्च तैः साधितं जनैः ॥
११ अर्वदीयजनादीनि सैनिकानि बलानि ते ।
अविद्यन्त चतुर्द्दिक्षु प्राचीरे संस्थितानि हि ॥
युद्धवीरा अविद्यन्त त्वदीयोच्चगृहेषु च ।
त्वत्प्राचीरे चतुर्द्दिक्ष्वबध्नन् स्वफलकानि त ।
तै र्जनैरेव सम्पन्ना त्वत्सौन्दर्य्यस्य पूर्णता ॥
१२ सर्व्वद्रव्यस्य बाहुल्यात् तर्शीशासीत् वणिक् तव ।
रूप्यायस्त्रपुसीसैश्च ते त्वत्पण्यमशोधयन् ॥
१३ यवन् तूबल् च मेशक् चेमेऽभवन् वणिजस्तव ।
ते दासैस्ताम्रपात्रैश्चाकुर्व्वन् विनिमयं त्वयि ॥
१४ जनास्तोगर्म्मवंशीया हययुद्धाश्ववेसरान् ।
आनीय तव पण्यानां शोधनं तैरकुर्व्वत ॥
१५ दिदानस्यापि सन्ताना अभवन् वणिजस्तव ।
त्वत्पंक्ते च बहुद्वीपा अभवन् व्यवसायिनः ।
मूल्यार्थं दन्तिदन्तांस्ते तिन्दुकश्चार्पयंस्त्वयि ॥
१६ तव निर्म्मितवस्तूनां बाहुल्याद् व्यवसायिनः ।
अरामीयजनास्तुभ्यं पद्मरागान् पटानि च ।
धूम्रवर्णानि चित्राणि कार्पासानि च विद्रुमान् ।
पीतरत्नानि चानीय तव पण्यमशोधयन् ॥
१७ त्वद्बणिग् यिहूदावंश इस्रायेल्देश एव च ।
ते मिन्नीतीयगोधूमान् पक्वान्नं मधु तैलकं ।
औषधीयञ्च निर्य्यासं निमयार्थमुपानयन् ॥

सर्व्ववित्तस्य बाहुल्यात् त्वद्द्रव्याणाञ्च सञ्चयात्। १८
दम्मेशक् त्वद्बणिग् भूत्वा हिल्बोनो गोस्तनीरसं।
मेषलोम सुशुभ्रञ्च तव मध्यमुपानयत्॥
जना वदान्यवानीयाः पण्यानां तव मूल्यवत्। १९
ऊषलात् संस्कृतं लौहं तव मध्यमुपानयन्।
काश्रा गन्धत्वचश्चासंस्त्वद्भाण्डनिमये स्मृताः॥
रथास्तरणवस्त्राणां बणिगासीद् दिदांस्तव॥ २०
आरब्केदारराजाश्च त्वत्पक्षा बणिजोऽभवन्। २१
मेषवत्सैडकाजानां तै र्व्यापारोऽभवत् तव॥
शिवाया रयमायाश्च बणिजो बणिजस्तव। २२
उत्कृष्टान् सर्व्वगन्धांस्ते महार्घान् सकलान् मणीन्।
सुवर्णञ्च समानीय तव पण्यान्यशोधयन्॥
हारणं कान्निरेदंश्च शिवाया बणिजो जनाः। २३
अश्शूरः किल्मदश्चाप्यासंस्तव व्यवसायिनः॥
पूर्णभूषणवासांसि प्रावारान् नीलवर्णकान्। २४
चित्रितान् सूचिकार्य्येण दिव्यसूत्रधनानि च।
एरस्काष्ठीयभाण्डेषु परिबद्धानि रज्जुभिः।
नीत्वा त्वद्विक्रयस्थानं तेऽभवन् बणिजस्तव॥
तर्शीशीयमहानावो भाण्डविनिमये तव। २५
आसन् सार्थस्वरूपास्ते त्वं पूर्णा चाभवस्ततः।
मध्यस्थाने समुद्राणां महैश्वर्य्यं तवाभवत्॥
विशालानाम् अपां मध्यं नीता त्वं स्वनियामकैः। २६
अब्धीनां हृदये तु त्वं भग्ना पूर्व्वीयवायुना॥
तद्वित्तं तव पण्यानि भाण्डविनिमयस्तव। २७
नाविकाः कर्णधाराश्च त्वच्छिद्रप्रतिकारिणः।
त्वद्भाण्डप्रतिदातारः सर्व्वे त्वन्मध्यवर्त्तिनः।
योद्धारस्तव कृत्स्नश्च त्वन्मध्येऽवस्थितो जनः।
अब्धीनां हृदये पेतुः पतनस्य दिने तव॥
अतस्त्वत्कर्णधाराणां क्रन्दनस्योच्चशब्दतः। २८
कम्पग्रस्ता भविष्यन्ति ग्रामा जानपदा अपि॥
स्वनौभ्यश्चावरोक्ष्यन्ति सकला दण्डवाहकाः। २९

नाविकाः कर्णधाराश्च सर्व्वे सागरगामिनः।
स्थलमेव समाश्रित्यावस्थास्यन्ते हि ते तदा॥
१० त्वामध्युच्चै रविष्यन्ति क्रन्दिष्यन्ति च तापतः।
धूलिं मूर्धसु धास्यन्ते लुठिष्यन्ति च भस्मनि॥
११ त्वयि मुण्डितमुण्डास्ते शाणबद्धकटिस्थलाः।
त्वामुद्दिश्य मनस्तापाद् रोदिष्यन्त्युग्रशोचनाः॥
१२ ते च गीतं प्रणेष्यन्ति त्वयि स्वपरिदेवने।
त्वामुद्दिश्य करिष्यन्ति शोकगानमिदं यथा।
सोरपूर्य्या समः कोऽस्ति ध्वस्तया मध्यसागरे॥
१३ समुद्रात् तव पण्यानि निरगच्छन् यदा पुरा।
तस्मिन् काले महासङ्ख्या जातीस्त्वं पर्य्यतर्पयः॥
त्वद्वसोः प्रचुरत्वेन भाण्डविनिमयेन च।
पृथिवीस्थनरेन्द्रांस्त्वम् अकरोश्च महाधनान्॥
१४ यदा त्वं सागरभ्रष्टा भूमग्ना चातले जले।
तदानीम् एककाले हि भाण्डविनिमयस्तव।
तव कृत्स्नः समाजश्च तव मध्ये निपेततुः॥
१५ त्वयि स्तब्धा बभूवुश्च सर्व्वे द्वीपनिवासिनः।
तेषां राजान उद्वेगात् कम्पन्ते चावशाननाः॥
१६ कुर्व्वते त्वयि सीत्कारं जातीनां व्यवसायिनः।
भयदा त्वमभूर्नित्यं निःसत्त्वा च भविष्यसि॥

---

२८ अष्टाविंशोऽध्यायः।

१ अहङ्कारकृते सोरराजस्य ऐश्वरिकदण्डस्य भविष्यद्वाक्यं ११ तमधि विलापः २० सीदोनो दण्डाय भाविवाक्यं २४ इस्रायेल्लोकानां स्वदेशाय प्रत्यागमनञ्च।

१ अपरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, त्वं
२ सोरस्य नृपतिं वद, प्रभुः सदाप्रभुरित्थमाह,

यस्मादुद्धतचित्तस्त्वम् उक्तवान् ईश्वरोऽस्म्यहं।
ईश्वरीयासनासीनो वार्धीनां हृदयस्थले॥
परन्तु त्वं मनुष्योऽसि नैव चासि त्वमीश्वरः।
तुल्यमीशस्य चित्तेन निजचित्तं तु मन्यसे॥

दानीयेलादपि ज्ञानी पश्य त्वं प्रतिभासि हि। ३
न गूढं विद्यते किञ्चित् त्वत्साक्षात् तिमिरावृतं॥
स्वज्ञानेन स्वबुद्ध्या च त्वं सार्थं सृष्टवान् श्रियं। ४
स्वकोषेषु सुवर्णञ्च दुर्व्वर्णञ्च प्रदत्तवान्॥
ज्ञानोत्कर्षेण वाणिज्यान्निजश्री र्वर्द्धिता त्वया। ५
इत्थमेवोद्धतीभूतं तव चित्तं श्रिया तव॥
ततो हेतोरिदं वाक्यं प्रभुराह सदाप्रभुः। ६
तुल्यमीशस्य चित्तेन स्वचित्तं मन्यसे यतः॥
ततस्त्वत्प्रातिकूल्येन पश्यानेष्याम्यहं परान्। ७
जातीनां मध्यतोऽत्यन्तं भीमविक्रान्तमानवान्॥
तव ज्ञानस्य भूषाया विरुद्धं ते निजान् असीन्।
उद्धरिष्यन्ति कोषेभ्यस्तव लोप्स्यन्ति च द्युतिं॥
ते च त्वां संविधास्यन्ति क्षयस्थानेऽवरोहिणं। ८
हतानां मृत्युनाब्धीनां हृदये त्वं मरिष्यसि॥
ईश्वरोऽस्मीति हन्तॄणां समक्षं किं वदिष्यसि। ९
स्वहन्तॄणां करेषु त्वं नर एव न चेश्वरः॥
त्वमच्छिन्नत्वचां मृत्या परहस्ते मरिष्यसि। १०
यतोऽहं तद् ब्रवीमीति प्रभुराह सदाप्रभुः॥

अपरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, त्वं ११
सोरस्य राजानमधि विलापगीतं प्रणय, तच्च वद, प्रभुः सदाप्रभुरि- १२
त्थमाह,

त्वं युक्तत्वस्य मुद्राङ्को ज्ञानपूर्णोऽतुलद्युतिः॥
ईश्वरस्य निजोद्यान एदनि त्वमवर्त्तथाः। १३
महार्घा मणयः सर्व्वे आसंस्वाच्छादनं तव॥
शोणरत्नञ्च पीताश्मा हीरं वैदूर्य्यप्रस्तरः।
गोमेदः सूर्य्यकान्तश्च नीलकान्तोऽरुणोपलः॥
मरकतः सुवर्णञ्च तदानीञ्च तवान्तरे।
तव मृदङ्गवाद्यञ्चासीत् स्त्रीणाञ्चावलिस्तव।
त्वं यस्मिन् दिवसे सृष्टस्तद्दिने ते नियोजिते॥
अभिषेकाधिकारी त्वम् आसीराच्छादकः किरूब्। १४
नियुक्तश्च मयेशस्यावर्त्तथाः पुण्यपर्व्वते।

अग्निमयाश्मनां मध्येऽकुरुथाश्च गमागमौ॥
१५ त्वञ्च याथार्थिकाचार आसीः सृष्टिदिनात् परं।
अन्यायः परिणामे तु दृष्ट आविष्कृतस्त्वयि॥
१६ त्वद्वाणिज्यस्य बाहुल्यात् दौरात्म्येन तवान्तरं।
परिपूर्णमभूत् तस्मात् त्वञ्च पापेन दूषितः॥
ईश्वरीयगिरिभ्रष्टं त्वामकार्षमहं तदा।
भो आच्छादि किरूब् लुप्तं मध्यादग्निमयाश्मनां॥
१७ तव कान्त्योद्धतं चित्तं ज्ञानं च्युत्वा समं हृतं।
भूपतीनां समक्षञ्च त्वां निक्षेप्स्याम्यहं भुवि।
विधास्यामि जनानां त्वां चक्षुषोः कौतुकास्पदं॥
१८ बाहुल्यात् स्वापराधानां स्ववाणिज्योद्भवेन च।
अन्यायेनापवित्राण्यकार्षीः पुण्यस्थलानि ते॥
तस्मान्निर्गमितस्त्वत्तो मयाग्निस्त्वाम् अभक्षयत्।
त्वां भस्मीकृतवांश्चाहं त्वद्द्रष्टॄणां पुरो भुवि॥
१९ जातिषु त्वदभिज्ञा ये सर्व्वे क्षुभ्यन्ति ते त्वयि।
भयदस्त्वमभूर्नित्यं निःसत्त्वश्च भविष्यसि॥
२० अपरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान,
२१ त्वं सीदोनं प्रति स्थिरदृष्टिं कृत्वा तस्या वैपरीत्येन भावोक्तिं व्याहर।
२२ त्वं वद, प्रभुः सदाप्रभुरित्थमाह,
भो सीदोन् अहमेव त्वां पश्चाक्रमितुमुद्यतः।
तव मध्ये भविष्यामि प्रतापेन समन्वितः॥
तस्या मध्ये विचाराणां साधने च मया कृते।
मया स्वीयपवित्रत्वे तन्मध्ये च प्रकाशिते।
यत् सदाप्रभुरेवाहं तद् विज्ञायिष्यते जनैः॥
२३ मारीं तत्र प्रहेष्यामि तन्मार्गेषु च शोणितं।
तद्विरुद्धं चतुर्दिक्षु वर्त्तमानेन चासिना।
तस्या मध्ये पतिष्यन्ति मनुष्याः क्षतविक्षताः।
यत् सदाप्रभुरेवाहं तज्ज्ञास्यन्ति नरास्तदा॥
२४ इस्रायेलः कुलस्यापि शङ्कुर्दाहसमन्वितः।
कण्टको वा व्यथाकारी तस्य वेष्टनकारिणां।
अवज्ञाकारिणां मध्यात् पुनर्नैवोद्भविष्यति॥

यत् सदाप्रभुरेवाहं तच्च ज्ञास्यन्ति ते तदा ॥
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः। २५
इस्रायेल्कुलजा यासां मध्ये विकीर्णतां गताः।
जातीनां मध्यतस्तासां सङ्ग्रहीष्यामि तान् यदा ॥
परजातीयलोकानां साक्षात् स्वीयपवित्रतां।
तदा व्यक्तीकरिष्यामि स्वदासाय च याकुबे।
मया दत्ते निजे देशे निवत्स्यन्ति च ते पुनः ॥
निर्भयं तत्र वत्स्यन्ति निर्म्मास्यन्ते गृहाणि च। २६
उद्यानानि करिष्यन्ति निवत्स्यन्ति च निर्भयं ॥
चतुर्दिक्षु स्थितास्तेषां येऽवमाननकारिणः।
तेषां मध्ये विचारस्याहं विधास्यामि साधनं।
तेन ज्ञास्यन्ति मां ते च निजमीशं सदाप्रभुं ॥

---

२९ ऊनत्रिंशोऽध्यायः।

१ फिरौणो नृपस्याहङ्कारकापद्यकथनं ८ तदीयदेशस्य भाव्युच्छिन्नत्वं १३ चत्वारिंशद्वर्षेभ्यः परं तस्य पुनःस्थापनं १७ मिसर्देशीयराज्यं निवूखद्नित्सरस्य वेतनस्वरूपं २१ इस्रायेलः पराक्रमवृद्धिश्च।

दशमवर्षस्य दशममासस्य द्वादशदिने सदाप्रभोरिदं वाक्यं मां प्रति १
प्रादुरभूत्, भो नरसन्तान, त्वं मिस्रीयराजं फिरौणं प्रति स्थिरदृष्टिं २
कुरु तस्य विपरीतां कृत्स्नमिसरस्य विपरीताञ्च भावोक्तिं व्याहर। त्वं ३
भाषमाणो वद, प्रभुः सदाप्रभुरित्थमाह,

हा फिरौन् मिसरो राजन् त्वां पश्याभिद्रवाम्यहं।
त्वं स्वीयस्रोतसां मध्ये शयानः स महोरगः।
त्वयोक्तं मम मत्स्रोतो मह्यं तत् सृष्टवानहं ॥
अङ्कुशान्तु प्रवेश्याहं तावकीनहनुद्वये। ४
कृत्वा त्वत्स्रोतसां मत्स्यान् लग्नांस्त्वच्छल्कलेषु च ॥
ऊर्द्ध्वं त्वामुद्धरिष्यामि स्रोतसां तव मध्यतः।
सर्व्वांस्त्वच्छल्कलासक्तान् मत्स्यांश्च स्रोतसां तव ॥
सर्व्वांस्त्वत्स्रोतसां मत्स्यान् त्वाञ्च त्यक्ष्याम्यहं मरौ। ५
त्वं पतिष्यसि भूपृष्ठे न गृहीतो न सञ्चितः ॥
पशुभ्यो भूमिचारिभ्यो व्योम्नः पक्षिगणाय च।

भक्ष्यद्रव्यस्वरूपस्त्वं सम्प्रदायिष्यसे मया ॥
६ मिसर्व्वासिजनाः सर्व्वे मां ज्ञास्यन्ति सदाप्रभुं।
नलयष्ट्योऽभवन् यस्माद् इस्रायेलः कुलाय ते ॥
७ त्वं त्सरौ तै धृतः स्कन्धं तेषां कृत्स्नं स्फुटोऽभिदः।
कृत्स्नां त्वत्संश्रितानाञ्च कटिं भग्नो व्यचालयः॥
८ ततो हेतोरिदं वाक्यं प्रभुराह सदाप्रभुः।
खड्गं समानाययिष्यामि पश्य त्वत्प्रातिकूल्यतः।
मनुष्यांश्च पशूंश्चाहं तवोच्छेत्स्यामि मध्यतः॥
९ मिसर्देशस्ततो ध्वस्त उच्छिन्नश्च भविष्यति।
यत् सदाप्रभुरेवाहं तच्च ज्ञास्यन्ति तज्जनाः।
यतोऽवोचो मम स्रोतोऽहञ्च तत्सृष्टवानिति॥
१० अतः पश्याक्रमिष्यामि त्वां त्वत्स्रोतांसि च स्वयं।
आमिग्दोलसिवेनीभ्यां कूशसीमावधिं तदा।
मिसर्देशं करिष्यामि खड्गोच्छिन्नं मरुस्थलं॥
११ नरपादस्य सञ्चारस्तत्र नैव भविष्यति।
पशुपादस्य सञ्चारो न भविष्यति तत्र वा।
चत्वारिंशत् समा यावत् कोऽपि तत्र न वत्स्यति॥
१२ देशानां ध्वंसितानाञ्च मध्ये ध्वंसितमेव तं।
मिसर्देशं विधास्यामि चत्वारिंशच्च वत्सरान्।
समुच्छिन्नपुराणां हि मध्ये तस्य पुराण्यपि।
ध्वंसस्थानं भविष्यन्त्यहं मिस्रीयांश्च जातिषु।
विकरीष्यामि देशेषु विक्षेप्स्यामि च धूलिवत्॥
१३ यतो हेतोरिदं वाक्यं प्रभुराह सदाप्रभुः।
चत्वारिंशत्समान्ते ते विकीर्णा यत्र मिस्रिणः।
१४ जातीनां मध्यतस्तासां संग्रहीष्यामि तानहं।
मिस्रीयाणामहं दास्यं तदानीं परिवर्त्य च।
पथ्रोषाख्यं निजोत्पत्ते र्देशं नेष्यामि तान् पुनः।
तत्र ते च भविष्यन्ति राज्यं नीचदशान्वितं॥
१५ तद् राज्यञ्चान्यराज्येभ्यो नीचमेव भविष्यति।
जातीनामुपरि श्रैष्ठ्यं न पुनश्चाचरिष्यति।
तान् करिष्याम्यहं न्यूनान् जातीनां शासनेऽक्षमान्॥

इस्रायेलः कुलस्यापि न भविष्यति तत् पुनः। १६
शरणं शरणेच्छूनां दुष्कृतिस्मरणावहं।
अभिज्ञास्यन्ति ते माञ्च प्रभुमेव सदाप्रभुं॥

अपरं सप्तविंशवर्षस्य प्रथममासस्य प्रथमदिने सदाप्रभोरिदं वाक्यं १७
मां प्रति प्रादुरभूत्, भो नरसन्तान, बाबिलीयराजो निबूखद्नित्सरः १८
स्वसैन्यं सोरे महापरिश्रमं कारितवान्, सर्व्वमुण्डः केशहीनः सर्व्व-
स्कन्धश्च निस्त्वग्भूतः, परन्तु सोरस्य विरुद्धं तेन यत् कार्य्यम् अनुष्ठितं,
तस्य किमपि वेतनं सोरतो नालम्भि। अतो हेतोः प्रभुः सदाप्रभुरि- १९
त्थमाह, पश्याहं बाबिलीयराजाय निबूखद्नित्सराय मिसरदेशं दास्या-
मि, स तस्यैश्वर्य्यम् अपनेष्यति, तस्य लोप्त्रं हरिष्यति, तस्य लुण्ठित-
द्रव्याणि चोल्लुण्ठयिष्यति, तच्च तस्य सेनाया वेतनं भविष्यति। स यत्कृते २०
परिश्रमं कृतवान् तद्वेतनस्वरूपमहं तस्मै मिसरदेशं दास्यामि यतस्ते
मत्कृते कार्य्यमनुष्ठितवन्तः, इयं प्रभोः सदाप्रभोरुक्तिः।

तस्मिन् दिनेऽहम् इस्रायेलः कुलस्य कृते शृङ्गमेकं प्ररोहयिष्यामि, २१
तुभ्यञ्च तेषां मध्ये मुखस्योद्घाटनं दास्यामि, ततोऽहं यत् सदाप्रभुस्तत्
ते ज्ञास्यन्ति।

---

३० त्रिंशोऽध्यायः।

१ मिसरस्तस्य सहायानाञ्चोच्छिन्नताया भाविवाक्यं २० मिसरः सैन्यसामन्तनाशार्थं बाबिलो नृपस्य सैन्यवृद्धे भाविवाक्यञ्च।

पुनश्च सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, १
त्वं भावोक्तिं प्रचारयन् वद, २

भाषते भारतीमेतां प्रभुरेव सदाप्रभुः।
हाहाकारं प्रकुर्व्वन्तो ब्रूत हा कीदृशं दिनं॥
आसन्नं दिनमासन्नो दिवसः स सदाप्रभोः। ३
समेघं तद् दिनं कालो जातीनां स भविष्यति॥
व्याप्स्यति मीसरं खड्गः कूशश्चार्त्त्या लुठिष्यति। ४
यतो हेतोर्मिसर्देशे पतिष्यन्ति हता जनाः।
रिक्थं हारिष्यते तस्य ध्वंसिष्यन्ते गृहाणि च॥
कूशः पूटश्च लूदश्च सकलाश्चानुवर्त्तिनः। ५
कूबश्च मित्रदेशीयसन्तानाः सकला अपि।

एककाले हि तैः सार्द्धं पतिष्यन्त्यसिना हताः॥
६ पुनर्व्वारमिदं वाक्यं व्याजहार सदाप्रभुः।
मिसरः स्तम्भरूपाश्च निपतिष्यन्ति मानवाः।
तत्पराक्रमजन्यश्च गर्व्वो ह्रस्वो भविष्यति॥
आमिग्दोलसिवेनीभ्यां निपतिष्यन्ति तज्जनाः।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः॥
७ स्थास्यन्ति ध्वस्तदेशानां मध्ये ध्वस्ताश्च ते जनाः।
उच्छिन्नानां पुराणाञ्च मध्ये तेषां पुराणि च॥
८ यत् सदाप्रभुरेवाहं तद् विज्ञायिष्यते च तैः।
मिसर्देशे मया यस्माद् अग्निः प्रज्वलयिष्यते।
प्रभग्नाश्च भविष्यन्ति सर्व्वे तत्सहकारिणः॥
९ नौभि र्दूताश्च मत्साक्षात् निर्गमिष्यन्ति तद्दिने।
निर्भयं कूशदेशं ते करिष्यन्ति भयातुरं॥
तदा तत्र मनुष्याणां यातना सम्भविष्यति।
मिसरो दिवसे यद्वत् यस्मात् तद् भात्युपस्थितं॥
१० पुनर्वाक्यमिदं प्राह प्रभुरेव सदाप्रभुः।
तुमुलं मिसरस्याहं बाबिलीयमहीपतेः।
निबूखद्नित्सरस्यैव शमयिष्यामि पाणिना॥
११ देशनाशाय नीतः स तेन सार्द्धञ्च तज्जनाः
जातीनां भीमविक्रान्ता मिसरः प्रातिकूल्यतः।
विकोषासिकरा देशं पूरयिष्यन्ति तं शवैः॥
१२ स्रोतांस्यहं करिष्यामि तदानीं शोषितं स्थलं।
देशं विक्रीय दुष्टानां निधास्यामि करेषु च॥
देशं तत्पूरकञ्चापि सकलं शत्रुपाणिभिः।
ध्वंसयिष्यामि वच्मीदम् अहमेव सदाप्रभुः॥
१३ पुनर्व्वारमिदं प्राह प्रभुरेव सदाप्रभुः।
प्रतिमा नाशयिष्यामि मोफे लोप्स्यामि विग्रहान्॥
मिसर्देशोद्भवा राजा पुनर्नैव भविष्यति।
मिसरञ्च करिष्याम्यहं स्थानं भीरुताकुलं॥
१४ पथ्रोषं ध्वंसयिष्यामि वह्निं क्षेप्स्यामि सोयने।
नोपुर्य्याश्च करिष्याम्यहं विचारस्य साधनं॥

रोषं सेच्यामि सीने च मिसरो बलवर्द्धके। १५
उच्छेत्स्यामि च नोपुर्य्या जनान् कोलाहलप्रियान्॥
निक्षेप्स्यामि मिसर्य्यग्निं सीनश्चार्त्त्या लुठिष्यति। १६
नोः समाप्स्यति भिन्नत्वं नोफं शत्रुजयं दिवा॥
ओनः पीवेषतश्चापि यूनोऽसिः पातयिष्यति। १७
ते च पूर्य्यौ तदा दूरं वन्दित्वाय गमिष्यतः॥
दिवसश्च तफन्हेषे सान्धकारो भविष्यति। १८
यतोऽहं तत्र भंच्यामि मिसरः सकलं युगं।
तस्या विक्रमगर्व्वश्च तस्या मध्ये शमिष्यति॥
सा स्वयं घनमेघेन तदा प्रच्छादयिष्यते।
तस्या दुहितरश्चापि प्रगमिष्यन्ति वन्दयः॥
विचारस्य च हिष्पत्तिं करिष्यामि मिसर्य्यहं। १९
यत् सदाप्रभुरेवाहं तच्च ज्ञास्यन्ति ते तदा॥

पुनरेकादशवत्सरस्य प्रथममासस्य सप्तमदिने सदाप्रभोरिदं वाक्यं २०
मां प्रति प्रादुरभूत्, भो नरसन्तान, अहं मिस्रीयराजस्य फिरौणो २१
बाहुं भग्नवान्, पश्य भङ्गप्रतीकाराय बन्धनार्थकानुवेल्लितप्रयोगाय
खड्गधारणयोग्यशक्तिप्रदानाय वा तस्याबन्धनं न सम्भवति। अतो हेतोः २२
प्रभुः सदाप्रभुरित्थमाह,

अहं पश्चाक्रमिष्यामि फिरौणं मिसरो नृपं।
तस्य बाहू च भंच्यामि स्वस्थं भग्नञ्च खण्डशः।
असिञ्च च्यावयिष्यामि तस्य हस्तस्य मध्यतः॥
मिस्रीयान् विकरीष्यामि जातीनां मध्य एव च। २३
तांश्च देशसमूहस्य मध्ये क्षेप्स्यामि धूलिवत्॥
बाबिल्राजस्य बाहू तु करिष्यामि महाबलौ। २४
मामकीनञ्च निस्त्रिंशम् अर्पयिष्यामि तत्करे॥
फिरौणो बाहुयुग्मञ्चाहं प्रभंच्यामि सर्व्वशः।
स च क्रन्दिष्यति क्रन्दन् तत्साक्षाद्धन्यमानवत्॥
बाबिल्राजस्य बाहू च करिष्यामि महाबलौ। २५
फिरौणो बाहुयुग्मन्त्ववशत्वान्निपतिष्यति॥
यत् सदाप्रभुरेवाहं तद् विज्ञास्यन्ति ते तदा।
यतो बाबिलराजस्य हस्ते दास्याम्यसिं मम।

स मिसर्देशमुद्दिश्य तच्च विस्तारयिष्यति॥
१९ मिस्रीयान् विकरीष्यामि जातीनां मध्य एव च।
तांश्च देशसमूहस्य मध्ये क्षेप्स्यामि धूलिवत्।
यत् सदाप्रभुरेवाहं तज्ज्ञास्यन्ति जनास्तदा॥

---

३१ एकत्रिंशोऽध्यायः।

१ फिरौणे ज्ञानप्रदानार्थम् अश्शूररूपस्यैरसतरो दृष्टान्तः १० अहङ्कारात् तस्य छेदनं पातनञ्च १८ फिरौणः शेषदशा च।

१ एकादशवर्षस्य तृतीयमासस्य प्रथमदिने सदाप्रभोरिदं वाक्यं मां प्रति
प्रादुरभूत्,
२ भो मनुष्यस्य सन्तान त्वं मिस्रीयमहीपतिं।
फिरौणं वद लोकांश्च तस्य कोलाहलप्रियान्।
स्वमहत्त्वेन कस्य त्वं सदृशः प्रतिभासि मे॥
३ पश्यास्सूरो लिबानोन आसीद् एरसपादपः।
चारुशाखो घनच्छाय उच्चदैर्घ्योऽभ्रभिच्छिखः॥
४ तोयैः संवर्धिताकारो वार्द्धिना च प्रतिष्ठितः।
स्वीयस्रोतोभिरुद्यानं परितः परिगच्छता।
क्षेत्रस्थान् प्रति वृक्षांश्च स्वप्रणालीः प्रहिन्वता॥
५ क्षेत्रस्य सर्व्ववृक्षेभ्यः स उच्चाग्रोऽभवत् ततः।
अवर्धन्त लतास्तस्य शाखाः प्रापुश्च दीर्घतां।
यस्माद् भूरिजलान्यासंस्तत्र तद्वर्धनस्थले॥
६ तल्लतासु विहङ्गाश्च सर्व्वे नीडानकुर्व्वत।
तच्छाखानामधः सर्व्वे प्रासवन् वन्यजीविनः।
छायायां तस्य सर्व्वाश्च महत्यो जातयोऽवसन्॥
७ चारुरासीत् स उच्चत्वात् पल्लवानाञ्च दैर्घ्यतः।
तन्मूलं भूरितोयस्य पार्श्वे यस्मादविद्यत॥
८ एरसैरैश्वरोद्याने स न निस्तेजसीकृतः।
नैवासन् देवदारूणि तस्य तुल्यानि पल्लवैः।
न वासंस्तस्य शाखाभिः समा अर्म्मोणशाखिनः।
नासीत् कोऽप्यैश्वरोद्याने वृक्षो रूपेण तत्समः॥

तं हि पल्लवप्राचुर्य्यात् सुन्दरं कृतवानहं। ९
तस्मै त्वैर्ष्यन् द्रुमाः सर्व्व ऐश्वरोद्यान एदनि॥
ततो हेतोरिदं वाक्यं प्रभुराह सदाप्रभुः। १०
यतोऽसावुच्चदैर्घ्योऽभूत् मेघमध्येऽर्पयन् शिखां।
निजोच्चत्वेन यस्माच्च तच्चित्तं जातमुद्धतं॥
जातीनामेव देवस्य हस्ते दास्यामि तं ततः। ११
उचितं व्यवहारं स तेन सार्द्धं करिष्यति।
इत्थं तदीयदुष्टत्वात् तं निराकृतवानहं॥
जातीनां भीमविक्रान्तास्तं कर्त्तित्वा जहुः पराः। १२
शैलेषु तल्लताः पेतुः सर्व्वासूपत्यकासु च॥
भूमिच्छिद्रेषु सर्व्वेषु तच्छाखा भग्नतां ययुः।
तच्छायातो गताः पृथ्व्यास्तं जहुः सर्व्वजातयः॥
सर्व्वे वसन्ति तत्स्कन्धे पतिते खेचरद्विजाः। १३
तच्छाखास्वोपतिष्ठन्ति सर्व्वे क्षेत्रस्थजीविनः॥
उच्चदैर्घ्यास्ततो मा स्युः सर्व्वे तोयान्तिका द्रुमाः। १४
मा समुत्थापयेयुर्वा मेघमध्ये निजाः शिखाः।
मात्मनिष्ठा भवेयुर्वोच्चत्वात् सर्व्वेऽम्बुपायिनः॥
यतोऽधोभुवने देयाः सर्व्वे ते सन्ति मृत्यवे।
मध्यतो मर्त्यवंशानां गर्त्तमध्येऽवरोहिणां॥
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः। १५
मया तस्य च पातालम् अवरोहणवासरे।
शोक आज्ञापितो वार्धिस्तत्कृते छादितो मया॥
नद्यो निवर्त्तितास्तस्य संरुद्धा जलराशयः।
कृष्णीकृतस्तदर्थञ्च लिबानोन् भूधरो मया।
क्षेत्रस्थाः सर्व्ववृक्षाश्च तत्कृते जीर्णतां गताः॥
गर्त्तेऽवरोहिभिः सार्द्धं पातालमवतार्य्य तं। १६
जातयस्तन्निपातस्य शब्दादुद्वेजिता मया॥
तत्राधोभुवने सर्व्वे सान्त्विता एदनो द्रुमाः।
लिबानोनस्य चोत्कृष्टाः श्रेष्ठाः सर्व्वेऽम्बुपायिनः॥
पातालं तेऽप्यधो याता तत्सहासिहतान् प्रति। १७
जातीनां मध्य आसीनांस्तच्छायायां सुहृज्जनान्॥

१८ एदनस्थितवृक्षाणां मध्ये कस्य त्वमीदृशं।
प्रतापेन महत्त्वेन वा तुल्यः प्रतिपादितः॥
एदनस्थद्रुमैः सार्द्धं त्वमधो गमयिष्यसे।
गत्वाधोभुवनं तत्र मध्ये छिन्नत्वचां नृणां।
कृपाणेन हतानाञ्च सङ्गी भूत्वा शयिष्यसे॥
ईदृशोऽस्ति फिरौन् कृत्स्नस्तज्जनस्य महारवः।
उक्तवान् भारतीमेतां प्रभुरेव सदाप्रभुः॥

---

३२ द्वात्रिंशोऽध्यायः।

१ मिसरः पतनात् विलपनं ११ बाबिलो राज्ञा मिसरो नाशस्य भाविवाक्यं १७ पाताले तस्यावरोहणञ्च।

१ अपरं द्वादशवर्षस्य द्वादशमासस्य प्रथमदिने सदाप्रभोरिदं वाक्यं मां
२ प्रति प्रादुरभूत्, भो नरसन्तान, त्वं मिस्रीयराजं फिरौणमधि विलाप-
गीतं प्रणय तञ्च वद,

जातीनां युवसिंहेन तुल्यं त्वां जगदु र्जनाः।
त्वन्तु वार्धिस्थनक्रस्य कस्यचित् सदृशोऽभवः॥
स्वीयस्रोतःसु चोत्पत्य स्वकीयचरणैरपः।
अकरोः पङ्कसंयुक्ताः पादैश्चाक्षोभयो नदीः॥
३ ततो हेतोरिदं वाक्यं प्रभुराह सदाप्रभुः।
महाजातिसमाजेऽहं स्वीयजालं तवोपरि।
विस्तरिष्यामि तैश्च त्वं मत्पाशेनोद्धरिष्यसे॥
४ स्थले त्वं त्यक्ष्यसे क्षेत्रपृष्ठे च क्षेप्स्यसे मया।
खेचरान् पक्षिणः सर्व्वान् वासयिष्यामि च त्वयि।
त्वन्मांसैस्तर्पयिष्यामि भूचरान् सर्व्वजीविनः॥
५ पर्व्वतेषु निधास्यामि त्वदीयपिशितान्यहं।
त्वच्छवेन च दीर्घेण पूरयिष्याम्युपत्यकाः॥
६ त्वद्रसं भुवि सेक्ष्याम्यागिरिभ्यस्तव रक्तजं।
खातानि पूरयिष्यन्ते त्वत्तः प्रहरितै र्जलैः॥
७ त्वन्निर्व्वापणकालेऽहं छादयिष्यामि चाम्बरं।
कृष्णवर्णीकरिष्यामि तस्य सर्व्वाश्च तारकाः।

सूर्य्यं मेघैः पिधास्यामि चन्द्रो ज्योत्स्नां न दास्यति ॥
यानि ज्योतींषि दीप्राणि विद्यन्ते व्योममण्डले। ८
तानि कृष्णीकरिष्यामि सकलानि कृते तव ॥
त्वद्देशञ्चान्धकारेण विधास्यामि समावृतं।
उक्तवान् भारतीमेतां प्रभुरेव सदाप्रभुः ॥
युष्मदज्ञातदेशेषु जातीनां मध्यतो यदा। ९
मया तावकभङ्गस्य वार्त्ता चानाययिष्यते।
तदा प्रचुरजातीनां चित्तं सन्तापयिष्यते ॥
त्वदर्थञ्च महाजातीः करिष्यामि चमत्कृताः। १०
राजानश्च भविष्यन्ति तासां रोमाञ्चितास्त्वयि।
यस्मात् प्रत्यक्षतस्तेषां चालयिष्याम्यसिं मम ॥
स्वीयप्राणेषु चैकैकस्तेषां कम्पमनुक्षणं।
समवाप्स्यति तस्मिन् हि पतनस्य दिने तव ॥
यतो हेतोरिदं वाक्यं प्रभुराह सदाप्रभुः। ११
बाबिलोयनरेन्द्रस्य खड्गस्त्वामाक्रमिष्यति ॥
पातयिष्यामि वीराणाम् असिभिस्तुमुलं तव। १२
जातीनां भीमविक्रान्ताः स्मृतास्ते सकला नराः ॥
मिसर्देशस्य गर्व्वञ्च ते करिष्यन्ति नाशितं।
तुमुलं तस्य कृत्स्नञ्च निःशेषत्वमवाप्स्यति ॥
महातोयतटात् सर्व्वान् नाशयिष्यामि ते पशून्। १३
न पुन र्नरपादस्तत् करिष्यत्याविलं जलं।
नाविलं वा करिष्यन्ति तत् पशूनां खुराः पुनः ॥
तदानीं शमयिष्यामि तत्रत्यानि जलान्यहं। १४
तत्रत्याश्च करिष्यामि सरितस्तैलवाहिनीः।
उक्तवान् भारतीमेतां प्रभुरेव सदाप्रभुः ॥
यदाहन्तु करिष्यामि मिसर्देशं मरुस्थलं। १५
ध्वंसयिष्यामि भूमिञ्च द्रव्यैस्तत्पूरकैः सह ॥
निहनिष्यामि सर्व्वांश्च तस्या मध्ये निवासिनः।
यत् सदाप्रभुरेवाहं तद् विज्ञास्यन्ति ते तदा ॥
विलापार्थमिदं गीतम् इदं गायिष्यते जनैः। १६
नानाजातीयकन्याभिरिदं गायिष्यते किल ॥

मिसरं तुमुलञ्चाधि तस्य गास्यन्ति ता इदं।
उक्तवान् भारतीमेतां प्रभुरेव सदाप्रभुः॥
१७ अपरं द्वादशवर्षे मासस्य पञ्चदशदिने सदाप्रभोरिदं वाक्यं मां प्रति
१८ प्रादुरभूत्, भो नरसन्तान, त्वं मिसरः कोलाहलप्रियं जनवृन्दमुद्दिश्य
विलप तञ्चार्थतस्तां जातिं पराक्रान्तजातीनां कन्या इवाधोभुवनं गर्त्ते-
ऽवरोहिणां समीपम् अवतारय।
१९ कस्मान्मनोरमोऽसि त्वं त्वं कुरुष्वावरोहणं।
तत्राच्छिन्नत्वचां सङ्गे जनानां शायितो भव॥
२० मध्ये खड्गहतानां हि निपतिष्यन्ति तज्जनाः।
असि र्दत्तोऽस्ति जातिं तां तज्जनौघञ्च कर्षत॥
२१ संलपन्ति तमुद्दिश्य पातालस्यैव मध्यतः।
वीराणां सकला देवाः सार्द्धं तत्सहकारिभिः।
अधोऽच्छिन्नत्वचो गत्वा शेरते तेऽसिना हताः॥
२२ तत्राशूरः समस्तश्च समाजस्तस्य विद्यते।
शवागाराणि तेषाञ्च सन्ति तस्य समन्ततः।
हताः सन्ति हि ते सर्व्वे कृपाणेन निपातिताः॥
२३ गर्त्तस्याभ्यन्तरे तस्य शवागाराणि चक्रिरे।
शवागारञ्च तस्यैव तत्समाजेन वेष्ट्यते॥
ते जनाश्च हताः सर्व्वे कृपाणेन निपातिताः।
पूर्व्वं तै र्जीवतां देशे व्यापिता तु स्वभीमता॥
२४ तत्रैलमः समस्तश्च जनौघस्तस्य विद्यते।
शवागारञ्च यत् तस्य सन्ति ते तत्समन्ततः॥
ते जनाश्च हताः सर्व्वे कृपाणेन निपातिताः।
अधोऽच्छिन्नत्वचो यातास्तदधोभुवनं प्रति॥
पूर्व्वं ते र्जीवतां देशे व्यापिता निजभीमता।
भुञ्जते तु निजां लज्जां सङ्गे गर्त्तेऽवरोहिणां॥
२५ मध्ये हतमनुष्याणां शय्या तस्मै निरूपिता।
सजनौघाय तेषाञ्च शवागारैः स वेष्टितः॥
सर्व्वेऽच्छिन्नत्वचस्ते हि कृपाणेन हता जनाः।
यतस्तै र्जीवतां देशे व्यापिता स्वीयभीमता॥
स्वलज्जां भुञ्जते तस्मात् सङ्गे गर्त्तेऽवरोहिणां।

मध्ये हतजनानां हि स्थानं तस्य निरूपितं ॥
तत्र मेशक्-तुबल् इत्यस्तज्जनौघस्य विद्यते । २६
शवागाराणि तेषाञ्च सन्ति तस्य समन्ततः ॥
तेऽप्यच्छिन्नत्वचः सर्व्वे कृपाणेनैव घातिताः ।
यतस्ते जीवतां देशे व्यापिता निजभीमता ॥
किन्त्वच्छिन्नत्वचां मध्ये ये वीराः पतिताः पुरा । २७
अवरूढाश्च पातालं स्वयुद्धास्त्रसमन्विताः ॥
येषां स्वीयकृपाणाश्च निहिताः शिरसामधः ।
न ते वीरैः सहैतेऽपि शयनं कुर्व्वते जनाः ॥
तेषां स्वीयापराधस्तु तेषामस्थीन्युपाश्रयत् ।
वीराणां भीषणा आसन् जीवतां भुवि ते यतः ॥
मध्येऽच्छिन्नत्वचां तद्वत् खण्डितस्त्वं भविष्यसि । २८
कृपाणेन हतैः सार्द्धं मनुष्यैश्च शयिष्यसे ॥
तत्रेदोम् तस्य राजानः सर्व्वेऽध्यक्षाश्च सन्ति हि । २९
स्ववीरत्वेऽपि खड्गेन हतानां सङ्गिनः कृताः ।
मध्येऽच्छिन्नत्वचां गर्त्तेऽवरूढैः सह शेरते ॥
तत्रोदीच्या नृपाः सर्व्वे सीदोनीयाश्च सन्ति हि । ३०
स्ववीरत्वजभीमत्वेऽवरूढा लज्जयान्विताः ।
तेऽप्यच्छिन्नत्वचस्तत्र शेरतेऽसिहतैः सह ।
स्वलज्जामुपभुञ्जानाः सार्द्धं गर्त्तेऽवरोहिभिः ॥
द्रक्ष्यत्येतान् फिरौन् स्वीयजनौघे चाश्वसिष्यति । ३१
स फिरौन् तस्य सेनाश्च सकला असिना हताः ।
उक्तवान् भारतीमेतां प्रभुरेव सदाप्रभुः ॥
यतोऽहं जीवतां देशे व्यापयं तस्य भीमतां । ३२
ततोऽच्छिन्नत्वचां मध्ये कृपाणेन हतैः सह ।
शायितः स फिरौन् इत्यस्तज्जनौघस्य विद्यते ।
उक्तवान् भारतीमेतां प्रभुरेव सदाप्रभुः ॥

---

३३ त्रयस्त्रिंशोऽध्यायः।

१ रक्षकस्य दृष्टान्तकथनं ७ तस्य तात्पर्य्यं १० ईश्वरस्य न्याय्यव्यवस्थाप्रकाशः २१ दुष्टत्वात् लोकानां देशाधिकाराप्राप्तिः ३० खलानां दण्डस्य कथनञ्च।

१ अपरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, त्वं
२ स्वीयजातिः सन्तानानालप तांश्च वद,

देशं खङ्गे मयानीते तस्य देशस्य मानवाः।
स्वमध्याच्चेद् गृहीत्वैकं नरं कुर्य्युः स्वरक्षिणं॥

३ स कृपाणञ्च चेत् पश्येत् देशमागन्तुमुद्यतं।
श्रावयित्वा च तूर्य्यञ्चेत् स जनान् प्रतिबोधयेत्॥

४ तूर्य्यशब्दन्तु चेत् श्रुत्वा श्रोता न ज्ञानमाप्नुयात्।
आयातेन च खङ्गेन स जनः संक्षियेत चेत्।
तर्हि तच्छोणितस्रावस्तस्य मूर्द्धि फलिष्यति॥

५ तूर्य्यशब्दं निशम्यापि नाभवत् स प्रबोधितः।
तद्रक्तस्रावजो दोषस्तस्मिन्नेव फलिष्यति।
तस्य प्रबोधितस्यैवाभविष्यत् प्राणरक्षणं॥

६ दृष्ट्वासन्नमसिं चेत्तु रक्षी तूर्य्यं न वादयेत्।
तर्ह्यलब्धप्रबोधानां जनानामेव मध्यतः।
कमपि प्राणिनं चेत् स खङ्ग आगत्य संहरेत्॥
तर्हि स्वीयापराधेन स प्राणी संहरिष्यते।
रक्षिणस्तु करात् तस्य दापयिष्यामि शोणितं॥

७ त्वान्तु भो नरसन्तानाहमिस्रायेल्कुलाय हि।
रक्षिणं दत्तवांस्तस्मात् वाक्ये मत्तः श्रुते त्वया।
मम नाम्ना त्वया तेषां कर्त्तव्यं प्रतिबोधनं॥

८ त्वं मरिष्यसि दुष्टेति मयोक्ते दुर्जनं प्रति।
त्वं दुष्टं स्वपथत्यागे चेत् प्रबोधाय नालपेः॥
तर्हि स्वीयापराधेन दुर्जनः स मरिष्यति।
तव हस्तात्त्वहं तस्य दापयिष्यामि शोणितं॥

९ त्वया दुष्टः स्वमार्गे तु तत्त्यागाय प्रबोधितः।
न त्यजेन्निजमार्गं चेत् स्वाघात् तर्हि मरिष्यति।
त्वन्तु स्वकीयप्राणानां साधयिष्यसि रक्षणं॥

त्वञ्च भो नरसन्तान तदिस्रायेल्कुलं वद। १०
स्वाधर्म्मैः स्वीयपापैश्चाक्रान्ताः क्षीयामहे वयं।
जीविष्यामः कथञ्चेति सत्यं युष्माभिरुच्यते॥
ब्रूहि तान् यदि जीवामि प्रभुरात्त्व सदाप्रभुः। ११
दुष्टस्य मरणे प्रीति र्मम काचिन्न जायते।
स्वमार्गात्तु निवृत्तस्य प्रीये दुष्टस्य जीवने॥
निवर्त्तध्वं निवर्त्तध्वं भो दुष्टाः स्वीयमार्गतः।
म्रियेध्वं हि कुतो यूयं भो इस्रायेल्कुलप्रजाः॥

त्वञ्च भो नरसन्तान, स्वीयजातेः सन्तानान् वद, धार्म्मिकस्य या धा- १२
र्म्मिकता सा तस्याधर्म्माचारदिने तं न रक्षिष्यति, दुष्टस्य च या दुष्टता
तया स स्वीयदुष्टतात्यागदिने न स्खलिष्यति। धार्म्मिकश्च पापाचारदिने
तया [धार्म्मिकतया] जीवितुं न शक्ष्यति। असौ जीविष्यतीति धार्म्मिक- १३
जनमधि मयोक्ते यदि स निजधार्म्मिकतायां विश्वस्यान्यायमाचरेत्, तर्हि
तस्य सर्व्वाणि धर्म्मकर्म्माणि नानुस्मारिष्यन्ते स यम् अन्यायं कृतवांस्तेनैव
मरिष्यति। पुनश्च त्वं मरिष्यसीति मयोक्तो दुष्टजनो यदि स्वपापान्निवृत्य १४
न्यायं धार्म्मिकत्वञ्चाचरेत्, स दुष्टो यद्याधिं प्रतिदद्याद् हृतद्रव्यं शोधयेत् १५
अन्यायमकृत्वा च जीवनावहान् विधीन् आचरेत्, तर्हि सोऽवश्यं जी-
विष्यति नैव मरिष्यति। सर्व्वं यत् पापं तेनाकारि तत् तस्य प्रातिकूल्येन १६
न स्मारिष्यते; स न्यायं धार्म्मिकत्वञ्चाचरितवान्, अवश्यं जीविष्यति।
एतस्मिंस्तव जातेः सन्ताना वदन्ति, प्रभो र्मार्गो न समानः, परन्तु तेषा- १७
मेव मार्गो न समानः। धार्म्मिकः स्वधार्म्मिकत्वान्निवृत्य यमन्यायं करो- १८
ति तेनैव मरिष्यति। दुष्टजनश्च स्वदुष्टत्वान्निवृत्य यं न्यायं यच्च धार्म्मि- १९
कत्वमाचरति, ताभ्यामेव स जीविष्यति। यूयन्तु वदथ, प्रभो र्मार्गो न २०
समान इति। भो इस्रायेलः कुल, अहं युष्माकमेकैकस्याचारानुयायिनं
विचारं करिष्यामि।

अस्मदीयप्रवासस्य द्वादशवर्षस्य दशममासस्य पञ्चमदिने यिरूशा- २१
लमः पलायितः कश्चिज्जनो मदन्तिकमागत्य जगाद, पुरी निपाति-
तेति। तस्य पलायितस्यागमनात् पूर्व्वं सन्ध्यायां सदाप्रभो र्हस्तो मय्य- २२
र्पितोऽभूत् प्रातःकाले च तस्यागमनस्यापेक्षया स मम वक्त्रमुद्घाटया-
मास, ततो मम वक्त्रमुद्घाटितं तस्थौ, अहञ्च न पुन र्मूकीभूतः। अपरं २३
सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, इस्रायेलो भूमौ २४

तेषूच्छिन्नस्थानेषु निवसन्तो जना वदन्ति, इब्राहीम एक आसीत् तथा-
पि देशस्याधिकारी बभूव, वयन्त्वनेके स्मः, अस्मभ्यमेव देशोऽधिकार-
२५ इव दत्तः। अतो हेतोस्त्वं तान् वद, प्रभुः सदाप्रभुरित्यमाह, यूयं
सरक्तं मांसम् अश्नीथ, स्वीयदेवविग्रहेषु दृक्पातं कुरुथ, शोणितं
२६ स्रावयथ च, यूयं किं देशस्याधिकारिणो भविष्यथ? यूयं निजखड्गेषु
समालम्बध्वे गर्हणीयाचारं कुरुध्वे प्रत्येकश्च स्वसमीपवेशिनां भार्य्यां
२७ दूषयथ, यूयं किं देशस्याधिकारिणो भविष्यथ? त्वं तान् वद, प्रभुः
सदाप्रभुरित्यमाह, यद्यहं जीवामि, तर्हि सत्यं ब्रवीमि, तत्रोच्छिन्न-
स्थानेषु निवासिनो जनाः खड्गाघातेन पतिष्यन्ति, क्षेत्रेऽवस्थितान्
जनांश्चाहं वन्यपशुभ्यो भक्ष्यवद् दत्तवान्, दुर्गेषु गुहासु चावस्थिता
२८ जना मार्य्या मरिष्यन्ति च। अहञ्च देशं ध्वस्तं ध्वंसस्थानञ्च कृतवान्
तद्बलजन्यं गर्व्वञ्च शमितवान्; इस्रायेलः पर्व्वताश्च ध्वस्ताः पथिकहीनाश्च
२९ भविष्यन्ति। तैः कृतानां सर्व्वासां गर्हणीयक्रियाणां हेतुना देशे मया
ध्वंसिते ध्वंसस्थानीकृते चाहं यत् सदाप्रभुरस्मि तत् ते ज्ञास्यन्ति।
३० परन्तु भो नरसन्तान, तव जातेः सन्तानाः कुड्यानां निकटे गृह-
प्रवेशस्थानेषु च तिष्ठन्तस्त्वामधि संलपन्ति, प्रत्येकश्च परस्परं वदन्ति,
३१ आगच्छत, सदाप्रभुतो यद् वाक्यं निर्गतं तच्छृणुत। अतो जनानामाग-
मनेनेव ते त्वत्समीपम् आगमिष्यन्ति, मम प्रजाइव त्वत्साक्षाद् उपवि-
ष्टास्तव वाक्यानि श्रोष्यन्ति च, न तु तानि पालयिष्यन्ति, यतस्तेषां मुखे
यद्यद् मधुरं तत्तदेव ते कुर्व्वते, तेषां चित्तञ्च तेषां लभ्यमेवानुगच्छति।
३२ अपरं पश्य तेषां कृते त्वं मधुरगायकश्चारुस्वरो निपुणवाद्यकरो
३३ भवसि, ते तव वाक्यानि श्रोष्यन्ति, न तु तानि पालयिष्यन्ति। वाक्य-
सिद्धिस्तु पश्यागच्छति, तेषां मध्ये भाववाद्येक आसीदिति तस्याम्
आगतायां ते ज्ञायिष्यते च।

---

३४ चतुस्त्रिंशोऽध्यायः।

१ मेषरक्षकाणां भर्त्सनं ७ ईश्वरेण तेषां दण्डनं ११ ईश्वरेण स्वव्रजस्य रक्षणं १७ तस्य विचारणं २० ख्रीष्टेन व्रजरक्षणमधि भाविवाक्यञ्च।

१ पुनश्च सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान,
२ त्वम् इस्रायेलः पालकानधि भावोक्तिं व्याहर, भावोक्तिं व्याहर, तान्
पालकांश्च वद, प्रभुः सदाप्रभुरित्यमाह,

इस्रायेल्पालका हा हा सञ्जाता आत्मपालकाः।
पालकैः किं न कर्त्तव्यं पशूनामेव पालनं॥
युष्माभि र्भक्ष्यते मेदो लोमतः क्रियतेऽम्बरं। ३
हन्यते च पशुः पीनो व्रजः किन्तु न पाल्यते॥
न व्यधीयत युष्माभिः क्षीणस्य बलवर्धनं। ४
न चिकित्सा सरोगस्य न भग्नाङ्गस्य बन्धनं॥
नापास्तस्य पुनः प्राप्ति र्न भ्रान्तस्य गवेषणं।
शासनन्तु कृतं तेषां बलेनोपद्रवेण च॥
पालकस्यैव चाभावात् मेषा गत्वा विकीर्णतां। ५
सर्व्वेषां वन्यजन्तूनां भक्ष्यं भूत्वा व्यदुद्रवन्॥
मामकीनास्ततो मेषा भ्राम्यन्ति सकलाद्रिषु। ६
सकलानामुदग्राणां भूधराणां शिखासु च॥
मम मेषाश्च वर्त्तन्ते विकीर्णाः कृत्स्नभूतले।
नान्वेष्टा नानुगामी वा मनुष्यः कोऽपि विद्यते॥
अतो भो पालका यूयं शृणुतोक्तिं सदाप्रभोः॥ ७
यदि जीवामि (वक्तीदं प्रभुरेव सदाप्रभुः)। ८
तर्हि पालकहीनत्वाद् व्रजो मे लुण्ठितो यतः।
मेषा मे चाभवन् खाद्यं सर्व्वेषां वन्यजीविनां॥
पालका मम यस्माच्च नैवान्वैषन् व्रजं मम।
पालका आत्मपालास्तु मेषान् नापालयन् मम॥
ततो भो पालका यूयं शृणुतोक्तिं सदाप्रभोः। ९
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः॥
पालकांस्तानहं पश्य समाक्रमितुमुद्यतः। १०
मम मेषानहं तेषां याचिष्यामि च हस्ततः॥
तान् जनांश्च करिष्यामि निवृत्तान् व्रजपालनात्।
न पुनः पालयिष्यन्ति ते जना आत्मपालकाः॥
निजमेषानहं तेषाम् उद्धरिष्यामि चास्यतः।
भक्ष्यद्रव्याणि तेषाञ्च न भविष्यन्ति ते पुनः॥
यतो हेतोरिदं वाक्यं प्रभुराह सदाप्रभुः। ११
पश्य मामकमेषाणाम् अनुष्ठातुं गवेषणं।
तेषां तत्त्वावधानञ्च स्वयमेवाहमुद्यतः॥

१२ स्वमेषाणां विकीर्णानां मध्ये स्थितिदिने यथा।
कुर्य्यात् तत्त्वानुसन्धानं स्वीययूथस्य पालकः॥
करिष्याम्यनुसन्धानं स्वमेषाणामहं तथा।
यत्र सर्व्वत्र विच्छिन्ना दुर्द्दिने तमसावृते।
ते वर्त्तन्ते च तत्स्थानाद् उद्धरिष्यामि तानहं॥
१३ जातिभ्यो बहिरानीय देशेभ्यश्च समुह्य तान्।
स्वभूमिं प्रापयिष्यामीस्रायेलः पर्व्वतेषु च।
निम्नस्थानेषु देशस्य सर्व्ववासस्थलेषु च।
अहमेव तदा तेषां प्रकरिष्यामि पालनं॥
१४ प्रचारस्थान उत्कृष्टे चारयिष्यामि तानहं।
इस्रायेलोऽग्रभूश्रेषु तेषां स्थास्यति चाश्रयः॥
ते तत्रैव शयिष्यन्ते तस्मिन्नुत्तम आश्रये।
इस्रायेलोऽद्रिषु स्थाने चरिष्यन्ति च पीवरे॥
१५ मामकीनान् हि तान् मेषांश्चारयिष्याम्यहं स्वयं।
तांश्चाहं शाययिष्यामीयं प्रभो र्वाक् सदाप्रभोः॥
१६ अन्वेषिष्याम्यहं भ्रान्तं प्रत्यानेष्याम्यपोहितं।
अङ्गं भन्त्स्यामि भग्नस्य बलं दास्यामि रोगिणे॥
पीनं शक्तञ्च लोप्स्यामि मेषान् न्यायेन पालयन्॥
१७ भो मेषा मम युष्मांस्तु प्रभु र्वक्ति सदाप्रभुः।
पश्यताहं करिष्यामि विचारं मेषमध्यतः।
करिष्याम्येडकानाञ्च छागानाञ्च विचारणं॥
१८ प्रचारे चरथोत्कृष्टे मन्यध्वे तद् यतो लघु।
ततः किं युष्मदुच्छिष्टं तृणं मर्द्दयथाङ्घ्रिभिः।
निर्म्मलं सलिलं पीत्वोच्छिष्टं पादैश्च मथ्नथ॥
१९ युष्मत्पादैश्च यत् पिष्टं मम मेषाश्चरन्ति तत्।
युष्माकं चरणै र्यच्च मथितं तत् पिबन्ति ते॥
२० अतस्तानधि वक्तीदं प्रभुरेव सदाप्रभुः।
पश्याहं मेषयो र्मध्ये पीवरस्य कृशस्य च।
स्वयं विचारनिष्पत्तिम् अस्म्यनुष्ठातुमुद्यतः॥
२१ पार्श्वैः स्कन्धैश्च सम्पीड्य शृङ्गैश्चाहत्य दुर्ब्बलाः।
सर्व्वमेषी र्यतो यूयं व्यकारिष्ट बहिष्कृताः।

ततोऽहं स्वीयमेषाणां संविधास्यामि तारणं। २२
न पुनस्तापहर्त्तव्यास्ते भविष्यन्ति लोप्त्रवत्।
मेषाणां मध्यतस्ताहं करिष्यामि विचारणं॥
अहमुत्पादयिष्यामि तेषामेकञ्च पालकं। २३
नियुक्तं पालने तेषां दायूदं सेवकं मम॥
स तान् पास्यति तेषाञ्च पालकः स भविष्यति॥
भविष्यामीश्वरस्तेषां स्वयञ्चाहं सदाप्रभुः। २४
दायूदाख्यश्च दासो मे तेषां मध्ये स्थितः पतिः।
उक्तवान् भारतीमेताम् अहमेव सदाप्रभुः॥
नियमञ्च कृते तेषां विधास्यामि शुभङ्करं। २५
श्वापदांश्च करिष्याम्युपरतान् देशमध्यतः।
मरौ वत्स्यन्ति ते सुस्था निद्रास्यन्ति वनेषु च॥
तान् मदद्रेः समन्तञ्च करिष्याम्याशिषान्वितान्। २६
व्योम्नोऽवतारयिष्याम्यासारान् स्वसमयेषु च।
आसारास्ते भविष्यन्ति सर्व्वे आशिःप्रवाहिणः॥
तदा क्षेत्रे स्थितो वृक्षः स्वफलानि प्रदास्यति। २७
पृथिवी च यथायोग्यं शस्यमुत्पादयिष्यति॥
स्वीयभूमौ मनुष्यास्ते निवत्स्यन्ति च निर्भयं।
यत् सदाप्रभुरेवाहं तद् विज्ञायिष्यते च तैः॥
यतस्तेषां युगस्याहं खण्डयिष्यामि कीलकान्।
स्वदास्यकारकाणां तांश्चोद्धरिष्यामि हस्ततः॥
लोप्त्रञ्च परजातीनां न भविष्यन्ति ते पुनः। २८
न वा तान् भक्षयिष्यन्ति श्वापदा देशचारिणः।
निर्भयं ते च वत्स्यन्ति कोऽपि नोद्वेजयिष्यति॥
तेषाञ्चोत्पादयिष्यामि यशस्यं फलिनं द्रुमं। २९
न भविष्यन्ति ते देशे क्षुधया संहृताः पुनः।
न पुनः परजातीनां वा वहिष्यन्ति वाच्यतां॥
योऽहं सदाप्रभुः सोऽहं तेषां सङ्गी यदीश्वरः। ३०
इस्रायेलः कुलं ते च यत् प्रजाः सन्ति मामकाः।
तत् ते ज्ञास्यन्ति वक्तीदं प्रभुरेव सदाप्रभुः॥
मम मेषास्ततो यूयं मेषाः सम्पालिता मया। ३१

मनुष्या एव यूयं स्याहन्तु युष्माकमीश्वरः।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः॥

---

३५ पञ्चत्रिंशोऽध्यायः।

इदोमेयेलं प्रति जातक्रोधहेतोरिदोमीयानां दण्डस्य भविष्यद्वाक्यं।

१ पुनश्च सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान,
२ त्वं सेयीरपर्व्वतं प्रति स्थिरदृष्टिं कृत्वा तत्प्रतिकूलां भावोक्तिं व्याहर,
३ तञ्च वद, प्रभुः सदाप्रभुरित्थमाह,

अहं पश्चात्क्रमिष्यामि त्वां भो सेयीरपर्व्वत।
निजं प्रसारयिष्यामि हस्तं त्वत्प्रातिकूल्यतः।
ध्वस्तं ध्वंसस्थलञ्च त्वां संविधास्यामि च स्वयं॥

४ उच्छिन्नानि करिष्यामि तव सर्व्वपुराणि हि।
ध्वस्ता भविष्यसि त्वं मां ज्ञास्यसे च सदाप्रभुं॥

५ त्वदन्तर्विद्यते यस्माच्छत्रुभावश्चिरन्तनः।
निक्षिप्ता असिहस्ते चेस्रायेलो वंशजास्त्वया।
विपत्तिसमये तेषां काले चान्तकदुष्कृतेः॥

६ अतोऽहं यदि जीवामि (प्रभु र्वक्ति सदाप्रभुः)।
त्वां करिष्याम्यहं रक्तं रक्तं त्वाञ्चानुधाविता।
त्वं न गर्हितवान् रक्तं रक्तं त्वाञ्चानुधाविता॥

७ सेयीराद्रिं करिष्यामि ध्वस्तं ध्वंसस्य च स्थलं।
उच्छेत्स्यामि च तन्मध्याद् यातायातकृतो जनान्॥

८ तदद्रीन् पूरयिष्यामि हतैस्तस्य जनैरहं।
मनुष्यास्तव भूभ्रेषु त्वदीयोपत्यकासु च।
निम्नभूषु च सर्व्वासु पतिष्यन्त्यसिना हताः॥

९ अहं त्वां प्रकरिष्यामि चिरध्वंसस्थलीमयं।
पुरीणां तव मध्ये च नरः कोऽपि न वत्स्यति।
अभिज्ञास्यथ यूयञ्च तदानीं मां सदाप्रभुं॥

१० यस्माज्जातिद्वये तस्मिन् तस्मिन् देशद्वयेऽपि च।
त्वयोक्तं ते मया लभ्ये वयं भोक्ष्यामहे च ते।
अविद्यत तदानीन्तु तत्र स्थाने सदाप्रभुः॥

अतोऽहं यदि जीवामि (प्रभुराह सदाप्रभुः)। ११
तर्हि त्वं यद्वदाचारं कृतवांस्तेषु शात्रवात्॥
तव कोपेर्व्ययो र्योग्यां करिष्यामि क्रियां तथा।
विचारं तव कृत्वेत्थं दास्ये तेष्वात्मबोधनं॥
योऽहं सदाप्रभुः सोऽहं व्यङ्गोक्तीः सकलास्तव। १२
श्रुतवानिदमेव त्वं तदा ज्ञास्यसि निश्चितं॥
त्वमिदं प्रोक्तवान् वाक्यम् इस्रायेलो गिरीनधि।
ध्वंसस्थानमदोऽस्मभ्यं ग्रसनार्थं समर्पितं॥
मद्विरुद्धं मुखै र्यूयं कृतवन्तः सगौरवं। १३
मद्विरुद्धं बह्वक्तीश्चोक्तवन्तस्तच्छ्रुतं मया॥
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः। १४
हृष्टायां कृत्स्नमेदिन्यां विधास्यामि तव क्षयं॥
इस्रायेलः कुलस्य त्वं देशे ध्वंसाद् यथाहृषः। १५
त्वामुद्दिश्य तथैवाहं विधास्यामि प्रहर्षणं॥
सेयीराद्रिरिदोमश्च कृत्स्नौ ध्वस्तौ भविष्यतः।
यत् सदाप्रभुरेवाहं तच्च ज्ञास्यन्ति ते जनाः॥

---

३६ षट्त्रिंशोऽध्यायः।

१ इस्रायेल्देशस्य सान्त्वनं ८ परमेश्वरस्याशीर्वादप्रतिज्ञा १६ पापाद् इस्रायेलो दण्डः २१ विनामूल्येन तस्य रक्षा २५ खीष्टराज्यस्य शुभभविष्यद्वाक्यञ्च।

त्वञ्च, भो नरसन्तान, इस्रायेलः पर्व्वतान् उद्दिश्य भावोक्तिं व्याहर, १
तांश्च वद, भो इस्रायेलः पर्व्वताः, सदाप्रभो र्वाक्यं शृणुत, प्रभुः सदा- २
प्रभुरित्थमाह, यतः शत्रु र्युष्माकं विरुद्धमुक्तवान्, हिहि, तानि चिर-
न्तनान्युच्चस्थलान्यस्माकम् अधिकारविषया अभवन्, तस्मात् त्वं भा- ३
वोक्तिं व्याहरन्निदं वद, प्रभुः सदाप्रभुरित्थमाह, यतो हेतो र्यूयं
चतुर्द्दिक्षु ध्वंस्यमाना अभिगर्ज्यमानाश्च जातीनां शेषस्याधिकारविषया
जनानाम् ओष्ठगता जिह्वाग्रस्था वाच्यताया विषयाश्चाभवत, ततो ४
हेतोरेव, भो इस्रायेलः पर्व्वताः, यूयं प्रभोः सदाप्रभो र्वाक्यं श्रोतुमर्हथ,
प्रभुः सदाप्रभुस्तान् पर्व्वतान् उपपर्व्वतांश्च ता निम्नभूमीरुपत्यकाश्च
तान्युच्छिन्नध्वंसस्थलानि परित्यक्तपुराणि चेत्यमाह, युष्मत्साकल्यं चतु-

५ हिंस्रजातीनां शेषस्य लोम्नं विद्रूपास्पदञ्चाभवत्, ततो हेतोः प्रभुः
सदाप्रभुरित्थमाह, जातीनां ये शेषा यश्च कृत्स्न इदोमः सम्पूर्णचित्त-
हर्षेणान्तरिकावज्ञानेन च मम देशं लोम्नार्थं शून्यीकर्त्तुमिच्छन्तः स्वी-
याधिकारविषयं कृतवन्तस्तेषां प्रतिकूलमहं निजेर्ष्यानलेन वाक्यं व्याह-
६ रामि। अतस्त्वम् इस्रायेलो भूमिमधि भाववोक्तिं व्याहरन् तान् पर्व्व-
तान् उपपर्व्वतांश्च ता निम्नभूमीरुपत्यकाश्च वद, प्रभुः सदाप्रभुरित्थमाह,
पश्यत, यूयं परजातीनाम् अवज्ञां सोढवन्तस्तस्मादहं निजेर्ष्यया निज-
७ रोषेण च वाक्यं व्याहर्त्तुमुद्यतोऽस्मि। अतो हेतोः प्रभुः सदाप्रभुराह,
अहं स्वहस्तमुत्तोल्य शपे,

ये सर्व्वे परजातीया विद्यन्ते वः समन्ततः।
स्वीयावज्ञां सहिष्यन्ते ते जना एव भारवत्॥
८ परन्तु सकला यूयम् इस्रायेलीयपर्व्वताः।
स्वीयशाखाः प्रयच्छन्तः स्वफलानि प्रदास्यथ।
इस्रायेले प्रजाभ्यो मे तासाञ्चासन्न आगमः॥
९ यतो हेतोरहं पश्य युष्मत्पक्षो भवामि हि।
युष्मान् प्रति निजां दृष्टिं वर्त्तयिष्याम्यहं पुनः।
कृषिकर्म्म च युष्मासु रोपणञ्च भविष्यति॥
१० करिष्यामि च युष्मासु मनुष्यान् बहुसङ्ख्यकान्।
इस्रायेलः कुलं कृत्स्नं सर्व्वथा बहुसङ्ख्यकं॥
नगरेषु तदानीञ्चावस्थास्यन्ते निवासिनः।
समवाप्स्यन्ति निर्म्माणं ध्वंसितानि स्थलानि च॥
११ नरान् पशूंश्च युष्मासूत्पादयिष्याम्यहं बहून्।
तत्र ते वर्धमानाश्च भविष्यन्ति बहुप्रजाः॥
युष्मान् निवासिभिः पूर्णान् करिष्यामि च पूर्व्ववत्।
युष्मदादिदशातोऽपि विधास्यामि च मङ्गलं।
यत् सदाप्रभुरेवाहं यूयं ज्ञास्यथ तत् तदा॥
१२ विधास्यामि च युष्मासु मनुष्याणां गमागमौ।
इस्रायेलः कुलस्यैव भोक्ष्यन्ते त्वां जना मम॥
त्वमधिकारदेशश्च तदा तेषां भविष्यसि।
तांश्च नैव पुनर्व्वारं निरपत्यान् करिष्यसि॥
१३ भाषते भारतीमेतां प्रभुरेव सदाप्रभुः।

ते वदन्ति नराश्नी त्वं स्वजाते र्निरपत्यकृत्॥
अतस्त्वं न पुनर्व्वारं मनुष्यान् भक्षयिष्यसि। १४
न पुन र्निजजातिं वा निरपत्यां करिष्यसि।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः॥
न पुनः श्रावयिष्यामि त्वां जातीनां तिरस्क्रियां। १५
वंशानामपि धिक्कारं नैव त्वं भोक्ष्यसे पुनः॥
न पुनः स्वीयजातिं वा निरपत्यां करिष्यसि।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः॥

अपरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, भो नरसन्तान, १६
इस्रायेल्कुलस्य जना यदा स्वभूमौ न्यवसन् तदा स्वीयाचारेण स्वगर्ह- १७
णीयक्रियाभिश्च तामशुचिम् अकुर्व्वन् मम साक्षात् तेषामाचारो रज-
स्वलात्वस्याशौचेन तुल्य आसीत्। अतो देशे तैः स्रावितस्य शोणितस्य १८
स्वगर्हणीयविग्रहै र्देशाशौचोत्पादनस्य च हेतुनाहं तेषामुपरि निज-
रोषम् अवतारितवान्। तांश्च जातीनां मध्ये विकीर्णवान् देशेषु च १९
विच्छिन्नवान् तेषां यादृश आचारो यादृश्यश्च क्रियास्तादृशं विचारं
कृतवान्। ते च यासां मध्यं गतास्तासां जातीनां मध्यं गत्वैव मम २०
पवित्रं नामापवित्रं कृतवन्तः, यतस्तानुद्दिश्य जनैरुक्तं, अमी सदाप्रभोः
प्रजास्तस्यैव देशान्निष्क्रान्ताश्च। तथापीस्रायेल्कुलस्य जना यत्र गतास्तत्र २१
जातीनां मध्ये तैरपवित्रीकृतस्य मदीयपवित्रनाम्नो हेतुनाहं दयार्द्रो
जातः। अतस्त्वम् इस्रायेलः कुलं वद, प्रभुः सदाप्रभुरित्थमाह, २२

भो इस्रायेल्कुलाहं न कुर्व्वे युष्मत्कृते क्रियां।
यत्र गत्वा तु युष्माभि र्जातीनां तत्र मध्यतः।
अपवित्रीकृतस्यैव पुण्यनाम्नः कृते मम॥
यासां मध्ये तु युष्माभिरपवित्रीकृतं हि तत्। २३
जातीनां मध्यतस्तासामपवित्रीकृतं मम।
महानाम करिष्यामि पवित्रं पुनरप्यहं॥
तासां साक्षाच्च युष्मासु मत्पुण्यत्वप्रकाशनात्।
यत् सदाप्रभुरेवाहं तत् ता ज्ञास्यन्ति जातयः।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः॥
जातीनां मध्यतो युष्मान् उद्धरिष्याम्यहं पुनः। २४
युष्मांश्च संग्रहीष्यामि देशानां मध्यतस्तदा।

युष्मद्देशे करिष्यामि युष्मांश्चोपस्थितान् पुनः ॥
२५ युष्मान् सेक्ष्यामि शुच्यद्भिः शुचयश्च भविष्यथ।
अशौचादेव सर्व्वस्माद् युष्माकञ्च कुविग्रहात्।
सर्व्वस्मात् प्रकरिष्यामि युष्मान् सम्यक् शुचीनहं ॥
२६ नूतनञ्च प्रदास्यामि युष्मभ्यं हृदयं तदा।
नूतनं स्थापयिष्यामि चात्मानं युष्मदन्तरे ॥
हृदयं दवयिष्यामि युष्मद्देहाच्छिलामयं।
मांसमयञ्च दास्यामि युष्मभ्यं हृदयं तदा ॥
२७ स्थापयिष्यामि चात्मानं मामकं युष्मदन्तरे।
करिष्यामि तथा चाहं यथा कुर्य्यात मे विधीन्।
मत्सूत्राणि च रक्षेत कर्म्मणा पालयेत च ॥
२८ पितृभ्यो वो मया दत्ते देशे यूयञ्च वत्स्यथ।
मामकीनप्रजा यूयं तदानीञ्च भविष्यथ।
स्वयञ्चाहं भविष्यामि तदा युष्माकमीश्वरः ॥
२९ सर्व्वाशौचाच्च युष्माकं संविधास्यामि तारणं।
गोधूमांश्च समाहूय करिष्यामि सुपुष्कलान्।
न च युष्मासु दुर्भिक्षम् अर्पयिष्यामि भारवत् ॥
३० वृक्षाणां वर्धयिष्यामि क्षेत्राणाञ्च फलान्यहं।
न भोक्ष्यध्वे च दुर्भिक्षाज्जातीनां धिक्क्रियां पुनः ॥
३१ स्वकुमार्गान् अभद्रांश्च क्रिया यूयं स्मरिष्यथ।
स्वपापै र्घृण्यदोषैश्च गर्हिष्यध्वे स्वदृष्टितः ॥
३२ न युष्माकं कृते कार्य्यं कुर्व्वे तज्ज्ञातुमर्हथ।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः।
इस्रायेल्कुल लज्जस्व निजाचाराद् विषीद च ॥
३३ भाषते भारतीमेतां प्रभुरेव सदाप्रभुः।
सर्व्वेभ्यो वोऽपराधेभ्यो यदा युष्मान् पुनाम्यहं।
तदानीं पूरयिष्यामि नगराणि निवासिभिः।
निर्म्मितानि भविष्यन्ति समुच्छिन्नस्थलानि च ॥
३४ यो देशः सर्व्वपान्थानां साक्षाद् ध्वंसस्थलं कृतः।
तस्मिंश्च ध्वंसिते देशे कृषिकर्म्म प्रसेत्स्यति ॥
३५ ते वक्ष्यन्त्येदनुद्यानतुल्याभूद् ध्वस्तभूरियं।

उच्छिन्ना ध्वंसिताः पुर्य्यः पुरा चोन्मूलिता इमे।
पश्येदानीं दृढीभूताः पूर्णाः सन्ति निवासिभिः॥
ये जनाः परजातीयाः शेक्ष्यन्ते वः समन्ततः। ३६
ते विज्ञायिष्यते चेदम् अहमेव सदाप्रभुः।
उन्मूलितस्य निर्म्माता ध्वंसस्थाने च रोपकः।
योऽहं सदाप्रभुः सोऽहं वच्म्युक्तं साधयामि च॥
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः। ३७
अहं तेषां कृते कार्य्यं साधयेयमिदं यथा।
इस्रायेलः कुलेनेदं प्रयाचिष्ये तथा पुनः।
नरमेषधनानीव वर्द्धयिष्यामि तानहं॥
पूतमेषव्रजेनेव पर्व्वसु यिरूशालमः। ३८
व्रजेनेव भविष्यन्ति परिपूर्णा नरव्रजैः।
ध्वस्ताः पुर्य्यो जना माञ्चाभिज्ञास्यन्ति सदाप्रभुं॥

---

३७ सप्तत्रिंशोऽध्यायः।

१ शुष्कास्थ्नां दृष्टान्तः ११ इस्रायेलो नैराश्यहरणं १५ यिहूदेस्रायेलो मैलनं २० ख्रीष्टस्य राज्यमधि चेमप्रतिज्ञा च।

सदाप्रभो र्हस्तो मय्यर्पितोऽभूत् सदाप्रभोरात्मना च मां वहि र्नीत्वा १
समस्थल्या मध्य निदधाय साचास्थिभिः पूर्णासीत्। स च मां सर्व्वदिक्षु २
तेषां सान्निध्येन गमयामास, तानि च पश्यातीव बहूनि समस्थल्याः
एष्ठेऽविद्यन्त, पश्यातीव शुष्काणि चासन्। अपरं स मां जगाद, भो ३
नरसन्तान, इमान्यस्थीनि किं जीविष्यन्ति? तदा मयोक्तं भो प्रभो
सदाप्रभो, भवांस्तज्जानीते। ततः स मां जगाद, त्वमिमान्यस्थीन्यधि ४
भावोक्तिं व्याहर तानि च वद, भो शुष्काण्यस्थीनि, सदाप्रभो र्वाक्यं
शृणुत, प्रभुः सदाप्रभुरिमान्यस्थीन्युद्दिश्येत्थमाह, पश्याहं युष्मन्मध्यमा- ५
त्मानं प्रवेशयिष्यामि तेन यूयं जीविष्यथ। अहञ्च युष्मासु शिरा यो- ६
जयिष्यामि मांसमुत्पादयिष्यामि युष्माकमुपरि च त्वचं तनिष्यामि,
युष्मन्मध्य आत्मानं निधास्यामि च तेन यूयं जीविष्यथ, अहञ्च यत्
सदाप्रभुस्तदभिज्ञास्यथ। अतोऽहं यथादिष्टस्तथा भावोक्तिं व्याहृत- ७
वान्। मम भावोक्तिव्याहरणकाले शब्दो जातस्ततः पश्चोद्वेगोऽभूत्

८ तान्यस्थीनि च परस्परम् अमिलन्। अपरं मया निरीक्ष्य तेषु शिरा
दृष्टा मांसञ्चोदपादि तेषामुपरि च त्वगतानि, परन्तु तेषामन्तर आत्मा
९ नासीत्। अपरं स मां जगाद, त्वमात्मानमुद्दिश्य भावोक्तिं व्याहर,
भो नरसन्तान, भावोक्तिं व्याह,र आत्मानमुद्दिश्येदं वद च, प्रभुः सदा-
प्रभुरित्यमाह, भो आत्मन्, चतुर्भ्यो वायुभ्य आगत्य तेषां हतानां
१० जनानां मध्यं धम, तेन ते जीविष्यन्ति। ततोऽहं यथादिष्टस्तथा भा-
वोक्तिं व्याहृतवान्, तदात्मा तान् प्रविष्टस्ते च जीवनं प्रापुरतीव महती
वाहिनी भूत्वा स्वचरणैस्तस्थुश्च।
११ अपरं स मां जगाद, भो नरसन्तान, अस्थीनीमानि कृत्स्नम् इस्रा-
१२ येलः कुलं। पश्य ते वदन्ति, अस्माकमस्थीनि शुष्कीभूतान्यस्माकम् आ-
श्वासश्च नष्टः, उच्छिन्ना एव वयं। अतस्त्वं भावोक्तिं व्याहर, तांश्च वद,
प्रभुः सदाप्रभुरित्यमाह, पश्यताहं युष्माकं शवागाराण्युद्घाटयिष्यामि,
भो मत्प्रजाः, युष्मच्छवागारेभ्यश्च युष्मान् उत्थापयिष्यामि युष्मान् इस्रा-
१३ येल्देशं नेष्यामि च। मया युष्मच्छवागाराणाम् उद्घाटनाद्, भो मत्प्रजाः,
युष्मच्छवागारेभ्यो युष्माकमुत्थापनाच्चाहं यत् सदाप्रभुरस्मि तद् यूयं
१४ ज्ञास्यथ। अहञ्च युष्मन्मध्ये मदीयात्मानं निधास्यामि युष्मद्देशे च
युष्मान् अवस्थापयिष्यामि, तेन योऽहं सदाप्रभुः सोऽहं वच्म्युक्तं साध-
यामि च तद् यूयं ज्ञास्यथेति सदाप्रभुराह।
१५ पुनश्च सदाप्रभो र्वाक्यं मां प्रति प्रादुरभूत्, यथा, भो नरसन्तान,
१६ त्वं काष्ठखण्डमेकमादाय तत्र लिख, यिहूदास्तत्सखीनाम् इस्रायेलः
सन्तानानाञ्चेति। पुनश्च काष्ठखण्डमेकमादाय तत्र लिख, यूषफस्य,
१७ इफ्रयिमस्तत्सख्युः कृत्स्नस्येस्रायेल्कुलस्य चायं काष्ठखण्ड इति। अपरं
१८ स्वार्थं तौ मिथः संयोज्यैकं काष्ठं कुरु, तव करे च तावेकीभवतां। यदा
च तव जातेः सन्तानास्त्वां प्रक्ष्यन्ति, अत्र तव किं तात्पर्य्यं तत् किमस्मान्
१९ न ज्ञापयिष्यसि? तदा त्वं तान् वद, प्रभुः सदाप्रभुरित्यमाह, पश्यत,
इफ्रयिमो हस्ते यूषफस्य यः काष्ठखण्डो विद्यते तं तत्सखीन् इस्रायेलो
वंशांश्चाहमादास्यामि तांश्च तस्मिन् योजयित्वा यिहूदाः काष्ठखण्डेन
सह संयोजयिष्यामि तांश्चैकं काष्ठखण्डं करिष्यामि च मम हस्ते ते
चैकीभविष्यन्ति।
२० तयोश्च ययोः काष्ठखण्डयोस्त्वं लेखिष्यसि तौ तेषां साक्षात् तव हस्ते
२१ तिष्ठतां। त्वञ्च तान् वद, प्रभुः सदाप्रभुरित्यमाह, पश्येस्रायेलः सन्ताना

यासां मध्ये यातायातं कुर्व्वते तासां जातीनां मध्यादहं तान् आदाय
चतुर्द्दिग्भ्यः सङ्गृह्य तेषां देशं नेष्यामि तत्र देशे इस्रायेलः पर्व्वतेषु २२
तान् एकां जातिं करिष्यामि एकश्च राजा तेषां सर्व्वेषां राजा भवि-
ष्यति; ते न पुन र्द्वे जाती भविष्यन्ति न वा पुन र्द्वे राज्ये भूत्वा विभ-
क्ष्यन्ते। न च स्वप्रतिमाभि र्घृण्यविग्रहै र्वा सर्व्वेण स्वीयाधर्म्मेण वा २३
पुनरशुचीभविष्यन्ति, ते च यत्र पापं कृतवन्तस्तेषां तस्मात् सर्व्ववास-
स्थानादहं तान् तारयिष्यामि शुचीकरिष्यामि च, तेन ते मम प्रजा
भविष्यन्त्यहञ्च तेषामीश्वरो भविष्यामि। मम दासो दायूद् च तेषां २४
राजा भविष्यति, तेषां सर्व्वेषाञ्चैकः पालको भविष्यति, ते च मम शास-
नान्याचरिष्यन्ति मम विधीन् रक्षिष्यन्ति कर्म्मणा च पालयिष्यन्ति। मम २५
दासाय याकूबे मया दत्ते यस्मिन् देशे युष्माकं पूर्व्वपुरुषा न्यवसंस्तस्मिन्
देशे ते जना वत्स्यन्ति, ते च तेषां पुत्त्राः पौत्त्राश्चानन्तकालं तत्र वत्स्य-
न्ति मम दासो दायूद् चानन्तकालं तेषाम् अधिपति र्भविष्यति। अहञ्च २६
तेषां कृते शान्ते र्नियमं स्थापयिष्यामि, स तेषाम् अनन्तकालीनो नियमो
भविष्यति। अहञ्च तान् स्थापयिष्यामि वर्धयिष्यामि च, अनन्तकाला-
र्थञ्च मदीयधर्म्मधाम तेषां मध्ये स्थापयिष्यामि। ममावासश्च तेषामुप- २७
रिष्टाद् अवस्थास्यते, अहञ्च तेषामीश्वरो भविष्यामि ते च मम प्रजा
भविष्यन्ति। अहं सदाप्रभुर्यदिस्रायेलः पवित्रकारी तत् तेषां मध्ये २८
मदीयधर्म्मधाम्नोऽनन्तकालीनावस्थितितः परजातीयै र्ज्ञायिष्यते।

---

३८ अष्टत्रिंशोऽध्यायः।

१ गोगस्य सैन्यसामन्तकथनं ८ इस्रायेल्देशाक्रमणकथनं १४ तस्य भाविदण्डस्य वचनञ्च।

अपरं सदाप्रभो र्वाक्यं मां प्रति प्रादुरभूत्, यथा, भो नरसन्तान, त्वं १
रोषस्य मेशकस्य तूबालस्य चाधिपतिं मागोगदेशीयं गोगं प्रति स्थिर- २
दृष्टिं विधाय तस्य प्रतिकूलां भावोक्तिं व्याहर। त्वञ्च वद, प्रभुः सदा- ३
प्रभुरित्थमाह।

रोष-मेषक-तूबालजातीनां जननायकः।
यस्त्वं गोगोऽहमेव त्वां पश्चाक्रमितुमुद्यतः॥
त्वां परिवर्त्तयिष्याम्यङ्कुशं दत्त्वा हन्वो तव। ४

त्वाञ्च निर्गमयिष्यामि तव सर्व्वबलानि च।
अश्वान् योद्धृन् हयारूढान् सर्व्वान् सिद्धपरिच्छदान्।
फलकचर्म्मधाराणाम् असिपाणिं महासभां॥
५ पारसकूशपूतीया जनास्तेषां हि सङ्गिनः।
फलकैस्ते शिरस्त्रैश्च सन्ति सर्व्वे सुसज्जिताः॥
६ गोमर् सर्व्वे च तत्सङ्घा उत्तरान्तनिवासि च।
तोगर्म्मीयकुलं सर्व्वैः स्वीयसङ्घैः समन्वितं।
त्वया सार्द्धं भविष्यन्ति जातयो बहुसङ्ख्यकाः॥
७ सुसज्जीभव सर्व्वञ्च सुसज्जीकुरु यत्नतः।
त्वं सर्व्वे त्वत्समाजाश्च समायातास्त्वदन्तिकं।
त्वं तेषां सकलानाञ्च रक्षणेऽधिकृतो भव॥
८ अतीते दीर्घकाले हि निर्णयस्ते करिष्यते।
वर्षाणां परिणामे त्वम् इमं देशं प्रवेक्ष्यसि॥
असितः पुनरानीतं महाजातिभ्य उद्धृतं।
इस्रायेलो गिरीनेतानुच्छिन्नान् चिरकालतः॥
तज्जना वहिरानीता जातीनां मध्यतः पुनः।
सकला हि निवत्स्यन्ति तदानीमकुतोभयाः॥
९ त्वञ्चोदेष्यसि झञ्झावद् आगमञ्च करिष्यसि।
देशाच्छादनकारी वा मेघवत् प्रतिभास्यसि।
त्वं सर्व्वे तव सङ्घाश्च सहिता भूरिजातिभिः॥
१० भाषते भारतीमेतां प्रभुरेव सदाप्रभुः।
दिन तस्मिन्नुदेष्यन्ति तवान्तःकरणे कथाः।
अनिष्टस्य च सङ्कल्पं त्वं तदा कल्पयिष्यसि॥
११ त्वं वक्ष्यस्याक्रमिष्यामि देशं तं ग्रामपूरितं।
जनान् प्राप्स्यामि तान् शान्तान् सर्व्वान् निर्भयसेविनः।
वसतोऽकृतप्राचीरानर्गलद्वारवर्जितान्॥
१२ त्वं धनं लुण्ठितं लोप्त्रं सङ्ग्रहीतुञ्च चेष्टसे।
चिरोच्छिन्नेषु वासेषु जातिमध्यत उद्धृते।
लब्धपश्वादिवित्ते च धरिणीनाभिवासिनि।
कर्त्तुं जनसमाजे त्वं यतसे च करार्पणं॥
१३ शिवा दिदांश्च तर्शीशो वणिजः सर्व्व एव च।

तस्य बालमृगेन्द्राश्च त्वां वदिष्यन्ति कथामिमां॥
त्वं किं लुण्ठितुमायातो लोप्त्रार्थं कृतमेलकः।
स्वर्णरूप्याणि संहर्त्तुं ग्रहीतुं पशुवैभवं।
गरिष्ठान्येव लोप्त्राणि लुण्ठितं त्वं किमागतः॥

अतो हेतोः, भो नरसन्तान, त्वं भावोक्तिं व्याहर, गोगञ्च वद, १४
प्रभुः सदाप्रभुरित्यमाह, तस्मिन् दिने यदा मम प्रजावृन्द इस्रायेल्
निर्भयं वत्स्यति तदा किं न त्वं तज्ज्ञास्यसि? तदा त्वं स्वस्थानाद् उत्तर- १५
दिशः प्रान्ताद् आयास्यसि, भूरिजातयश्च सर्व्वा हयानारुह्य महा-
समाजो महासेना च भूत्वा त्वया सार्द्धम् आयास्यन्ति। त्वञ्च मम १६
प्रजावृन्दस्येस्रायेलो विरुद्धं प्रगच्छन् मेघ इव देशमाच्छादयितुमुद्यतो
भविष्यसि; कालपरिणामे त्वमुद्भविष्यसि; भो गोग, परजातीय-
जनानां साक्षान्मया त्वयि स्वपवित्रतायाः प्रतिपादनात् ते यथा
मां जानीयुस्तदर्थमहं त्वां मम देशं प्रवेशयिष्यामि। प्रभुः सदाप्रभु- १७
रित्यमाह, अहं युष्मत्प्रतिकूलं तमानेष्यामीति वाक्यमहं प्राक्काले
यमुद्दिश्य निजदासैरिस्रायेलीयभाववादिभिस्तत्काले बहुवत्सरान् या-
वद् भावोक्तिं व्याहरद्भिः कथितवान् किं न त्वमेव स जनोऽसि?
अतो यस्मिन् दिने गोग इस्रायेल्देशमागमिष्यति तस्मिन् दिने मम १८
नासिकायां कोपानल उद्भविष्यतीति प्रभोः सदाप्रभोरुक्तिः। अहञ्च १९
निजेर्ष्यया निजामर्षानलेन च वदामि,

भविष्यति महाकम्प इस्रायेल्भुवि तद्दिने॥
कम्पिष्यन्ते च मत्साक्षान्मत्स्याः सागरवासिनः। २०
पक्षिणो गगनस्थाश्च जीविनो वनचारिणः॥
भूमौ ये च विसर्पन्ति सकलास्ते सरीसृपाः।
भूतले वर्त्तमानाश्च सकला एव मानवाः॥
भूध्रा उत्पाटयिष्यन्ते पतिष्यन्ति शिलोच्चयाः।
प्राचीराणि च सर्व्वाणि निपतिष्यन्ति भूतले॥
कृपाणं तद्विरुद्धञ्चाह्वास्यामि स्वगिरिष्वहं। २१
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः।
जनस्यासिश्च तद्भ्रातुः प्रतिकूलो भविष्यति॥
विवदिष्ये समं तेन मार्य्याहं शोणितेन च। २२
तस्य तदीयसङ्घानां सङ्गिजातिगणस्य च।

उपरिष्टादहं वृष्टिं वर्षयिष्यामि सिन्धुवत् ।
करकासारमग्निञ्च गन्धकेन समन्वितं ॥
२२ प्रत्यक्षं भूरिजातीनां स्वमहत्त्वपवित्रते ।
प्रतिपाद्य प्रदास्येऽहं ताभ्यः परिचयं तदा ।
यत् सदाप्रभुरेवाहं ताभि र्ज्ञायिष्यते च तत् ॥

---

३९ ऊनचत्वारिंशोऽध्यायः ।

१ गोगस्य भाविदण्डस्य कथनं ८ इस्रायेलो जयः ११ गोगस्य श्मशाननिर्णयः १७ पक्षिभिः शवभोजनं २५ इस्रायेलः स्वदेशे मिलनस्य भाविवाक्यञ्च ।

१ त्वञ्च भो नरसन्तान, गोगस्य प्रतिकूलां भावोक्तिं व्याहरन् वद, प्रभुः
सदाप्रभुरित्थमाह,

रोष-मेशक-तूबालजातीनां जननायकः ।
यस्त्वं गोगोऽहमेव त्वां पश्चाक्रमितुमुद्यतः ॥
२ त्वां परिवर्त्तयिष्यामि त्वाञ्च नेष्याम्यहं वहिः ।
उत्तरप्रान्ततश्च त्वां करिष्यामि समुद्गतं ।
इस्रायेलो गिरीनेव त्वाञ्च नेष्याम्यहं तदा ॥
३ कोदण्डं च्यावयिष्याम्याहत्य त्वद्वामहस्ततः ।
तव दक्षिणहस्ताच्च पातयिष्यामि ते शरान् ॥
४ इस्रायेलो गिरिष्वेव निपातः सम्भविष्यति ।
तव त्वत्सर्व्वसङ्घानां सङ्गिजातिगणस्य च ॥
सर्व्वजातीयपक्षिभ्यो विष्किरेभ्यो वनस्य च ।
सर्व्वस्मै श्वापदायाहं त्वां प्रदास्यामि भक्ष्यवत् ॥
५ त्वं पतिष्यसि भूपृष्ठे यतोऽहं प्रोक्तवानिदं ।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः ॥
६ अग्निं मागोगमध्ये च ये द्वीपेषु वसन्ति च ।
निश्चिन्ता मानवास्तेषां मध्ये क्षेप्स्याम्यहं तदा ।
यत् सदाप्रभुरेवाहं तद् विज्ञास्यन्ति ते जनाः ॥
७ मम प्रजा य इस्रायेल् अहं तस्यैव मध्यतः ।
परिज्ञातं करिष्यामि पवित्रं मम नाम च ।
नापवित्रीकरिष्यामि पवित्रं नाम मे पुनः ॥

इस्रायेलि पवित्रस्य यत् सदाप्रभुरस्म्यहं।
मनुष्याः परजातीया अभिज्ञास्यन्ति तत् तदा॥
एतत् पश्य समायाति पश्य सिद्धिमवाप्स्यति। ८
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः।
मया यच्च प्रतिज्ञातम् एतदेवास्ति तद् दिनं॥

इस्रायेलो नगराणां निवासिनो जनाश्च तदा निर्गमिष्यन्ति वर्म्म- ९
चर्म्मफलकधनुःशरयष्टिशूलैश्चाग्निं दाहञ्च विधास्यन्ति, सप्तवर्षांश्च
तैरेवाग्निं ज्वालयिष्यन्ति। ते न क्षेत्रादिन्धनान्यादास्यन्ते न वा वन्य- १०
तरून् कर्त्तिष्यन्ति परन्तु तया युद्धसज्जयाग्निं ज्वालयिष्यन्ति, यैश्च
मूषिता अभवंस्तान् मोषिष्यन्ति ये च तेषां सम्पत्तिमपहृतवन्तस्तेषां
सम्पत्तिमपहरिष्यन्तीति प्रभोः सदाप्रभोरुक्तिः।

तस्मिन् दिनेऽहम् इस्रायेलि गोगाय शवनिखननस्थानं प्रदास्यामि ११
समुद्रपारस्था पान्थानामुपत्यका तत् स्थानं, तच्च पान्थान् बद्धमुखान्
करिष्यति; तत्र गोगस्य कृत्स्नस्य च तदीयजनयूथस्य शवा जनै र्निखा-
निष्यन्ते तत्स्थानस्य नाम च गे-हामोन-गोगोऽर्थतो गोगीयजनयूथ-
स्योपत्यकेत्यभिधायिष्यते। इस्रायेलकुलञ्च देशशौचार्थं तेषां शव- १२
निखनने सप्तमासान् यापयिष्यति। देशस्य सर्व्वे जनाश्च शवान् १३
निखनिष्यन्ति, यस्मिन् दिनेऽहं स्वप्रतापं प्रतिपादयिष्यामि तस्मिन् दिने
च तत् कर्म्म तेषां यशस्करं भविष्यतीति प्रभोः सदाप्रभोरुक्तिः। तैश्च १४
नित्यनियुक्तपुरुषाः पृथक् कारिष्यन्ते, ते देशं पर्य्यटिष्यन्ति पर्य्यटन-
कारिणां सङ्गिनो वा भूत्वा भूपृष्ठेऽवशिष्टान् शवान् देशशौचार्थं
निखनिष्यन्ति, सप्तमासान्तेऽप्यनुसन्धानं विधास्यन्ति। तेषां देशपर्य्यटन- १५
कारिणां केनचित् पर्य्यटनकाले मानवास्थ्नि सन्दृष्टे तत्पार्श्वे चिह्नं
स्थापयिष्यते, ततः परं निखननकारिणस्तद् गे-हामोन-गोगं नीत्वा निख-
निष्यन्ति। पुर्य्या एकस्या अपि हामोनेति नाम भविष्यति; इत्थं १६
देशस्तैः शुचीकारिष्यते।

त्वाञ्च, भो नरसन्तान, प्रभुः सदाप्रभुरित्थमाह, त्वं सर्व्वजातीय- १७
पक्षिणः सर्व्वान् वन्यजीविनश्च वद,

मिलित्वा यूयमायात समायात चतुर्द्दिशः।
मम यज्ञमुपायातेस्रायेलो भूधरावलौ।
महायज्ञं विधास्यामि युष्मदर्थमहं यतः।

तत्राशिष्यथ मांसञ्च शोणितञ्च प्रपास्यथ ॥
१८ वीराणामेव मांसञ्च तत्र यूयमशिष्यथ।
मेदिन्यधिपतीनाञ्च रुधिरं तत्र पास्यथ ॥
सर्व्वे वाशनदेशीयाः पशवः पीवरीकृताः।
एडका वर्करास्छागा वृषा वा प्रतिभान्ति ते ॥
१९ तत्र मामकयज्ञे च युष्मदर्थं मया कृते।
यूयं सन्तृप्तिपर्य्यन्तं मेदः सम्भक्षयिष्यथ।
उन्मादप्राप्तिपर्य्यन्तं रुधिरञ्च प्रपास्यथ ॥
२० मम भोजनमञ्चे च तप्स्यथ परिवेषितैः।
वाजिभी रथिभि र्वीरैः सर्व्वरूपैश्च योद्धृभिः।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः ॥
२१ जातिष्वहं करिष्यामि प्रतिपन्नं स्वगौरवं।
विचारं म कृतं तेषु हस्तक्षेपञ्च मत्कृतं।
सकलाः परजातीयास्तदा द्रक्ष्यन्ति मानवाः ॥
२२ तद्दिने तस्य पश्चाच्चेस्रायेलीयकुलस्य च।
जना ज्ञास्यन्ति मामेव स्वकीयेशं सदाप्रभुं ॥
२३ इस्रायेलः कुलं यच्च स्वापराधात् प्रवासितं।
मनुष्याः परजातीया अभिज्ञास्यन्ति तत् तदा ॥
अकार्षुस्तज्जना यस्मान्मां प्रत्यौचित्यलङ्घनं।
मामकीनाननं तेभ्योऽहं समाच्छादयं ततः ॥
तेषां द्वेषिमनुष्याणां हस्ते तांश्च समार्पयं।
ततस्ते सकला एव न्यपतन्नसिना हताः ॥
२४ अशौचं यादृशं तेषाम् असाधुत्वञ्च यादृशं।
व्यवहारमकार्षुश्च ते जनैः सह तादृशं।
मामकीनाननं तेभ्योऽहं समाच्छादयं ततः ॥
२५ अतो हेतोरिदं वाक्यं प्रभुराह सदाप्रभुः।
प्रत्यानेष्यामि याकूबोऽधुना वन्दिजनानहं ॥
करुणाञ्च विधास्यामि कृत्स्नेस्रायेल्कुलं प्रति।
कृते मत्पुण्यनाम्नश्च भविष्यामि प्रयत्नवान् ॥
२६ भोक्ष्यन्ते स्वापराधञ्च सर्व्वञ्चौचित्यलङ्घनं।
येन लङ्घितवन्तस्ते स्वौचित्यं मद्विरुद्धतः ॥

यतः स्वकीयदेशे ते निवत्स्यन्त्यकुतोभयं।
तानुद्वेजयितुं कोऽपि तदानीं न भविष्यति॥
ज्ञातीनां मध्यतोऽहं तान् आनेष्यामि स्वयं पुनः। २७
अरातीनाञ्च देशेभ्यः सङ्ग्रहीष्यामि तानहं॥
परजातीयलोकानां भूयिष्ठानाञ्च सम्मुखे।
प्रतिपन्नां करिष्यामि तेषु स्वीयपवित्रतां॥
ते ज्ञास्यन्ति च मामेव स्वकीयेशं सदाप्रभुं। २८
यतोऽग्रे परजातीनां मध्ये निर्वास्य तानहं।
तेषां देशे समानीय सङ्ग्रहीष्यामि तान् पुनः।
न तेषां शेषयिष्यामि विदेशे तत्र कञ्चन॥
न च प्रच्छादयिष्यामि पुनस्तेभ्यो निजाननं। २९
इस्रायेलः कुले यस्मात् स्वात्मानं सिक्तवानहं।
भाषते भारतीमेतां प्रभुरेव सदाप्रभुः॥

---

४० चत्वारिंशोऽध्यायः।

१ पवित्रस्थानदर्शनं ६ पूर्व्वद्वारकथनं १७ वहिःप्राङ्गणकथनं २० उत्तरीयद्वार-कथनं २४ दक्षिणद्वारकथनं २८ अन्तःप्राङ्गणस्य दक्षिणद्वारकथनं ३५ उत्तर-द्वारकथनं ३८ अष्टमञ्चानां कथनं ४४ कोष्ठकथनं ४८ अलिन्दकथनञ्च।

अस्माकं निर्व्वासस्य पञ्चविंशे वर्षे वत्सरस्याद्यमासस्य दशमदिनेऽर्थतो १
नगरनिपातनात् परं चतुर्द्दशवत्सरस्योक्तदिने सदाप्रभो र्हस्तो मय्यर्पि-
तोऽभूत् स च मां तत् स्थानमनैषीत्। स माम् ईश्वरीयदर्शनैरिस्रा- २
येल्देशं नीत्वातीवोच्चे पर्व्वते निहितवान् तस्योपरि च दक्षिणदिशि
नगरस्येव निर्म्मितिः प्रत्यभात्। स च मां तत् स्थानमनैषीत्, तत्र तैज- ३
सस्येवाभाविशिष्ट एको नर आसीत्, तस्य हस्ते कार्पासनिर्म्मिता
रज्जुः परिमाणार्थको नलश्चाविद्येतां स च गोपुरेऽतिष्ठत्। स पुरुषो ४
माम् अवादीत्, भो नरसन्तान, अहं त्वां यद्यत् प्रदर्शयिष्यामि तत्
सर्व्वं त्वं चक्षुर्भ्यां निरीक्षस्व कर्णाभ्यां शृणु तत्र मनो निधत्स्व च, यतस्त्वां
यथा तत् प्रदर्शयेयं तदर्थ त्वमत्रानीतः। त्वया यद्यद् दर्शिष्यते तत्
सर्व्वम् इस्रायेल्कुलाय निवेद्यतां। अपरं मयादर्शि, गृहस्य वहिः परि- ५
तस्तद्वेष्टकम् एकं प्राचीरमासीत्, तस्य नरस्य करस्थितो माननलः
षड्हस्तपरिमितस्तेषामेकैको हस्तश्च मुष्ट्यधिकहस्तमान आसीत्, स

च तस्या निर्म्मित्या विशालतामेकं नलं तस्या उच्चताञ्चैकं नलममासीत्।
६ अपरं स पूर्व्वाभिमुखं गोपुरमागत्य तस्य सोपानैरारुह्य गोपुरस्य
शिलाम् अमासीत्, तस्या विशालता नलैकपरिमिता, प्रथमशिलाया
७ एव विशालता नलैकपरिमिता। प्रतीहारवासायाश्च दीर्घता नलैकमाना
विशालता च नलैकमाना; वासानाञ्चान्तरालं पञ्चहस्तपरिमितं, अभ्य-
न्तरे गोपुराग्रस्थितस्यालिन्दस्य पार्श्वे गोपुरस्य शिला नलैकपरिमिता-
८ सीत्। अपरं स गोपुरस्यालिन्दम् अन्तरेकं नलममासीत्। पुनः स
९ गोपुरस्यालिन्दम् अष्टहस्तान् तस्योपस्तम्भांश्च हस्तद्वयममासीत् स गो-
१० पुरस्यालिन्दोऽन्तः स्थितः। पूर्व्वाभिमुखगोपुरस्य प्रतीहारवासा एक-
स्मिन् पार्श्वे तिस्रोऽपरस्मिन् पार्श्वे च तिस्र आसन्, तिसृणामेकं परि-
११ माणमासीत् उपस्तम्भानाञ्चोभयोः पार्श्वयोरेकं परिमाणमासीत्। अपरं
स गोपुरप्रवेशस्थानस्य विशालतां दशहस्तान् अमासीत्, गोपु-
१२ रस्य दीर्घता तु त्रयोदशहस्तपरिमिता। प्रतीहारवासानामग्रे प्रान्त
आसीत् स एकहस्तपरिमितोऽपरस्मिन् पार्श्वेऽप्येकहस्तपरिमितः प्रान्त
आसीत्; वासा च षड्हस्तपरिमितापरस्मिन् पार्श्वेऽपि षड्हस्तपरि-
१३ मिता वासासीत्। स चैकवासापृष्ठादन्यवासापृष्ठपर्य्यन्तं परस्परम-
भिमुखाभ्यां तयो द्वाराभ्यां गोपुरस्य विशालतां पञ्चविंशतिहस्तान्
१४ अमासीत्। उपस्तम्भांश्च षष्टिहस्तान् अन्वमास्त, प्राङ्गणञ्च तेषामुप-
१५ स्तम्भानां सन्निकृष्टमासीत् तस्य तु परितो गोपुरमासीत्। प्रवेशार्थक-
गोपुरस्याग्रदेशाद् अभ्यन्तरगोपुरस्याग्रदेशपर्य्यन्तं पञ्चाशद्धस्तपरिमितं
१६ स्थानमासीत्। गोपुरस्याभ्यन्तरे वासानां तदीयोपस्तम्भानाञ्च परितो
जालबद्धानि वातायनान्यविद्यन्त। तद्वत् तासां मण्डपेष्वभ्यन्तरे परितो
वातायनानि, उपस्तम्भेषु खर्ज्जूराकृतयश्चाविद्यन्त।
१७ अपरं स मां वहिःप्राङ्गणमनैषीत्, तत्र पश्य कोष्ठानि शिलास्तर-
णञ्चाविद्यन्त, तत् प्राङ्गणस्य परितो निर्म्मितमासीत् तत्र शिलास्तरण-
१८ पार्श्वे त्रिंशत् कोष्ठान्यासन्। तच्च शिलास्तरणं गोपुराणां पश्चयो-
१९ र्गोपुराणां दैर्घ्यानुगाम्यासीत्, तन्निम्नतरं शिलास्तरणं। अपरं स
गोपुरस्य निम्नतराद् अग्रदेशाद् अभ्यन्तरप्राङ्गणस्याग्रदेशपर्य्यन्तं वहिः
पूर्व्वदिशमुत्तरदिशञ्च शतहस्तपरिमितां विशालताममासीत्।
२० अपरं स वहिः प्राङ्गणस्योत्तराभिमुखगोपुरस्य दीर्घतां विशालता-
२१ ञ्चामासीत्। तस्यैकस्मिन् पार्श्वे तिस्रोऽपरस्मिन् पार्श्वे च तिस्रो वासा

उपस्तम्भा मण्डपाश्चासन्। एतस्य गोपुरस्य परिमाणं प्रथमगोपुरस्य परिमाणेन तुल्यं, तस्य दीर्घता पञ्चाशद्धस्तपरिमिता विशालता च
पञ्चविंशतिहस्तपरिमितासीत्। पूर्व्वाभिमुखगोपुरपरिमाणवदेतस्यापि २२
वातायनानि मण्डपा खर्ज्जूराकृतयश्चासन्, जनाः सप्तसोपानैस्तचा-
रोहन्, तस्य मण्डपाश्च तेषां सम्मुखेऽविद्यन्त। उत्तरगोपुरस्य पूर्व्वगो- २३
पुरस्य च सम्मुखेऽन्तःप्राङ्गणगामि गोपुरमेकमासीत्। स एकगोपुरादपर-
गोपुरपर्य्यन्तं शतहस्तान् अमासीत्।

अपरं स मां दक्षिणदिशं गमयामास, तत्र च पश्य दक्षिणाभिमुखं २४
गोपुरमासीत्। स च तस्योपस्तम्भान् मण्डपांश्च पूर्व्वोक्तपरिमाण-
तुल्यानमासीत्। परितः पूर्व्वोक्तवातायनानां सदृशानि वातायनानि २५
तस्य तदीयमण्डपानाञ्चाविद्यन्त, तस्य दीर्घता पञ्चाशद्धस्तमाना वि-
शालता च पञ्चविंशतिहस्तमानासीत्। सप्तसोपानानि तस्यारोहणी, २६
तेषां सम्मुखे च तस्य मण्डपा आसन्, तदीयोपस्तम्भेष्वेकस्मिन् पार्श्वे
एकापरस्मिन् पार्श्वे चैकेत्यं द्वे खर्ज्जूराकृती तस्यास्तां। दक्षिणदिश्यन्तः- २७
प्राङ्गणस्यापि गोपुरमेकमासीत्। स च दक्षिणदिशि एकस्माद् गोपु-
रादपरगोपुरपर्य्यन्तं शतहस्तानमासीत्।

अपरं स मां दक्षिणगोपुरेणान्तःप्राङ्गणं प्रवेशयामास, स च पूर्व्वोक्त- २८
परिमाणानुरूपं तद् गोपुरममासीत्। तस्य वासा उपस्तम्भा मण्डपाश्च २९
पूर्व्वोक्तपरिमाणानुरूपा आसन्, परितश्च तस्य तदीयमण्डपानाञ्च वा-
तायनान्यासन्, तस्य दीर्घता पञ्चाशद्धस्तमाना विशालता च पञ्चविंश-
तिहस्तमानासीत्। परितश्च तस्य मण्डपा आसन्। तेषां दीर्घता पञ्च- ३०
विंशतिहस्ता विशालता च पञ्चहस्ताः। तस्य मण्डपा वहिःप्राङ्गणस्य ३१
पार्श्वे चाविद्यन्त, तस्योपस्तम्भेषु च खर्ज्जूराकृतय आसन्, अष्टसोपा-
नानि तस्यारोहणी।

अपरं स माम् अन्तःप्राङ्गणे दक्षिणदिशं नीत्वा पूर्व्वोक्तपरिमाणानुरूपं ३२
गोपुरम् अमासीत्। तस्य वासा उपस्तम्भा मण्डपाश्च पूर्व्वोक्तपरिमाणानु- ३३
रूपा आसन्, परितश्च तस्य तदीयमण्डपानाञ्च वातायनान्यासन्, तस्य
दीर्घता पञ्चाशद्धस्तमाना विशालता च पञ्चविंशतिहस्तमानासीत्। तस्य ३४
मण्डपा वहिःप्राङ्गणस्य पार्श्वे आसन्। तदीयोपस्तम्भेष्वेकस्मिन् पार्श्वे
एकापरस्मिन् पार्श्वे चैकेत्यं द्वे खर्ज्जूराकृती आस्तां, अष्टसोपानानि
च तस्यारोहणी।

३५ अपरं स माम् उत्तरदिक्स्थं गोपुरं नीत्वा पूर्व्वोक्तपरिमाणानुरूपं
३६ तदमासीत्। तस्यापि वासा उपस्तम्भा मण्डपाः परितश्च वातायना-
न्यासन्। तस्य दीर्घता पञ्चाशद्धस्तमाना, विशालता च पञ्चविंशति-
३७ हस्तमानासीत्। तस्योपस्तम्भा वहिःप्राङ्गणस्य पार्श्वेऽविद्यन्त, उपस्त-
म्भानाञ्चैकस्मिन् पार्श्वेऽपरस्मिन् पार्श्वे च खर्ज्जूराकृतय आसन्, अष्ट-
सोपानानि च तस्यारोहणी।
३८ परन्तूपस्तम्भानां समीपं गोपुराणां सद्वारम् एकमेकं कोष्ठमासीत्
३९ तत्र होमबलेः प्रक्षालनम् अक्रियत। गोपुरस्यालिन्दे चैकस्मिन् पार्श्वे द्वा-
वपरस्मिन् पार्श्वे च द्वौ मञ्चावास्तां तत्र होमबलिः पापार्थकबलिर्दो-
४० षार्थकबलिश्च न्यहन्यन्त। पुनश्च [गोपुरस्य] पक्षे वहिरर्थतो गोपुरप्रवे-
शस्थानस्यारोहण्या उत्तरपार्श्वे द्वौ मञ्चावास्तां, पुनर्गोपुरस्यालिन्दस्य
४१ पार्श्वे स्थिते द्वितीये पक्षे द्वौ मञ्चावास्तां। इत्थं गोपुरपक्षस्यैकस्मिन्
पार्श्वे चत्वारोऽपरस्मिन् पार्श्वे च चत्वारः साकल्येनाष्टौ मञ्चा आसन्
४२ तत्र बलयो न्यहन्यन्त। आरोहण्याश्च चत्वारो मञ्चा आसन् ते तक्षित-
पाषाणनिर्म्मिताः, तेषां दीर्घता सार्द्धैकहस्तमाना विशालता सार्द्धैक-
हस्तमाना, उच्चता च हस्तैकमानासीत्, तत्र होमार्थकादिबलीनां
४३ निहननोपयोग्यस्त्राणि निहितान्यानि। परितश्च मुष्ट्येकमानानि नाग-
दन्तयुग्मानि गृहकुड्ये प्रवेशितान्यासन्, मञ्चेषु च निवेदितमांसं
न्यधीयत।
४४ अन्तःप्राङ्गणेऽन्तःस्थगोपुरस्य वहि गायकानां कोष्ठान्यासन् तान्युत्तर-
गोपुरस्य पक्षे स्थितानि दक्षिणाभिमुखानि चासन्, पुनः पूर्व्वगोपुरस्य
४५ पक्ष उत्तराभिमुखमेकं कोष्ठमासीत्। अपरं स मां जगाद, ये याजका
गृहस्य रक्षणीयं रक्षन्ति, दक्षिणाभिमुखमिदं कोष्ठं तेषां भवि-
४६ ष्यति। ये च याजका यज्ञवेद्या रक्षणीयं रक्षन्ति, उत्तराभिमुखमिदं
कोष्ठं तेषां भविष्यति। लेविसन्तानानां मध्ये ये सदाप्रभोः परिचर्य्यायै
४७ तन्निकटवर्त्तिनो भवन्ति ते सादोकसन्तानास्ते जनाः। अपरं स प्राङ्गण-
ममासीत्, तच्चतुरस्रं, तस्य दीर्घता शतहस्तमाना विशालता च शत-
हस्तमानासीत्, स गृहस्याग्रे स्थितां यज्ञवेदिमप्यमासीत्।
४८ अपरं स मां गृहस्यालिन्दं नीत्वा तस्यालिन्दस्योपस्तम्भमेकस्मिन्
पार्श्वे पञ्चहस्तान् अपरस्मिन् पार्श्वे च पञ्चहस्तान् गोपुरस्य विशालताञ्चै-
कस्मिन् पार्श्वे त्रीन् हस्तान् अपरस्मिन् पार्श्वे च त्रीन् हस्तानमासीत्।

अलिन्दस्य दीर्घता विंशतिहस्तमाना विशालता चैकादशहस्तमाना- ४९
सीत्। यैः सोपानै र्जनास्तत्रारोहन्ति तेषां समीपं तदीयोपस्तम्भा
आसन् उपस्तम्भानां समीपञ्चैकस्मिन् पार्श्वे एकोऽपरस्मिन् पार्श्वे चैक
इत्थं द्वौ स्तम्भावास्तां।

---

४१ एकचत्वारिंशोऽध्यायः।

मन्दिरस्य परिमाणभागकोष्ठालङ्कारादीनां कथनं।

अपरं स मां प्रासादस्यान्तिकं नीत्वा तदीयोपस्तम्भावमासीत् दूष्यस्य १
विशालतायां तयो र्विशालता एकस्मिन् पार्श्वे षड्हस्तमानापरस्मिन्
पार्श्वे च षड्हस्तमानासीत्। प्रवेशस्थानस्य विशालता दशहस्तमाना, २
प्रवेशस्थानस्य पक्षयोरेक एकस्मिन् पार्श्वे पञ्चहस्तमान एकश्चापरस्मिन्
पार्श्वे पञ्चहस्तमान आसीत्। अपरं स तस्य दीर्घतां चत्वारिंशद्धस्तान्
विशालताञ्च विंशतिहस्तानमासीत्। ततः परं सोऽभ्यन्तरं प्रविश्य ३
प्रवेशस्थानस्योपस्तम्भं द्वौ हस्तौ प्रवेशस्थानञ्च षड्हस्तान् प्रवेशस्थानस्य
विशालताञ्च सप्तहस्तानमासीत्। अपरं स तस्य दीर्घतां विंशतिहस्तान् ४
प्रासादस्याग्रदेशे च तस्य विशालतां विंशतिहस्तानमासीत् माञ्चावादीत्
एतद् अतिपवित्रं स्थानं।

अपरं स गृहस्य कुड्यं षड्हस्तानमासीत्, गृहस्य सर्व्वदिक्षु च ५
पार्श्वस्थनिलयस्य विशालता समन्ताच्चतुर्हस्तमानासीत्। निलयानामेको ६
निलयोऽन्यस्योपरीत्थं तिस्रः श्रेण्य एकैकस्याञ्च त्रिंशन्निलया आसन्
तेषाञ्च निलयानामभ्यन्तरे गृहस्य पार्श्वे तेषामालम्बनार्थकमेकं कुड्य-
मासीत् तदेव ते प्राविशन् न तु गृहकुड्यालम्बिता आसन्। उच्चतानु- ७
क्रमाच्च निलयानां स्थानम् उत्तरोत्तरं विशालतरं [गृहस्य] वेष्टकञ्चा-
भवत्, यतस्तत् समन्ताद् उच्चाग्रपर्य्यन्तं गृहस्य वेष्टनमासीत् तस्माद्
उच्चतानुक्रमेण गृहपार्श्वे तदुत्तरोत्तरं विशालतरमभवत्। इत्थं निम्न-
तमश्रेणीतो मध्यश्रेण्योच्चतमश्रेणीपर्य्यन्तं आरोहोऽभवत्। मया च ८
गृहस्य परित एको मञ्चोऽदर्शि, निलयास्तस्योपरि स्थापिताः, स च
योगस्थानपर्य्यन्तं सम्पूर्णनलैकमानोऽर्थतः षड्हस्तमान आसीत्। तस्य ९
पार्श्वनिलयस्य यद् वहिःकुड्यं तत् पञ्चहस्तमानं, यच्च स्थानं [शून्यम्]
अशिष्यत तद् अभ्यन्तरे निलयानामेवाभ्यन्तरमासीत्। [निलयानां] १०

कोष्ठानाञ्च मध्ये चतुर्दिक्षु गृहस्य परितो विंशतिहस्तमाना विशा-
११ लतासीत्। पार्श्वस्थनिलयस्य प्रवेशस्थानं शून्यस्थानस्यान्तेऽविद्यत, एकं
प्रवेशस्थानमुत्तरदिशि, तदन्यत् प्रवेशस्थानञ्च दक्षिणदिश्यासीत्, परि-
तश्च शून्यस्थानस्य विशालता पञ्चहस्तमानासीत्।
१२ पश्चिमदिशि च व्यवच्छिन्नस्थलस्याग्रदेशे या निर्म्मितिरविद्यत तस्या
विशालता सप्ततिहस्तमाना परितश्च निर्म्मितिकुड्यस्य विशालता पञ्च-
१३ हस्तमाना दीर्घता च नवतिहस्तमानासीत्। पुनः स गृहस्य दीर्घताम-
मासीत् सा शतहस्तमाना, व्यवच्छिन्नस्थलं निर्म्मितिस्तदीयकुड्यानि
१४ चैतेषामपि दीर्घता शतहस्तमानासीत्। गृहस्य व्यवच्छिन्नस्थलस्य च
योऽग्रदेशस्तस्य विशालता पूर्व्वदिशि शतहस्तमानासीत्।
१५ इत्थं स व्यवच्छिन्नस्थलस्याग्रदेशे स्थिताया निर्म्मित्याः पश्चात् तस्या
दीर्घताम् उभयोः पार्श्वयोश्च तदीयवरण्डान् शतहस्तान् अन्तःप्रासादं
१६ प्राङ्गणस्यालिन्दांश्चामासीत्। परितस्त्रयाणां शिला जालबद्धवातायनानि
वरण्डाश्चासन्, शिलानान्तु सम्मुखे परितः काष्ठमयपत्राण्यासन्।
१७ [सर्व्वाण्येतानि] आवातायनाद् देशश्च बद्धवातायनानि प्रवेशस्थानस्यो-
र्द्ध्वदेशोऽन्तर्गृहं वहिर्दिक् कृत्स्नकुड्यञ्च समन्तादन्त र्वहि र्वा यद्यदासीत्
तत्साकल्यस्य प्रत्येकं निजपरिमाणं निरूपितमभवत्।
१८ किरूबाणां खर्ज्जूराणाञ्च शिल्पकर्म्माविद्यत, दयोः किरूबयो र्मध्ये
१९ खर्ज्जूरवृक्ष एक आसीत्, एकस्य च किरूबस्य द्वे मुखे आस्तां। एक-
पार्श्वस्थखर्ज्जूरं प्रति मानवमुखं, अपरपार्श्वस्थखर्ज्जूरं प्रति च सिंहमुख-
२० मासीत्, परितः कृत्स्नगृहमध्ये शिल्पकर्म्मेदमासीत्। समन्ताद् आभूमितः
प्रवेशस्थानस्योपरिभागपर्य्यन्तं किरूबा खर्ज्जूराश्च शिल्पिता आसन्,
२१ प्रासादस्य कुड्यमेतत्। प्रासादस्य द्वारदारूणि चतुरस्राण्यासन् पवित्र-
स्थानस्याग्रदेशस्याकृतिरप्येतस्या आकृतेः सदृश्यासीत्।
२२ वेदिः काष्ठनिर्म्मिता, तस्या उच्चता हस्तत्रयमाना, दीर्घता हस्त-
द्वयमाना, तस्याः कोणाः पादः पार्श्वाश्च काष्ठमयाः। अपरं स मां
२३ जगाद, अयं सदाप्रभोः सम्मुखवर्त्ती भोज्यमञ्चः। प्रासादस्य पवित्रस्था-
२४ नस्य च द्वे द्वारे आस्तां। एकैकद्वारस्य च द्वे शाखे आस्तां तयोश्चैकस्याः
शाखायाः परिवर्त्तमानौ द्वौ कपाटावपरस्याश्च शाखायाः परिवर्त्तमानौ
२५ द्वौ कपाटावास्तां। तेषु प्रासादीयकपाटेषु च शिल्पकर्म्मासीत्, अर्थतः
कुड्येषु यादृशास्तेष्वपि तादृशाः किरूबखर्ज्जूराः शिल्पिता आसन्,

वहिस्थालिन्दस्याग्रदेशे काष्ठमयी तिरस्करिण्यासीत्। अलिन्दस्य पक्षयो १६
र्गृहपार्श्वस्थनिलयेषु तिरस्करिणीषु च जालबद्धानि वातायनानि तदु-
भयपार्श्वयोश्च खर्ज्जूराकृतयोऽविद्यन्त।

---

४२ द्विचत्वारिंशोऽध्यायः।

१ याजकानां कोष्टानां कथनं १३ तत्कर्म्मकथनं १५ वहिःप्राङ्गणस्य परिमाण-कथनञ्च।

अपरं स माम् उत्तरदिशं वहिःप्राङ्गणं गमयित्वोत्तरदिशि व्यव- १
च्छिन्नस्थलस्य सम्मुखे निर्म्मितायाश्च सम्मुखे स्थितां कोष्ठश्रेणीमानैषीत्।
ममाग्रे तस्या दीर्घता शतहस्तमाना तद्द्वारमुत्तरदिशि तस्या विशालता २
च पञ्चाशद्धस्तमानासीत्। अन्तःप्राङ्गणे विंशतिहस्तमानं यत् स्थानं ३
वहिःप्राङ्गणे च यच्छिलास्तरणमासीत् तयोः सम्मुखे सासीत् वरण्ड-
स्थानुरूपो वरण्ड इत्थमावलित्रयमासीत्। कोष्ठानाम् अग्रे च मार्ग ४
आसीत् तस्य विशालता दशहस्तमाना, शतैकहस्तमानो मार्गश्चाभ्यन्त-
रमगच्छत्, तेषां प्रवेशस्थानानि चोत्तरदिश्यासन्। उपरिस्थकोष्ठानि ५
सङ्कीर्णान्यासन् यस्मान्निर्म्मित्या अधःस्थितेभ्यो मध्यस्थितेभ्यश्च कोष्ठेभ्य
एतेषां स्थानं वरण्डै र्न्यूनमक्रियत। यतस्तेषां तिस्रः श्रेण्य आसन् प्रा- ६
ङ्गणानान्तु स्तम्भा इव तेषां स्तम्भा नाविद्यन्त तस्माद् अधःस्थितेभ्यो
मध्यस्थितेभ्यश्चैतेषां भूमिः सङ्कुचितासीत्। वहिस्तु कोष्ठानामनु- ७
वर्त्तिनी वहिःप्राङ्गणस्य पार्श्वे कोष्ठानामग्रदेशे प्रावृतिरेकासीत्, तस्या
दीर्घता पञ्चाशद्धस्तमाना। यतो वहिःप्राङ्गणस्य [पार्श्वे] कोष्ठानां दी- ८
र्घता पञ्चाशद्धस्तमाना, परन्तु पश्य प्रासादस्याग्रे सा शतहस्तमाना-
सीत्। वहिःप्राङ्गणात् तत्रागच्छतो जनस्य कृते प्रवेशस्थानमेतेषां ९
कोष्ठानां अधः पूर्व्वदिश्यविद्यत। प्राङ्गणस्य प्रावृत्याः प्रशस्तपार्श्वे पूर्व्व- १०
दिशि व्यवच्छिन्नस्थलस्याग्रे निर्म्मित्याश्चाग्रे कोष्ठान्यासन्। तेषामग्रे ११
च वर्त्माविद्यत। दैर्घ्येण विशालतया निर्गमनस्थानै र्विधानै र्द्वारैश्चो-
त्तरदिक्स्थकोष्ठानामिव तेषाम् आकार आसीत्। दक्षिणदिक्स्थ- १२
कोष्ठानां प्रवेशस्थानानीव प्रवेशस्थानं मार्गस्य मुखेऽविद्यत। स च
मार्गः यथायोग्यप्रावृत्या अग्र आगच्छतः पूर्व्वदिशि स्थितः।

अपरं स मां जगाद, व्यवच्छिन्नस्थलस्याग्रे यान्युत्तरदिक्स्थको १३
ष्ठानि दक्षिणदिक्स्थकोष्ठानि च तानि पवित्रकोष्ठानि सन्ति; ये

याजकाः सदाप्रभोः समीपम् उपतिष्ठन्ति ते तत्रैवातिपवित्राणि द्रव्याणि भक्षयिष्यन्ति तत्र चातिपवित्रद्रव्याण्यर्थतो नैवेद्यानि पापार्थक-
१४ बलीन् दोषार्थकबलींश्च निधास्यन्ति, यतस्तत् स्थानं पवित्रं। याजकाः प्रवेशात् परं पवित्रस्थानाद् वहिःप्राङ्गणं न निर्गमिष्यन्ति, ते यानि वासांसि परिधाय परिचरन्ति तानि तत्र निधास्यन्ति यतस्तानि पवित्राणि। तेऽन्यवासांसि परिधाय प्रजानां विषयम् उपस्थास्यन्ति।
१५ अभ्यन्तरगृहस्य परिमाणानाम् अवधारणे समापिते स मां पूर्व्वाभिमुखगोपुरस्य मार्गं प्रति वहिर्नीत्वा तत्र परितः सर्व्वम् अमात्।
१६ स माननलेन पूर्व्वपार्श्वममात्, माननलेन स साकल्यतः पञ्चशतनल-
१७ मानः। स उत्तरपार्श्वममात्, माननलेन स साकल्यतः पञ्चशतनल-
१८ मानः। स दक्षिणपार्श्वममात्, माननलेन स पञ्चशतनलमानः। स
१९ पश्चिमपार्श्वं प्रति परावृत्य तं नलमानेन पञ्चशतनलमानममात्। स
२० गृहस्य चतुरः पार्श्वान् अमात्; तस्य परितः प्राचीरमेकमासीत्, तस्य दैर्घ्यं पञ्चशतनलमानं विशालता च पञ्चशतनलमाना। पवित्रापवित्रयो र्विच्छेदनार्थं तदासीत्।

---

४३ त्रिचत्वारिंशोऽध्यायः।

१ मन्दिरं ईश्वरस्य प्रतापदर्शनं ७ इस्रायेलः पापानां वर्णनं १० अनुतापाय मन्दिरसम्बन्धीयव्यवस्थापालनाय च जनगणं प्रत्युपदेशः १३ यज्ञवेद्याः परिमाणकथनं १८ तदीयव्यवस्थाकथनञ्च।

१ अपरं स मां गोपुरस्य समीपम् अर्थतः पूर्व्वदिगभिमुखस्य गोपुरस्य
२ समीपम् अनैषीत्। तत्र पश्य, इस्रायेल ईश्वरस्य प्रतापः पूर्व्वदिश आगच्छत्। तस्य रवो भूरितोयानां रवेण तुल्यः, पृथिवी च तदीयप्रतापेन
३ देदीप्यमानाभवत्। पुरा य आकारो मया दृष्टोऽर्थतो नगरस्य विनाशायागमनकाले मया य आकारो दृष्टस्तत्सदृशोऽयमाकारः; किबारनदीतीरे च मया य आकारो दृष्टस्तत्सदृशोऽयमाकारः। ततो-
४ ऽहम् अधोमुखः पतितः। सदाप्रभोः प्रतापश्च पूर्व्वदिगभिमुखगोपुरेण
५ मन्दिरसमीपम् आगच्छत्। अपरं वायु र्मामुत्थाप्याभ्यन्तरप्राङ्गणमनैषीत्,
६ ततः पश्य, मन्दिरं सदाप्रभोः प्रतापेन पूर्णमासीत्। अपरं मन्दिरात् मामालपतः कस्यचिद् रवो मयाश्रावि मम पार्श्वे च नर एकोऽतिष्ठत्।
७ स च मां जगाद, भो नरसन्तान, इदं मम सिंहासनस्य स्थानं,

इदञ्च मम चरणतलयोः स्थानं, अत्रैवेस्रायेलः सन्तानानां मध्येऽहम्
अनन्तकालं निवत्स्यामि; इस्रायेलः कुलम् अर्थतस्ते तेषां राजानश्च
स्वव्यभिचारेण स्वनृपाणां शवैश्चार्थतः स्वीयोच्चस्थलीभि र्मम पवित्रं नाम
न पुनरपवित्रं करिष्यन्ति। ते मच्छिलाया अव्यवहितस्थाने स्वीयशिलां ८
मम द्वारस्तम्भस्य पार्श्वे च स्वीयद्वारस्तम्भं संस्थाप्य मम तेषाञ्च मध्ये
कुड्यमेवान्तरालं विधाय स्वकृताभि र्घृण्यक्रियाभि र्मम पवित्रं नामा-
शुचीकृतवन्तस्ततोऽहं स्वक्रोधानलेन तान् ग्रासितवान्। इदानीं ते ९
स्वव्यभिचारं स्वनृपाणां शवांश्च मत्तो दवयिष्यन्ति, अहञ्चानन्तकालं तेषां
मध्ये निवत्स्यामि।

भो नरसन्तान, त्वम् इस्रायेलः कुलम् एतस्य मन्दिरस्य कथां ज्ञा- १०
पय तेन ते निजापराधेभ्यो विषण्णा भविष्यन्ति तस्य युक्तरचनां मा-
स्यन्ते च। ते यद्यत् कृतवन्तस्ततो यदि विषण्णा भवन्ति, तर्हि त्वं ११
मन्दिरस्याकारं युक्तरचनां निर्गमनप्रवेशस्थानानि तस्य सर्व्वाकारान्
सर्व्वविधीन् सर्व्वाकारान् सर्व्वव्यवस्थाश्च तान् ज्ञापय, तेषां समक्षं
लिख च, ते तस्य सर्व्वाकारं सर्व्वविधींश्च रक्षिष्यन्ति समाचरिष्यन्ति
च। मन्दिरस्य व्यवस्थेयं। पर्व्वतस्य शिखरे परितस्तस्य कृत्स्ना परिसी- १२
मातिपवित्रा। पश्येयं मन्दिरस्य व्यवस्था।

अङ्गुलिचतुष्टयाधिकहस्तमानै र्हस्तै र्यज्ञवेद्याः परिमाणानीमानि। १३
तस्या मूलं हस्तैकमानं तस्य विशालता च हस्तैकमाना, परितश्च तत्प्रान्ते
स्थिता सीमा वितस्त्येकमाना, इदं यज्ञवेद्यास्तलं। भूमिस्थमूलात् अधः- १४
स्थसोपानपर्य्यन्तं हस्तद्वयं, तस्य विशालता च हस्तैकमाना, पुनस्तस्मात्
क्षुद्रसोपानाद् वृहत्सोपानपर्य्यन्तं हस्तचतुष्टयं, तस्य विशालता च
हस्तैकमाना। पुण्यमृत्तिकाचयश्च हस्तचतुष्टयमानः, पुण्यचुल्लीतश्च १५
तदूर्द्ध्वे च चत्वारि शृङ्गाणि भविष्यन्ति। पुण्यचुल्ली च दैर्घ्येण द्वादश- १६
हस्तमाना, विशालतया च द्वादशहस्तमाना, चतुष्पार्श्वे चतुरस्रा। सो- १७
पानञ्च दैर्घ्येण चतुर्द्दशहस्तमानं विशालतया च चतुर्द्दशहस्तमानं
चतुरस्रं, तत्परितः स्थिता सीमा चार्द्धहस्तमाना, तस्य मूलञ्च परितो
हस्तैकमानं तदीयारोहणञ्च पूर्व्वदिशि भविष्यति।

अपरं स मां जगाद, भो नरसन्तान, प्रभुः सदाप्रभुरित्थमाह, १८
यज्ञवेद्यां होमबलिदानाय शोणितप्रोक्षणाय च यस्मिन् दिने सा नि-
र्म्मायिष्यते, तस्मिन् दिन इमे तस्या विधयः। प्रभुः सदाप्रभुराह, १९

मम परिचर्य्यां कर्त्तुं ये माम् उपतिष्ठन्ति तेभ्यः सादोकवंशोद्भवेभ्यो
२० लेवीययाजकेभ्यस्त्वं पापार्थकबलिमेकं गोवत्सं प्रदास्यसि। तदीयशोणितस्य
किञ्चिदादाय च तस्याश्चतुर्षु शृङ्गेषु सोपानस्य चतुर्षु प्रान्तेषु परितः
सीमनि च दत्त्वा तां मुक्तपापां करिष्यसि तस्याः प्रायश्चित्तं करिष्यसि
२१ च। अपरं तं पापबलिरूपं वृषमादाय मन्दिरस्य निर्द्दिष्टस्थाने धर्म्म-
२२ धाम्नो वहि भस्मसात् करिष्यसि। अपरं द्वितीयदिने त्वं पापबलिरूपं
निर्द्दोषमेकं छागम् उत्स्रक्ष्यसि याजकाश्च यथा वृषेण कृतवन्तस्तथा
२३ वेदिं मुक्तपापां करिष्यन्ति। त्वया च पापार्थकबलिदाने सम्पन्ने त्वं
२४ निर्द्दोषमेकं गोवत्सं निर्द्दोषमेकं मेषञ्चोपस्थापयिष्यसि। त्वं सदाप्रभोः
सम्मुखं तावुपस्थापयिष्यसि, याजकाश्च तयोरुपरि लवणं निक्षेप्स्यन्ति
२५ सदाप्रभोः कृते होमबलिदानाय तावुत्स्रक्ष्यन्ति च। सप्ताहं यावत् प्रति-
दिनं त्वं पापार्थकबलिरूपमेकं छागमुत्स्रक्ष्यसि, ते च निर्द्दोषं गोवत्समेकं
२६ निर्द्दोषं मेषमेकञ्चोत्स्रक्ष्यन्ति। सप्ताहं यावत् ते वेद्याः प्रायश्चित्तं करि-
२७ ष्यन्ति ताञ्च शुचीकरिष्यन्ति तस्या हस्तपूरणञ्च विधास्यन्ति। तेषु दि-
नेषु समाप्तेष्वष्टमदिने तत्पश्चाच्च याजकास्तस्यां वेद्यां युष्माकं होमार्थ-
कानि मङ्गलार्थकानि च बलिदानान्यनुष्ठास्यन्ति, तेनाहं युष्माननुग्रही-
ष्यामीति प्रभुः सदाप्रभुराह।

---

४४ चतुश्चत्वारिंशोऽध्यायः।

१ पूर्वगोपुरे देशाध्यक्षस्याधिकारिताकथनं ४ ईश्वरेण याजकानां भर्त्सनं ९ ईश्वरस्य परिचर्य्यातः प्रतिमापूजालिप्तानां याजकानां निवारणं तस्याञ्च सादोकवंशीययाजकानां नियोगः १७ याजकानां व्यवस्थाकथनञ्च।

१ अपरं स धर्म्मधाम्नः पूर्व्वदिगभिमुखं वहिर्गोपुरं प्रति मां परिवर्त्त-
२ यामास तत्तु बद्धम् आसीत्। अपरं सदाप्रभु मामवादीत्, गोपुरमिदं
बद्धं स्थास्यति, इदं नोद्घाटयिष्यते। एतेन कोऽपि न प्रवेक्ष्यति; यतो
हेतोरिस्रायेल ईश्वरः सदाप्रभुरेतेन प्रविष्टवांस्तत एतद् बद्धं स्थास्यति।
३ केवलमध्यक्षोऽध्यक्षत्वात् सदाप्रभोः समक्षम् आहारकरणार्थम् अत्रो-
पवेक्ष्यति, स गोपुरस्यालिन्दस्य मार्गेण प्रवेक्ष्यति तन्मार्गेण निर्गमि-
ष्यति च।
४ अपरं स उत्तरदिक्स्थगोपुरस्य मार्गेण मां मन्दिरस्य सम्मुखमा-

नैषीत् तत्राहं दृक्पातं कृत्वा सदाप्रभो र्मन्दिरं सदाप्रभोः प्रतापेन
परिपूर्णं दृष्ट्वाधोमुखः पतितः। सदाप्रभुश्च मामवादीत्, भो नर- ५
सन्तान, सदाप्रभो र्मन्दिरस्य सर्व्वविधीनधि तदीयसर्व्वव्यवस्थाश्चाध्यहं
त्वां यद्यत् कथयिष्यामि त्वं तत्र मनो निधत्स्व स्वचक्षुर्भ्यां तन्निरी-
क्षस्व स्वकर्णाभ्यां तद् गृहाण च, धर्म्मधाम्नः सर्व्वनिर्गमनस्थाने मन्दिर-
प्रवेशे मनो निधत्स्व च। त्वं तद् विद्रोहिदलम् इस्रायेलः कुलमित्थं ६
वद च, प्रभुः सदाप्रभुरित्थमाह, भो इस्रायेलः कुल, अलं युष्माकं
सर्व्वघृण्यक्रियाभिः। ताभि र्यूयम् अच्छिन्नत्वग्हृदयान् अच्छिन्नत्वङ्मां- ७
सांश्च विदेशीयजनान् मम धर्म्मधाम्न्यवस्थापयितुं मम तन्मन्दिरमप-
वित्रीकर्त्तुञ्चाभ्यन्तरमानीतवन्तः। यूयञ्च यदा मम भक्ष्यं मेदो रक्तञ्चान-
यत तदा युष्मदीयघृण्यक्रियापरिशिष्टवत् तेऽपि मम नियमं व्यर्थीकृत-
वन्तः। यूयञ्च मम पवित्रस्थानानां रक्षणीयं न रक्षित्वा स्वेच्छातस्तान् ८
मम धर्म्मधाम्नि रक्षणीयस्य रक्षिणः कृत्वा नियुक्तवन्तः।

प्रभुः सदाप्रभुरित्थमाह, इस्रायेलः सन्तानानां मध्ये यावन्तो विजा- ९
तीयजना विद्यन्ते तेषां मध्येऽच्छिन्नत्वग्हृदयोऽच्छिन्नत्वङ्मांसश्च कोऽपि
विजातीयजनो मम धर्म्मधाम न प्रवेक्ष्यति। परन्तु स्वदेवप्रतिमानाम् १०
अनुगमनाय मत्समीपतो भ्रान्तस्येस्रायेलो भ्रमणकाले ये लेवीयजना मत्स-
मीपतो दूरं गतास्तेऽपि निजापराधं वक्ष्यन्ते। ते मम धर्म्मधाम्नि परि- ११
चारका भूत्वा मन्दिरस्य गोपुरेषु द्वारिणो मन्दिरस्य परिचारकाश्च
भविष्यन्ति, ते प्रजानां कृते होमार्थकादीन् बलीन् निहनिष्यन्ति तासां
परिचर्य्याय तासां समक्षं स्थास्यन्ति च। यतस्ते तासां देवविग्रहाणां १२
समक्षं प्रजाः परिचरितवन्त इस्रायेल्कुलस्यापराधजनकविघ्नस्वरूपा
जाताश्च, ततो हेतोरहं तेषां प्रतिकूलं स्वहस्तमुत्तोल्य शप्तवानिति प्रभुः
सदाप्रभुराह, ते स्वापराधं वक्ष्यन्ते। मम याजनाय ते मां नोपस्थास्यन्ति १३
मम सर्व्वाणि पवित्रद्रव्याणि विशेषतो ममातिपवित्रद्रव्याणि नोप-
स्थास्यन्ति च। ते स्वीयावमानं स्वकृता घृण्यक्रियाश्च वक्ष्यन्ते। अहं १४
तान् गृहस्य समस्तदास्यकर्म्मणि तत्र कर्त्तव्ये सर्व्वकार्य्ये च तदीयरक्ष-
णीयरक्षकान् करिष्यामि। इस्रायेलः सन्तानानां मत्तोऽपभ्रमणे तु १५
सादोकस्य सन्ताना ये लेवीययाजका मम धर्म्मधाम्नो रक्षणीयं रक्षित-
वन्तस्त एव मत्परिचर्य्यायै माम् उपस्थास्यन्ति मामुद्दिश्य मेदःशोणिते
चोत्स्रष्टुं मत्समक्षं स्थास्यन्तीति प्रभुः सदाप्रभुराह। ते मम धर्म्मधाम १६

प्रवेक्ष्यन्ति ते च मत्परिचर्य्यायै मम भोजनमञ्चमुपस्थास्यन्ति मम रक्ष-
णीयं रक्षिष्यन्ति च।
१७ अन्तःप्राङ्गणस्य गोपुरेषु प्रवेशकाले ते क्षौमवासांसि परिधास्यन्ते,
अन्तःप्राङ्गणस्य गोपुरेषु तदभ्यन्तरे च परिचर्य्याकरणकाले मेषलोम
१८ तेषु मा विद्यतां। तेषां शिरःसु क्षुमोद्भवानि शिरोभूषणानि कटौ च
क्षुमोद्भवानि जङ्घावरणानि विद्यन्तां, ते सखेदा बद्धकटयो मा भव-
१९ न्तु। यानि परिधाय ते परिचर्य्यां कृतवन्तस्तानि वासांसि ते वहिः-
प्राङ्गणस्थजनगणस्य समीपे वहिःप्राङ्गणे निर्गमनकाले धर्म्मधाम्नः को-
ष्ठेषु त्यक्त्वापराणि वस्त्राणि परिदधतां, स्ववासोभि र्जनगणं मा पवि-
२० त्रीकुर्व्वन्तु। ते मुण्डितमुण्डा दीर्घजटा वा मा भवन्तु, ते स्वमस्तकानां
२१ केशान् कर्त्तयन्तु। अन्तःप्राङ्गणप्रवेशकाले तेषां याजकानां कोऽपि
२२ जनो द्राक्षारसं मा पिवतु। ते विधवां स्वामित्यक्तां वा स्त्रियं मोद्व-
हन्तु किन्त्विस्रायेल्कुलोद्भवाम् अनूढकन्यां मृतयाजकस्य विधवां वोद्व-
२३ हन्तु। ते च मम प्रजाः पवित्रापवित्रयोः प्रभेदं शिक्षयन्तु शुच्यशुच्योः
२४ प्रभेदञ्च ज्ञापयन्तु। विवादे च त एव विचारायोपस्थाय मम शास-
नैस्तद्विचारं निष्पादयन्तु मम सर्व्वपर्व्वसु मम व्यवस्था मम विधींश्च
२५ पालयन्तु मम विश्रामदिनानि च पवित्रीकुर्व्वन्तु। अशौचाय नरशवस्य
समीपं मा गच्छन्तु, केवलं पितरि मातरि वा पुत्रे कन्यायां वा भ्रात-
२६ र्य्यनूढभगिन्यां वा तेषामशुचितानुज्ञेया। याजके शुचीभूते तस्य कृते-
२७ ऽपराणि सप्तदिनानि गण्यन्तां। स च यस्मिन् दिने धर्म्मधाम्नि
परिचर्य्याकरणार्थं धर्म्मधामार्थतोऽन्तःप्राङ्गणं प्रवेक्ष्यति, तस्मिन् दिने
२८ स्वपापार्थं बलिदानं करिष्यतीति प्रभोः सदाप्रभोरुक्तिः। तेषां रिक्थस्य
चायं नियमो भविष्यति, अहमेव तेषां रिक्थं; यूयञ्चेस्रायेलो मध्ये
२९ तेभ्योऽधिकारं न दास्यथ, अहमेव तेषामधिकारः। भक्ष्यनैवेद्यानि पापा-
र्थकबलयो दोषार्थकबलयश्च तैरेव भक्षयिष्यन्ते, इस्रायेलो मध्ये यच्च
३० वर्ज्जितं तत् सर्व्वं तेषां भविष्यति। यावतीयास्तुपक्कद्रव्याणाम् एकैकस्या-
ग्रिमांशा युष्माकं यावतीयोपहाराणां मध्य एकैकोपहारस्य साकल्यञ्च
याजकानां भविष्यति, यूयञ्च स्वशक्तूनामग्रिमांशं याजकाय दास्यथ,
३१ तथा कृते स्वगेहेष्वाशीर्व्वादं निधास्यध्वे। पक्षी स्यात् पशु र्वा स्यात् स्वयं-
मृतं विदीर्णं वा किमपि याजकै र्न भक्षयिष्यते।

४५ पञ्चचत्वारिंशोऽध्यायः।

१ पवित्रभूम्युपहारस्य विधिः ९ देशाध्यक्षं प्रजागणञ्च प्रति व्यवस्थाज्ञापनञ्च।

गुटिकापातेन रिक्थनिरूपणाय देशस्य विभागकाले यूयं सदाप्र- १
भवे भूम्युपहारमेकं निवेदयिष्यथ, स देशस्य पवित्रांशः; तस्य दैर्घ्यं
पञ्चविंशतिसहस्रनलमानं विशालता च दशसहस्रनलमाना भवि-
ष्यति, स च परितः स्वीयकृत्स्नपरिसीम्नो मध्ये पवित्रो भविष्यति।
तन्मध्ये दैर्घ्येण पञ्चशतनलमाना विशालतया च पञ्चशतनलमाना चतु- २
रस्रा भूमि र्धर्म्मधामार्थका भविष्यति, पुनस्तत्परितः पञ्चाशद्धस्तमानः
परिसरो भविष्यति। पुनस्तस्य परिमितांशस्य मध्ये त्वं दैर्घ्येण पञ्च- ३
विंशतिसहस्रनलमानां विशालतया च दशसहस्रनलमानां भूमिं मा-
स्यसे, तस्या मध्ये धर्म्मधामातिपवित्रस्थानं भविष्यति। देशस्यायं ४
पवित्रांशः सदाप्रभोः परिचर्य्यार्थम् उपतिष्ठतां धर्म्मधाम्नः परिचार-
काणां याजकानां भविष्यति, स तेषां कृते गृहनिर्म्माणार्थकस्थानं
धर्म्मधाम्नश्च कृते पवित्रं स्थानं भविष्यति। पुनश्च दैर्घ्येण पञ्चविंशति- ५
सहस्रनलमाना विशालतया च दशसहस्रनलमाना भूमि र्मन्दिरस्य
परिचारकाणां लेवीयानां कृते वसतिगोपुरार्थको भूम्यधिकारो भवि-
ष्यति। परन्तु नगरस्य भूम्यधिकारार्थं यूयं विशालतया पञ्चसहस्र- ६
नलमानां दैर्घ्येण च पञ्चविंशतिसहस्रनलमानां पवित्रोपहारस्य पार्श्वे
स्थितां भूमिं दास्यथ; सा कृत्स्नस्येस्रायेल्कुलस्य भविष्यति। पुन र्यूयं ७
पवित्रोपहारनगरीयभूम्यधिकारयोरुभयपार्श्वयोः पवित्रोपहारस्याग्रे
नगरीयभूम्यधिकारस्याग्रे चार्थतः पश्चिमप्रान्तस्य पश्चिमे पूर्व्वप्रान्तस्य
पूर्व्वे च दैर्घ्येण पूर्व्वसीमतः पश्चिमसीमपर्य्यन्तम् अंशानामेकांशेन
समानां भूमिमध्यक्षाय दास्यथ। सा तस्य भूमिरिस्रायेलो मध्ये च तस्य ८
भूम्यधिकारो भविष्यति, ततो मन्नियुक्ता अध्यक्षाः पुन र्मम प्रजागणं न
पीडयिष्यन्ति, किन्तु स्ववंशगणानुसारेणेस्रायेलः कुलाय देशं प्रदास्यन्ति।
प्रभुः सदाप्रभुरित्थमाह। भो इस्रायेलोऽध्यक्षाः, अलं पापेन, यूयं ९
दौरात्म्यमुपद्रवञ्च स्वतो दवयत, न्यायविचारं धार्म्मिकताञ्चाचरत, मत्प्र-
जागणस्याधिकारभ्रष्टीकरणाद् विरमध्वमिति प्रभुः सदाप्रभुराह।
न्याय्यस्तुलायष्टि र्न्याय्यम् एफामानं न्याय्यं बातमानञ्च युष्माकं भवन्तु। १०
एफाबातयोरेकं परिमाणं भवतु; बातं होमरस्य दशमांश एफा ११

चापि होमरस्य दशमांशो भवतु, तयोः परिमाणं होमरानुरूपं भवतु।
१२ शेकलञ्च विंशतिगेरापरिमितं भवतु, विंशतिशेकलैः पञ्चविंशतिशेकलैः
पञ्चदशशेकलैश्च युष्माकं मानिरेका भवतु।
१३ युष्माभिरादेय उपहारोऽयं। गोधूमानां होमराद् ऐफायाः षष्ठांशः,
१४ यवानाञ्च होमराद् ऐफायाः षष्ठांशः। तैलस्य च विधि र्बातसम्प-
र्कीयः, तैलस्यैककोराद् बातस्य दशमांशः, तत् कोरं दशबातमानं
१५ होमरेण तुल्यञ्च, यतो दशबातै र्होमरं भवति। इस्रायेलो जलसिक्त-
भूमिमध्ये चरतो मेषादिपालाच्च द्विशतमेषाणामेको मेषः। जनानां
कृते प्रायश्चित्तकरणार्थं तद् भक्ष्यनैवेद्यस्य होमबलिदानस्य मङ्गलार्थ-
१६ कबलिदानानाञ्च कृते भविष्यतीति प्रभुः सदाप्रभुराह। देशस्य सर्व्व-
१७ प्रजा इस्रायेलोऽध्यक्षाय दातव्यस्यास्योपहारस्याधीना भविष्यन्ति। पर्व्व-
समावस्यासु विश्रामवारेष्विस्रायेल्कुलस्य सर्व्वोत्सवेषु च होमबलीनां
भक्ष्यपेयनैवेद्यानाञ्चोत्सर्ज्जनम् अध्यक्षस्य कार्य्यं भविष्यति; इस्रायेल्-
कुलस्य कृते प्रायश्चित्तकरणार्थं स एव पापार्थकबलिदानं नैवेद्योत्सर्जनं
होमबलिदानं मङ्गलार्थकबलिदानानि चानुष्ठास्यति।
१८ प्रभुः सदाप्रभुरित्थमाह, आदिममासस्य प्रथमदिने त्वं निर्द्दोषमेकं
१९ गोवत्समादाय धर्म्मधाम मुक्तपापं करिष्यसि। याजकश्च पापार्थकबलेः
शोणितस्य कियदंशमादाय मन्दिरस्य द्वारस्तम्भेषु वेद्याः सोपानस्य
२० चतुर्षु प्रान्तेष्वन्तःप्राङ्गणस्य गोपुरस्तम्भेषु च दास्यति। प्रमत्तजनस्य
बुद्धिहीनस्य च कारणात् त्वं मासस्य सप्तमदिनेऽपि तथैव करिष्य-
२१ सीत्थं यूयं मन्दिरस्य कृते प्रायश्चित्तं करिष्यथ। आदिममासस्य चतु-
र्द्दशदिवसे युष्माकं निस्तारपर्व्व भविष्यति, तत् सप्तदिनानाम् उत्सवः,
२२ तदा किण्वशून्याः पूपा भक्षयिष्यन्ते। तस्मिन् दिने चाध्यक्ष आत्मकृते
कृत्स्नस्य देशीयप्रजागणस्य कृते च पापार्थकबलिं वृषमेकम् उत्स्रक्ष्यति।
२३ तस्योत्सवस्य सप्ताहे स सप्तदिनानां मध्ये प्रत्यहं निर्द्दोषान् सप्तवृषान्
सप्तमेषांश्च दत्त्वा सदाप्रभुमुद्दिश्य होमार्थकबलिदानं करिष्यति प्रत्य-
२४ हञ्च छागमेकं दत्त्वा पापार्थकबलिदानं करिष्यति। भक्ष्यनैवेद्यार्थञ्च
वृषस्य कृत ऐफापरिमितं मेषस्य कृतेऽप्यैफापरिमितं गोधूमचूर्णं पुन-
२५ रैफायाः कृते हिनैकपरिमितं तैलं प्रदास्यति। सप्तममासस्य पञ्चदश-
दिने पर्व्वणि स सप्ताहं यावत् तद्वदेव पापार्थकं होमार्थकञ्च बलिदानं
नैवेद्यतैलयोरुत्सर्जनञ्च करिष्यति।

४६ षट्चत्वारिंशोऽध्यायः।

१ अध्यक्षेण प्रजागणेन च कर्त्तव्यस्य बलिदानस्य विधिः ८ मन्दिरे गमागमस्य बलिदानस्य च विधिः १६ अध्यक्षकुमाराणाम् अधिकारः १९ पाकशालानां कथा च।

प्रभुः सदाप्रभुरित्थमाह, अन्तःप्राङ्गणस्य पूर्व्वाभिमुखं गोपुरं कार्य्या- १
र्थकेषु षड्दिनेषु रुद्धं स्थास्यति, परन्तु विश्रामदिन उद्घाटयिष्यते,
अमावस्यादिनेऽप्युद्घाटयिष्यते। अध्यक्षस्त्व वहिःस्थानाद् गोपुरीया- २
लिन्दस्य मार्गेण प्रविश्य गोपुरस्य पार्श्वस्तम्भानां सन्निधौ स्थास्यति,
याजकाश्च तस्य होमार्थकबलिं मङ्गलार्थकबलींश्चोत्सक्ष्यन्ति, ततः परं
स गोपुरस्य शिलायां प्रणिपातं कृत्वा निष्क्रमिष्यति। परन्तु गोपुरं ३
सन्ध्यां यावद् अरुद्धं स्थास्यति। जनपदस्य प्रजागणश्च विश्रामवारेष्व-
मावस्यासु च तस्य गोपुरस्य प्रवेशस्थाने सदाप्रभोः समक्षं प्रणिपातं
करिष्यति।

सदाप्रभुमुद्दिश्याध्यक्षेण कर्त्तव्यं होमबलिदानमिदं, विश्रामवारे ४
निर्द्दोषाः षण्मेषशावका निर्द्दोषश्चैको मेषः। भक्ष्यनैवेद्यञ्च मेषस्य कृत ५
एफापरिमितं, मेषशावकानाञ्च कृते नैवेद्यं तदीयहस्तस्य दानं, एफायाः
कृते च हिनैकमानं तैलं। अमावस्यादिने च निर्द्दोष एको गोवत्सः ६
षण्मेषशावका एको मेषश्च, इमेऽपि निर्द्दोषा भविष्यन्ति। भक्ष्यनैवेद्या- ७
र्थञ्च स गोवत्सस्य कृत एफां मेषस्य कृतेऽप्येफामेकां मेषशावकानां कृते
च स्वसम्पत्त्यनुयायि नैवेद्यं, एफायाः कृते हिनैकमानं तैलञ्च प्रदास्यति।

परन्त्वध्यक्षो यदायास्यति, तदा गोपुरीयालिन्दस्य मार्गेण प्रवे- ८
क्ष्यति तन्मार्गेण निष्क्रमिष्यति च। जनपदस्य प्रजागणश्च पर्व्वसु यदा ९
सदाप्रभोः सम्मुखमायास्यति, तदा प्रणिपातार्थं यो जन उत्तर-
गोपुरस्य मार्गेण प्रविष्टः स दक्षिणगोपुरस्य मार्गेण निष्क्रमिष्यति,
यश्च दक्षिणगोपुरस्य मार्गेण प्रविष्टः स उत्तरगोपुरस्य मार्गेण निष्क्र-
मिष्यति, यो जनो यस्य गोपुरस्य मार्गेण प्रविष्टः स न पुनस्तत्रागमि-
ष्यति, किन्तु स्वसम्मुखमार्गेण निष्क्रमिष्यति। अध्यक्षस्त्व तेषां मध्यवर्त्ती १०
भूत्वा तेषां प्रवेशकाले प्रवेक्ष्यति तेषां निष्क्रमणकाले निष्क्रमिष्यति च।

उत्सवेषु पर्व्वसु च भक्ष्यनैवेद्यं गोवत्सस्य कृत एफा मेषस्य कृत एफा ११
मेषशावकानां कृते च तदीयहस्तस्य दानम्, एफायाः कृते च हिनैक-
मानं तैलं भविष्यति। यदा चाध्यक्षः सदाप्रभुमुद्दिश्य स्वेच्छाकृतदानाय १२

स्वेच्छातो होमबलिं मङ्गलार्थकबलीन् वोत्स्रक्ष्यति, तदा तस्य कृते
पूर्व्वाभिमुखं गोपुरमुद्घाटयिष्यते, स च यथा विश्रामवारे कुरुते तथा
स्वीयहोमार्थकबलिं स्वीयमङ्गलार्थकबलींश्चोत्स्रक्ष्यति तत्पश्चान्निष्क्रमि-
ष्यति च, तस्य निष्क्रमणात् परं गोपुरं भन्त्स्यते च।
१३ त्वञ्च प्रत्यहं सदाप्रभुमुद्दिश्य होमबलिदानार्थकमेकवर्षीयं निर्द्दोषं
१४ मेषशावकमेकम् उत्स्रक्ष्यसि, प्रतिप्रातस्तमुत्स्रक्ष्यसि। तत्सम्बन्धीय-
भक्ष्यनैवेद्यार्थञ्च प्रतिप्रातरैफायाः षष्ठांशमानं गोधूमचूर्णं तदार्द्री-
करणार्थं हिनस्य तृतीयांशं तैलञ्च सदाप्रभुमुद्दिश्येदं भक्ष्यनैवेद्यमुत्स्र-
१५ क्ष्यसि, इमे विधयोऽनन्तकालपर्य्यन्तं नित्यस्थायिनः। अतो यूयम्
नित्यबलिदानार्थं प्रतिप्रातस्तं मेषशावकं तद् भक्ष्यनैवेद्यं तत् तैल-
ञ्चोत्स्रक्ष्यथ।
१६ प्रभुः सदाप्रभुरित्थमाह, अध्यक्षो यदा स्वपुत्राणां कस्मैचिद् भूदानं
प्रदास्यति, तदा तत् तस्य पैतृकरिक्थं, तत् तस्य सन्तानानां भवि-
१७ ष्यति, पैतृकरिक्थत्वेन तत् तेषाम् अधिकारो भविष्यति। यदा तु
स स्वदासानां कस्मैचित् स्वरिक्थाद् भूदानं प्रदास्यति, तदा मुक्ति-
वत्सरं यावत् तत् तस्य भविष्यति, पश्चात् पुनरध्यक्षं प्रति वर्त्तिष्यते,
१८ तस्य रिक्थं केवलं तदीयसन्तानानां भविष्यति। अध्यक्षश्चोपद्रवे-
णाधिकारापहरणाय प्रजागणस्य रिक्थात् किञ्चिदपि नादास्यते, स
निजाधिकारादेव स्वसन्तानान् प्राप्तरिक्थान् करिष्यति, मम प्रजा-
गणेन प्रत्येकं निजाधिकारतो विच्छिन्नेन न भवितव्यं।
१९ अपरं स मां गोपुरस्य स्कन्धे स्थितेन प्रवेशमार्गेण याजकानां कृते
पवित्राणाम् उत्तराभिमुखकोष्ठानां समीपम् अनैषीत् तत्र पश्य पश्चिम-
२० दिक्स्थे गृहगर्भे स्थानमेकमासीत्। ततः स माम् अब्रवीत् स्थाने-
ऽस्मिन् याजका दोषार्थकानां पापार्थकानाञ्च बलीनां मांसं जलसिद्धं
करिष्यन्ति भक्ष्यनैवेद्यानि पक्ष्यन्ति च, न चेत् ते वहिःप्राङ्गणं तेषु
२१ नीतेषु जनगणस्य पावनं सम्भविष्यति। अपरं स मां वहिःप्राङ्गणं
नीत्वा प्राङ्गणस्य चतुर्णां कोणानां समीपं गमयामास, पश्य तत्र प्राङ्ग-
२२ णस्यैकैकस्मिन् कोणे एकैकं प्राङ्गणमासीत्। प्राङ्गणस्य चतुर्षु कोणेषु
सुबद्धप्राङ्गणान्यविद्यन्त, तेषां दीर्घता चत्वारिंशद्धस्तमाना विशालता
२३ त्रिंशद्धस्तमाना चतुर्णां कोणस्थानामेकं परिमाणमासीत्। तेषां
चतुर्णां मध्ये च परितः प्रस्तरमयराज्यः परितस्तासां राजीनाम् अधो

निर्म्मितानि पाकस्थानानि चाविद्यन्त। ततः स मां जगाद, इमानि २४
पाचकानां गृहाणि, मन्दिरस्य परिचारका अत्र प्रजागणस्य कृते
बलिमांसं पक्ष्यन्ति।

---

४७ सप्तचत्वारिंशोऽध्यायः।

१ पवित्रजलस्य कथा ६ तस्य गुणवर्णनं १३ देशस्य सीमा २२ गुटिकापातेन तद्विभागस्य कथा च।

अपरं स मां प्रत्यावर्त्त्य मन्दिरस्य प्रवेशस्थानम् अनैषीत्, तत्र च १
पश्य मन्दिरस्य शिलाया नीचेन तोयानि पूर्व्वदिशं प्रवहन्ति, यतो
मन्दिरं पूर्व्वाभिमुखं; नीचेन मन्दिरस्य दक्षिणस्कन्धाद् यज्ञवेद्या
दक्षिणतस्तानि तोयानि प्रवहन्ति। पुनः स माम् उत्तरदिक्स्थगो- २
पुरस्य मार्गेण निर्गमयामास, माञ्च वहिर्मार्गेण पूर्व्वाभिमुखस्य वहिः-
स्थगोपुरस्य समीपं प्रत्यावर्त्तयामास, तत्र पश्य दक्षिणस्कन्धतस्तोयानि
प्रास्रवन्। स नरो यदा पूर्व्वदिशं प्रागच्छत् तदा तस्य हस्ते मानसू- ३
त्रमविद्यत, स तेन सहस्रहस्तान् मित्वा मां तोयमध्येन गमयामास,
तत् तोयं गुल्फस्पर्शि। अपरं स पुनः सहस्रं मित्वा मां तोयेन गम- ४
यामास, तत् तोयं जानुस्पर्शि। पुनश्च स सहस्रं मित्वा मां गम-
यामास, तत् तोयं कटिस्पर्शि। पुनस्तेन सहस्रे परिमिते समागम्यं ५
स्रोतोऽविद्यत, यतस्तत्तोयानि गभीराण्यासन्, तानि सन्तरणीयानि
तोयानि, पदव्रजेन तत् स्रोतस्तरितुं नाशक्यत।

अपरं स मां जगाद, भो नरसन्तान, त्वं किमेतद् दृष्टवान्? ६
अपरं स मां तस्य स्रोतसः कूलेन गमयन् परावर्त्तयामास। तत्र ७
परावृत्य मया स्रोतस उभयोः कूलयोरतीव बहवः पादपा दृष्टाः।
तदा स मां जगाद, तोयानीमानि पूर्व्वदिक्स्थं मण्डलं प्रगच्छन्ति जङ्गल- ८
भूमिञ्चावतरन्ति सागरञ्च प्रविशन्ति, एतैः सागरं प्रवेशितैस्तस्य जलानां
दोषप्रतीकारः साध्यते। इदं स्रोतोद्वयञ्च यत् किञ्चन स्थानं प्राप्स्यति, ९
तत्र विचरन्तः सजीवप्राणिनः सर्व्वे उज्जीविष्यन्ति तत्रातीव प्रचुरा
मत्स्या भविष्यन्ति च, यस्माद् एतैस्तोयैस्तत्र गतैस्तत्र दोषप्रतीकारो
भविष्यति, स्रोत इदं यत् किञ्चन स्थानं प्राप्स्यति तत्र सर्व्वम् उज्जीवि-
ष्यति। तत्र जलतटे धीवराश्च स्थास्यन्ति, एनगदीत एनेग्लयिमपर्य्यन्तं १०

जालानि वितानिष्यन्ते च, स्वजात्यनुरूपास्तदीयमत्स्या महासमुद्रस्य
११ मत्स्या इवातीव प्रचुरा भविष्यन्ति। तस्य कच्छस्थलानां सैकतस्थलानाञ्च
१२ दोषप्रतीकारो न कारिष्यते, तानि लवणोत्पादनार्थं त्यक्तानि। एतस्य
स्रोतस उभयकूलयोस्तु सर्व्वविधा भक्ष्यफलदायिनः पादपाः प्ररोक्ष्यन्ति,
तेषां पत्राणि न म्लास्यन्ति, फलानि च न निःशेषाणि भविष्यन्ति,
प्रतिमासं तानि पक्ष्यन्ते, यतस्तत्सेचकतोयानि धर्म्मधामतो निर्गच्छन्ति;
तेषां फलानि खाद्यानि पत्राणि च रोगघ्नानि भविष्यन्ति।
१३ प्रभुः सदाप्रभुरित्थमाह, इयं सा परिसीमा यदनुसारेण यूयम्
इस्रायेलो द्वादशवंशानां कृते देशरिक्थस्य विभागं विधास्यध्वे, यूषफ्
१४ अंशद्वयस्याधिकारी। यूयं प्रत्येकं देशरिक्थस्य समानांशिनो भवि-
ष्यथ, यतोऽहं युष्माकं पूर्व्वपुरुषेभ्यस्तं दातुं शपथेन प्रतिज्ञातवान्,
१५ तस्माद् देशोऽयं पैतृकरिक्थवद् युष्माकं भविष्यति। अतो देशस्य
सीमेयं; उत्तरप्रान्ते आमहासमुद्राद् हित्लोनस्य मार्गेण सिदा-
१६ दस्य दिशि, हमातं वेरोता दम्मेशकहमातयोः सीम्नो र्मध्यवर्त्ति सिब्र-
१७ यिमं हौरणस्य सीम्नि स्थितं हात्सेरं हत्तीकोनं। आसमुद्रात् सीमा
हत्सरैनोनेन दम्मेशकस्य सीम्ना यास्यति, उत्तरदिशि च हमातम्
१८ उत्तरसीमा भविष्यति। इदमुत्तरप्रान्तं। पूर्व्वप्रान्ते तु हौरणदम्मेशकयो
र्मध्येन गिलियदस्येस्रायेल्देशस्य च मध्येन यर्द्दनेन यूयम् आसीम्नः
१९ पूर्व्वीयसागरपर्य्यन्तं मास्यध्वे; इदं पूर्व्वप्रान्तं। दक्षिणदिशि च
दक्षिणप्रान्तमातामरात् कादेशस्थानि मिरीवाख्यतोयानि यावद् ततश्च
महासमुद्रपर्य्यन्तं स्रोतो भविष्यति। इदं दक्षिणदिशि दक्षिणप्रान्तं।
२० पश्चिमप्रान्तश्चासीम्नो हमातप्रवेशस्य सम्मुखस्थानं यावन्महासमुद्रं;
२१ इदं पश्चिमप्रान्तं। इस्रायेलो वंशानां मध्ये यूयमेतस्य देशस्य विभागं
२२ विधास्यध्वे। युष्माकं कृते युष्मन्मध्ये प्रवासिनो ये परवंशीया युष्मन्मध्ये
सन्तानान् जनितवन्तस्तेषाञ्च कृते यूयं गुटिकापातेन पैतृकरिक्थस्येव
तस्य विभागं विधास्यध्वे। ते प्रवासिनो युष्माभिरिस्रायेलः सन्तानानां
मध्ये स्वदेशोद्भवजनैस्तुल्या ज्ञायिष्यन्ते युष्माभिः सार्द्धमिस्रायेलो वंशानां
२३ मध्ये गुटिकापातेन रिक्थाधिकारं लप्स्यन्ते च। यस्य वंशस्य मध्ये यः
प्रवासी प्रवसति तस्यैव मध्ये यूयं तस्मै रिक्थाधिकारं प्रदास्यथेति
प्रभोः सदाप्रभोरुक्तिः।

---

४८ अष्टचत्वारिंशोऽध्यायः।

१ इस्रायेलः सप्तवंशानाम् अंशाः ८ पवित्रभूम्युपहारस्य कथनं १५ नगरस्य तदीय-परिसरस्य च कथनं २१ अध्यक्षस्य भूम्याः कथनं २३ अपरपञ्चवंशानाम् अंशाः ३० नगरस्य परिमाणगोपुराणां कथनञ्च।

अथ वंशानां नामानीमानि। उत्तरप्रान्ताद् हित्लोनस्य मार्गस्य १
पार्श्वेन हमातप्रवेशस्य समीपेन हत्सरैनोनपर्य्यन्तं दम्मेशकस्य सीम्नि
तत्रैवोत्तरदिशि हमातस्य पार्श्वे आपूर्व्वप्रान्तात् पश्चिमप्रान्तपर्य्यन्तं
तत्रत्यो वंशोऽर्थतो दान एकमंशं लप्स्यते। दानस्य सीम्नः पार्श्वे चा- २
पूर्व्वपश्चिमप्रान्ताभ्याम् आशेर एकं लप्स्यते। आशेरस्य सीम्नः पार्श्वे ३
चापूर्व्वपश्चिमप्रान्ताभ्यां नप्तालिरेकं लप्स्यते। नप्तालेः सीम्नः पार्श्वे ४
चापूर्व्वपश्चिमप्रान्ताभ्यां मिनशिरेकं लप्स्यते। मिनशेः सीम्नः पार्श्वे चा- ५
पूर्व्वपश्चिमप्रान्ताभ्यामिफ्रयिम एकं लप्स्यते। इफ्रयिमस्य सीम्नः पार्श्वे ६
चापूर्व्वपश्चिमप्रान्ताभ्यां रूबेण एकं लप्स्यते। रूबेणस्य सीम्नः पार्श्वे ७
चापूर्व्वपश्चिमप्रान्ताभ्यां यिहूदा एकं लप्स्यते।

यिहूदाः सीम्नः पार्श्वे चापूर्व्वपश्चिमप्रान्ताभ्यां युष्माभि र्दातव्यो भू- ८
म्युपहारः स्थास्यति। स विशालतया पञ्चविंशतिसहस्रनलमानो
दैर्घ्येण चापूर्व्वपश्चिमप्रान्ताभ्यामंशानामेकेन तुल्यो भविष्यति, तस्य
मध्यस्थले च धर्म्मधाम स्थास्यति। यूयं यमुपहारं सदाप्रभवे प्रदास्यथ ९
तस्य दैर्घ्यं पञ्चविंशतिसहस्रनलमानं विशालता च दशसहस्रनलमाना
भविष्यति। स पवित्र उपहारो याजकानां भविष्यति। तस्योत्तर- १०
पार्श्वः पञ्चविंशतिसहस्रनलमानः, पश्चिमदिशि विशालता दशसहस्र-
नलमाना, पूर्व्वदिशि विशालता दशसहस्रनलमाना, दक्षिणदिशि च
दैर्घ्यं पञ्चविंशतिसहस्रनलमानं भविष्यति, तस्य मध्यस्थाने च सदा-
प्रभो र्धर्म्मधाम स्थास्यति। इस्रायेलः सन्तानानां भ्रमणकाले लेवीय- ११
जना यथा भ्रान्ता अभवन् तथा भ्रान्ता न भूत्वा ये रक्षणीयं रक्षित-
वन्तस्तेषां याजकानामर्थतः सादोकस्य सन्तानगणस्य मध्ये पवित्रीकृतानां
जनानां स भविष्यति। लेवीयानां सीम्नः पार्श्वे उपहारोद्धृतः स उप- १२
हारस्तेषां महापवित्रोऽंशो भविष्यति। लेवीयाश्च याजकानां सीम्नो- १३
ऽनुरूपमंशं लप्स्यन्ते, तस्य दैर्घ्यं पञ्चविंशतिसहस्रनलमानं विशालता च

दशसहस्रनलमाना; सर्व्वत्र दैर्घ्यं पञ्चविंशतिसहस्रनलमानं विशालता
१४ च दशसहस्रनलमाना भविष्यति। ते तस्य किञ्चिदपि न विक्रेष्यन्ति
न निमास्यन्ते वा, देशस्य सोऽग्रिमांशः परहस्तगतो न भविष्यति,
यतः स सदाप्रभोः कृते पवित्रः।
१५ तस्य पञ्चविंशतिसहस्रनलमानस्य पार्श्वस्याग्रे विशालतायाः पञ्च-
सहस्रनलमानो योऽंशोऽवशिष्टः स न पवित्रः स नगरस्य कृते नि-
वासार्थकः परिसरार्थकश्च भविष्यति, तस्य मध्यस्थले च नगरं स्था-
१६ स्यति। तस्य परिमाणानीमानि; उत्तरप्रान्तं सार्द्धचतुःसहस्रनलमानं,
दक्षिणप्रान्तं सार्द्धचतुःसहस्रनलमानं, पूर्व्वप्रान्तं सार्द्धचतुःसहस्र-
१७ नलमानं, पश्चिमप्रान्तञ्च सार्द्धचतुःसहस्रनलमानं। नगरस्य परि-
सरश्चोत्तरदिशि पञ्चाशदधिकशतद्वयनलमानो दक्षिणदिशि पञ्चाशद-
धिकशतद्वयनलमानः पूर्व्वदिशि पञ्चाशदधिकशतद्वयनलमानः पश्चिम-
१८ दिशि च पञ्चाशदधिकशतद्वयनलमानो भविष्यति। पवित्रोपहारस्य
पार्श्वे वर्त्तते दैर्घ्यमध्ये पूर्व्वदिशि दशसहस्रनलमाना या भूमिः पश्चि-
मदिशि च दशसहस्रनलमाना या भूमिरवशिष्टा सा पवित्रोपहारस्य
पार्श्वस्था, तदुत्पन्नद्रव्याणि च नगरवासिनां कार्य्यकारिणां भक्ष्याणि
१९ भविष्यन्ति। नगरवासिकार्य्यकारिणां विधिरयं, इस्रायेलः सर्व्ववंशानां
२० केचन जनास्तत्र कार्य्यं करिष्यन्ति। तस्योपहारस्य साकल्यं दैर्घ्येण
पञ्चविंशतिसहस्रनलमानं विशालतया च पञ्चविंशतिसहस्रनलमानं,
यूयं चतुरस्रं कृत्वा तं पवित्रमुपहारं निवेदयिष्यथ; अत्र नगरस्या-
धिकारः परिगृहीतः।
२१ परन्तु पवित्रस्य भूम्युपहारस्य नगराधिकारस्य चोभयोः पार्श्वयोर-
वशिष्टा भूमिरध्यक्षस्य भविष्यति, उपहारस्य पञ्चविंशतिसहस्रनल-
मानविशालताया अग्रे पूर्व्वसीमपर्य्यन्ता पश्चिमदिशि च पञ्चविंशति-
सहस्रनलमानविशालताया अग्रे पश्चिमसीमपर्य्यन्ता वंशीयांशानां
पार्श्वस्थिता भूमिरेवाध्यक्षस्य भविष्यति, तस्या मध्यस्थले च पवित्रो-
२२ पहारो मन्दिरसम्बन्धीयं धर्म्मधाम च स्थास्यतः। इत्थम् आलेवीया-
नामधिकारान्नगराधिकारपर्य्यन्ता सा भूमिरध्यक्षस्याधिकारस्य मध्ये
स्थास्यति तां विहाय या भूमि र्यिहूदाः सीम्नो बिन्यामीनस्य सीम्नश्च
मध्ये विद्यते साध्यक्षस्य भविष्यति।
२३ शेषवंशा इमे। आपूर्व्वपश्चिमप्रान्ताभ्यां बिन्यामीन एकमंशं लप्स्यते।

बिन्यामीनस्य सीम्नः पार्श्वे चापूर्व्वपश्चिमप्रान्ताभ्यां शिमियोन एकं २४
लप्स्यते। शिमियोनस्य सीम्नः पार्श्वे चापूर्व्वपश्चिमप्रान्ताभ्याम् इषाखर २५
एकं लप्स्यते। इषाखरस्य सीम्नः पार्श्वे चापूर्व्वपश्चिमप्रान्ताभ्यां सिबूलून २६
एकं लप्स्यते। सिबूलूनस्य सीम्नः पार्श्वे चापूर्व्वपश्चिमप्रान्ताभ्यां गाद एकं २७
लप्स्यते। गादस्य सीम्नः पार्श्वे च दक्षिणप्रान्तस्य दिशि सीमा तामरतः २८
कादेशस्थेन मिरीबातीयेन सरिता च महासमुद्रं यास्यति। यूयं २९
रिक्थाधिकारकारणाद् इस्रायेलो वंशानां मध्ये यं देशं गुटिकापातेन
विभक्ष्यथ सोऽयम्, इमे च वंशीयांशाः, इयं प्रभोः सदाप्रभोरुक्तिः।

नगरस्य निर्गमनस्थानानि चेमानि। उत्तरप्रान्तं सार्द्धचतुःसहस्र- ३०
नलमानं। नगरस्य गोपुराणि चेस्रायेलो वंशानां नाम्नामनुरूपाणि ३१
भविष्यन्ति। उत्तरदिशि त्रीणि गोपुराणि स्थास्यन्ति, रूबेणस्यैकं
गोपुरं, यिहूदा एकं गोपुरं, लेवेरेकं गोपुरञ्च। पूर्व्वप्रान्तञ्च सार्द्ध- ३२
चतुःसहस्रनलमानं, तत्र च त्रीणि गोपुराणि स्थास्यन्ति। यूषफस्यैकं
गोपुरं, बिन्यामीनस्यैकं गोपुरं, दानस्यैकं गोपुरञ्च। दक्षिणप्रान्तञ्च ३३
सार्द्धचतुःसहस्रनलमानं, तत्र च त्रीणि गोपुराणि स्थास्यन्ति, शिमि-
योनस्यैकं गोपुरं, इषाखरस्यैकं गोपुरं, सिबूलूनस्यैकं गोपुरञ्च।
पश्चिमप्रान्तं सार्द्धचतुःसहस्रनलमानं, तत्र च त्रीणि गोपुराणि ३४
स्थास्यन्ति, गादस्यैकं गोपुरं, आशेरस्यैकं गोपुरं, नप्तालेरेकं गोपुरञ्च।
परिधिरष्टादशसहस्रनलमानः, नगरस्य नाम चेतः परं सदाप्रभु- ३५
स्तत्रावस्थित इति भविष्यति।

दानीयेलस्य भविष्यद्वाक्यानि।

१ प्रथमोऽध्यायः।

१ यिहोयाकीमस्य पराजयकथनं ३ दानीयेलस्य तदीयबन्धुत्रयस्य च कथा ८ तेषां जितेन्द्रियता १७ विद्यायां व्युत्पत्तिश्च।

१ यिहूदीयराजस्य यिहोयाकीमस्य राजत्वस्य तृतीये वत्सरे बाबि-
२ लीयराजो निबूखद्नित्सरो यिरूशालमं प्रगत्य तन्नगरमवरुरोध, प्रभुश्च
यिहूदीयराजं यिहोयाकीमम् ईश्वरीयमन्दिरस्य बहुपात्राणि च तस्य
करे समर्पयामास, स च तानि शिनियरदेशं निजेश्वरस्य मन्दिरं
निनाय, स तान्येव पात्राणि निजेश्वरस्य कोषागारे निदधे।
३ परन्तु राजा स्वनपुंसकाध्यक्षम् अश्पिनसं कथितवान्, इस्रायेलः
४ सन्तानानां राजवंशीयानां प्रथमजनानाञ्च मध्ये ये सर्व्वथा निर्द्दोषाः
सुरूपाः सर्व्वविद्यायां निपुणाः ज्ञानवन्तो मनस्विनो राजप्रासादे परि-
चरितुं कल्दीयानां ग्रन्थान् भाषाञ्च शिक्षितुञ्च शक्तिविशिष्टास्तादृशाः
५ कतिपयतरुणा आनीयन्तां। राजा च तेषां कृते राजप्रतिभागस्य स्व-
पानीयद्राक्षारसस्य च प्रात्यहिकमंशं निरूप्य वत्सरत्रयं तेषां पालनं
६ तदन्ते राज्ञः साक्षाद् उपस्थापनञ्चाज्ञापयामास। तेषां मध्ये दानीयेलो
हनानियो मीशायेलोऽसरियश्चेते यिहूदावंशोत्पन्ना जना अविद्यन्त।
७ स नपुंसकाध्यक्षस्तु तेषामपरनामानि विदधाय, स दानीयेलस्य नाम
बेल्टशत्सर इति, हनानियस्य नाम शद्रक इति, मीशायेलस्य नाम
मैशक इति, असरियस्य नाम चावेद्निगुरिति चकार।
८ अनन्तरं राज्ञः प्रतिभागेन तत्पानीयद्राक्षारसेन चाहमात्मानं
नाशुचीकरिष्यामीति मनस्यमवलम्ब्य दानीयेलो यथात्मानं नाशुची-
९ कुर्य्यात् तदर्थं तं नपुंसकाध्यक्षमनुज्ञां ययाचे। ईश्वरश्च तस्य नपुं-
१० सकाध्यक्षस्य समक्षं दानीयेले दयां करुणाञ्च वर्त्तयामास। अतः स नपुं-
सकाध्यक्षो दानीयेलमब्रवीत्, मत्प्रभो राज्ञोऽहं बिभेमि, युष्माकं भक्ष्य-
पेयद्रव्याणि तेनैव निरूपितानि, स किमर्थं युष्मद्वयस्येभ्यस्तरुणेभ्यो
युष्माकं मुखानि मलिनानि पश्येत्? यूयञ्च किमर्थं राज्ञः समक्षं मम शिरः

संशयारूढं कुर्य्यात? ततो नपुंसकाध्यक्षो दानीयेलहनानियमीशायेला- ११
सरियेषु यं सूदाध्यक्षम् अधिकृतवान् दानीयेलस्तं जगाद, भवान् १२
दशदिनानि यावद् भवत इमान् दासान् परीक्षितुमर्हति, उद्भिज्ज-
भक्ष्याण्यस्मभ्यं दीयन्तां वयं तानि भक्षयिष्यामहे, जलं दीयताञ्च वयं
तत् पास्यामः। भवतः समक्षञ्चास्माकं रूपं सन्दृश्यतां, ये च तरुणा १३
राज्ञः प्रतिभागं भक्षयन्ते तेषामपि रूपं सन्दृश्यतां, ततो भवान् यद्
द्रक्ष्यति तदनुरूपमाचारं भवत इमान् दासान् प्रति विधास्यते। ततः १४
स तेषां तद् वाक्यं गृहीत्वा दशदिनानि यावत् तान् परीक्षाञ्चक्रे,
तेषु दशदिनेषु गतेषु च राजप्रतिभागभोगिभ्यः सर्व्वतरुणेभ्यस्त एव १५
सुरूपा मांसलाश्च प्रतिबभुः। ततः परं स सूदाध्यक्षस्तेषां प्रतिभागं १६
तेषां पानीयद्राक्षारसञ्चापाहाय तेभ्य उद्भिज्जभक्ष्याण्यददात्।

परन्त्वीश्वर एतेभ्यश्चतुर्भ्यस्तरुणेभ्यो बुद्धिं सर्व्वग्रन्थविद्यासु नैपुण्यञ्च १७
प्रददौ, दानीयेलश्च सर्व्वदर्शनेषु स्वप्नेषु च पारदर्शी बभूव। अपरं १८
तेषामानयनाय यः कालो राज्ञा निरूपितस्तस्मिन्नतीते सति नपुंसका-
ध्यक्षस्तान् निबूखद्नित्सरस्य सम्मुखमानिनाय। राजा च तैः सह १९
संललाप, ततस्तेभ्यो दानीयेलहनानियमीशायेलासरियेभ्य उत्कृष्टः
कोऽपि नाविद्यत, अतस्ते राजानं परिचरितुमारेभिरे। राजा च २०
तान् बुद्ध्यपेक्षाया विज्ञताया यां काञ्चन कथाम् अपृच्छत्, तस्यां निज-
कृत्स्नराज्ये विद्यमानेभ्यः सर्व्वेभ्यो मन्त्रवेत्तृभ्यो गणकेभ्यश्च तानेव दशगुणो-
त्कृष्टान् अविन्दत्। दानीयेलश्च राज्ञः खसस्य प्रथमवर्षं यावत् २१
तादृशोऽवतस्थे।

---

२ द्वितीयोऽध्यायः।

१ निबूखद्नित्सरस्य स्वप्नकथनं १४ राज्ञः समीपे दानीयेलस्य निवेदनं १९ ईश्व-
रस्य सन्निधौ धन्यवदनं २४ दानीयेलेन स्वप्नप्रकाशनं ३६ तस्य तात्पर्य्यप्रकाशनं
४६ राज्ञा तस्मिन् सम्मानदानयोरर्पणञ्च।

अपरं निबूखद्नित्सरस्य राजत्वस्य द्वितीयवत्सरे स गुरुतरं स्वप्नं १
ददर्श, तेन तस्यात्मोद्विविजे निद्रा च ततोऽपजगाम। अपरं राजानं २
तस्य स्वप्नं ज्ञापयितुं मन्त्रवेत्तारो गणका मायाविनः कल्दीयाश्चाहूयन्ता-
मिति राजादिदेश, ततस्त आगत्य राज्ञः सम्मुखं तस्थिरे। अपरं राजा ३
तान् जगाद, मया स्वप्नोऽदर्शि तत्स्वप्नजिज्ञासो ममात्मोद्विग्नो जातः।

४ तदा ते कल्दीयजना अरामीयभाषया राजानमूचुः, महाराजोऽन-
न्तजीवी भूयात्, भवान् स्वदासेभ्यस्तं स्वप्नं कथयतु, तथा कृते वयं
५ तस्य तात्पर्य्यं वदिष्यामः। राजा प्रत्युत्तरं कृत्वा तान् कल्दीयान् जगाद,
ममेदं वाक्यं विज्ञापितं, यदि यूयं तं स्वप्नं तत्तात्पर्य्यञ्च मां न ज्ञापयेत,
तर्हि यूयं खण्डशः कारिष्यध्वे, युष्माकं गृहाणि च मलराशीकृतानि
६ भविष्यन्ति। यदि तु तं स्वप्नं तस्य तात्पर्य्यञ्च मां ज्ञापयेत तर्हि मत्तो
दानानि वरान् उत्कृष्टसम्मानञ्च लप्स्यध्वे, अतएव तं स्वप्नं तत्तात्पर्य्यञ्च
७ मां ज्ञापयत। ते तु द्वितीयमुत्तरं कृत्वा जगदुः, महाराजः स्वदासेभ्यस्तं
८ स्वप्नं कथयतु, तथा कृते वयं तत्तात्पर्य्यं वदिष्यामः। राजा प्रत्युत्तरं
कृत्वाब्रवीत्, अहं निश्चितं जाने यूयं कालविलम्बार्थिनः, यतो मम तद्
९ वाक्यं विज्ञापितमिति यूयं जानीथ। यदि यूयं मां तं स्वप्नं न ज्ञापयेत
तर्हीयमेव युष्मद्दण्डाज्ञा भविष्यति, यतः कालपरिवर्त्तस्यापेक्षया मत्स-
मक्षम् अन्ततमानिष्टञ्च व्याहर्त्तुं यूयं कल्पितवन्तः, अतो मां स्वप्नं ज्ञाप-
१० यत, तेन तस्य तात्पर्य्यं मह्यं कथयिष्यथेत्यहं ज्ञास्यामि। ते कल्दीया
राज्ञः समक्षमुत्तरं कृत्वा जगदुः, राज्ञो वाक्यं कथयितुं येन शक्यते ता-
दृशः कोऽपि मनुष्यो भूमण्डले न विद्यते, यतो हेतो महान् पराक्रमी
च कोऽपि भूपतिः कमपि मन्त्रवेत्तारं गणकं कल्दीयं वेदृशं वाक्यं न
११ पृष्टवान्। राजा यां कथां पृच्छति सा दुरूहा; राज्ञः समक्षं तां
ज्ञापयितुं नापरेण केनापि शक्यं, केवलं देवैरेव शक्यं, ते तु मांसमय-
१२ देहवासिभिः सहवासं न कुर्व्वते। तेन हेतुना राजा क्रुद्धातीव रोषा-
१३ न्वितो भूत्वा बाबिल्स्थितानां सर्व्वज्ञानिनां वधमादिदेश। ततः साज्ञा
निर्गता ज्ञानिनां हत्या च प्रारब्धा, जनाश्च हत्यार्थं दानीयेलं तत्स-
खींश्चान्वगयन्त।

१४ तदानीं दानीयेलो बाबिल्स्थितानां ज्ञानिनां वधाय निष्क्रान्तं राज्ञो
१५ रक्षकसेनाध्यक्षम् अरियोकं युक्त्या विवेकेन च प्रत्यवादीत्। स उत्तरं
कृत्वा तं पराक्रमिणं राजपुरुषम् अरियोकं जगाद, राज्ञाज्ञापितस्य तस्य
तीक्ष्णस्य विधानस्य किं कारणं? तदानीम् अरियोको दानीयेलं तद्-
१६ वृत्तान्तं ज्ञापयामास। अपरं दानीयेलो गत्वा, अवकाशो राज्ञे स्वप्नार्थ-
१७ निवेदनस्यानुज्ञा च मह्यं दीयेतामिति राजानं प्रार्थयाञ्चक्रे। ततः
परं दानीयेलः स्वगृहं गत्वा स्वसखीन् हनानियमीशायेलासरियांस्तां
१८ कथां ज्ञापयामास। तस्योद्देश्यमिदं, बाबिल्स्थितैरन्यै र्ज्ञानिभिः सह

दानीयेलस्तस्य सखायश्च यथा न विनश्येयुस्तदर्थं ते तां निगूढकथामधि
स्वर्गेश्वरं करुणां प्रार्थयिष्यन्त इति।

तदानीं सा निगूढकथा रात्रीयदर्शनेन दानीयेलस्य समक्षं प्रका- १९
शिता। ततो दानीयेलः स्वर्गेश्वरं धन्यमवादीत्। दानीयेलो वक्तुमारभ्य २०
जगाद, युगानाम् आद्यन्तं यावद् ईश्वरस्य नाम धन्यं भूयात्, यतो हेतो
र्ज्ञानं सामर्थ्यञ्च तस्यैव स्तः। स एव कालान् समयांश्च परिवर्त्तयति, २१
स राज्ञश्च्यावयति राज्ञः स्थापयति च, स ज्ञानिभ्यो ज्ञानं मनस्विभ्यश्च
बुद्धिं ददाति। गभीरं प्रच्छन्नं वा यदस्ति स तत् प्रकाशयति। तिमिरे २२
यद् विद्यते स तज्जानीते, द्युतिश्च तस्मिन्नेव वसति। भो मत्पितृगणा- २३
मीश्वर, भवन्तमहं प्रशंसामि स्तवीमि च, यतो भवान् मह्यं ज्ञानं सा-
मर्थ्यञ्च प्रदत्तवान्, राज्ञः कथामस्मान् ज्ञापयन्नस्मत्प्रार्थितं माम् इदानीं
ज्ञापितवांश्च।

ततो हेतो र्दानीयेलो बाबिल्स्थितज्ञानिनां व्यापादने राज्ञा नियुक्तस्य २४
तस्यारियोकस्य सन्निधिं प्रविवेश। स गत्वा तं जगाद, बाबिल्स्थिता
ज्ञानिनो भवता मा हन्यन्तां। भवान् मां राजसमक्षं नयतु, तर्ह्यहं
राज्ञे स्वप्नार्थं कथयिष्यामि। तदानीम् अरियोको दानीयेलं सत्वरं राज- २५
समक्षं नीत्वा राजानं जगाद, यिहूदात आनीतानां निर्व्वासितजनानां
मध्य एको नरो मयासादितः, स राजानं स्वप्नार्थं ज्ञापयिष्यति। ततो २६
राजोत्तरं कृत्वा बेल्टिशत्सराभिधं दानीयेलं जगाद, त्वं किं मया
दृष्टं स्वप्नं तत्तात्पर्य्यञ्च मां ज्ञापयितुं शक्नोषि? दानियेलो राज्ञः २७
समक्षं प्रत्यवादीत्, राजा यां निगूढां कथां पृच्छति तां कोऽपि ज्ञानि-
नो गणका मन्त्रवेत्तारो दैवज्ञा वा राजानं गदितुं न शक्नुवन्ति। परन्तु २८
निगूढप्रकाशक एक ईश्वरः स्वर्गे विद्यते, स एवोत्तरकाले यद् भवि-
तव्यं तद् राजानं निबूखद्नित्सरं ज्ञापयामास। भवतः स्वप्नः स्वशय्यायां
[शयानस्य] मानसिकदर्शनानि चेमानि। भो महाराज, इतः परं किं २९
भवितव्यमिति चिन्ता भवच्छय्यायां [शयानस्य] भवतोऽन्तर उत्पेदिरे,
स च निगूढप्रकाशको भवन्तं तद् भवितव्यं ज्ञापितवान्। परन्तु सर्व्वेभ्यो ३०
जीवितेभ्यो मय्यधिकं ज्ञानं विद्यत इति कारणात् सा निगूढा कथा
मां प्रति प्रकाशिताभूत् तन्न [मन्यतां,] किन्तु सा निगूढा कथा राज्ञे
निवेदयितव्या भवच्चित्तस्य चिन्ताश्च भवता ज्ञातव्या इति कारणात्।

भो महाराज, निरीक्षमाणेन भवता महती प्रतिमैकादर्शि, सा ३१

प्रकाण्डोत्कृष्टप्रभायुक्ता च सती भवत्समक्षम् अतिष्ठत्, तद्दर्शनं भयङ्करं।
३२ तस्याः प्रतिमाया मूर्द्धोत्तमस्वर्णमयो वक्षो बाहुद्वयञ्च रौप्ये, उदरकटी
३३ पित्तलमयौ, जङ्घे लौहमये, पादयोश्चैकांशो लौहमयोऽपरांशश्च मृण्मयः।
३४ भवति निरीक्षमाणे सति शेषे विना हस्तं खनितः प्रस्तर एकस्तस्याः
३५ प्रतिमाया लौहमृण्मयौ पादावाहत्य चूर्णयामास। तदानीं तानि लौह-
मृत्पित्तलरूप्यसुवर्णानि युगपच्चूर्णितानि ग्रीष्मच्छेदनकालीनखलस्थतुष-
समानि भूत्वा वायुनापनिन्यिरे, तेषां किमपि स्थानं नाविद्यत, यस्तु
प्रस्तरस्तां प्रतिमामाहतवान् स महापर्व्वतो भूत्वा कृत्स्नं भूमण्डलं पूर-
३६ यामास। अयं स स्वप्नः, एतस्यार्थोऽपि महाराजस्य समक्षमस्माभिः
कथयितव्यः।
३७ भो महाराज, भवान् राज्ञां राजा, यतः स्वर्गेश्वरो राज्यमैश्वर्य्यं
३८ पराक्रमं प्रतापञ्च भवते प्रदत्तवान्, यत्र कुत्रापि च नरसन्ताना भूचर-
जीविनः खेचरपक्षिणश्च वसन्ति तत्र स तान् भवतो हस्ते समर्प्य
भवन्तं तेषां सर्व्वेषामधिपतिं कृतवान्। भवानेव स सुवर्णमयो मूर्द्धा।
३९ भवतः परं भवतो नीचमन्यदेकं राज्यं, तत्पश्चाच्च तृतीयमेकं पित्तलमयं
४० राज्यमुत्पत्स्यते, तत् कृत्स्नभूमण्डलस्याधिपत्यं विधास्यते। लौहवद्दृढं चतु-
र्थमेकं राज्यञ्च भविष्यति। यतो हेतो र्लौहः सर्व्वं चूर्णयति भिनत्ति
च ततो हेतो र्भञ्जकलौहवत् तत् तानि सर्व्वाणि चूर्णयिष्यति निभङ्क्ष्य-
४१ ति च। पादयोरङ्गुलीनाञ्चैकांशः कुलालीयमृण्मयोऽन्यांशस्तु लौहमय
इति यद् भवता दृष्टं तस्य तात्पर्य्यमिदं, तद् द्विधाभूतं राज्यं भवि-
४२ ष्यति, लौहस्य दृढतागुणं तस्मिन् स्थास्यति। यतः पङ्कमृदा संयुक्तो
लौहो भवतादर्शि, परन्तु तत्पादाङ्गुलीनामेकांशो लौहमयोऽपरांशो
मृण्मय आसीत्, [तदनुसारेण] तस्य राज्यस्यैकांशो दृढोऽपरांशश्च
४३ भङ्गुरो भविष्यति। भवता च पङ्कमृदा संयुक्तो लौहोऽदर्शि, [तदनुसा-
रेण] ते जना नरवीजेन मिथः संयोजयिष्यन्ते न तु परस्परं संलग्नाः
४४ स्थास्यन्ति, पश्यतु लौहोऽपि मृदा सह संयुक्तो न तिष्ठति। तेषां राज्ञां
काले तु स्वर्गेश्वरो राज्यमेकं स्थापयिष्यति, तद् अनन्तकालं यावद्
अविनाश्यं, तदीयराजत्वञ्चापरस्यां जात्यां न समर्पयिष्यते, तच्च तानि
सर्व्वाणि राज्यानि चूर्णयिष्यति संहरिष्यति च, तत् त्वनन्तकालं
४५ यावद् अवस्थास्यते। यतो विना हस्तं पर्व्वतात् खनित एकः प्रस्तरस्तानि
लौहपित्तलमृत्तिकारूप्यसुवर्णानि खण्डशः कृतवानिति भवतादर्शि।

इतः परं यद् भवितव्यं तन्महान् ईश्वरो महाराजं ज्ञापितवान्।
परन्तु स खप्नो निश्चितस्तस्य तात्पर्य्यञ्च विश्वास्यं।
तदानीं राजा निबूखद्नित्सरोऽधोमुखः पतित्वा दानीयेलमर्च्चयामास ४६
तमुद्दिश्य भक्ष्यनैवेद्यानां धूपदाहस्य चोत्सर्गमादिदेश च। राजा दानी- ४७
येलं प्रति वक्तुमारभ्य जगाद, सत्यं युष्माकम् ईश्वर ईश्वराणाम् ईश्वरो
राज्ञां प्रभु र्निगूढप्रकाशकश्च, यतो हेतोरियं निगूढा कथा त्वया
प्रकाशयितुमशक्यत। ततः परं राजा दानीयेलं महल्लोकं कृत्वा तस्मै ४८
बहूनि महान्ति च दानानि ददौ तञ्च कृत्स्नस्य बाबिलाख्यमण्डल-
स्याधिपत्ये नियुयुजे बाबिल्स्थितानां सर्व्वेषां ज्ञानिनां प्रमुख्यमध्यक्षं
चकार च। परन्तु दानीयेलो राजानं प्रार्थयाञ्चक्रे, ततः स शद्रकं ४९
मैशकम् अबेद्निगुञ्च बाबिल्मण्डलस्य राजकार्य्ये नियुयुजे, दानीयेलस्तु
राजद्वारेऽवर्त्तत।

---

३ तृतीयोऽध्यायः।

१ निबूखद्नित्सरेण स्वर्णमूर्त्तिस्थापनं ८ शद्रकमैशकाबेद्निगुभिस्तदनर्च्चनात् तेषामभियोगः १७ तेषां भर्त्सनं १९ वह्निकुण्डे तेषां निक्षेपणं २४ तेषां रक्षणं २८ नृपतेराश्चर्य्यज्ञानमाज्ञा च।

राजा निबूखद्नित्सरः स्वर्णमयीमेकां प्रतिमां निर्मापयामास। तस्या १
उच्चता षष्टिहस्तमाना विशालता च षड्हस्तमानासीत्, अपरं स
बाबिल्मण्डले स्थितायां दूराभिधायां समस्थल्यां तां स्थापयामास।
राजा निबूखद्नित्सरः क्षितिपालान् अधिपतीन् शासकान् मुख्यविचा- २
रकर्तॄन् कोषाध्यक्षान् व्यवस्थावेत्तॄन् विचारकान् सर्व्वान् मण्डलाध्य-
क्षांश्च सङ्ग्रहीतुं दूतैस्तानादिदेश, राज्ञा निबूखद्नित्सरेण स्थापितायाः
प्रतिमायाः प्राणप्रतिष्ठायै युष्माभिरागम्यतां। तदानीं ते क्षितिपाला ३
अधिपतयः शासका मुख्यविचारकर्त्तारः कोषाध्यक्षा व्यवस्थावेत्तारो
विचारकाः सर्व्वे मण्डलाध्यक्षाश्च राज्ञा निबूखद्नित्सरेण स्थापितायाः
प्रतिमायाः प्राणप्रतिष्ठायै समागत्य निबूखद्नित्सरेण स्थापितायास्तस्याः
प्रतिमाया अग्रे तस्थिरे। ततः परं घोषक उच्चरवेण घोषयामास, भो ४
प्रजाः, भो जातयः, भो विविधभाषिणः, युष्मान् प्रतीयमाज्ञा विधी-
यते। यस्मिन् काले यूयं शृङ्गवेणुवीणाचतुस्तन्त्रीपरिवादिनीमृदङ्गादीनां ५

विविधवाद्ययन्त्राणां ध्वनिं श्रोष्यथ, तस्मिन्नेव काले न्युब्जीभूय राज्ञा
निबूखद्नित्सरेण स्थापितायाः स्वर्णप्रतिमायाः समक्षं प्रणिपतिष्यथ।
६ यस्तु न न्युब्जीभूय प्रणिपतिष्यति, स तत्क्षणं प्रज्वलितस्याग्निकुण्डस्य
७ मध्ये निक्षेप्स्यते। अतो हेतो र्यस्मिन् काले सर्व्वप्रजास्तेषां शृङ्गवेणुवी-
णाचतुस्तन्त्रीपरिवादिनीमृदङ्गादीनां विविधवाद्ययन्त्राणां ध्वनिम् अ-
श्रौषुस्तस्मिन् काले सर्व्वप्रजा जातयो विविधभाषिणश्च न्युब्जीभूय राज्ञा
निबूखद्नित्सरेण स्थापितायाः स्वर्णप्रतिमायाः समक्षं प्रण्यपतन्।
८ अतस्तस्मिन् काले केचित् कल्दीया नरा उपस्थाय यिहूदीयानां
९ परीवादं चक्रुः। ते कथामारभ्य राजानं निबूखद्नित्सरमूचुः, महाराजो
१० नित्यजीवी भूयात्। भो महाराज, यः कश्चिन्नरः शृङ्गवेणुवीणाचतु-
स्तन्त्रीपरिवादिनीमृदङ्गादीनां वाद्ययन्त्राणां ध्वनिं श्रोष्यति स न्युब्जी-
११ भूयैतस्याः स्वर्णप्रतिमायाः समक्षं प्रणिपततु, यस्तु न न्युब्जीभूय प्रणि-
पतिष्यति, स प्रज्वलितस्याग्निकुण्डस्य मध्ये निक्षिप्यतामिति भवताज्ञा-
१२ पितं। परन्तु बाबिल्मण्डलस्य राजकार्य्ये भवता नियुक्ताः शद्रको मैश-
कोऽबेद्निगुश्चेतिनामानः केचिद् यिहूदीयनरा विद्यन्ते। भो महारा-
ज, ते नरा भवन्तं नाद्रियन्ते, भवतो देवान् नार्चयन्ति, भवता स्थापि-
तायाः स्वर्णप्रतिमायाः समक्षं न प्रणिपतन्ति च।
१३ इदं निशम्य निबूखद्नित्सरः क्रुद्धो रोषवशात् शद्रकस्य मैशकस्याबे-
१४ द्निगोश्चानयनमादिदेश। तदा तेषु नरेषु राज्ञः समक्षमानीतेषु निबू-
खद्नित्सरो वक्तुमारभ्य तान् जगाद, भो शद्रक मैशकाबेद्निगो, इदं किं
युष्माभिरभिप्रेतं? यूयं किं मम देवान् नार्चयथ मत्स्थापितायाः स्वर्ण-
१५ प्रतिमायाश्च समक्षं न प्रणिपतथ? अधुना शृङ्गवेणुवीणाचतुस्तन्त्री-
परिवादिनीमृदङ्गादीनां विविधवाद्ययन्त्राणां ध्वनिं श्रुत्वैव यदि यूय-
मुद्यताः सन्तो न्युब्जीभूय मन्निर्म्मितायाः प्रतिमायाः समक्षं प्रणिपतथ,
[तर्हि रक्षामवाप्स्यथ]; यदि तु न प्रणिपतेत, तर्हि तत्क्षणं प्रज्वलि-
तस्याग्निकुण्डस्य मध्ये निक्षेप्स्यध्वे, मम हस्ताच्च यो युष्मानुद्धरिष्यति स
१६ ईश्वरः कुत्र विद्यते? तदा शद्रको मैशकोऽबेद्निगुश्चोत्तरं कृत्वा राजा-
नमूचुः, भो निबूखद्नित्सर, अत्र भवन्तं किञ्चन प्रतिवदितुमस्माकं
१७ निष्प्रयोजनं। वयं यमर्चयामः सोऽस्माकमीश्वरश्चेत् प्रज्वलितस्याग्नि-
कुण्डस्य मध्यादस्मानुद्धर्त्तुं शक्नुयात् तर्हि सोऽस्मान् महाराजस्य करा-
१८ दप्युद्धरिष्यति। यद्यपि तन्न भवेत्, तथापि, भो महाराज, भवतेदं

ज्ञायतां, वयं भवतो देवान् नैवार्चयिष्यामो भवत्स्थापितायाः स्वर्णप्रतिमायाः समक्षञ्च नैव प्रणिपतिष्यामः।

तदानीं निबूखद्नित्सरो रोषपूर्णस्तस्य वदनञ्च शद्रकं मैशकम् अबे- १९
द्निगुञ्च प्रति विकटाकारमभूत्। स च प्रत्युत्तरं कृत्वा वह्निकुण्डस्य यद्
दीपनमुचितं ततः सप्तगुणैरधिकं दीपनमादिदेश। स्वसेनाया मध्ये २०
वीरत्वविशिष्टान् कतिपयान् पुरुषांश्चाज्ञापयामास, यूयं प्रज्वलित-
वह्निकुण्डमध्ये निक्षेपणार्थं शद्रकं मैशकम् अबेद्निगुञ्च बध्नीत। तदानीम् २१
अन्तर्वस्त्राङ्गत्राणप्रावारादिपरिच्छदान्वितास्ते नरा बद्धाः प्रज्वलितस्या-
ग्निकुण्डस्य मध्ये निक्षिप्ताश्च। अतो हेतो राजाज्ञाया दृढत्वाद् वह्नि- २२
कुण्डस्यात्यन्तिकोत्तापाच्च शद्रको मैशकोऽबेद्निगुश्च यैः पुरुषैरुन्नीतास्ता-
नेवाग्निशिखा जघान। परन्तु शद्रको मैशकोऽबेद्निगुश्चेमे त्रयो नरा २३
बद्धाः सन्तः प्रज्वलितस्य वह्निकुण्डस्य मध्ये निपेतुः।

ततः परं राजा निबूखद्नित्सरस्त्रसित्वा सत्वरमुत्तस्थौ कथामारभ्य २४
स्वमन्त्रिणः पप्रच्छ च, अस्माभिः किं न त्रयो नरा बद्धाः सन्तो वह्नि-
मध्ये निक्षिप्ताः? त उत्तरं कृत्वा राजानमूचुः, महाराज, तत् सत्यं।
तेन प्रत्युत्तरं कृत्वावादि, पश्यताहं बन्धनहीनान् चतुरो नरान् वह्निमध्ये २५
पर्य्यटतो वीक्षे, तेषु कापि क्षति र्न विद्यते, ईश्वरपुत्रस्येव चतुर्थस्याकृतिः
प्रतिभाति च।

अनन्तरं निबूखद्नित्सरस्तस्य प्रज्वलितस्याग्निकुण्डस्य द्वारमुपस्थाय २६
जगाद, भो परात्परस्येश्वरस्य दासाः शद्रकमैशकावेद्निगवः, निर्गम्या-
यात। ततः शद्रको मैशकोऽवेद्निगुश्च वह्निमध्यान्निश्चक्रमुः। अपरं २७
क्षितिपाला अधिपतयः शासका राजमन्त्रिणश्च समागत्य तान् नरान्
परीक्ष्य ददृशुः, वह्निना तेषां गात्राणि न पराभूतानि, शिरसां केशो
न दग्धः, अन्तर्वस्त्राणि न विकृतानि, वह्नेर् गन्धोऽपि तेषु न व्याप्तः।

अपरं निबूखद्नित्सरो वक्तुमारभ्य जगाद, एतेषां शद्रकमैशकाबे- २८
द्निगूनाम् ईश्वरो धन्यो भूयात्, यतः स स्वदूतं प्रहित्य तान् स्वदा-
सान् उद्धार, ये निजेश्वराद् अन्यं कमपीश्वरम् अर्चयितुं प्रणिप-
तितुञ्चानिच्छातस्तमेव श्रद्धाय राजाज्ञां लङ्घितवन्तः स्वशरीराणि च
न्यस्तवन्तः। मया चेयमाज्ञा विधीयते, प्रजाजातिविविधभाषिणां २९
मध्ये यः कश्चित् शद्रकमैशकाबेद्निगूनामीश्वरस्य प्रतिकूलां कथां गदति,
स खण्डशः कर्त्तिष्यते तस्य गृहञ्च मलराशी परिणतं भविष्यति, यतो

३० हेतोरीदृशमुद्धारं कर्त्तुं समर्थोऽपर ईश्वरो नास्ति। अनन्तरं राजा
शद्रकं मैशकमबेद्निगुञ्च बाबिल्मण्डले कुशलान्वितान् विदधे।

---

४ चतुर्थोऽध्यायः।

१ निबूखद्नित्सरस्यादेशः ४ तस्य कथनं ९ तस्य स्वप्नवर्णनं १९ दानीयेलेन स्वप्नार्थज्ञापनं २८ स्वप्नार्थस्य सफलत्वञ्च।

१ राजा निबूखद्नित्सरः कृत्स्नभूमण्डलनिवासिनः सर्व्वप्रजाजातिवि-
२ विधभाषिण इदं ज्ञापयति। युष्माकं महती शान्तिर्भूयात्। परात्पर
ईश्वरो मयि यान्यभिज्ञानान्याश्चर्य्यकर्म्माणि च विदधे, तेषां विज्ञापनं
३ ममाभिमतं। तस्याभिज्ञानानि कीदृङ्महान्ति! तस्याश्चर्य्यकर्म्माणि च
कीदृक् प्रभावयुक्तानि! तस्य राजत्वम् अनन्तकालीनराजत्वं, तस्याधि-
पत्यञ्च पुरुषपरम्परां यावत् स्थास्नु।
४ अहं निबूखद्नित्सर आत्मगृहे प्रशान्त आत्मप्रासादे सतेजाश्चासं।
५ तदा स्वप्न एको मयादर्शि, तेनाहं त्रासितः शयनकाले सञ्जाता मम
६ विविधचिन्ता मानसिकदर्शनानि च माम् उद्वेजयाञ्चक्रुः। अतो मह्यं
तत्स्वप्नार्थस्य निवेदनाय बाबिल्स्थितानां सर्व्वेषां ज्ञानिनां मत्समक्षम्
७ आनयनस्याज्ञा मया ददे। तदा ते मन्त्रवेत्तारो गणकाः कल्दीया
दैवज्ञाश्च मत्समीपमाजग्मुः, परन्तु तेषां समक्षं मया स्वप्ने कथिते ते
८ मां तस्यार्थं न ज्ञापयामासुः। अवशेषे तु मद्देवस्य नामतो बेल्टिशत्सर
इतिनामविशिष्टस्य यस्य नरस्यान्तरे पवित्रदेवानामात्मा विद्यते स
९ दानीयेलो मत्समक्षमाजगामाहञ्च तं स्वप्नं तस्मै न्यवेदयं, यथा, भो
मन्त्रवेत्तॄणां प्रमुख्य बेल्टिशत्सर, पवित्राणां देवानामात्मा त्वयि विद्यते,
काचन निगूढा कथा तव क्लेशकरा न भवति तदहं जाने; मया लब्धानि
१० स्वप्नदर्शनानि तदर्थञ्च मां वद। शयानस्य मम मानसिकदर्शनानीमानि;
मया निरीक्षमाणेन महीतलस्य मध्यस्थले स्थित एको महीरुहोऽदर्शि
११ तस्योच्चता प्रकाण्डा। स महीरुहो महान् दृढो दैर्घ्येण गगनस्पर्शी,
१२ आकृत्स्नभूमण्डलप्रान्ताद् दृश्यश्च बभूव। तस्य पत्रभूषा रुचिरा फलानि
प्रचुराणि, तदाश्रितानां सर्व्वेषां भक्ष्यमविद्यत, तदधस्ताद् वन्यजीवि-
नश्छायामसेवन्त, तच्छाखासु खेचरपक्षिणो न्यवसन्, सर्व्वप्राणिभिश्च
१३ तस्मादाहारोऽलम्भि। अनन्तरं शयानेन मया स्वमानसिकदर्शनक्रमतो

निरीक्षमाणेन स्वर्गादवरोहन्नेको जागरूकोऽथच पवित्रो व्यक्तिरदर्शि।
स प्रोच्चरवमुदीरयन् व्याजहार, यूयं तं महीरुहम् उच्छिन्त, तस्य १४
शाखाः छन्तत, तस्य पत्राण्यवभङ्क्त, तस्य फलानि विकिरत, तन्नीचतो
जीविनस्तच्छाखाभ्यश्च पक्षिणः पलायन्तां। तथापि भूमौ लौहताम्र- १५
मये बन्धने बद्धं तस्य समूलं काण्डं क्षेत्रस्य तृणे विजहीत, स चाकाशीय-
शिशिरेण सिच्यतां, जीविभिः सह भूम्युत्पन्नौषधी भजताञ्च। तस्य हृदयं १६
मानवहृदयादन्यद् भूत्वा परिवर्त्तयिष्यते, पशो र्हृदयं तस्मै दायिष्यते,
इत्थं तस्योपरि सप्तकालाः परिवर्त्तिष्यन्ते। इयं वार्त्ता जागरूकाणां १७
शासनमूलका, अयं विषयश्च पवित्राणाम् उक्तिमूलकः। एतस्याभि-
प्रायोऽयं, मर्त्यानां राज्ये स परात्पर आधिपत्यं कुरुते, स तद् यस्मै
दातुमिच्छति तस्मै ददाति, मनुष्याणां नीचतमं तत्राधिकरोति चेति
जीविते र्ज्ञायतां। राजा निबूखद्नित्सरो योऽहं मयायं स्वप्नोऽदर्शि, १८
त्वञ्च, भो बेल्टिशत्सर, तस्यार्थं मां वद, यतो हेतो र्मम राज्ये यावन्तो
ज्ञानिनो विद्यन्ते ते मां तस्यार्थं ज्ञापयितुं न शक्नुवन्ति, त्वन्तु समर्थोऽसि,
यतः पवित्राणां देवानामात्मा त्वयि विद्यते।

तदानीं बेल्टिशत्सरनामा स दानीयेलो दण्डैकं यावत् क्षुब्धस्तस्थौ १९
स्वचिन्ताभि र्विह्वलीबभूव च। ततो राजा जगाद, भो बेल्टिशत्सर,
तेन स्वप्नेन तदर्थेन च विह्वलो मा भूः। बेल्टिशत्सर उत्तरं कृत्वा
जगाद, भो मत्प्रभो, स स्वप्नो भवच्छत्रुषु तदर्थश्च भवद्विपक्षेषु वर्त्ततां।
भवता दृष्टो यो महीरुहो महान् दृढो दैर्घ्येण गगनस्पर्शी कृत्स्नभूमण्डले २०
दृश्यो रुचिरपत्रः प्रचुरफलश्चाभवत्, यदाश्रितानां सर्व्वेषां भक्ष्यमवि- २१
द्यत, यस्य तले वनजीविन आश्रयन्त, यस्य शाखासु च खेचरपक्षिणो
न्यवसन्, स महीरुहो भवानेव, भो महाराज; भवान् महान् परा- २२
क्रान्तश्च जातः, भवतो महत्त्वं विशालं गगनस्पर्शि च, भवत आधि-
पत्यञ्च भूमण्डलप्रान्तपर्य्यन्तं व्याप्तं। महाराजेन च स्वर्गादवरोहन्नेको २३
जागरूकोऽथच पवित्रो व्यक्तिरदर्शि तेनेत्थमवादि च, यूयं तं महीरुह-
मुच्छिन्त नाशयत च, परन्तु भूमौ लौहताम्रमये बन्धने बद्धं तस्य समूलं
काण्डं क्षेत्रस्य तृणे विजहीत, स आकाशीयशिशिरेण सिच्यतां वन-
जीविनां समानांशी भवतु चेत्थं तस्योपरि सप्तकालाः परिवर्त्तन्तामिति,
भो महाराज, एतस्यार्थोऽयं, अत्र च परात्परस्येदं शासनं। भो मत्- २४
प्रभो महाराज, भवति तद् वर्त्तिष्यते। भवान् मनुष्याणां सङ्घादपास्तो २५

वनजीविनां सहवासी भविष्यति गोभ्य इव भवते तृणभक्ष्यं दायिष्यते
व्योम्नः शिशिरेण भवतः सेचनं जनैरनुज्ञायिष्यते च; इत्थं मर्त्त्यानां
राज्ये स परात्पर आधिपत्यं कुरुते स च तद् यस्मै दातुमिच्छति तस्मै
ददातीति यावद् भवता न ज्ञायिष्यते तावत् सप्तकाला भवत उपरि
२६ परिवर्त्तिष्यन्ते। परन्तु तस्य महीरुहस्य समूलः काण्डो विहातव्य एत-
स्यायमर्थः, स्वर्गस्यैवाधिपत्यमस्तीति भवता ज्ञाते सत्येव भवतो राजत्वं
२७ भवतः कृते पुनः प्रभविष्यति। अतो भो महाराज, मम मन्त्रणा भवते
रोचतां, भवतः शान्ते दीर्घस्थायित्वं यथा भवेत्, तदर्थं भवान् धार्म्मि-
कतया स्वपापानि दुःखिषु कृपया स्वापराधांश्चोन्मुञ्चतां।
२८ सर्व्वमेतद् राज्ञि निबूखद्नित्सरे सफलीबभूव। द्वादशमासेभ्यः परं
३० स बाबिल्स्थितस्य राजप्रासादस्य पृष्ठे गतायातमकुरुत। तदानीं राजा
वक्तुमारभ्य जगाद, स्वपराक्रमस्य सामर्थ्येन स्वादरणीयतायाः शोभायै
चाहं यां राजपुरीं कृत्वा निर्म्मितवान् इयं किं सा महती बाबिल्
३१ नास्ति? राज्ञो जिह्वाग्र एतस्मिन् वाक्ये विद्यमाने स्वर्गादेका वाणी
निपपात, यथा, भो राजन् निबूखद्नित्सर, त्वां प्रतीदमुच्यते, राजत्वं
३२ त्वत्तोऽपगतं। त्वं मनुष्याणां सङ्घादपास्तो वनजीविनां सहवासी भवि-
ष्यसि गोभ्य इव तुभ्यं तृणभक्ष्यं दायिष्यते; मर्त्त्यानां राज्ये परात्पर
आधिपत्यं कुरुते स च तद् यस्मै दातुमिच्छति तस्मै ददातीति यावत्
३३ त्वं न ज्ञास्यसि तावत् तवोपरि सप्तकालाः परिवर्त्तिष्यन्ते च। तस्मि-
न्नेव निमिषे तद् वाक्यं निबूखद्नित्सरे सिद्धिं प्राप, स च मनुष्याणां
सङ्घादपास्तो गोवत् तृणान्यभक्षयत, तस्य शरीरमाकाशीयशिशिरेणा-
सिच्यत च। ततः शेषे गरुत्मतामिव तस्य शिरोरुहाः पक्षिणामिव
तस्य नखाश्च दीर्घा बभूवुः।
३४ तेषां दिनानामन्ते त्वहं निबूखद्नित्सरः स्वर्गं प्रत्युच्चदृष्टिमकार्षं, ततो
मम ज्ञानं मां प्रति परावृत्ते, अहञ्च तं परात्परं धन्यमवादिषं तम्
अनन्तजीविनमस्ताविषमादृषि च, तस्याधिपत्यमनन्तस्थाय्याधिपत्यं, तस्य
३५ राजत्वञ्च पुरुषपरम्परां यावत् स्थिरं। पृथिवीनिवासिनः सर्व्वे चाव-
स्तुवद् गण्यन्ते द्युवाहिन्यां भूवासिषु च स स्वेच्छानुरूपमाचारं कुरुते
तस्य करमाहत्य किं करोषीति तं यो वदेत् तादृशः कोऽपि न विद्यते।
३६ तस्मिन् काले मम ज्ञानं मां प्रति परावर्त्तिष्ट, मम राजत्वस्य शोभायै
ममादरो मम प्रतापश्च मां प्रति परावर्त्तिषातां, मम मन्त्रिणो मम

कुलीनाश्च मामन्वैषिषुः पुनः स्वराजत्वे ऽधिकृतस्य ममोत्कृष्टं महत्त्वमव-
र्धिष्ट। इदानीमहं निबूखद्नित्सरः स्वर्गराजस्य स्तवं प्रतिष्ठां समाद- ३७
रञ्च करोमि, यतस्तस्य सर्व्वं कर्म्म सत्यं तस्य मार्गाश्च न्याय्याः, यतश्च
स दर्पाचारिणो नामयितुं समर्थोऽस्तीति।

---

५ पञ्चमोऽध्यायः।

१ बेलशत्सरस्य भोज्यं ५ कुड्येऽङ्गुल्या लेखनं तत्पठनार्थं राज्ञा गणकानामाह्वानं १० तेषामसामर्थ्याद् दानीयेलस्याह्वानं १३ दानीयेलं प्रति राज्ञः कथनं १७ राजानं प्रति दानीयेलस्य तिरस्करणं लेखनार्थस्य ज्ञापनञ्च।

एकदा राजा बेलशत्सरः स्वीयसहस्रकुलीनानां कृते महासम्भोजनं १
कृत्वा तेषां सहस्रनराणां समक्षं द्राक्षारसमपिवत्। द्राक्षारसास्वाद- २
नकाले बेलशत्सरोऽब्रवीत्, मम पित्रा निबूखद्नित्सरेण यानि सुवर्ण-
दुर्वर्णमयानि पात्राणि यिरूशालमस्थप्रासादाद् अपहृतानि तान्यानी-
यन्तां, राजा तस्य कुलीननरास्तस्य भार्य्या उपपत्न्यश्च तेषु पास्यन्ति।
तदानीं यिरूशालमस्थप्रासादादर्थत ईश्वरीयमन्दिरादपहृतेषु तेषु सुव- ३
र्णपात्रेष्वानीतेषु राजा तस्य कुलीनास्तस्य भार्य्या उपपत्न्यश्च तेषु पातुं
प्रावर्त्तिषत। ते द्राक्षारसं पिवन्तः स्वर्णरूप्यताम्रलौहकाष्ठप्रस्तरम- ४
यान् देवान् अस्तुवन्।

तस्मिन् निमिषे नरहस्तस्याङ्गुल्यः प्रगत्य दीपवृक्षस्य सम्मुखे राज- ५
प्रासादस्य कुड्यस्य चूर्णलेपेऽलिखन्, राजा च तं लिखन्तं हस्ताग्रम्
अदर्शत्। तदानीं राज्ञो वर्णो व्यकारि तदीयचिन्ताश्च तं जिह्लीचक्रुः, ६
तस्य कटिग्रन्थिः शिथिलीबभूव, तस्य जानू च परस्परमाजघ्नतुः। राजो- ७
च्चैःस्वरेण व्याजहार, गणकाः कल्दीया दैवज्ञाश्चानीयन्तां। अपरं
राजा वक्तुमारभ्य बाबिल्स्थितान् ज्ञानिनो जगाद, यः कश्चिन्मनुष्य इमां
रचनां पठित्वा मह्यं तस्या अर्थं निवेदयिष्यति स कृष्णलोहितवर्णपरि-
च्छदेन कण्ठदेशे च स्वर्णहारेण भूषयिष्यते राज्यस्य तृतीयोऽधिपति
र्भविष्यति च। तदानीं राज्ञः सर्व्वे ज्ञानिनो नरा आजग्मुस्तां तु ८
रचनां पठितुं राजानं वा तदर्थं ज्ञापयितुं न शेकुः। अतो राजा ९
बेलशत्सरोऽतीव विह्लीबभूव तस्य वर्णश्च विचक्रे तस्य कुलीननराश्चो-
द्विविजिरे। अनन्तरं राज्ञस्तदीयकुलीनानाञ्च वचनाद् राज्ञी भोजन- १०

शालामाजगाम। सा राज्ञी वक्तुमारभ्य व्याजहार, महाराजो नि-
त्यजीवी भूयात्, त्वं स्वचिन्ताभि र्मा विकलोभव तव वर्णश्च मा विक्रि-
११ यतां। पवित्रदेवानामात्मा यस्यान्तरे वसति तादृश एको नरस्तव
राज्ये विद्यते, तव पितुः काले च बुद्धिः कौशलम् ईश्वरीयज्ञानतुल्यं
ज्ञानञ्च तस्मिन् प्रापि, तव पिता निबूखद्नित्सरः, भो राजन्, तवैव
पिता तं मन्त्रवेत्तृणां गणकानां कल्दीयानां दैवज्ञानाञ्चाध्यक्षं कृत्वा नि-
१२ युक्तवान्। यतो हेतोरुत्कृष्ट आत्मा ज्ञानं स्वप्नार्थज्ञापकं प्रहेलिकाबोधकं
ग्रन्थिहरं कौशलञ्च तस्मिन् दानीयेले प्रापि यस्मै बेल्टिशत्सर इति
नाम राज्ञा दत्तं। अतः स दानीयेल आहूयतां स एतस्यार्थं ज्ञाप-
यिष्यति।

१३ अनन्तरं दानीयेले राज्ञः समक्षमानीते राजा वक्तुमारभ्य दानीयेलं
पप्रच्छ, मम पिता महाराजो यिहूदीयान् यान् निर्व्वासितजनान् यि-
१४ हूदादेशाद् आनीतवान् त्वं किं तेषां मध्ये गणितो दानीयेलः? देवानाम्
आत्मा त्वयि विद्यते बुद्धिः कौशलम् उत्कृष्टं ज्ञानञ्च त्वयि प्रापीति
१५ त्वामधि मया श्रुतं। अधुनैतस्या रचनायाः पाठाय मह्यं तदर्थनिवे-
दनाय च ज्ञानिनो गणका मत्समीपमानिन्यिरे ते तु तस्याः कथाया अर्थं
१६ ज्ञापयितुं न शक्नुवन्ति। त्वन्त्वर्थकथने ग्रन्थिहरणे च समर्थोऽसीति
त्वामधि मयाश्रावि; अतस्त्वं चेदिमां रचनां पठितुं माञ्च तदर्थं ज्ञा-
पयितुं शक्नुयास्तर्हि कृष्णलोहितवर्णपरिच्छदेन कण्ठे च स्वर्णहारेण
भूषयिष्यसे राज्यस्य तृतीयोऽधिपति र्भविष्यसि च।

१७ तदानीं दानीयेल उत्तरं कृत्वा राज्ञः समक्षं जगाद, भवत उपहारा
भवतस्तिष्ठन्तु भवान् स्वपारितोषिकाण्यपरस्मै कस्मैचिद् ददातु, तथा-
प्यहं महाराजस्य कृत इमां रचनां पठिष्यामि भवन्तं तदर्थं ज्ञापयि-
१८ ष्यामि च। भो महाराज, परात्पर ईश्वरो भवतः पित्रे निबूखद्नित्स-
१९ राय राज्यं महत्त्वम् ऐश्वर्य्यम् आदरणीयत्वञ्च दत्तवान्। स तस्मै यन्म-
हत्त्वं दत्तवान् तस्मात् सर्व्वप्रजाः सर्व्वजातयः सर्व्वभाषिणश्चाकम्पन्त
तत्साक्षाद् अबिभयुश्च। स यं हन्तुमैच्छत् तमहन्, यञ्च जीवयितुमैच्छत्
तमजीवयत् यम् उच्चीकर्त्तुमैच्छत् तमुच्चमकरोत्, यञ्च नीचं कर्त्तुमैच्छत्
२० तं नीचमकरोत्। यदा तु तस्य हृदयमुद्धतमभूत् तस्यात्मा च दुःसा-
हसाय जडतामयात् तदा स स्वराजसिंहासनान्निपातितो निजैश्वर्य्याद्
२१ भ्रष्टश्च बभूव। स च नरसन्तानानां सङ्घादपास्तः, तस्य हृदयञ्च पशु-

हृदयेन समं बभूव, स वनगर्द्दभैः सङ्गेऽवसत् गोभ्य इव तस्मै तृणभ-
क्ष्यमदीयत, व्योम्नः शिशिरेण तस्य शरीरमसिच्यत च, परन्तु मर्त्त्यराज्ये
परात्पर ईश्वर आधिपत्यं कुरुते, यमिच्छति तमेव तत्राधिकरोति चेति
शेषे तेनाज्ञायि। तस्यैव तु पुत्त्रो बेलशत्सरो भवान् सर्व्वमेतज्ज्ञात्वापि २१
स्वहृदयं न नम्रीकृतवान्। परन्तु स्वर्गनाथस्योपर्य्यात्मानमुच्चीकृतवान्, २२
तस्यैव मन्दिरस्य पात्रेषु भवतः समक्षमानीतेषु भवान् भवतः कुलीन-
नरा भवतः पत्न्य उपपत्न्यश्च तेषु द्राक्षारसम् अपिवन्, भवांश्च
दृष्टिहीनान् श्रवणहीनान् ज्ञानहीनांश्च दुर्व्वर्णसुवर्णपित्तललोहकाष्ठ-
प्रस्तरमयान् देवान् अस्तवीत्, भवतः श्वासस्तु यस्य हस्तगतो भवतः
सर्व्वगतिश्च यस्याधीना तमीश्वरं भवान् नैवाद्रियत। तदा तत्समीपतः २४
प्रहितेनैतेन हस्ताग्रेण रचनेयं लिलिखे। लिखिता सा रचनेयं, यथा, २५
मिने, मिने, तिकेल्, ऊपारसीन्, [अस्यार्थः, गणितं, गणितं, तुलया
परिमितं, खण्डशः कृतञ्चेति]। कथायाश्च तात्पर्य्यमेतत्, गणितं, २६
ईश्वरेण भवतो राजत्वं गणितं निःशेषितञ्च। परिमितं, भवान् तुला- २७
यष्ट्या परिमितो लघीयान् निर्णीतश्च। खण्डशः कृतं, भवतो राज्यं २८
खण्डशः कृतं मादीयेभ्यः पारसीयेभ्यश्च प्रदायिष्यते।

तदानीं बेलशत्सरस्याज्ञातो दानीयेलः कृष्णलोहितपरिच्छदं परि- २९
धापयाञ्चक्रे तस्य कण्ठदेशे स्वर्णहारो ददे च, स राज्यस्य तृतीयोऽ-
धिपति र्भविष्यतीदं घोषयाञ्चक्रे च। तस्यामेव रजन्यां कल्दीयानां ३०
राजा बेल्शत्सरो निजघ्ने। अपरं मादीयो दारा राजत्वं लेभे, स च ३१
न्यूनाधिकं द्विषष्टिवर्षवयस्क आसीत्।

---

६ षष्ठोऽध्यायः।

१ दाराराजेन शासनपदे दानीयेलस्य नियोजनं ४ तद्विरुद्धमध्यक्षाणां कुमन्त्रणं
१० तेषां परीवादात् सिंहखाते दानीयेलस्य निक्षेपणं १८ तस्य रक्षायां राज्ञ
आनन्दः २४ तत्परीवादकानां विनाशः २५ सर्व्वप्रजाः प्रति भूपतेराज्ञापत्रञ्च।

दारा विमृश्य राज्यस्य सर्व्वत्रावस्थानार्थं विंशत्यधिकशतं क्षिति- १
पालान् राज्येऽधिचकार। ते क्षितिपालाश्च राज्ञः क्षतिनिवारणार्थम् २
आयव्ययगणनां येषु समर्पयेयुस्तादृशांस्त्रीन् अध्यक्षांस्तेष्वधिचकार, दा-
नीयेलश्च तेषामेको जन आसीत्। तदा दानीयेलस्तेभ्योऽध्यक्षेभ्यः क्षि- ३

तिपालेभ्यश्च व्यशिष्यत, यस्माद् उत्कृष्ट आत्मा तस्मिन्नविद्यत, अतो
राजा कृत्स्ने राज्ये तमधिकर्त्तुं मतिमकुरुत।
४ अतस्तेऽध्यक्षाः क्षितिपालाश्च दानीयेलस्य प्रातिकूल्याद् राजकर्म्मणि
कमपि दोषं प्राप्तुमयतन्त, किन्तु कमपि दोषं किमप्यपकर्म्म वा प्राप्तुं
नाशक्नुवन्, यतः स विश्वास्य आसीत् तस्मिंश्च कोऽपि दोषः किमप्य-
५ पकर्म्म वा न प्राप्यत। अतस्ते नरा जगदुः, एतस्य दानीयेलस्यापरः
कोऽपि दोषोऽस्माभि र्न प्राप्स्यते, केवलं तदीयेश्वरस्य व्यवस्थायां तस्य
६ प्रतिकूलः कश्चन दोषः प्राप्तुं शक्यते। अतस्तेऽध्यक्षाः क्षितिपालाश्च सर्व्वे
राजानं समभिद्रुत्य जगदुः, महाराजो दारा नित्यजीवी भूयात्।
७ राज्यस्य सर्व्वेऽध्यक्षा अधिपतयः क्षितिपाला मन्त्रिणः शासकाश्च मन्त्र-
णामेकां चक्रिरे, फलतस्त्रिंशद्दिनानि यावद् यः कश्चिद् भवतो
महाराजादन्यं कमपि देवं मनुष्यं वा किमपि प्रार्थयिष्यते, स सिंहानां
खाते निक्षेप्स्यत इति विधिर्महाराजेन विधीयतां प्रतिषेधश्च निरूप्यतां।
८ अतो भो महाराज, भवान् तं प्रतिषेधं विदधातु, मादीयानां पारसी-
यानाञ्चालोप्यव्यवस्थाया नियमेन यत् पत्रमन्यथा कर्त्तुं न शक्यते ता-
९ दृशं राजपत्रं रचयतु च। अतो हेतो र्दाराराजस्तत् पत्रं तं प्रतिषेधञ्च
रचयामास।
१० अपरं तत् पत्रं रचयाञ्चक्र इति ज्ञात्वा दानीयेलः स्वगृहं जगाम।
तत्पृष्ठस्थिते कोष्ठे यिरूशालमो दिश्युद्घाटितानि वातायनान्यासन्। स
च प्रतिदिनं त्रिकृत्वो निजेश्वरस्य समक्षं जानुनी पातयित्वा विनतिं
११ प्रशंसाञ्चाकुरुत, यतो हेतोः स पूर्व्वमपि तदेव कृतवान्। तदा ते नराः
समभिद्रुत्य निजेश्वरस्य समक्षं प्रार्थयमानं प्रसादयन्तञ्च दानीयेलमा-
१२ सादयामासुः। तदा ते गत्वा राज्ञः सम्मुखं राजकीयप्रतिषेधमधि जगदुः,
भो महाराज, त्रिंशद्दिनानि यावद् यो जनो भवतोऽन्यं कमपि
देवं मनुष्यं वा किञ्चन प्रार्थयिष्यते स सिंहानां खाते निक्षेप्स्यत इति
प्रतिषेधः किं भवता न रचितः? राजोत्तरं कृत्वा व्याजहार, मादी-
यानां पारसीयानाञ्चालोप्यव्यवस्थाया नियमेन सा कथा स्थिरीकृता।
१३ ततस्ते प्रत्युत्तरं कृत्वा राज्ञः समक्षं जगदुः, भो महाराज, यिहूदादे-
शान्निर्व्वासितजनानां मध्ये गणितः स दानीयेलो भवति भवद्रचिते
१४ प्रतिषेधे वा मनो न निधत्ते, स दिने वारत्रयं स्वप्रार्थनां कुरुते। एतद्
वाक्यं श्रुत्वा राजातीव विषण्णमना बभूव दानीयेलस्य रक्षार्थं यत्नं वि-

दधे च, सूर्य्यास्तगमनपर्य्यन्तमेव स तस्योद्धाराय प्रयेते। तदानीन्तु ते १५
जना राजानं समभिद्रुत्य जगदुः, यः कश्चन प्रतिषेधो विधि र्वा राज्ञा
स्थिरीकृतस्तदन्यथा करणमविधेयमिति मादीयानां पारसीयानाञ्च
व्यवस्थास्तीति महाराजेन ज्ञायतां। अनन्तरं राज्ञ आज्ञातो दानी- १६
येल आनीतः सिंहानां खाते निक्षिप्तश्च। परन्तु राजा वक्तुमारभ्य दा-
नीयेलं जगाद, त्वं यस्य सेवां निरन्तरं करोषि स त्वदीयेश्वरस्त्वां रक्ष-
तु। अपरं प्रस्तर एक आनीतः खातमुखे स्थापितश्च, दानीयेलञ्चाधि १७
यथा किञ्चिदप्यन्यथा न क्रियेत तदर्थं राजा निजमुद्रया स्वीयकुलीन-
नराणां मुद्रया च तं प्रस्तरमङ्कयामास।

ततः परं राजा स्वप्रासादं गत्वानाहारेण रात्रिं यापयामास स्वस- १८
मीपमुपभोग्यस्य कस्यचिद् वस्तुन आनयनं नानुजज्ञे तस्य निद्रा च
तस्मादपजगाम। प्रत्यूषे तु राजारुणोदय उत्थाय सत्वरं सिंहखात- १९
समीपं चक्राम। खातस्यान्तिकमागत्यैव शोकसूचकेनोच्चस्वरेण दानी- २०
येलं सम्बोधयामास च। राजा वक्तुमारभ्य दानीयेलमुद्दिश्य व्याज-
हार, भो जीवत ईश्वरस्य दास दानीयेल, त्वं यस्य सेवां निरन्तरं
करोषि स त्वदीयेश्वरः किं सिंहेभ्यस्त्वां रक्षितुं समर्थ आसीत्? तदानीं २१
दानीयेलो राजानमित्थमाललाप, महाराजो नित्यजीवी भूयात्। ममे- २२
श्वरेण स्वदूतं प्रहित्य सिंहानां मुखानि बद्धानि ततस्ते मां न हिंसि-
तवन्तः, यतो हेतोस्तस्य साक्षान्मयि शुद्धता प्रापि, भो महाराज,
भवतोऽपि समक्षं काचन दुष्क्रिया मया नाकारि। ततो राजा स्वा- २३
न्तरेऽतीव जहर्ष खाताद् दानीयेलस्योद्धारमादिदेश च। तदा दा-
नीयेलः खातादुद्धृतः, तस्मिंश्च कापि हिंसा न दृष्टा, यतः स निजेश्वरं
श्रद्धितवान्।

अनन्तरं राज्ञ आदेशाद् दानीयेलस्य परीवादकास्ते नराः स्वस- २४
न्तानैः स्वभार्य्याभिश्च सार्द्धमानीताः सिंहखाते निक्षिप्ताश्च। तैस्तु खा-
तस्य भूमौ न प्राप्तायां सिंहास्तान् आत्मसात् कृत्वा तेषां सर्व्वास्थीनि
चूर्णयामासुः।

ततः परं राजा दाराः कृत्स्नभूमण्डलवासिनीः सर्व्वप्रजाः सर्व्वजातीः २५
सर्व्वभाषिजनांश्च प्रति पत्रेणेदं लेखयामास, युष्माकं महाकुशलं भूयात्।
मत्प्रत्यक्षत आज्ञेयं विज्ञाप्यते, मम राज्यस्य सर्व्वमण्डले दानीयेलस्येश्व- २६
रात् सर्व्वे कम्पन्तां बिभ्यतु च, यतो हेतोः स जीवदीश्वरोऽनन्तस्थायी

२७ च तस्य राजत्वम् अविनाश्यं तस्याधिपत्यञ्च युगान्तपर्य्यन्तं। स रक्षिता
स उद्धर्त्ता स स्वर्गमह्योरभिज्ञानानाम् अद्भुतकर्म्मणाञ्चानुष्ठाता, यतः
स दानीयेलं सिंहानां करेभ्यो रक्षितवान्।
२८ अनन्तरं स दानीयेलो दारा राजत्वकाले पारसीयकोरसस्य राजत्व-
काले च कुशलान्वितोऽवतस्थे।

---

७ सप्तमोऽध्यायः।

१ चतुर्णां जन्तूनां दर्शनं ९ ईश्वरीयराजत्वस्य विवरणं १५ दर्शनस्य तात्पर्य्यञ्च।

१ बाबिलीयराजस्य बेलशत्सरस्य प्रथमे वत्सरे शय्यायां [शयानो]
दानीयेलः स्वप्नं मानसिकदर्शनानि च ददर्श। अनन्तरं स तं स्वप्नं लि-
२ लेख कथानां सारं कथयामास च। दानीयेलो वक्तुम् आरभ्य कथयामास
मम रात्रिकालीयदर्शने निरीक्षमाणेन मयादर्शि, व्योम्नश्चत्वारो वाय-
३ वो महासागरमाचक्रमुः। सागराच्च विशालाश्चत्वारो जीविन उत्तस्थुः,
४ तेषामेकोऽन्यस्माद्भिन्नः। प्रथमः सिंहस्य सदृश उत्क्रोशपक्षीव पक्षवि-
शिष्टश्च, मयि निरीक्षमाणे तु शेषे तस्य पक्षावुत्पाटितौ स च भूमित
उत्थापितो नर इव स्वचरणयोः स्थापितश्च मानवचित्तञ्च तस्मै दत्तं।
५ अनन्तरं पश्य द्वितीयोऽन्यो जीव्यविद्यत स भल्लूकोपमः स एकपार्श्वेनो-
दतिष्ठत् तस्य मुखे च दन्तानां मध्ये त्रीणि पार्श्वकास्थीन्यविद्यन्त, तस्मै
६ चेयमाज्ञादायि, उत्तिष्ठ प्रचुरमांसं भक्षयस्व। ततः परं निरीक्ष-
माणेन मयापर एको जीवी दृष्टः, स द्वीपिनः सदृशः, तस्य पृष्ठदेशे
च पक्षिणश्चत्वारः पक्षा अविद्यन्त, तस्य चत्वारि शिरांस्यासन्, आधि-
७ पत्यञ्च तस्मै दत्तं। ततः परं मया रात्रिकालीयदर्शने निरीक्षमा-
णेन चतुर्थ एको जीवी दृष्टः, स भयङ्करो बलवान् अतीव विक्रा-
न्तश्च, तस्य विशाला लौहदन्ता आसन् स चाग्रसदचूर्णयच्चोच्छिष्टं
पदाभ्याममर्द्दाच्च, पूर्व्वेभ्यः सर्व्वजीविभ्यः स भिन्नस्तस्य दशशृङ्गाणि
८ चासन्। तेषु शृङ्गेषु मया मनो निधायादर्शि, तेषां मध्ये क्षुद्रमन्यदेकं
शृङ्गमुत्पेदे तस्य समक्षम् आद्यानां त्रीणि शृङ्गाण्युत्पाटयाञ्चक्रिरे, अपि
च तस्मिन् शृङ्गे मानवनेत्रसदृशे नेत्रे दर्पवाक्यवादि वक्त्रञ्चाविद्यन्त।
९ अनन्तरं मयि निरीक्षमाणे शेषे कतिपयान्युच्चासनानि संस्थापया-
ञ्चक्रिरे बहुवयस्क एको वृद्धश्चोपविवेश तस्य परिच्छदस्तुषारवच्छुक्लो

मूर्द्ध्नः केशाश्च विमलानां मेषलोम्नां सदृशाः सिंहासनं वह्निशिखामयं
तच्चक्राण्युज्ज्वलाग्निमयानि। अग्निप्रवाह एको वहंस्तदग्रतो निर्ग- १०
च्छति, सहस्राणां सहस्राणि तं परिचरन्ति, अयुतानाम् अयुतानि
तत्समक्षं तिष्ठन्ति च। विचारसभोपविवेश पुस्तकानि च विवव्रे।
मया निरीक्षमाणेन शेषे त्वदर्शि तत् शृङ्गं यानि व्याहरत् तेषां ११
सर्व्वेषां दर्पवाक्यानां रवात् स जीवी व्यापादितस्तस्य शरीरञ्च निहतं
वह्निचितायां समर्पितञ्च। तदन्येषामपि जीविनामाधिपत्यं प्राणश्यत्, १२
यतः कालं दण्डञ्च यावत् तेभ्य आयुषो दैर्घ्यं दत्तमासीत्। रात्रिकाली- १३
यदर्शने मया निरीक्षमाणेनादर्शि व्योम्नो मेघैः सह मनुष्यपुत्त्रोपमः
कश्चिद् आगच्छंस्तस्य बहुवयस्कस्य वृद्धस्य सन्निधिं प्राप तस्य सम्मुख-
मानिन्ये च। तस्मै चाधिपत्यं प्रतापो राजत्वञ्च ददिरे सर्व्वप्रजाः सर्व्व- १४
जातयः सर्व्वभाषिणश्च तमसेवन्त, तस्याधिपत्यमनन्तकालीयमलोप्य-
माधिपत्यं तस्य राजत्वञ्चाविनाश्यं।

दानीयेलो योऽहं मम देहस्थित आत्मा विषादं गतः स्वमानसिक- १५
दर्शनैश्चाहं विक्लवो जातः। अतोऽहं तत्र तिष्ठतां मध्य एकं तत्साक्ष- १६
ल्यस्य तत्त्वज्ञापनं प्रार्थयितुं तस्य समीपमगमं, स च तासां कथानाम्
अर्थं ज्ञापयन् मां जगाद, विशालास्ते चतुःसङ्ख्यका जीविनश्चत्वारो १७
राजानः, ते भूमण्डलाद् उत्पत्स्यन्ते। परात्परस्य पवित्रजनास्तु राजत्वं १८
लप्स्यन्ते युगानुक्रमेण युगानुक्रमस्यानन्तकालं यावद् राजत्वं भोक्ष्यन्ते
च। तदानीमहं तस्य चतुर्थस्य जीविनस्तत्त्वम् अपृच्छं, यतः स तेभ्यः १९
सर्व्वेभ्यो भिन्नोऽतीव भयङ्करो लौहदन्तः पित्तलनखश्चासीत् सोऽग्रस-
दचूर्णयदुच्छिष्टं पदाभ्याममर्द्दाच्च। तन्मूर्द्ध्नि स्थितानां दशशृङ्गाणां तत्त्वं २०
पश्चादुत्पन्नस्य च यस्याग्रे त्रीणि शृङ्गाणि न्यपतंस्तस्य नेत्रयुक्तस्य दर्पवा-
दिवक्त्रविशिष्टस्य स्वसखिभ्यो वृहदाकारस्य च शृङ्गस्य तत्त्वमपृच्छं।
यतो मयि निरीक्षमाणे तच्छृङ्गं पवित्रजनैः सार्द्धमयुध्यत तेषां प्राभ- २१
वच्च, शेषे तु तेन बहुवयस्केन वृद्धेनागत्य परात्परस्य पवित्रजनानां कृते २२
विचारनिष्पत्ति र्व्यधायि तेषां पवित्रजनानां राजत्वभोगस्य समय
उपतस्थौ च। स मामित्थं जगाद, स चतुर्थो जीवी भूमण्डलस्थं चतुर्थं २३
राज्यं भविष्यति। सर्व्वराज्येभ्यस्तद् भिन्नं, तत् कृत्स्नां मेदिनीं ग्रसि-
ष्यति मर्द्दिष्यति चूर्णयिष्यति च। तानि दशशृङ्गाणि च तस्माद् राज्या- २४
दुत्पन्ना दशराजानो भविष्यन्ति, तेभ्यस्तु परमन्य एक उत्पत्स्यते, स

२५ पूर्व्वेभ्यो भिन्नो भविष्यति त्रीन् राज्ञो ऽवनतान् करिष्यति च। स च
परात्परस्य प्रतियोगित्वेन कथा व्याहरिष्यति परात्परस्य पवित्र-
जनान् पीडयिष्यति कालान् व्यवस्थाश्चान्यथा कर्त्तुं चिन्तयिष्यति च,
ते च कालैकं कालद्वयम् अर्द्धकालञ्च यावत् तस्य करे समर्पयिष्यन्ते।
२६ विचारसभा तूपवेच्यति तदानीमन्तं यावद् ध्वंसाय विनाशाय च तस्या-
२७ धिपत्यम् अपहारिष्यते। राजत्वमाधिपत्यमाकाशमण्डलस्याधःस्थितानां
सर्व्वराज्यानां पराक्रमश्च परात्परस्य पवित्रप्रजाभ्यः प्रदायिष्यन्ते, तस्यैव
राजत्वम् अनन्तकालस्थायिराजत्वं, सर्व्वे चाधिपतयस्तमेव सेविष्यन्ते
२८ तस्याज्ञाग्राहिणो भविष्यन्ति च। इति कथा समाप्ता। दानीयेलस्त्वहं
स्वचिन्ताभिरतीव विह्वलीभूतो मम वर्णश्च विकृतः कथान्त्वहं हृद-
येऽरक्षं।

---

८ अष्टमोऽध्यायः।

१ मेषच्छागयोर्दर्शनं १३ बलिदाननिवृत्तेः समयनिरूपणं १५ गाव्रीयेलेन दानीयेलस्य दर्शनतात्पर्य्यद्योतनञ्च।

१ राज्ञो बेल्शत्सरस्य राजत्वस्य तृतीये वत्सरे मह्यं दानीयेलाय दर्श-
२ नमेकमदायि, आदौ मह्यं यद् दत्तं तदुत्तरमिदं। दर्शनकाले निरी-
क्षमाणेन मयादर्शि, एलमाख्यप्रदेशस्थायां शूशनाभिधराजपुर्य्यामस्मि,
३ पुनश्च दर्शने निरीक्षमाणोऽहम् ऊलयनदस्य कूलेऽस्मीति। तदानीं नेत्रे
उत्तोल्य मयादर्शि नदस्य समक्षं शृङ्गद्वयविशिष्टो मेष एकस्तिष्ठति,
तस्य शृङ्गे उच्चे, तयोर्मध्ये त्वेकम् अन्यस्मादुच्चतरं, तच्चोच्चतरं पश्चा-
४ दुत्पन्नं। मयादर्शि, स मेषः पश्चिमदिशमुत्तरदिशं दक्षिणदिशञ्चाहन्
तदग्रे कोऽपि जीवी स्थातुं नाशक्नोत्, तस्य करादुद्धारकारी वा कोऽपि
५ नाविद्यत, स यथाकामं कर्म्माकरोत्, महांश्चाभवत्। अनेनालोचनां
कुर्व्वता मयादर्शि, पश्चिमदिशः कृत्स्नभूतलं तरन्नेकश्छाग आयाति,
भूमिन्तु न स्पृशति, तस्य छागस्य नेत्रयोर्मध्ये सुप्रत्यक्षमेकं शृङ्गं वि-
६ द्यते। स च नदतटे तिष्ठतस्तस्य मद्दृष्टस्य शृङ्गद्वयविशिष्टमेषस्य
७ समीपमाजगाम स्वबलस्य तेजसा तमभिदधाव च। मयादर्शि, स
मेषस्य पार्श्वं प्राप्य तत्प्रातिकूल्येन प्रचण्डीभूय तं मेषमाहत्य तस्य शृङ्ग-
द्वयं बभञ्ज, तस्य समक्षमवस्थानाय मेषस्य शक्त्यभावात् तं भूमौ नि-

पात्य ममर्द च, तस्य हस्तान्मेषस्योद्धारकारी च कोऽपि नाविद्यत। ततः ८
परं स छागोऽतीव महान् बभूव, परन्तु बलिष्ठीभूतस्य तस्य तद्
वृहच्छृङ्गमभाजि तत्परिवर्त्ते च व्योम्नश्चतसृषु दिक्षु सुप्रत्यक्षाणि चत्वारि
शृङ्गाण्युत्पेदिरे। पुनस्तेषामेकस्मात् क्षुद्रमूलमेकं शृङ्गमुत्पेदे, तद् दक्षि- ९
णदिशं पूर्व्वदिशं देशरत्नञ्च प्रत्यतीव ववृधे। तच्च स्वर्गीयवाहिनीं १०
यावद् वृद्धिं गत्वा तस्या वाहिन्याः कियदंशं कतिपयानि नक्षत्राणि च
भूतले निपात्य ममर्द्द। वाहिनीपतिं यावद् वृद्धिं गत्वा च नित्यनै- ११
वेद्यं तस्मादपजह्रे, तदा तस्य धर्म्मधाम्नः स्थानं निपातयाञ्चक्रे।
अधर्म्मकारणाच्च नित्यनैवेद्येन सहैका वाहिनी [तस्मिन्] समर्पयि- १२
ष्यते, तच्च भूमौ सत्यं निपातयिष्यति, कार्य्यं करिष्यति कुशलान्वितं
भविष्यति च।

अनन्तरं मम कर्णगोचरे पवित्र एको जनोऽभाषत, अपर एकः १३
पवित्रो जनश्च तं भाषमाणं जगाद, नित्यनैवेद्यं ध्वंसकाधर्म्मं मर्द्दनाय
धर्म्मस्य वाहिन्याश्च समर्पणञ्चाधि तेन दर्शनेन कियान् कालो निर्द्दि-
श्यते? ततः स मां जगाद, शतत्रयाधिकद्विसहस्रान् सन्ध्याप्रातःकालान् १४
यावत्, तत्पश्चाद् धर्म्मः पुनः संस्थापयिष्यते।

अहं दानीयेलो यदा तद् दर्शनमपश्यं तदा बुद्धिं प्रार्थये, ततः १५
पश्य नराकारोपमः कश्चिन्मम सन्मुखेऽतिष्ठत्, अहश्चोलयनदस्य १६
मध्यतो मानवगिरमश्रौषं, सा प्रोच्चैरवादीत्, भो गाब्रीयेल, अमुं
तद्दर्शनं बोधय। ततोऽहं यत्रातिष्ठं स तत्स्थानस्य समीपमाजगाम। १७
तस्यागमनेऽहमुद्विग्नोऽधोमुखः पतितश्च। अपरं स मां जगाद, भो
नरसन्तान, मनो निधत्स्व, यतस्तद्दर्शनम् अन्तकालोद्देश्यं। तस्मिंस्तु १८
मया सह संलपत्यहं मूर्च्छितोऽधोमुखो भूमौ पतितश्च। ततः स मां
स्पृष्ट्वा मत्स्थाने स्थापयामास, माञ्च जगाद, पश्य, क्रोधस्योत्तरकाले १९
यद् भवितव्यं तदहं त्वां ज्ञापयिष्यामि, यतो निरूपितान्तकालोद्देश्यं
तत्। शृङ्गद्वययुक्तो यो मेषस्त्वया दृष्टः स मादीयपारसीयराजगण- २०
स्वरूपः। लोमशः स छागश्च यवनराजः, तस्य नेत्रयो र्मध्ये स्थितं तद् २१
वृहच्छृङ्गं प्रथमो राजा। तस्मिन् भग्ने तत्परिवर्त्ते उत्पन्नं शृङ्गचतुष्टयं २२
राज्यचतुष्टयं, तत् तस्य जातितो न तु तस्य बलेनोत्पत्स्यते। तेषां रा- २३
जत्वस्यान्तिमकालेऽधर्म्मिषु पूर्णपरिमाणं गतेषु विकटवदनः कूटप्र-
श्नज्ञ एको राजोत्पत्स्यते। तस्य बलं विक्रान्तं भविष्यति, न तु स्वीयबलेन। २४

सोऽद्भुतध्वंसं करिष्यति कृतार्थीभूय साधयिष्यति च, स विक्रान्तान्
२५ पवित्रजनानां जातिञ्च ध्वंसयिष्यति। कौशलहेतुना च तस्य हस्ते
प्रतारणा सेत्स्यति, स च दर्पितचित्तो भूत्वा निश्चिन्तान् बहून् ध्वंस-
यिष्यति, अधिपतीनामधिपतेः प्रतिकूलमुत्थास्यति च, विनाहस्तन्त
२६ भङ्क्ष्यते। सन्ध्याप्रातःकालानां यद् दर्शनमर्थतो यद् वाक्यमवादि
२७ तत् सत्यं। त्वन्तु तद् दर्शनं परिगोपय, यतस्तद् दीर्घकालोद्देश्यं।
अहन्तु दानीयेलो गतप्रायो भूत्वा कतिपयान् दिवसान् व्याधितो-
ऽतिष्ठं, ततः परम् उत्थाय राजकर्म्माकरवं, तस्मिन् दर्शने त्वक्षुभ्ये तच्च
केनापि नाबुध्यत।

---

९ नवमोऽध्यायः।

१ दानीयेलस्योपवसनं नम्रभावेन प्रार्थनं २० तं प्रति प्रकाशितं भाविवचनञ्च।

१ मादीयवंशोद्भवस्याहश्वेरस्य पुत्रो यो दाराः कल्दीयानां राज्ये-
२ ऽधिकृतोऽभूत् तस्य प्रथमवत्सरेऽर्थतस्तस्य राजत्वस्य प्रथमवत्सरेऽहं
दानीयेलो ग्रन्थेषु निर्द्दिष्टायां तस्यां वत्सरसङ्ख्यायां मनो न्यदधि,
यामधि भाववादिनं यिरिमियं प्रति सदाप्रभोरिदं वाक्यं प्रादुर्बभूव,
यथा, यिरूशालमस्य ध्वंसे सप्ततिवत्सराः पूरयिष्यन्त इति।
३ अपरमहमुपवासं शाणपरिधानं भस्मलेपनञ्च कृत्वा प्रार्थनां प्रसा-
४ दनञ्च चिकीर्षन् प्रभुमीश्वरमुद्दिश्य दृक्पातम् अकार्षं, निजेश्वरं सदा-
प्रभुमुद्दिश्य प्रार्थयमानो मनोभावमङ्गीकृत्य चावादिषं, भो प्रभो, त्वं
महान् भयङ्कर ईश्वरः, ये त्वयि प्रीयन्ते तवाज्ञा रक्षन्ति च तेषां कृते
५ त्वं नियमस्य दयायाश्च रक्षाकारी। वयं पापम् अपराधम् अधर्म्मं
६ विद्रोहञ्चाचरितवन्तस्तवाज्ञाभ्यस्तव शासनेभ्यश्चापगतवन्तः। अस्माकं
राज्ञोऽध्यक्षान् कुलपतीन् जनपदस्थाः सर्व्वप्रजाश्च प्रति तव नाम्ना
येऽभाषन्त वयं तेषां त्वदीयदासानां भाववादिनां वाक्येष्ववधानं न
७ कृतवन्तः। भो प्रभो, धर्म्मस्त्वयि युज्यते, मुखस्य लज्जाजन्यन्तु यन्मा-
लिन्यमद्य दृश्यते तदेवास्मासु युज्यतेऽर्थतस्त्वद्विपक्षमौचित्यलङ्घनात् त्वं
यान् सर्व्वदेशेष्वपास्तवान्, निकटवर्त्तिषु दूरवर्त्तिषु वा तेषु यिहू-
दीयनरेषु यिरूशालमनिवासिषु सर्व्वेष्विस्रायेलीयजनेषु च तद् युज्यते।
८ भो प्रभो, अस्मास्वस्माकं राजस्वध्यक्षेषु कुलपतिषु च मुखस्य मालिन्यं

युज्यते यतो वयं त्वद्विरुद्धं पापं कृतवन्तः। अस्मदीश्वरे प्रभौ प्रचुर- ९
करुणा प्रचुरक्षमा च युज्येते, यतो वयं तद्विद्रोहमाचरितवन्तः, स च १०
स्वदासै र्भाववादिभि र्यां निजव्यवस्थाम् अस्माकं समक्षं निहितवान्
वयं तन्मार्गेण गमनायास्मदीश्वरस्य सदाप्रभो र्वाक्येऽवधानं न कृतवन्तः।
कृत्स्न इस्रायेल् तव व्यवस्थां लङ्घितवान् तव वाक्येऽवधातुमनिच्छया ११
विपथगामी जातश्च, तस्मादीश्वरदासस्य मूसा व्यवस्थायां यो लिखितो
विद्यते, सोऽभिसम्पातः स शापश्चास्मास्ववतारयाञ्चक्रे, यतो वयं तस्ये-
श्वरस्य विरुद्धं पापं कृतवन्तः। स चास्मानध्यस्माकं शासनं ये ऽकुर्व्वं- १२
स्तानस्मद्विचारकर्तृनधि च प्रोक्तानि निजवाक्यानि स्थिरीकृतवान्
अर्थतोऽस्मासु महदमङ्गलं वर्त्तितवान्, वस्तुतो यिरूशालमि यादृश-
ममङ्गलं सिद्धं तादृशं कृत्स्ननभोमण्डलस्याधो न कृतं। मूसा व्यवस्थायां १३
यथा लिखितं विद्यते तथैवैतन्महदमङ्गलमस्मासु वृत्ते, तथापि वयं
निजापराधेभ्यः परावर्त्तनाय भवतः सत्ये बुद्धिलाभाय चास्मदीश्वरं
सदाप्रभुं न प्रसादयाञ्चकृम। ततो हेतोः सदाप्रभुरमङ्गलाय जाग्रन्न- १४
स्मासु तद् वर्त्तयामास, यतोऽस्माकमीश्वरः सदाप्रभुः स्वकृतेषु सर्व्व-
कर्म्मसु धर्म्मवान्, वयन्तु तस्य रवेऽवधानं न कृतवन्तः। इदानीं भो १५
अस्मदीश्वर प्रभो, त्वमेव बलवता हस्तेन स्वप्रजावृन्दं मिसरदेशाद्
वहिरानीतवान् अद्यापि या दृश्यते स्वार्थं तां कीर्त्तिं साधितवांश्च।
वयं पापं कृतवन्तः, वयमधर्म्ममाचरितवन्तः, भो प्रभो, तव सर्व्व- १६
धर्म्माचारानुसारेण तव पुण्यगिरितो तव यिरूशालमनगराद् तव
क्रोधो रोषश्च निवर्त्ततां, यस्मादस्माकं पापैरस्मत्पितृणामपरा
धैश्च यिरूशालम् तव प्रजावृन्दश्चास्मच्चतुर्द्दिक्स्थानां सर्व्वेषां निन्दा-
स्पदीभूतौ। भो अस्माकमीश्वर, इदानीं स्वदासस्य प्रार्थनायां विनय- १७
वाक्ये च मनो निधत्स्व, तव ध्वंसिते धर्म्मधाम्नि प्रसन्नवदनो भव, प्रभोः
कृते तद् याचे। भो मदीश्वर, कर्णपातं कृत्वा शृणु, नेत्रयुगलमुन्मी- १८
ल्यास्माकं ध्वंसितस्थानानि तव नाम्ना विख्यातं नगरञ्च निरीक्षस्व,
यतस्त्वत्समक्षमस्मद्विनयवाक्यानि निवेदयन्तो वयं नैवात्मधर्म्माचरण-
निष्ठाः, किन्तु त्वदीयप्रचुरकरुणानिष्ठाः। भो प्रभो, शृणु, भो प्रभो, १९
क्षमस्व, भो प्रभो, कर्णपातं कृत्वा कर्म्म कुरुष्व, मा विलम्बस्व, भो
मदीश्वर, आत्मकृते तत् कुरुष्व, यतस्तव नगरं तव प्रजागणश्च तवैव
नाम्ना विख्यातौ।

२० मयि भाषमाणे, प्रार्थयमाने, निजपापं निजजातेरिस्रायेलः पाप-
ञ्चाङ्गीकुर्व्वाणे, निजेश्वरस्य पुण्यपर्व्वतमधि निजेश्वरस्य सदाप्रभोः समक्षं
२१ निजविनयवाक्यं निवेदयति च मम प्रार्थनावाक्ये न समाप्ते, यः पुरुषः
पूर्व्वं दर्शने क्लान्तेन मया दृष्टः स गाब्रीयेलः सन्ध्याकालीननैवेद्यस्य
२२ समये मत्समीपमुपस्थाय मां बोधयन्नाललाप। स जगाद, भो दानी-
२३ येल, अधुनाहं त्वां ज्ञानपारदर्शिनं कर्त्तुं प्रगतः। तव विनयवाक्यस्या-
रम्भे वाक्यमेकं प्रकाशितं त्वां तज्ज्ञापयितुमहमागतः, यतस्त्वं प्रीतिपात्रं।
अतस्तस्मिन् वाक्येऽवधानं कुरुष्व, दर्शने मनो निधत्स्व च।
२४ अधर्म्मस्य रोधाय पापानां मुद्राङ्कनायापराधस्य पावनायानन्तका-
लस्थायिनो धर्म्मस्यानयनाय दर्शनस्य भाववाण्याश्च मुद्राङ्कनाय महाप-
वित्रावासस्याभिषेकाय च तव जातिमधि तव पुण्यनगरमधि च सप्त-
२५ तिसप्ताहा व्यवच्छिद्दिरे। त्वमेतज्ज्ञातुं बोद्धुञ्चार्हसि, यिरूशालमः
पुनःस्थापनस्य निर्म्माणस्य चाज्ञाप्रकाशनाद् अभिषिक्तमध्यक्षं यावत्
सप्तसप्ताहा द्विषष्टिसप्ताहाश्च भविष्यन्ति। चत्वरं परिखा च काल-
२६ सङ्कटे पुनः स्थापयिष्येते निर्म्मायिष्येते च। तेभ्यो द्विषष्टिसप्ताहेभ्यः
परं सोऽभिषिक्त उच्छेत्स्यते स चाकिञ्चन भविष्यति। नगरं धर्म्मधाम
चागामिनो राज्ञः प्रजाभि र्विनाशयिष्येते, प्लावनेन तदन्तो भविष्यति
२७ च, युद्धस्यान्तं यावत् प्रचुरध्वंसो निरूपितः। एकञ्च सप्ताहं यावत् स
बहुभिः सह नियमं दृढीकरिष्यति, तस्य सप्ताहस्यार्द्धकाले स यज्ञ-
नैवेद्ययो र्निवृत्तिं विधास्यति, घृण्यवस्तूनां चूडायां ध्वंसकारी स्था-
स्यति, इत्थञ्च शेषे निरूपितोच्छिन्नतायाः सिद्धि र्धारेव ध्वंसकस्योपरि
वर्षिष्यति।

---

१० दशमोऽध्यायः।

१ दानीयेलस्योपवसनं दर्शनप्राप्तिश्च १० दर्शनात् तस्य भयं १५ दूतेन तस्मै बलदानञ्च।

१ पारसीयराजस्य खसस्य प्रथमे वत्सरे बेल्टिशत्सराभिधं दानीयेलं
प्रति वाक्यमेकं प्रकाशयाञ्चक्रे, तद् वाक्यं सत्यं महायाससूचकञ्च, स
च तद् वाक्यं बुबुधे तस्य दर्शनस्य बोधं लेभे च।
२ तस्मिन् कालेऽहं दानीयेलस्त्रीन् सप्ताहानशोचं। ते त्रयः सप्ताहा

यावदसमाप्ता आसंस्तावदहं सुखादु भक्ष्यं नाभक्षये, मांसं द्राक्षारसो ३
वा मम मुखं न प्राविशत्, सुगन्धितैलमर्द्दनञ्च मया नाक्रियत। अपरं ४
प्रथममासस्य चतुर्व्विंशे दिवसे यदाहं महानदस्य हिद्देकलस्य तट
आसं, तदा नेत्रे उन्मील्य नरमेकमदर्शं, स शुक्लपरिच्छदान्वित ऊफसीय- ५
स्वर्णबन्धनेन बद्धकटिश्चासीत्। वैदूर्य्यमणेरिव तस्य गात्रीयवर्णः, आस्यं ६
तडित्प्रभोपमं, नेत्रे प्रज्वलितोल्कोपमे, बाहू चरणदेशौ च तप्तताम्र-
स्याभायाः सदृशास्तदीयवाक्यस्य रवश्च लोकारण्यस्य रवेण तुल्यः।
एकोऽहं दानीयेलस्तद् दर्शनम् अदर्शं,मम सङ्गिनो नरास्तन्नादर्शंस्तथापि ७
महात्रासाक्रान्ता अभवन्, आत्मानमन्तर्धातुं पलायन्त च। अत एको- ८
ऽहमवशिष्टो भूत्वा तन्महादर्शनमदर्शं, मयि च किञ्चन बलं नाशिष्यत,
मम तेजश्च क्षये पर्य्यवासीयत, मया किमपि बलं नारक्ष्यत। तदाहं ९
तदीयवाक्यानां शब्दमश्रौषं, तदीयवाक्यानां शब्दं श्रुत्वैवाहं क्षुब्धीभू-
याधोमुखोऽपतम् आस्येन भूमिमस्पृक्षञ्च।

तदानीं हस्त एको मां स्पृष्ट्वा जानुनोः करतलयोश्च स्खलितस्थितिं वि- १०
दधाय। स च मां जगाद, भो प्रीतिभाजन दानीयेल, यानि वाक्यान्यहं ११
त्वां वदिष्यामि तत्र त्वं मनो निधातुमर्हसि। त्वं स्वस्थान उत्तिष्ठ यतो-
ऽहमिदानीं त्वां प्रति प्रहितः। तस्मिन् मामिदं वचो वदत्यहं वेपमान
उदतिष्ठं। ततः स मां जगाद, दानीयेल, मा भैषीः, बुद्धिलाभाय स्वी- १२
येश्वरस्य समक्षम् आत्मप्राणानां नम्रीकरणाय च यस्मिन् दिने त्वं प्रथमं
मनःस्थमकार्षीस्तद्दिनात् तव वाक्यानि शुश्रुविरे तव तेषां वाक्यानां
गुणेन चाहमागन्तुं प्रावर्त्ते। परन्त्वेकविंशतिदिनानि यावत् पार- १३
सीयराज्यस्याध्यक्षो मत्प्रातिकूल्येनातिष्ठत्, ततः परं मुख्यानामध्यक्षाणां
मध्ये मीखायेलनामाध्यक्षो मम साहाय्यायागमत् तस्मात् तत्र पारसी-
यराजानां पार्श्वे मया श्रैष्ठ्यमलम्भि। परन्तूत्तरकाले तव जाते र्या गति १४
र्भविष्यति तामहं त्वां बोधयितुमागतोऽस्मि, यतोऽधुनापि दर्शनं दीर्घ-
कालमपेक्षते।

यावत् स मया सह संलपन्निमानि व्याक्यानि व्याहरत्, तावदहं १५
भूमिं प्रत्यास्यमवनम्य मूकोऽभवं। अनन्तरं पश्य, मनुष्यसन्तानाकारोपमः १६
कश्चिन्ममौष्ठावस्पृक्षत्। ततोऽहं मुखमुद्घाट्य भाषमाणो मत्समक्षं ति-
ष्ठन्तं जनमवादिषं, भो मम प्रभो, दर्शनेनैतेन ममान्तर्मर्म्म व्यकारि
मया किमपि बलं रक्षितुमशक्यं। अतो मम प्रभुना भवता सह सं- १७

लपितुं भवत एतेन दासेन कथं शक्येत? अधुनैव मयि किमपि बलं न
१८ विद्यते श्वासोऽपि मयि न शिष्यते। ततो मानवाकारोपमः कश्चित्
१९ पुन र्मां स्पृष्ट्वा सबलीचकार। माञ्च जगाद, भो प्रीतिभाजन नर, तव
शान्ति र्भूयात्, त्वं बलवान् भव, बलवान् भव। ततस्तस्मिन् मया सह
२० संलपत्यहं बलं लब्ध्वावादिषं, भो मम प्रभो, भाषतां, यतो भवान् मां
सबलीकृतवान्। ततः स मां जगाद, किमर्थमहं त्वत्समीपमागतोऽस्मि
तत् किं जानासि? अधुनैवाहं पारसदेशस्याध्यक्षेण सह योद्धुं पुन
२१ र्गच्छामि, मयि निष्क्राम्यति तु यवनस्याध्यक्ष आगमिष्यति। तथापि
सत्यग्रन्थे लिखितं यद् विद्यते तदहं त्वां ज्ञापयिष्यामि, अमुयोः प्रति-
कूलं मत्साहाय्यकारी तु युष्मदीयाध्यक्षान्मीखायेलादन्यः कश्चिन्न विद्यते।

---

११ एकादशोऽध्यायः।

१ यवनराजेन पारसराजस्य पराजयः ५ दक्षिणोत्तरीयदेशयो र्भूपानां मिथः सन्धि-
विग्रहाणां कथा २९ विपक्षैराक्रमणं पीडनञ्च।

१ मादीयराजस्य दारायः प्रथमवत्सरेऽहमपि तस्मै बलं पराक्रमञ्च दातुं
२ स्थितवान्। अधुना त्वहं त्वां सत्यं ज्ञापयिष्यामि।
पश्य, इतः परं पारसदेशस्यापरे त्रयो राजान उत्थास्यन्ति, चतुर्थश्च
सर्व्वेभ्यो महाधनं लब्ध्वा धनी भविष्यति, यदा तु स्वधनेन विक्रान्तो
३ भविष्यति, तदा यवनराज्येन सह योद्धुं सर्व्वान् प्रचोदयिष्यति। तत्र
वीरत्वविशिष्ट एको राजोत्थास्यति महाप्रभावेन प्रभुत्वं विधास्यति
४ स्वाभिरुचिताचारं करिष्यति च। स तु यदा स्थितिं प्राप्स्यति तदा
तस्य राज्यं भग्नीभूय नभोमण्डलस्य चतुर्षु वायूनां दिक्षु विभेत्स्यते,
तच्च न तस्य सन्तते र्न वा तदीयप्रभुत्वतुल्यप्रभुत्वविशिष्टं भविष्यति,
किन्तु तस्य राज्यं खण्डीभूयैतदन्येषां भविष्यति।
५ अनन्तरं दाक्षिणात्यस्य राजा बलवान् भविष्यति, पुनस्तस्याध्यक्षाणां
मध्य एकस्तस्मादपि बलवान् भविष्यति प्रभुत्वं करिष्यति च, तस्य
६ प्रभुत्वं महाप्रभुत्वं भविष्यति। कतिपयानां वत्सराणामन्ते तौ मिथः
सहायतां विधास्यतः, सन्धिसाधनाय च दाक्षिणात्यराजस्य दुहितोत्त-
रराजस्य गृहमागमिष्यति, भुजस्य बलन्तु न रक्षिष्यति, सभुजोऽपि
स न स्थास्यति, कालक्रमे च सा रमण्यपि तस्या आनेतारो जनको बल-

दाता च समर्पयिष्यन्ते। तथापि तस्या मूलानामेकोऽङ्कुरस्तस्य पदे ७
प्ररोक्ष्यति सैन्यबलमवाप्स्यत्युत्तरस्या राज्ञो दुर्गं प्रवेक्ष्यति जनैः सह
व्यापारं करिष्यति पराक्रमं प्रयोक्ष्यति च। तेषां धातुमयप्रतिमाभिः ८
सह रमणीयैः रूप्यस्वर्णमयैः पात्रैश्च सह तेषां देवानपि स वन्दित्वाय
मिसरमपनेष्यति, स एव च कतिपयान् वत्सरान् यावद् उत्तरस्या
राज्ञः समकक्षोऽवस्थास्यते। स दाक्षिणात्यराजस्य राज्यं प्रवेक्ष्यति, ९
किन्तु पुन र्निजदेशं गमिष्यति। तस्य पुत्त्रास्तु ससज्जीभूय बहुसैन्य- १०
बलरूपं जननिवहं सङ्ग्रहीष्यन्ति स आक्राममागत्य स्रोतस्तीव वहन्ना-
प्लावयिष्यति प्रत्यागमिष्यति च, ते च तदीयदुर्गपर्य्यन्तं विरोधं करि-
ष्यन्ति। ततो दाक्षिणात्यस्य राजातीव रुष्टः प्रगत्य तेनोत्तरस्या राज्ञा ११
सह युद्धं करिष्यति, सोऽपि महान्तं जननिवहं संस्थापयिष्यति, स नि-
वहस्त्वमुष्य करे समर्पयिष्यते। तस्मिन् निवहे उत्तिष्ठति स उन्नतचित्तो १२
भूत्वायुतानि निपातयिष्यति न तु पराक्रमी भविष्यति। अपिचोत्त- १३
रस्या राजा परावृत्य पूर्व्वस्मादपि महत्तरं जननिवहं संस्थापयिष्यति,
तस्मात् कतिपयवत्सरपरिमितात् कालात् परं महासैन्यबलं प्रचुरसा-
मग्रीश्चादायाक्रमन्नागमिष्यति। तस्मिन् काले बहवो दाक्षिणात्यराजस्य १४
प्रातिकूल्येनोत्थास्यन्ति, तव जातेरप्यत्याचारिणो नरा दर्शनं स्थिरीक-
र्त्तुमुत्थास्यन्ति ते तु स्खलिष्यन्ति। अनन्तरमुत्तरस्या राजागत्य सेतुं १५
समाचेष्यति दुर्गै र्दृढीकृतं नगरं पराजेष्यति च, तदा दाक्षिणात्यस्य
बाहू न स्थास्यतः, तस्य वृतसेनाश्च स्थातुमसमर्था भविष्यन्ति। अतस्तस्य १६
विपक्षं य आगतः स यथाकाममाचरिष्यति तस्य समक्षं स्थातुं कोऽपि
न शक्ष्यति, स च ध्वंसहस्तो देशरत्ने पदार्पणं करिष्यति। अपरं स १७
सन्धेः सङ्कल्पं कृत्वा स्वराज्यस्य कृत्स्नबलेनागन्तुं प्रवर्त्तिष्यते तच्च साधयि-
ष्यति; स तस्मै नारीणां दुहितरं दास्यति, तत् तु तस्या नाशाय, सा
न स्थास्यति, न वा तस्योपकारिणी भविष्यति। ततः परं स द्वीपानां १८
विरुद्धं प्रगमिष्यति बहून् हस्तगतान् करिष्यति च, एकेन मुख्यजनेन तु
स आत्मधिक्कारतो निवर्त्तयिष्यते, तत्कृतस्य धिक्कारस्य प्रतिफलं तस्मै
प्रदातुं न शक्ष्यति। अपरं स निजदेशस्य दुर्गाणि प्रत्यागमिष्यति, १९
स्खलित्वा तु पतिष्यत्यनुद्देश्यो भविष्यति च। अपरं राज्यश्रीस्वरूपे २०
प्रदेशे प्रजापीडकप्रेरणकारी जन एकस्तस्य पद उत्थास्यति, कतिपयेषु
दिनेषु त्वतीतेषु स भङ्क्ष्यते, न क्रोधेन न युद्धेन वा।

२१ तस्य पदे त्ववमन्यः कश्चिज्जन उत्थास्यति, राजश्रीस्तस्मै न प्रदा-
२२ यिष्यते, स निश्चिन्तकाल उपस्थाय चाटुभी राजत्वं लप्स्यते। तस्याग्र
आप्लावनकारीणि बलान्याप्लावयिष्यन्ते भङ्ख्यन्ते च सहायोऽध्यक्षोऽपि
२३ [पतिष्यति]। तेन सह साहाय्यकरणकालादेव स प्रवञ्चनामाचरिष्यति
२४ प्रगत्य स्वल्पजनै र्बलवान् भविष्यति च। निश्चिन्तकाले स देशस्योत्तम-
स्थानानि प्रविश्य तस्य पितरः पितामहाश्च यन्न कृतवन्तस्तदेव करि-
ष्यति, स तेषां लोप्त्राणि मूषितद्रव्याणि वस्तूनि च विकरीष्यति, दृढ-
२५ दुर्गाणां विरुद्धं सङ्कल्पान् करिष्यति च, इत्थं कियत्कालोऽत्येष्यति। ततः
परं स महासेनया सह दाक्षिणात्यराजस्य प्रातिकूल्येन निजबलं निज-
चित्तञ्च प्रचोदयिष्यति, दाक्षिणात्यराजोऽप्यतीव महत्या बलवत्या च
सेनया सहितो युद्धार्थं ससज्जो भविष्यति स्थातुन्तु न शक्ष्यति, यतो जना-
२६ स्तस्य विरुद्धं सङ्कल्पान् कल्पयिष्यन्ति। तस्य प्रतिभागभोगिन एव तं
निपातयिष्यन्ति तस्य सेना चाप्लावयिष्यति तथापि बहवो हताः पति-
२७ ष्यन्ति। हिंसार्थिचित्तौ तौ द्वौ राजानावेकस्मिन् भोजनमञ्च उपवि-
श्यानृतं वदिष्यतः, तत्तु न सेत्स्यति यस्मात् तदानीमप्यन्तो निरूपितं
२८ समयमपेक्षिष्यते। अपरं स प्रचुरवस्तून्यादाय स्वदेशं प्रत्यागमिष्यति,
तस्य हृद्गतञ्च पुण्यनियमस्य प्रतिकूलं भविष्यति, स च कृतकार्य्यो भवि-
ष्यति स्वदेशं प्रत्यागमिष्यति च।

२९ निरूपिते काले स प्रत्यावृत्य दाक्षिणात्यं प्रवेक्ष्यति, पूर्व्वकालस्तु यादृश
३० आसीत् उत्तरकालो न तादृशो भविष्यति। परन्तु तस्य विरुद्धं
कित्तीयपोता आगमिष्यन्ति, ततः स विषण्णीभूय परावर्त्तिष्यते पुण्य-
नियमस्य प्रातिकूल्येन रोषं विधाय कृतकार्य्यो भविष्यति प्रत्यावृत्य
३१ पुण्यनियमत्यागिषु मनो निधास्यते च। तस्यादेशाच्च बलान्युत्थाय
धर्म्मधामयुक्तं दुर्गमपवित्रीकरिष्यन्ति नित्यबलिदानस्य निवृत्तिं विधाय
३२ ध्वंसकं घृण्यवस्तु स्थापयिष्यन्ति च। नियममध्यधर्म्माचारिणो जनांश्च
स चाटुभि र्वैधर्म्मिणः करिष्यति, निजेश्वराभिज्ञा जनास्तु बलवन्तः
३३ कृतकार्य्याश्च भविष्यन्ति। प्रजानां मध्ये ये च प्रवीणास्ते बहून्
बोधयिष्यन्ति, कतिपयानि दिनानि त्वसिवह्निवन्दित्वलुण्ठनैः स्खलि-
३४ ष्यन्ति। स्खलनकाले तु स्वल्पसाहाय्येन प्राप्तप्रतीकारा भविष्यन्ति,
३५ तदा बहवश्चाटुभिस्तेष्वासक्ता भविष्यन्ति। अन्तकालं यावत् तेषां
मध्ये विलायनार्थं शुचीकरणार्थं शुक्लीकरणार्थञ्च तेषां प्रवीणानामपि

केचन स्खलिष्यन्ति, यतस्तदानीमप्यन्तो निरूपितं कालमपेक्षिष्यते।
स च राजा यथाकाममाचरिष्यत्यात्मानमुच्चीकृत्य यावतीयदेवादप्या- ३६
त्मानं महान्तं मंस्यते, ईश्वराणामीश्वरस्य वैपरीत्येनाद्भुतकथा व्याहरि-
ष्यति च क्रोधस्य सिद्धिं यावत् कृतार्थो भविष्यति च, यतो यन्निरूपितं
तत् सेत्स्यति। स स्वपैतृकदेवेषु मनो न निधास्यते, स न नारीणां ३७
कान्त्यां न कस्मिन्नपि देवे मनो निधास्यते स सर्व्वस्माद्देवात्मानं महान्तं
मंस्यते। परन्तु देवपदे स दुर्गाणां देवमर्चयिष्यति, स्वपूर्व्वपुरुषैरविदितं ३८
तं देवं स स्वर्णरूप्यमणिरत्नैरर्चयिष्यति। तस्य विजातीयदेवस्य साहा- ३९
य्येन स सुरक्षितेषु दुर्गेषु कृतकार्य्यो भविष्यति, यस्तमङ्गीकरिष्यति तं
स महासमादरान्वितं करिष्यति, तादृशान् जनान् बहूनामधिपतीन्
करिष्यति पुरस्कारवद् भूमिं वितरिष्यति च। अन्तस्य काले तु दक्षि- ४०
णात्यराजस्तेन सह सङ्घटनं करिष्यति, उत्तरस्या राजा च रथैरश्वा-
रोहिभि र्बहुपोतैश्च तस्य विपक्षमभिद्रुत्य देशान् प्रविश्याप्लावयिष्यति
तटानुल्लङ्घयिष्यति च। स च देशरत्नं प्रवेक्ष्यति, तदा बहवः स्खलिष्यन्ति, ४१
परन्त्विदोमो मोयाबोऽम्मोनसन्तानानां श्रेष्ठांशश्च तस्य हस्तो रक्षिष्य-
न्ते। स च देशान् प्रति स्वहस्तं प्रसारयिष्यति, मिसरदेशश्च रक्षां ४२
नावाप्स्यति। स मिसरस्य स्वर्णरूप्यकोषाणां यावतीयरत्नानाञ्च प्रभु ४३
र्भविष्यति, लूबीयाः कूशीयाश्च जनास्तस्यानुचरा भविष्यन्ति। अपरं ४४
पूर्व्वोत्तरदिग्भ्यामागतै र्जनरवैरुद्वेजितः स बहून् ध्वंसयितुं वर्ज्जयितुञ्च
महाकोपेन प्रयास्यति। सागरयो र्मध्ये तु धर्म्मगिरिरत्नस्याभिमुखं ४५
राजपुरीतुल्यं स्वीयपट्टगृहं स्थापयित्वा स निजान्तमभिगमिष्यति को-
ऽपि तस्योपकारी न भविष्यति।

---

१२ द्वादशोऽध्यायः।

१ मीखायेलेन विपद् इस्रायेलस्योद्धारः ५ दानीयेलं प्रत्यन्तकालस्य विज्ञापनञ्च।

तस्मिन् काले तव जातेः सन्तानानामधिष्ठाता महान् अध्यक्षो मीखा १
येल उत्थास्यति तदानीञ्चाजात्युद्भवात् तत्कालपर्य्यन्तं कदाचन यादृशो
नासीत् तादृशः सङ्कटकालो भविष्यति, तस्मिन् काले च तव जातिरर्यतः
पुस्तके लिखितो यः कश्चिन्निर्णायिष्यते स रक्षिष्यते। धूलिमयमृत्तिका- २

यां निद्राणानां मध्ये च बहवो जागरिष्यन्ति, केचनानन्तजीवनाय,
२ केचन तु धिक्कारेभ्योऽनन्तनिराकरणाय च। प्रवीणजनाश्च वितानस्य
द्युतिरिव, बहूनां धार्म्मिकीकारिणश्च तारा इव युगानुक्रमस्यानन्तकालं
४ यावद् द्योतिष्यन्ते। त्वन्तु, भो दानीयेल, अन्तस्य कालं यावदिमानि
वाक्यानि सङ्गोपय पुस्तकञ्च मुद्राङ्कितं कुरु। बहवस्तदधिगमिष्यन्ति
ज्ञानञ्च बर्धिष्यते।

५ अनन्तरं मया दानीयेलेन निरीक्षमाणेनादर्शि नद्या एतस्मिन् तटे
६ एकोऽपरस्मिंस्तटे चैक इत्थमन्यौ द्वौ नरौ तिष्ठतः। अपरं कश्चि-
न्नद्यास्तोयानामुपरि स्थितं तं शुक्लवस्त्रान्वितं नरं पप्रच्छ, अद्भुतानाम्
७ अन्तः कियत्कालपरिमितः? ततो नद्यास्तोयानामुपरि स्थितस्य तस्य
शुक्लवस्त्रान्वितस्य नरस्य वाक्यं मयाश्रावि, नभोमण्डलं प्रति दक्षिणं
सव्यञ्चोभौ करावुत्थाप्य सोऽनन्तजीविनो नाम्ना शेपे, कालमेकं कालद्वय-
मर्द्धकालञ्च यावत्; पवित्रजातेः करस्य भञ्जने समाप्ते सति सर्व्वमेतत्
८ समाप्तं भविष्यति। एतच्छ्रुत्वाहं बोद्धुं नाशक्नवं, अतोऽवादिषं भो मम
९ प्रभो, एतस्य कः शेष? ततः स जगाद, भो दानीयेल, त्वं गच्छ, यस्मा-
दिमानि वाक्यान्यन्तस्य कालं यावत् सङ्गोपितानि मुद्राङ्कितानि च।
१० बहवश्च परिष्कृताः शुक्लीभूता विलायिताश्च भविष्यन्ति दुष्टजनास्तु
दुष्टतामाचरिष्यन्ति। केऽपि दुष्टजना न भोत्स्यन्ते, प्रवीणास्तु भोत्स्यन्ते।
११ परन्तु नित्यबलिदानद्रवनस्य ध्वंसकघृण्यवस्तुस्थापनस्य च कालात् परं
१२ दशोनत्रयोदशशतानि दिनानि भविष्यन्ति। यो जनः प्रतीक्षमाणः
१३ पञ्चत्रिंशदधिकत्रयोदशशतानि दिनान्यवाप्स्यते स धन्यः। त्वन्त्वन्तम-
भिगच्छ तेन त्वं विश्रमिष्यसि दिनानामन्ते च निजाधिकाराय यो-
त्थास्यसि।

होशेयस्य भविष्यद्वाक्यानि।

१ प्रथमोऽध्यायः।

१ इस्रायेलः पारमार्थिकव्यभिचारः २ होशेयस्य विवाहो यिष्रियेलाख्यपुत्त्रस्योत्पादनं ६ लोरुहामाया उत्पादनं ८ लोयम्मेरुत्पादनं १० यिहूदा इस्रायेलयोरुद्धारस्य भविष्यद्वाक्यञ्च।

उषिययोथमाहसयिहिष्कियाभिधानां यिहूदीयराजानां काले यो- १
याशपुत्त्रो यिरबियाम इतिनाम्नाख्यातस्येस्रायेलीयराजस्य काले च
सदाप्रभो यद् वाक्यं बेरेः पुत्त्रं होशेयं प्रति प्रादुरभूत् तद्वृत्तान्तोऽयं।
होशेयेन सदाप्रभो र्वाक्यस्यारम्भोऽयं। सदाप्रभु र्होशेयं जगाद, त्वं २
गत्वात्मनः कृते व्यभिचारेण कलङ्किताभेकां भार्य्यां व्यभिचारकलङ्कितान्
सन्तानांश्च गृहाण, यतो जातिरियं सदाप्रभोरनुगमनान्निवृत्य व्यभिचारं
करोति।
ततः स गत्वा दिब्लयिमस्य दुहितरं गोमराम् उदुवाह सा च गर्भिणी ३
भूत्वा तस्य कृते पुत्त्रमेकं सुषुवे। अपरं सदाप्रभुस्तं जगाद, त्वं तस्य ४
यिष्रियेल् [ईश्वरीयविकिरणम्] इति नाम कुरु, यतोऽल्पकालात् परमहं
यिष्रियेलि कृतस्य रक्तपातस्य प्रतिफलं येहूकुलाय दास्यामीस्रायेल्कुलस्य ५
राज्यं निःशेषयिष्यामि च। तस्मिन् दिने यिष्रियेलः समभूमाविस्रा-
येलो धनु र्भङ्क्ष्यामि च।
अपरं सा पुन र्गर्भवती भूत्वा कन्यां सुषुवे। ततः स तं जगाद, त्वं
तस्या लोरुहामा [अननुकम्पिता] इति नाम कुरु, यतोऽहं तान् अर्थत
इस्रायेल्कुलं न पुनरनुकम्पिष्ये, किन्तु हीनानेव करिष्यामि। यिहूदा- ७
कुलन्त्वनुकम्पिष्ये तेषामीश्वरेण सदाप्रभुना तान् निस्तारयिष्यामि च, न
तु धनुरसियुद्धहयसादिभिस्तान् निस्तारयिष्यामि।
अपरं सा लोरुहामां स्तन्यपानं त्याजयित्वा गर्भिणी भूत्वा पुत्त्रं सुषुवे। ८
ततः स जगाद, त्वं तस्य लोयम्मिः [न मत्प्रजा] इति नाम कुरु, यतो ९
यूयं न मम प्रजाः, अहञ्च न युष्माकं भविष्यामि।
तथापीस्रायेलः सन्तानानां सङ्ख्या मानातीतानां गणनातीतानाञ्च १०

सामुद्रिकसिकतानां समाना भविष्यति; यूयं न मम प्रजा इति यत्र
स्थाने तेऽभ्यधीयन्त, तत्र स्थाने जीवत ईश्वरस्य सन्ताना अभिधायि-
११ ष्यन्ते। यिहूदाः सन्ताना इस्रायेलः सन्तानाश्चैकत्र समेष्यन्त्येकमध्यक्षञ्च
स्वेष्वधिकरिष्यन्ति देशादागमिष्यन्ति च, यिष्रियेलः [ईश्वरीयवपनस्य]
दिनं यतो महद् भविष्यति।

---

२ द्वितीयोऽध्यायः।

१ लोकानां पारमार्थिकव्यभिचारः ६ तस्मात् परमेश्वरेण तेषां दण्डः १४ तेषां क्षेमाय परमेश्वरस्य प्रतिज्ञा च।

१ स्वभ्रातॄन् मत्प्रजा ब्रूत स्वसॄश्चानुकम्पिताः॥
२ विवदध्वं स्वमात्रा च विवदध्वं तया सह।
यतः सा नास्ति मद्भार्य्या तस्या भर्त्ता च नास्म्यहं॥
स्वीयवेश्याक्रियाः सा च दूरीकुर्य्यात् स्वदृष्टितः।
स्वीयजारपरिष्वङ्गं स्वस्तनाभ्यां जहातु च॥
३ न चेन्नग्नां करिष्यामि विवस्त्रीकृत्य तामहं।
यादृक् जन्मदिने चासीत् स्थापयिष्यामि तादृशीं॥
प्रान्तरस्येव तस्याश्च विधास्यामि दशामहं।
मरुतुल्याञ्च तां कृत्वा मारयिष्यामि तृष्णया॥
४ नाहं तस्या अपत्यान्यनुकम्पिष्य इतः परं।
अपत्यानि यतस्तानि प्राभवन् व्यभिचारतः॥
५ तेषां माता यतो हेतो र्वेश्यावृत्तिं समाचरत्।
कर्म्म लज्जाकरं तेषामकार्षीद् गर्भधारिणी॥
साब्रवीदनुयास्यामि मम तान् प्रेमकारिणः।
ममान्नं मम तोयञ्च ममोर्णां मम च क्षुमां।
मत्तैलं मम पेयञ्च मह्यं विश्राणयन्ति ये॥
६ पश्य तस्मादहं तस्या वर्त्म रोत्स्यामि कण्टकैः।
प्रावृतिञ्च निचेष्यामि सा स्वमार्गान् न लप्स्यते॥
७ स्वजाराननुधावन्ती सा नैवासादयिष्यति।
कुर्व्वाणान्वेषणं तेषामुद्देशं न समाप्स्यति॥
तदानीं वक्ष्यतीत्थं सा प्रगमिष्याम्यहं पुनः।

आदौ यो मम भर्त्तासीत् प्रत्यायास्यामि तं प्रति।
यादृगासीत् तदा क्षेमं तादृक् नास्त्यधुना मम॥
तान् गोधूमांस्तु तन्मद्यं तत् तैलं दत्तवानहं। ८
अहं वर्धितवांस्तस्या रजतं कनकञ्च तत्।
येन तै र्निर्म्ममे वाल एतन्न ज्ञायते तया॥
अतो हेतोः स्वकालेऽहं गोधूमान् मम तान् पुनः। ९
ऋतौ तन्मम मद्यञ्च प्रत्यादास्ये पुनः स्वयं॥
नग्नताच्छादनार्थञ्च तस्यै यां दत्तवान् पुरा।
उद्धरिष्यामि तामूर्णां मम ताञ्च क्षुमां पुनः॥
अधुना च स्त्रियस्तस्या भ्रष्टताजन्यमूढतां। १०
तत्प्रेमकारिणां साक्षात् प्रकरिष्याम्यनावृतां।
मामकीनकरात् ताञ्च कोऽपि नैवोद्धरिष्यति॥
निवृत्तञ्च करिष्यामि सर्व्वं तस्याः प्रमोदनं। ११
उत्सवं नवचन्द्रञ्च विश्रामस्य दिनानि च।
सर्व्वं निवर्त्तयिष्यामि तस्या वार्षिकपर्व्व च॥
जारै र्मह्यमिमे दत्ता मम सन्तीति यानधि। १२
तयोक्तं सकलांस्तस्यास्तान् द्राक्षोडुम्बरद्रुमान्।
अहं विध्वंसयिष्यामि विधास्यामि च काननं।
ततस्ते भक्षयिष्यन्ते पशुभि र्वनचारिभिः॥
बालदेवान् समुद्दिश्य सा च धूपमदाहयत्। १३
स्वावतंसाद्यलङ्कारैश्चात्मानं पर्य्यभूषयत्।
स्वजारानन्वगच्छच्च मान्तु सा व्यस्मरत् तदा॥
वालानां तस्य कालस्य तस्यै दास्याम्यहं फलं।
भाषते भारतीमेतां स्वयमेव सदाप्रभुः॥
अतः पश्य प्रलोभ्याहं तां नेष्यामि मरुस्थलं। १४
चित्तप्रबोधकालापं करिष्ये च तया सह॥
द्राक्षाक्षेत्राणि तस्याश्च तस्यै दास्यामि तत्स्थलात्। १५
आखोरं निम्नभूमिञ्च दास्याम्याशाप्रवेशनं।
पुन र्गास्यति सा तत्र यथागायत् स्वयौवने।
मिसर्देशस्य मध्याच्चागमनस्य दिने यथा॥
मम कान्तेति मां त्वञ्च तदा सम्बाधयिष्यसि। १६

न पुन र्मम बालेत्युक्त्वा मां सम्बोधयिष्यसि।
भाषते भारतीमेतां स्वयमेव सदाप्रभुः॥
१७ बालानां नामधेयानि दवयिष्यामि तन्मुखात्।
सर्व्वे ते न पुनर्व्वारं स्मारिष्यन्ते स्वनामभिः॥
१८ क्षेत्रस्थैः पशुभिः सार्द्धं पक्षिभिः खेचरैः सह।
भूतले विहरद्भिश्च सार्द्धं सर्व्वसरीसृपैः।
नियमं स्थापयिष्यामि मत्प्रजानां कृते तदा॥
धनुः खड्गञ्च युद्धञ्च भंक्त्वा लोप्स्यामि देशतः।
मत्प्रजाः शयनं तत्र कारयिष्यामि निर्भयं॥
१९ वाचा त्वां वरयिष्ये चानन्तकालाय मत्कृते।
धर्म्मन्यायदयास्नेहैस्त्वां वरिष्ये हि मत्कृते॥
२० सत्येनैव वरिष्ये त्वां ज्ञास्यसे च सदाप्रभुं॥
२१ सदाप्रभुरिदं ब्रूते प्रदास्याम्युत्तरं तदा।
दिवेऽहं ह्युत्तरं दास्ये द्यौ र्दास्यत्युत्तरं भुवे॥
२२ शस्यमाध्वीकतैलेभ्य उत्तरं भूश्च दास्यति।
उत्तरं यिष्रियेलाय पुन र्दास्यन्ति तानि च॥
२३ अहमेव पृथिव्यां तां वापयिष्यामि मत्कृते।
अहं ताञ्चानुकम्पिष्ये लोरुहामेतिनामिकां॥
लोयम्मिञ्च वदिष्यामि त्वमेवासि मम प्रजा।
माञ्च सम्बोधयन् सोऽपि भो मदीश्वर वक्ष्यति॥

---

३ तृतीयोऽध्यायः।

दृष्टान्तेनेस्रायेलो दुर्द्दशाया भाविसुखस्य च ज्ञापनं।

१ अपरं सदाप्रभु र्मां जगाद, त्वं पुनर्व्वारं याहि, सुहृदः प्रियायाम्
अथच व्यभिचारिण्यां योषिति प्रेम कुरुष्व, यतस्तथैव सदाप्रभुरिस्रायेलः
सन्तानेषु प्रेम कुरुते, ते त्वितरदेवान् अवक्षन्ते द्राक्षाफलानां पूपेषु
२ प्रीयन्ते च। अतोऽहं पञ्चदशरौप्यमुद्राभिः पञ्चदशैफामानै र्यवैश्च मदर्थं
३ तां क्रीतवान्। ताञ्चोक्तवान्, त्वं बहुदिनानि मदर्थमुपविश्यावस्थास्यसे,
व्यभिचारं न करिष्यसि पुरुषभोग्या न भविष्यसि च, त्वामुद्दिश्याह-
४ मपि तथैवावस्थास्ये। यत इस्रायेलः सन्ताना बहुदिनान्युपविश्यावस्था-

स्यन्ते, तेषां न राजा नाध्यक्षो न बलिदानं न देवप्रतिमा नैफोदं न
ठक्कुरा वा भविष्यन्ति । ततः परमिस्रायेलः सन्तानाः प्रत्यावृत्य निजे- ५
श्वरं सदाप्रभुं निजराजं दायूदञ्चान्वेषिष्यन्ति, अन्तिमकाले सदाप्रभुं
तस्य मङ्गलभावञ्च सकम्पा आश्रयिष्यन्ते च ।

---

४ चतुर्थोऽध्यायः ।

१ पापकारणात् प्रजानां याजकानाञ्च दण्डः ११ सुरार्च्चनकारणात् लोकानां भर्त्सनं १५ इस्रायेलो दृष्टान्तेन यिहूदा भर्त्सनञ्च ।

इस्रायेलीयसन्तानाः शृणुतोक्तिं सदाप्रभोः । १
देशनिवासिभिः सार्द्धं विवादोऽस्ति सदाप्रभोः ।
देशे सत्यं दयेशस्य ज्ञानं वा नैव विद्यते ॥
शपनं वितथालापो वधश्चौर्य्यं कुमैथुनं । २
आप्लावयन्ति सर्व्वं हि रक्तं रक्तेन स्पृश्यते ॥
शोकार्त्तोऽस्ति ततो देशो म्लानास्तस्य निवासिनः । ३
क्षेत्रस्थाः पशवश्चापि पक्षिणश्च विहङ्गमाः ।
संहारञ्च गमिष्यन्ति मत्स्या अप्यर्णवे स्थिताः ॥
मात्र विवदतां कोऽपि मा परं वा विनिन्दतु । ४
याजकै र्विवदन्ते ये तव जाति र्हि तैः समा ॥
अतो हेतो र्दिवाकाले स्खलनं ते भविष्यति । ५
यामिन्याञ्च त्वया सार्द्धं भाववादी स्खलिष्यति ।
जनन्यास्तव संहारः संविधायिष्यते मया ॥
प्रजानां मम संहारो ज्ञानाभावेन जायते । ६
त्वं निराकृतवान् ज्ञानं मया त्वञ्च निराकृतः ।
मम याजनकर्म्म त्वं पुनर्नैव करिष्यसि ॥
स्वेश्वरस्य व्यवस्थां त्वं यथा विस्मृतवानसि ।
त्वत्सन्तानानहञ्चापि विस्मरिष्यामि तादृशं ॥
यथा वृद्धिमगच्छंस्ते तथापराध्नुवन् मम । ७
श्रियं तेषां विकार्य्याहं विधास्याम्यवमाननं ॥
प्रजानां मम पापानि तेषां सन्त्युपजीविका । ८
ते तासामपराधेषु लुब्धप्राणा भवन्ति च ॥

९ प्रजाया या दशा सैव याजकस्य भविष्यति।
प्रदास्यामि त्वहं तस्मै तदाचारोचितं फलं।
तस्य कर्म्माणि तस्यैव वर्त्तयिष्यामि मस्तके॥
१० त आहारं करिष्यन्ति तृप्तिस्तैस्तु न लप्स्यते।
व्यभिचारं करिष्यन्ति वृद्धिस्तैस्तु न लप्स्यते।
यस्मान्नित्यप्रभुं मन्तुं निवृत्तास्तेऽभवन् जनाः॥
११ व्यभिचारसुरामद्यै र्हृदयं व्यपनीयते॥
१२ स्वीयकाष्ठं हि पृच्छन्ति प्रष्टुकामा मम प्रजाः।
तासाञ्चोत्तरदातारो जायन्ते निजयष्टयः॥
आत्मना व्यभिचारस्य भ्रान्तास्ता अभवन् यतः।
स्वेश्वरस्यानधीनाश्च व्यभिचारं समाचरन्॥
१३ बलिदानं प्रकुर्व्वन्ति गिरिशृङ्गेषु ते जनाः।
उपपर्व्वतपृष्ठेषु ते धूपं दाहयन्ति च॥
अल्लोनो लिब्निरेला चेतिनामानश्च पादपाः।
यत्र सन्त्युत्तमच्छाया तत्र वृक्षतलं गताः॥
युष्मद्दुहितृभिस्तस्माद् व्यभिचारः करिष्यते।
युष्माकं पुत्त्रवध्वश्च भविष्यन्त्यभिसारिकाः॥
१४ व्यभिचारं करिष्यन्ति युष्मद्दुहितरो यदा।
युष्माकञ्च यदा वध्वो भविष्यन्त्यभिसारिकाः।
तासां दण्डस्तदानीन्तु न विधायिष्यते मया॥
जनका अपि गच्छन्ति पुंश्चलीभिः समं पृथक्।
बलिदानञ्च कुर्व्वन्ति वेश्याभिः सह ते यतः।
हीनबुद्धिरियं जातिरवश्यं पातयिष्यते॥
१५ भो इस्रायेल् यदिस्यात् त्वं व्यभिचारं समाचरेः।
तथापि तादृशं दोषी यिहूदा मैव जायतां॥
यूयं मा गिल्गलं यात माश्रयध्वं वियावनं।
शपथार्थञ्च मा ब्रूत जीवदस्ति सदाप्रभुः॥
१६ इस्रायेल् स्वैरगामी हि गौ र्यथा स्वैरगामिनी।
अतो यद्वत् पृथुस्थाने चरन्तं मेषशावकं।
चारयिष्यति तांस्तद्वदचिरेण सदाप्रभुः॥
१७ प्रतिमाभिः समासक्त इफ्रयिम् वर्ज्यतां त्वया॥

सुरायां विकृतायां ते व्यभिचारो विधीयते। १८
स्वावज्ञायै जनाध्यक्षा देहि देहीति वाक्प्रियाः॥
पवनः स्वीयपक्षाभ्यां तां जातिञ्च निबद्धवान्। १९
लज्जापन्ना भविष्यन्ति स्वीययज्ञैश्च ते जनाः।

---

५ पञ्चमोऽध्यायः।

याजकानां प्रजानाम् अधिपतीनाञ्च भाविदण्डज्ञापनं।

याजकाः शृणुतोक्तिं मे इस्रायेल्कुल संशृणु। १
भो भूपालकुल त्वञ्चाकर्णयितुमर्हसि॥
यतो हेतोर्विचारोऽयं युष्मदर्थं विधीयते।
उन्माथा इव मिस्पायां यतो यूयमतिष्ठत।
ताबोरे विस्तृतं जालमिव यूयमभूत च॥
नरहत्यां गभीराञ्चाकुर्व्वन्नुन्मार्गगामिनः। २
भविष्यामि त्वहं तेषां सर्व्वेषां दमने पटुः॥
अहमिफ्रयिमं जाने नेस्रायेल् मत्त आवृतः। ३
इफ्रयिम् व्यभिचारी त्वम् इस्रायेल् अशुचीकृतः॥
स्वेश्वरस्य समीपं ते कुर्य्युः प्रत्यागमं यथा। ४
स्वक्रियाभिस्तथा तेषामनुज्ञा न विधीयते॥
व्यभिचारस्य किन्त्वात्मा तेषां मध्येऽवतिष्ठते।
तस्मात् सदाप्रभुञ्चापि नाभिजानन्ति ते नराः॥
इस्रायेलो यशोदाता साक्षात् साक्ष्यं ददाति हि। ५
इस्रायेल् इफ्रयिम् चोभौ स्वापराधैः स्खलिष्यतः।
यिहूदा अपि तत्काले तयोः सार्द्धं स्खलिष्यति॥
स्वगोमेषान् गृहीत्वा तेऽन्वेषणाय सदाप्रभोः। ६
गमिष्यन्ति तदुद्देशस्तैस्तु नैव समाप्स्यते।
यतः स दूरितस्तेषां तिरोभूतो भविष्यति॥
ते सदाप्रभुमुद्दिश्य जाता विश्वासघातकाः। ७
परजातिषु सन्तानान् यस्मात्ते समजीजनन्।
अधुना चन्द्रह्रासस्तान् साधिकारान् ग्रसिष्यते॥
गिब्यायां वाद्यतां तौर्य्यं रामायां भेरिरेव च। ८

उच्चै वैथावने ब्रूत विन्यामींस्त्वमभिद्रुतः॥
९ भर्त्सनस्य दिने ध्वंसं इफ्रयिम् प्रगमिष्यति।
इस्रायेलीयवंशेषु सत्यं विज्ञापयाम्यहं॥
१० यिहूदीयाधिपा जातास्तुल्याः सीमापसारकैः।
तेषामुपरि मत्कोपं ततः सेच्यामि तोयवत्॥
११ पीडनं मर्द्दनञ्चापि विचारे भुङ्क्त इफ्रयिम्।
यस्माज्जघन्यमादेशं स कामादनुगच्छति॥
१२ कीटतुल्यस्ततो हेतोरहमिफ्रयिमः कृते।
यिहूदीयकुलस्यापि कृतेऽहं संक्षयोपमः॥
१३ इफ्रयिम् स्वामयं दृष्ट्वा यिहूदाश्च निजक्षतं।
अशूरीयमहीपालम् उपाश्रिश्रियतेफ्रयिम्।
तं प्रतीकारिराजञ्च प्रत्यसौ प्राहिणोज्जनान्॥
किन्तु युष्माकमारोग्यं कर्त्तुं तेन न शक्यते।
असमर्थः स युष्मत्तः क्षतानां वा निवारणे॥
१४ सिंहतुल्यो यतो हेतोरहमिफ्रयिमं प्रति।
यिहूदाकुलमुद्दिश्याहं यथा युवकेशरी॥
स्वयमेव विदार्य्याहं गमिष्यामि यथागतं।
अहञ्चापहरिष्यामि कोऽपि नैवोद्धरिष्यति॥
१५ यावद् बुद्धा स्वदोषं ते मुखं नान्विष्यते मम।
अहं तावत् परावृत्य गमिष्यामि निजस्थलं।
शङ्कटस्यैव काले मां तेऽन्वेषिष्यन्ति यत्नतः॥

---

६ षष्ठोऽध्यायः।

१ अनुतापाय विनयः ४ जनानां पापनिर्णयश्च।

१ एत प्रत्यागमिष्यामो वयं नित्यप्रभुं प्रति।
स विदारितवान् अस्मान् स च स्वस्थीकरिष्यति।
स एवाहतवान् अस्मान् भन्त्स्यत्यस्मत्क्षतानि सः॥
२ दिनद्वये गते सोऽस्मान् पुनः सञ्जीवयिष्यति।
तृतीये दिवसे तेन पुनरुत्थापिता वयं।
जीवनं यापयिष्यामस्तस्य लोचनगोचरे॥

ज्ञात्वा नित्यप्रभुं ज्ञातुं भविष्यामोऽनुधाविनः। ३
अरुणोदयवत् तस्य निर्गमोऽस्ति निरूपितः॥
अस्माकं मङ्गलार्थं स आगमिष्यति वृष्टिवत्।
अन्तिमा वा यथा वृष्टि र्भूमिसिञ्चनकारिणी॥
इफ्रयिम् त्वां समुद्दिश्य किं नु कारिष्यते मया। ४
यिहूदास्त्वां समुद्दिश्य किं नु कारिष्यत मया॥
युवयोः साधुता यस्मात् प्रातःकालीनमेघवत्।
प्रत्यूषे च खवारीव सत्वरं सापगच्छति॥
भाववादिजनैस्तस्मात् तान् सन्तच्छितवानहं॥ ५
स्वमुखस्य च वाक्यैस्तान् जनान् निहतवानहं।
दण्डाज्ञास्तव तुल्याश्च विद्युतोत्पद्यमानया॥
साधुता रोचते मह्यं बलिदानं न रोचते। ६
मह्यं होत्रीययज्ञेभ्य ऐश्वज्ञानञ्च रोचते॥
नियमन्तु जना एतेऽलङ्घयन्नादमो यथा। ७
मामुद्दिश्य च ते तत्राभवन् विश्वासघातकाः॥
अधर्म्माचारिणां पूर्हि गिलियद् रुधिराङ्किता॥ ८
दस्यूनां संहति र्यद्वन्नरं धर्त्तुं प्रतीक्षते। ९
तद्वत् याजकसंङ्घोऽपि शिखिमः पथि हन्ति तं।
भ्रष्टाचारं यतो हेतोस्ते कुर्व्वन्त्यतिकुत्सितं॥
विकटा प्राप्यते दृष्टिरिस्रायेलः कुले मया। १०
इफ्रयिम् व्यभिचाराक्त इस्रायेल् च कलङ्कितः॥
भो यिहूदास्त्वदर्थञ्च निर्णीतं शस्यकर्त्तनं। ११
प्रजानां मम दासत्वे मया सम्परिवर्त्तिते॥

---

७ सप्तमोऽध्यायः।

१ पापहेतो र्जनानां भर्त्सनं ११ कापट्यायेश्वरीयक्रोधस्य ज्ञापनञ्च।

इस्रायेलं पुनः स्वस्थं कर्त्तुं मय्युद्यते सति। १
पापमिफ्रयिमो भाति शोमिरोणस्य दुष्टता॥
अन्तताचारिणस्ते हि गाहते तस्करो गृहं।
दस्यूनां संहति र्मार्गे दस्युवृत्तिं करोति च॥

२ कृत्स्नं तेषान्तु दुष्टत्वं स्मरणे निहितं मम।
निजान्तःकरणेष्वेतन्नैव तैरनुचिन्त्यते॥
अधुना ते तु तिष्ठन्ति परिवीताः स्वकर्म्मभिः।
तानि सर्व्वाणि विद्यन्ते मम लोचनगोचरे॥
३ हृष्टं कुर्व्वन्ति राजानं स्वदुष्टत्वेन ते जनाः।
जनाध्यक्षांश्च कुर्व्वन्ति हृष्टान् स्वीयमृषोक्तिभिः॥
४ ते पारदारिकाः सर्व्वे पूपकारेण चेन्धने।
चुल्ल्यां प्रज्वलिते यद्वद् वह्निस्तद्वज्ज्वलन्ति ते॥
सिक्तं गोधूमचूर्णं हि यावत्तेन मर्द्दितं।
यावन्न स्फायते तावन्निवृत्तः सोऽनुवीजनात्॥
५ अस्मद्राजोत्सवेऽध्यक्षा मद्यात् सन्ति ज्वरातुराः।
सोऽप्यत्याचारिभिः सार्द्धं प्रगृह्णीते करद्वयं॥
६ कृलनार्थं स्वचित्तानि चुल्लीवद्रचितानि तैः।
यदिस्यात् कृत्स्नयामिन्यां स्वप्यात् तेषां स पूपकृत्।
तथापि ज्वलति प्रातश्चुल्ली वह्निरिवोच्छिखः॥
७ सर्व्वे चुल्लीव तप्तास्ते ग्रसन्ते निजशासकान्।
राजानः सकलास्तेषां घोरते पतनं गताः।
मां प्रति प्रार्थनाकारी तेषां कोऽपि न विद्यते॥
८ मिश्रितं जातिभिः सार्द्धं करोत्यात्मानमिफ्रयिम्।
अपरावर्त्तितः पाके यः पूपः स इवेफ्रयिम्॥
९ बलं तस्य परै भुंक्तं तत्तु तेन न बुध्यते।
शिरः श्वेताङ्कितं तस्य तत्तु तेन न बुध्यते॥
१० इस्रायेलो यशोदाता साक्षात् साक्ष्यं ददाति हि।
न तु ते पुनरायान्ति स्वेश्वरं तं सदाप्रभुं।
एवम्भूतेऽपि ते तस्य न कुर्व्वन्ति गवेषणं॥
११ इफ्रयिम् हीनधीरस्ति मन्दबुद्धिकपोतवत्।
प्रार्थ्यते मिसरो वा तैरश्शूरो वाभिगम्यते॥
१२ तेषु गच्छत्सु जालन्तु मया विस्तारयिष्यते।
ते चावतारयिष्यन्ते मयाकाशात् खगा इव।
शासिष्यन्ते मया ते च स्वसमाजे यथा श्रुतं॥
१३ सन्तापो भविता तेषां यान्ति मत्तः पलाय्य ते।

विनाशो भविता तेषां मम भक्तिं त्यजन्ति ते।
मुक्तिकर्त्ताऽस्म्यहं तेषां तैस्तु मय्युच्यतेऽनृतं॥
न स्वान्तःकरणैः सार्द्धं मामुद्दिश्य रुदन्ति ते। १४
केवलं स्वीयशय्यासु हाहाकारं प्रकुर्व्वते।
शस्यार्थं मदिरार्थञ्च सङ्कुला मां त्यजन्ति ते॥
शिक्षयित्वा मया तेषां बाहवः सबलीकृताः। १५
मद्विरुद्धन्त्वनिष्टस्य सङ्कल्पान् रचयन्ति ते॥
कुर्व्वते ते परावृत्तिं न तु तं परमं प्रति। १६
यादृशं वञ्चनाकारि धनुस्ते सन्ति तादृशाः॥
जिह्वानां रोषतस्तेषां पतिष्यन्त्यसिनाधिपाः।
तेषां विद्रूपमूलं तत् मिसर्देशे भविष्यति।

---

८ अष्टमोऽध्यायः।

अधर्म्मकारणात् प्रतिमापूजनकारणाच्चेस्रायेलीयजनानां भाविदण्डस्य ज्ञापनं।

. भेरीं वादय वक्त्रेण शत्रु र्नित्यप्रभो र्गृहं। १
आक्रमिष्यति सुच्चिप्रम् उत्क्रोशः प्रपतन्निव॥
यस्माल्लङ्घितवन्तो हि नियमं मम ते जनाः।
मामकीनव्यवस्थायां जातास्ते हीनभक्तयः॥
मामुद्दिश्य रुदन्तस्ते वदिष्यन्ति मदीश्वर। २
भवन्तमभिजानीम इस्रायेलो जना वयं॥
उत्तमं यत् तदिस्रायेल् अवज्ञाय निरस्तवान्। ३
तस्यानुधावनं तस्मात् शत्रुस्तस्य करिष्यति॥
राजानः सन्नियुक्तास्तै र्न तु सम्मतितो मम। ४
अध्यक्षाश्च नियुक्तास्तै र्न तु तज्ज्ञातवानहं॥
स्वीयरूप्यसुवर्णाभ्यां विग्रहास्तैश्च निर्म्मिताः।
एतस्य परिणामस्तूच्छेदस्तेषां भविष्यति॥
शोमिरोन् तव गोवत्सः कृतवांस्त्वां निराकृतं। ५
मम कोपानलस्तेषु मनुष्येषूज्ज्वलोऽभवत्।
अहो निर्द्दोषता तेषां कतिकालं न सेत्स्यति॥
स त्विस्रायेल उत्पन्नस्तद्गणः कर्म्म स नेश्वरः। ६

शोमिरोणः स गोवत्सः खण्डशो निपतिष्यति ॥
७ वायुमेवोप्तवन्तस्ते वात्यां प्राप्स्यन्ति शस्यवत् ।
काण्डहीनन्तु शस्यं तत् चूर्णहीनस्तदङ्कुरः ।
फलं जायेत चेत् तर्हि परैस्तन्निगरीष्यते ॥
८ इस्रायेल् अवगीर्णोऽभूत् यच्च पात्रं न रोचते ।
तत्तुल्याः परजातीनां मध्ये तिष्ठन्ति तेऽधुना ॥
९ गता यस्मादश्शूरं ते निःसङ्गा वन्यगर्द्दभाः ।
प्रेमकारिजनान् लब्धुम् इफ्रयिम् दत्तवान् पणं ॥
१० जातिभ्यस्तैः पणो दत्तः सङ्गृह्णाम्यधुना तु ताः ।
भाराद् राजाधिराजस्य यास्यन्ति न्यूनताञ्च ते ॥
११ पापार्थमिफ्रयिम् बह्वी र्वेदी र्निर्म्मितवान् यतः ।
तस्मात् पापस्वरूपास्ता वेद्योऽजायन्त तत्कृते ॥
१२ स्वव्यवस्था कृते तस्य बहुशो लिखिता मया ।
विजातीयकथातुल्यं तत् सर्व्वं तेन गण्यते ॥
१३ मह्यं दत्तान् बलीन् मत्वा मांसमेवोत्सृजन्ति ते ।
तच्च खादन्ति तान् नैवानुगृह्णीते सदाप्रभुः ॥
अपराधन्तु तेषां तं स इदानीं स्मरिष्यति ।
पापानां तैः कृतानाञ्च फलं तेभ्यः प्रदास्यति ।
पुनर्व्वारं मिसर्द्देशस्ते गन्तव्यो भविष्यति ॥
१४ स्वस्रष्टारं हि विस्मृत्येस्रायेल् हर्म्याणि निर्म्ममे ।
यिहूदाश्च पुरी र्बह्वीः कृतवान् दुर्गवद्दृढाः ॥
अनलन्तु प्रहेष्यामि तस्य सर्व्वपुरीष्वहं ।
तत्रत्यानि च हर्म्याणि सोऽनलो भक्षयिष्यते ॥

---

९ नवमोऽध्यायः ।

देवार्च्चनादिपापकारणाद् दुर्द्दशाज्ञापनं ।

१ जातिवर्ग इवेस्रायेल् त्वमुल्लासाय मा हृषः ।
यस्मात् त्वं व्यभिचाराय स्वेश्वरं त्यक्तवत्यसि ।
सर्व्वशस्यखलेषु त्वं प्रीयसे पारितोषिके ॥
२ न खलं तैलकुण्डं वा जातिमेतां भरिष्यति ।

द्राक्षाणाञ्च रसस्तस्याः प्रत्याशां वञ्चयिष्यति॥
नैव नित्यप्रभो र्देशे सन्निवत्स्यन्ति तज्जनाः। ३
इफ्रयिम् तु पुनर्व्वारं मिसर्देशं गमिष्यति।
अशूरे चाशुचि द्रव्यं तेषां भक्ष्यं भविष्यति॥
न सदाप्रभवे तैश्चोत्स्रक्ष्यते गोस्तनीरसः। ४
न ते तस्य प्रियास्तेषां बलयः शोचनान्नवत्।
तदन्नं भक्ष्यते येन सोऽशुचि र्जायते जनः॥
यदन्नं विद्यते तेषां तत् तेषां प्राणरक्षकं।
तस्मान्नित्यप्रभो र्गेहे नोपयुक्तस्तदागमः॥
किं करिष्यथ पर्व्वाह उत्सवे वा सदाप्रभोः॥ ५
पश्य तेऽपगता ध्वस्ता मिसरस्तान् प्रचेष्यति। ६
निखनिष्यति तान् मोफं तेषां यच्च मनोहरं।
रूप्यं वृश्चिकपत्री तद् आत्मसात् प्रकरिष्यति।
तेषां पट्टगृहाणाञ्च मध्ये स्थास्यन्ति कण्टकाः॥
तत्त्वावधारणस्यैव दिवसा उपतस्थिरे॥ ७
अन्यायप्रतिकारस्य दिवसा उपतस्थिरे।
तच्चाभिज्ञास्यतीस्रायेल् भाववादी हि बालिशः।
आत्मिको नर उन्मत्तः किमेतस्य तु कारणं।
तव पापस्य बाहुल्यं हिंसायाश्च प्रभूतता॥
वर्त्तते मामकेशस्य सङ्गे चार इवेफ्रयिम्। ८
पाशो व्याधस्य रुध्यन्ते पन्थानो भाववादिनः।
हिंसाभावस्तदीशस्य मन्दिरे तं प्रतीक्षते॥
गभीरं भ्रष्टभावास्ते गिबियाया दिने यथा।
अपराधन्तु तेषां स ईश्वरोऽनुस्मरिष्यति। ९
स तेषां सर्व्वपापानां प्रतीकारं विधास्यति॥
मयासादित इस्रायेल् मरौ द्राक्षाफलं यथा। १०
यथोडुम्बरवृक्षस्य प्रत्यग्रे सति तेजसि।
आशुपक्वं फलं भात्यदर्शं युष्मत्पितॄंस्तथा॥
बालपियोरदेवन्तु तेऽभिजग्मुस्ततः परं।
तल्लज्जास्पदमुद्दिश्यात्मानं ते चक्रिरे पृथक्।
गर्हणीया बभूवुश्च स्वप्रीते विषया इव॥

११ यासीदिफ्रयिमः श्रीः सा पक्षिणीवोड्डयिष्यते।
विरेमुः प्रसवो भ्रूणो जरायोश्च सगर्भता॥
१२ यदिस्यात् ते स्वसन्तानान् वर्द्धयेयुः कथञ्चन।
तथापि हीनसन्तानांस्तान् करिष्याम्यहं पुनः॥
तानि तेषामपत्यानि न भविष्यन्ति मानवाः।
तेषामप्यापदायाति मयि तेभ्योऽपगच्छति॥
१३ सोरस्याभिमुखे भाति सुखं रोपित इफ्रयिम्।
स्वसन्तानांस्तु हन्त्रे स वहिरानेष्यतीफ्रयिम्॥
१४ देहि नित्यप्रभो तेभ्यस्त्वन्तु किं दातुमर्हसि।
गर्भस्राव्युदरं तेभ्यस्तनौ देहि च शोषितौ॥
१५ गिल्गले दुष्टता तेषां सम्पूर्णैव प्रकाशते।
तत्राहं तान् विगर्हे स्म कर्म्मणां वीक्ष्य दुष्टतां॥
स्वगेहात् तान् निरस्याहं नैव मंस्ये प्रियान् पुनः।
सर्व्वे तेषां जनाध्यक्षाः सन्ति मत्तः पराङ्मुखाः॥
१६ आहता इफ्रयीमीयाः शुष्कमूलाश्च निष्फलाः।
बालांश्चेज्जनयेयुस्ते हनिष्यामि प्रियान् शिशून्।
१७ मामकोनेश्वरस्तांश्च मनुष्यान् निग्रहीष्यति।
यतस्तै र्वचने तस्य स्वमनो न निधीयते।
ते मध्ये परजातीनाम् अटिष्यन्त इतस्ततः॥

---

१० दशमोऽध्यायः।

देवार्चनादिपापकारणाद् इस्रायेलीयानां भर्त्सन।

१ इस्रायेल् पर्णिनी द्राक्षा फलं तस्याश्च युज्यते।
फलबाहुल्यवद् बह्वी र्वेदीः स्वार्थं करोति सः।
देशोत्कर्षवदुत्कृष्टा मूर्त्ती र्निर्म्मिमते च ते॥
२ मर्म्मभेदी तु तेषां स दोषिणश्चाधुनैव ते।
वेदीश्छेत्स्यति तेषां स मूर्त्तीश्च ध्वंसयिष्यति॥
३ ते वक्ष्यन्त्यधुनास्माकं राजा कोऽपि न विद्यते।
(न सदाप्रभुतोऽभैष्म राजा नः किं करिष्यति॥
४ ते) वदन्ति कथाः शापैः समयं कुर्व्वतेऽन्ततः।

तस्मादुत्पत्स्यते दण्डः क्षेत्राल्यां धुस्तुरो यथा ॥
वैथावनस्थगोवत्से भीताः शोमिरोणवासिनः । ५
यतस्तत्कारणाच्छोकं प्रकरिष्यन्ति तत्प्रजाः ॥
पूर्व्वं तस्मिन् हृतोल्लासा ये च तस्य पुरोहिताः ।
ते शोचिष्यन्ति तत्तेजः स यतस्तद्विवर्जितः ॥
देयो नायिष्यतेऽसूरं स राज्ञे प्रतिकारिणे । ६
इफ्रयिम् लप्स्यते लज्जां स्वमन्त्राद्ध्रीष्यतीस्रयेल् ॥
शोमिरोणो नृपो नष्टस्तृणं यद्वज्जलोपरि ॥ ७
इस्रायेलस्य पापं या उच्चस्थल्यो विथावनः । ८
ताश्छेत्स्यन्ते प्ररोक्ष्यन्ति तद्वेद्यां कण्टकक्षुराः ॥
अस्मांश्छादयतेत्यद्रींस्तदा वक्ष्यन्ति तज्जनाः ।
ते गिरींश्च वदिष्यन्ति पततास्मच्छिरःस्विति ॥
आ गिब्याया दिनेभ्यस्त्वमिस्रायेलसि पातकी । ९
त्वज्जनास्तस्थिरे तत्र गिब्यायां न दधार तान् ।
दुर्जनत्वस्य वंशानां प्रातिकूल्यात् कृतं रणं ॥
तांस्तु शासितुकामोऽहं तेषां बाधाय जातयः । १०
सङ्गमिष्यन्ति बद्धानां स्वापराधद्वये मया ॥
इफ्रयिम् शिक्षिता धेनुः प्रीयते शस्यमर्द्दने । ११
ग्रीवायान्तु सुरूपायां तस्या धास्याम्यहं युगं ॥
योक्ष्यामीफ्रयिमं याने यिहूदाः कृक्ष्यति क्षितिं ।
याकूबः स्वकृते लोष्टान् मर्द्दयिष्यति खण्डशः ॥
धर्म्ममुद्दिश्य वीजस्य वपनं कर्त्तुमर्हथ । १२
साधुत्वस्योपयुक्तञ्च शस्यं कर्त्तितुमाप्स्यथ ।
यूयं भूमिं हलास्पृष्टां स्वकृते कर्ष्टुमर्हथ ॥
उपयुक्तो ह्ययं कालोऽन्वेषणाय सदाप्रभोः ।
स उपस्थाय युष्मभ्यं धर्म्मवृष्टिं प्रदास्यति ॥
युष्माभि र्दुष्टतामुप्त्वान्यायशस्यं हि कृत्यते । १३
अनृतस्य फलञ्चैव युष्माभिः परिभुज्यते ।
त्वं स्वमार्गं स्ववीरांश्च बहूनाश्रितवान् यतः ॥
उद्भविष्यति निर्घोषस्तस्मात् त्वज्जनमध्यतः । १४
सर्व्वेषां तव दुर्गाणां नाशस्तद्वद् भविष्यति ।

यद्वद् युद्धदिने शल्मन् बैथार्बेलं व्यनाशयत्।
तदानीं शिशुभिः साद्धं मातरः खण्डशः कृताः॥
१५ बैथेल् युष्मन्महादोषात् तत्समान् वः करिष्यति।
प्रात र्नंक्ष्यति निःशेषम् इस्रायेलो महीपतिः॥

११ एकादशोऽध्यायः।

१ ईश्वरानुग्रहकृत इस्रायेलीयानाम् अकृतज्ञता दण्डनीयता च ८ तान् प्रति ईश्वरस्य दयाज्ञापनञ्च।

१ तारुण्यकाल इस्रायेल् आसीत् मत्प्रेमभाजनं।
मिसर्देशत एवाहं स्वीयपुत्त्रं समाह्वयं॥
२ परन्त्वाहूयमानास्ते दूरं यान्ति स्म दूष्टितः।
बलिं यच्छन्ति बालेभ्यो मूर्त्तिभ्यो धूपसौरभं॥
३ इफ्रायिममहञ्चैव पादचारमशिक्षयं।
तस्य बाहुद्वयं धृत्वाहं तञ्चागमयं स्वयं।
तेषान्त्वारोग्यदाताहं तन्न जानन्ति ते जनाः॥
४ अहं मानवपाशैस्तान् आकर्षं प्रेमरज्जुभिः।
हनूतो युगहर्त्तेवाहञ्च तेषां कृतेऽभवं।
भक्ष्यद्रव्याणि तेषाञ्च सम्मुखं पर्य्यवेषयं॥
५ यदिस्यान्मिसरं देशं स न प्रत्यागमिष्यति।
तथाप्यश्शूरराजोऽसौ तस्य राजा भविष्यति।
परावर्त्तयितुं चित्तं यतस्ते सन्त्यसम्मताः॥
६ चण्डवात्येव निस्त्रिंशस्तत्पुरेषु भ्रमिष्यति।
संहरिष्यति तच्छाखा ग्रसंस्तेषां कुमन्त्रणात्॥
७ मत्तोऽपक्रमणञ्चैवावलम्बन्ते मम प्रजाः।
आरोहणार्थमाहूत उन्नतिं कोऽपि नेच्छति॥
८ इफ्रयिम् त्वां कथं जह्यां त्वां वा प्रोज्झेयमिस्रयेल्।
त्वामद्मायाः समानं वा विधातुं शक्नुयां कथं॥
सिबोयीमः समानं वा त्वां कर्त्तुं शक्नुयां कथं।
मदन्तर्घूर्णते चित्तं युगपत् तपते मनः॥
९ सफलां न करिष्यामि स्वीयकोपस्य चण्डतां।

न प्रवृत्तो भविष्यामीफ्रयिमो वा विनाशने॥
यस्मादीश्वर एवाहं न मनुष्योऽहमस्मि हि।
त्वदन्तःस्थः पवित्रोऽहं नागमिष्यामि वैरिवत्॥
ते च नित्यप्रभोरेव भविष्यन्त्यनुगामिनः। १०
सिंहगर्ज्जनतुल्यञ्च गर्ज्जनं स करिष्यति।
गर्ज्जिते तेन सन्ताना उद्भ्रमिष्यन्ति सागरात्॥
यथा पक्षी मिसर्देशाद् उद्भ्रमिष्यन्ति ते तथा। ११
कपोतो वा यथा तद्वद् अश्शूर्देशस्य मध्यतः।
तान् स्वधामसु धास्यामीति ब्रवीति सदाप्रभुः॥
इफ्रयिम् अयथार्थैर्हि वाक्यैः परिवृणोति मां। १२
इस्रायेलः कुलञ्चापि छलैः परिवृणोति मां॥
अद्यापीशस्य सङ्गी सन् विश्वासार्हस्य तस्य च।
पवित्रस्य समीपस्था यिहूदा भ्रमणप्रियः॥

---

१२ द्वादशोऽध्यायः।

१ इफ्रयिमं यिहूदां याकूबञ्च प्रति तर्ज्जनं ७ इफ्रयिमः पापानां निर्णयो दण्डश्च।

इफ्रयिम् पवनाशी हि पूर्व्ववातानुधावकः। १
स म्रषोक्तिं विनाशञ्च वर्द्धयत्यखिलं दिनं॥
अश्शूरीयजनैः सार्द्धं समयं विदधाति सः।
मिस्रीयेभ्यो जनेभ्यश्च तैलं तेनोपनीयते॥
यिहूदा सह तस्माच्च विवादोऽस्ति सदाप्रभोः। २
याकूबस्य यथाचारः कर्त्तव्यं शासनं तथा।
स तत्कर्म्मानुरूपञ्च फलं तस्मै प्रदास्यति॥
स्वभ्रातुः पादमूलं स जरायौ धृतवान् पुरा। ३
स्वीयशक्तिप्रयोगेण प्रबभूवेश्वरस्य च॥
प्रभूय स्वर्गदूतस्य स बभूव जयी तदा। ४
रुदंस्तस्य समीपञ्च प्रार्थनां व्याजहार सः।
बैथेले तेन स प्रापि तत्रास्मानाललाप च॥
ईश्वरो वाहिनीनान्तु स एवास्ति सदाप्रभुः। ५
स सदाप्रभुरित्येव नाम्ना स्मारिष्यते सदा॥

६ परावर्त्तस्व तस्मात् त्वं तावकीनेश्वरं प्रति।
दयां रक्ष विचारञ्च प्रतीक्ष्य स्वेश्वरं सदा॥
७ बणिक् सोऽस्ति किनानीयो हस्ते कूटतुलां धरन्।
दौरात्म्यस्य ह्यनुष्ठानं सम्यक् तस्मै च रोचते॥
८ अत इफ्रयिमाहेत्थं जातस्तावदहं धनी।
आत्मनश्च कृते वित्तं समासादितवानहं॥
ममोपार्जितसर्व्वस्वे नैव कश्चन तादृशः।
आविष्कारिष्यते दोषो येन जायेत पातकं॥
९ आमिसर्देशतोऽहन्तु त्वदीशोऽस्मि सदाप्रभुः।
शिविरे वासयामि त्वाम् अद्य पर्व्वदिनेष्विव॥
१० भाववादिन आभाषे भूयो यच्छामि दर्शनं।
भाववादिगणेनाहमुपमा व्याहरामि च॥
११ गिल्यदे किमधर्म्मोऽस्ति सर्व्वेऽलीका हि सर्व्वशः।
वृषाणां बलिदानेन यज्ञं कुर्व्वन्ति गिल्गले।
वेद्यश्च प्रचुरास्तेषां क्षेत्रालिष्वश्मराशिवत्॥
१२ याकूबोऽरामदेशं हि गन्तुं चक्रे पलायनं।
भार्य्यार्थं दास्यवृत्तिञ्चेस्रायेल् स्वीकृतवांस्तदा।
स चाभूत् सहधर्म्मिण्या लाभार्थं पशुरक्षकः॥
१३ इस्रायेलं मिसर्देशाद् आनैषीद् भाववादिना।
सदाप्रभुः पुनस्तञ्च सोऽरक्षीद् भाववादिना॥
१४ इफ्रयिम् तु तमत्युग्रं कोपयामास कर्म्मभिः।
तस्य रक्तापराधं स मस्तके तस्य धास्यति।
धिक्कारस्य फलं तस्मै प्रभुस्तस्य प्रदास्यति॥

---

१३ त्रयोदशोऽध्यायः।

१ मूर्त्त्यर्च्चनाकारणाद् ईश्वरेणेफ्रयिमो भाविदण्डः ९ ईश्वरस्य प्रतिज्ञा १५ दण्डज्ञापनञ्च।

१ पूर्व्वमिफ्रयिमो वाक्याद् उदविज्यन्त मानवाः।
इस्रायेलि तदानीं स आसीदुच्चपदान्वितः।
बालदेवेन पश्चात्तु दोषीभूय ममार सः॥

इदानीमपि ते पापमाचरन्त्युत्तरोत्तरं। २
स्वविलासितरूप्येण प्रतिमा रचयन्ति ते।
स्वबुद्ध्या कल्पिता मूर्त्तीः सर्व्वशः शिल्पिनिर्म्मिताः॥
ता एवोद्दिश्य ते वाक्यमीदृशं व्याहरन्ति च।
यजमाना नराः सर्व्वे गोवत्सांश्चुम्बयन्त्विति॥
भविष्यन्ति तु तस्मात् ते प्रातःकालीनमेघवत्। ३
यस्तिरोधीयते क्षिप्रं समास्तच्छिशिरेण वा॥
किं वा शस्यतुषैस्तुल्याः खलतो वायुचालितैः।
सदृशा वापि धूमस्य गवाक्षेण प्रगच्छतः॥
आमिसर्देशतोऽहन्तु त्वदीशोऽस्मि सदाप्रभुः। ४
न ज्ञातव्योऽपरः कश्चिन्मां विहायेश्वरस्त्वया।
यतो मत्तोऽपरः कश्चित् त्राणकर्त्ता न विद्यते॥
प्रान्तरे त्वामवैक्षेऽहं तृष्णाया वसतिस्थले॥ ५
स्वप्रचारे यथा मेषास्तृप्तिं ते लेभिरे तथा। ६
तृप्ता तूद्धतचित्तास्ते जाता मां व्यस्मरंस्ततः॥
अहं तस्माद् भविष्यामि तान् समुद्दिश्य सिंहवत्। ७
मार्गे द्वीपी यथा तद्वत् करिष्यामि प्रतीक्षणं॥
भल्लूकी हृतवत्सेव मिलिष्यामि च तैः सह। ८
तेषां हृदयपद्मञ्च दारयिष्यामि खण्डशः॥
तत्र केशरिणीवाहं भक्षयिष्यामि तान् जनान्।
तांश्च विदारयिष्यन्ति पशवः क्षेत्रचारिणः॥
भो इस्रायेल् क्षिणोति त्वाम् अप्रीतिः स्वगतौ मयि॥ ९
यस्त्वां सर्व्वपुरे रक्षेत् कुत्र सोऽस्ति नृपस्तव। १०
कुत्र विचारकर्त्तारस्तानुद्दिश्य त्वमुक्तवान्।
राजानमधिपांश्च त्वमस्मभ्यं दातुमर्हसि॥
क्रुद्धायच्छं नृपं तुभ्यं कुपित्वा चाहरं पुनः॥ ११
इफ्रैमः पुटितो दोषः पापं कोषे च सञ्चितं॥ १२
तस्य सूतिव्यथायाति स शिशुर्ज्ञानवर्ज्जितः। १३
सोऽपत्यानां यतो द्वारे स्वकाले नोपतिष्ठति॥
तान् जनान् उद्धरिष्यामि पातालस्य करादहं। १४
भविष्यामि स्वयं तेषां मुक्तिकर्त्ता च मृत्युतः॥

क्क मारी तव भो मृत्यो क्क पाताल तव च्चयः।
मम दृष्ट्यास्तिरोभूतः पश्चात्तापो भविष्यति॥
१५ भ्रातृवर्गस्य मध्येऽसौ विद्यते फलवत्तमः।
वायुस्त्वायाति पूर्व्वीयो वायुरेव सदाप्रभोः।
मरुस्थानात् समायाति तेनोत्सस्तस्य शोच्यति॥
तस्य तोयप्रवाहश्च जलहीनो भविष्यति।
रम्याणां सर्व्वपात्राणां स कोषं लुण्ठयिष्यति॥
१६ शोमिरोन् लप्स्यते दण्डम् ईश्वराय यतोऽद्रुहत्।
असिना ते पतिष्यन्ति भंक्ष्यन्ते खण्डशः सुताः।
स्त्रियो विदारयिष्यन्ते गर्भवत्यः कृपां विना॥

---

१४ चतुर्दशोऽध्यायः।

१ मनःपरावर्त्तनाय विनतिकथनं ४ ईश्वरीयाशीर्व्वादस्य प्रतिज्ञाकथनञ्च।

१ इस्रायेल् अभिगच्छ त्वं पुनः स्वेशं सदाप्रभुं।
यस्मात् स्वीयापराधेन सञ्जातं स्खलनं तव॥
२ स्वसङ्गे वाच आदाय प्रतियात सदाप्रभुं।
तञ्च ब्रूतापराधं त्वं सकलं हर्त्तुमर्हसि।
क्षेममादत्स्व दास्यामस्तुभ्यञ्चौष्ठवृषान् वयं॥
३ अस्माकं हि परित्राणमस्सूरो न करिष्यति।
न तुरङ्गान् समारुह्य करिष्यामो गमागमौ॥
न पुनः स्वकृतं वस्त्वभिधास्यामोऽस्मदीश्वरं।
करुणा पितृहीनेन यस्मात् त्वय्येव लभ्यते॥
४ तेषामपक्रमव्याधिः प्रतीकारिष्यते मया।
तेष्वहं छन्दतः प्रेष्ये शान्तक्रोधो हि तेष्वहं॥
५ इस्रायेलं समुद्दिश्य भविष्यामि स्ववारिवत्।
पद्मिनी च यथा तद्वत् स्फुटितः स भविष्यति।
लिबानोनं यथा तद्वत् स्वमूलानि च भन्त्स्यति॥
६ तच्छाखाः प्रसरिष्यन्ति शोभा जीततरोरिव।
लिबानोनगिरेश्चेव गन्धस्तस्य भविष्यतः॥
७ तच्छायायां सुखासीनाः प्रत्यायास्यन्ति मानवाः।

गोधूमान् जीवयिष्यन्ति द्राक्षावल्लीव वर्धिताः ।
ते भविष्यन्ति तत्ख्याति लिंबानोनीयमद्यवत् ॥
इफ्रयिम् विग्रहैः सार्द्धं कः सम्बन्धः पुन मम । ८
प्रार्थनामनुगृह्णाम्यवेक्षिष्ये तमहं स्वयं ॥
हरित्पर्णेन तुल्योऽहं भविता देवदारुणा ।
मत्त उत्पद्यमानं हि फलमासाद्यते तव ॥
को ज्ञानी नर एतत् स सर्व्वमर्हति बोधितुं । ९
को नरो बुद्धिमानेतत् सर्व्वं स ज्ञातुमर्हति ॥
यस्मान्नित्यप्रभो मार्गाः सरला नात्र संशयः ।
धार्म्मिकास्तत्र गच्छन्ति दुष्टास्तत्र स्खलन्ति च ॥

योयेलस्य भविष्यद्वाक्यानि ।

१ प्रथमोऽध्यायः ।

१ दुःखायेलो भाविदण्डज्ञापनं ८ विलापार्थम् आह्वानं १२ विलापार्थमुपवासदिनं निरूपयितुं विनतिश्च ।

पिथूयेलस्य पुत्त्रं योयेलं प्रति सदाप्रभो यद् वाक्यं प्रादुरभूत् १
तद्वृत्तान्तोऽयं ।

भो प्राचीनजना यूयमेतत् संश्रोतुमर्हथ । २
भो देशवासिनः सर्व्वे कुरुताकर्णनं मयि ॥
युष्माकं दिवसेष्वेतत् सम्भूतं किं कदाचन ।
किं कदाचन युष्माकं पितॄणां दिवसेषु वा ॥
स्वीयपुत्त्रेषु युष्माभिः क्रियतां तस्य वर्णना । ३
युष्मत्पुत्त्रैः स्वपुत्त्रेषूत्तरवंशे च तत्सुतैः ॥
शूकानां हि यदुच्छिष्टं शलभास्तदखादिषुः । ४
शलभानां यदुच्छिष्टं पतङ्गास्तदखादिषुः ।
पतङ्गानां यदुच्छिष्टं घुर्घुर्य्यस्तदखादिषुः ॥
यूयं जागृत भो मत्ताः कुरुध्वञ्चोच्चरोदनं । ५

हाहाकारं कुरुध्वञ्च भो सर्व्वे मद्यपायिनः।
नवद्राक्षारसो यस्मात् संहृतो युष्मदास्यतः॥
६ जातिरेका यतो हेतो र्मम देशं समाक्रमीत्।
विक्रान्ता गणनातीता तद्दन्ताः सिंहदन्तवत्।
केशरिण्या रदानाञ्च समानाः सन्ति तद्रदाः॥
७ साद्ध्वंसन्मम द्राक्षां ममालावीदुडुम्बरं।
सर्व्वशो निस्त्वचं कृत्वा तञ्च भूमौ न्यपातयत्।
श्वेतवर्णा हि सञ्जाताः सकलास्तस्य पल्लवाः॥
८ सौकुमार्य्यस्य कान्तस्य शोकाच्छागेन वेष्टिता।
युवतीव त्वमप्युच्चैः परिदेवनमीरय॥
९ भक्ष्यपानीयनैवेद्ये हृते नित्यप्रभो र्गृहात्।
याजकाः परिशोचन्ति सेवमानाः सदाप्रभुं॥
१० नष्टं क्षेत्रं सशोका भू र्गोधूमा अनशन् यतः।
नवद्राक्षारसः शुष्कस्तैलञ्च म्लानतां गतं॥
११ भो कृषाणा विलज्जध्वं रुदितोद्यानरक्षकाः।
गोधूमान् हि यवांश्चाधि क्षेत्रे शस्यं यतोऽनशत्॥
१२ द्राक्षावल्ली च शुष्काभूत् परिम्लान उडुम्बरः।
खर्ज्जूरो दाडिमश्चापि नागरङ्गतरुस्तथा।
क्षेत्रस्थाः सकला एव शुष्कीभूता महीरुहाः।
शुष्कीभूतो यतो हर्षो नृसन्तानसमाजतः॥
१३ याजकाः स्वकटिं बद्धा विलापं कर्त्तुमर्हथ।
हाहाकारं कुरुध्वञ्च भो वेद्याः परिचारकाः॥
सकला यूयमायात भो मदीशस्य सेवकाः।
शाणवस्त्रै र्युष्माभि र्याप्यतां कृत्स्नयामिनी।
भक्ष्यपानीयनैवेद्ये युष्मदीशगृहाद्धृते॥
१४ आज्ञां धर्म्मोपवासस्य दत्त पर्व्वं विघोषत।
युष्मदीशस्य गेहे च वृद्धादीन् देशवासिनः।
सर्व्वान् सङ्गृह्य शोकार्त्ता रुत नित्यप्रभुं प्रति॥
१५ हाहा किं दिनमासन्नो यस्मान्नित्यप्रभोरहः।
सर्व्वशक्तिमतः पार्श्वादेति स प्रलयो यथा॥
१६ किं न व्युच्छिद्यते भक्ष्यमस्माकं दृष्टिगोचरात्।

आमोदोऽपि विलासश्चास्माकमीश्वरस्य गेहतः॥
बीजानि स्वीयलोष्टानामधस्ताद् गलितानि हि। १७
कोषागाराणि नष्टानि कुसूला भूमिसात्कृताः।
यतः क्षेत्रस्थगोधूमाः सकलाः शुष्कतां गताः॥
क्रन्दन्ति पशवस्तीव्रं रोरूयन्ते च गोव्रजाः। १८
यतो हेतोः कृते तेषां गोप्रचारो न विद्यते।
तैः सार्द्धं दुर्द्दशापन्ना जाता मेषव्रजा अपि॥
उच्चकैः प्रार्थयिष्येऽहं त्वामुद्दिश्य सदाप्रभो। १९
यस्मात् प्रग्रस्तवानग्निः प्रचारान् प्रान्तरे स्थितान्।
शिखा दग्धवती सर्व्वान् क्षेत्रस्थांश्च महीरुहान्॥
रुवन्ति त्वां समुद्दिश्य मृगाः क्षेत्रचरा अपि। २०
यस्मात् तोयप्रवाहिन्यः सरितः शुष्कतां गताः।
यस्माच्च ग्रस्तवानग्निः प्रचारान् प्रान्तरे स्थितान्॥

---

२ द्वितीयोऽध्यायः।

१ भयङ्करदण्डनिर्णयः १२ अनुतापाय विनतिः १५ उपवासनिर्णयः १८ आशीर्व्वाद-प्रतिज्ञानं २१ भाविक्षेमकथनञ्च।

उच्चैस्तूर्य्यध्वनिं यूयं सीयोने कर्त्तुमर्हथ। १
उच्चनादं कुरुध्वञ्च पवित्रे पर्व्वते मम॥
सकला एव कम्पन्तां मनुष्या देशवासिनः।
दिनं नित्यप्रभो र्यस्मादेति नेदिष्ठमेव तत्॥
सोऽहः कृष्णस्तमस्वी च मेघनीलाभ्रयोरहः। २
यथा पर्व्वतचूड़ासु विस्तीर्य्यैतारुणोदयः।
जातिरेका तथोदेति महती बलत्तमा॥
आयुगात् तादृशी कापि न बभूव कदाचन।
तत्पश्चात् पुरुषश्रेण्या वत्सरेषु च तादृशी।
जातिरन्या पुनर्व्वारं न कदापि भविष्यति॥
तस्या अग्रे ग्रसत्यग्निस्तत्पश्चात् तपते शिखा। ३
एदनोद्यानवत् तस्या अग्रे देशो विराजते।
तस्याः पश्चात्तु विध्वस्ता मरुभूमि र्विजायते।
ततः पलायनेनापि कोऽपि रक्षां न लप्स्यते॥

४ अश्वतुल्याकृतिस्तेषां ते धाविष्यन्ति सादिवत् ॥
५ गिरिमूर्द्धः स्रविष्यन्ते महाघोषा रथा इव ।
तृणाग्राग्निशिखावद्वा स्फुटनध्वनिसंयुताः ।
तुल्या विक्रान्तया जात्या युद्धार्थं श्रेणिबद्धया ॥
६ तेषामग्रे मनुष्याणां यन्त्रणा सम्भविष्यति ।
सकलानि च वक्त्राणि संहरिष्यन्ति चारुतां ॥
७ सकलास्ते भविष्यन्ति शूरवद् द्रुतगामिनः ।
ते स्कन्दिष्यन्ति प्राचीरं युद्धाभिज्ञा नरा इव ॥
गमनं ते विधास्यन्ते प्रत्येकं निजवर्त्मना ।
परमार्गप्रवेशञ्च न करिष्यन्ति ते मिथः ॥
८ नैको बाधिष्यतेऽन्यं वा स्वमार्गेण तु यास्यति ।
ते शूलाग्रे पतित्वापि स्थास्यन्त्यच्छिन्नपंक्तयः ॥
९ ते पुरं पर्य्यटिष्यन्ति तेऽभिद्रोष्यन्ति कुड्यकं ।
वेश्मान्यारुह्य वेक्ष्यन्ति गवाक्षैस्तस्करा इव ॥
१० तेषामग्रे सकम्पा भूश्चञ्चलं व्योममण्डलं ।
चन्द्रादित्यौ तमस्विन्यौ तारकाश्च हृतप्रभाः ॥
११ रवञ्चेरयति स्वीयं स्वसैन्याग्रे सदाप्रभुः ।
शिविरं सुमहत् तस्य तदाज्ञासाधको बली ॥
यतो हेतो महानेव दिवसोऽस्ति सदाप्रभोः ।
स चातीव भयार्होऽस्ति स सोढुं केन शक्यते ॥
१२ किन्त्विदानीमपि ब्रूते युष्मानेतत् सदाप्रभुः ।
उपवासं प्रकुर्व्वन्तो रोदनं शोकमेव च ।
सर्व्वान्तःकरणैर्यूयं प्रत्यागच्छत मां प्रति ॥
१३ स्वचित्तान्येव विच्छिन्त न तु स्वीयपरिच्छदान् ।
प्रत्यायात च युष्माकमीशं नित्यप्रभुं प्रति ॥
यतो हेतोः कृपालुः स स्नेही क्रोधे विलम्बितः ।
स महाकरुणश्चास्ति विपत्त्या चानुतप्यते ॥
१४ किं जाने स परावृत्य पश्चात्तापं करिष्यते ।
आशिषञ्चार्पतोऽस्माकमीश्वरस्य सदाप्रभोः ।
भक्ष्यपानीयनैवेद्ये स्वपश्चाच्छेषयिष्यति ॥
१५ उच्चैस्तौर्य्यध्वनिं यूयं सीयोने कर्त्तुमर्हथ ।

आज्ञां धर्म्मोपवासस्य दत्त पर्व्व विशेषत। १६
सङ्गृह्णीत प्रजा आज्ञां विधद्धं धर्म्मसंसदः॥
प्राचीनान् कुरुतैकत्र सङ्गृह्णीत च बालकान्।
स्तन्यपोष्यान् शिशूंश्चापि स्वीयभोगगृहाद् वरः।
विनिष्क्राम्येन्नवोढा च स्वीयगुप्तस्थलाद् वधूः॥
यूयं भो याजकाः सर्व्वे सेवमानाः सदाप्रभुं। १७
मध्येऽलिन्दस्य वेद्याश्च रुदन्तो वक्तुमर्हथ॥
अनुकम्पां विधत्स्व त्वं स्वप्रजासु सदाप्रभो।
त्वं स्वकीयाधिकारञ्च मा धिक्कारास्पदं कुरु॥
तेषामुपरि कर्त्तृत्वं माप्नुयुः परजातयः।
अमीषामीश्वरः कुत्रेदं ब्रूयु र्जातयः कुतः।
नित्यप्रभुः स्वदेशस्य पक्षे स्पर्धिष्यते तदा। १८
स्वप्रजानां निमित्तं स करुणाञ्च करिष्यते॥
स्वप्रजा वक्ष्यतीदञ्चोत्तरं कृत्वा सदाप्रभुः। १९
गोधूममद्यतैलान्यहं प्रहेष्यामि वः कृते॥
पश्य तैरेव यूयञ्च परितृप्ता भविष्यथ।
न धिक्कारास्पदं युष्मान् पुन र्धास्यामि जातिषु॥
युष्मत्तो दवयिष्यामि शत्रुमुत्तरवासिनं। २०
ताडयन् प्रेरयिष्यामि तञ्च ध्वस्तमरुस्थलं।
तन्मुखं पूर्व्वपाथोधिं पृष्ठं पश्चिमसागरं॥
तस्योद्यास्यति दुर्गन्धः पूतिस्तस्योद्गमिष्यति।
यतो हेतो र्महादर्पी स्वक्रियाभि र्बभूव सः॥
अतो भो देश मा भैषीरुल्लासं कुरु हृष्य च। २१
यतो हेतो र्महानस्ति स्वक्रियाभिः सदाप्रभुः॥
मा कुरुध्वं भयं यूयं भो मृगाः क्षेत्रचारिणः। २२
हरिद्वर्णा यतो भान्ति प्रचाराः प्रान्तरस्थिताः॥
यतो हेतोश्च यच्छन्ति स्वफलानि महीरुहाः।
पश्यतोडुम्बरद्राक्षे स्वीयतेजः प्रयच्छतः॥
यूयं सीयोनसन्ताना उल्लासं कर्त्तुमर्हथ। २३
कुरुध्वं तत आह्लादं युष्मदीशे सदाप्रभौ॥
यस्माद् धार्म्मिकताय स युष्मभ्यं दत्तवान् गुरुं।

आसारान् युष्मदर्थञ्च व्योमतः प्रेषयिष्यति।
उत्तरामेव वृष्टिञ्च वर्षारम्भे तथादिमां॥
२४ परिपूर्णानि शस्येन भविष्यन्ति खलानि च।
द्राक्षारसश्च तैलञ्च कुण्डेभ्यः प्रस्रविष्यतः॥
२५ प्रहिता वो विरुद्धञ्च या महावाहिनी मया।
शलभास्ते पतङ्गाश्च घुर्घुर्य्यः सूककीटकाः।
सर्व्वं सम्भक्ष्य यान् वर्षान् अकार्षु र्लाभवर्ज्जितान्।
युष्मदर्थं करिष्यामहं तेषां क्षतिपूरणं॥
२६ यूयं कुर्व्वन्त आहारं खाद्यद्रव्येण तर्प्स्यथ।
स्तोष्यध्वे नामधेयञ्च युष्मदीशसदाप्रभोः॥
युष्मानुद्दिश्य यस्मात् स आश्चर्य्याः कृतवान् क्रियाः।
लज्जाञ्चानन्तकालेऽपि न प्राप्स्यन्ति मम प्रजाः॥
२७ इस्रायलस्य मध्येऽहमस्मीति ज्ञानमाप्स्यथ।
नित्यप्रभुरहञ्चेशो युष्माकं नास्ति चापरः।
लज्जाञ्चानन्तकालेऽपि न प्राप्स्यन्ति मम प्रजाः॥
२८ ततः पश्चादियञ्चैव फलोत्पत्ति र्भविष्यति।
वर्षिष्यामि निजात्मानं सर्व्वमर्त्त्यस्य मूर्धनि।
युष्माकं पुत्त्रपुत्त्रीभि र्भाविोक्तिः कथयिष्यते॥
स्वप्नान्यालोकयिष्यन्ते युष्माकं स्थविरा जनाः।
भविष्यन्ति च युष्माकं युवानो लब्धदर्शनाः॥
२९ दासानामपि शीर्षेषु दासीनामपि मूर्धसु।
वर्षिष्यामि निजात्मानमहं तेषु दिनेषु च॥
३० गगने च पृथिव्याञ्च लक्षणान्यद्भुतान्यहं।
विधास्ये रुधिरं वह्निं धूमस्तम्भांश्च भीषणान्॥
३१ विकृतोऽग्रे रवि र्ध्वान्तं चन्द्रो रक्तं भविष्यति।
तदायास्यति भीमं तन्महन्नित्यप्रभो र्दिनं॥
३२ इदं भवन्तु यः कश्चिन्नामाहूय सदाप्रभोः।
प्रार्थनां कुरुते तस्य निस्तारः सम्भविष्यति॥
यस्मान्नित्यप्रभु र्यद्वद् उक्तवांस्तद्वदेव हि।
सीयोनाद्रौ यिरूशालमे निस्तारः सम्भविष्यति।
मध्ये शेषनराणाञ्च यानाह्वाता सदाप्रभुः॥

३ तृतीयोऽध्यायः।

१ ईश्वरीयप्रजानां विपक्षजनानां भाविदण्डः ९ तेन दण्डेनेश्वरीयगुणप्रकाशनं १८ स्वप्रजाः प्रतीश्वरस्य भाव्याशीर्व्वादश्च।

पश्य तेषु दिनेष्वेव तस्मिन् समय एव च। १
यिहूदायिरूशालेमो र्वन्दित्वं परिवर्त्तयन्॥
सकलान् परजातीयान् सङ्ग्रहीष्याम्यहं जनान्। २
तान् यिहोशाफटाख्यातामवरोह्य समस्थलीं॥
स्वप्रजाः स्वाधिकारश्चेस्रायेलीयजनानधि।
तत्र स्थाने करिष्याम्यहं विचारञ्च तैः सह॥
यस्माद् विकीर्णवन्तस्ते परजातिषु मत्प्रजाः।
विभागं मम देशस्य कृतवन्तश्च ते मिथः॥
तेऽकार्षु र्गुटिकापातं मामकीनप्रजा अधि। ३
वेश्याभोगस्य मूल्यार्थं तैरदायि च बालकः।
बालां विक्रीय मद्यार्थं मद्यपानमकारि च॥
मत्सम्बन्धे तु के यूयं सोरसीदोनवासिनः। ४
पिलेष्टीयाख्यदेशस्य सर्व्वचक्रस्थिताः जनाः॥
मद्विरुद्धं कुरुध्वे किम् अपकारस्य शोधनं।
अपकारन्तु कुर्य्यात यदि मत्प्रातिकूल्यतः॥
युष्मत्कृतापकारस्य तर्ह्याकस्मिकशोधनं।
कृत्वाहं वर्त्तयिष्यामि युष्मन्मूर्धसु सत्वरं॥
युष्माभि र्मम रूप्यञ्च सुवर्णञ्च हृतं यतः। ५
स्वप्रासादेषु नीतानि मद्रत्नान्युत्तमानि च॥
यिहूदायाश्च सन्तानान् प्रजाश्च यिरूशालमः। ६
सुदूरीकर्त्तुमिच्छन्तस्तेषां देशस्य सीमतः।
यूयं यवनवंशेषु तेषां प्राकार्ष्ट विक्रयं॥
विक्रीता एव युष्माभि र्यत्र कुत्रापि सन्ति ते। ७
तान् प्रबोधयितुं तस्मात् स्थानादस्म्यहमुद्यतः।
युष्मन्मूर्ध्न्यर्पयिष्याम्यहञ्च वः कर्म्मणः फलं॥
युष्माकं सकलान् पुत्त्रान् युष्माकं दुहितॄरपि। ८
विक्रेष्यामि यिहूदायाः सन्तानानां करेष्वहं॥
शिवायीयमनुष्येषु दूरदेशनिवासिषु।

ते विक्रेष्यन्ति तान् यस्माद् इदमाह सदाप्रभुः॥
९ कुरुध्वं यूयमेतस्य घोषणां परजातिषु।
युष्माभि र्धर्म्मयुद्धस्य क्रियतां हि निरूपणं॥
वीरा एव प्रबोध्यन्तां सर्व्वे युद्धपरायणाः।
पुरुषा उपतिष्ठन्तु प्रविशन्तु रणस्थलं॥
१० खफालान् कुरुतासीन् हि स्वदात्राणि च तोमरान्।
ग्रहं वीर इदं वाक्यं भाषतां दुर्ब्बलो नरः॥
११ भो जनाः परजातीयाः सर्व्वे यूयं त्वरान्विताः।
चतुर्द्दिग्भ्यः समायात भवतैकत्र सञ्चिताः।
अवरोहय तत्रैव त्वं स्ववीरान् सदाप्रभो॥
१२ सकला हि प्रबोध्यन्तां परजातीयमानवाः।
ते यिहोशाफटाख्यातामारोहन्तु समस्थलीं॥
यतो हेतोश्चतुर्द्दिक्स्थान् परजातीयमानवान्।
सकलान् शासितुं तत्र करिष्याम्युपवेशनं॥
१३ प्रयुंग्ध्वं स्वलवित्राणि शस्यं पक्कं यतोऽभवत्।
कुण्डेऽवतरितुं यात फलैः पूर्णं यतोऽस्ति तत्॥
द्राक्षाकुण्डानि पूर्णत्वात् स्वरसं प्रस्रवन्ति च।
यतस्तेषां मनुष्याणां महत्येवास्ति दुष्टता॥
१४ जनैाघानि जनैाघानि दण्डाज्ञायाः समस्थले।
दिनं नित्यप्रभोरेति दण्डाज्ञायाः समस्थले॥
१५ सूर्य्याचन्द्रमसो कृष्णैा ताराः संहृततेजसः॥
१६ प्रकरिष्यति सीयोनाद् गर्ज्जनञ्च सदाप्रभुः।
स यिरूशालमो मध्यात् स्वरवं श्रावयिष्यति।
गगनं पृथिवी चापि तस्मात् कम्पं गमिष्यतः॥
भविता स्वप्रजानान्त्वाश्रयो नित्यप्रभुः स्वयं।
इस्रायेल्वंशजानाञ्च शरण्यं स भविष्यति॥
१७ यूयं नित्यप्रभुं माञ्च ज्ञास्यध्वे युष्मदीश्वरं।
निवसन्तञ्च सीयोने पवित्रे मम पर्व्वते॥
तदानीञ्च यिरूशालम् पुण्यस्थानं भविष्यति।
तन्मध्येन पुनर्व्वारं न यास्यन्ति विदेशिनः॥
१८ वर्षिष्यन्ति दिने तस्मिन् नवीनं मद्यमद्रयः।

दुग्धप्रवाहिनश्चापि भविष्यन्त्युपपर्व्वताः।
यिहूदायाः प्रणाल्यश्च सकलाः सलिलावहाः॥
तदा नित्यप्रभो र्गेहाद् उत्स एकः प्रयास्यति।
शिट्टीमोपत्यका तेन जलसिक्ता भविष्यति॥
मिसर्देशस्तदानीन्तु ध्वंसस्थानं भविष्यति। १९
इदोमोऽपि तदा ध्वस्तं मरुस्थानं भविष्यति॥
कारणं तस्य दौरात्म्यं यिहूदां प्रति तैः कृतं।
निर्दोषाणामसृक्पातः स्वदेशे तैः कृतो यतः॥
यिहूदानन्तकालं तु स्थिरवासा भविष्यति। २०
पुरुषाणाञ्च पर्य्याये यिरूशालम् सदा स्थिरा॥
मया न पावितं यच्च रक्तं तत् पावयिष्यते। २१
नित्यप्रभुश्च सीयोने स्वनिवासं विधास्यते॥

आमोसस्य भविष्यद्वाक्यानि।

---

१ प्रथमोऽध्यायः।

अरामीयपिलेष्टीयसोरीयेदोमीयाम्मोनीयजनानां दण्डस्य भाविवाक्यं।

तिकोयीयगोपालानां मध्ये वर्त्तमानस्यामोसस्य वाक्यानि। यिहूदीय- १
राजस्योषियस्य काल इस्रायेलीयराजस्य योयाशसुतस्य यारवियामस्य
च काले भूकम्पाद् वत्सरद्वयं पूर्व्वमिस्रायेलमधि तेन यद्यद् दृष्टं तद्वृत्ता- २
न्तोऽयं। स उवाच,

प्रकरिष्यति सीयोनाद् गर्ज्जनं हि सदाप्रभुः।
स यिरूशालमो मध्यात् स्वरवं श्रावयिष्यति॥
प्रचाराः पशुपालानां यास्यन्ति म्लानतां ततः।
कर्म्मिलस्याग्रभागश्च तस्माच्छुष्को भविष्यति॥

-३ इत्थं नित्यप्रभु र्ब्रूते कृतं दम्मेशकेन यत् ।
अपराधत्रयं वा स्याद् वापराधचतुष्टयं ।
तद्धेतो र्न करिष्यामि तस्य शासनमन्यथा ॥
शस्यमर्द्दकयन्त्राणां लौहानामध एव तैः ।
मनुष्या गिलियादस्था मर्द्दिताः शस्यवद् यतः ॥
४ तस्मादग्निं प्रहेष्यामि हसायेलो निकेतनं ।
विन्-हदादस्य हर्म्याणि सोऽनलः सङ्ग्रसिष्यति ॥
५ अहं दम्मेशकस्यापि विधास्येऽर्गलभञ्जनं ।
आवनोपत्यकायाश्च व्युच्छेत्स्यामि निवासिनं ।
एदनाख्यकुलाच्चैव राजदण्डाधिकारिणं ॥
अरामस्य प्रजाः कीरं प्रयास्यन्ति प्रवासिताः ।
वचनं प्रोक्तवानेतत् स्वयमेव सदाप्रभुः ।
६ इत्थं नित्यप्रभु र्ब्रूते यद्यत् कृतवती घसा ।
अपराधत्रयं वा स्याद् वापराधचतुष्टयं ।
तद्धेतो र्न करिष्यामि तस्याः शासनमन्यथा ॥
इदोमस्य करे दत्त्वा जनान् रोधयितुं यतः ।
ते सर्व्वानेव निर्व्वास्य नीतवन्तः स्वदेशतः ॥
७ तस्मादग्निं घसाया हि प्राचीरं प्रहिणोम्यहं ।
तस्याः सर्व्वाणि हर्म्याणि सोऽनलः सङ्ग्रसिष्यति ॥
८ अश्‌दोदो मध्यतस्त्वाहम् उच्छेत्स्यामि निवासिनं ।
अस्किलोनस्य मध्याच्च राजदण्डाधिकारिणं ।
इक्रोणस्य विरुद्धञ्च करिष्ये हस्तचालनं ॥
पिलेष्टीयमनुष्याणां शेषांश्च विनंक्ष्यति ।
वचनं प्रोक्तवानेतत् प्रभुरेव सदाप्रभुः ॥
९ इत्थं नित्यप्रभु र्ब्रूते कृतं सोरपुरेण यत् ।
अपराधत्रयं वा स्याद् वापराधचतुष्टयं ।
तद्धेतो र्न करिष्यामि तस्य शासनमन्यथा ॥
यतः सर्व्वान् हि निर्व्वास्यार्पितवन्त इदोमि ते ।
भ्रातॄणां नियमं नैव स्मृतवन्तश्च तान् प्रति ॥
१० तस्मादग्निं हि सोरस्य प्राचीरं प्रहिणोम्यहं ।
तस्य सर्व्वाणि हर्म्याणि सोऽनलः सङ्ग्रसिष्यति ।

इत्थं नित्यप्रभु र्ब्रूते यद्दिदोमो जनैः कृतं। ११
अपराधत्रयं वा स्याद् वापराधचतुष्टयं।
तद्धेतो र्न करिष्यामि तस्य शासनमन्यथा॥
भ्रातरं खड्गहस्तः सोऽन्वधावत् संहरन् कृपां।
अकरोत् तस्य कोपश्च नित्यमेव विदारणं।
स स्वक्रोधस्य चण्डत्वम् अरक्षच्च निरन्तरं॥
तैमानमनलं तस्मादहं निक्षेप्तुमुद्यतः। १२
बस्रायाः सर्व्वहर्म्याणि सोऽनलः सङ्ग्रसिष्यति॥
इत्थं नित्यप्रभु र्ब्रूते यदम्मोनसुतैः कृतं। १३
अपराधत्रयं वा स्याद् वापराधचतुष्टयं।
तद्धेतो र्न करिष्यामि तेषां शासनमन्यथा॥
यतस्ते स्वीयसीमानं विस्तीर्णां कर्त्तुमिच्छवः।
गिल्यदे गर्भिनारीणाम् उदराणि व्यदारयन्॥
ज्वलयिष्यामि रब्बायाः प्राचीरेऽग्निमहं ततः। १४
युद्धाहस्य महानादे वात्याहस्य जवानिले।
तस्याः सर्व्वाणि हर्म्याणि सोऽनलः सङ्ग्रसिष्यति॥
एककाले प्रवासार्थं तेषां राजा च यास्यति। १५
तस्यामात्याश्च यास्यन्ति ब्रवीतीदं सदाप्रभुः॥

---

२ द्वितीयोऽध्यायः।

१ मोयाबो यिहूदा इस्रायेलश्च लोकानां विरुद्धं दण्डस्य भाविवाक्यं ९ तेषामकृतज्ञताकारणात् तान् प्रतीश्वरस्य तर्ज्जनञ्च।

इत्थं नित्यप्रभु र्ब्रूते मोयाबेनापि यत् कृतं। १
अपराधत्रयं वा स्याद् वापराधचतुष्टयं॥
तद्धेतो र्न करिष्यामि तस्य शासनमन्यथा।
सोऽस्थीनीदोमराजस्य दग्ध्वा चूर्णं यतोऽकरोत्॥
वह्निं तत्कारणादेव मोयाबं प्रहिणोम्यहं। २
किरियोतस्य हर्म्याणि सोऽनलः सङ्ग्रसिष्यति।
मोयाब् नङ्क्ष्यति चोत्क्रोशे निनादे तौर्य्यवादिते॥
अहं विचारकर्त्तारं तस्योच्छेत्स्यामि मध्यतः। ३

तद्देशस्य कुलीनाश्च यावन्तः सन्ति तानपि।
तेन सार्द्धं हनिष्यामि ब्रवीतीदं सदाप्रभुः॥
४ इत्थं नित्यप्रभु र्ब्रूते यद् यिहूदा जनैः कृतं।
अपराधत्रयं वा स्याद् वापराधचतुष्टयं।
तद्धेतो र्न करिष्यामि तस्य शासनमन्यथा॥
सदाप्रभो र्व्यवस्था तै र्यतो हेतो र्निराकृता।
तस्य ये विधयस्ते च तै र्मनुष्यै र्न रक्षिताः॥
तेषां पितामहा यासामभवन्ननुगामिनः।
स्वीयमिथ्योक्तिभिस्ताभिस्ते जाताः सत्पथच्युताः॥
५ वह्निं तत्कारणादेव यिहूदां प्रहिणोम्यहं।
स यिरूशालमस्थानि हर्म्याणि प्रग्रसिष्यति॥
६ इत्थं नित्यप्रभु र्ब्रूत इस्रायेलेन यत् कृतं।
अपराधत्रयं वा स्याद् वापराधचतुष्टयं।
तद्धेतो र्न करिष्यामि तस्य शासनमन्यथा॥
रूप्यार्थं तै र्यतो हेतो र्विक्रीतो धार्म्मिको नरः।
पादुकायुग्मशोधार्थं विक्रीतो दुर्गतो जनः॥
७ क्षीणानां मूर्ध्नि मृद्रेणुं वीक्षितुं ते तृषातुराः।
मृदुशीलनराणां ते मार्गं कुर्व्वन्ति पातुकं॥
एकवेश्यासमीपञ्च पिता पुत्त्रश्च गच्छतः।
पवित्रं मम नामेत्थं तैः कामात् क्रियतेऽशुचि॥
८ सर्व्ववेद्याश्च पार्श्वे ते शेरते बन्धकाम्बरे।
ते स्वदेवालये मद्यं दण्डितानां पिवन्ति च॥
९ तेषां साक्षात् त्विमोरीयो जन उच्छिद्रे मया।
एरसाख्यद्रुमस्येव तस्यासीत् दीर्घकायता॥
अल्लोनाख्यतरस्येव स आसीद् बलवत्तमः।
मया तूर्द्धं फलं तस्य नीचे मूलञ्च नाशितं॥
१० इमोरीयस्य देशञ्च युष्मभ्यं दातुमिच्छया।
अहमेव मिसर्द्देशाद् युष्मानानीतवान् पुरा।
चत्वारिंशच्च वर्षाणि मरुमध्येन नीतवान्॥
११ पुत्त्रान् कांश्चन युष्माकं कृतवान् भाववादिनः।
यूनः कांश्चन युष्माकं व्रतिनः कृतवानहं॥

इस्रायेलो जना ब्रूत किं न सत्यमिदं वचः।
पृच्छतीमां कथां युष्मान् स्वयमेव सदाप्रभुः॥
युष्माभि र्मदिरान्ते तु पायिता व्रतिनो नराः। ११
मा व्याहरत भावोक्तिमित्युक्ता भाववादिनः॥
शकटी छिन्नशस्येन पूर्णा यद्वद्विनाम्यते। १२
पश्यतानामयिष्याम्यहं युष्माकं तलं तथा॥
द्रुतगामिनरस्यापि संहारिष्यत आश्रयः। १४
बलवान् स्वीयशक्तिञ्च दृढीकर्त्तुं न शक्ष्यति।
निजप्राणांश्च वीरोऽपि रक्षितुं नैव शक्ष्यति॥
न वा धनुर्धरः स्थातुं द्रुतगामी न रक्षितुं। १५
नोद्धर्त्तुं वा निजप्राणान् अश्वारूढोऽपि शक्ष्यति॥
वीराणां दृढचित्तश्च यो जनः स दिगम्बरः। १६
प्रद्रोष्यति दिने तस्मिन् इत्यमाह सदाप्रभुः॥

---

३ तृतीयोऽध्यायः।

१ इस्रायेलो दण्डस्यानिवार्य्यता ९ तस्य दण्डस्य वर्णनं तत्कारणकथनञ्च।

इस्रायेलः सुता एतद् युष्माभिः श्रूयतां वचः। १
युष्मानेव समुद्दिश्य प्रोक्तवांस्तत् सदाप्रभुः।
मिसर्देशान्मयानीतां कृत्स्नगोष्ठीमधि ब्रुवे॥
पृथिव्याः सर्व्वगोष्ठीनां मध्ये युष्मान् हि केवलं। २
अहमज्ञासिषं तस्माद् युष्मद्दुष्कर्म्मणामपि।
सर्व्वेषां शोधमादास्येऽहं युष्मत्तो न संशयः॥
अकृत्वा मन्त्रणां किं द्वौ नरावेकत्र गच्छतः॥ ३
वनचारी मृगेन्द्रः किं मृगमप्राप्य गर्जति। ४
किमधृत्वा पशुं वासात् केशरीरयति ध्वनिं॥
पक्षी भूमिस्थकूटे किं विनापाशं पतिष्यति। ५
कूटः किञ्चिदधृत्वा किं भूमितः स्फुरति स्वतः॥
पुर्य्यां तौर्य्यध्वनौ जाते किं न बिभ्यति मानवाः। ६
पुरे किं जायतेऽनिष्टं न सदाप्रभुना कृतं॥
प्रभु र्नित्यप्रभु र्यस्मात् स्वदासान् भाववादिनः। ७

मन्त्रमज्ञापयित्वा स्वं किञ्चिन्नैव करिष्यति ॥
८ गर्ज्जने मृगराजेन कृते को न प्रभेष्यति।
आज्ञां प्रोक्तवति स्वीयां प्रभौ नित्यप्रभौ तथा।
भाववाणीप्रचारे कः प्रवृत्तो न भविष्यति ॥
९ अश्दोदस्थितहर्म्म्याण्येतच्छ्रावयितुमर्हथ।
मिसर्देशस्थहर्म्म्याणि श्रावयन्तो निजध्वनिं।
तान् जनान् ब्रूत शोमिरोणः समागच्छत पर्व्वतान् ॥
वीक्षध्वं जायते तस्या मध्ये दारुणविप्लवः।
विद्यन्तेऽभ्यन्तरे तस्या मानवा अभिपीडिताः ॥
१० ऋज्वाचारं न जानन्ति त इत्याह सदाप्रभुः।
कुर्व्वते तु स्वहर्म्म्येषु दौरात्म्यध्वंससञ्चयं ॥
११ ततो हेतोरिदं वाक्यं प्रभु र्ब्रूते सदाप्रभुः।
शत्रुरायाति देशं स परितो वेष्टयिष्यति ॥
त्वच्छिरोभूषकं तेजः स त्वत्तस्त्रावयिष्यति।
तव सर्व्वाणि हर्म्म्याणि स्थास्यन्त्युल्लुण्ठितानि च ॥
१२ इत्थं नित्यप्रभु र्ब्रूते यथा केशरिणो मुखात्।
द्वौ पादौ कर्णपालिं वा मेषरक्षक उद्धरेत् ॥
तथा पर्य्यङ्ककोणेषु खट्वायाश्चित्रशिल्पिते।
वस्त्रे वा ये सुखासीनाः शोमिरोणनिवासिनः।
तैरिस्रायेलसन्तानैः कृच्छ्रेणोद्धार आप्स्यते ॥
१३ यूयं शृणुत याकूबः कुले साक्ष्यं प्रदत्त च।
वाहिनीनां य ईशः स प्रभु र्वक्ति सदाप्रभुः ॥
१४ इस्रायेलोऽपराधानां फलं दास्याम्यहं यदा।
बैथेलो यज्ञवेदीनां फलं दास्यामि तद्दिने।
वेद्याश्चूडाः समुच्छिन्नाः पतिष्यन्ति च भूतले ॥
१५ शीतकालिकगेहञ्च ग्रीष्मकालिकवेश्म च।
कर्त्तिष्याम्यहमेकत्र दन्तिदन्तमयानि च।
गृहाणि ध्वंसयिष्यन्ते भवनानि बहूनि च।
अन्तर्धानमवाप्स्यन्तीति ब्रवीति सदाप्रभुः ॥

---

४ चतुर्थोऽध्यायः ।

१ उपद्रवकारणादिस्रायेलं प्रति तर्जनं ४ देवार्च्चाकारणात् तर्जनं ६ मनःकाठिन्यात् तर्जनञ्च ।

शृणुतेदं वचो यूयं भो बाशानीयधेनवः । १
संस्थिताः शोमिरोणाद्रौ दीनानामभिपीडकाः ॥
दरिद्रांश्चूर्णयन्त्यश्च ब्रुवाणाः स्वपतिं यथा ।
वयं पानं करिष्यामस्त्वं पानीयं समानय ॥
स्वपवित्रतया शप्त्वा प्रभु र्ब्रूते सदाप्रभुः । २
दिवसाः पश्यतायान्ति युष्माकं हि विपत्तये ॥
युष्मान् आकर्षिणीभिश्च हरिष्यन्ति जनास्तदा ।
अवशिष्टांश्च युष्माकं वडिशै र्मत्स्यवेधकैः ॥
तदा निर्यास्यथैकैका कुड्यच्छिद्रैः स्वसम्मुखं । ३
निक्षेप्स्यध्वे च हार्म्मोणं ब्रवीतीदं सदाप्रभुः ॥
यूयं बैथेलमागत्यापराधाननुतिष्ठत । ४
गिल्गले स्वापराधानां कुरुध्वं परिवर्धनं ॥
प्रातः प्रातश्च युष्माभि र्बलिदानं विधीयतां ।
स्वदशांशाश्च दीयन्तामेकैकस्मिन् दिनत्रये ॥
किण्वयुक्तञ्च नैवेद्यं प्रशंसार्थं प्रदाह्यतां । ५
स्वेच्छादत्तोपहाराणां क्रियताञ्च विघोषणं ॥
श्राव्यतां तच्च युष्माभि र्युष्मभ्यं तद्धि रोचते ।
इस्रायेलीयसन्ताना इत्थं ब्रूते सदाप्रभुः ॥
अहमेवापि युष्मभ्यं दत्तवानुपहारवत् । ६
युष्मत्पुरेषु सर्व्वेषु रदनानां विशुद्धतां ॥
युष्मत्स्थानेषु सर्व्वेषु भक्ष्यद्रव्यविहीनतां ।
न मां प्रत्यागता यूयं ब्रवीतीदं सदाप्रभुः ॥
शस्यानां पचनात् पूर्व्वं शेषमासत्रयोचितं । ७
अहं संहृतवानेव युष्मत्तो वृष्टिसेचनं ॥
पुरेऽवर्षयमेकस्मिन् न त्वन्यस्मिन्नवर्षयं ।
एकञ्चासिच्यत क्षेत्रम् असिक्तन्त्वशुषत् परं ॥
नगरद्वयतोऽगच्छन् नगरत्रयतोऽपि वा । ८
पुरमेकं चलद्गत्या तोयपानार्थिनो जनाः ॥

तृप्तिं तत्र तु न प्रापुरित्थमेव कृते मया।
न मां प्रत्यागता यूयं ब्रवीतीदं सदाप्रभुः॥
९ शस्यानां शोषकार्शाभ्यां युष्मानाहतवानहं।
बहूद्यानानि युष्माकं द्राक्षावल्ल्य उडुम्बराः।
जितवृक्षाश्च युष्माकं सूककीटैश्चिं भक्षिताः।
न मां प्रत्यागता यूयं ब्रवीतीदं सदाप्रभुः॥
१० मिसर्देशोचितां मारीं युष्मन्मध्यं विसृष्टवान्।
यूनो युष्माकमश्वांश्च लुण्ठितानसिनाहनं॥
शिविराणाञ्च वः पूत्या नासिका वोऽभ्यपूरयं।
न मां प्रत्यागता यूयं ब्रवीतीदं सदाप्रभुः॥
११ सिदोमामोरयो ध्वंस ईश्वरेण कृतो यथा।
युष्मन्मध्येऽपि केषाञ्चित् तद्वद् ध्वंसो मया कृतः॥
तेनाभवत तुल्यास्थानलादुद्धृतयोल्कया।
न मां प्रत्यागता यूयं ब्रवीतीत्थं सदाप्रभुः॥
१२ ईदृशं त्वां प्रतीस्रायेल् करिष्यामि पुनस्ततः।
यतोऽहं त्वां प्रतीस्रायेल् ईदृशं कर्त्तुमुद्यतः।
ससज्जीभव तस्मात् त्वं प्रत्युद्गन्तुं निजेश्वरं॥
१३ पश्चाद्रीणां स निर्म्माता स स्रष्टा पवनस्य च।
मानवस्य च या चिन्ता स तस्मै तत्प्रकाशकः॥
अरुणोदयकालं स सान्धकारं करोति च।
पृथ्व्या उच्चस्थलीभिः स कुरुते च गमागमौ।
तस्य नामास्ति सेनानामीश्वरः स सदाप्रभुः॥

---

५ पञ्चमोऽध्यायः।

१ इस्रायेलः कृते विलापः ४ मनःपरावर्त्तनाय विनयवाक्यं २१ काल्पनिकसेवनम् ईश्वरस्य न ग्राह्यमिति कथनञ्च।

१ शृणुतेदं वचो यूयं तद् युष्मानभ्युदीर्य्यते।
विलापस्यैव गानं तद् भो इस्रायेल्कुल त्वयि॥
२ पतितास्तीस्रयेल्कन्या नैवोत्थास्यति सा पुनः।
पातितां निजभूमौ तां कोऽपि नोत्थापयिष्यति॥

यतो हेतोरिदं वाक्यं प्रभुराह सदाप्रभुः। ३
सहस्रं निर्गतं यस्याः शतशेषास्ति सा पुरी॥
निर्गतञ्च शतं यस्या दशशेषास्ति सा पुरी।
इस्रायेलः कुलस्यैव कृते स्वल्पेऽवशेषिताः॥
इस्रायेलः कुलं यस्माद् इदं वक्ति सदाप्रभुः। ४
ममैवान्वेषणं कृत्वा यूयं जीवितुमर्हथ॥
नैवान्विच्छत बैथेलं नैव गच्छत गिल्गलं। ५
बेर्शेवामुपस्थातुं यूयं नैव प्रयात वा।
निर्व्वासो गिल्गले लभ्यो बैथेले च विडम्बना॥
नित्यप्रभुं समन्विष्य यूयं जीवितुमर्हथ। ६
नचेदग्निवदाविष्टे यूषफस्य कुले मया।
तं दाहं कोऽपि बैथेले नैव निर्वापयिष्यति॥
युष्माभि र्विकृतो न्याय इन्द्रवारुणिकाभवत्। ७
धर्म्मश्चाधोमुखः शेते युष्माभि र्भूमिसात्कृतः॥
मामन्विच्छत कर्त्ताहं कृत्तिकामृगशीर्षयोः। ८
प्रभातञ्च विकृत्याहं मृत्युच्छायां करोमि हि॥
दिवसञ्च विकृत्याहं करोमि ध्वान्तयामिनीं।
तोयधेस्तोयमाहूय भूतलं प्लावयामि च।
योऽहमेतादृशस्तस्य मम नाम सदाप्रभुः॥
बलिष्ठस्योपरि ध्वंसं वज्रवन्निक्षिपाम्यहं। ९
दुर्गस्योपरि स ध्वंसस्तदानीमधितिष्ठति॥
पुरद्वारे द्विषन्तीमे नरं दोषप्रकाशकं। १०
गर्हणीयञ्च मन्यन्ते मनुष्यं तथ्यवादिनं॥
युष्माभि र्मर्द्यते दीनः शस्यदानञ्च याच्यते। ११
ततः पाषाणवेश्मानि कृत्वा तत्र न वत्स्यथ।
द्राक्षाक्षेत्राणि रम्याणि कृत्वा मद्यं न पास्यथ॥
यतो हेतोरहं जानेऽपराधा वोऽतिभूरयः। १२
युष्माकं पापकर्म्माणि सन्त्यतिप्रबलानि च॥
धार्म्मिकोत्पीडका यूयम् उत्कोचग्राहिणो जनाः।
पुरद्वारे दरिद्राणां विचारस्य विकारिणः॥
मौनमालम्बते तस्मात् कालेऽस्मिन् बुद्धिमान् नरः। १३

यतो हेतोरयं कालः कालोऽस्ति व्यसनान्वितः॥
१४ मान्वेषिष्ट दुराचारं साधुतामनुगच्छत।
जीवनं तर्हि लप्स्यध्वे यथा यूयञ्च जल्पथ।
तथा तर्ह्येव सेनानामीश्वरो यः सदाप्रभुः।
स्वयमेव स युष्माकं सहवर्त्ती भविष्यति॥
१५ गर्हयित्वा दुराचारं जायध्वं साधुताप्रियाः।
सुविचारं पुरद्वारे प्रतिष्ठापयत ध्रुवं॥
किंश्चित् तर्ह्येव सेनानामीश्वरो यः सदाप्रभुः।
यूषफस्यावशिष्टांश्च सोऽनुकम्पिष्यते पुनः॥
१६ ततो हेतो र्हि सेनानामीश्वरो यः सदाप्रभुः।
स प्रभुर्वक्ति सर्व्वस्मिंश्चत्वरे परिदेवनं।
हाहाकारश्च सर्व्वासां रथ्यायामीरयिष्यते॥
शोचनार्थं कृषाणाञ्च समाह्वास्यन्ति मानवाः।
विलापे च नियोक्ष्यन्ते विलापाभ्यस्तगायकान्॥
१७ द्राक्षाक्षेत्रेऽपि सर्व्वस्मिन् विलापः सम्भविष्यति।
यतोऽहं तव मध्येन यातेत्याह सदाप्रभुः॥
१८ हाहा नित्यप्रभोरह्न आकाङ्क्षाकारिणो नराः।
तस्मिन्नित्यप्रभोरह्नि युष्माकं किं प्रयोजनं।
अन्धकारमयः सोऽह्नो नैव दीप्तिमयोऽस्ति सः॥
१९ सिंहात् पलायमानो यो भल्लेनाक्रम्यते नरः।
स्वीयगेहं प्रविश्य च कुड्ये कुर्व्वन् करार्पणं।
दश्यते तत्र सर्पेण स युष्माकं निदर्शनं॥
२० नित्यप्रभोरहः किं न तामसो दीप्तिवर्जितः।
किं न घोरान्धकारः स सर्व्वथैव च निष्प्रभः॥
२१ युष्माकमुत्सवान् गर्हे निरस्यामि च तानहं।
युष्माकं पर्व्वणां गन्धं न घ्रास्यामि पुनस्ततः॥
२२ युष्माभि र्मह्यमुत्सृष्टान् बलीन् होमार्थकानपि।
नैवेद्यानि च युष्माकं न ग्रहीष्यामि तुष्टितः।
नेक्षिष्ये पुष्टगोवत्सान् युष्माकं मङ्गलार्थकान्॥
२३ अपसारय मत्तस्त्वं गीतानां तव निस्वनं।
तव नेबलयन्त्राणां वाद्यं न श्रूयतां मया॥

वहतां सुविचारस्तु वीचिभूषिततोयवत्। २४
वहतां धार्म्मिकत्वञ्च नित्यस्रोतस्वती यथा॥
चत्वारिंशत् समा यावत् किं मह्यं प्रान्तरे बलीन्। २५
किं नैवेद्यानि वादत्त यूयं भो इस्रयेल्कुल॥
युष्मद्राजस्य शालान्तु मूर्त्तीनां वञ्च मञ्चकं। २६
युष्मन्निर्म्मितदेवानां ताराञ्चात्रहत प्रियां॥
तस्माद्दम्मेशकः पारमहं युष्मान् प्रवासयन्। २७
नेष्यामीत्याह सेनानामीशो नाम सदाप्रभुः॥

---

६ षष्ठोऽध्यायः।

१ इस्रायेलीयानां सुखभोगः ८ भाविदण्डस्य कथनञ्च।

हा निश्चिन्ताः सियोनस्थाः शमरोयाद्रिसंश्रिताः। १
जातीनामग्रिमांशस्य नामलब्धा महोदयाः।
इस्रायेलः कुलं युष्मान् शरणायाभिगच्छति॥
कल्निं गत्वा निरीक्षध्वं स्थानात् तस्मात् प्रगत्य च। २
पुरीं यात महारब्बाम् अथवा निम्नदेशिनां।
पिलेष्टीयमनुष्याणां गाताख्यं नगरं प्रति॥
अस्माद् राज्यद्वयात् तानि नगराण्युत्तमानि किं।
युष्माकं भूमितो वा किं तेषां भूमि र्महत्तरा॥
अनिष्टस्य दिनं दूरं युष्माभिश्च विहन्यते। ३
स्थाप्यते स्वसमीपन्तु दौरात्म्यस्य नृपासनं॥
दन्तिदन्तमयास्वेव निद्रा खट्वासु सेव्यते। ४
दीर्घाङ्गैश्च स्वशय्यासु शयनं क्रियते सुखं॥
पुष्टमेषान् व्रजान्नीत्वा वत्सान् वा गोष्ठमध्यतः।
युष्माभिः क्रियते नित्यं तेषां मांसस्य भोजनं॥
नेबलाभिधयन्त्रैश्च क्रियते वाद्यनिस्वनः। ५
स्वार्थं सङ्गीतसामग्री दायूदेव च रच्यते॥
भाजनेषु पवित्रेषु द्राक्षामद्यञ्च पीयते। ६
तैलानामग्रिमांशैश्च क्रियते गात्रलेपनं।
यूषफस्य विभङ्गात्तु मनस्तापो न लभ्यते॥
तस्मान्निर्वासनं येषां मनुष्याणां भविष्यति। ७

निर्व्वासेऽपि भविष्यन्तीमे तेषामग्रगामिनः।
दीर्घाङ्गञ्च शयानानां हर्षनादो विरंस्यति॥
८ आत्मना शपथं चक्रे प्रभुरेव सदाप्रभुः।
उक्तिरेषास्ति सेनानामीश्वरस्य सदाप्रभोः।
याकूबो देष्म्यहं गर्व्वं गर्हे हर्म्याणि तस्य च।
पुरीं तत्पूरकञ्चाहमर्पयिष्यामि शत्रुषु॥
९ तदानीं गृह एकस्मिन् मानवा दशसङ्ख्यकाः।
यदिस्यादवशिष्येरन् मरिष्यन्ति तथापि ते॥
१० प्रेतहारः पितृव्यो यो यश्च तच्छवदाहकः।
अस्थीनि गेहतो हर्त्तुं तत्रोपस्थितयोस्तयोः॥
गृहगर्भेऽवशिष्टं स बन्धुः सम्बोधयन्नरं।
अन्यः कोऽपि त्वया सार्द्धं किमस्तीति गदिष्यति॥
कोऽपि नास्तीति तेनोक्तः पुनर्वक्ष्यति मा लपेः।
न व्याहर्त्तव्यमस्माभि र्भीमं नाम सदाप्रभोः॥
११ यस्मात् पश्य प्रदत्तायाम् अनुमत्यां सदाप्रभोः।
जनै र्भग्नं बृहद् वेश्म खण्डराशि र्भविष्यति।
सम्भविष्यति च क्षुद्रं गृहं शकलसञ्चयः॥
१२ किं धावन्ति हयाः शैले गोभिः कर्षन्ति वा नराः।
किमर्थं तर्हि युष्माभिर्धर्म्मो विक्रियते विषे।
इन्द्रवारुणिकायाञ्च याथार्थ्यस्योत्तमं फलं॥
१३ अवस्तुन्येव हृष्यद्भिरिदं युष्माभिरुच्यते।
स्वबलेन किमस्माभिः शृङ्गयुग्मं न लप्स्यते॥
१४ वाणीयन्त्वस्ति सेनानाम् ईश्वरस्य सदाप्रभोः।
इस्रायेल्कुल पश्य त्वं युष्माकं प्रातिकूल्यतः।
जातिमुत्पादयाम्येकां सा युष्मान् पीडयिष्यति।
आहमातप्रवेशाद्धि नदीं यावन्मरौ स्थितां॥

---

७ सप्तमोऽध्यायः।

१ शूककीटदर्शनकथनं ४ अग्नेः कथनं ७ प्रलम्बसीसस्य कथनं १० अमत्सियेनामोसस्यापवादः १४ आमोसस्योत्तरं १६ अमत्सियस्य दण्डश्च।

१ प्रभुः सदाप्रभु र्मामिदं दर्शयामास, पश्य पाश्चात्यतृणानां प्ररोहण-

कालस्यारम्भे स शलभान् निर्ममे, राजस्तृणच्छेदनात् परं तानि पाश्चात्य-
तृणान्युत्पेदिरे। अपरं भूमेरोषधिषु शलभै र्भक्षितासु मयोक्तं, भो प्रभो २
सदाप्रभो, भवान् पापं क्षमितुमर्हति, याकूबः कथमवस्थास्यते? यस्मात्
स क्षुद्रः। तदा सदाप्रभुस्तद्विषयेऽनुतेपे। सदाप्रभु र्जगाद, तन्न भ- ३
विष्यति।

प्रभुः सदाप्रभु र्मामिदं दर्शयामास, पश्य शासनार्थं प्रभुना सदा- ४
प्रभुनाहूतोऽग्नि र्महासागरं ग्रसित्वा प्रभो र्भूम्यधिकारं ग्रसितुं प्राव-
र्त्तत। तदा मयोक्तं, भो प्रभो सदाप्रभो, भवान् निवर्त्तितुमर्हति। ५
याकूबः कथमवस्थास्यते? यतः स क्षुद्रः। तदा सदाप्रभुस्तद्विषयेऽनु- ६
तेपे। प्रभुः सदाप्रभु र्जगाद, तदपि न भविष्यति।

स मामिदं दर्शयामास, पश्य प्रभुः प्रलम्बसीसवदृजुप्राचीरस्योपर्य्य- ७
तिष्ठत्, तस्य हस्ते च प्रलम्बसीसमासीत्। अपरं सदाप्रभु र्मां पप्रच्छ, ८
भो आमोस, त्वया किं दृश्यते? मयोक्तं, प्रलम्बसीसं दृश्यते। तदा
प्रभु र्मां जगाद, पश्याहं स्वप्रजागणस्येस्रायेलो मध्ये प्रलम्बसीसं प्रयोक्तु-
मुद्यतोऽस्मि, न पुनस्तं क्षमित्वा यास्यामि। अत इस्हाकस्योच्चस्थलानि ९
संहारिष्यन्ते, इस्रायेलो धर्म्मधामानि च ध्वंसयिष्यन्ते, अहञ्चासिहस्तो
यारबियामस्य कुलं प्रतिरोत्स्यामि।

अनन्तरं बैथेलस्थो याजकोऽमत्सिय इस्रायेलीयराजं यारबियामं १०
प्रतीमां कथां प्रेरयामास, आमोस इस्रायेल्कुलस्य मध्ये भवतः प्रति-
कूलां कुमन्त्रणां कृतवान्। देशोऽयं तस्य सर्व्ववाक्यानि सोढुं न शक्नोति।
यस्मादामोस इदमुक्तवान्, यारबियामोऽसिना मरिष्यति, इस्रायेल् च ११
स्वभूमितो निर्व्वासितोऽपनायिष्यते।

ततः परम् अमत्सिय आमोसं जगाद, भो दर्शक, त्वं पलाय्य यिहू- १२
दादेशं प्रगच्छ, तत्र स्वान्नं भक्षयस्व, तत्र भावोक्तीः प्रचारय च। परन्तु १३
त्वया न पुन र्बैथेले भावोक्तिः प्रचारयितव्या, यतस्तद् राज्ञो धर्म्मधाम,
तच्च राजपुरी।

तदानीमामोस उत्तरं विधायामत्सियं जगाद, नाहं भाववादी, न १४
वा भाववादिनः सुतः, किन्त्वहं गोपालः कदुडुम्बरफलाहारकश्चासं।
तदानीं सदाप्रभु र्व्रजानुगामिनं मां जग्राह, सदाप्रभुश्च मां जगाद, १५
याहि, मम प्रजागणस्येस्रायेलः समीपं भाववाणीं प्रचारय। अतोऽधुना १६
त्वं सदाप्रभो र्वाक्यं शृणु, त्वं वदसि, इस्रायेलः प्रतिकूलां भावोक्तिं मा

१७ प्रचारय, इस्हाकूकुलस्योपरि वागम्बु मा वर्षय। एतस्मात् कारणात्
सदाप्रभुराह,

तव भार्य्या पुरीमध्ये वेश्यावृत्तिं करिष्यते।
तव पुत्राश्च पुत्र्यश्च पतिष्यन्त्यसिना हताः।
तव भूम्यधिकारश्च मानरज्ज्वांशयिष्यते॥
त्वमेवाशुचिदेशस्य मध्ये प्राणान् प्रहास्यसि।
इस्रायेल् निजभूमेश्च दूरं निर्व्वासयिष्यते॥

---

८ अष्टमोऽध्यायः।

१ पक्वफलपूर्णपात्रस्य दर्शनं तत्तात्पर्य्यज्ञापनञ्च ४ उपद्रवादिस्रायेलस्तर्जनं ११ ईश्वरीयवाक्याभावरूपस्य दुर्भिक्षस्य भविष्यद्वचनञ्च।

१ प्रभुः सदाप्रभु र्मामिदं दर्शयामास, पश्य, पक्वफलैः पूर्णः करण्डोऽवि-
२ द्यत। अनन्तरं स मां पप्रच्छ, भो आमोस, त्वया किं दृश्यते? मयोक्तं,
पक्वफलपूर्णः करण्डो दृश्यते। तदा सदाप्रभु र्मां जगाद, मम प्रजागण-
३ स्येस्रायेलः परिणाम उपस्थितः, नाहं पुनस्तं क्षमित्वा यास्यामि। तस्मिन्
दिने प्रासादीयगीतानि हाहाकारा भविष्यन्तीति प्रभोः सदाप्रभो-
रुक्तिः। शवानां बाहुल्यं भविष्यति, स यावतीयस्थाने तान् निपातयि-
ष्यति; मा लपेः।

४ शृणुतेदं नराः सर्व्वे दीनानां गिलनार्थिनः।
देशीयशान्तभावानां विनाशं कर्त्तुमुत्सुकाः॥
५ ब्रुवाणा नवचन्द्रस्य व्यत्येष्यत्युत्सवः कदा।
तस्मिन् याते करिष्यामः शस्यानां विक्रयं वयं॥
कदा विश्रामवारो वा समतीतो भविष्यति।
तस्मिन् याते हि गोधूमान् आनेष्यामः स्वकोषतः॥
शस्यमानं लघिष्ठञ्च रूप्यमानं पुनर्गुरु।
कृत्वा व्याजतुलायष्ट्या प्रलब्धुं वयमिच्छवः॥
६ दीनान् रूप्येण क्रेष्यामः निःस्वं पादुकयोः कृते।
गोधूमानामसाराणां करिष्यामश्च विक्रयं॥
७ याकूबस्य यशोदाता शप्त्वा ब्रूते सदाप्रभुः।
नाहं सर्व्वक्रियास्तेषां विस्मरिष्यामि कर्हिचित्॥

किं न कम्पिष्यते भूमिः सर्व्वस्यैतस्य कारणात्। ८
किं न शोकं करिष्यन्ते सकलास्तन्निवासिनः॥
तस्याः कृत्स्नञ्च पृष्ठं किं न वन्येवोच्चलिष्यति।
क्षुब्धं भास्यति निम्नञ्च मिस्रीया तटिनी यथा॥
प्रभु र्नित्यप्रभु र्ब्रूते दिने तस्मिन्नुपस्थिते। ९
कारयिष्याम्यहं सूर्य्यं मध्याह्नेऽस्तावलम्बनं।
आनेष्याम्यन्धकारञ्च पृथ्व्यां दीप्तिमये दिने॥
विहृत्याहं करिष्यामि युष्मत्पर्व्वाणि शोचनं। १०
युष्मद्गीतं करिष्यामि सकलं परिदेवनं॥
कटिदेशे च दास्यामि सर्व्वेषां शाणबन्धनं।
सर्व्वेषां मुण्डतायुक्तं करिष्यामि च मस्तकं॥
तद्दिनञ्च विधास्याम्यद्वितीयात्मजशोकवत्।
तदीयोत्तरकालञ्च तीव्रदुःखदिनोपमं॥
प्रभु र्नित्यप्रभु र्ब्रूते पश्चायास्यन्ति वासराः। ११
येषु मत्प्रेरिता देशे बुभुक्षा सम्भविष्यति॥
नैवास्यन्नबुभुक्षा सा न वा तोयार्थिनस्तृषा।
सा तु नित्यप्रभो र्वाचः श्रोतुमाकाङ्क्षिणां स्पृहा॥
सागरात् सागरं यावच्चलन्तो मानवास्तदा। १२
उत्तरस्मादटन्तश्च नराः सूर्य्योदयं प्रति।
नित्यप्रभो र्वचोऽन्विष्य न समाप्स्यन्ति कुत्रचित्॥
सुकुमार्य्यो युवानश्च च्छेष्यन्ते तृष्णया तदा॥ १३
ईशो जीवति ते भो दान् बेर्शेबे ते सुरोऽमरः। १४
इत्युक्त्वा शोमिरोणस्य शपन्ते कलुषेण ये।
ते मनुष्याः पतिष्यन्ति नैवोत्थास्यन्ति ते पुनः॥

---

९ नवमोऽध्यायः।

१ इस्रायेलो भाविदण्डस्य, ११ भाविमङ्गलस्य च कथनं।

दर्शनं दत्तवान् मह्यं वेद्याः पार्श्वे स्थितः प्रभुः। १
तेनोक्तं जहि मूर्धानं कम्पन्तां सकलाः शिलाः॥
जनौघस्य च मुण्डेषु तदुभौ खण्डशः कुरु।

तेषामप्यवशिष्टांशं हनिष्याम्यसिना ततः॥
तेषां मध्ये पलायी यो न पलायिष्यते हि सः।
तेषां मध्येऽवशिष्टो यः स नोद्धारमवाप्स्यति॥
२ सन्धिं यद्यपि कर्त्तित्वा पातालं प्रविशन्ति ते।
तर्हि तस्मादपि स्थानात् मत्करस्तान् ग्रहीष्यति॥
यदिस्याद् गगनारूढा भवेयुस्ते च मानवाः।
तानवरोहयिष्यामि पुनस्तस्मात् स्थलादहं॥
३ कर्म्मिलाद्रेश्च चूडायां कुर्य्युश्चेदात्मगोपनं।
अहं तत्रापि धृत्वा तान् आनेष्यामि ततो वहिः॥
ते समुद्रतले चेत् स्युः प्रच्छन्ना मम दृष्टितः।
तस्मिन् स्थानेऽपि तान् सर्पो दङ्क्ष्यत्याज्ञापितो मया॥
४ यदि वन्दित्वदेशं ते गच्छेयुः शत्रुसम्मुखं।
तान् हनिष्यति तत्रैव खड्ग आज्ञापितो मया।
न क्षेमार्थमनिष्टार्थं निरीक्षिष्ये च तान् सदा॥
५ अहमेव प्रभुः सोऽस्मि वाहिनीनां सदाप्रभुः।
पृथिवी येन संस्पृष्टा द्रवभावं प्रगच्छति।
तीव्रशोकञ्च कुर्व्वन्ति सर्व्वे तस्या निवासिनः॥
कृत्स्नमेव च तत्पृष्ठं याति वन्यावदुच्चतां।
जायते च पुनर्निम्नं मिस्रीया तटिनी यथा॥
६ स स्वाट्टान् निर्म्ममे व्योम्नि पृथ्यां संस्थाप्य तोरणं।
स समुद्रस्य तोयानि समाहूय च तै र्जलैः।
आप्लावयति भूलोकं नाम तस्य सदाप्रभुः॥
७ इस्रायेलीयसन्ताना इयमुक्तिः सदाप्रभोः।
किं न कूशीयसन्तानैस्तुल्या यूयं मदन्तिकं॥
इस्रायेलं मिसर्देशात् कप्तोराच्च पिलेष्टिनः।
तथा कीरादरामीयान् किं नैवानीतवानहं॥
८ प्रभो र्नित्यप्रभो र्दृष्टिः पापराज्येऽत्र वर्त्तते।
पश्चाहं भूतलादेव तत् समुच्छेत्तुमुद्यतः॥
तथा सत्यपि नैवाहं याकूबस्य कुलं तदा।
समुच्छेत्स्यामि निःशेषमित्थं ब्रूते सदाप्रभुः॥
९ किन्तु पश्य मयाज्ञाप्य चालन्यां तण्डुला इव।

परजातिषु सर्व्वास्विस्रायेलस्य कुलं मया।
चालयिष्यत एकन्त्वस्थि भूमौ न पतिष्यति॥
पतिष्यन्त्यसिना सर्व्वे मत्प्रजान्तःस्थपापिनः। १०
ब्रुवाणा न समाप्तास्मान् नाक्रमिष्यति वा विपत्॥
तस्मिन् काले तु दायूदः कुटीरं पतनोन्मुखं। ११
अहमुत्थापयिष्यामि तस्य छिद्राणि पूरयन्॥
तत्खण्डान् स्थापयिष्यामि प्राक्काले तच्च यादृशं।
प्रत्यभात् तादृशं कर्त्तुं निर्म्मास्ये तदहं पुनः॥
अत्रेदं मदभिप्रेतं इदोमः शेषमानवाः। १२
यासाञ्चोपरि मन्नाम ख्यातं ताः परजातयः।
सकला येन जायेरंस्तेषां वश्या प्रजा इव।
य एतत्साधकस्तस्य वाक्यमेतत् सदाप्रभोः॥
पुन र्नित्यप्रभु र्ब्रूते कालः पश्चागमिष्यति। १३
यदा हलवहः क्षेत्रे शस्यच्छेत्तारमाप्स्यति।
द्राक्षामर्द्दनकारी च बीजवापकमाप्स्यति॥
द्राक्षारसं नवीनञ्च वर्षयिष्यन्ति पर्व्वताः।
द्रवीभूता भविष्यन्ति सकलाश्चोपपर्व्वताः॥
मम प्रजा य इस्रायेल् तस्य वन्दिदशामहं। १४
सम्परिवर्त्तयिष्यामि तदानीं तैश्च मानवैः।
नष्टपुराणि निर्म्माय तत्र वासः करिष्यते॥
द्राक्षाक्षेत्राणि कृत्वा च तेषां पायिष्यते रसः।
उद्यानान्यपि कृत्वा तैस्तत्फलं भक्षयिष्यते॥
तदानीं स्वीयभूमौ च रोपयिष्यामि तानहं। १५
मया तेभ्यः प्रदत्तायाः स्वभूमे र्भ्रंश्यतः पुनः।
केनाप्युत्पाटनं तेषां न भविष्यति कर्हिचित्।
उक्तवान् भारतीमेताम् ईश्वरस्ते सदाप्रभुः॥

ओबदियस्य भविष्यद्वाक्यानि ।

१ अहङ्कारकारणात् १० याकूबं प्रत्युपद्रवकारणाच्च इदोमो भाविविनाशस्य कथनं १७ याकूबो भाविविजयस्य कथनञ्च ।

१ ओबदियस्य दर्शनं । प्रभुः सदाप्रभुरिदोममधीत्थं जगाद ।
वार्त्तैकास्माभिरश्रावि समादेशात् सदाप्रभोः ।
समीपं परजातीनां दूतश्च प्रेषितोऽभवत् ।
आयात तेन योद्धुञ्चोत्तिष्ठामः सकला वयं ॥
२ ह्योदिष्ठं पश्य जातीनां मध्ये त्वां क्षुद्रवानहं ।
यत्परेनास्त्यवज्ञाया भाजनं त्वं भविष्यसि ॥
३ चित्तगर्व्वेण मुग्धस्त्वं शैलदुर्गेषु वासकृत् ।
ऊर्द्धवासं समाश्रित्य स्वचित्ते गद्यते त्वया ।
कोऽवतार्य्य स्थलादस्माद् भूमौ मां पातयिष्यति ॥
४ यद्यप्युत्क्रोशपक्षीव त्वमत्युच्चेऽवतिष्ठसे ।
यद्यपि ज्योतिषां मध्ये स्वनीडो निर्म्मितस्त्वया ॥
तथापि त्वं ततः स्थानान्मयावतारयिष्यसे ।
भाषते भारतीमेतां स्वयमेव सदाप्रभुः ॥
५ स्तेनाश्चेत्त्वामुपायास्यन् किंवा रात्रीयदस्यवः ।
तर्हि प्रयोगमात्रं तैश्चौर्य्यं किं नाकरिष्यत ।
हाहा तव विनाशस्तु जातः कीदृग् भयङ्करः ॥
द्राक्षासञ्चयिनश्चेद् वा समायास्यंस्त्वदन्तिकं ।
तर्हि तैः फलशेषः किं नैवात्यक्ष्यत कश्चन ॥
६ कीदृशन्त्वनुसन्धानमेषावीयन्त्रणां कृतं ।
तेषां गूढानि वित्तानि शत्रुभिर्याचितानि हि ॥
७ देशान्तं प्रेषयन्ति त्वां सर्व्वे त्वत्सहकारिणः ।
वञ्चयन्तो जयन्ति त्वां सर्व्वे त्वत्कृतसन्धयः ॥
त्वत्प्रदत्तान्नभोक्तारो जालं तन्वन्त्यधस्तव ।
इदोमस्यान्तरे तस्माद् बुद्धिः कापि न शिष्यते ॥
८ इत्थं नित्यप्रभु र्ब्रूते दिने तस्मिन्नुपस्थिते ।
किं नाहं नाशयिष्यामीदोमाज्ज्ञानवतो नरान् ।

एषावः पर्व्वतात् किं न संहरिष्यामि विज्ञतां॥
निराशाश्च भविष्यन्ति प्रवीरास्तव तैमन। ९
एषावोऽद्रित उच्छेद्यो हत्यया मानवो यतः॥
भ्रातरं प्रति याकूबं दौरात्म्याचरणात्तव। १०
भविता त्वं त्रपाच्छन्नः समुच्छिन्नश्च शाश्वतं॥
यदा त्वं सम्मुखं तस्यातिष्ठस्तं दिवसं स्मर। ११
तद्दिने तस्य सम्पत्तिरपनीता विदेशिभिः॥
विजातीयनरास्तस्य गोपुराणि प्रविश्य च।
चक्रुर्धं गुटिकापातं यिरूशालम्पुरीमधि।
तेषामेकेन तुल्यश्च त्वमपि प्रतिभासि मे॥
स्वभ्रातुस्तु दिने तस्य दुर्गते दिवसे त्वया। १२
दृष्टिपातो न कर्त्तव्यो यिहूदावंशजानधि।
विनाशदिवसे तेषामामोदो न विधीयतां।
तस्य सङ्कटकाले च दर्पोक्ति र्न प्रयुज्यतां॥
मत्प्रजानां विपत्काले तत्पुरं न प्रविश्यतां। १३
विपत्कालेऽशुभं तासां न त्वयाप्यवलोक्यतां।
विपत्काले धने तासां मा कुरुष्व करार्पणं॥
तासां पलायिनश्छेत्तुं त्वं मा तिष्ठेश्चतुष्पथे। १४
सङ्कटस्य दिने शेषान् नरान् मार्पय वैरिणि॥
सर्व्वासां परजातीनां प्रतिकूलः सदाप्रभोः। १५
दिवसो यत आसन्न आचरं त्वञ्च यादृशं।
कृतवांस्तादृगाचारस्त्वामुद्दिश्य करिष्यते।
तावकीनापकारश्च मूर्ध्नि वर्त्तिष्यते तव॥
पीतवन्तो यतो यूयं मम पूतगिरौ यथा। १६
सकलैः परजातीयैः पातव्यं सर्व्वदा तथा।
ते पिवन्तो गिलन्तश्च सम्भविष्यन्त्यभूतवत्॥
स्थास्यन्ते प्राप्तनिस्ताराः सियोनाद्रौ तु मानवाः। १७
पर्व्वतः स तदानीञ्च पूतस्थानं भविष्यति।
स्वीयभूम्यधिकारांश्च याकूबो लप्स्यते कुलं॥
याकूबस्य कुलं वह्नि र्यूषफस्य कुलं शिखा। १८
एषावश्च कुलं शुष्को नालराशि र्भविष्यति॥

तौ च ज्वलिष्यतस्तत्र तान् नाशांश्च ग्रसिष्यतः ।
एषावः कुलजातस्य प्राप्तनिस्तारमानवः ।
नावशेष्यत एकोऽपीयमेवोक्तिः सदाप्रभोः ॥
१९ लप्स्यते गिरिरेषावो दाक्षिणात्यनिवासिभिः ।
पिलेष्टीयप्रदेशश्च समभूमिनिवासिभिः ॥
इफ्रयिमस्य भूमिश्च शोमिरोणस्य च स्थलं ।
बिलप्स्येते यिहूदीयै र्बिन्यामीनेन गिल्यदं ॥
२० इस्रायेलीयवंशस्य निर्वासादागता च सा ।
सेना सारिफतं यावत् किनानीयान् प्रजेष्यति ॥
यिरूशालमतो नीता ये तु निर्वासिता जनाः ।
सिफारै सन्ति जेष्यन्ति दाक्षिणात्यपुराणि ते ॥
२१ आरोक्ष्यन्ति सियोनाद्रिं नरा निस्तारकारिणः ।
एषावः पर्व्वतश्रेण्या विचारं कर्त्तुमुद्यताः ।
तदा नित्यप्रभोरेव राजत्वञ्च भविष्यति ॥

योनाहोपाख्यानं ।

---

१ प्रथमोऽध्यायः ।

१ नीनवीं योनाहस्य प्रेषणं तर्शीशे तस्य पलायनं ४ झञ्झाया उपस्थितिः १० समुद्रे तस्य निक्षेपः १७ मत्स्येन तस्य ग्रसनञ्च ।

१ एकदामित्तयसुतं योनाहं प्रति सदाप्रभोर्वाक्यं प्रादुरभूत्, यथा,
२ त्वमुत्थाय महानगरीं नीनवीं गच्छ तस्याः प्रतिकूलां घोषणां कुरु च,
३ यतस्तस्या दुष्टता मम सम्मुखमुपातिष्ठत्। तदा योनाहः सदाप्रभो
र्दृष्टितः पलायितुमुद्यतो याफों गतश्च, तत्र तर्शीशगामिनं पोतमासाद्या-
तारं दत्त्वा सदाप्रभो र्दृष्टितस्तज्जनैः सार्द्धं तर्शीशं गन्तुं तं प्रविवेश च ।
४ अनन्तरं सदाप्रभुना महावायुः समुद्रं प्रहितः समुद्रे च महती झञ्झो-
५ त्पन्ना तया पोतभङ्गशङ्काभूत्। तदा पोतवाहा भीत्वा प्रत्येकं स्वं स्वं
देवमुद्दिश्याक्रन्दन्, पोतस्थद्रव्याणि च समुद्रे निक्षिपन्तस्तं लघुं कर्त्तु-
६ मयतन्त, योनाहस्तु पोतगर्भमवरुह्य शयित्वा सुषुप्त आसीत्। तदा

नाविकाध्यक्षस्तस्यान्तिकं गत्वा जगाद, भो सुषुप्त, त्वं किं कुरुषे?
उत्तिष्ठ निजेश्वरमाहूय प्रार्थनां कुरुष्व, किंखिदीश्वरोऽस्मत्पक्षे चिन्तां
करिष्यति, तथा सति वयं न नंक्ष्यामः। अनन्तरं ते परस्परं जगदुः, ७
आयात, कस्य कारणादियं विपद् अस्मानुपागता तन्निर्णयार्थमस्माभि
र्गुटिकापातः क्रियतां। अपरं गुटिकापाते कृते गुटिकया योनाह्नो
निर्द्दिष्टः। अतस्ते तं जगदुः कस्य कारणादियं विपदस्मानुपागता तद- ८
स्मान् ज्ञापय। का तव व्यवसा? कुतः स्थानात् त्वमागतः? तव को
देशः? का वा तव जातिः? ततः स तान् जगाद, इब्रीयोऽहं, समुद्रस्य ९
स्थलस्य च यो निर्म्माता तस्य स्वर्गेश्वरस्य सदाप्रभोरहं भयकारी।

एतेन ते नरा अतीव त्रासयुक्ता भूत्वा तं जगदुः, किमर्थं त्वमेतत् कृत- १०
वान्? वस्तुतः स सदाप्रभो र्दूरिषतः पलायते तत् तेऽवगता आसन्, यतः
स तांस्तज्ज्ञापितवान्। अस्मत्पीडनात् समुद्रो यथा विरमेत् तदर्थं त्वां ११
प्रत्यस्माभिः किं कर्त्तव्यं? यतः समुद्र उत्तरोत्तरं संरब्धो जायते। ततः १२
स तान् जगाद, यूयं मां धृत्वा समुद्रे निक्षिपत, तेन समुद्रो युष्मत्पीड-
नाद् विरमिष्यति, यतोऽहं जाने, ममैव कारणादियं झञ्झा युष्मान्
आक्रमीत्। तथापि ते नराः पोतं स्थले परावर्त्तयितुं तरङ्गभेदनाया- १३
चेष्टन्त न तु शेकुः, यतस्तेषां प्रातिकूल्येन समुद्र उत्तरोत्तरं संरब्धोऽजा-
यत। अतस्ते सदाप्रभुमाहूयेत्थं प्रार्थयाञ्चक्रिरे, भो सदाप्रभो, नरस्यै- १४
तस्य प्राणानां कृतेऽस्माकं विनाशो मा भवतु, निर्द्दोषरक्तपातापराधम-
स्मासु मार्पय वा, यस्माद् भो सदाप्रभो, तुभ्यं यदरोचत त्वं तदेव
कृतवान्। अपरं योनाहस्तै र्धृतः समुद्रे निक्षिप्तश्च, तदा समुद्रः स्वसंर- १५
म्भाद् विरतः। ततस्ते नराः सदाप्रभुतोऽतीव भीत्वा सदाप्रभवे बलीन् १६
ददु र्व्रतसङ्कल्पांश्च चक्रिरे।

परन्तु सदाप्रभुना प्रकाण्ड एको मत्स्यो योनाहस्य गिलने नियुक्तः, १७
तस्य मत्स्यस्योदरे योनाह्नो दिनत्रयं रात्रित्रयञ्च यापयामास।

---

२ द्वितीयोऽध्यायः।

१ योनाहस्य प्रार्थना १० तस्योद्धारश्च।

तस्य मत्स्यस्योदरेऽवस्थितिकाले योनाह्नो निजेश्वरं सदाप्रभुमुद्दिश्य १
प्रार्थयाञ्चक्रे। स उवाच, २

नित्यप्रभुं समुद्दिश्य मम सङ्कटमध्यतः।
कृतवानहमाक्रानं स मह्यञ्चोत्तरं ददौ॥
आर्त्तनादो मयाकारि पातालस्यैव गर्भतः।
स्वकर्णाभ्यां गृहीतश्च मामकीनरवस्त्वया॥
३ निक्षिप्तोऽहं त्वयागाधेऽपां हृदि स्रोतसावृतः।
सकलैस्तव कल्लोलैस्तरङ्गैश्चाससमाप्लुतः॥
४ मयावादि निरस्तोऽहम् अभवं तव दृष्टितः।
त्वत्प्रासादं पवित्रन्तूद्दिश्य द्रक्ष्याम्यहं पुनः॥
५ प्राणस्पर्शिजलैरुद्धोऽगाधाद्भिः परिवेष्टितः।
अभवं बद्धशीर्षश्च तन्तुभिः सागरोद्भवैः॥
६ अहं पर्व्वतमूलानां स्थानं गत्वावरूढवान्।
धरित्र्यर्गलबद्धाभूत् सदाकालं ममोपरि॥
तथा सत्यपि मत्प्राणान् क्षयस्थानस्य मध्यतः।
पुनरुद्धृतवांस्त्वं हि भो मदीश सदाप्रभो॥
७ मत्प्राणेष्ववसीदत्सु स्मृतो नित्यप्रभुर्मया।
याच्ञा मे त्वामुपातिष्ठत् पवित्रे तव मन्दिरे॥
८ असाराणां व्यलीकानां वस्तूनां सेवकास्तु ये।
स्वदयालाभमार्गन्ते सन्त्यजन्ति नराः स्वयं॥
९ अहन्तु त्वां समुद्दिश्य स्तवस्य ध्वनिना समं।
बलिदानं करिष्यामि यत् प्रतिश्रुतवानहं।
तच्छोधञ्च करिष्यामि त्राणं दानं सदाप्रभोः॥

१० अनन्तरं सदाप्रभुना तस्मै मत्स्यायाज्ञायां प्रदत्तायां स योनाहं स्थल उज्जगार।

---

३ तृतीयोऽध्यायः।

१ पुनश्च नीनवीं प्रेषितस्य योनाहस्य तत्र प्रचारणं ५ पापात् तन्निवासिनामनुतापः १० तेषां रक्षणञ्च।

१ अपरं द्वितीयवारं योनाहं प्रति सदाप्रभो र्वाक्यं प्रादुरभूत्, यथा,
२ त्वमुत्थाय महानगरीं नीनवीं गच्छ, मया च यां घोषणां वक्ष्यसे, तां तत्र
३ घोषय। ततः सदाप्रभो र्वाक्याद् योनाह उत्थाय नीनवीं गतः। सा तु

नीनवीश्वरस्य दृष्ट्यां महती नगरी दिनत्रयमानस्य गमनस्य योग्या
चासीत्। अतो योनाहो नगरं प्रवेष्टुमारभ्यैकदिनमानं गमनं कुर्व्वन्नि- ४
दमघोषयत्, यथा, अद्यारभ्य चत्वारिंशद्दिनेष्वतीतेषु नीनवीयमुत्पाट-
यिष्यते।

तदा नीनवीयजना ईश्वरे प्रत्ययं कृत्वोपवासं घोषयामासु र्महान्तः ५
क्षुद्राश्च सर्व्वे शाणवसनं परिदधिरे च। तस्यां कथायाञ्च नीनवीयरा- ६
जस्यान्तिकमुपस्थितायां स निजसिंहासनादुत्थाय गात्रतो राजवस्त्रं
त्यक्त्वा शाणवसनं परिदधे, भस्मनि निषसाद च, नीनव्यां घोषणया ७
राज्ञस्तदीयामात्यानामादेशादिमां कथां ज्ञापयामास च, यथा, मनुष्याः
पशवश्च गावो मेषाश्च किमपि माखादयन्तु, मा चरन्तु, जलं मा पिबन्तु
वा। मनुष्याः पशवश्च शाणवस्त्राणि परिदधतामीश्वरमुद्दिश्योच्चैराह्वानं ८
कुर्व्वताञ्च, मनुष्याश्च प्रत्येकं स्वकुमार्गात् स्वहस्तस्थितदौरात्म्याच्च परा-
वर्त्तन्तां। को जानीत ईश्वरः पुनरनुतप्य स्वप्रचण्डक्रोधान्निवर्त्तिष्यते, ९
तथा सति वयं न नंक्ष्यामः।

तत ईश्वरस्तेषां तां क्रियामर्थतः स्वकुमार्गात् तेषां परावर्त्तनं ददर्श, १०
तस्मात् तेषामनिष्टसाधनस्य यां कथामीश्वरो गदितवान्, स तामध्यनु-
तप्य तदनिष्टं न साधयामास।

---

४ चतुर्थोऽध्यायः।

१ ईश्वरस्य दयायां योनाहस्य क्रोधः ५ एरण्डस्य दृष्टान्तेन तं प्रतीश्वरस्य तर्जनञ्च।

एतेन योनाहोऽतीव विषण्णो बभूव चुक्रोध च। अतः स सदाप्रभु- १
मुद्दिश्य प्रार्थनां कृत्वा जगाद, भो सदाप्रभो, स्वदेशेऽवस्थितिकालेऽपि २
ममेयं कथा किं नासीत्, तस्मादेवाहं त्वरां कृत्वा तर्शीशं गन्तुमयते,
यतोऽहं ज्ञातवान्, त्वं कृपामयः स्नेहशीलश्चेश्वरः क्रोधे धीरो दयायां
महान् चानिष्टमध्यनुतापकारी चासि। अतो भो सदाप्रभो, त्वमिदानीं ३
मम प्राणान् मत्तो हर्त्तुमर्हसि, यतो मम जीवनान्मरणं श्रेयः। तदा ४
सदाप्रभु र्जगाद, तव क्रोधनं किं भद्रं?

योनाहो नगरान्निर्गत्य नगरस्य पूर्व्वदिश्यवर्त्तत, तत्रैव स स्वकृते ५
कुटीरं निर्म्माय नगरस्य का गति र्भवति तद्दर्शनप्रतीक्षया तत्र छाया-
यामुपविश्यावातिष्ठत। तदा सदाप्रभुरीश्वर एरण्डमेकं नियुयुजे, ६

स्वविषादाद् योनाहस्योद्धारार्थं स तदीयमस्तकस्योपरि छायाप्रदानाय
७ योनाहादप्यूर्द्ध्वीभूय ववृधे, तस्मिन्नेरण्डे योनाहोऽतीवाहृष्यत्। किन्तु
परदिनेऽरुणोदयकाले ईश्वरेण कीट एको निरूपितः स तमेरण्डं
८ ददंश, तेन स शुष्कीभूतः। अपरं सूर्य्योदयकाल ईश्वर उष्णं पूर्व्वीय-
वायुं नियुयुजे, ततो योनाहस्य मस्तके रौद्रेणाहते सोऽवासीदद् ईश्वरं
प्राणत्यागं याचित्वा चावादीत्, मम जीवनान्मरणं श्रेयः।
९ अनन्तरमीश्वरो योनाहं जगाद, तमेरण्डमधि तव क्रोधनं किं भद्रं ?
१० सोऽवादीत्, मृत्युपर्य्यन्तं मम क्रोधनं भद्रं। तदा सदाप्रभु र्जगाद,
त्वं तमेरण्डमनुकम्पसे, तस्य कृते तु त्वया परिश्रमो नाकारि न त्वया वा
११ स वर्द्धितः। एकस्यां रजन्यां स उत्पन्न एकस्यां रजन्यां नष्टश्च। तर्ह्यहं
किं न तां महानगरीं नीनवीमनुकम्पेय, यस्यां दक्षिणवामहस्तयोः
प्रभेदं ज्ञातुमसमर्था विंशतिसहस्राधिकलक्षं मानवप्राणिनो बहवः
पशवश्च विद्यन्ते ?

मीखायस्य भविष्यद्वाक्यानि।

---

१ प्रथमोऽध्यायः।

१ देवार्च्चाकारणाद् यिहूदाया विरुद्धम् ईश्वरस्य क्रोधकथनं १० शोचनाय विनयश्च।

१ योथम आहसो हिष्कियश्चेतिनामकानां यिहूदादेशीयराजानामधिकारकाले मोरेष्टीयं मीखायं प्रति सदाप्रभो र्यद् वाक्यं प्रादुरभूत्, शोमिरोणं यिरूशालमञ्चाधि यानि दर्शनानि तेन लेभिरे, तद्वृत्तान्तोऽयं।

२ भो सर्व्वा जातयो यूयं श्रवणं कर्त्तुमर्हथ।
त्वयावधीयतामत्र क्षौणि त्वत्पूरकेण च॥
युष्माकं प्रतिकूलश्च प्रभुः साक्षी सदाप्रभुः।
स्वयमेव प्रभु र्भूयात् पवित्रान्निजमन्दिरात्॥
३ यतः पश्य निजस्थानाद् विनिर्गत्य सदाप्रभुः।
अवतीर्य्य च मेदिन्या उच्चस्थानैः क्रमिष्यति॥
४ द्रवीभूता अधस्तस्य भविष्यन्ति च पर्व्वताः।
विदीर्णाश्च भविष्यन्ति तदधस्तादुपत्यकाः।

अग्नः साचाद् यथा सिक्थं प्रपाते सिक्तमम्बु वा॥
उत्पन्नं सर्व्वमेतत्तु याकूबस्यापराधतः। ५
इस्रायेलीयवंशस्य पापानाञ्च समूहतः॥
याकूबस्यापराधः कः किमन्यः शोमिरोणतः।
उच्चस्थानं यिहूदाः किं किमन्यद् यिरूशालमात्॥
शोमिरोणमहं तस्मात् क्षेत्रस्थं प्रस्तरोत्करं। ६
उद्यानञ्च करिष्यामि द्राक्षाणां रोपणार्थकं॥
सर्व्वानुपत्यकायाञ्च निक्षेप्स्यामि तदश्मनः।
सर्व्वं तद्भित्तिमूलञ्चाहं करिष्याम्यनावृतं॥
सकलाः खण्डयिष्यन्ते तस्य तक्षितविग्रहाः। ७
अनलेन च धक्ष्यन्ते सकलास्तस्य दक्षिणाः।
कृत्स्नं तत्प्रतिमावृन्दं करिष्यामि च जङ्गलं॥
वेश्याभोगस्य मूल्येन सञ्चयाद्व स तद् यतः।
वेश्याभोगस्य मूल्याय तद्विकारिष्यते पुनः॥
विलपामि ततो हेतो र्हाहाकारं करोमि च। ८
मुषितो वस्त्रहीनश्च यातायातं करोम्यहं॥
ईरयामि विलापञ्च शृगालानां गणो यथा।
यादृशञ्चोष्ट्रपक्षिण्यः शोकं कुर्व्वे च तादृशं॥
अ घाताः शोमिरोणस्य सन्ति साङ्घातिका यतः। ९
यिहूदादेशपर्य्यन्तं व्याप्तञ्चामङ्गलं यतः।
तन्मज्जातेः पुरद्वारं यिरूशालममस्पृशत्॥
मा ज्ञापयत गाते तत् मा श्रावयत रोदनं। १०
वैत-लाफ्राभिधग्रामे धूलिं विकिर मस्तके॥
नग्नत्वात्लज्जितान्यत्र गच्छ शाफीरवासिनि। ११
निर्गमं कुरुते नैव साननस्य निवासिनी।
वैथेत्सेलस्य शोकेन यूयमाश्रयवञ्चिताः॥
क्षमाकाङ्क्षातुरा जाता यस्मान्मारोतवासिनी। १२
यतो नित्यप्रभोः पार्श्वात् प्रेरितं यदमङ्गलं।
तद् यिरूशालमो द्वारं यावद् दृश्यत आगतं॥
तुरङ्गो युज्यतां याने त्वया लाखीशवासिनि। १३
हते सीयोनकन्यायास्त्वं पापायाग्रगामिनी।

इस्रायेलोऽपराधास्त्वाभवन्नाविष्कृतास्त्वयि ॥
१४ अतो मोरेष्टगाताय त्वं प्रदास्यसि सम्बलं।
इस्रायेलीयराजानां कृतेऽक्षीबपुरस्य च।
गृहाणामावली माया कुनदीवद् भविष्यति ॥
१५ नेष्यामि स्वामिनं तुभ्यं पुनर्मारेशवासिनि।
यास्यन्त्यदुल्लमं यावद् इस्रायेलो यशस्विनः ॥
१६ कृत स्वनन्दनानां त्वं स्वमुण्डं विकचं कुरु।
मुण्डस्य केशहीनत्वं प्रशस्तं कुरु गृध्रवत्।
यतो निर्व्वासितास्त्वत्तो दूरीभूतास्त्व सन्ति ते ॥

---

२ द्वितीयोऽध्यायः।

१ उपद्रवकारणात् लोकान् प्रति तर्जनं ४ अन्यायकारणाद् भाविदण्डकथनं १२ ईश्वरीयप्रतिज्ञा च।

१ स्वशय्यासु शयाना ये कल्पयन्ति व्यलीकतां।
रचयन्ति च दुर्वृत्तिं तेषां तापो भविष्यति ॥
प्रभातायां रजन्यां ते तस्याः कुर्व्वन्ति साधनं।
यस्मात् स्वीयकरस्तेषां नराणामीश्वरो मतः ॥
२ लुब्धा मुष्णन्ति ते क्षेत्रं भवनानि हरन्ति च।
पुरुषं तद्गृहञ्चापि दौर्जन्येन जयन्ति ते।
सह भूम्यधिकारेण नरस्तैरभिभूयते ॥
३ ततो हेतोरिदं वाक्यं व्याजहार सदाप्रभुः।
पश्यानिष्टस्य सङ्कल्पं कुर्व्वे गोष्ठीमिमामधि ॥
स्वग्रीवाणां ततो यूयमुद्धारं न करिष्यथ।
न वाटिष्यथ साटोपं यतो दुष्काल एव सः ॥
४ तस्मिन् काले च युष्मासु प्रवादैकः प्रयोक्ष्यते।
शोकसूचकमेकञ्च गीतं गायिष्यते नरैः ॥
ते वदिष्यन्ति निर्वृत्तं सर्व्वशो ध्वंसिता वयं।
मज्ज्ञातेः पैतृका भूमिस्तेन हस्तान्तरीकृता ॥
स कथं मम हस्तात् तां कृतवानपवर्त्तिनीं।

धर्म्मत्यागिनरेभ्यश्चास्माकं क्षेत्रं विभक्तवान्॥
नास्ति कोऽपि ततो हेतोः समन्यायां सदाप्रभोः। ५
त्वत्कृते गुटिकापातात् मानरज्जुवितानकः॥
मा श्रावयत भावोक्तिमित्युक्तिं श्रावयन्त्यमी। ६
अत्र त्वश्राविते वाक्ये धिक्कारो न सरिष्यति॥
याकूबकुलमित्येवनामधारिणि मण्डलि। ७
किं न सहनशीलात्मा प्रतिपन्नः सदाप्रभुः॥
कर्म्माणीमानि तस्यैव कर्म्मवत् प्रतिभान्ति किं।
मद्वाचः सरलाचारे किं न मङ्गलसाधकाः॥
पूर्व्वेद्यु र्मम जातिस्तु वैरिणीव समुत्थिता। ८
यथा ये निर्भयं यान्ति पान्था युद्धात् पराङ्मुखाः।
स्कन्धस्थावरणं तेषां वस्त्रात् कृष्ट्वा हरन्त्यमी॥
मज्जातीयाबलास्तैश्च च्याव्यन्ते रम्यगेहतः। ९
तासाञ्चानाथबालेभ्यो यां भूषां दत्तवानहं।
तामपि नित्यकालार्थं गात्रात् तेषां हरन्ति ते॥
उत्थाय यात नास्तीदं विश्रामस्य स्थलं यतः। १०
नाशकद् घोरनाशेव कलुषं तस्य कारणं॥
नरो वातानुगामी को मृषोक्त्या च प्रवञ्चकः। ११
स वदेत् श्रावयिष्यामि त्वत्कृते मद्यवारुणी।
स जाते र्भवितैतस्याः प्रियोक्तिश्रावकस्तदा॥
नेष्याम्येकत्र नेष्यामि साकल्यं तव याकुब। १२
संरक्षन् संग्रहीष्यामीस्रायेलः शेषमानवान्॥
स्थापयिष्यामि चैकत्र मेषान् वस्रास्थितानिव।
स्वप्रचारे यथा पालं महाघोषं नरौघतः॥
एकस्तु भेदकस्तेषामग्रगामी भविष्यति। १३
भित्त्वा यास्यन्ति ते द्वारं निष्क्रमिष्यन्ति तेन च॥
स्वीयनराधिपस्तेषामग्रे च प्रगमिष्यति।
स्वयं नित्यप्रभुस्तेषां पुरोगामी भविष्यति॥

---

३ तृतीयोऽध्यायः ।

१ अध्यक्षाणां क्रूरता ५ भाववादिनां मृषावाक्यम् उभयो र्निर्भयता च ।

१ पुनश्च मयावादि, यथा,
बुध्यध्वं याकुबः श्रेष्ठा इस्रायेल्कुलशासकाः ।
विचारस्य परिज्ञानं किं युष्मासु न युज्यते ॥
२ भद्रविद्वेषिणो यूयम् अभद्रस्यानुरागिणः ।
चर्म्मापहारका नृणाम् अस्थ्नां मांसापहारकाः ॥
३ युष्माभि र्मत्प्रजानाञ्च क्रियते मांसभक्षणं ।
चर्म्म गात्रत उन्मोच्य सर्व्वास्थीनि विभिद्य च ।
तत् खण्डीकृत्य युष्माभिः पाकस्थाल्यामिवार्प्यते ।
प्रतिभाति च मांसं तत् कटाहस्यान्तरे स्थितं ॥
४ जना एते पुनर्व्वारं समुद्दिश्य सदाप्रभुं ।
क्रन्दिष्यन्ति स तेभ्यस्तूत्तरं नैव प्रदास्यति ॥
तस्मिन् काले च तेभ्यः स स्वमुखं छादयिष्यति ।
उचितं तत् फलं तेषां दुष्क्रियाणां भविष्यति ॥
५ ये मत्प्रजागणं भ्रान्तं कुर्व्वते भाववादिनः ।
दन्तैश्चर्व्वणकाले च शान्तिमाख्यापयन्ति ये ॥
किन्तु तेषां मुखे येन भक्ष्यद्रव्यं न दीयते ।
तं नरं प्रति कुर्व्वन्ति धर्म्मयुद्धस्य घोषणं ।
तान् भाववादिनोऽध्येतद् वाक्यं ब्रूते सदाप्रभुः ॥
६ युष्मदर्थं ततो हेतो रात्रि र्दर्शनवर्ज्जिता ।
मन्त्रणाभेदनीयञ्च तिमिरं सम्भविष्यति ॥
भाववादिगणस्योर्द्ध्वे सूर्य्यश्चास्तं गमिष्यति ।
तेषामूर्द्ध्वे दिनञ्चापि कृष्णवर्णं भविष्यति ॥
७ दर्शकाश्च त्रपिष्यन्ते लज्जिष्यन्ते च मन्त्रिकाः ।
स्वश्मश्रूणि च ते सर्व्वे छादयिष्यन्ति वाससा ।
यस्मादीश्वरतः किञ्चिदुत्तरं तै र्न लप्स्यते ॥
८ याकूबस्यापराधांस्त्विस्रायेलः पातकानि च ।
निर्द्देष्टुं बलपूर्णोऽहं प्राप्यात्मानं सदाप्रभोः ।
पूर्णश्चास्मि विचारेण विक्रमेण च वीरवत् ॥

भो याकूबकुलश्रेष्ठा इस्रायेल्कुलशासकाः । ९
सर्व्वे यूयमिदं वाक्यमाकर्णयितुमर्हथ ।
विचारद्वेषिणो यूयं सर्व्वसारल्यकुञ्चकाः ॥
रक्तै र्निर्म्मीयते सीयोन् अन्यायेन यिरूशालम् । १०
उत्कोचार्थं तदध्यक्षा विचारं निर्णयन्ति हि ॥ ११
वेतनार्थञ्च तत्रत्याः शिक्षां यच्छन्ति याजकाः ।
रूप्यार्थं मन्त्रपाठञ्च कुर्व्वते भाववादिनः ॥
पुनर्नित्यप्रभुञ्चापि तैरालम्ब्येदमुच्यते ।
स्वयं नित्यप्रभुः किं न विद्यतेऽस्माकमन्तरे ।
ततो हेतोः किमप्यस्मान् अनिष्टं नाक्रमिष्यति ॥
अतो युष्मत्कृते सीयोन् क्षेत्रवत् कृष्यते हलैः । १२
नगरी च यिरूशालम् भविष्यत्यश्मराशयः ।
मन्दिरस्य गिरिश्चापि भविष्यत्युच्चकाननं ॥

---

४ चतुर्थोऽध्यायः ।

१ ख्रीष्टस्य राज्यमधि भविष्यद्वाक्यं ६ स्वप्रजाः प्रतीश्वरस्य दया ११ रिपून् प्रति दण्डश्च ।

पाश्चात्येषु दिनेष्वेषा घटना सम्भविष्यति । १
गृहं नित्यप्रभोरेतद् यस्मिंस्तिष्ठति पर्व्वते ।
सर्व्वेषां भूधराणां स मस्तके स्थापयिष्यते ॥
गिरिभ्यः सकलेभ्यश्च प्रोन्नतः स भविष्यति ।
नानाजातीयलोकाश्च प्रसरिष्यन्ति तं प्रति ॥
परजातिसमूहश्च प्रस्थायेत्थं गदिष्यति । २
एत नित्यप्रभोः सर्व्वे आरोक्ष्यामो गिरिं वयं ।
याकूबीयेश्वरस्यैव प्रगच्छामो निकेतनं ।
स्वमार्गान् शिक्षितास्तेन चरिष्यामस्तदध्वसु ॥
सीयोनाद् यत उत्पद्य शास्त्रं विस्तारयिष्यते ।
यिरूशालमतो वाक्यं निर्याता च सदाप्रभोः ॥
बहुसंख्यकजातीनां माध्यस्थ्यं स करिष्यति । ३
तर्जयिष्यति जातीश्च दूरस्था बलवत्तमाः ॥

ताडयित्वा करिष्यन्ति निजासीन् कूटकानि ताः।
स्वशल्लीश्च लवित्राणि घटयिष्यन्ति मानवाः॥
न पुनर्जातिरेकान्यां प्रत्यसिं चालयिष्यति।
अभ्यासो रणविद्यायास्तै र्न कारिष्यते पुनः॥
४ स्वीयद्राक्षालतायास्तु तले स्वोडुम्बरस्य वा।
उपवेक्ष्यन्ति सर्व्वे हि कोऽपि नोद्वेजयिष्यति।
इत्थमाह यतो वक्त्रं वाहिनीनां सदाप्रभोः॥
५ प्रत्येकं निजदेवस्य नाम्ना गच्छन्ति जातयः।
अनन्तकालपर्य्यन्तमस्माकमीश्वरोऽस्ति यः।
तस्य नित्यप्रभो र्नाम्ना चरिष्यामो वयं ततः॥
६ इयं नित्यप्रभोरुक्ति र्दिने तस्मिन्नुपस्थिते।
सङ्ग्रहीष्याम्यहं खञ्जां गता या च विकीर्णतां।
मया या निगृहीता च तां सञ्चेष्याम्यहं पुनः॥
७ तां खञ्जाञ्च करिष्याम्यवशिष्टांशपदान्वितां।
दूरीभूतां करिष्याम्यहं जातिं बलवत्तमां॥
अधुनानन्तकालञ्च सीयोनाभिधपर्व्वते।
स्वयं नित्यप्रभुस्तेषां नृणां राजा भविष्यति॥
८ भो व्रजस्योच्चदुर्ग त्वं सियोनो दुहितु र्गिरे।
प्रभुत्वं प्रथमं राज्यं दुहितु र्यिरूशालमः।
त्वामुपस्थास्यते त्वाञ्च पुनर्व्वारं प्रवेक्ष्यति॥
९ किमर्थमुच्चनादोऽयमिदानीमीर्य्यते त्वया।
त्वन्मध्ये किं न राजास्ति त्वन्मन्त्री किं ननाश वा।
ततो हेतोः किमग्रासीत् त्वां सवन्तीमिव व्यथा॥
१० सियोन्कन्ये सवन्तीव व्यथमाना स्फुटीभव।
निष्क्रान्ता पुरतो यस्मात् शीघ्रं क्षेत्रे प्रवत्स्यसि॥
त्वं याता बाबिलं यावत् तत्रोद्धारन्तु लप्स्यसे।
मोचयिष्यति तत्र त्वां शत्रुहस्तात् सदाप्रभुः॥
११ इदानीं त्वद्विरुद्धन्तु समेता बहुजातयः।
भाषन्ते च कथामेताम् अपवित्रीभवत्वियं।
अस्मन्नेत्राणि तृप्यन्तु सीयोनो दर्शनेन च॥
१२ नित्यप्रभोस्तु सङ्कल्पान् नैव जानन्ति ते नराः।

तस्य या मन्त्रणा सापि तै र्मनुष्यै र्न बुध्यते।
सञ्जग्राह स तान् यस्माच्छस्यभारान् खले यथा॥
सीयोन्वत्से त्वमुत्तिष्ठ कुरु तच्छस्यमर्द्दनं। १३
तव शृङ्गयुगं यस्मात् लौहतुल्यं करोम्यहं॥
पित्तलेन समानांश्च विदधामि खुरांस्तव।
त्वया च चूर्णयिष्यन्ते बहुसङ्घकजातयः॥
अहं वर्जितवांस्तासां लोप्त्रं नित्यप्रभोः कृते।
सर्व्वां तासाञ्च सम्पत्तिं कृत्स्नपृथ्व्याः प्रभोः कृते॥

---

५ पञ्चमोऽध्यायः।

१ ख्रीष्टस्य जन्मनो भविष्यद्वाक्यं ५ तज्जयस्य भाविवाक्यं १० याकूबो वंशस्य शुचीकरणं।

सेनादलप्रिये कन्ये इदानीन्तु दलं कुरु। १
अस्माकं प्रातिकूल्येनावरोधं कुर्व्वतेऽरयः।
इस्रायेलस्य शास्तारं दण्डेनाघ्नन्ति ते हनौ॥
त्वन्तु बैत्लेहमिफ्राथे स्वल्पत्वेन यद्यपि। २
यिहूदायाः सहस्राणां मध्ये गण्या न मन्यसे॥
तथापि त्वत्त उद्भूता स नरो मन्निरूपितः।
इस्रायेलस्य मध्ये यो जनशास्ता भविष्यति।
प्राक्कालादुद्गमास्तस्य वस्तुतोऽनादिकालतः॥
अतः प्रसवकारिण्या यावन्न प्रसवो भवेत्। ३
त्यक्ष्यन्ते तेन तावत् ते पश्चात् प्रत्यागमिष्यति।
शेषभ्रातृगणस्तस्येस्रायेलीयान्वयै र्वृतः॥
स च नित्यप्रभो र्नाम्ना स्वेश्वरस्य सदाप्रभोः। ४
नाम्नः श्रिया समुत्थाय स्वप्रजाः पालयिष्यति॥
सुखं वत्स्यन्ति ता यस्मात् काले तस्मिन्नुपस्थिते।
मेदिनीप्रान्तपर्य्यन्तं सुमहान् स भविष्यति॥
स स्वयं भविता सन्धिरस्मद्देशं प्रविश्य च। ५
अश्शूरो यदि कुर्व्वीतास्मद्धर्म्येषु पदार्पणं॥
तर्हि संस्थापयिष्यन्तेऽस्माभिस्तत्प्रातिकूल्यतः।
नराः सप्त प्रजापाला अष्टौ वा पुरुषर्षभाः॥

६ अशूरस्य च राज्यं तैरसिना पालयिष्यते।
निम्रोदस्यापि राज्यञ्चासीनैस्तद्द्वारेषु तैः॥
अस्मद्देशप्रविष्टश्चेदस्मत्सीम्नि पदार्पणं।
कुर्व्वीताशूर उद्धारोऽस्माकमेतेन सेत्स्यति॥
७ मनुष्यञ्चानपेक्ष्यैव नृसुतानप्रतीक्ष्य च।
खवारि यादृशं भाति नित्यप्रभुत आगतं।
तृणस्योपरि वा यद्वदवरोहन्ति शीकराः॥
बहुसंख्यकजातीनां मध्यस्थान उपस्थितः।
याकूबस्यावशिष्टांशस्तादृशः प्रतिभास्यति॥
८ मध्ये वन्यपशूनां यो मृगराज उपस्थितः।
मेषव्रजसमूहस्य मध्ये वा युवकेशरी।
गच्छन् मृद्गाति जन्तुञ्च छिनत्त्युद्धारकं विना॥
याकूबस्यावशिष्टांशस्तेन तुल्यो भविष्यति।
स्थितोऽन्यदेशिनां मध्ये वेष्टितो बहुजातिभिः॥
९ उच्चस्त्वद्वैरिणामूर्द्ध्वे तव हस्तो भविष्यति।
उच्छिन्नाश्च भविष्यन्ति सकलास्तव शत्रवः॥
१० पुन र्नित्यप्रभु र्ब्रूते दिने तस्मिन्नुपस्थिते।
समुच्छेत्स्याम्यहं सर्व्वांस्त्वदश्वांस्तव मध्यतः।
त्वद्रथानाञ्च सर्व्वेषां करिष्यामि विनाशनं॥
११ त्वद्देशस्य पुरीश्चापि समुच्छेत्स्याम्यहं तदा।
सर्व्वाण्युत्पाटयिष्यामि त्वद्दुर्गाणि दृढानि च॥
१२ समुच्छेत्स्यामि सर्व्वञ्च मायावित्वं करात् तव।
गणकास्तव वा केऽपि न स्थास्यन्ति ततः परं॥
१३ तव तक्षितमूर्त्तीश्च स्तम्भाकारांश्च विग्रहान्।
समुच्छेत्स्याम्यहं सर्व्वांस्तदानीं तव मध्यतः।
त्वं स्वहस्तकृतं वस्तु पुनर्नैव प्रणंस्यसि॥
१४ निर्भेत्स्यन्त मया त्वत्त आशेरामूर्त्तयस्तव।
त्वदीयनगराणाञ्च ध्वंसः कारिष्यते मया॥
१५ याभिर्नाग्राहि मद्वाक्यं परजातीश्च ताः प्रति।
करिष्ये कोपचण्डत्वाद् वैरनिर्य्यातनं तदा॥

६ षष्ठोऽध्यायः ।

अकृतज्ञताज्ञानतान्यायदेवार्च्चाकारणात् सह लोकैरीश्वरस्य विवदनं ।

इदं नित्यप्रभो र्वाक्यं यूयं संश्रोतुमर्हथ । १
पर्व्वतैः सार्द्धमुत्तिष्ठ विवादं प्रकुरुष्व च ।
त्वद्वाण्यामवधानञ्च क्रियतामुपपर्व्वतैः ॥
नित्यप्रभो र्विवादं तं यूयं शृणुत पर्व्वताः । २
श्रूयतां स च युष्माभिरचला धरणीधराः ॥
स्वप्रजाभिः समं यस्माद् विवादोऽस्ति सदाप्रभोः ।
इस्रायेलेन सार्द्धं स विसंवादं करोति च ॥
मया किमपराद्धं ते भो मदीयप्रजागण । ३
किं कृत्वा त्वं मया खिन्नो मह्यं देहि तदुत्तरं ॥
मया त्वं यत आनीतो मिसर्देशस्य मध्यतः । ४
तस्माद्दासगृहादेव तव मुक्तिः कृता मया ।
मूसाहारोणमिर्यामास्त्वदग्रे प्रहिता मया ॥
भो मदीयप्रजावर्ग मोयाबीयो नराधिपः । ५
बालाको याममन्त्रणां कार्षीत् तां त्वमनुस्मर ॥
बियोरस्य सुतो बिल्यम् प्रादात् तस्मै यदुत्तरं ।
शित्तीमाद् गिल्गलं यावद् यच्चाभूत् तदपि स्मर ॥
विविधं ज्ञास्यसे तर्हि धर्म्मकर्म्म सदाप्रभोः ॥
किं वस्त्वादाय यास्यामि प्रत्युद्गन्तुं सदाप्रभुं । ६
किं वस्त्वादाय सर्व्वोच्चं प्रणंस्यामि तमीश्वरं ॥
किं होमीयबलीन् दत्त्वा गोवत्सान् वैकहायनान् ।
तमुद्दिश्य समादाय स प्रत्युद्यास्यते मया ॥
किं मेषाणां संहस्रेषु प्रेष्यते स सदाप्रभुः । ७
तैलप्रवाहिनीनां वा नदीनामयुतेष्वपि ॥
कृते स्वीयापराधस्य किमहं ज्येष्ठमात्मजं ।
कृते मानसपापस्य तनो र्दास्यामि वा फलं ॥
यद् भद्रं भो मनुष्य त्वां स विज्ञापितवान् हि तत् । ८
अनुष्ठानं विचारस्य दयायामनुरञ्जनं ।
त्वदीयेशेन सार्द्धञ्च विनीतं गमनं तव ।

एतेभ्योऽधिकमन्यत् किं याचते त्वां सदाप्रभुः॥
९ रवो नित्यप्रभोरेष नगरं प्रत्युदीरितः।
भवतो नामतो भीतिः कुशलं नात्र संशयः।
यूयं दण्डञ्च मन्यध्वं तन्नियोक्तुश्च शासनं॥
१० किं दुष्टस्य गृहे कोषा दुष्टत्वेन समाचिताः।
विद्यन्त शस्यमानं वा च्चयरोगि शपोचितं॥
११ चिन्तेयं क्रियतां तेन दुष्टतायास्तुला मम।
सम्पुटे कूटपाषाणाः सन्त्यतः किमहं शुचिः॥
१२ दौरात्म्येनैव पूर्णास्तु तत्रत्या धनिनो नराः।
तन्निवासिमनुष्याश्च सन्ति मिथ्योक्तिवादिनः।
न्टणां तेषाञ्च या जिह्वा सा मुखान्तःस्थजिह्मता॥
१३ अत्युग्राणि मयैवापि कारिष्यन्ते च्चतानि ते।
त्वद्ध्वंसं विदधानेन पापानां तव कारणात्॥
१४ त्वं करिष्यस आहारं न तु तृप्तिमवाप्स्यसि।
उदरस्यैव शून्यत्वं पूर्ववत् स्थास्यते त्वयि॥
द्रव्यं स्थानान्तरीकृत्य त्वमुद्धर्त्तुं न शक्ष्यसि।
उद्धृतञ्च त्वया द्रव्यं मया खड्गेऽर्पयिष्यते॥
१५ त्वञ्च वप्स्यसि वीजानि न तु शस्यं लविष्यसि।
जीतफलं म्रदित्वापि तैलेनाङ्गं न लेप्स्यसे।
पुनर्द्राक्षा म्रदित्वापि रसं तासां न पास्यसि॥
१६ अम्रेरेव विधानानाम् आहाबीयकुलस्य च।
सर्व्वेषां कर्म्मणां रक्षाम् इयं वः कुरुते पुरी।
तेषाञ्च मन्त्रणारूपे मार्गे यूयं प्रगच्छथ॥
ततो हेतोरहं ताञ्च करिष्यामि मरुस्थलीं।
सीत्कारस्य च पात्राणि मानवांस्तन्निवासिनः।
मत्प्रजानाञ्च धिक्कारं यूयं वक्ष्यथ भारवत्॥

---

७ सप्तमोऽध्यायः।

१ जनानां दुष्टतामधि मण्डल्या विलापः ५ न मानुषे किन्त्वीश्वरे मण्डल्या आश्रयः ८ शत्रोः पराजयः ११ मण्डलीं प्रति प्रबोधकथनञ्च।

१ हा हतोऽस्मि यतो हेतोः फलानां शेषसंग्रहः।

त्वक्षद्राक्षाफलानां वा कर्त्तनं मे निदर्शनं॥
द्राक्षायां गुच्छ एकोऽपि भक्षणार्थं न विद्यते।
मत्प्राणै र्वाञ्छितं नैकं वासुपक्कफलं तरौ॥
उच्छिन्नो देशतः साधु र्लोकतः सरला गतः। २
रक्तपाताय सर्व्वे ते प्रतीक्षन्ते रहःस्थले।
भ्रातरं धर्त्तुमेकैको जालमादाय धावति॥
तेऽर्पयन्ति करौ पापे सम्यक् तत्साधनार्थिनः। ३
राजा याचति लोभाचाज्ञां ददाति विचारकः॥
महल्लोको निजेच्छातो नाशायोक्तिञ्च भाषते।
रज्जोर्गुणत्रयेणेव तैरित्थं साध्यते छलः॥
यस्तु सर्व्वोत्तमस्तेषां स नरः कण्टकोपमः। ४
योऽन्येभ्यः सरलात्मा स वारणीतः सकण्टकः॥
दिनं त्वत्प्रेक्षकाणां तु तव दण्डस्य चैष्यति।
तस्मिन् काले न्टणां तेषां व्याकुलत्वं भविष्यति॥
मा विश्वसित मित्रेऽपि मा श्रद्धध्वं सखीनपि। ५
तव वक्षसि या शेते तत्कर्णाद् रुन्धि चाननं॥
स्वपुत्त्रेण यतो हेतोरवज्ञायिष्यते पिता। ६
मातरं दुहिता श्वश्रूं परिबाधिष्यते बधूः।
परिवारा गृहस्थस्य भविष्यन्ति च वैरिणः॥
करिष्येऽहन्तु दृक्पातं समुद्दिश्य सदाप्रभुं। ७
सधैर्य्या च प्रतीक्षिष्ये मम त्रातारमीश्वरं।
ईश्वरो मम मद्वाक्ये कर्णपातं करिष्यते॥
माकार्षीस्तत आनन्दं भो मद्वैरिणि मामधि। ८
यतो हेतोः पतित्वापि समुत्थास्याम्यहं पुनः।
तिमिरे चोपविष्टाया मम ज्योतिः सदाप्रभुः॥
सहे नित्यप्रभोः क्रोधं क्कतपापा तदन्तिकं। ९
शेषे तु मद्विवादे स पक्षवादी भविष्यति॥
मद्विचारस्य निष्पत्तिं स तदानीं करिष्यति।
तेनैवालोकमानीतात्मानं द्रक्ष्यामि धार्म्मिकां॥
तद्दृष्ट्वा लज्जयाच्छन्ना भविता मम वैरिणी। १०
अहमुक्ता तया कुत्र त्वदीशोऽस्ति सदाप्रभुः॥

तामैवोद्दिश्य दृक्पातं मम नेत्रे करिष्यतः।
भविता मर्द्दनीया सा रथ्यानां कर्द्दमो यथा॥
११ वारणीस्तव निर्म्मातुं समायाति शुभं दिनं।
मत्कर्तृत्वं दिने तस्मिन् दूरं विस्तारयिष्यते॥
१२ मनुष्याश्च दिने तस्मिन्नायास्यन्ति त्वदन्तिकं।
अश्शूरान्मिसरीयेभ्यः पुरेभ्यश्च समागताः॥
मिसर्द्देशमहानद्यो मध्यस्थानादुपस्थिताः।
एकैकस्मात् समुद्राच्चैकैकस्मात् पर्व्वतादपि॥
१३ स्तोयनिवासिनां दोषात् क्षौणी तु ध्वंसयिष्यते।
क्रियाणां तैः कृतानाञ्च फलं तत् सम्भविष्यति॥
१४ पालय स्वप्रजा यष्ट्या स्वाधिकारगतं व्रजं।
कर्म्मिलान्तर्गतारण्ये पृथग्भूता वसन्तु ते।
वाशनस्य गिल्यदे च चरन्तु ते॥
१५ निर्गच्छन्तं मिसर्द्देशात् त्वां यथादर्शयं पुरा।
तथैवाश्चर्य्यकर्म्माणि दर्शयिष्यामि मद्व्रजं॥
१६ लज्जिष्यन्ते स्वकर्तृत्वे कृत्स्ने तद् वीक्ष्य जातयः।
मुखं हस्तैश्च रोत्स्यन्ति वधिरीभूतकर्णिनः॥
१७ लेक्ष्यन्ते सर्पवद् धूलिं भूमौ यद्वत् सरीसृपाः।
सकम्पाः स्वीयदुर्गेभ्यः करिष्यन्ति च निर्गमं॥
सोद्वेगाश्चाभियास्यन्त्यस्माकमीशं सदाप्रभुं।
तदानीं तव साक्षाच्च भविष्यन्ति भयातुराः॥
१८ क ईश्वरस्तव तुल्यः स्यादपराधविमोचकः।
स्वाधिकारस्य शेषांश प्रत्यधर्म्मस्य च क्षमी।
करुणाप्रियभावाच्च स्वक्रोधे न चिरोद्यमः॥
१९ अस्मानपि पुनर्व्वारमनुकम्पिष्यते भवान्।
अस्माकमपराधांश्च पादाभ्यां मर्द्दयिष्यते।
अस्माकं सर्व्वपापान्यगाधे क्षेप्स्यति सागरे॥
२० याकूबं प्रति सत्यं त्वमिब्राहीमे दयां कुरु।
त्वमाप्राक्कालतोऽस्माकं पितृभ्यः शपथेन यत्।
प्रत्यश्रौषीः फलं तस्येदं तेभ्यो दातुमर्हसि॥

नहूमस्य भविष्यद्वाक्यानि ।

१ प्रथमोऽध्यायः ।

१ सदाप्रभो र्महिम्नो वर्णनं ९ स्वप्रजासु दया शत्रुषु निग्रहश्च ।

नीनव्यां भारोक्तिः । इल्कोशीयनहूमस्य दर्शनसम्बलितो ग्रन्थः । १

ईर्ष्यालुः प्रतिकर्त्ता चेश्वरो ज्ञातः सदाप्रभुः । २
प्रतिकर्त्तास्ति कोपेन भयार्हश्च सदाप्रभुः ॥
स्वविपक्षान् समुद्दिश्य प्रतिकर्त्ता सदाप्रभुः ।
स्वशत्रूंश्च समुद्दिश्य चिरकोपान्वितोऽस्ति सः ॥
धीरः सदाप्रभुः क्रोधे सुमहान् विक्रमेण च । ३
अपराधं न कथञ्चित् सोऽनुजानात्यदण्डितं ॥
वात्या सदाप्रभो र्वर्त्म झञ्झायाश्चास्ति तत्पथः ।
मेघमाला तदीयस्य पादयुग्मस्य पांशवः ॥
सागरं भर्त्सयित्वैव परिशुष्कं करोति सः । ४
सरितः सकलास्तेन विधीयन्ते च निर्जलाः ॥
बाशनः कर्म्मिलाद्रिश्च म्लानतां परिगच्छतः ।
लिबानोनस्य पुष्पाणां तेजो म्लानञ्च जायते ॥
वेपन्त गिरयस्तस्माद् विगलन्त्युपपर्व्वताः । ५
पृथ्वी स्फुरति तत्साक्षात् वासिभिश्च समं जगत् ॥
तस्य कोपस्य साक्षात् कः संस्थातुं सक्षमो भवेत् । ६
तस्य क्रोधानलोत्तापादुत्थातुं कश्च शक्नुयात् ॥
अग्निवृष्टि र्यथा तद्वद् रोषस्तस्यावतार्य्यते ।
तदग्रे च विभिद्यन्ते पाषाणा अपि खण्डशः ॥
नित्यप्रभुः सुशीलोऽस्ति सङ्कटाहे स आश्रयः । ७
ये च तं शरणं यान्ति सोऽभिजानाति तान् जनान् ॥
स उल्लङ्घिजलौघेनास्याः स्थलं संहरिष्यति । ८
तमसा निजशत्रूंश्च दूरं प्रद्रावयिष्यति ॥
यूयं तित्यप्रभुं जेतुं सङ्कल्पं कं करिष्यथ । ९

निःशेषमेव संहारं साधयिष्यति स स्वयं।
नैव ह्विन्नत्व उत्पत्तिः सङ्कटस्य भविष्यति॥
१० कण्टका इव संश्लिष्टाः सुरया च मदान्विताः।
ग्रासिष्यध्वे यतो यूयं निःशेषं शुष्कनालवत्॥
११ नित्यप्रभो विरुद्धं यः कुसङ्कल्पस्य कल्पकः।
पापाधमस्य मन्त्री स उत्पन्नस्तव मध्यतः॥
१२ इत्थं नित्यप्रभु र्ब्रूते सम्पूर्णाः सन्ति यद्यपि।
बहवोऽपि मनुष्यास्ते तथापीदृग्दशान्विताः।
ते समुत्पाटयिष्यन्ते तदात्येष्यति दुर्द्दशा।
त्वां योऽहं क्लिष्टवान् सोऽहं न क्लेक्ष्यामि ततः पुनः॥
१३ तव स्कन्धेऽर्पितं तस्य युगं भङ्क्ष्याम्यहं ततः।
याभि र्बद्धोऽसि ता रज्जूश्छित्त्वा क्षेप्स्यामि च स्वयं॥
१४ तस्य शत्रो र्विरुद्धन्त्वादिदेशेदं सदाप्रभुः।
तव नाम्नोऽङ्कुरः कश्चिन्न पुनारोपयिष्यत।
विग्रहान् सिक्तमूर्त्तींश्च तवोच्छेत्स्यामि मन्दिरात्।
विधास्ये त्वच्छवागारम् अधमस्त्वं यतोऽभवः॥
१५ यो ददाति शुभां वार्त्तां सन्धे र्विश्रावयन् कथां।
पश्य पादद्वयं तस्य भाति पर्व्वतमूर्द्धसु॥
भो यिहूदे स्वपर्व्वाणि त्वमनुष्ठातुमर्हसि।
स्वप्रतिश्रुतवस्तूनि सर्व्वाण्युत्स्रष्टुमर्हसि॥
न पुनस्तव मध्येन याता पापाधमो यतः।
निःशेषं तस्य साकल्यं समुच्छिन्नं यतोऽभवत्॥

---

२ द्वितीयोऽध्यायः।

नीनवीजयिनां वर्णना।

१ त्वत्साक्षात् संस्थितो भङ्क्ता त्वं दुर्गं रक्ष यत्नतः।
समालोकय पन्थानं कटिदेशं दृढीकुरु।
स्वशक्तिं सबलीकर्त्तुमत्यन्तं प्रयतस्व च॥
२ याकूबस्य श्रियं यस्माद् इस्रायेलः श्रियं तथा।
तेजोयुक्तां पुनर्व्वारं विदधाति सदाप्रभुः॥

सम्यक् शून्यीकृता यस्मात् शून्यकारिनरैरुभौ ।
तयोर्द्राक्षालतायाश्च नाशिताः सर्व्वपल्लवाः ॥
वीराणां तस्य चर्म्माणि सन्ति रक्तीकृतानि हि । ३
वस्त्रैः सिन्दूरवर्णैश्च भान्ति विक्रमिणो नराः ॥
तस्यायोजनघस्त्रे च तद्रथा अयसोज्ज्वलाः ।
शल्लयश्च विचाल्यन्ते देवदारुविनिर्म्मिताः ॥
उन्मत्ता इव रथ्यासु तद्रथा विद्रवन्ति च । ४
प्रशस्तान् पुरमार्गांस्ते प्लवन्ते च महाजवाः ।
उल्कातुल्या प्रभा तेषां वज्राणामिव च त्वरा ॥
राज्ञाहूताः स्वशूरास्तु प्रस्खलन्ति स्वपङ्क्तिषु । ५
प्राचीरं सम्मुखीकृत्य शत्रुभि र्द्रुतगामिभिः ।
तदाक्रमणचेष्टातश्छादः स्थाप्यत ऊर्द्धतः ॥
गोपुराणि नदीतीरे स्थितान्युद्घाटितानि तैः । ६
प्रासादो राजकीयश्च विलीनत्वं प्रगच्छति ॥
हुत्सबेत्यभिधा राज्ञी हृतवस्त्रापनीयते । ७
तस्या दास्यश्च काकूक्तिमीरयन्ति कपोतवत् ।
कुर्व्वते च कराघातं स्वीयवक्षःस्थलेषु ताः ॥
जलपूर्णसरस्तुल्यादितोऽविद्यत नीनवी । ८
इदानीन्तु नरास्तस्याः कुर्व्वते प्रपलायनं ।
तिष्ठत तिष्ठतेत्युक्तो कोऽपि पश्चान्न पश्यति ॥
रूप्यं हरत हेमापि हरतेतीर्य्यते रवः । ९
कोऽप्यन्तो नास्ति कोषाणां रम्यरत्नचयस्य वा ॥
शून्या शून्योकृता साभूत् सर्व्वथा चावमर्द्दिता । १०
गलितं हृदयं तस्य जानुयुग्मञ्च चञ्चलं ।
सर्व्वश्रोणी च सङ्क्षुब्धा सर्व्वास्यं कालिमाकुलं ॥
सिंहानां वसतिः कुत्र युवकेशरिणां व्रजः । ११
विहारं तत्र सिंहश्च सिंही तस्याश्च शावकः ।
अकुर्व्वन् कोऽपि नासीच्च तत्र त्रासप्रदर्शकः ॥
स्वपुत्त्राणां प्रयोगाय मृगान् सिंहो व्यदारयत् । १२
रुद्धश्वासान् स्वभार्य्याणां कृत्यर्थं वा न्यपातयत् ।
स्वगुहा भक्ष्यमांसैश्च गेहांश्चापूरयन्मृगैः ॥

१२ त्वां प्रत्युपैमि वक्तीदं वाहिनीनां सदाप्रभुः।
धूमसाच्च करिष्यामि तव सर्व्वरथानहं।
असिना ग्रासयिष्यन्ते सकलास्तव शावकाः॥
तव लुण्ठितवस्तून्यहमुच्छेत्स्यामि भूतलात्।
दूतानां तव शब्दश्च नैव श्राविष्यते पुनः॥

---

३ तृतीयोऽध्यायः।

नीनव्या विनाशस्य भविष्यद्वाक्यं।

१ हाहाकारं श्रुणोत्वेषा रक्तपातप्रिया पुरी।
अन्तोऽन्यपहाराभ्यां तत्साकल्यं समाकुलं।
परद्रव्यापहारस्य तन्मध्यान्न निवर्त्तते॥
२ कशाघातस्य शब्दोऽयं चक्रघोषस्य च ध्वनिः।
धावनश्च तुरङ्गाणां स्यन्दनानाञ्च वल्गितं॥
३ अश्वारोहिण आक्रान्तिः कृपाणस्य च्छटाप्रभा।
दीर्घशूलस्य विद्युच्च हतानाञ्च महाचयः॥
शवानाञ्च महाराशिः कुणपानामसङ्ख्यता।
शेषाः स्खलन्ति पैराणां कुणपेषु च मानवाः॥
४ हेतुरेतस्य वेश्याया वेश्यावृत्तेरनेकता।
सम्यक् कान्तिविशिष्टा सा मायाविल्वे विशारदा॥
स्ववेश्यावृत्तिदाच्येण जातीनामपि विक्रयं।
मायाविलाच्च गोष्ठीनां विक्रयं समपादयत्॥
५ त्वां प्रत्युपैमि वक्तीदं वाहिनीनां सदाप्रभुः।
त्वदस्त्रान्तं विहृत्याहं पिधास्यामि तवाननं॥
नग्नतां तव जातिभ्यो दर्शयिष्याम्यहं तदा।
राष्ट्राणाञ्च मनुष्येभ्यस्तावकीनावमाननां॥
६ विरूपां त्वां करिष्याम्याक्षिप्य घृणमलं त्वयि।
त्वाञ्च संस्थापयिष्यामि सर्व्वेषां दृष्टिगोचरे॥
७ यस्त्वां द्रक्ष्यति स त्वत्तः प्रपलाय्य वदिष्यति।
ध्वंसिता नीनवी तस्याः कृते को विलपिष्यति।
कुत्र वासादयिष्यामि सान्त्वनाकारिणस्तव॥

त्वं किं नोयामनाक्षेष्ठा सासीना सरितां तटे। ८
अद्भिरासीच्च संवीता तत्प्राकारश्च सागरः।
निर्म्मितश्च समुद्रेण तत्प्राचीरमविद्यत॥
अपारञ्च बलं तस्या कूशमिस्रीयमानवाः। ९
आसंस्तस्याः सहायाश्च पूटलूबीयवंशजाः॥
निर्व्वासं प्रस्थिता सापि दासीभूता च वन्दिवत्। १०
निच्छिन्नाः सर्व्वरथ्यायाः कोणे तच्छिशवो हताः।
गुटिका पातिता सर्व्वांस्तस्या मान्यनरानधि।
महल्लोकाश्च तत्रत्याः सर्व्वे शृङ्खलयन्त्रिताः॥
त्वञ्चापि मत्ततां गत्वात्मानं संगोपयिष्यसि। ११
त्वमपि द्वेषिणो भीत्वाश्रयं प्राप्तुं यतिष्यसे॥
तव दुर्गाणि सर्व्वाणि साग्रुपक्कफला द्रुमाः। १२
चालितानां फलं तेषां भोक्तुरास्ये पतिष्यति॥
त्वन्मध्ये त्वत्प्रजाः पश्य वर्त्तन्ते योषितो यथा। १३
त्वद्देशीयपुराणाञ्च द्वाराणि द्वेषिणां कृते।
जातान्युद्घाटितान्येवाग्निदग्धान्यर्गलानि च॥
अवरोधनकालाय जलमुत्तोल्यतां त्वया। १४
स्वीयदुर्गाणि सर्व्वाणि क्रियन्तां सुदृढानि च।
पङ्कं प्रविश्य पादाभ्यां कर्द्दमं सम्मृदान च।
इष्टकापचनस्थानम् दृढीकर्त्तुं यतस्व च॥
तत्राग्निष्यति वह्निस्त्वां खङ्गस्त्वाञ्च लविष्यति। १५
पतङ्गैरिव ताभ्यां त्वं तदानीं ग्रासयिष्यसे॥
त्वं किं पतङ्गयूथस्य समानो जनसङ्ख्यया।
त्वं किं शलभवाहिन्यास्तुल्यो मानवसङ्ख्यया॥
नभसस्तारकाभ्योऽपि बहवो वणिजस्तव। १६
सर्व्वं पतङ्गयूथस्तु पतन् हत्वोड्डयिष्यते॥
तुल्याः शलभयूथेन तव वीराः किरीटिनः। १७
तव सेनापतिश्रेष्ठा असङ्ख्याः पतङ्गवत्॥
पतङ्गा इव शीतस्य दिने ते प्रावराश्रिताः।
सूर्य्योदये पलायन्ते ज्ञानातीतस्थलं गताः॥
भो अशूरमहीपाल सुषुप्तास्तव पालकाः। १८

नरा आदरणीयास्ते सेवन्ते विभ्रमं भुवि॥
पर्व्वतेषु विकीर्णाश्च पर्य्यटन्ति जनास्तव।
तेषां सङ्ग्रहकारी च नरः कोऽपि न विद्यते॥
१९ त्वद्गङ्गोऽनुपशाम्योऽस्ति तवाघातो व्यथाकरः।
तव वार्त्तां नराः श्रुत्वा करतालं प्रकुर्व्वते।
तव हिंसा यतः कस्योपरि नित्यं न चालिता॥

हबक्कूकस्य भविष्यद्वाक्यानि।

१ प्रथमोऽध्यायः।

१ मानवसमाजस्य पापानां निर्णयः ५ तेषां दण्डः १२ दुर्जनेन दण्डदानस्य कथनञ्च।

१ हबक्कूको भाववादी यद्दृष्टवांस्तस्य भारोक्तिरियं।
२ आर्त्तनादमहं कुर्व्वे स तु न श्रूयते त्वया।
त्वामुद्दिश्य च दौरात्म्यात् क्रन्दे त्वन्तु न रक्षसि।
ईदृशो नियमः स्थाता कतिकालं सदाप्रभो॥
३ दर्शयन् मामधर्म्मं त्वमायासं वीक्षसे कुतः।
विनाशोपद्रवौ चापि कुतो मत्सम्मुखं स्थितौ।
विरोधो जायते भूयो विसंवाद उदेति च॥
४ व्यवस्थापि ततः स्तब्धा विचारोऽतथ्यसम्भवः।
यतो हेतो नरै दुष्टै र्धार्म्मिकः परिवेष्टितः।
तस्माद् विचारनिष्पत्ति र्वक्रीभूतोपजायते॥
५ परजाती र्निरीक्षध्वं कुरुध्वञ्चावलोकनं।
महाश्चर्य्यञ्च जानीत जायध्वञ्च चमत्कृताः॥
युष्मत्काले यतः कार्य्यमेकं कारिष्यते मया।
तस्मिन् विज्ञापिते यूयं विश्वासं न करिष्यथ॥
६ यतोऽहं पश्य कल्दीयानुत्थापयितुमुद्यतः।
जातिमुग्रां त्वरायुक्तां पृथ्व्याः पृथुत्वचारिणीं।
परकीयनिवासानामधिकारापहारिणीं॥
७ घोरा भीमा च सा जातिस्तस्या न्यायविचारणं।

उन्नतिसाधनं तस्या उभयञ्चात्मसम्भवं ॥
तदश्वाश्चित्रकेभ्योऽपि सन्त्यतिद्रुतगामिनः । ८
सायन्तनवृकेभ्योऽप्युग्रस्वभावा भवन्ति च ॥
प्लवन्ते तद्धयारूढा आगच्छन्तश्च दूरतः ।
डयन्ते ते हयारूढा भक्ष्यार्थ्युत्क्रोशवद् द्रुताः ॥
दौरात्म्यसाधनायैव तत्साकल्यमुपस्थितं । ९
अग्रं याम इदं तेषामौत्सुक्यं दृष्टिसूचितं ।
गृह्णन्ति सिकतावत् ते बहुलां वन्दिसंहतिं ॥
राज्ञो निन्दति सा जाति र्हसति क्षितिपानधि । १०
हसन्ती सर्व्वदुर्गञ्च जयत्याचित्य मृत्तिकां ॥
पश्च सा वायुवद् वाति प्रगच्छन्ती तु दुष्यति । ११
निजशक्तिरियं यस्मात् स्वेश्वरो मन्यते तया ॥
किं न प्राक्कालतोऽसि त्वमीश्वरो मे सदाप्रभुः । १२
पावनो मम किं न त्वं न मरिष्यामहे वयं ॥
सा त्वयैव विचारार्थं नियुक्ता भो सदाप्रभो ।
सा दोषस्य प्रमाणाय स्थापिता भो धर त्वया ॥
शुचिलोचन एव त्वं दुर्वृत्तिं द्रष्टुमक्षमः । १३
आयासे चिरदृष्टिश्च त्वया कर्त्तुं न शक्यते ॥
विश्वासघातकेषु त्वं चिरदृष्टिं कुतोऽकरोः ।
दुर्ज्जनाद् धार्म्मिकः श्रेष्ठस्तेन तु ग्रस्यते यदा ।
कुतस्त्वं मौनमालम्ब्य तदानीमवतिष्ठसे ॥
एतेनाब्धिस्थमत्स्यानां नरं तुल्यं करोषि हि । १४
तुल्यमराजकानां वा कीटानां विदधासि तं ॥
जलतः सर्व्वमुत्कृष्य वडिशेन स दुर्ज्जनः । १५
सङ्गृह्णाति निजानाये स्वजाले सञ्चिनोति च ।
ततो हेतोः स आनन्दादुल्लासं प्रकरोति च ॥
ततो हेतो र्निजानायं बलिदानेन सेवते । १६
निजजालं समुद्दिश्य धूपदाहं करोति च ।
यतस्ताभ्यां स तैलांशी तद्भक्ष्यञ्च घृतप्लुतं ॥
एवम्भूते किमानायं शून्यीकुर्य्यात् स सर्व्वदा । १७
नित्यं जाती र्निहन्तुं वा प्रवर्त्तेत कृपां विना ॥

२ द्वितीयोऽध्यायः।

१ भाविघटनादर्शनाय बिश्वासेन प्रतीक्षणस्यावश्यकता ५ दिग्विजयेच्छाकारणात् कल्दीयानां दण्डनं ९ लोभकारणात् तेषां दण्डनं १२ निष्ठुरताकारणात् तेषां दण्डनं १५ मत्तताकारणात् तेषां दण्डनं १८ सुरार्च्चाकारणाद् दण्डनञ्च।

१ तिष्ठन् मत्प्रहरिस्थाने दुर्गस्योपर्य्यवस्थितः।
मयि किं वक्ष्यते तेन मत्खेदोक्तेः किमुत्तरं।
मया कर्त्तव्यमेतच्च प्रतीक्षिष्ये दिदृक्षया॥
२ तदा दत्त्वोत्तरं मह्यं जगादेदं सदाप्रभुः।
दर्शनं लिख सुस्पष्टं फलकेषु च तत् कुरु।
धावतापि मनुष्येण पठितुं तच्च शक्यतां॥
३ अधुनाप्युचितं कालं दर्शनं तत् प्रतीक्षते।
परिणामाभिकाङ्क्ष्येव न तु मिथ्योक्तिभाषि तत्॥
यदिस्यात् तद् विलम्बेत तर्ह्यपेक्षस्व तत्कृते।
यतः सेत्स्यत्यवश्यं तत् न च स्थास्यत्यनागतं॥
४ पश्य गर्व्वितमेवास्यान्तरे न सरलं मनः।
जीवनस्याधिकारी तु स्वविश्वासेन धार्म्मिकः॥
५ अपरं नात्र सन्देहो मदो विश्वासघातकः।
वीर आत्माभिमान्यस्ति स्वगृहं स न सेवते॥
लोभो विस्तारितस्तेनाकारि पातालवत् पृथुः।
स्वयञ्चातृप्यभावः स साक्षात् कालान्तको यथा॥
सर्व्वजातीश्च सङ्गृह्य प्रकरोति स आत्मसात्
सर्व्वदेशिन एकत्र कृत्वा वश्यान् करोति च॥
६ तैः सर्व्वैस्तद्विरुद्धं किं वादो नोद्भावयिष्यते।
किं न सूत्रमयं काव्यं गूढोक्तीनाञ्च सङ्ग्रह॥
यथा धिक् पररिक्थेन धनसंवर्द्धकं नरं।
कतिकालं स तत् कुर्य्यात् धिक् तं बन्धकभारिणं॥
७ किं नोत्थास्यन्त्यकस्माद्धि त्वदुत्पीडकमानवाः।
प्रबुद्धाश्च भविष्यन्ति तव क्लेशकरा नराः।
तदानीं स्वयमेव त्वं तेषां लोप्त्रं भविष्यसि॥
८ त्वया मूषितसर्व्वस्वाः सञ्जाता बहुजातयः।

जातीनां कृत्स्नशेषस्तु हृतस्वं त्वां करिष्यति ॥
हेतुरस्य मनुष्याणां क्षतं शोणितसेचनं ।
पीडनञ्च भुवः पुर्य्याः सर्व्वेषाञ्च निवासिनां ॥
धिक् नरं तं कुलाभस्य स्वकुलाय प्रदायिनं । ९
क्लेशहस्ताच्च रक्षार्थमुच्चे नीडविधायिनं ॥
फलं त्वन्मन्त्रणायास्तु स्वकुलस्यावमानना । १०
संहाराद् बहुजातीनां त्वं स्वप्राणेषु पातकी ॥
प्रस्तरः कुड्यमध्यस्थो रोदनं कुरुते यतः । ११
काष्ठमध्यस्थकीलेन दीयते च तदुत्तरं ॥
धिक् नरं नररक्तेन पुरनिर्म्माणकारिणं । १२
धिगन्यायविधानेन नगरस्थापकं नरं ॥
पश्य किं न चकारेदं वाहिनीनां सदाप्रभुः । १३
फलतो वह्निमात्रायानुष्ठितो जातिभिः श्रमः ।
भक्तस्यावस्तुमात्राय जनवृन्दैः क्लमातुरैः ॥
यस्मादापो यथा कृत्स्नं छादयन्ति महार्णवं । १४
तथा नित्यप्रभोर्द्युत्या ज्ञानं क्ष्मां पूरयिष्यति ॥
धिक् त्वां यः पाययन् बन्धून् भाण्डं भृत्वा स्वमन्युना । १५
नग्नतां वीक्षितुं तेषां मदोन्मत्तान् करोषि तान् ॥
अदत्वा गौरवेण त्वं परितृप्तोऽस्यवज्ञया । १६
त्वयापि क्रियतां पानं स्वलज्जा च प्रदर्श्यतां ॥
भाण्डो नित्यप्रभो र्हस्ते स्थितस्त्वामप्युपैष्यति ।
तव सर्व्वप्रतापे च वान्तद्रव्यं पतिष्यति ॥
अत्याचारो लिबानोने कृतस्त्वां छादयिष्यति । १७
तेन वित्रासितानाञ्च पशूनामपि मारणं ॥
अस्य हेतु र्मनुष्याणां क्षतं शोणितसेचनं ।
पीडनञ्च भुवः पुर्य्याः सर्व्वेषाञ्च निवासिनां ॥
उपकारः कदाचित् को लब्धस्तक्षितविग्रहात् । १८
किमर्थं तस्य निर्म्माता कृतवांस्तस्य तक्षणं ॥
कं चकारोपकारं वा धातुमूर्त्ति र्मृषागुरुः ।
कुतः स्वरचिते द्रव्ये रचकस्तस्य विश्वसेत् ।
कस्माच्चातः प्रतिच्छाया मूका वा निर्म्मिमीत सः ॥

१९ धिक् नरं काष्ठमुद्दिश्य प्रबुध्यस्वेति यो वदेत् ।
जडाश्मानं समुद्दिश्य जागृहीति च यो गदेत् ॥
किं गुरुः स भवेत् पश्य रूप्यस्वर्णैः स संवृतः ।
श्वासवायोश्च लेशोऽपि तस्य मध्ये न विद्यते ॥
२० स्वप्रासादे पवित्रे तु विद्यमानः सदाप्रभुः ।
तस्य साक्षाज्जगत् कृत्स्नं तूष्णीम्भूयावतिष्ठतां ॥

---

३ तृतीयोऽध्यायः ।

१ ईश्वरस्य पूर्व्ववत् स्वप्रजास्वनुग्रहः १८ तस्मिंश्च भाववादिनो विश्वसनं ।

१ हबक्कूकस्य भाववादिनः प्रार्थना । स्वरो व्याकुलतासूचकः ।
२ तव वार्त्तामहं श्रुत्वा भयार्त्तोऽस्मि सदाप्रभो ।
स्वकार्य्यं वर्षपर्य्याये जीवय त्वं सदाप्रभो ।
ज्ञापय वर्षपर्य्याये कोपकाले कृपां स्मर ॥
३ ईश आयाति तैमानात् पावनः पारणाद्रितः । सेला ।
व्योम तत्प्रभयाच्छन्नं पूर्णा तच्छंसया धरा ॥
४ राजते दीप्तिवत्तेजस्तत्करावंशुमालिनौ ।
प्रच्छन्नो विद्यते तत्र स्थाने तस्य पराक्रमः ॥
५ मारी गच्छति तस्याग्रे तं ज्वरश्चानुवर्त्तते ।
६ स तिष्ठन् मेदिनीं माति पश्यन् जातीर्धुनाति च ॥
भिद्यन्ते प्राक्तनाः शैलाः सीदन्त्यादिमभूधराः ।
आदिकाले यथा तद्वत् कुरुते स गमागमौ ॥
७ क्लेशाक्रान्तानि कूशस्य निरीक्षे शिविराण्यहं ।
मिदियानाख्यदेशस्योद्विज्यन्ते पटमण्डपाः ॥
८ नदीनां विपरीतं किं प्राज्वलद् भो सदाप्रभो ।
नदीनां विपरीतं किममर्षः प्राज्वलत् तव ।
समुद्रस्य विरुद्धं वा त्वत्कोपः किमवर्त्तत ॥
तन्निमित्तं निजाश्वेष्वारूढस्त्वं किं प्रगच्छसि ।
स्वरथेषु समासीनो जयरूपेषु भासि च ॥
९ विवृतस्तव चापोऽस्ति वाग्दण्डा निश्चिताः शपैः । सेला ।
त्वया स्रोतस्वतीसङ्घं खण्डं भूमि विदार्य्यते ॥

भूध्रास्त्वां वीक्ष्य यात्यन्ते धारासारो विमुच्यते । १०
स्वरवच्चैरयत्यब्धिरूर्द्धमञ्जलिमुन्नयन् ॥
सूर्य्यचन्द्रौ निजावासं प्रविष्टौ तत्र तिष्ठतः । ११
पततां तव तीराणामालोकात् साध्वसान्वितौ ।
संत्रस्तौ तव शूलस्य विद्युत्तुल्यप्रकाशतः ॥
त्वं क्रुद्धा चरसि क्षौणीं जातीर्मर्द्दासि मन्युना । १२
निर्गतः स्वप्रजास्त्रातुं स्वाभिषिक्तञ्च रक्षितुं ॥
दुर्जनस्य गृहाच्छीर्षं भित्त्वा त्वञ्च क्षिपस्यधः । १३
वेश्मनः कण्ठपर्य्यन्तं कुड्यं कुर्व्वन्ननावृतं ॥ सेला ॥
मां विध्वातुञ्च झञ्झेवागतास्तस्य जनाः पुरा । १४
रहो दीनं ग्रसिष्यन्त इवोल्लासमकुर्व्वतः ।
तेषां मूर्ध्नस्तु तस्यैव दण्डैस्त्वं व्यद्धमुद्यतः ॥
त्वमब्धिं चरसि स्वाश्वैर्बहुलानामपां चयं ॥ १५
अहं तच्छ्रुतवांस्तस्मादुदरं कम्पते मम । १६
अधरौ मम तच्छब्दात् संघट्टेते पुनः पुनः ।
क्षयोऽविशन्ममास्थीनि स्वाधस्तादहमुद्विजे ॥
यतो यावत् स्वजातीयान् नाक्रमिष्यति नाशकः ।
सङ्कटस्य दिनं तावत् प्रतीक्षिष्ये निरुद्यमः ॥
हा उडुम्बरवृक्षोऽपि न भविष्यति पुष्पितः । १७
द्राक्षाणाञ्च फलोत्पत्तिः कापि नैव भविष्यति ॥
जितवृक्षस्य तेजोऽपि निष्प्रभावं भविष्यति ।
भक्ष्यद्रव्यं न किञ्चिद् वा क्षेत्रैरुत्पादयिष्यते ॥
मेषशालास्थमेषाणामुच्छेदः सम्भविष्यति ।
गावो नैवावशेक्ष्यन्ते गोशालासु च केचन ॥
तञ्ज्ञात्वाप्यहमुल्लासं करिष्यामि सदाप्रभौ । १८
आह्लादञ्च करिष्यामि मम त्राणाकरेश्वरे ॥
मम शक्तिस्वरूपोऽस्ति प्रभुरेव सदाप्रभुः । १९
हरिणीपादतुल्यं स विधत्ते चरणौ मम ।
मदीयोच्चस्थले मांञ्च स स्वयं गमयिष्यति ॥
मदीयवीणावाद्यनियन्त्रे दातव्यं ।

सफनियस्य भविष्यद्वाक्यानि ।

१ प्रथमोऽध्यायः ।

नानापापकारणाद् यिहूदादेशस्य विरुद्धम् भाविदण्डस्य ज्ञापनं ।

१ हिष्कियस्य पौत्रोऽमरियस्य पुत्रो यो गिदलियस्तस्य पुत्रं सफनियं प्रति यिहूदाराजस्यामोनसुतस्य योशियस्य राजत्वकाले सदाप्रभोरिदं वाक्यं प्रादुरभूत् ।

२ संहारं यत्नतः कुर्व्वन् सकलं भूमिपृष्ठतः ।
संहर्त्तुमुद्यतोऽस्मीति व्याजहार सदाप्रभुः ॥
३ मानवान् संहरिष्यामि तैः सार्द्धञ्च पशूनपि ।
संहरिष्यामि शून्यस्थान् खगान् मीनांश्च सिन्धुजान् ॥
नरान् विघ्नस्वरूपांश्च दुष्टताचारिभिः समं ।
नरं छेत्स्यामि भूपृष्ठादिति ब्रूते सदाप्रभुः ॥
४ यिहूदा उपरिष्टाच्च यिरूशालमवासिनां ।
सर्व्वेषामुपरिष्टाच्चाहं प्रसार्य्य करं निजं ।
उच्छेत्स्यामि स्थलादस्मादुच्छिष्टं बालदेवतः ।
आख्यां पुरोहितानाञ्च तैः सार्द्धं याजकानपि ॥
५ मानवान् गृहपृष्ठेषु व्योमसैन्याभिपूजकान् ।
सर्व्वान् नित्यप्रभो र्नाम्ना नाम्ना स्वेष्टनृपस्य च ।
उभयो र्नामधेयाभ्यां शपमानानुपासकान् ॥
६ नरान् नित्यप्रभोः पश्चाद् गमनादपसारिणः ।
शाश्वतप्रभुमन्वेष्टुं ध्यातुञ्चासम्मतान् नरान् ॥
७ प्रभो र्नित्यप्रभोः साक्षात् सकलाः सन्तु नीरवाः ।
यत आसन्नमेवास्ति तस्य नित्यप्रभो र्दिनं ॥
यज्ञस्यायोजनं यस्मात् कृतवान् स सदाप्रभुः ।
आत्मनिमन्त्रितानाञ्च पावनं तेन साधितं ॥
८ तच्च नित्यप्रभो र्यज्ञं यस्मिन् काले भविष्यति ।
तदा देशाधिपानाञ्च राजपुत्त्रगणस्य च ।

विजातीयेन वेशेन वेष्टितस्य नरस्य च।
सर्व्वस्याहं करिष्यामि सूक्ष्मं तत्त्वावधारणं॥
शिलाञ्च प्लवमानो यः कश्चित् स्वीयप्रभो र्गृहं। ९
दौरात्म्यच्छलयो र्लाभैः पूर्णं कर्त्तुं प्रयत्नवान्।
दिने तस्मिन् करिष्यामि तस्य तत्त्वावधारणं॥
नित्यप्रभुः पुन ब्रूते दिने तस्मिन्नुदेष्यति। १०
मत्स्यद्वाराद् विलापोक्तिः पुरप्रान्ताच्च रोदनं।
उपपर्व्वतराजीतो महाभङ्गस्य च ध्वनिः॥
हाहाकारं कुरुध्वञ्च यूयं हट्टनिवासिनः। ११
किनानीयवणिग्जातिः कृत्स्ना संहारिता यतः।
उच्छिन्नाश्च नराः सर्व्वे रौप्यभारेण भारिणः॥
अधिकन्तु दिने तस्मिन् प्रदीपान् ज्वालयन्नहं। १२
करिष्याम्यनुसन्धानं सुसूक्ष्मं यिरूशालमः॥
तदा चात्तुब्धकल्कस्योपरि निर्वृतिसेविनां।
मानवानां करिष्यामि सूक्ष्मं तत्त्वावधारणं॥
न हितं नाहितं वापि विदधाति सदाप्रभुः।
इदं वाक्यं मनुष्यास्ते भाषन्ते हृदयान्तरे॥
नराणान्तु धनं तेषां परलोप्त्रं भविष्यति। १३
ध्वंसितानि भविष्यन्ति तेषां सर्व्वगृहाणि च॥
कृते तै र्गृहनिर्म्माणे न निवत्स्यन्ति तत्र ते।
द्राक्षाक्षेत्राणि कृत्वापि तै र्न पायिष्यते रसः॥
सुप्रत्यासन्नमेवास्ति दिनं नित्यप्रभो र्महत्। १४
तत् प्रत्यासन्नमेवास्ति तच्चातीव त्वरान्वितं॥
असौ नित्यप्रभोस्तस्य दिनस्य श्रूयते रवः।
युद्धवीरेण चीत्कारस्तत्र तीव्र उदीर्य्यते॥
सोऽहः कोपाह एवास्ति कष्टसङ्कोचयोरहः। १५
ध्वंसविध्वंसयोश्चाहस्तिमिरध्वान्तयोरहः।
मेघानां दिनमेवास्ति नीलाभ्राणाञ्च तद् दिनं॥
दृढानां नगराणाञ्च तल्पानाञ्च नभःस्पृशां। १६
वैपरीत्येन तौर्य्यस्योच्चनादस्य च तद् दिनं॥
नृणां कष्टं विधास्ये च ते क्रमिष्यन्ति चान्धवत्। १७

नित्यप्रभो र्विरुद्धं तैः पापाचारः कृतो यतः।
धूलिवत् क्षेप्स्यते रक्तं तेषां मांसञ्च किट्टवत्॥
१८ नित्यप्रभोश्च कोपाह्नि तेषामुद्धारसाधने।
सद्मनं न सितं तेषां न स्वर्णं वा भविष्यति।
कृत्स्ना ग्रासिष्यते क्षौणी तस्येर्ष्यायाश्च वह्निना॥
यतो निःशेषसंहारं सर्व्वेषां भूनिवासिनां।
विह्वलत्वेन संयुक्तं विनाशं स करिष्यति॥

---

२ द्वितीयोऽध्यायः।

१ विविधपापकारणाद् अनुतापाय निवेदनं ४ पिलेष्टीयानां दण्डनं ८ मोयाबस्य दण्डनं १२ कूशीयाश्शूरीयाणां दण्डनञ्च।

१ जनानां सङ्ग्रहं कृत्वा त्वं समायातुमर्हसि।
जाते क्षेतुमनभ्यस्ते विलम्बञ्चात्र मा कुरु॥
२ दण्डाज्ञा सेत्स्यते यस्मात् तुषवत् त्वरते दिनं।
नित्यप्रभोश्च कोपाग्नेस्तापो युष्मानुपैष्यति।
नित्यप्रभोश्च कोपाह्नो युष्मानभ्याक्रमिष्यति॥
३ भा देशवासिनो नम्रा अन्वेषध्वं सदाप्रभुं।
निजाचारेण युष्माभिः पालितं तस्य शासनं॥
अन्वेषध्वं पुन र्धर्म्ममन्वेषध्वञ्च नम्रतां।
किंस्वित् प्रगोपयिष्यध्वे संरम्भाह्नि सदाप्रभोः॥
४ घसा स्थास्यति सन्त्यक्ता विध्वंसस्थानमस्किलान्।
दिवापासिष्यतेऽसदोदम् इक्रोणं कृच्यते हलैः॥
५ धिग् युष्मानब्धितीरस्थप्रदेशस्य निवासिनः।
धिक् करेतीयजाते त्वां भो पिलेष्टीयभूः किनान्॥
युष्माकं प्रतिकूलं हि वाक्यमस्ति सदाप्रभोः।
त्वां विनाश्य करिष्याम्यहं निवासिविवर्जितां॥
६ अब्धितीरस्थदेशश्च गोप्रचारो भविष्यति।
पूर्णो गोरक्षिणां खातै र्मेषाणाञ्च व्रजाजिरैः॥
७ यिहूदाकुलशेषस्य स प्रदेशो भविष्यति।
तत्रैव स्वीयमेषाणां चारयिष्यन्ति ते व्रजान्।

सन्थायां शाययिष्यन्त्यश्किलोनस्य गृहेषु च ॥
यतस्तेषु कृपादृष्टिमीशस्तेषां सदाप्रभुः।
कृत्वा वन्दिदशां तेषां परावृत्तां करिष्यति ॥
मोयाबोऽश्रौषमाक्षेपम् अम्मोनो दुर्वचांसि च। ८
आक्षिप्ता मत्प्रजास्ताभ्यां तासां देशश्च धर्षितः ॥
इस्रायेलो य ईशः स वाहिनीनां सदाप्रभुः। ९
ततो हेतोरिदं ब्रूते जीवेयं चेदहं स्वयं।
तर्ह्यवश्यं सिदोमस्य तुल्यो मोयाब् भविष्यति।
सम्भविष्यन्त्यमोरायास्तुल्याश्चाम्मोनवंशजाः ॥
देशः कण्टकराष्ट्रञ्च लवणस्य खनिस्थलं।
अनन्तकालमुत्सन्नं स्थानञ्चैव भविष्यति ॥
प्रजानां मम शेषांशस्तेषां वित्तं हरिष्यति।
तेषां रिक्थञ्च लप्स्यन्ते मज्जातेः शेषमानवाः ॥
अयं तेषां स्वदर्पस्य परिवर्त्तो भविष्यति। १०
यतो हेतो र्मनुष्यास्ते वाहिनीनां सदाप्रभोः।
प्रजानां प्रातिकूल्येनाकार्षु र्निन्दनधर्षणे ॥
तेषान्तु प्रातिकूल्येनातीव भीमः सदाप्रभुः। ११
पृथिव्याः सर्व्वदेवानां स क्षयं साधयिष्यति ॥
तदानीं परजातीनां सर्व्वद्वीपनिवासिनां।
स्वीयस्थानत एकैकस्तस्मै प्रणिपतिष्यति ॥
युष्माकञ्चापि कूशीया हन्तव्या मेऽसिना जनाः ॥ १२
उत्तरस्या विरुद्धञ्च स्वीयहस्तं प्रसार्य्य सः। १३
अशूरीयस्य राज्यस्य विनाशं कर्त्तुमर्हति।
नीनवीञ्च विधत्तां स ध्वस्तां शुष्कां मरूपमां ॥
यूथास्तत्र शयिष्यन्ते सङ्घशः सर्व्वजीविनः। १४
रात्रौ तत्स्तम्भशीर्षेषु स्थास्यतः कङ्कशल्यकौ।
गानकारिखगानाञ्च गवाक्षे श्रोष्यते रवः।
शिलायां स्थास्यते ध्वंस एरस्काष्ठस्य पातनात् ॥
इयं सा नगरी पूर्व्वं यासीदुल्लासकारिणी। १५
निर्भयं सा सुखासीना मनसेदमभाषत।
अहमेवास्मि मद्भिन्नापरा कापि न विद्यते ॥

कथं सा ध्वंसिता जाता पशूनां शयनस्थलं।
तस्मान्निश्चेन यः कश्चिद् गमनं प्रकरिष्यति।
सीत्कारमीरयित्वा स स्वहस्तं चालयिष्यति॥

३ तृतीयोऽध्यायः।

१ यिरूशालमं प्रति तिरस्करणं ८ इस्रायेलो मुक्तेरपेक्षाकथनं १४ ईश्वरकृतपरित्राण आनन्दनस्य कथनञ्च।

१ धिक् तां विद्रोहिणीं भ्रष्टामुपघातप्रियां पुरीं।
२ न तया श्रुतमाक्रान्तं न गृहीतञ्च शासनं॥
न वा नित्यप्रभौ सत्यो विश्वासोऽनुष्ठितस्तया।
स्वेश्वरस्य समीपं वा गमनं न कृतं तया॥
३ तन्मध्यस्था जनाध्यक्षाः सिंहा गर्जनकारिणः।
तस्या विचारकर्त्तारः सन्ति सायन्तना वृकाः।
तैः प्रातःकालपर्य्यन्तं नैकमस्थ्यवशेष्यते॥
४ तस्याश्च भाववक्तार आत्मश्लाघिप्रतारकाः।
तस्या ये याजकास्ते च पवित्रद्रव्यदूषकाः।
व्यवस्थाञ्च समुद्दिश्यात्याचारं ते प्रकुर्व्वते॥
५ धर्म्मवानेव तस्यास्तु मध्यवर्त्ती सदाप्रभुः।
नान्यायः क्रियते तेन प्रातः प्रातः स्वशासनं।
दीप्त्यां संस्थाप्यते तेन नैककृत्वोऽनुपस्थितं।
लज्जितुन्तु न शक्नोत्यन्यायाचारप्रियो जनः॥
६ मया जातय उच्छिन्नास्तासां तल्पा विनाशिताः।
रथ्या विध्वंसितास्तासां कोऽपि तत्र न गच्छति।
पुर्य्यो भग्ना नरैस्त्यक्ता वर्जिताश्च निवासिभिः॥
७ मयोक्तं केवलं मत्तो भीत्वा गृह्णात्वियं विधिं।
तर्हि तद्वसतिस्थानं नैवोच्छिन्नं भविष्यति।
मयास्या वैपरीत्येन नान्यत् किञ्चिन्निरूपितं॥
निश्चितन्तु जनास्तस्या यतमाना अतन्द्रितं।
स्वीयकर्म्मसु सर्व्वेषु नष्टाचारमकुर्व्वत॥
८ अतो मां सम्प्रतीक्षध्वं ब्रवीतीदं सदाप्रभुः।
लुण्टनार्थं ममोत्थानदिनं यावत् प्रतीक्षिणः

इदं मच्छासनं यस्मात् करिष्ये जातिसञ्चयं।
राज्यानि सङ्ग्रहीष्याम्यखिलां क्रोधानलस्य च ।
चण्डतां स्वीयमन्युञ्च तेषां सेक्ष्यामि मूर्धसु।
मदीर्ष्यावह्निना कृत्स्ना क्षौणी ग्रासिष्यते यतः॥
तदानीं शुचिमोष्ठन्तु वर्त्तयिष्यामि जातिषु । ९
सर्व्वा नित्यप्रभो र्नाम्ना ताः करिष्यन्ति चार्थनां।
एकस्कन्धेन तस्यैव सेवनं कर्त्तुमुत्सुकाः॥
कूशदेशीयसिन्धूनां पाराच्चोपासकान् मम। १०
ता आनेष्यन्ति मज्जातिं विकीर्णाञ्चोपहारवत्॥
याभि र्मद्वैपरीत्येन त्वं सञ्जातापराधिनी। ११
क्रियाणां कारणात् तासां त्वं न लज्जिष्यसे तदा॥
उच्छेत्स्यामि यतस्त्वत्तोऽहं दर्पोल्लसितांस्तदा।
न दर्प्स्यथ पुनर्व्वारं यूयं पूतगिरौ मम॥
त्वन्मध्य शेषयिष्याम्यहं जातिं दुःखिनीं कृशां। १२
सा तु नित्यप्रभो र्नाम्नि विश्वासं प्रकरिष्यति॥
इस्रायलः स शेषांशो नैवान्यायं करिष्यति। १३
नानृतं ते वदिष्यन्ति नैव तेषां मुखेषु वा।
आविष्कारिष्यते काचिद् रसना वञ्चनप्रिया॥
चरतस्तान् शयानान् वा कोऽपि न त्रासयिष्यति॥
आनन्दात् क्रियतां गानं भो सियोन्दुहितस्त्वया। १४
भा इस्रायेल् त्वया चापि हर्षनाद उदीर्य्यतां।
भो यिरूशालमः कन्ये हृष्य प्रोल्लस कामतः॥
अपसारितवानेव त्वद्दण्डाज्ञाः सदाप्रभुः। १५
यद्वच्चावस्करं तद्वत् त्वच्छत्रुं सोऽपमृष्टवान्॥
विद्यते तव मध्ये चेस्रायेल्राजः सदाप्रभुः।
अनिष्टञ्च पुनर्व्वारं नैव दर्शिष्यते त्वया॥
यिरूशालम् दिने तस्मिन् मा भैषीरिति वक्ष्यते। १६
शैथिल्यं मा प्रगच्छेद्वा भो सियोन् त्वत्करद्वयं॥
त्वन्मध्ये विद्यते वीर ईश्वरस्ते सदाप्रभुः। १७
साधयिष्यति स त्राणं त्वय्यानन्दं करिष्यते।
स्वप्रेम्णा सोऽधुना मौनी त्वयि हृष्टा तु गास्यति॥

१८ जनान् पर्व्वसु शोकार्त्तान् सङ्ग्रहीष्याम्यहं पुनः।
ते जनास्त्वत्सजातीया धिक्कारेण तु भारिणः॥
१९ पश्य त्वत्पीडकान् सर्व्वान् निग्रहीष्याम्यहं तदा।
तां खञ्जाञ्चोद्धरिष्यामि तां सञ्चेष्यामि विद्रुतां॥
तज्जना येषु देशेषु लज्जापन्नाः पुरावसन्।
तत्राहं तान् करिष्यामि स्तुतिपात्रं यशस्करं॥
२० युष्मान् नेष्यामि तत्काले सञ्चेष्यामि च योगतः।
युष्मद्दास्यदशां यस्मात् साक्षाद्वः परिवर्त्तयन्।
पृथिव्याः सर्व्वजातीनां यशस्वि स्तुतिभाजनं।
युष्मानेव विधास्येऽहमिति ब्रूते सदाप्रभुः॥

हगयस्य भविष्यद्वाक्यानि।

---

१ प्रथमोऽध्यायः।

१ मन्दिरनिर्म्माणे निरुत्साहिजनानां तिरस्करणं ७ मन्दिरनिर्म्माणाय प्रवर्त्तनं १२ ईश्वरीयसाहाय्यस्य प्रतिज्ञा च।

१ दारायाजस्य द्वितीयवत्सरस्य षष्ठमासस्य प्रथमदिने यिहूदाया देशा-
ध्यक्षं शल्टीयेलसुतं सिरुब्बाबिलं प्रति महायाजकं यिहोषादकसुतं
येशूयञ्च प्रति सदाप्रभोरिदं वाक्यं भाववादिना हगयेन प्रादुरभूत्,
२ वाहिनीनां सदाप्रभुरित्थं भाषते, यथा, इमे जना वदन्ति सदाप्रभो
३ र्गेहस्य कालोऽर्थतस्तन्निर्म्माणस्य समयोऽनुपस्थितः। अतो हगयेन भाव-
४ वादिना सदाप्रभोरिदं वाक्यं प्रादुरभूत्, यथा, काष्ठफलकाच्छन्नकुड्य-
विशिष्टेषु स्वगृहेषु युष्माकं निवासनोपयुक्तः कालः किमुपस्थितः? इदं
५ गृहन्तूत्सन्नं तिष्ठति। अतएव वाहिनीनां सदाप्रभुरित्थं भाषते,
युष्माकं या गतिस्तस्यां मनोयोगो विधीयतां॥
६ उप्त्वा बह्वेव युष्माभिः स्वल्पमानीयते गृहं।
खादित्वा नाप्यते तृप्तिः पीत्वा न प्राप्यते सुखं॥
वसनं परिधायापि शीतं नैव निवार्य्यते।
भृतिं स्वीकृत्य सच्छिद्रे पुटके धीयते भृतिः॥

वचनं व्याहरत्येतद् वाहिनीनां सदाप्रभुः। ७
युष्माकं या गतिस्तस्यां मनोयोगो विधीयतां॥
गिरिमारुह्य काष्ठान्यानीय निर्म्मीयतां गृहं। ८
तदानीं मम सन्तोषस्तस्मिन् वर्त्तिष्यते गृहे।
श्रीमांश्चाहं भविष्यामीति ब्रवीति सदाप्रभुः॥
बहु यूयमपैक्षध्वं तत्तु स्वल्पमजायत। ९
युष्माभि र्गृहमानीतं तद् विध्मातं मया पुनः॥
कारणं किमिति ब्रूते वाहिनीनां सदाप्रभुः।
कारणं मम धामेदम् उत्सन्नं तद् वितिष्ठते।
किन्तु युष्माकमेकैकस्त्वरितः स्वगृहं प्रति॥
युष्माकमूर्द्ध आकाशस्तस्माद् वाष्पं न्यरोधयत्। १०
आत्मोत्पाद्यानि शस्यानि भूतलञ्च न्यरोधयत्॥
अनावृष्टि र्मयाहूता भूतले पर्व्वतेषु च। ११
गोधूमे नवमद्ये च तैले सर्व्वफले भुवः।
मर्त्त्येषु पशुवृन्दे च सर्व्वहस्तक्रियासु च॥

तदा शल्टीयेलस्य पुत्त्रः सिरुब्बाबिलो यिहोषादकसुतो येशूयो १२
महायाजकश्च प्रजानां कृत्स्नोऽवशिष्टांशश्च स्वेश्वरस्य रवेऽवधाय हग-
यस्य भाववादिनो वाक्यानामनुवर्त्तिनो बभूवुः, यतस्तेषाम् ईश्वरः
सदाप्रभुस्तं प्रेरितवान् प्रजाश्च सदाप्रभुतोऽबिभयुः। ततः सदाप्रभो १३
र्दूतो हगयः सदाप्रभो र्दौत्यमनुष्ठाय जनान् जगाद, अहमेव युष्माभिः
सार्द्धमस्मीति सदाप्रभो र्वचनं। अपरं सदाप्रभु र्यिहूदाया देशाध्यक्षस्य १४
शल्टीयेलसुतस्य सिरुब्बाबिलस्यात्मानं यिहोषादकसुतस्य येशूयस्य महा-
याजकस्यात्मानञ्च प्रजानां कृत्स्नस्यावशिष्टांशस्यात्मानञ्चोत्तेजयामास, १५
ततस्ते दारायाजस्य द्वितीयवत्सरस्य षष्ठमासस्य चतुर्व्विंशे दिवस आ-
गत्य स्वेश्वरस्य वाहिनीगणाधिपस्य सदाप्रभो र्गृहे कर्म्म कर्त्तुमारेभिरे।

---

२ द्वितीयोऽध्यायः।

१ प्रथममन्दिराद् द्वितीयमन्दिरस्योत्कर्षस्य कृते तन्निर्म्माणे प्रजानां प्रवर्त्तनं १० पाप-
कारणात् तेषां कर्म्मण्यप्रवृत्तिः २० सिरुब्बाबिलं प्रतीश्वरस्य प्रतिज्ञा च।

अपरं सप्तममासस्यैकविंशे दिने हगयेन भाववादिना सदाप्रभोरिदं १
वाक्यं प्रादुरभूत्, यथा, त्वं यिहूदाया देशाध्यक्षं शल्टीयेलसुतं सिरुब्बा- २

बिलं यिहोषादकसुतं येशूयं महायाजकं प्रजानामवशिष्टांश्चैतद् वक्तु-
२ मर्हसि, यथा, यः प्रथमप्रतापयुक्तमेतद् गृहं दृष्टवांस्तादृशः को युष्माकं
४ मध्येऽवशिष्टोऽस्ति? इदानीन्तु यूयं कीदृशं तत् पश्यथ? युष्माकं दृष्ट्यां
तत् किं नावस्तुवद् भाति? तथापि, भो सिरुब्बाबिल, त्वमिदानीं
बलवान् भवेति सदाप्रभुराह; त्वञ्च भो यिहोषादकसुत येशूय महा-
याजक, बलवान् भव; यूयञ्च, भो देशस्थाः सर्व्वजनाः, बलवन्तो भवतेति
सदाप्रभुराह, कर्म्म कुरुत च, यतो युष्माभिः सार्द्धमहमस्मीति वाहि-
५ नीनां सदाप्रभुराह। मिसराद् युष्माकं निर्गमनकाले मयैतदेव वाक्यं
युष्मभ्यं प्रतिश्रुतं, ममात्मा च युष्मन्मध्येऽवतिष्ठते; यूयं माभैष्ट।

६ यतो हेतोरिदं ब्रूते वाहिनीनां सदाप्रभुः।
एककृत्व इतः पश्चात् स्वल्पकालेऽतिवाहिते।
कम्पयिष्याम्यहं व्योम धरामब्धिं स्थलं पुनः॥
७ सकला एव जातीश्च कम्पयिष्याम्यहं तदा।
अभीष्टः सर्व्वजातीनां कौस्तुभश्चागमिष्यति।
प्रतापेन मयेदञ्च गृहं सम्पूरयिष्यते।
वचनं व्याहरत्येतद् वाहिनीनां सदाप्रभुः॥
८ सर्व्वरूप्यं ममैवास्ति सर्व्वस्वर्णं ममैव च।
वचनं व्याहरत्येतद् वाहिनीनां सदाप्रभुः॥
९ अस्य गेहस्य पूर्व्वस्मात् प्रतापाच्च महत्तरः।
एतस्यान्तिमकालीनः प्रतापः सम्भविष्यति।
वचनं व्याहरत्येतद् वाहिनीनां सदाप्रभु॥
एतस्मिन्नेव च स्थाने शान्तिं दास्यिष्यते मया।
वचनं व्याहरत्येतद् वाहिनीनां सदाप्रभुः॥

१० अपरं दारायावस्य द्वितीयवत्सरस्य नवममासस्य चतुर्व्विंशे दिने
११ हगयेन भाववादिना सदाप्रभोरिदं वाक्यं प्रादुरभूत्, यथा, वाहिनीनां
१२ सदाप्रभुरित्यमाह, त्वं याजकानिमां शास्त्रीयशिक्षां पृच्छ, पश्य, यो जनः
स्ववस्त्राञ्चले पवित्रमांसं वहति स यदि तेनाञ्चलेन पूपं सिद्धान्नं द्राक्षा-
रसं तैलमपरं किञ्चन भक्ष्यद्रव्यं वा स्पृशेत् तर्हि तत् किं पवित्रं भवति?
१३ अत्र याजकाः प्रत्यवदन् तन्नैव पवित्रं भवति। हगयः पुनः पप्रच्छ,
शवकारणादशुचिः कोऽपि जनो यदि तेषां सर्व्वेषां मध्ये किमपि द्रव्यं
स्पृशेत्, तर्हि तत् किमशुचि भवति? अत्र याजकाः प्रतिजगदुः,

अशुचि भवति। तदानीं हगय उत्तरं कृत्वा जगाद, मत्सम्मुखमियं १४
जातिस्तादृशी वंशोऽयञ्च तादृश इति सदाप्रभुराह, तेषां हस्तकृतं
सर्व्वकर्म्मापि तत्र तैरुत्सृष्टं सर्व्वनैवेद्यञ्च तादृशं, तत् सर्व्वमशुचि।
अतोऽधुना यूयमद्यारभ्येतः पूर्व्वकालमध्यर्थतः सदाप्रभोः प्रासादे प्रस्तराणां १५
मिथः संयोगो यदा नाकारि तं कालमधि मनोनिवेशं कुरुध्वं। तस्मिन् १६
कृत्स्ने काले यदा कोऽपि विंशतिपरिमाणानामाशातः शस्यराशेः समीप-
मागच्छत् तदा केवलं दशपरिमाणान्यविद्यन्त, यदा च पञ्चाशत्खण्डान्
पूरयितुं द्राक्षारसाधारस्य समीपमागच्छत् तदा केवलं विंशतिभाण्डा
अविद्यन्त। अहं शस्यानां शुष्कत्वेन म्लानत्वेन च करकासारेण च युष्मा- १७
नाहनं, युष्माकं हस्तकृतं सर्व्वकर्म्माण्याहनं, तथापि यूयं मां नान्ववर्त्तध्व-
मिति सदाप्रभुराह। यूयमद्यारभ्येतः पूर्व्वमतीतकालमधि मनोयोगं १८
कुरुध्वं, नवममासस्य चतुर्व्विंशदिनमारभ्य यूयं सदाप्रभोः प्रासादमूल-
स्थापनदिनस्योत्तरकालमधि मनोयोगं कुरुध्वं। कुसूले शस्यं किमशि- १९
ष्यत? द्राक्षोडुम्बरजितवृक्षाणां मध्ये नैकोऽपि फलमुदपादयत्। पर-
न्त्वद्यारभ्याहमाशीर्व्वादं करिष्यामि।

अपरं मासस्य तस्मिंश्चतुर्व्विंशे दिने सदाप्रभो र्वाक्यं हगयं प्रति २०
द्वितीयवारं प्रादुरभूत्, यथा, त्वं यिहूदाया देशाध्यक्षं सिरुब्बाबिलमिमां २१
कथां वद,

गगनं पृथिवीञ्चाप्यहं कम्पयितुमुद्यतः॥
तदा न्युब्जीकरिष्यामि राज्यसिंहासनान्यहं। २२
परजातीयराज्यानामुच्छेत्स्यामि पराक्रमं॥
रथान् न्युब्जीकरिष्यामि तदारूढांश्च मानवान्।
भूतले निपतिष्यन्ति हयाश्चारोहिभिः सह।
मिथो व्यापादितैरेव सङ्कुले खड्गचालने॥
वाक्यन्तु व्याहरत्येतद् वाहिनीनां सदाप्रभुः। २३
भो मद्दास सिरुब्बाबिल् शल्टीयेलस्य नन्दन।
त्वां तदाहं ग्रहीष्यामीति ब्रवीति सदाप्रभुः॥
मुद्रावच्च विधास्ये त्वां यतस्त्वं वरितो मया।
वचनं व्याहरत्येतद् वाहिनीनां सदाप्रभुः॥

सखरियस्य भविष्यद्वाक्यानि।

१ प्रथमोऽध्यायः।

१ पापकारणादनुशोचनाय भाववादिनो विनयवाक्यं ७ हयानां दर्शनं १४ यिरूशालमनिवासिनः प्रतीश्वरस्य सान्त्वनादायिनी प्रतिज्ञा १८ शृङ्गचतुष्टयस्य कर्म्मकारचतुष्टयस्य च दर्शनं।

१ दारारजस्य द्वितीयवत्सरस्याष्टममासे इद्दोः पौत्त्रं बेरिखियस्य पुत्त्रं
२ सखरियं प्रति सदाप्रभोरिदं वाक्यं प्रादुरभूत्, यथा, सदाप्रभु र्युष्माकं
३ पूर्व्वपुरुषेभ्योऽतीव चुक्रोध। अतस्त्वं जनान् वद, वाहिनीनां सदाप्रभु
र्ब्रवीति, मां प्रति परिवर्त्तध्वमिति वाहिनीनां सदाप्रभोराज्ञा, तथा
कृतेऽहं युष्मान् प्रति परिवर्त्तिष्य इति वाहिनीनां सदाप्रभुराह।
४ स्वपूर्व्वपुरुषाणां सदृशा मा भवत, यतो यूयं स्वकुमार्गेभ्यः स्वदुष्क्रियाभ्यश्च
परावर्त्तितुमर्हथेति वाहिनीनां सदाप्रभुराहेति भाषमाणाः पूर्व्वकाली-
नभाववादिनो यदा तानाह्वयंस्तदा ते श्रवणं मय्यवधानं वा नाकुर्व्व-
५ न्निति सदाप्रभुराह। युष्माकं पूर्व्वपुरुषाः कुत्र विद्यन्ते? भाववादिनो
६ वा किमनन्तजीविनः? परन्त्वहं मम दासांस्तान् भाववादिनो यान्या-
ज्ञापितवान् मम तानि वाक्यानि विधानानि च किं युष्माकं पूर्व्वपुरुषान्
नाक्रमिषुः? तदा ते प्रत्यावृत्यावादिषुः, अस्मदाचारानुरूपम् अस्मत्-
क्रियानुरूपञ्च यं व्यवहारमस्मान् प्रति कर्त्तुं वाहिनीनां सदाप्रभुः
स्थिरीकृतवांस्तादृशमेव व्यवहारमस्मान् प्रति स कृतवान्।
७ दारारजस्य द्वितीयवत्सरस्य शबाटाख्यस्यैकादशमासस्य चतुर्व्विंशे
दिने इद्दोः पौत्त्रं बेरिखियस्य पुत्त्रं सखरियं भाववादिनं प्रति सदाप्रभो
८ र्वाक्यं प्रादुरभूत्, तद्वृत्तान्तोऽयं। यामिन्यां मया दर्शनमलम्भि, पश्य
लोहिताश्वारूढ एकः पुरुषश्छायावृते स्थाने हदसगुल्मानां मध्येऽति-
९ ष्ठत्, तत्पश्चाच्च लोहिताः पाण्डराः श्वेताश्चाश्वा अविद्यन्त। तदा
मयोक्तं भो मत्प्रभो, इमे किमर्थाः? ततो मया सह संलपन् दूतो
१० मां जगाद, इमे किमर्थास्तदहं त्वां दर्शयिष्यामि। अपरं हदस-
गुल्मानां मध्ये तिष्ठन् स पुरुष उत्तरं कृत्वा जगाद, इमे पृथिव्यां पर्य्यट-
११ नार्थं सदाप्रभुना प्रेरिताः। पुनश्च त उत्तरं कृत्वा हदसगुल्मानां मध्य

तिष्ठन्तं सदाप्रभो दूतं जगदुः, वयं पृथिव्यां पर्य्यटनं कृतवन्तः, पश्य
कृत्वा पृथिवी सुस्थिरा निष्कण्टका चास्ते। तदानीं सदाप्रभो दूतः १२
प्रत्युत्तरं कृत्वा जगाद, भो वाहिनीनां सदाप्रभो, कति कालं त्वं यिरू-
शालमं यिहूदाया नगराणि च नानुकम्प्यावतिष्ठसे? सप्ततिवर्षान् यावत्
त्वया क्रोधः कृतः। तदा सदाप्रभुरुत्तरं कृत्वा मया सह संलपन्तं दूतं १३
शुभवाक्यानि सान्त्वनवाक्यानि च जगाद।

मया सह संलपन् स दूतश्च मां जगाद, त्वं घोषणां कुर्व्वन् वद, १४
वाहिनीनां सदाप्रभुरित्थं भाषते, यिरूशालमं सियोनञ्चाध्यहं महत्या
स्पर्द्धया स्पर्द्धे। परन्तु निष्कण्टकाभ्यः परजातिभ्योऽहं महता क्रोधेन १५
क्रुध्यामि, यतो मया यत्किञ्चित् क्रुध्यवति ता अमङ्गलार्थं साहाय्यम-
कार्षुः। अतो हेतोः सदाप्रभुरित्थं भाषते, अहं पुनर्व्वारं स्नेहेन यिरू- १६
शालमस्याभिमुखोऽभवं, तन्मध्ये मम गृहं निर्म्मायिष्यत इति वाहिनीनां
सदाप्रभुराह, यिरूशालमस्योपरि मानरज्जु र्वितानिष्यते च। पुनश्च १७
घोषणां कुर्व्वन् वद, वाहिनीनां सदाप्रभुरित्यमाह, मम नगराणि पुनः
क्षेमपरिप्लुतानि भविष्यन्ति सदाप्रभुश्च सियोनं पुनर्व्वारं सान्त्वयिष्यति
यिरूशालमञ्च पुनर्व्वारं वरयिष्यते।

अपरमहं दृष्टिं तोलयित्वा निरीक्षमाणश्चत्वारि शृङ्गाण्यदर्शं। तदा १८
मया सह संलपन्तं दूतमप्राच्छं, इमानि किमर्थानि? तदा स मां १९
जगाद, यानि शृङ्गाणि यिहूदामिस्रायेलं यिरूशालमञ्च विचकरुरि-
मानि तान्येव। अनन्तरं सदाप्रभु र्मां चतुरो लोहकारान् दर्शयामास। २०
तदाहमवादिषं, इमे किं कर्त्तुमागताः? स च मां जगाद, शृङ्गैर- २१
मीभि र्यिहूदा विकीर्णा, विकीर्णत्वाच्च कोऽपि शिरो न तोलयति, अत
इमे तानि त्रासयितुमागताः, यिहूदां विकरीतुं या जातयस्तस्या
देशस्य विरुद्धं शृङ्गाण्यतोलयन्, तासां शृङ्गाण्येतै र्निपातयितव्यानि।

---

२ द्वितीयोऽध्यायः।

१ यिरूशालमस्य परिमाणकथनं ६ सियोनस्योद्धारकथनं १० तस्य भाविगौरव-कथनञ्च।

अपरमहं दृष्टिं तोलयित्वा निरीक्षमाणो मानरज्जुहस्तं पुरुषमेकम- १
दर्शं। तदाहमवादिषं, त्वं कुत्र गच्छसि? स च मां जगाद, यिरूशा- २
लमं मातुं, तस्या विशालत्वं कियत् दैर्घ्यञ्च कियत् तन्निरूपयितुञ्चाहं

३ गच्छामि। अपरं पश्य मया सह यो दूतः समलपत् स निरगमत्,
४ तस्य प्रत्युद्गमनार्थञ्चापर एको दूतो निरक्रमीत्। स तं जगाद, त्वं तूर्णं
गत्वामुं युवानं वद, यिरूशालमो मध्यवर्त्तिनां नराणां पशूनाञ्च बाहु-
५ ल्यकारणात् सा जनपदोपमा निवत्स्यति, सदाप्रभुश्च भाषते, अहमेव
तस्याः परितो वह्निमयं प्राचीरं तस्या मध्ये च प्रतापस्वरूपो भूत्वाव-
स्थास्ये।
६ त्वरध्वं त्वरध्वमुत्तरदेशात् पलायध्वञ्चेति सदाप्रभुराह, यत आका-
७ शीयवायुचतुष्टयमिव यूयं मया विस्तारयितव्या इति सदाप्रभुराह। भो
८ बाबिलकन्यायाः सहवासिनि सियोन्, आत्मरक्षां कुरुष्व। यतो वाहि-
नीनां सदाप्रभु र्मामिदं वक्तुमादिष्टवान् प्रतापान्वेषणायाहं युष्मल्लुण्टन-
कारिजातीः प्रति तेन प्रहितः, यतो युष्मान् यः स्पृशति स तस्यैव नयन-
९ तारकां स्पृशति। यतः पश्याहं तेषामुपरि स्वहस्तं चालयिष्यामि,
ततस्ते स्वदासानां (युष्माकं) लोप्त्रं भविष्यन्ति, वाहिनीनां सदाप्रभुनाहं
प्रेरित इति यूयं ज्ञास्यथ च।

१० सानन्दं क्रियतां गानं भो सियोन्दुहितस्त्वया।
यतः पश्याहमागत्य निवत्स्यामि तवान्तरे।
वचनं व्याहरत्येतत् स्वयमेव सदाप्रभुः॥
११ बहुजातय आसक्ता भविष्यन्ति सदाप्रभौ।
दिने तस्मिन् भविष्यन्ति ताश्च सर्व्वा मम प्रजाः।
तव मध्ये निवासस्तु तदा कारिष्यते मया॥
त्वां प्रति प्रेरितश्चाहं वाहिनीनां सदाप्रभोः।
इति ज्ञानं तदानीञ्च निश्चितं प्राप्स्यते त्वया॥
१२ स्वरिक्थांशं यिहूदाञ्च पूतभूमौ सदाप्रभुः।
लप्स्यते यिरूशालम् च पुनस्तेन वरीष्यते॥
१३ सर्व्वप्राणी भवेन्मौनी साक्षात् तस्य सदाप्रभोः।
स्वीयपूतनिवासात् स यत आगन्तुमुत्थितः॥

---

३ तृतीयोऽध्यायः।

१ येशूयस्य दृष्टान्तेन सियोनमधि मङ्गलकथनं ८ पल्लवस्वरूपं ख्रीष्टमधि भविष्य-
द्वाक्यञ्च।

१ अपरं स मह्यं येशूयं महायाजकं दर्शयामास, स सदाप्रभो र्दूतस्य

सम्मुखमतिष्ठत्, तस्य दक्षिणपार्श्वे च शयतानस्तस्य प्रतिपक्षतां कर्त्तुम-
तिष्ठत्। अपरं सदाप्रभुः शयतानं जगाद, भो शयतान, सदाप्रभुस्त्वां २
भर्त्सयतु, यिरूशालमं यो वरयामास स सदाप्रभुस्त्वां भर्त्सयतु, असौ
किमग्नित उद्धृतं दग्धाग्रं काष्ठं नहि? येशूयस्तु मलिनवस्त्रै र्वेष्टितः सन् ३
दूतस्य सम्मुखमतिष्ठत्। अतः स आज्ञां विधाय स्वसमक्षं तिष्ठतो ४
जनान् जगाद, अमुष्य गात्रात् तानि मलिनानि वासांस्यपसारयत। तञ्च
जगाद, पश्याहं तवापराधं त्वत्तो दूरीकृतवान्, त्वाञ्चोत्सववस्त्राणि
परिधापितवान्। तदाहमवादिषं, तस्य मस्तके शुचिरुष्णीषस्तै र्दीयतां। ५
ततस्तैस्तस्य शिरसि शुचिरुष्णीषोऽदायि। इत्थं ते तं वासांसि पर्य्यधाप-
यन् सदाप्रभो र्दूतश्चातिष्ठत्। ततः परं सदाप्रभो र्दूतो येशूयं साक्ष्य- ६
स्वरूपमिदं वाक्यं जगाद, यथा, वाहिनीनां सदाप्रभुरित्थं भाषते, त्वं ७
यदि मम मार्गैश्चरसि मम रक्षणीयं रक्षसि च, तर्हि त्वमेव मम
गृहस्य विचारकर्त्ता मम प्राङ्गणानां रक्षी च भविष्यसि, अहञ्च तुभ्यमत्र
तिष्ठतां जनानां मध्येन गमागमयोरधिकारं दास्यामि।

भो येशूय महायाजक, श्रूयतां, त्वया श्रूयतां त्वत्सम्मुखमुपविष्टैस्तव ८
सखिभिश्च, यतस्तेऽप्यद्भुतलक्षणस्वरूपा नराः, वस्तुतः पश्याहं स्वदासं
पल्लवमानेष्यामि। यतः पश्य, येशूयस्य सम्मुखं यः प्रस्तरो मया स्थापित- ९
स्तस्मिन्नेकस्मिन् प्रस्तरे सप्त चक्षूंषि वर्त्तिष्यन्ते। पश्याहं तस्य मुद्रारूप-
संस्कारं तक्षिष्यामीति वाहिनीनां सदाप्रभुराह, एकस्मिन् दिन एतद्दे-
शस्यापराधं द्रवयिष्यामि च। वाहिनीनां सदाप्रभुराह, तस्मिन् दिने १०
युष्माकमेकोऽन्यं द्राक्षालतायास्तल उडुम्बरवृक्षस्य तले वा निमन्त्र-
यिष्यति।

---

४ चतुर्थोऽध्यायः।

१ स्वर्णमयदीपवृक्षस्य दृष्टान्तेन सिरुब्बाविलस्य कर्म्मसिद्धिकथनं ११ द्वयो र्जितवृक्षयो-स्तात्पर्य्यकथनञ्च।

अनन्तरं मया सह संलपन् स दूतो निद्रातः प्रबोध्यमानं नरमिव १
मां प्रबोध्य जगाद, त्वया किं दृश्यते? तदाहं प्रत्यवादिषं, मया निरी- २
क्षमाणेन दीपवृक्ष एको दृश्यते, तत्साकल्यं स्वर्णमयं तस्य शिरस
ऊर्द्धे तैलाधार आस्ते, तस्य सप्त प्रदीपास्तस्योपरि विद्यन्ते, तदीय-
शिरसि स्थितानां तेषां प्रदीपानां कृते सप्त नाला विद्यन्ते च। तत्सान्निध्ये ३

च द्वौ जितवृक्षौ विद्येते, तयोरेकस्तैलाधारस्य दक्षिणपार्श्वेऽपरश्च
४ वामपार्श्वे स्थितः। पुनश्चाहं मया सह संलपन्तं तं दूतमप्राक्षं, भो मत्प्रभो,
५ इमानि किमर्थानि? ततो मया सहसंलपन् स दूत उत्तरं कृत्वा मामवा-
दीत्, इमानि किमर्थानि तत् किं त्वया न ज्ञायते? मयोक्तं, मत्प्रभो, तन्न
६ ज्ञायते। तदा स उत्तरं कृत्वा मां जगाद, इदं सिरुब्बाबिलं प्रति सदा-
प्रभो र्वचनं, यथा, न पराक्रमेण न बलेन वा, किन्तु ममात्मना सेत्स्य-
७ तीति वाहिनीनां सदाप्रभुराह। भो महापर्व्वत, सिरुब्बाबिलस्य
समक्षं त्वं कः? त्वं समभूमि र्भविष्यसि, अत्र प्रीतिः प्रीतिरेव भूयादिति
८ महानादे श्रूयमाणे च स शिरःस्वरूपं प्रस्तरं वहिरानेष्यति। अपरं
९ सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, यथा, सिरुब्बाबिलस्य
हस्तावस्य गृहस्य मूलं स्थापितवन्तौ, तस्य हस्तौ च तत् समापयिष्यतः,
वाहिनीनां सदाप्रभु र्मां युष्मान् प्रति प्रहितवानिति त्वया ज्ञायिष्यते
१० च। वस्तुतः क्षुद्रविषयाणां दिनं कोऽवमन्येत? अमी सप्त त्वर्थतः
सदाप्रभोश्चक्षूंषि सानन्दं सिरुब्बाबिलस्य हस्ते प्रलम्बसीसं पश्यन्ति;
तानि कृत्स्नां पृथिवीं पर्य्यटन्ति।
११ अपरमहं भाषमाणस्तमप्राक्षं; दीपवृक्षस्य दक्षिणे वामे च स्थितावमू
१२ जितवृक्षौ किमर्थौ? पुनर्व्वारमहं भाषमाणस्तमप्राक्षं, स्वर्णप्रणाली-
द्वयान्तिकावमू यौ फलभारिणौ जितवृक्षपल्लवौ स्वतः स्वर्णोपमं तैलं
१३ निःस्रावयतस्तौ किमर्थौ? तदा स मां जगाद, अमू किमर्थौ तत् किं न
१४ जानासि? मयोक्तं, भो मत्प्रभो, न जानामि। तदा स जगाद, अमू
कृत्स्नभूमण्डलस्य प्रभोः सम्मुखं तिष्ठन्तौ तैलसुतौ।

---

५ पञ्चमोऽध्यायः।

१ उड्डीयमानपत्रस्य दृष्टान्तेन तस्करमिथ्याशपथकारिणाम् अभिशापः ५ ऐफापात्रमध्य उपविष्टनार्य्या दृष्टान्तेनेस्रायेलस्य दण्डकथनञ्च।

१ पुनर्व्वारं मया दृष्टिं तोलयित्वा निरीक्षमाणेनोड्डीयमानं नालवत्
२ सङ्कोचितं पत्रमदर्शि। तदा स मां जगाद, त्वया किं दृश्यते? मयोक्तं
उड्डीयमानं पत्रमेकं दृश्यते, तस्य दैर्घ्यं विंशतिहस्तमानं प्रस्थता च
३ दशहस्तमाना। तदा स मां जगाद, असौ कृत्स्नभूमण्डलव्याप्यभिशापः,
फलतो यः कश्चिच्चौर्य्यं करोति स एकपृष्ठस्थविधानाद् विमर्द्दिष्यते,

यस्यालीकं शपते सोऽपरपृष्ठस्थविधानाद् विमर्द्दिष्यते। सोऽभिशापो ४
मया वहिरानीत इति वाहिनीनां सदाप्रभुराह, स च तस्करस्य गृहं
मम नाम्ना मिथ्या शपमानस्य नरस्य गृहञ्च प्रवेक्ष्यति तत्रावस्थाय तद्
गृहं तस्य काष्ठानि प्रस्तरांश्च निःशेषं संहरिष्यति च।
अपरं मया सह संलपन् स दूतो वहिरागत्य मां जगाद, त्वं दृष्टिं ५
तोलयित्वा निरीक्षस्व, स्थानेऽमुष्मिन् किं निर्गच्छति? तदाहमवदं, अदः ६
किं? ततः स प्रत्यवादीत्, अदो निर्गमने प्रवृत्तम् ऐफापात्रं। स पुन
र्जगाद, अदः कृत्स्नभूमण्डले तेषां रूपं। तदानीं पश्य, मणपरिमाणः सीस- ७
पिण्ड उत्थापितः, तदधस्तस्य पात्रस्य मध्य उपविष्टा योषिदेका प्रत्य-
भात्। तदा स जगाद, असौ दुष्टता। ततः परं स तां पुनर्व्वारमैफा- ८
पात्रस्य मध्ये निक्षिप्य तस्य मुखे तं सीसकपिण्डं निदधौ। पुनश्च मया ९
दृष्टिं तोलयित्वा निरीक्षमाणेन प्रगच्छन्त्यौ द्वे स्त्रियौ दृष्टे, तयोः पक्षेषु
वायुरविद्यत, लक्ष्मणायाः पक्षयुगलमिव तयोरेकैकस्याः पक्षयुगलमा-
सीत्। ते च तद् ऐफापात्रमुत्थाप्य व्योम्नः पृथिव्याश्च मध्यपथेनावहतां।
तदाहं मया सह संलपन्तं तं दूतमवदं, अमू तद् ऐफापात्रं कुत्र १०
नयतः? स च मां जगाद, शिनियरदेशेऽमुष्याः कृते गृहं निर्म्मातव्यं, ११
तत्र सा निधायिष्यते तच्च स्वोपस्तम्भे स्थापयिष्यते।

---

६ षष्ठोऽध्यायः।

१ चतुर्णां रथानां दर्शनं ९ मुकुटस्य दृष्टान्तेन पल्लवस्वरूपस्य ख्रीष्टस्य राजत्व-याजकत्वयोः कथनञ्च।

अपरं मया पुनर्व्वारं दृष्टिं तोलयित्वा निरीक्षमाणेन चत्वारो रथा १
दृष्टिरे, ते द्वयोः पर्व्वतयोरन्तरालान्निरगच्छन्, तौ पर्व्वतौ च पित्तल-
मयौ। प्रथमे रथे शोणितवर्णा अश्वाः, द्वितीये रथे कृष्णवर्णा अश्वाः, २
तृतीये रथे श्वेतवर्णा अश्वाः, चतुर्थे रथे विन्दुविचित्रा बलवन्तश्चाश्वा ३
योजिता आसन्। तदाहं भाषमाणो मया सह संलपन्तं तं दूतमप्राक्षं, ४
भो मत्प्रभो, इमे किमर्थाः? स दूतश्चोत्तरं कृत्वा मां जगाद, इम ५
आकाशमण्डलस्य चत्वारो वायवः, कृत्स्नपृथिव्याः प्रभोः परिचरणात्
प्रगच्छन्ति। कृष्णवर्णा अश्वा यत्र युक्तास्तद्रथारूढा उत्तरदेशं प्रगन्तु- ६
मुद्यताः, श्वेतवर्णा अश्वाश्च तेषां पश्चात् प्रगच्छन्ति, विन्दुविचित्राश्च
दक्षिणदेशं प्रगच्छन्ति। अपरं बलवन्तोऽश्वाः प्रगत्य पृथिव्यां पर्य्यटन- ७

स्यानुमतिमयाचन्त, तदा स जगाद, यात, पृथिवीं पर्य्यटत, ततस्ते
८ पृथिवीं पर्य्यटन्। अनन्तरं स उच्चशब्दं कृत्वा मामालपन् जगाद,
उत्तरदेशं ये प्रगच्छन्ति तैरुत्तरदेशे ममात्मा निधायिष्यते।
९ अपरं सदाप्रभोरिदं वाक्यं मां प्रति प्रादुरभूत्, यथा, त्वं निर्व्वासित-
१० जनानामर्थतो हिल्दयस्य टोबियस्य यिदायस्य च हस्तेभ्यः [स्वर्णं रूप्यञ्च]
गृहाण, बाबिलादागतास्ते नरा यत्र [विद्यन्ते] त्वमद्यैव तत्र सफनिय-
११ सुतस्य योशियस्य गृहं प्रविश्य स्वर्णं रूप्यञ्च गृहीत्वा द्विधातुमयं मुकुटं
निर्म्मिमीष्व, यिहोषादकसुतस्य येशूयस्य महायाजकस्य शिरसि तन्नि-
१२ धेहि च। तञ्च वद, यथा, वाहिनीनां सदाप्रभुरित्थं ब्रूते, यथा, पश्य
पल्लवनामा पुरुषः स्वस्थलात् प्ररोक्ष्यति सदाप्रभोः प्रासादं निर्म्मास्यते
१३ च। स एव सदाप्रभोः प्रासादं निर्म्मास्यते, स एव श्रियं धारयिष्यते च,
स्वसिंहासन आसीनो राजत्वं करिष्यते च, स्वसिंहासने याजको भवि-
१४ ष्यति च, तयो र्मध्ये शान्ते र्मन्त्रणा स्थास्यते च। हिल्दयस्य टोबियस्य
यिदायस्य च कृते सफनियसुतस्यानुग्राहकतायाः कृते च तद् द्विविधं
१५ मुकुटं स्मरणोपायवत् सदाप्रभोः प्रासादे स्थास्यत। अधिकन्तु दूर-
वर्त्तिनो नरा आगत्य सदाप्रभोः प्रासादनिर्म्माणे साहाय्यं करिष्यन्ति,
अतो वाहिनीनां सदाप्रभु र्मां युष्मान् प्रति प्रहितवानिति यूयं
ज्ञास्यथ। यदि स्वेश्वरस्य सदाप्रभो र्वाक्येऽवधानं कुरुथ तर्हि तत्
सम्भविष्यति।

---

७ सप्तमोऽध्यायः।

१ उपवासविषयकः प्रश्नस्तदुत्तरञ्च ८ पापकारणाद् वन्दित्वस्य कथनञ्च।

१ दारारजस्य चतुर्थवत्सरस्य किस्लेवाख्यस्य नवममासस्य चतुर्थे दिने
२ सदाप्रभो र्वाक्यं सखरियं प्रति प्रादुरभूत्। फलतो बैतलेहमस्थजनाः
शरेत्सरं रेगम्मेलकं तस्य नरांश्च सदाप्रभो र्वदनं प्रसादयितुं प्रहि
३ तैरेव वाहिनीनां सदाप्रभो र्गृहे नियुक्तान् याजकान् भाववादिन-
श्चाप्राक्षु र्यथा, एतावद्वत्सरानहं यथा करोमि तथा किमितः
४ परमपि पृथग्भूय रोदिष्यामि? अनन्तरं वाहिनीनां सदाप्रभोरिदं
५ वाक्यं मां प्रति प्रादुरभूत्, यथा, त्वं सर्व्वान् देशीयनरान् याजकांश्च
वद, सप्ततिवत्सरान् यावत् पञ्चमे सप्तमे च मासे यदा यूयमुपवासं

विलापञ्चाकुरुत तदा किं मम कृते उपवासमकुरुत ? यदा च भोजनं ६
पानं वा कुरुथ तदा किं न यूयमेवाश्नीथ यूयमेव पिवथ च ? यदा ७
यिरूशालम् निवासिपूर्णा शान्तियुक्ता स्वोपनगरै र्वेष्टिता चासीत्,
दक्षिणप्रदेशः समभूमिप्रदेशश्च निवासिपूर्णावास्ताञ्च, तदा सदाप्रभुः
पूर्व्वकालीनै र्भाववादिभि र्यानि घोषितवांस्तानि वाक्यानि किं न
स्मरथ ?

अनन्तरं सदाप्रभोरिदं वाक्यं सखरियं प्रति प्रादुरभूत्, वाहिनीनां ८
सदाप्रभुरित्थं भाषितवान्, यथा, यूयं न्यायविचारं कुरुत, मिथो ९
दयाकरुणे अनुतिष्ठत च, विधवामनाथबालकं प्रवासिनं दुःखिजनञ्च १०
मा पीडयत, स्वहृदयेषु च परस्परं हिंसायाः सङ्कल्पं मा कुरुत ।
परन्तु तेऽवधातुमसम्मताः स्वस्कन्धान् अपासारयन् श्रवणमस्वीकृत्य ११
स्वकर्णानि भारीण्यकुर्व्वत च, स्वहृदयानि च हीरोपमान्यकुर्व्वत, १२
यस्माद् वाहिनीनां सदाप्रभु र्निजात्मना पूर्व्वकालीनभाववादिगणद्वारा
यां व्यवस्थां यानि वाक्यानि च प्राहिणोत् तच्छ्रवणे ते न सम्मता आसन्,
तत्कारणाद् वाहिनीनां सदाप्रभुतो महाकोपस्तेष्ववर्त्तत । ततो वाहि- १३
नीनां सदाप्रभु र्जगाद, यद्वन्मयाह्वाने क्रियमाणे तै र्नाश्रावि, तथा
तैराह्वाने क्रियमाणे मया न श्राविष्यते । ते या जाती र्न जानन्ति १४
तासां मध्येऽहं झञ्झयेव तान् विक्षेप्स्यामि, तेषु प्रस्थितेषु च देशः
पान्थहीनं निवासिवर्ज्जितञ्च ध्वंसस्थानं भविष्यति, इत्थं तैरयं रम्यो
देश उत्सन्नीकृतः ।

८ अष्टमोऽध्यायः ।

१ यिरूशालमस्य पुनर्निर्म्माणं ९ ईश्वरस्य मन्दिरनिर्म्माणेन जनानां मङ्गललाभकथनं १६ कर्त्तव्याचारकथनं १८ मङ्गलप्रतिज्ञा च ।

पुनर्व्वारं वाहिनीनां सदाप्रभो र्वाक्यं प्रादुरभूत्, यथा, वाहिनीनां १
सदाप्रभु र्ब्रूते, सियोनः कृतेऽहं महत्या स्पर्द्धया स्पर्द्धे, तस्याः कृते २
महत्या चण्डतयैव स्पर्द्धे । सदाप्रभुरित्थं ब्रूते, अहं पुनर्व्वारं सियोनं
प्रति वर्त्तिष्ये यिरूशालमो मध्ये निवत्स्यामि च । यिरूशालम् सत्य- ३
पुरीति नाम्ना, वाहिनीनां सदाप्रभोः पर्व्वतश्च पवित्रः पर्व्वत इति
नाम्ना ख्यायिष्यते । वाहिनीनां सदाप्रभुरित्थमाह, महावार्द्धक्याद् ४
यष्टिहस्ता वृद्धाः पुरुषा वृद्धाः स्त्रियश्च पुनर्व्वारं यिरूशालमश्चत्वरेषू-

५ पवेक्ष्यन्ति। चत्वरे क्रीडद्भि र्बालकै र्बालिकाभिश्च नगरस्य चत्वराणि
६ पुनर्व्वारं पूरयिष्यन्ते। वाहिनीनां सदाप्रभुराह, तस्मिन् कालेऽस्या
जातेरवशिष्टांशस्य दृष्ट्यामिदमद्भुतं प्रतिभास्यतीति कारणात् किं ममापि
७ दृष्ट्यामद्भुतं प्रतिभास्यतीति वाहिनीनां सदाप्रभुराह। वाहिनीनां
सदाप्रभुरित्थं ब्रूते, पश्य, सूर्य्योदयदिक्स्थदेशात् सूर्य्यास्तदिक्स्थदेशा-
८ चाहं स्वप्रजा निस्तारयितुमुद्यतोऽस्मि। अहं ता आनीय यिरूशालमस्य
मध्ये निवासयिष्यामि, ताश्च मम प्रजा भविष्यन्ति, अहञ्च तासामीश्वरो
भविष्यामि, सत्येन धार्म्मिकत्वेन चेदं सेत्स्यति।

९ वाहिनीनां सदाप्रभुरित्थं भाषते, एतस्मिन् काले भाववादिनां मुखा-
देतानि वाक्यानि शृणुथ ये यूयं, युष्माकं हस्ता बलवन्तो भवन्तु, यतो
वाहिनीनां सदाप्रभो र्गृहस्य भित्तिमूलस्थापनकालेऽस्मिन् प्रासादो
१० निर्म्मातव्यः। वस्तुत एतस्मात् कालात् प्राक् न मनुष्यस्य वेतनं न पशो
र्वेतनं वा समभवत्, वहिरभ्यन्तरं वा यातायातकारिणाञ्च क्लेशदातृतः
कापि शान्ति र्नाभवत्, सर्व्वे मानवाश्च मया प्रचोदिताः परस्परम्
११ अबाधन्त। इदानीन्त्वेतज्जातेः शेषांशं प्रति मम भावः प्राक्कालीनभावस्य
१२ सदृशो नास्तीति वाहिनीनां सदाप्रभुराह। यतः कृषिः शान्तियुक्ता,
द्राक्षालता फलवती, भूमिः शस्योत्पादिका, गगनञ्च शिशिरदायी
भविष्यति, अहञ्चैतज्जातेः शेषांशं सर्व्वेषामेतेषाम् अधिकारिणं करि-
१३ ष्यामि। परन्तु भो यिहूदाः कुल, भो इस्रायेलः कुल, यूयं यद्वत्
परजातीनां मध्ये शापास्पदान्यास्त, तद्वन्मया युष्माकं परित्राणे कृते
यूयमाशीर्व्वादपात्राणि भविष्यथ; मा बिभीत, युष्माकं हस्ता बलवन्तो
१४ भवन्तु। यतो वाहिनीनां सदाप्रभुरित्थं ब्रूते, यद्वद् युष्माकं पूर्व्वपुरुषैः
कोपितोऽहं युष्माकममङ्गलस्य सङ्कल्पमकरवं तच्च नान्वतप्ये चेति वाहि-
१५ नीनां सदाप्रभुराह, तद्वत् कालेऽस्मिन्नहं प्रत्यावृत्य यिरूशालमो यिहूदा-
कुलस्य च मङ्गलसाधनस्य सङ्कल्पं करोमि, यूयं मा बिभीत।

१६ युष्माभि र्यद्यत् कर्त्तव्यं तद्वृत्तान्तोऽयं, परस्परं सत्यं वदत, स्वपुरद्वारेषु
१७ सत्यं शान्तिदायकविचारञ्च निश्चिनुत। स्वहृदयेषु परस्परममङ्गलस्य
सङ्कल्पं मा कुरुत, असत्यशपथे मा प्रीयध्वञ्च, यतः सर्व्वमेतन्मम गर्हित-
मिति सदाप्रभुराह।

१८ अनन्तरं मां प्रति वाहिनीनां सदाप्रभो र्वाक्यं प्रादुरभूत्, यथा,
१९ वाहिनीनां सदाप्रभुरित्थं ब्रूते, चतुर्थमासस्योपवासः पञ्चममासस्योप॰

वासः सप्तममासस्योपवासो दशममासस्योपवासश्च यिहूदाः कुलस्य क्षत
आमोद आनन्दः शुभपर्व्वाणि च भविष्यन्ति, परन्तु यूयं सत्ये शान्त्याञ्च
प्रीयध्वं। वाहिनीनां सदाप्रभुरित्थं ब्रूते, पुनर्व्वारं जातयो बहूनां २०
नगराणां निवासिनश्चागमिष्यन्ति, एकस्य नगरस्य निवासिनोऽन्यन्नगरं २१
गत्वा वदिष्यन्ति, यथा, आयात वयं सदाप्रभो मुखं प्रसादयितुं वाहि-
नीनां सदाप्रभुमन्वेषितुञ्च यामः, अहमपि यास्यामीति। बहवो जना २२
बलवत्यो जातयश्च यिरूशालमि वाहिनीनां सदाप्रभुमन्वेषितुं सदाप्रभो-
र्मुखं प्रसादयितुञ्चागमिष्यन्ति। वाहिनीनां सदाप्रभुरित्थं ब्रूते, तस्मिन् २३
काले विविधभाषावादिनीनां सर्व्वजातीनां दशपुरुषा एकं यिहूदीय-
पुरुषं धरिष्यन्ति, ते तस्य वस्त्राञ्चलमेव धृत्वा वदिष्यन्ति, वयं युष्माकं
सहगामिनो भविष्यामः, यतो युष्माभिः सार्द्धमीश्वरोऽस्तीति वयं
श्रुतवन्तः।

---

९ नवमोऽध्यायः।

१ समाजस्य रक्षणं ९ ख्रीष्टस्यागमनमपेक्षितुम् आनन्दितुञ्च विनयकथनं १२ जय-
रक्षयोः प्रतिज्ञा च।

भावोक्तिः। सदाप्रभो र्वाक्यं। १
हद्रकं देशमध्युक्तमेतद् दम्मेशकाश्रितं।
यतो नित्यप्रभोरस्ति नृजातेरवलोकनं।
इस्रायेलस्य सर्व्वेषां वंशानामवलोकनं॥
तस्य सीम्नः समीपस्थं हमातञ्च तदाश्रयः। २
सोरश्चापि सिदोनञ्च तयो र्ज्ञानं यतो महत्॥
स्वनिमित्तञ्च सोरेण दृढं दुर्गं विनिर्म्मितं। ३
धूलिवत् सञ्चितं रूप्यं स्वर्णं वर्त्मस्थपङ्कवत्॥
तां पुरीन्त्वात्मसात् कर्त्तुमुद्यतोऽस्ति प्रभुः स्वयं। ४
स तत्प्राकारमाहत्य सागरे पातयिष्यति।
नगरी सा तदानीञ्च वह्निभुक्ता भविष्यति॥
तद् विलोक्याऽस्किलोनञ्च साध्वसं प्रगमिष्यति। ५
असा वेपिष्यतेऽत्यन्तम् इक्रोणञ्च त्रसिष्यति॥
यतस्तस्य य आश्वासः स लज्जाजनकोऽभवत्।
घसातो नृप उच्छिन्नोऽस्किलोनं वासवर्जितं॥

६ अस्दोदं जारजानाञ्च वासस्थानं भविष्यति।
पिलेष्टीयमनुष्याणां श्लाघा चोच्छेत्स्यते मया॥
७ तज्जनस्यास्यतश्चाहं दवयिष्यामि शोणितं।
गर्हणीयप्रसादञ्च दन्तानां तस्य मध्यतः॥
अस्मदीशस्य पक्षे तु स जनोऽप्यवशेक्ष्यत।
यिहूदाकुलमध्ये साऽध्यक्षवच्च भविष्यति।
यिबूषीयो यथा तद्वद् इक्रोणीयो भविष्यति॥
८ सेनां शत्रुञ्च गच्छन्तमागच्छन्तञ्च बाधितुं।
शिविरं स्थापयिष्यामि स्वकुलस्य कृतेऽधुना॥
मत्प्रजान्तिकमागन्तुं पुनः क्रूरो न शक्ष्यति।
इदानीं वीक्षणं यस्मात् स्वनेत्राभ्यां करोम्यहं॥
९ भो सियोनदुहितोऽत्यन्तमुल्लासः क्रियतां त्वया।
भो यिरूशालमः कन्ये हर्षनादमुदीरय॥
पश्य यस्तव राजा स समायाति कृते तव।
स धर्म्मी त्राणयुक्तश्च नम्रो गर्द्दभवाहनः।
आरूढो गर्द्दभीजाते प्राप्तयौवनरासभे॥
१० उच्छेत्स्यामि रथांश्चाहम् इफ्रयीमस्य मध्यतः।
उच्छेत्स्यामि च युद्धाश्वान् मध्यतो यिरूशालमः।
उच्छेत्स्यामि रणेष्वासं जातीः सन्धिं स वक्ष्यति॥
सागरात् सागरं यावद् राज्यं तस्य भविष्यति।
आनदाच्च फराताख्यात् महीप्रान्तान् प्रयास्यति॥
११ त्वाञ्च वच्मि पवित्रा त्वं नियमस्थापकासृजा।
त्वद्बन्दी मोचयिष्यामि वारिवर्जितकूपतः॥
१२ प्रत्यायात दृढं दुर्गं भो आशायुक्तवन्दयः।
दास्यामि द्विगुणं तुभ्यमद्यैव ज्ञापयामि तत्॥
१३ यिहूदाश्चापवत् स्वार्थं मया विस्फारितो यतः।
शरवच्च मयेफ्रायिम् योजितस्तच्छरासने॥
भो सियोन् तव पुत्रांश्च चोदयिष्याम्यहं स्वयं।
यवनस्यैव पुत्राणां तैः कर्त्तव्यं विरोधनं।
वीरखड्गस्य तुल्यैव त्वञ्च कारिष्यसे मया॥
१४ दर्शनं युष्मदूर्द्धे च दास्यते शाश्वतप्रभुः।

तस्य वाणस्वरूपस्य मेघाग्निः प्रपतिष्यति॥
आवयिष्यति तूर्य्यञ्च स्वयं नित्यप्रभुः प्रभुः।
दाक्षिणात्यस्य झञ्झाभि र्गमनञ्च करिष्यते॥
गोपायिष्यति तान् योद्धृन् वाहिनीनां सदाप्रभुः। १५
ते च ग्रासं करिष्यन्ति क्षेपणीतस्य पातितान्।
प्रस्तरान् मर्द्दयिष्यन्ति पानं कारिष्यते च तैः॥
मद्यपानाद् यथा तद्वच्छब्दः कारिष्यते च तैः।
पूतभाजनवत् पूर्णैरथवा वेदिकोणवत्॥
तेषां करिष्यति त्राणं दिने तस्मिन् सदाप्रभुः। १६
यथा मेषव्रजं तद्वत् स्वजनांस्तारयिष्यति।
द्योतन्ते तस्य भूमौ ते किरीटे मणयो यथा॥
यतः कीदृक् शुभं तेषु कीदृक् कान्तिश्च युज्यते। १७
शस्यं यूनो नवं मद्यं युवती र्वर्द्धयिष्यति॥

---

१० दशमोऽध्यायः।

प्रतिमार्च्चनार्थकदण्डभोगात् परं व्रजस्य रक्षा मङ्गलञ्च।

यूयमुत्तरवर्षायां याचताम्बु सदाप्रभुं। १
विद्युतां सृष्टिकर्त्ता स धारासारं प्रदास्यति।
एकैकस्मै च युष्माकं क्षेत्रे शाकं प्रदास्यति॥
यस्मान्निरर्थकं वाक्यं कथितं गृह्यठक्कुरैः। २
मन्त्राभिज्ञै र्मनुष्यैश्च प्राप्तं निःसत्यदर्शनं॥
स्वप्नान्यलीकवादीनि तेषां सान्त्वञ्च वाष्पवत्।
तस्मात् ते व्रजवद् भ्रान्ता रक्ष्यभावाच्च खेदिताः॥
रक्षिणां प्रातिकूल्येन क्रोधः प्रज्वलितो मम। ३
छागानाञ्च विधास्येऽहम् अनुसन्धाय शासनं॥
यिहूदाकुलरूपस्य स्वीयमेषव्रजस्य हि।
अनुसन्धास्यते तत्त्वं वाहिनीनां सदाप्रभुः।
स्वतेजस्विरणाश्वेन तुल्यांस्तांश्च करिष्यति॥
तस्मादुत्पत्स्यते कोणस्तन्मध्यान्नागदन्तकः। ४
तन्मध्याद् युद्धचापश्च तन्मध्यात् सर्व्वशासकः॥
समरे वीरतुल्याश्च ते भविष्यन्ति मानवाः। ५

रथ्यास्विव रणाद्रेष्वे पादैः कर्द्दममर्द्दकाः ॥
ते योत्स्यन्ते यतस्तेषां सहायोऽस्ति सदाप्रभुः।
अश्वारूढास्तु योद्धारो भविष्यन्ति त्रपान्विताः ॥
६ विक्रान्तांश्च करिष्यामि यिहूदाकुलजान् नरान्।
यूषफीयकुलस्यापि भविष्यामि जयप्रदः ॥
पुनस्तान् वासयिष्यामि दयिष्ये तानहं यतः।
मदद्विष्टै नरैस्तुल्या भविष्यन्ति च ते तदा ॥
यस्मादस्मीश्वरस्तेषामहमेव सदाप्रभुः।
कृतायां प्रार्थनायाञ्च दास्ये तेभ्यस्तदुत्तरं ॥
७ वीरतुल्या भविष्यन्तीफ्रयिमीयजनास्ततः।
मद्येनेव प्रफुल्लञ्च तेषां चित्तं भविष्यति ॥
तेषां पुत्राश्च तद् दृष्ट्वा भविष्यन्ति प्रहर्षिताः।
समवाप्स्यति चोल्लासं तेषां चित्तं सदाप्रभौ ॥
८ तानाह्वयोष्यशब्देन सङ्ग्रहीष्याम्यहं स्वयं।
अहमेव यतस्तेषां साधयिष्यामि मोचनं।
यथा वर्द्धिष्णवश्चासन् वर्द्धिष्यन्ते तथा पुनः ॥
९ वीजवद् विकरीष्यामि परजातिषु तानहं।
दूरवर्त्तिषु देशेष्वनुस्मरिष्यन्ति माञ्च ते।
जीवन्तश्च ससन्तानाः प्रत्यायास्यन्ति ते तदा ॥
१० तदानीञ्च मिसर्द्देशात् प्रत्यानेष्यामि तानहं।
सङ्ग्रहञ्च करिष्यामि तेषामाशूरदेशतः ॥
गिल्यद्देशञ्च नेष्यामि लिबानोनञ्च तानहं।
तेषां सङ्ख्यानुरूपन्तु स्थानं नासादयिष्यते ॥
११ स तरिष्यति कष्टाब्धिमूर्म्मींश्चाब्धौ हनिष्यति।
सिन्धोः सर्व्वं गभीरञ्च स्थानं शुष्कं भविष्यति ॥
अशूरस्य महत्त्वञ्च क्षत्रीकारिष्यते तदा।
मिसरस्य च यो दण्डः स तदापसरिष्यति ॥
१२ तान् नरांश्च करिष्याम्यहं विक्रान्तान् सदाप्रभौ।
तस्य नाम्ना गतायातं करिष्यन्ति च ते तदा।
वचनं व्याजहारेदं स्वयमेव सदाप्रभुः ॥

११ एकादशोऽध्यायः।

१ यिरूशालमस्य विनाशस्य भविष्यद्वाक्यं ४ वध्यमेषाणां कथनं १० तोत्रभञ्जनेन नियम-
भङ्गप्रदर्शनं १५ अज्ञानिनो रक्षकस्य कर्म्मफलयोः कथनञ्च।

भो लिबानोन, स्वकपाटानुद्घाटय, वह्निश्च तवैरसतरूणां दाहं १
करोतु। भो देवदारु, हाहाकारमुदीरय, यत एरसतरुः पतितः, २
श्रीयुक्ताः सर्व्वे नष्टाः। भो बाशनदेशीया अलोनतरवः, हाहाकारमुदी-
रयत, यतो दुर्गमं वनं भूमिसात्कृतं। पशुपालानां हाहाकारस्य रवः ३
श्रूयते, यतस्तेषां गोप्रचारो ध्वंसितः, युवसिंहानां हुङ्कारस्य रवः श्रूयते,
यतो यर्द्दनस्य भूषणमरण्यं ध्वंसितं।

ममेश्वरः सदाप्रभु र्मामवादीत् त्वमिमं वध्यमेषव्रजं पालय; यतस्तेषां ४
क्रेतारस्तान् घ्नन्ति न तु दण्डनीया गण्यन्ते, तेषां विक्रेतारश्च वदन्ति, ५
धन्यः सदाप्रभुरहं तावद् धनवान् भवामि, तेषां रक्षकाश्च तान् प्रति
ममतां न कुर्व्वते। वस्तुतोऽहं भूमण्डलनिवासिनः प्रति पुन र्ममतां न ६
करिष्यामीति सदाप्रभुराह। परन्तु पश्याहमेकैकं नरं तस्य प्रतिवेशिनो
हस्तगतं तस्य राज्ञश्च हस्तगतं करिष्यामि, तैश्च भूमण्डले चूर्णीकृतेऽप्यहं
तेषां हस्ताज्जनान् नोद्धरिष्यामि। अनन्तरमहं तं वध्यमेषव्रजं सुतरां ७
व्रजस्य दुःखिनो मेषानपि पालयितुं प्रवृत्तः, स्वकृते च द्वौ यष्टी गृहीत्वा
तयोरेकस्य कान्तिरित्यपरस्य च बन्धनकलाप इति नामाकार्षं। इत्थमहं
तं व्रजमपालयं। एकस्मिन् मासे रक्षकत्रयस्य संहारमकार्षञ्च। अनन्तर- ८
महं तेषु विरक्तोऽभवं तेषामपि भावो मय्यसन्तुष्टोऽभूत्। अतोऽहं तान- ९
वादिषं अहं युष्मान् न पालयिष्यामि, यन्म्रियमाणं तन्म्रियतां, यच्च
संक्षियमाणं तत् संक्षियतां, अवशिष्टानाञ्चैकैकमन्यस्य मांसं भक्षयतां।

अपरमहं मम कान्तिनामकं यष्टिमादाय सर्व्वजातिभिः सह कृतस्य १०
मदीयनियमस्य भङ्गाय तं खण्डशोऽकार्षं। अतस्तस्मिन् दिने स भग्नस्तेन ११
तत् सदाप्रभो र्वचनमिति मय्यवधानकारिभि र्व्रजस्य दुःखिमेषै र्बुबुधे।
अनन्तरमहं सर्व्वान् अवादिषं, यदि युष्मभ्यं रोचते तर्हि मम वेतनं दत्त, १२
यदि वा न रोचते तर्हि निवर्त्तध्वं। अतस्ते मम वेतनं त्रिंशद्रौप्यमुद्रा-
मानं कृत्वा तुलया ममिरे। अनन्तरं सदाप्रभु र्मां जगाद, त्वं कुम्भकार- १३
सम्मुखं तन्निक्षिप, महार्घमेतन्मूल्यं यत्तै र्मम मूल्यनिरूपकै र्निरूपितं।
अतोऽहं तत् त्रिंशन्मुद्रामानं रूप्यमादाय सदाप्रभो र्गृहे कुम्भकारसम्मुखं

१४ न्यच्छिदं। अनन्तरं यिहूदेस्रायेलयोरेकत्वस्य व्यर्थीकरणाय बन्धनकला-
पाभिधं मम द्वितीयं यष्टिमभाङ्क्षं।
१५ अपरं सदाप्रभु र्मां जगाद, पुनश्च त्वमज्ञानिन एकस्य रक्षकस्य साम-
१६ ग्रीमादत्स्व। यतः पश्याहं मेदिन्यामेकं रक्षकमुत्पादयिष्यामि, स
नष्टकल्पानां मेषाणां तत्त्वावधानं न करिष्यति, विकीर्णान् नान्वेषिष्यते,
भग्नाङ्गान् न चिकित्सिष्यते, अवतिष्ठमानस्य मेषस्य भरणपोषणं न करि-
ष्यति, पीनस्य तु मांसं भक्षयिष्यते, सर्व्वेषां खुरान् विदारयिष्यति च।
१७ सोऽज्ञानी मेषत्यागी रक्षकः सन्तापपात्रं; भो खड्ग, तस्य बाहौ दक्षिणे
चक्षुषि च प्रपत; तस्य बाहुः सर्व्वथा परिशोक्ष्यति, तस्य दक्षिणं चक्षुश्च
सर्व्वथा हतदृष्टि भविष्यति।

---

१२ द्वादशोऽध्यायः।

१ यिरूशालमस्य कम्पजनकपात्रस्वरूपत्वं ३ गुरुपाषाणस्वरूपत्वञ्च ६ यिहूदाया जयकथनं
१० यिरूशालमस्य पश्चात्तापकथनञ्च।

१ इस्रायेलमधि भारोक्तिस्वरूपं सदाप्रभो र्वाक्यं। नभोमण्डलवितानकः
पृथिवीसंस्थापको नरस्यान्तरे नरस्यात्मनः स्रष्टा च सदाप्रभुराह,
२ पश्याहं यिरूशालमं चतुर्द्दिक्स्थानां सर्व्वजातीनां विभ्रमजनकं शरावं
कृत्वा नियोजयामि; यिरूशालमस्यावरोधकाले यिहूदायामप्येतत् सफलं
भविष्यति।
३ तस्मिन् काले चाहं यिरूशालमं सर्व्वजातीनां कृते धुरार्थकं प्रस्तरं
करिष्यामि; ये सर्व्वे जनास्तं तोलयन्ति ते स्वाङ्गानि विदारयिष्यन्ति;
परन्तु मेदिन्याः सर्व्वजातयस्तस्याः पुर्य्यां वैपरीत्येन समायास्यन्ति।
४ सदाप्रभुराह, तस्मिन् कालेऽहं सर्व्वानश्वान् भीरुताहतान् तदारूढां-
श्चोन्मादाहतान् करिष्यामि, यिहूदाकुलस्य पक्षे उन्मीलितनेत्रो भूत्वा
५ जातीनां सर्व्वानश्वान् अन्धताहतान् करिष्यामि। यिहूदाया जनाध्य-
क्षाश्च मनोमध्ये गदिष्यन्ति, यिरूशालमनिवासिनः स्वेश्वरस्य वाहिनी-
गणाधिपस्य सदाप्रभोः साहाय्येनास्मद्बलस्वरूपाः।
६ तस्मिन् कालेऽहं काष्ठानां मध्ये स्थितां वह्निपूर्णां हसन्तीमिव शस्य-
गुच्छानां मध्ये स्थितां ज्वलदुल्कामिव वा यिहूदाया जनाध्यक्षान् स्थाप-
यिष्यामि, ते दक्षिणे वामे च चतुर्द्दिक्स्थाः सर्व्वा जाती र्ग्रसिष्यन्ति,
७ ततः परमपि यिरूशालमं निजस्थले यिरूशालम एव निवत्स्यति। सदा-

प्रभुश्च प्रथमे यिहूदायाः पटमण्डपानि तारयिष्यति, न चेद् दायूदकुलस्य
श्री र्यिरूशालमनिवासिनां श्रीश्च यिहूदाया विरुद्धमभिमानं करिष्यत।
तस्मिन् दिने सदाप्रभु र्यिरूशालमनिवासिनां परितो रक्षां विधास्यते, ८
तेषां मध्ये च यस्तस्मिन् दिने स्खलनशीलः स दायूदेन तुल्यो भविष्यति,
दायूदस्य कुलमीश्वरेण तुल्यं तेषामग्रगामिना सदाप्रभो र्दूतेन तुल्यं वा
भविष्यति। अहञ्च तस्मिन् काले यिरूशालमस्याक्रमणार्थमागताः सर्व्वाः ९
परजातीरुच्छेत्तुं यतिष्ये।

अहञ्च दायूदकुलस्योपरि यिरूशालमनिवासिनाञ्चोपर्य्यनुग्रहस्वरूपं १०
प्रार्थनास्वरूपञ्चात्मानं स्रावयिष्यामि, ते च यं मां विद्धवन्तस्तमुद्दिश्य
दृक्पातं करिष्यन्ते, एकमात्रपुत्रशोकजन्यविलापेनेव तमधि विलपि-
ष्यन्ति च, यथा च प्रथमजातस्य मरणात्, तथा मनस्तापमवाप्स्यन्ति।
तस्मिन् दिने मगिद्दुनामिकोपत्यकायां हदद्रिम्मोणीयविलापस्य सदृशो ११
महाविलापो यिरूशालमे भविष्यति। देशीयजनानामेकैका गोष्ठी १२
पृथक् पृथग् विलपिष्यति, दायूदकुलस्य गोष्ठी पृथक् तदीययोषितश्च
पृथक्, नाथनकुलस्य गोष्ठी पृथक् तदीययोषितश्च पृथक्; लेविकुलस्य १३
गोष्ठी पृथक् तदीययोषितश्च पृथक्, शिमियिकुलस्य गोष्ठी पृथक् तदी-
ययोषितश्च पृथक्; अवशिष्टानां सर्व्वगोष्ठीनां मध्य एकैका गोष्ठी पृथक् १४
तदीययोषितश्च पृथक्।

१३ त्रयोदशोऽध्यायः।

१ पापमोचनं देवार्चनाद्यधर्म्मस्य मार्जनं ७ ख्रीष्टस्य मरणस्य यिहूदीयानाञ्च भाविदशायाः कथनञ्च।

तस्मिन् दिने दायूदकुलस्य यिरूशालमनिवासिनाञ्च कृते पापा- १
शौचयो र्हरणायोत्स एक उद्घाटयिष्यते। वाहिनीनां सदाप्रभुराह, २
तस्मिन् दिनेऽहं विग्रहाणां नामानि देशाद् उच्छेत्स्यामि, ते पुन र्न
स्मारिष्यन्ते, भाववादिनरान् अशुचिताया आत्मानञ्चापि देशादपसार-
यिष्यामि। यदि कश्चित् तदानीमपि भावोक्तिं व्याहरति, तर्हि तस्य ३
जन्मदातारौ मातापितरौ तं वदिष्यन्ति, त्वया न जीवितव्यं यतस्त्वं
सदाप्रभो र्नाम्ना मृषोक्तिं व्याहृतवान्, तस्य भावोक्तिकथनात् तस्य
जन्मदातारौ मातापितरौ तं व्यत्स्यन्ति च। तस्मिन् काले भाववादिनः ४
प्रत्येकं भावोक्तियुक्तात् स्वदर्शनात् त्रपिष्यन्ते, मृषाकथनाय लोमशं

५ प्रावारं पुन र्न परिधास्यन्ते च। एकैकस्तु वदिष्यति, नाहं भाववादी,
६ कृषीबलोऽहं, बाल्यकाल एवामुकेन विक्रीतः। परन्तु तव करयो र्मध्य-
देशस्था आघाता अमी किमर्था इति केनचित् पृष्टः स वदिष्यति,
स्वबन्धूनां गृहेऽहमित्थमाहत इति।
७ भो खड्ग, मम मेषरक्षकस्य गात्रे मम सजातीयस्यैव गात्रे प्रपतेति
वाहिनीनां सदाप्रभुराह; मेषरक्षकं जहि, तेन मेषा विकीर्णा भवि-
८ ष्यन्ति, तदाहं क्षुद्रान् प्रति स्वहस्तं वर्त्तयिष्यामि। परन्तु सदाप्रभु-
राह, देशस्य सर्व्वत्र नराणामंशद्वयमुच्छेत्स्यते प्राणांस्त्यक्ष्यति च, तृती-
९ यांश एव तन्मध्येऽवशेक्ष्यते। तञ्च तृतीयांशमहं वह्निं प्रवेश्य रूप्यविला-
येनेव विलाययिष्यामि स्वर्णपरीक्षणेनेव तेषां परीक्षणं करिष्यामि च;
स तृतीयांशो मम नाम्ना प्रार्थनां करिष्यत्यहञ्च तदुत्तरं प्रदास्यामि;
असौ मम प्रजावृन्द इत्यहं वदिष्यामि, स च वदिष्यति, सदाप्रभु
र्ममेश्वर इति।

---

१४ चतुर्द्दशोऽध्यायः।

१ यिरूशालमस्य कष्टं रक्षणञ्च १२ तच्छत्रूणां दण्डनं १६ सर्व्वजातीनां मुक्तः कथनं
२० तया सर्व्वेषां पवित्रतालाभस्य।

१ पश्य, यदा त्वन्मध्यस्थिता तव सम्पत्ति र्लोप्त्रं भूत्वा विभक्ष्यते, तादृशं
२ दिनं सदाप्रभोरनुज्ञयागच्छति। सर्व्वा जातयश्च मया युद्धार्थं यिरू-
शालमस्यान्तिकं सङ्ग्राहिष्यन्ते, ताभि र्नगरं धारिष्यते च, गृहाण्युल्लुण्ठ-
यिष्यन्ते स्त्रियश्च प्रधर्षयिष्यन्त, पौराणामर्द्धांशश्च निर्व्वासार्थं निष्क्रमि-
३ ष्यति, प्रजानामवशिष्टांशस्तु नगरान्नोच्छेत्स्यते। अनन्तरं सदाप्रभु
र्निष्क्रम्य स्वीययुद्धदिनस्वरूपे तस्मिन् समरदिवसे ताभि र्जातिभिः सह
४ योत्स्यते। तस्मिन् दिवसे च पूर्व्वदिशि यिरूशालमस्याभिमुखे जीत-
वृक्षाणां गिरौ तस्य चरणाववस्थास्येते स च जीतवृक्षाणां गिरि
र्मध्यस्थान आपूर्व्वपश्चिमदिग्भ्यां विदीर्णोऽतीव महत्युपत्यका भविष्यति,
गिरेस्त्वेकोऽर्द्धांश उत्तरदिशमपरोऽर्द्धांशश्च दक्षिणदिशं सरिष्यतः।
५ यूयञ्च मम गिर्य्योरुपत्यकायां पलायिष्यध्वे, यतो गिर्य्योः सोपत्यकात्सेल-
पर्य्यन्ता भविष्यति; यिहूदीयराजस्योषियस्याधिकारकाले भूकम्पस्य
भयाद् यूयं यथा पलायितास्तथैव पलायिष्यध्वे, तदा ममेश्वरः सदा-
६ प्रभुरागमिष्यति, पवित्राश्च सर्व्वे त्वत्सहिता भविष्यन्ति। तस्मिन् दिने

च दीप्तेरभावो भविष्यति ज्योतींषि विलायिष्यन्ते। स दिवसोऽनुपमो ७
भविष्यति, स सदाप्रभोः परिचितः, स न दिवसो न रात्रि र्वा भवि-
ष्यति सायन्तनकाले तु दीप्ति र्जनिष्यते। परन्तु तस्मिन् दिने यिरू- ८
शालमादमृता आपो निःसरिष्यन्ति, तासामेकोऽर्द्धांशः पूर्व्वीयसमुद्र-
मपरोऽर्द्धांशश्च पश्चिमसमुद्रं यास्यतः, ग्रीष्मकाले शीतकाले च ता अव-
स्थास्यन्ते। सदाप्रभुश्च कृत्स्नदेशस्याधिकारी राजा भविष्यति; तस्मिन् ९
काले सदाप्रभुरेकस्तस्य नाम चैकं भविष्यति। गेवातो यिरूशालमस्य १०
दक्षिणे स्थितं रिम्मोणं यावत् कृत्स्नो देश आकारान्तरीभूय जङ्गलभूमेः
सदृशो भविष्यति। यिरूशालमश्चोच्चीभूय निजस्थानेऽर्थतो विन्या-
मीनीयगोपुरात् प्रथमगोपुरस्य स्थानं यावत् कोणस्थगोपुरं यावत्
हननेलस्योच्चगृहाच्च राज्ञो द्राक्षापेषणार्थककुण्डान् यावन्निवत्स्यति।
नरास्तत्र निवत्स्यन्ति, वर्ज्जनसूचकः शापोऽपि पुन र्न भविष्यति, यिरू- ११
शालमञ्च निर्भयं निवत्स्यति।

परन्तु याः सर्व्वा जातयो यिरूशालमस्य विरुद्धं युद्धयात्रां करि- १२
ष्यन्ति, तत्सम्बन्धीयजनं सदाप्रभु र्येनाघातेनाहनिष्यति तद्वृत्तान्तोऽयं,
चरणाभ्यां तिष्ठतस्तस्य मांसं विगलिष्यति, कोटरयोस्तस्य चक्षुषी विग-
लिष्यतः, मुखे तस्य जिह्वा च विगलिष्यति। तस्मिन् दिने च तेषां मध्ये १३
सदाप्रभुनोत्पादिता महाव्याकुलता सम्भविष्यति, ते च प्रत्येकमन्यस्य
हस्तं धरिष्यन्ति, परन्त्वेकस्य हस्तोऽपरस्य हस्तस्य वैपरीत्येनोत्थापयि-
ष्यते। तदा यिहूदा अपि यिरूशालमे योत्स्यते, चतुर्द्दिक्स्थानां १४
सर्व्वासां परजातीनां रूप्यस्वर्णवस्त्रादिवस्तूनां महाराशिः सञ्चायिष्यते
च। तेषु शिविरेषु विद्यमानानामश्वखरोष्ट्रगर्द्दभादीनां पशूनामपि १५
तस्याघातस्य तुल्य आघातः सम्भविष्यति।

परन्तु यिरूशालमस्य विरुद्धमागतानां सर्व्वासां परजातीनां कृत्स्नो- १६
ऽवशिष्टांशः प्रतिवत्सरं राज्ञो वाहिनीगणाधिपस्य सदाप्रभोः समक्षं
प्रणिपतितुं कुटीरपर्व्व पालयितुञ्चोपस्थास्यते। भूमण्डलस्थगोष्ठीनां मध्ये १७
तु ये जना राज्ञो वाहिनीगणाधिपस्य सदाप्रभोः समक्षं प्रणिपतितुं
नोपस्थास्यन्ते, तेषामुपरि वृष्टि र्न पतिष्यति। मिस्रीयाणां गोष्ठी यदि १८
नोपतिष्ठते, तर्ह्यनागमनात् तेषामप्युपरि वृष्टि र्न पतिष्यति; ये पर-
जातीयजनाः कुटीरपर्व्वपालनार्थं नोपस्थास्यन्ते, सदाप्रभुस्तान् येनाह-
निष्यति, स एवाघातोऽमूषामप्युपरि वर्त्तिष्यते। एतदेव मिस्रीयाणां १९

पापफलं, कुटीरपर्व्वपालनार्थमनुपस्थितानां सर्व्वेषां परजातीयजना-
नाञ्च पापफलं भविष्यति।
१० तस्मिन् दिने सदाप्रभोः कृते पवित्रमिति लिपिरश्वानां घण्टिकासु
विद्यमाना भविष्यति, सदाप्रभो र्गृहे स्थिताः स्थाल्यश्च यज्ञवेद्याः सम्मुख-
२१ स्थानां प्रोक्षणार्थकपात्राणां समाना भविष्यन्ति। यिरूशालमे यिहूदा-
देशे वा स्थिताः सर्व्वस्थाल्यश्च वाहिनीगणाधिपस्य सदाप्रभोः कृते पवित्रा
भविष्यन्ति, यजमानाः सर्व्वे जनाश्चागत्य तासां मध्ये स्थालीरादाय
तास्वेव पक्ष्यन्ति। तस्मिन् दिने च वाहिनीगणाधिपस्य सदाप्रभो र्गृहे
किनानीयः कश्चिन्नरः पूर्व्ववन्नावस्थास्यते।

मालाखे र्भविष्यद्वाक्यानि।

---

१ प्रथमोऽध्यायः।

१ इस्रायेलीयलोकानाम् अकृतज्ञतामधि तर्ज्जनं ६ याजकानाम् अधर्म्मस्य कथनञ्च।

१ भावोक्तिः। मालाखिना ज्ञापितं सदाप्रभो र्वाक्यं।
२ अहं युष्मासु प्रीतवानिति सदाप्रभुराह, यूयन्तु वदथ, केनास्मासु
प्रीतवानसि? सदाप्रभुराह, एषावः किं याकूबस्य भ्राता नासीत्?
३ परन्त्वहं याकूबे प्रीतवान्। एषावन्त्वहं गर्हितवान् तस्य पर्व्वतांश्च
४ ध्वंसस्थानं, तस्याधिकारभूमिञ्च नागानां वसतिं कृतवान्। चूर्णा वयं,
परन्तु प्रत्यावृत्योत्सन्नस्थानानि पुन र्निर्म्मास्यामह इति चेदिदोमो
ब्रूयात्, तर्हि वाहिनीनां सदाप्रभु र्वदति ते निर्म्मास्यन्तेऽहन्तूत्पाटयि-
ष्यामि, ते च दुष्टताया देशः सदाप्रभो र्नित्यकोपपात्रस्वरूपा जाति-
५ श्चेति नाम्ना विख्यास्यन्ते। स्वीयनेत्रैस्तद् दृष्ट्वा यूयमपि वदिष्यथ, इस्रा-
येलः सीम्नः पारेऽपि सदाप्रभु र्महान्।
६ पुत्त्रः पितरं, दासश्च स्वप्रभुं सम्मानयति, अहन्तु चेत् पिता भवेयं,
तर्हि मम सम्मानं कुत्र? प्रभु र्वा चेद् भवेयं, तर्हि मम भीतिः कुत्रेति

वाहिनीनां सदाप्रभु र्याजकान् गदति। भो याजकाः, मम नाम युष्मा-
भिरवज्ञायते। अत्र यूयं वदथ, तव नामास्माभिः कथमवज्ञातं? यूयं ७
मम यज्ञवेद्यामशुचि भक्ष्यमुत्सृजथ, तथापि वदथ, त्वमस्माभिः कथम-
शुचीकृतः? सदाप्रभो र्भोजनमञ्चोऽवज्ञेय इति कथनेन तदकारि।
युष्माभि र्बलिदानार्थमन्धस्य पशोरानयनं कुत्सितं न मन्यते, खञ्जस्य ८
रोगिणो वा पशोरानयनमपि कुत्सितं न मन्यते। त्वमेकदा स्वदेशस्या-
धिपतेः समीपं तादृशं पशुमानय, स किं त्वां रोचयिष्यति त्वामनुग्रही-
ष्यति वेति वाहिनीनां सदाप्रभुराह। अत इदानीमकदेश्वरस्य मुखं ९
प्रसादयन्तोऽस्मत्कृतेऽनुकम्पां याचध्वं। युष्माकमेव हस्तैरेतदकारि, पुन
र्युष्मत्कारणात् स किमनुग्रहं करिष्यतीति वाहिनीनां सदाप्रभुराह।
अहो युष्माकमेव मध्ये कोऽपि कपाटौ बध्नातु, तथा कृते मम वेदी १०
युष्माभिः पुन र्वृथा न दीपयिष्यते। युष्मासु मम कापि प्रीति र्नास्तीति
वाहिनीनां सदाप्रभुराह, युष्मत्करेभ्यश्चाहं नैवेद्यं न रोचयिष्यामि। यत ११
आसूर्य्योदयास्तस्थानाभ्यां परजातीनां मध्ये मम नाम महत्, सर्व्वस्थाने
च मम नाम्नः कृते धूपवद् दग्धं दानमानीयते, तच्च शुचि नैवेद्यं। वस्तुतः
परजातीनां मध्ये मम नाम महदिति वाहिनीनां सदाप्रभुराह, यूयन्तु १२
तदपवित्रीकुरुथ, यतो वदथ, सदाप्रभो र्भोजनमञ्चोऽशुचिस्तदीयलभ्य-
ञ्चावज्ञेयं भक्ष्यं। पुन र्वदथ, पश्य कीदृशी विडम्बना, यूयञ्च फूत्कारेण १३
तदवमन्यध्वे, चोरितं बलिं खञ्जं रोगिणं वानयथ चेत्थमेव नैवेद्यमुत्सृजथ,
युष्मत्करेभ्योऽहं किं तद् रोचयिष्यामीति सदाप्रभुराह। यस्तु प्रता- १४
रको व्रजमध्ये पुम्पशौ विद्यमाने सङ्कल्पं कृत्वा प्रभुमुद्दिश्य नष्टकल्पं स्त्री-
पशुमुत्सृजति, स शापग्रस्तः, यतो महान् राजाहमिति वाहिनीनां
सदाप्रभुराह, मम नाम च परजातीनां मध्ये भयावहं।

---

२ द्वितीयोऽध्यायः।

१ याजकानाम् अविश्वस्तता १० देवार्च्चातो जनानां तिरस्कारः १२ व्यभिचार-दौरात्म्याभ्यां तेषां तिरस्कारः।

अत इदानीं, भो याजकाः, युष्मान् प्रत्ययमादेशो भवति, वाहिनीनां १
सदाप्रभुराह, यदि न शृणुत मम नाम्नः प्रतापं स्वीकर्त्तुञ्च मनोयोगं न २
कुरुथ, तर्ह्यहं युष्माकं विरुद्धम् अभिशापं प्रहेष्यामि युष्माकमाशीर्व्वा-

दांश्चाभिशप्स्यामि, वस्तुतो युष्माभि र्मनोयोगो न क्रियते तस्मादहं तान्
३ अभिशप्तवान्। पश्यताहं युष्माकं कृते वीजं भर्त्सयिष्यामि, युष्माकं वद-
नेषु पुरीषं युष्मत्पर्व्वणां पुरीषमेव विकरीष्यामि च, यूयमपि तद्वाभि-
४ मपनायिष्यध्वे। ततोऽयमादेशो लेविना सार्द्धं कृता मम नियमो भवि-
ष्यतीत्यभिप्रायात् स युष्मान् प्रति मया प्रहित इति यूयं ज्ञास्यथेति
५ वाहिनीनां सदाप्रभुराह। तेन सार्द्धं जीवनशान्त्योः प्रतिज्ञास्वरूपो
मम नियम आसीत्, अहञ्च तस्मै जीवनशान्ती प्राददां; स मद्भीतेः
प्रतिज्ञास्वरूप आसीत् लेविश्च मत्तोऽबिभेत्, मम नाम्नः समक्षमनमत
६ च। सत्यस्वरूपा व्यवस्था तस्य मुखेऽवातिष्ठत, तस्यौष्ठयोरन्यायो नावि-
द्यत; स शान्तिसारल्याभ्यां मत्सहगाम्यासीत्, बहूंश्चापराधात् पराव-
७ र्त्तयत्। वस्तुतो याजकस्यौष्ठौ ज्ञानं रक्षतस्तस्य मुखे च जना व्यवस्थाम-
८ न्वेषन्त इति युक्तं, यतः स वाहिनीनां सदाप्रभो र्दूतः। यूयन्तु सन्मार्गाद्
अपक्रान्ताः, व्यवस्थाव्यवहारे बहून् स्खालितवन्तः, लेवे र्नियमं नाशि-
९ तवन्त इति वाहिनीनां सदाप्रभुराह। अहमपि युष्मान् कृत्स्नस्य प्रजा-
वृन्दस्य समक्षम् अवज्ञेयान् नीचांश्च कृतवान्, यतो युष्माभि र्मम पन्थानो
न रक्ष्यन्ते व्यवस्थाव्यवहारे च मुखापेक्षा क्रियते।

१०　सर्व्वेषामस्माकं किमेक एव पिता नास्ति? एक एवेश्वरः किमस्मान्
न सृष्टवान्? कुतो वयं प्रत्येकं स्वभ्रातरं प्रति विश्वासघातकतामनुति-
११ ष्ठामः? एतेनास्माकं पैतृको नियमोऽपवित्रीक्रियते। यिहूदा विश्वा-
सघातकतामनुतिष्ठति, इस्रायेलस्य मध्ये यिरूशालमे च गर्हणीय
आचारः क्रियते च, यतो यिहूदाः सदाप्रभोः प्रीतिभाजनं धर्म्मधामा-
१२ पवित्रं करोति विजातीयदेवस्य कन्यामुद्वहति च। तादृशीं क्रियां यः
करोति, तस्य नरस्य जागरूकं जनं तदुत्तरदातारं वाहिनीनां सदा-
प्रभवे नैवेद्योत्सर्ज्जकं जनञ्च याकूबस्य पटगृहाणां मध्याद् उच्छिनत्तु।

१३　द्वितीयञ्चेदमपकर्म्म युष्माभिः क्रियते, नेत्रजलेन रोदनेन कातरोक्त्या
च वाहिनीनां सदाप्रभो र्वेदी प्रच्छाद्यते, तेन स नैवेद्ये दृक्पातं न कुरुते,
१४ युष्मत्करेभ्यश्चाभिरुचितं किञ्चिन्न गृह्णाति। अत्र यूयं वदथ किमस्य
कारणं? कारणमेतत्, तव त्वदीययौवनकालीनभार्य्यायाश्च मध्ये सदा-
प्रभुः साक्ष्यस्ति, तां प्रति त्वया विश्वासघातकता कृता, सा तु तव
१५ सङ्गिनी तव सहधर्म्मिणी चास्ति। य आत्मनः शेषांशस्याधिकारी
तादृश एको नरः किं न तत् कृतवान्? वाढं, स एको नरः किमकरोत्?

स ईश्वरीयवंशमन्वैषत। अतो यूयं स्वात्मनः कृते सावधाना भवत, तव
यौवनकालीनभार्य्यां प्रति विश्वासघातकतां माकार्षीः। यतोऽहं १६
भार्य्यात्यागं गर्हे इतीस्रायलस्येश्वरः सदाप्रभुराह, भार्य्यात्यागिनो वस्त्रं
दौरात्म्येन परिच्छन्नमिति वाहिनीनां सदाप्रभुराह, अतो यूयं स्वात्मनः
कृते सावधाना भवत विश्वासघातकताञ्च माकार्ष्ट।
यूयं स्ववाक्यैः सदाप्रभुं खेदयथ, परन्तु वदथ, केन खेदयामः? यः १७
कश्चिद् दुष्टतामाचरति, स सदाप्रभो र्दृष्ट्यां भद्रः, तादृशाश्च नरास्तस्मै
रोचन्ते, न चेन्न्यायविचारस्येश्वरः कुत्रेति कथनेन तं खेदयथ।

---

३ तृतीयोऽध्यायः।

१ ख्रीष्टस्यागमनकथनं ७ जनानां दुष्टताकथनं १३ तेषामविश्वासकथनं १६ ईश्वराद् भयकारिणां मङ्गलकथनञ्च।

पश्यताहं स्वीयदूतं प्रहेतुमुद्यतोऽस्मि, स मदग्रे पन्थानं संस्करिष्यति, १
यश्च युष्माभिरन्विष्यमाणः प्रभु र्युष्माभिरभिरुचितस्य नियमस्य दूतः
सोऽकस्मात् स्वप्रासाद उपस्थास्यते, पश्यत स आयातीति वाहिनीनां
सदाप्रभुराह। तस्यागमनदिनन्तु सोढुं केन शक्यं? तस्य दर्शनदाने वा २
कोऽवस्थास्यते? यतः स विलायकस्वर्णकारस्याग्ने रजकानां क्षारोदकस्य
वा सदृशः। स च रूप्यं विलाययन् शुचीकुर्व्वंस्त्रैवोपविश्य स्वर्णमिव ३
रूप्यमिव वा लेवेः सन्तानान् शुचीकुर्व्वन् निर्म्मलीकरिष्यति, ततस्ते
सदाप्रभोः परिचारका धार्म्मिकतया नैवेद्योत्सर्ज्जकाश्च भविष्यन्ति।
यद्वच्च प्राक्तनदिनेषु पूर्व्ववत्सरेषु च, तद्वत् तदा यिहूदायिरूशालमयो ४
र्नैवेद्यं सदाप्रभवे रोचिष्यते। अहञ्च विचाराय युष्मत्समीपमाग- ५
मिष्यामि, मायाविनां व्यभिचारिणां मृषाशपथकारिणां, वेतनजीविनि
विधवायामनाथबालके च दौरात्म्यकारिणां प्रवासिपीडकानाञ्च, मद्भी-
तिवर्ज्जितानां जनानां प्रातिकूल्येनाहं सत्वरः साक्षी भविष्यामि चेति
वाहिनीनां सदाप्रभुराह। यतः सदाप्रभुरहं निर्व्विकारः, याकूबस्य ६
सन्तानाश्च यूयम् अनश्वराः।
स्वपूर्व्वपुरुषाणां कालतो यूयं मम विधिभ्योऽपक्रम्य तान् न रक्षथ। ७
मां प्रति पर्य्यावर्त्तध्वं, तथा कृतेऽहं युष्मान् प्रति पर्य्यावर्त्तिष्ये। अत्र यूयं
वदथ, केन पर्य्यावर्त्तिष्यामहे? ईश्वरः किं मनुष्येण प्रतारयितव्यः? ८

यूयन्तु मां प्रतारयथ। अत्र यूयं वदथ, केन त्वां प्रतारयामः? दशमांशे-
९ नोपहारेण च। यूयं शापेनाभिशप्ताः, वस्तुतो भो कृत्स्ने जाते, यूयं मां
१० प्रतारयथ। कृत्स्नो दशमांशो युष्माभिः कोषागारमानीयतां मम गृहे
च भक्ष्यद्रव्यं विद्यतां, एतेनैव मां परीक्षध्वमिति वाहिनीनां सदाप्रभु-
राह। अवश्यमहं युष्मत्कृते गगनस्य वातायनान्युद्घाटयिष्यामि, युष्मत्कृते-
११ ऽपरिमेयामाशिषं विमोक्ष्यामि च। युष्मत्कृते ग्रासकारिणं तर्जयिष्यामि
च, तेन स युष्मत्क्षतये भूमेः फलानि न नाशयिष्यति, क्षेत्रे च युष्माकं
१२ द्राक्षालता न निष्फला भविष्यतीति वाहिनीनां सदाप्रभुराह। सर्व्वाश्च
परजातयो युष्मान् धन्यान् वदिष्यन्ति, यतो यूयमेवाभिरुचितस्य देश-
स्याधिकारिणो भविष्यथेति वाहिनीनां सदाप्रभुराह।
१३ मम प्रातिकूल्येन युष्माकं वाक्यान्युग्राण्यभवन्निति सदाप्रभुराह। अत्र
१४ यूयं पृच्छथ, तव प्रातिकूल्येन वयं किं कथयामः? यूयं वदथ, ईश्वरस्या-
राधनालीका, तस्य रक्षणीयरक्षणाद् वाहिनीगणाधिपस्य सदाप्रभोः
१५ समक्षं मलिनाकारेण गमनाच्चास्माकं को लाभो जातः? अतोऽधुना वयं
दर्पिणो नरान् धन्यान् वदामः, दुष्कर्म्मकारिण एव प्रतिष्ठां प्राप्तवन्त
ईश्वरञ्च परीक्ष्य निस्तारमपि लब्धवन्तः।
१६ तदानीं सदाप्रभुतो भयकारिणो नरा मिथः समलपन् सदाप्रभुश्चा-
वधायाशृणोत्, सदाप्रभुतो भयकारिणां तस्य नामानुचिन्तकानाञ्च नराणां
१७ कृते तस्य सम्मुखं स्मरणार्थकमेकं पुस्तकमलेखि च। ते ममैव सन्तीति
सदाप्रभुराह, मया यद्दिनं रच्यते, तस्मिंस्ते मम निजस्वं भविष्यन्ति,
यथा च पिता स्वसेवाकारिणि पुत्त्रे स्नेहवान्, तथैवाहं तेषु स्नेहवान्
१८ भविष्यामि। तदा यूयं परिवृत्य धार्म्मिकदुष्टयो र्मध्ये प्रभेदं, ईश्वर-
सेवाकारिणस्तत्सेवात्यागिनश्च मध्ये च प्रभेदं द्रक्ष्यथ।

---

४ चतुर्थोऽध्यायः।

१ दुष्टानां दुर्द्दशा धार्म्मिकाणां मङ्गलं ४ व्यवस्थायामवधानाय निवेदनं ५ एलियस्यार्थाद् योहनस्यागमनकथनञ्च।

१ वस्तुतः पश्यत, चुल्लीवत् प्रज्वलितः स दिवस आयाति, तदानीं
दर्पिणो दुष्कर्म्मकारिणश्च सर्व्वे नराः पलालस्वरूपा भविष्यन्ति, स
आगामी दिवसस्तान् भस्मीकरिष्यति चेति वाहिनीनां सदाप्रभुराह,

स तेषां न मूलं न पल्लवं वा शेषयिष्यति। परन्तु भो मन्नामतो भय- २
कारिणः, धार्म्मिकतारूपः सूर्य्यो युष्मानभ्युदेष्यति, तत्किरणाश्चारोग्या-
वहानि। यूयञ्च निर्गत्य पुष्टा गोवत्सा इव नर्त्तिष्यथ, दुष्टांश्च मर्द्दिष्यथ, ३
यतो मया यद् दिनं रच्यते, तस्मिंस्ते युष्मत्पदतलस्थं भस्म भविष्य-
न्तीति वाहिनीनां सदाप्रभुराह।

यूयं मद्दासस्य मूससो व्यवस्थां स्मरत, अहमेव होरेबे कृत्स्नस्येस्राये- ४
लस्य कृते तं विधिशासनसङ्ग्रहस्वरूपां तां व्यवस्थामाज्ञापितवान्।

पश्यत, सदाप्रभो र्महतो भयङ्करस्य च दिनस्यागमनस्याग्रेऽहं युष्मान् ५
प्रत्येलियं भाववादिनं प्रहेष्यामि। स सन्तानान् प्रति पितॄणां हृदयं, ६
पितॄन् प्रति च सन्तानानां हृदयं पर्य्यावर्त्तयिष्यति, नचेदहमागमन-
काले कृत्स्नं देशं वर्ज्जनसूचकेन शापेनाहनिष्यामि।